Sy 419/2

KASHI AYURVEDA SERIES 17

CAKRADATTA

(Text with English Translation)

A Treatise on
Principles and Practices of Ayurvedic Medicine

Edited and Translated by
PRIYA VRAT SHARMA
Former Director, Postgraduate
Institute of Indian Medicine
Banaras Hindu University

1995.776
UNIVERSITÄT HAMBURG
Institut für Kultur und Geschichte Indiens und Tibets
Neue Rabenstraße 3, 20354 Hamburg

CHAUKHAMBHA ORIENTALIA
A House of Oriental and Antiquarian Books
VARANASI **DELHI**

The publisher is grateful to the Indian National Science Academy for permission to print this monograph completed under the auspices of Indian National Commission for History of Science. The Academy is not responsible for the views expressed in the book.

Publishers :

CHAUKHAMBHA ORIENTALIA

P. O. Chaukhambha, Post Box No. 1032
Gokul Bhawan, K. 37/109, Gopal Mandir Lane
VARANASI - 221001 (India)
Telephone : 333476 Telegram : Gokulotsav

Branch— Bungalow Road, 9U B. Jawahar Nagar
(Near Kirorimal College)
Delhi—110007 Phone : 2911617, 238790

© *Chaukhambha Orientalia*

First Edition : **1994**

INDIAN BOOKS CENTRE
Exporters & International Booksellers
40/5, Shakti Nagar,
Delhi-110007 (India)
Phones : 7227336, 7126497

Printers— CHARU PRINTERS, Golghar, Varanasi-1
Printed at: Globe Offset Press, N.Delhi-110 002

INTRODUCTION

First of all, we record thanks to the Indian National Commission for History of Science for academic guidance and financial support for completing the monograph.

The text on medicine composed by Cakrapāṇidatta, the illustrious commentator on the Caraka-Saṃhitā, is entitled as 'Cikitsāsaṅgraha' commonly known as 'Cakradatta' presumably on the author's name as the 'Rugviniścaya' of Mādhavakara became popular as the 'Mādhavanidāna'. This work set a historical landmark in development of medical principles and practices in India. It inaugurated the medieval period and played a significant role in shaping the Indian medicine in later centuries and had impact even up to the modern times.

Niścala Kara (13th cent. A.D.) wrote an exhaustive and scholarly commentary on the Cakradatta entitled as 'Ratnaprabhā'. Unfortunately its exhaustiveness proved to be a demerit and perhaps due to this it lost its popularity gradually and as such Śivadāsa Sena (15th cent. A.D.) wrote another commentary based on the above but quite abridged which practically replaced it and continued as the only commentary on such an important work.

Date of Cakrapaṇidatta

Fortunatelly, we have informations direct from the author himself as furnished by him at the end of the Cakradatta and Āyurvedadīpikā[1]. As interpreted by Śivadāsa, according to this, Cakrapāṇi belonged to the Lodhrabali (Datta) family. His father Nārāyaṇa was kitchen-superintendent and minister of the king of Gauḍa (Nayapāla) and his elder brother, Bhānu, was attached as antaraṅga (court-physician) to the king. The date of Nayapāla is 1038-1055 A.D. Therefore, the date of Cakrapānidatta is generally accepted as 1060 A.D. D.C. Bhattacharya, twisting the above stanza containing the informations, says that Cakrapāṇidatta himself and not his father was minister to the king and as such his date should be fixed as 1040-60 A.D. But this argument is not convincing and thus Meulenbeld is right in pushing it forward. In my view, Cakrapāṇi himself seems to be attached to king Rāmapāla rather than Niścala Kara his commentator as proposed by Bhattacharya. The argument for this is the formulation 'Rāmamaṇḍūra' (27.42-45), which is most probably named after Rāmapāla. There was a practice of authors to name some of the formulations after his patron. For instance, there is one 'Siṃhaṇa Cūrṇa' in Soḍhala's Gadanigraha which is evidently named after king Siṃhaṇa of Yadava dynasty of Devagiri. Commenting on the name 'Rāmamaṇḍūra' both 'Niścala and Śivadāsa say that it is named so because it is formulated by Rāma.

1. गोडाधिनाथरसवत्यधिकारिपात्रनारायणस्य तनयः सुनयोऽन्तरङ्गात्।
भानोरनु प्रथितलोध्रबलीकुलीनः श्रीचक्रपाणिरिह कर्तृपदाधिकारी ॥

The word 'Bhānoranu' suggests more than what is interpreted. It does not mean only that Cakrapāṇi was younger than Bhānu but also that he succeeded him as antaraṅga of Gauḍādhinātha which might be Rāmapāla. The date of Rāmapāla is 1077-1120 A.D. therefore, there is enough scope for pushing the date of Cakrapāṇidatta further to 1100 A.D.

The reference of king Rāmapāla visiting the Bhiṣaṅmahāsatramaṇḍapa (O.P.D.) of the Ārogyaśāla (Royal Hospital) after giving audience to the king of Kāmarūpa[1], to my view, relates to Cakrapāṇi himself and this anecdote passed through tradition to Niścala Kara who recorded it in his commentary.

At one place, Ravigupta is said to be 'adūrāntara' (not very far) from Cakrapāṇi[2] but it is only in contrast to Suśruta who is very far.

Works

Eight works are recorded by previous historians as contributions of Cakrapāṇidatta as follows:

1. Āyurveda-dīpikā– Comm. on the Caraka-Saṃhitā which follows the ideas of Naradatta, the teacher of Cakrapāṇidatta[3].
2. Bhānumatī– Comm. on Suśruta-Saṃhitā.
3. Cakradatta
4. Vyagradaridraśubhaṅkara
5. Dravyaguṇa
6. Śabdacandrikā
7. Sarvasārasaṅgraha
8. Muktāvalī[4].

Niścala kara, the illustrious scholar and commentator on the Cakradatta, quotes only the first four works as of Cakrapāṇidatta. The fifth work, Dravyaguṇa, is commented upon by Śivadasa Sena who mentioned its author's name as 'Cakradatta' and 'Cakra' (int. Verse 4, 5). It certifies that this also is one of Cakra's works. Thus only these five works may be taken as the genuine contributions of Cakrapāṇidatta[5]. The Śabdacandrikā does not seem to be a work of cakra but may be of somebody else bearing the same name[6]. The last two works also are the least known and not quoted by Niścala Kara and other commentators as Cakrapāṇi's works.

---

1. 50.75-84
2. पिप्पल्यादिगण: स च सौश्रुत एव चक्रेण निबद्धः, अदूरान्तरत्वात्
   रविगुप्तोक्त एव वक्तुं युज्यते तत्प्रयोगत्वात्। (1,100-102)
3. नरदत्तगुरूद्दिष्टचरकार्थानुगामिनी। क्रियते चक्रदत्तेन टीकायुर्वेददीपिका॥
4. G.J. Meulenbeld: The Mādhavanidāna and its Chief Commentary, p. 400.
5. P.V. Sharma: Some new informations about Niścala's commentary on the Cakradatta, Paper presented in Workshop on Āyurveda, World Sanskrit Conference, Leiden, 1987.
6. Idem (ed.): Śabdacandrikā, C.C.R.A.S., New Delhi, 1989, int. pp. 5-8.

Sources of Cakradatta

A verse at the end of the Cakradatta clearly indicates that the text followed that of Vṛnda (Siddhayoga) making a number of additions thereto. These additions were necessitated by the demands of the time when may new developments like introduction of murcurial preparations took place. The main object was to present it as an uptodate text of medicine surpassing the preceding work (Siddhayoga). D.C. Bhattacharya takes it as a point of rivalry between the two schools. Any how, it is an admitted fact that Cakra's treatise became popular shortly and because of this gradually the Siddhayoga went into oblivion.

Niścala Kara has traced the sources of many verses of the Cakradatta. According to him, Cakra derived the verses in his text from the following sources :

1. Amitaprabha
2. Amṛtamālā
3. Āyurvedasāra
4. Ugrasena
5. Kāmarūpa
6. Kṛṣṇātreya
7. Kṣārapāṇi
8. Kharanāda
9. Gandhaśāstra
10. Cakṣuṣyeṇa
11. Candraṭa
12. Candraṭīya Tantrāntara
13. Caraka
14. Carakottaratantra
15. Cikitsākalikā
16. Cikitsātiśaya
17. Jatūkarṇa
18. Tantrāntara
19. Dṛḍhabala
20. Nāgārjuna
21. Nāvanīta
22. Parāśara

23. Puṣkalāvata
24. Bindusāra
25. Bṛhatttantrapradīpa
26. Bhadravarmā
27. Bhāluki
28. Bheḍa
29. Bhoja
30. Yogaśata
31. Ratnamālā
32. Ravigupta
33. Rasakrama (of Bhadravarmā)
34. Loharasāyana
35. Lohaśāstra
36. Vāgbhaṭa
37. Videha
38. Viśvasāra
39. Vṛddha(Vāgbhaṭa)saṃhitā
    Vṛddha Vaḡbhaṭa
40. Vṛddha Suśruta
41. Vṛnda
42. Vyagradaridraśubhaṅkara
43. Śālākya
44. Śālihotra
45. Śaivasiddhānta
46. (a) Siddhasāra
    (b) Siddhasāra
47. Suśruta
48. Haramekhalā
49. Hārīta

Sometimes he could not locate the exact source and took resort to tradition[1].

For comparison, it will be useful to trace the sources of Cakradatta as mentioned by Śivadāsa[2].

Importance of Cakradatta :

Cakradatta incorporates the advances in medicine made during two centuries after Vṛnda's Siddhayoga. This period is characterised mainly by the evolution of Rasa-Śāstra along with Loha-Śāstra and acceptance of Tantric practices in society. For the first time, Cakradatta prescribed mercurial preparations in treatment of various disorders[3]. About Rasaparpaṭī, it is said that it is described (first) by Cakrapāṇi[4].

Similarly, use of iron and other minerals are seen in advanced form. A large number of formulations contain these minerals.

Tantric practices are also prescribed in certain disorders such as in case of dificult labour, seminal retention, epilepsy etc. There are also some new therapeutic measures and formulations prescribed for treatment of certain disorders.

It has also described many techniques to tackle medical and surgical cases. For instance, the Kṣārasūtra and its application in sinus and fistula-in-ano is vividly described in Cakradatta which is absent in Vrnda's Siddhayoga. Thus Cakradatta stood as the first representative work of the medieval era which was accepted as a handbook of medicine in the Ayurvedic profession and continued to be so for centuries to follow. Even in modern age, Cakradatta is the foremost text of medicine followed by Bengali Kavirajas and the recent compilations like Bhaiṣajyaratnāvalī too owe much to it.

Contribution to Herbal Medicine :

India is a vast country having rich vegetation. Every region has got some peculiar herbs which have useful application in disorders prevalent there. Such a vast flora naturally could not be recorded in Nighaṇṭus and other therapeutic handbooks. Even today, there is a large number of herbs which are not recorded in any text of Nighaṇṭu.

Medical authors emerging from time to time in different regions have tried to record the therapeutic use of such herbs which were described in nighaṇṭus later on. For instance, Soḍhala, Madanapāla and Narahari represented Gujarat, Rajasthan and South India respectively. Similarly, Cakrapāṇidatta has recorded the medicinal use of herbs growing in Bengal. In Cakradatta, we find a number of new drugs among which the following are noteworthy :

1. अत्रापि मूलं नास्मदादिना दृष्टं वृद्धोपदेशो वा वृन्दस्य कल्पनीयः । (55.30).
2. Śivadāsa mentions only a few authors such as Caraka, Suśruta, Dṛḍhabala, Vāgbhaṭa, Agniveśa, Hārīta, Bhela, Bhālukitantra, Siddhasāra, Āyurvedasāra, Candraṭa, Bhoja and Sūdaśāstra.
3. See Tāmrayoga in Grahaṇīroga, Rasaguṭikā in Arśa, Rasendraguṭikā in Rājayakṣmā, Kṣudhāvatī guṭikā in Amlapita, Paniyabhaktavati in agnimandya, Kajjali in Masūrikā, Lokanātha Rasa in Plīhayakṛt and so on.
4. रसपर्पटिका ख्याता निबद्धा चक्रपाणिना । (4.92)

(1) **Amloṭaja (1.223):** Liquid gruel prepared from one thousand leaves of amloṭaja and added with ghee is useful in quartan fever. It may be Bauhinina malabarica Linn.

(2) **Aruṇa taṇḍulīyaka (54.23-24):** Red form of Amaranthus tristis Linn. Its use has been advocated in measles, pox and other eruptive fevers.

(3) **Aśanamallikā (58.28):** Commonly known as 'Āpharamallikā' or 'Hāpharamālī' (Vallaris solanacea O. Kuntze). 'Āsphotā' (50.133,146) is said to its synonym. Oil prepared from its flowers is said to be useful in nasal polypus.

(4) **Asthisaṃhāra (47.8):** Commonly used for bone healing. It is Cissus guadrangularis Linn.

(5) **Ābhā (22.72):** This is the first drug in the formulation 'Trayodaśāṅga guggulu' and main drug in 'ābhā-guggulu (49.14). In nighaṇṭus (Soḍhala, Kaiyadeva), ābhā is described separate from babbūla. Thus it cannot be a synonym of babbūla. However, it may be some Acacia sp.

(6) **Indrāśana (50.64):** Its powder is advocated for use in skin disorders and leprosy. Śivadāsa is silent on its identification. Niścala Kara says that if after its use there is by chance some psychic derangement, that may be treated by intake of sour gruel. It indicates that this drug has narcotic effect. Now they take it as bhaṅgā (Cannabis sativa Linn.).

(7) **Uṣṭrakaṇṭaka (54.7):** Its root is useful in pox. It is Echinops echinatus Roxb. Soḍhala has described it as 'Uttaṇḍaka'.

(8) **Kañcaṭa (3.38):** It is the main ingredient of the formulation 'Kañcaṭādi kvātha' useful in diarrhoea. It is Jusiaea repens Linn.

(9) **Kaṇṭākumbhāḍu (54.5):** Root is useful in pox. Bengali authors (Mādhava, Śrīkaṇṭhadatta) etc. have described it which indicates its prevalence in Bengal. It may be Capparis sp.

(10) **Karabhavāruṇī (67.57):** Used as aphrodisiac.

(11) **Karṇamoṭa (44.40):** Useful in wound healing.

(12) **Kalāyavidalī (42.67):** Used for destroying organisms in wound.

(13) **Kaśikā (27.63):** Useful in Parinamasula. 'Kāśī' (66.56) may also be the same.

(14) **Kāntakrāmaka (42.53):** Used externally in accidental wound.

(15) **Kālamāriṣa (52.28,37):** It is one of the ingredients in Kṣudhāvatī guṭikā. It may be Corchorus capsularis Linn. Śivadāsa takes it as Amaranthus sp. having big leaves.

(16) **Kālā (45.5:)** also as **'Kālāvakaḍa' (52.43):** It is known as 'Kālakaḍā' (Kālākarkaṭaka) which is Capparis zeylanica Linn. It is one of the ingredients of Kṣudhāvatī guṭikā.

(17) **Kukkuramenĉuka (63.58):** It root is to be chewed in the treatment of stanakīla in women. It may be Pavetta indica Linn. Sivadasa has interpreted it as 'Gorakṣataṇḍula' (Sida spinosa Linn.).

(18) **Kuṭhāraka (44.49,90,91):** Kuṭhārikā or Kuṭhāracchinnā (66.55) is also the same. It is used for killing iron. It may be Melothria heterophylla (Lour) Cogn.

(19) **Kulikā (65.6):** It is useful in snake poisoning. It is interpreted as 'Kūḍakarāni' which is Capparis sp. Kūṭakarāṇi (67.24) is also the same.

(20) **Kṛṣṇa vetra (50.61,154):** Used in treatment of leprosy. Also mentioned as Asitavetra' (53.20). It is Tiliacora racemosa Colebr.

(21) **Keśarāja (27.51; 52.39):** In Bengal, they take eclipta alba Haask as Keśarāja and Wedelia chinensis Merrill as Bhṛṅgarāja. 'Keśarāja' is read separate from 'Bhṛṅgarāja' (52.39, 66.55,56).

(22) **Khaṇḍakarṇa (52.27, 43):** It may be Commelina bengalensis Linn. used in amlapitta.

(23) **Khadirī (33.12):** Its seeds are useful for stone and obstruction in urine. It may be Acacia pennata Willd.

(24) **Gaṅgāpālaṅka (5.177):** Used in treatment of piles. It may be Sonchus arvensis Linn.

(25) **Godhāvatī (33.11; 42.15):** Used in suppression of urine and filaria.

(26) **Carmakārāluka (67.25):** This was used as substitute of Vārāhīkanda[1]. It is Dioscorea esculenta Burkill.

(27) **Javāpuṣpa (53.120, 124;62.25):** Used as emmanogogue and hair-dye. Very common in Bengal as 'Javākusuma'. It is Hibiscus rosa-sinensis Linn.

(28) **Jyotsnikā (5.113):** External application of root is advocated in bleeding piles. It may be Polygonum barbatum Linn.

(29) **Tṛṇaka (50.24,125):** Good remedy for ring worm. It may be Xyris pauciflora Willd.

(30) **Devapuṣpī (22.268):** Commonly known as 'devahulī', one of the aromatic substances.

(31) **Naravṛkṣa[2] (55.123):** May be identical with Narapuspa of Soḍhala-nighaṇṭu which is provisionally identified as Indigofera sp.

(32) **Nāḍīca (50.161):** Seeds are used as one of the ingredients in Pṛthvīsāra taila indicated in treatment of leprosy. It is Corchorus olitarius Linn.

(33) **Pāmarā (22.269):** Probably denotes turuṣka (Styrax officinalis Linn.).

---

1. वाराहीकन्दस्य दुर्लभतया चर्मकारालुकमेव गौडीयैर्वाराहीकन्दसंज्ञया गृह्यते I Śivadāsa's Comm.
2. As read by Niścala. Śivadāsa reads as 'naradugdha'.

(34) **Peṭikā (62.17;64.32):** Also as peṭī. May be Abutilon hirtum (Lam.) Sweet called as 'Jhampi' in Bengal.

(35) **Pratyaṅgirā (65.2):** Useful in snake poisoning. Commentators interpret it as kaṇṭaki śirīṣa which may be Acacia lenticularis Ham.

(36) **Prasāraṇī (22.195, 214 etc):** Prasāraṇī of the other texts is one of the types of balā (rājabalā) but Bengali commentators take gandhabhāduliā which is Paederia foetida Linn.

(37) **Babbūla (47.10):** Acacia arabica Willd. It may be noted that there is no use of babbūla mentioned in earlier texts.

(38) **Bṛhatpatra (52.31):** Used in fever and purification of iron.

(39) **Maghī (54.5):** Root used in pox.

(40) **Madhurī (22.254, 268):** The Bengali name of Sauṃpha (Foeniculum vulgare Mill).

(41) **Mahārāṣṭrī (44.47):** Useful in burn. It is Spilanthus oleracea Murr. Soḍhala has described it.

(42) **Māṇaka (37.57; 39.39):** It is commonly known as 'Mānakanda' and is useful in dropsy and abdominal enlargement. It is Alocasia indica (Roxb.) Schott.

(43) **Mucakunda (60.2):** Flowers are applied externally in headache. It is Pterospermum acerifolium Willd.

(44) **Rudrajaṭā (33.12; 40.20):** Root is used in urinary obstruction and Calculus and also in scrotal enlargement. Bengali Kavirajas take Īśwaramūla (Aristolochia indica Linn.) as Rudrajaṭā.

(45) **Lavaṅgavallī[1] (22.275):** Fruits are aromatic. It is Luvunga scandens Ham.

(46) **Śāliñca (52.28,30;66.56):** Very popular potherb in Bengal. It is the Bengali name of Matsyākṣaka (Alternanthera sessilis R.Br.).

(47) **Śītalī (34.37):** Used in treatment of Calculus.

(48) **Śṛgālakaṇṭaka (54.8):** Root is useful in pox. Now-a-days by 'Seyāl Kāñṭā' Bengali physicians take Argemone mexicana Linn.

(49) **Śṛgālakolī (44.58):** It is Zizyphus oenoplia Mill known as Jackal jujube.

(50) **Śveta Jayantī (50,74):** Root useful in leucoderma.

(51) **Śveta balā (27.42;62.32):** It is Sida rhomboidea Roxb. the flowers of which are of pale colour.

---

1. In text it is read as 'Lavangachhalli' which has no meaning.

(52) **Sikaṭī (54.5) :** Used in pox. May be Flueggea obovata Baill.

(53) **Sudarśanā (50.23): Sudarśanā** is very popular among Bengali Kavirajas. It is Crinum latifolium Linn.

(54) **Sūryāvartta (57.47,49) :** In Bengal, they take it as hulhul (Cleome icosandra Linn.) Śveta sūryāvata is interpreted as 'Jāmātṛ sūryāvarta' which is Gynandropsis gynandra (Linn.) Biquet.

(55) **Sthalapadma (39.19,40):** Used in dropsy. It is interpreted as māṇaka by Bengali commentators. Now-a-days an orgnamental plant Hibiscus mutabilis Linn. is said as 'sthalakamala'.

(56) **Sphuṭaka (64.13) :** Used in children's disorder 'anāmaka'.

(57) **Srāviṇī (23.75) :** It is one of the ingredients in Bṛhad guḍūcī taila for treatment of vātarakta.

(58) **Hastikarṇapalāśa (66.19, 55 et):** Root externally applied in goitre and also useful as Rasāyana and for purification of iron. It is Leea macrophylla Roxb.

(59) **Hilamocikā (54.2) :** Its juice is given in pox. It is Enhydra fluctuans Lour.

Now a number of Ayurvedic texts including saṃhitās are available in English translation but no work on Ayurvedic medicine was available for the English-knowing people. Keeping this in view and also looking to its historical importance the work has been translated into English. As for the text, I have followed the Calcutta edition with Śivadāsa's comm. which is the basis of the Chaukhamba edition too.

There are typical disease– syndromes and their terms in Āyurveda. I have tried to interpret them but due to limitation of space it was not possible to explain all of them. For that the readers may consult, apart from the saṃhitās, Mādhavanidāna, the popular treatise on description of diseases, which is now available with a good English translation by Prof.K.R.Srikanta Murthy.

I extend my thanks to Head, Deptt. of Medicinal Chemistry, I.M.S., B.H.U. for providing necessary facilities.

I am also thankful to Dr. S.D. Dube, Reader, Deptt. of Dravyaguna, B.H.U. for preparing the appendix and index and assisting in the preparation of the typescript.

The Chaukhambha Orientalia, Varanasi also deserves thanks and appreciation for bringing out this book nicely and promptly.

Gurudham, Varanasi — Priya Vrat Sharma
Gandhi-Jayanti, 1993

[illegible] used in pox. May be *Tamāla* (Cinnamomum tamala) [illegible]

[illegible] (56.33). *Sudarśana* [illegible] is [illegible]

(5[illegible]) *Sunisanna* (57.47; 63.[illegible]) [illegible] Bengal [illegible] it is [illegible]

(5[illegible]) [illegible] Bengali [illegible] as [illegible]

(56) *Sonapaka* (64.1311) Used in children's disorder [illegible]

(57) *Sravini* (23.75) [illegible] one of the ingredients in *Brhad guduci taila* for treatment of [illegible]

(58) *Hastikarnapalasa* (60.[illegible], 55 etc.) [illegible] extensively applied in [illegible] and [illegible]

Rasayana and [illegible] macrophylla [illegible]

(59) *Hilamocika* (54.22) [illegible] is [illegible] fluctuans [illegible]

Now a number of Ayurvedic texts including [illegible] are available in English translation but no work on Ayurvedic medicine was available for the English knowing people. Keeping this in view and also looking to its historical importance the work has been translated into English. As for the text, I have followed the Calcutta edition with Sivadasa's comm. which is the basis of the Chaukhamba edition too.

There are typical diseases-syndromes and their terms in Ayurveda. I have tried to interpret them but due to limitation of space it was not possible to explain all of them. For that the readers may consult, apart from the samhitas, *Madhavanidana*, the popular treatise on description of diseases, which is now available with a good English translation by Prof K.R. Srikanta Murthy.

I extend my thanks to Head, Deptt. of Medicinal Chemistry, I.M.S., B.H.U. for providing necessary facilities.

I am also thankful to Dr. S.D. Dubey, Reader, Deptt. of Dravyaguna, B.H.U. for preparing the appendix and index and assisting in the preparation of the typescript.

The Chaukhambha Orientalia, Varanasi also deserves thanks and appreciation for bringing out this book nicely and promptly.

Gurudham, Varanasi — Priya Vrat Sharma

Gandhi-Jayanti, 1993

CONTENTS

Chapters	Topics	Page no.
I	Treatment of jvara (fever)	3-42
II	Treatment of jvarātīsāra (fever associated with diarrhoea)	43-46
III	Treatment of atīsāra (diarrhoea)	47-60
IV	Treatment of grahaṇī	61-72
V	Treatment of arśa (piles)	73-90
VI	Treatment of agnimāndya (deficient digestion) etc.	91-102
VII	Treatment of krimi (worms)	103-105
VIII	Treatment of pāṇḍuroga (anaemia)	106-112
IX	Treatment of raktapitta (innate haemorrhage)	113-123
X	Treatment of yakṣmā (consumption)	124-134
XI	Treatment of kāsa (cough)	135-144
XII	Treatment of hikkā-śvāsa (hiccough and dyspnoea)	145-149
XIII	Treatment of svarabheda (hoarseness of voice)	150-152
XIV	Treatment of arocaka (anorexia)	153-155
XV	Treatment of chardi (vomiting)	156-160
XVI	Treatment of tṛṣṇā (polydipsia)	161-164
XVII	Treatment of mūrcchā (fainting)	165-166
XVIII	Treatment of madātyaya (alcoholism)	167-169
XIX	Treatment of dāha (burning sensation)	170-171
XX	Treatment of unmāda (insanity)	172-178
XXI	Treatment of apasmāra (epilepsy)	179-182
XXII	Treatment of vātavyadhi	183-214
XXIII	Treatment of vātarakta	215-223
XXIV	Treatment of ūrustambha (paraplegia)	224-226
XXV	Treatment of āmavāta	227-236
XXVI	Treatment of śūla (colic)	237-248
XXVII	Treatment of pariṇāmaśūla	249-258
XXVIII	Treatment of udāvartta (upward movement of vāyu)	259-262
XXIX	Treatment of ānāha (hardness of bowels)	263-265
XXX	Treatment of gulma (abdominal lump)	266-277
XXXI	Treatment of hṛdroga (heart disease)	278-283

XXXII	Treatment of mūtrakṛcchra (dysuria)	283-288
XXXIII	Treatment of mūtrāghāta (retention of urine)	289-292
XXXIV	Treatment of aśmarī (calculus)	293-299
XXXV	Treatment of prameha	300-307
XXXVI	Treatment of sthaulya (obesity)	308-312
XXXVII	Treatment of udara (abdominal enlargement)	313-321
XXXVIII	Treatment of plīha-yakṛi (spleen-liver)	322-327
XXXIX	Treatment of śotha (oedema)	328-336
XL	Treatment of vṛddhi-bradhna (scrotal enlargement)	337-341
XLI	Treatment of galagaṇḍa (goitre), gaṇḍamālā (cervical adenitis), apacī (scrofula), granthi (cyst) and arbuda (tumour)	342-350
XLII	Treatment of ślīpada (filaria)	351-354
XLIII	Treatment of vidradhi (abscess)	355-357
XLIV	Treatment of vraṇaśotha (inflammation)	358-371
XLV	Treatment of nāḍīvraṇa (sinus)	372-375
XLVI	Treatment of bhagandara (fistula-in-ano)	376-379
XLVII	Treatment of upadaṃśa (soft chancre)	380-382
XLVIII	Treatment of śūkadoṣa	383-384
XLIX	Treatment of bhagna (fracture)	385-388
L	Treatment of kuṣṭha (leprosy)	389-409
LI	Treatment of udarda, koṭha and śītapitta (allergic manifestations)	410-411
LII	Treatment of amlapitta (acid gastritis)	412-419
LIII	Treatment of visarpa (erysipelas) and visphoṭa (boils)	420-426
LIV	Treatment of masūrikā (chicken pox)	427-433
LV	Treatment of kṣudraroga (minor diseases)	434-450
LVI	Treatment of mukharoga (diseases of mouth)	451-468
LVII	Treatment of karṇaroga (diseases of ear)	469-476
LVIII	Treatment of nāsāroga (diseases of nose)	477-481
LIX	Treatment of netraroga (diseases of eye)	482-514
LX	Treatment of śiroroga (head-diseases)	515-523
LXI	Treatment of asṛgdara (menorrhagia, metrorrhagia)	524-527
	Treatment of yonivyāpad (diseases of female genital tract)	528-535
	Treatment of strīroga (diseases of women)	536-544

LXIV	Treatment of bālaroga (diseases of children)	545-566
LXV	Treatment of viṣa (poisoning)	567-572
LXVI	On Rasāyana (promotive therapy)	573-594
LXVII	On Vṛṣya (aphrodisiac therapy)	595-601
LXVIII	On Sneha (unction)	602-606
LXIX	On Sveda (sudation)	607-609
LXX	On Vamana (emesis)	610-613
LXXI	On Virecana (purgation)	614-618
LXXII	On Anuvāsana (unctuous enema)	619-624
LXXIII	On Nirūha (non-unctuous enema)	625-629
LXXIV	On Nasya (nasal therapy)	630-633
LXXV	On Dhūmapāna (smoking)	634-635
LXXVI	On Kavala-gaṇḍuṣa (gargles)	636-637
LXXVII	On Āścyotana (eye drops), añjana (collyrium), tarpaṇa (saturation) and puṭapāka	638-642
LXXVIII	On Sirāvyadha (venesection)	643-646
LXXIX	On Sustha (Code of conduct for the healthy)	647-653
Appendix I–	Plant names with botanical identification	654-708
Appendix II–	Units of weight with metric equivalents	709
Index I –	Diseases	710-714
II –	Drug formulations	715-729
III–	General	730-731

॥ श्रीः ॥

श्रीचक्रपाणिदत्तविरचितश्चिकित्सा-
सङ्ग्रहापरपर्यायः

चक्रदत्तः

CAKRAPĀṆIDATTA'S

CAKRADATTA (CIKITSĀSAṄGRAHA)

१. प्रथमोऽध्याय

CHAPTER I

ज्वर-चिकित्सा

Treatment of Jvara (fever)

गुणत्रयविभेदेन मूर्त्तित्रयमुपेयुषे। त्रयीभुवे त्रिनेत्राय त्रिलोकीपतये नमः ॥ १ ॥

Salutation to the Three-eyed Lord of three worlds who takes the Three forms of (Brahmā, Viṣṇu and Maheśa) according to predominance of three guṇas (attributes) and is the source of three Vedas. [1]

नानाऽऽयुर्वेदविख्यातसद्योगैश्चक्रपाणिना। क्रियते सङ्ग्रहो गूढवाक्यबोधकवाक्यवान् ॥ २ ॥

The work is composed by Cakrapāṇi compiling efficacious formulations from various medical texts along with explanatory notes on difficult statements. [2]

चिकित्साक्रमः

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् ॥ ३ ॥

One should examine the disease first, then the drug and thereafter should proceed, with full knowledge, for the treatment. [3]

नवज्वरे वर्जनीयानि

नवज्वरे दिवास्वप्नस्नानाभ्यङ्गान्नमैथुनम्। क्रोधप्रवातव्यायामकषायांश्च विवर्जयेत् ॥ ४ ॥

In acute fever, the patient should abstain from day-sleep, bath, anointing, food, sexual intercourse, anger, wind, exercise and astringent decoctions. [4]

ज्वरादौ लङ्घनविधिः

ज्वरे लङ्घनमेवादावुपदिष्टमृते ज्वरात्। क्षयानिलभयक्रोधकामशोकश्रमोद्भवान् ॥ ५ ॥

At first, fasting should be observed in fever except that caused by wasting, vāyu, fear, anger, passion, anxiety and exertion. [5]

आमाशयस्थो हत्वाऽग्निं सामो मार्गान् पिधापयन्। विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥ ६ ॥
अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्। ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥ ७ ॥

Doṣa situated in āmāśaya (stomach) having damaged the digestive fire and being associated with āma which obstructs the channels causes fever and as such fasting is significant (in such condition). Fasting in this state of instability of doṣa and agni works as digestive for the doṣa, allays fever, stimulates agni and generates appetite, relish and lightness. [6-7]

प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत्। बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः॥ ८॥

Proper care should be taken in observing fast so that it does not affect the strength adversely as recovery for which the treatment is done depends on strength. [8]

लङ्घनानर्हाः

तत्तु मारुतक्षुत्तृष्णामुखशोषभ्रमान्विते। कार्य्यं न बाले वृद्धे वा न गर्भिण्यां न दुर्बले॥ ९॥

This should not be prescribed in fever associated with vāyu, hunger, thirst, dryness of mouth and giddiness nor in children, old and debilitated persons and pregnant women. [9]

सुलङ्घितलक्षणम्

वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे। हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते॥ १०॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये। कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि॥ ११॥

Fasting should be taken as sufficiently done when wind, urine and faeces are eliminated properly, lightness comes in the body; heart, eructation, throat and mouth are purified; drowsiness and depression disappear, perspiration sets in, relish recovers, hunger and thirst appear simultaneously and mind is free from distress. [10-11]

अतिकृतलङ्घनस्य लक्षणम्

पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च। क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः॥ १२॥
मनसः सम्भ्रमोऽभीक्ष्णमूर्ध्ववातस्तमो हृदि। देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत्॥ १३॥

If fasting is done excessively the following complications arise- pain in joints, body-ache, cough, dryness of mouth, loss of appetite and relish, thirst, diminution in hearing and vision, mental confusion, upward movement of wind, loss of consciousness and deficiency of body-heat and strength. [12-13]

वमनकालः

सद्योभुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते। वमनं वमनार्हस्य शस्तमित्याह वाग्भटः॥ १४॥

Emesis is applied in case of fever arisen just after taking food or caused by saturation when the patient is fit for the procedure- thus said Vāgbhata. [14]

कफप्रधानानुत्क्लिष्टान् दोषानामाशयस्थितान्। बुद्ध्वा ज्वरकरान् काले वम्यानां वमनैर्हरेत्॥ १५॥

Knowing predominance of Kapha among the doṣas situated in āmāśaya which cause fever and tend to come out one should eliminate them by emesis in proper time and in persons fit for the same. [15]

अनुपस्थितदोषाणां वमनं तरुणे ज्वरे। हृद्रोगं श्वासमानाहं मोहञ्च कुरुते भृशम्॥ १६॥

If, in acute fever, emesis is induced when the doṣas do not tend to come out, it may

cause complications such as cardiac distress, dyspnoca, windy hardness in bowels and mental confusion. [16]

जलप्रयोग:

तृष्यते सलिलञ्चोष्णं दद्याद्वातकफज्वरे। मद्योत्थे पैत्तिके वाऽपि शीतलं तिक्तकैः शृतम्॥ १७॥

In fever cause by vāta and kapha, warm water should be given to quench thirst while, for the same purpose, in fever caused by alcoholic drink or pitta cold water processed with bitter drugs should be used. [17]

दीपनं पाचनञ्चैव ज्वरघ्नमुभयञ्च तत्। स्रोतसां शोधनं बल्यं रुचिस्वेदप्रदं शिवम्॥ १८॥

Both the above types of water are appetiser, digestive, antipyretic, cleanser of channels, tonic, prompters of relish and perspiration and generally wholesome. [18]

षडङ्गपानीयम्

मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः। शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये॥ १९॥

Ṣaḍaṅga pānīya

To allay thirst and fever, cold water processed with musta, parpaṭaka, uśīra, candana, udīcya and śuṇṭhī should be given. [19]

नवज्वरे मुख्यभेषजनिषेध:

मुख्यभेषजसम्बन्धो निषिद्धस्तरुणे ज्वरे। तोयपेयाऽऽदिसंस्कारे निर्दोषं तेन भेषजम्॥ २०॥

The use of main drug as such is contra-indicated in acute fever, while the drug used in processing of water, gruel etc. is harmless. [20]

षडङ्गपानीयस्य निर्माणविधि:

यदप्सु शृतशीतासु षडङ्गादि प्रयुज्यते। कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि॥
अर्द्धशृतं प्रयोक्तव्यं पाने पेयाऽऽदिसंविधौ॥ २१॥

In preparation of cold water processed with Ṣaḍaṅga (having six ingredients as in v. 19), the drugs in the quantity of 10 gm should be boiled in water 1.28 litre. (1 Prastha amounts to 640 ml. but, according to tradition, quantities over Kuḍava are doubled) and reduced to one-half (eg., 640 ml.). This water should be used for drinking and processing of gruels etc. [21]

यवागू-प्रयोग:

वमितं लङ्घितं काले यवागूभिरुपाचरेत्। यथास्वौषधिसिद्धाभिर्मण्डपूर्वाभिरादितः॥ २२॥
लाजपेयां सुखजरां पिप्पलीनागरैः शृताम्। पिबेज्ज्वरी ज्वरहरां क्षुद्वानल्पाग्निरादितः॥ २३॥
पेयां वा रक्तशालीनां पार्श्ववस्तिशिरोरुजि। श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरां पिबेत्॥ २४॥
कोष्ठे विबद्धे सरुजि पिबेत् पेयां शृतां ज्वरी। मृद्वीकापिप्पलीमूलचव्यचित्रकनागरैः॥ २५॥

पञ्चमूल्या लघीयस्या गुर्व्या ताभ्यां सधान्यया। कणया यूषपेयाऽऽदिसाधनं स्याद् यथाक्रमम्॥ २६॥
वातपित्ते वातकफे त्रिदोषे श्लेष्मपित्तजे। यवागूः स्यात् त्रिदोषघ्नी व्याघ्रीदुःस्पर्शगोक्षुरैः॥ २७॥

The patient after having undergone the procedures of emesis and fasting should be served in time with gruels beginning with scum processed with respective drugs.

To start with, the patient having appetite but mild digestive fire should take liquid gruel of parched paddy processed with pippalī and śuṇṭhī. This is digested easily and allays fever.

To alleviate fever complicated with pain in chest, pelvis and head; one should take liquid gruel of red śāli rice processed with gokṣura and kaṇṭakārī.

If there is constipation attended with pain, the patient should take liquid gruel processed with drākṣā, pippalīmūla, cavya, citraka and śuṇṭhī.

Processing of soup, liquid gruel etc, with laghu pañcamūla, bṛhat pañcamūla, daśamūla and dhānyaka-pippali is recommended in cases of vāta-pitta, vāta-kapha, tridoṣa and kapha-pitta.

Gruel processed with kaṇṭakārī, durālabhā and gokṣura alleviates the three doṣas. [22-27]

यवाग्वादिकल्पना

कर्षार्द्धं वा कणाशुण्ठ्योः कल्कद्रव्यस्य वा पलम्। विनीय पाचयेद् युक्त्या वारिप्रस्थेन चापराम्॥

In other cases, gruel should be processed with the paste of pippalī and śuṇṭhī each 5 gm or of other drugs 40 gm in water 1.28 litre. [28]

षडङ्गपरिभाषैव प्रायः पेयादिसम्मता॥ २९॥

Generally, the method of preparation of the Ṣaḍaṅga pānīya is followed in case of liquid gruels etc. too. [29]

यवागूमुचिताद्भक्ताच्चतुर्भागकृतां वदेत्॥ ३०॥

In gruel the quantity of rice should be one-fourth of the usual diet. [30]

यवाग्वादिलक्षणम्

सिक्थकै रहितो मण्डः पेया सिक्थसमन्विता। यवागूर्बहुसिक्था स्याद्विलेपी विरलद्रवा॥ ३१॥

Maṇḍa (scum) is totally devoid of grains, peyā (liquid gruel) contains a little, while yavāgū (gruel) consists of profuse quantity of grains; vilepī (paste-like preparation) contains little liquid. [31]

अन्नादिसाधने जलस्य मात्रा

अन्नं पञ्चगुणे साध्यं विलेपी तु चतुर्गुणे। मण्डश्चतुर्दशगुणे यवागूः षड्गुणेऽम्भसि॥ ३२॥

As regards the quantity of water required for cooking, it should be four, five, six and

fourteen times in cases of rice-paste, boiled rice, gruel and scum respectively. [32]

यवागूनिषेधः

पांशुधाने यथा वृष्टिः क्लेदयत्यतिकर्दमम्। तथा श्लेष्मणि संवृद्धे यवागूः श्लेष्मवर्द्धनी ॥ ३३ ॥
मदात्यये मद्यनित्ये ग्रीष्मे पित्तकफाधिके। ऊर्ध्वगे रक्तपित्ते च यवागूरहिता ज्वरे ॥ ३४ ॥

As the rains moistening a heap of dust convert it excessively into mud, gruel applied in increased kapha aggravates it further.

Gruel is contra-indicated in fever in cases of alcoholism, alcoholic addicts, summer, excess of pitta and kapha and innate haemmorrhage directed upwards. [33-34]

तर्पणम्

तत्र तर्पणमेवाग्रे प्रदेयं लाजशक्तुभिः। ज्वरापहैः फलरसैर्युक्तं समधुशर्करम् ॥ ३५ ॥
द्रवेणालोडितास्ते स्युस्तर्पणं लाजशक्तवः ॥ ३६ ॥

In such cases, saturation should be provided with parched paddy flour and fruit juices which allay fever added with honey and sugar.

Parched paddy flour mixed with liquid is known as 'tarpaṇa' (Saturating drink). [35-36]

पथ्यविशेषाः

श्रमोपवासानिलजे हितो नित्यं रसौदनः। मुद्गयूषौदनश्चापि देयः कफसमुद्भवे ॥
स एव सितया युक्तः शीतः पित्तज्वरे हितः ॥ ३७ ॥

In fever caused by exertion, fasting and vāyu regular diet of rice with meat-soup is wholesome. In fever caused by kapha, rice with the soup of green gram and in that caused by pitta the same cold and added with sugar should be taken. [37]

पथ्यानि

रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह। यवाग्वोदनलाजार्थे ज्वरितानां ज्वरापहाः ॥ ३८ ॥
मुद्गामलकयूषस्तु वातपित्तात्मके हितः। ह्रस्वमूलकयूषस्तु कफवातात्मके हितः।
निम्बकुलकयूषस्तु हितः पित्तकफात्मके ॥ ३९ ॥
मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ठकान्। आहारकाले यूषार्थे ज्वरिताय प्रदापयेत् ॥ ४० ॥
पटोलपत्रं वार्त्ताकुं कुलकं कारवेल्लकम्। कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम्।
पत्रं गुडूच्याः शाकार्थे ज्वरिताय प्रदापयेत् ॥ ४१ ॥
ज्वरितो हितमश्नीयाद् यद्यप्यस्यारुचिर्भवेत्। अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथ वा ॥ ४२ ॥

For the patients of fever, old red Śāli and Ṣaṣṭika rice which allay fever are used for preparing gruel, boiled rice and parched paddy.

The soup of green gram and āmalaka is beneficial in fever caused by vātapitta, Similarly the soup of tender radish is useful in that caused by kapha and vāta. The soup of nimba and paṭola is wholesome in fever caused by pitta and kapha.

Green gram, lentils, bengal gram, horse gram and makuṣṭhaka should be given in the form of soup as diet to the patients of fever.

The following vegetables are wholesome to the patients of fever— paṭola (fruits and leaves) brinjal, kāraveltaka, karkoṭaka, parpaṭaka, gojihvā, tender radish and guḍūcī (leaves).

Even there is no appetite the patient should take some wholesome diet as by not eating in time he falls prey to debility or death. [38-42]

अरुचिचिकित्सा

अरुचौ मातुलुङ्गस्य केशरं साज्यसैन्धवम्। धात्रीद्राक्षासितानां वा कल्कमास्येन धारयेत्॥ ४३॥

In case of want of relish for food, one should keep in mouth the pieces of mātuluṅga (lemon) mixed with ghee and salt for the paste of āmalakī and drākṣā mixed with sugar. [43]

पथ्यस्य प्रियत्वापादनम्

सातत्यात् स्वाद्वभावात् वा पथ्यं द्वेष्यत्वमागतम्। कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत् पुनः॥ ४४॥

If the patient develops aversion to wholesome diet due to long use or distaste, it should be made agreeable by various processings. [44]

भोजनकाल:

ज्वरितं ज्वरमुक्तं वा दिनान्ते भोजयेल्लघु। श्लेष्मक्षये विवृद्धोष्मा बलवाननलस्तदा॥ ४५॥
गुर्वभिष्यन्द्यकाले च ज्वरी नाद्यात् कथञ्चन। न हि तस्याहितं भुक्तमायुषे वा सुखाय वा॥ ४६॥

Light diet should be given to the patients either during fever or afebrile state in the close of the day as then the digestive fire is strong because of increase of heat due to diminution of kapha.

One suffering from fever should not eat heavy or channel— obstructing diet nor in improper time as the unwholesome eating does not contribute to his longevity or happiness. [45-46]

तरुणज्वरे पाचनानि

लङ्घनं स्वेदनं कालो यवाग्वस्तिक्तको रसः। पाचनान्यविपक्वानां दोषाणां तरुणे ज्वरे॥ ४७॥

Lightening, sudation, time, gruels and bitters act as digestant for the immature doṣas in acute fever. [47]

ज्वरस्य तारुण्यादिकाल:

आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः। मध्यं द्वादशरात्रन्तु पुराणमत उत्तरम्॥ ४८॥

[illegible] seven days the fever is called as 'taruṇa' (acute), up to twelve days as 'madhya' [illegible]te) and thereafter 'purāṇa' (chronic). [48]

नवज्वरिण: कषायपाने नियम:

पाचनं शमनीयं वा कषायं पाययेत्तु तम्। ज्वरितं षडहेऽतीते लध्वन्नप्रतिभोजितम्॥ ४९॥
सप्ताहात् परतोऽस्तब्धे सामे स्यात् पाचनं ज्वरे। निरामे शमनं स्तब्धे सामे नौषधमाचरेत्॥ ५०॥

The patient of fever, after the period of six days is over, should be given light diet and then digestive (in case of āma) or pacifying (if āma is absent) drug should be administered to him.

After a week, digestive should be applied in fever associated with stiffened āma and pacifying remedy in absence of āma. In case of stiffened āma no drug is to be administered. [49-50]

सामज्वरस्य लिङ्गानि

लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः। तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता॥ ५१॥
क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः। आमज्वरस्य लिङ्गानि, न दद्यात्तत्र भेषजम्॥ ५२॥
भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्॥ ५३॥

Salivation, nausea, heaviness in cardiac region, absence of relish, drowsiness, lassitude, indigestion, abnormal taste in mouth, heaviness in body, loss of appetite, polyuria, stiffness and high temperature — these are the symptoms of fever associated with āma. [51-52]

In the above conditions no drug should be administered as it further aggravates the fever. [53]

निरामलक्षणम्

मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम्॥ ५४॥

In fever when temperature has receded, there is lightness in body and excreta are moving-these are indications of maturation of doṣas and it is in this state that drug is to be administered. [54]

नागरं देवकाष्ठञ्च धन्याकं बृहतीद्वयम्। दद्यात् पाचनकं पूर्वं ज्वरिताय ज्वरापहम्॥ ५५॥

Nāgara (Śuṇṭhī), devadāru, dhānyāka, bṛhatī and kaṇṭakārī — this formulation is applied in the beginning as digestive in case of fever which alleviates the disease. [55]

औषधनिषेध:

पीताम्बुर्लङ्घितः क्षीणोऽजीर्णी भुक्तः पिपासितः। न पिबेदौषधं जन्तुः संशोधनमथेतरत्॥ ५६॥

The person who has drunk water, is fasted, emaciated and suffering from indigestion, hunger and thirst should not take evacuative or pacifying drugs. [56]

वीर्य्याधिकं भवति भेषजमन्नहीनं हन्यात् तदामयमसंशयमाशु चैव।
तद्बालवृद्धयुवतीमृदुभिश्च पीतं ग्लानिं परां नयति चाशु बलक्षयञ्च॥ ५७॥

Drug, if administered on empty stomach, becomes more potent and as such alleviates the disease without fail and delay but the same taken by children, old people, women and delicate persons leads to extreme depression and debility. [57]

औषधपाकलक्षणम्

अनुलोमोऽनिलः स्वास्थ्यं क्षुत् तृष्णा सुमनस्कता। लघुत्वमिन्द्रियोद्गारशुद्धिजीर्णौषधाकृतिः ॥ ५८ ॥

Vāyu normalised in its course, general normalcy, hunger, thirst, feeling of well-being, lightness and clarity of senses and eructation — these are the signs of complete digestion of the drug. [58]

अजीर्णौषधलक्षणम्

क्लमो दाहोऽङ्गसदनं भ्रमो मूर्च्छा शिरोरुजा। अरतिर्बलहानिश्च सावशेषौषधाकृतिः ॥ ५९ ॥

Feeling of exhaustion, burning sensation, lassitude, giddiness, fainting, headache, restlessness and loss of strength — these indicate that the drug is not fully digested. [59]

अजीर्णान्नौषधयोरौषधान्नसेवने दोषः

औषधशेषे भुक्तं पीतन्न तथौषधं सशेषेऽन्ने। न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च ॥ ६० ॥

Intake of food in condition of undigested drug or that of drug in case of indigestion of food does not alleviate the disease, instead it gives rise to other diseases. [60]

भोजनावृतभेषजगुणाः

शीघ्रं विपाकमुपयाति बलं न हिंस्यादन्नावृतं न च मुहुर्वदनान्निरेति।
प्राग्भुक्तसेवितमथौषधमेतदेव दद्याच्च वृद्धशिशुभीरुवराङ्गनाभ्यः ॥ ६१ ॥

Drug taken with food and as such covered by it undergoes digestion quickly, does not affect strength adversely and come out of mouth. The same taken just before meal has the same properties. Such administration is suitable for the old people, children, weak and women. [61]

मात्रानिर्धारणम्

मात्राया नास्त्यवस्थानं दोषमग्निं बलं वयः। व्याधिं द्रव्यञ्च कोष्ठञ्च वीक्ष्य मात्रां प्रयोजयेत् ॥ ६२ ॥

There is no fixity of dose of drugs. It should be decided according to doṣa, digestive fire, strength, age, disease, drugs and bowels. [62]

त्रिविधा मात्रा

उत्तमस्य पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमे। जघन्यस्य पलार्द्धेन स्नेहक्वाथ्यौषधेषु च ॥ ६३ ॥

However, in respect of fatty preparations (ghṛta etc), decoctions and juice etc. high, medium and low doses are 40 gm, 30 gm and 20 gm respectively. [63]

क्वाथकल्पना

कर्षादौ तु पलं यावद्दद्यात् षोडशिकं जलम्। ततस्तु कुडवं यावत् तोयमष्टगुणं भवेत्।।
क्वाथ्यद्रव्यपले कुर्यात् प्रस्थार्द्धं पादशेषितम्।। ६४।।

For drugs from 10 gm to 40 gm water should be added sixteen times, thereafter up to 160 gm the quantity of water should be eight times. For instance, if the decoctive drug is 40 gm the decoction reduced to one-fourth (after boiling in sixteen times water) should be 1/2 prastha (640 ml. after doubling). [64]

द्वात्रिंशन्माषकैर्माषश्चरकस्य तु तैः पलम्। अष्टचत्वारिंशता स्यात् सुश्रुतस्य तु माषकः।। ६५।।
द्वादशभिर्धान्यमाषैश्चतुःषष्ट्या तु तैः पलम्। एतच्च तुलितं पञ्चरक्तिमाषात्मकं पलम्।। ६६।।
चरकार्द्धपलोन्मानं चरके दशरक्तिकैः। माषैः पलं चतुःषष्ट्या यद्भवेत् तत् तथेरितम्।। ६७।।
तस्मात् पलं चतुःषष्ट्या माषकैर्दशरक्तिकैः। चरकानुमतं वैद्यैश्चिकित्सासूपयुज्यते।। ६८।।

According to Caraka, Māṣa is equal to thirty two dhānyamāṣa and forty eight māṣas make one pala. Suśruta, however, takes māṣa equal to twelve dhānyamāṣa and sixty four māṣas as one pala. Thus Suśruta's one pala according to māṣa of five raktikā comes to half pala of Caraka who takes māṣa of ten raktikā and sixty māṣas as one pala. Vaidyas mostly follow the Caraka's view in practice. [65-68]

वातज्वर - चिकित्सा

बिल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिके ज्वरे। पाचनं पिप्पलीमूलगुडूचीविश्वजोऽथवा।। ६९।।

Vātika fever

In Vātika fever, the decoction of bilvādi (bṛhat) pañcamūla or pippalīmūla, guḍūcī and śuṇṭhī is used as digestive. [69]

किरातादिक्वाथः

किराताब्दामृतोदीच्यबृहतीद्वयगोक्षुरैः। सस्थिराकलसीविश्वैः क्वाथो वातज्वरापहः।। ७०।।

Kirātādi kvātha

Kirātatikta, musta, guḍūcī, bālaka, bṛhatī, kaṇṭakārī, gokṣura, śālaparṇī, pṛśniparṇī and śuṇṭhī — this formulation used as decoction allays vātika fever. [70]

रास्नादिक्वाथः

रास्ना वृक्षादनी दारु सरलं सैलवालुकम्। कषायः शर्कराक्षौद्रयुक्तो वातज्वरापहः।। ७१।।

Rāsnādi kvātha

Rāsnā, vandāka, devadāru, sarala, elavāluka — this decoction added with sugar and honey alleviates vātika fever. [71]

प्रक्षेप-मात्रा

प्रक्षेपः पादिकः क्काथ्यात् स्नेहे कल्कसमो मतः। परिभाषामिमामन्ये प्रक्षेपेऽप्यूचिरे यथा॥ ७२॥
कर्षश्चूर्णस्य कल्कस्य गुडिकानाञ्च सर्वशः। द्रवशुक्त्या स लेढव्यः पातव्यश्च चतुर्द्रवः॥ ७३॥
मात्रा क्षौद्रघृतादीनां स्नेहक्काथेषु चूर्णवत्॥ ७४॥

Addition of some substances should be (in the quantity of) one-fourth of the decoctive and in the fatty preparation equal to the paste which comes to the same. Some, however. take this differently. According to them, the quantity of (added) powder, paste or pill should be 10 gm, if some liquid is to be added as vehicle for licking its quantity should be 20 ml, and if it is to be taken as drink it should be four times the drug. The quantity of honey, ghee etc in fatty preparations and decoctives should be like that of powder. [72-74]

बिल्वादिक्काथः

बिल्वादिपञ्चमूली च गुडूच्यामलके तथा। कुस्तुम्बुरुसमो ह्येष कषायो वातिके ज्वरे॥ ७५॥

Bilvādi kvātha

Bilvādi (bṛhat) pañcamūla, guḍūcī, āmalaka and dhānyaka— all in equal parts. This decoction is useful in vātika fever. [75]

पिप्पल्यादिक्काथः

पिप्पलीशारिवाद्राक्षाशतपुष्पाहरेणुभिः। कृतः कषायः सगुडो हन्याच्छ्वसनजं ज्वरम्॥ ७६॥

Pippalyādi Kvātha

Pippalī, sārivā, drākṣā, śatapuṣpā, and hareṇu— decoction prepared with these and added with jaggery alleviates fever caused by vāta. [76]

गुडूच्यादिक्काथः

गुडूची शारिवा द्राक्षा शतपुष्पा पुनर्नवा। सगुडोऽयं कषायः स्याद् वातज्वरविनाशनः॥ ७७॥

Guḍūcyādi kvātha

Guḍūcī, sārivā, drākṣā, śatapuṣpā and punarnavā— this decoction added with jaggery alleviates vātika fever. [77]

द्राक्षादिक्काथः

द्राक्षागुडूचीकाश्मर्य्यत्रायमाणाः सशारिवाः। निष्क्काथ्य सगुडं क्काथं पिबेद्वातज्वरापहम्॥ ७८॥

Drākṣādi kvātha

Drākṣā, guḍūcī, kāśmarya, trāyamāṇā and sārivā — the decoction of these drugs added with jaggery allays vātika fever. [78]

शतावर्यादिः

शतावरीगुडूचीभ्यां स्वरसो यन्त्रपीडितः। गुडप्रगाढः शमयेत् सद्योऽनिलकृतं ज्वरम्॥ ७९॥

Śatāvaryādi

Mechanically pressed juice of sātāvarī and guḍūcī added with abundant jaggery pacifies vātika fever quickly. [79]

पित्तज्वर-चिकित्सा

कलिङ्गादिक्वाथः

कलिङ्गं कट्फलं मुस्तं पाठा तिक्तकरोहिणी। पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे॥ ८०॥

Paittika fever

Kaliṅgādi kvātha

Kaliṅga (indrayava), kaṭphala, musta, pāṭhā, kaṭukā — this should be decocted and taken after adding sugar. This acts as digestive in paittika fever. [80]

तिक्ताऽऽदिक्वाथः

सक्षौद्रं पाचनं पैत्ते तिक्ताब्देन्द्रयवैः कृतम्॥ ८१॥

Tiktādi kvātha

The decoction made of tiktā (kaṭukā), musta and indrayava and added with honey acts as digestive in paittika fever. [81]

लोध्रादिक्वाथः

लोध्रोत्पलामृतापद्मशारिवाणां सशर्करः। क्वाथः पित्तज्वरं हन्यादथवा पर्पटोद्भवः॥ ८२॥

Lodhrādi kvātha

The decoction of lodhra, utpala, guḍūcī, kamala and sārivā or of parpaṭa alone mixed with sugar alleviates paittika fever. [82]

पटोलादिक्वाथः

पटोलयवनिष्क्वाथो मधुना मधुरीकृतः। तीव्रपित्तज्वरामर्द्दी पानात् तृड्दाहनाशनः॥ ८३॥

Paṭolādi

The decoction of paṭola and indrayava sweetened with honey pacifies severe paittika fever along with thirst and burning sensation. [83]

दुरालभाऽऽदिक्वाथः

दुरालभापर्पटकप्रियङ्गुभूनिम्बवासाकटुरोहिणीनाम्।
जलं पिबेच्छर्करयाऽवगाढं तृष्णाऽस्रपित्तज्वरदाहयुक्तः॥ ८४॥

Durālabhādi

Durālabhā, parpaṭa, priyaṅgu, kirātatikta, vāsā and kaṭukā — decoction of these mixed with sugar should be taken by one suffering from paittika fever, raktapitta (innate haemarrhoge), thirst and burning sensation. [84]

त्रायमाणाऽऽदिक्वाथ:

त्रायमाणा च मधुकं पिप्पलीमूलमेव च। किराततिक्तकं मुस्तं मधूकं सबिभीतकम्।
सशर्करं पीतमेतत् पित्तज्वरविनाशनम्॥ ८५॥

Trāyamāṇādi

Trāyamāṇā, madhuka, pippalīmūla, kirātatikta, musta, madhūka and bibhītaka— This decoction taken after mixing sugar alleviates paittika fever. [85]

मृद्वीकाऽऽदिक्वाथ:

मृद्वीका मधुकं निम्बं कटुका रोहिणी समा। अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥ ८६॥

Mṛdvīkādi

Mṛdvīkā (drākṣā), madhuka, nimba and kaṭuka all in equal parts— This decoction is kept in open in the night (so that it becomes sufficiently cold) and thus taken. It pacifies paittika fever. [86]

एक: पर्पटक: श्रेष्ठ: पित्तज्वरविनाशन:। किं पुनर्यदि युज्येत चन्दनोदीच्यनागरै:॥ ८७॥

Parpaṭa alone is the best pacifier of paittika fever. Let alone if it is combined with candana, bālaka and nāgara (śuṇṭhī). [87]

विश्वादिकषाय:

विश्वाम्बुपर्पटोशीरघनचन्दनसाधितम्। दद्यात् सुशीतलं वारि तृट्छर्दिज्वरदाहनुत्॥ ८८॥

Viśvādi

Viśva (śuṇṭhī), bālaka, parpaṭa, uśīra, musta, candana— water processed with these and made sufficiently cold is useful in thirst, vomiting, fever and burning sensation. [88]

पर्पटादिकषाय:

पर्पटामृतधात्रीणां क्वाथ: पित्तज्वरापह:। द्राक्षाऽऽरग्वधयोश्चापि काश्मर्य्यस्याथवा पुन:॥ ८९॥

Parpaṭādi

Decoction of parpaṭa, guḍūcī and āmalaka alleviates paittika fever. Similar is the effect of the decoction of drākṣā and āragvadha or of kāśmarya alone. [89]

द्राक्षाऽऽदिक्वाथ:

द्राक्षाऽभयापर्पटकाब्दतिक्ताक्वाथं सशम्पाकफलं विदध्यात्।
प्रलापमूर्च्छाभ्रमदाहशोषतृष्णाऽन्विते पित्तभवे ज्वरे तु॥ ९०॥

Drākṣādi

Decoction of drākṣā, harītakī, parpaṭa, musta and kaṭukā added with the fruit-pulp of āragvadha should be administered in paittika fever attended with delirium, fainting, giddiness, burning sensation, wasting and thirst. [90]

अन्तर्दाह – चिकित्सा

व्युषितं धन्याकजलं प्रातः पीतं सशर्करं पुंसाम्। अन्तर्दाहं शमयत्यचिराद् दूरप्ररूढमपि॥ ९१॥

The cold infusion of dhanyāka kept overnight and taken with sugar in the morning pacifies even the chronic internal burning sensation quickly. [91]

पित्तज्वरेण तप्तस्य क्रिया शीतां समाचरेत्॥ ९२॥

Cold measures should be adopted in one afflicted with the heat caused by paittika fever. [92]

विदार्यादिलेपः

विदारी दाडिमं लोध्रं दधित्थं बीजपूरकम्। एभिः प्रदिह्यान्मूर्द्धानं तृड्दाहार्त्तस्य देहिनः॥ ९३॥

In case of excessive thirst and burning sensation the paste of vidārī, dāḍima, lodhra, kapittha and bījapūraka should be applied on head. [93]

धृतभृष्टाऽम्लपिष्टा च धात्री लेपाच्च दाहनुत्। अम्लपिष्टैः सुशीतैर्वा पलाशतरुजैर्दिहेत्।
बदरीपल्लवोत्थेन फेनेनारिष्टकस्य वा॥ ९४॥

Āmalakī fried in ghee and pounded with sour gruel, pacifies burning sensation by external application. The cold paste of the young leaves of palāśa pounded with sour gruel is also applied for this purpose. The froth arising from the pounded leaves of badarī or nimba is also used for this. [94]

कालेयादिलेपः

कालेयचन्दनानन्तायष्टीबदरकाञ्जिकैः। सघृतैः स्याच्छिरोलेपस्तृष्णादाहार्त्तिशान्तये॥ ९५॥

Kāleya, candana, anantamūla, madhuyaṣṭī and badara are pounded with sour gruel and mixed with ghee. This paste applied on head relieves thirst, burning sensation and pain. [95]

उतानसुप्तस्य गभीरताम्रकांस्यादिपात्रं प्रणिधाय नाभौ।
तत्राम्बुधारा बहुला पतन्ती निहन्ति दाहं त्वरितं सुशीता॥ ९६॥

The patient lies down flat on the ground and deep bowl made of copper, brass etc is kept on his navel. Now continuous stream of cold water is poured on it. This removes the burning sensation quickly. [96]

पीतकाञ्जिकवस्त्रावगुण्ठनं दाहनाशनम्॥ ९७॥

Wrapping the body with cloth soaked in sour gruel alleviates burning sensation. [97]

जिह्वातालुगलक्लोमशोषे मूर्ध्नि तु दापयेत्। केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्॥ ९८॥

In case of dryness of tongue, palate, throat and pharynx, pieces of bījapūra fruit mixed with honey and rock salt should be applied on head. [98]

मातुलुङ्गशिफाविश्वब्राह्मीग्रन्थिकसम्भवम्। कफज्वरेऽम्बु सक्षारं पाचनं वा कणाऽऽदिकम्।। ९९ ।।

Water processed with mūtulunga root, śuṇṭhī, brāhmī and pippalīmūla and added with yavakṣāra is prescribed or pippalyādi group of drugs listed below which acts as digestive. [99]

कफज्वर-चिकित्सा

पिप्पल्यादिक्वाथ:

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरम्। मरिचैलाऽजमोदेन्द्रपाठारेणुकजीरकम्।।१००।।
भार्गी महानिम्बफलं हिङ्गु रोहिणिसर्षपम्। विडङ्गातिविषे मूर्वा चेत्ययं कीर्त्तितो गण: ।।१०१।।
पिप्पल्यादि: कफहर: प्रतिश्यारोचकज्वरान्। निहन्याद्दीपनो गुल्मशूलघ्नस्त्वामपाचन: ।।१०२।।

Pippalyādi

Pippalī, pippalīmūla, cavya, citraka, śuṇṭhī, marica, elā, ajamodā, indrayava, pāṭhā, reṇuka, jīraka, bhārgī, mahānimba fruit, hiṅgu, kaṭukā, sarṣapa, viḍaṅga, ativiṣā and mūrvā— this pippalyādi group pacifies kapha, gulma, and abdominal pain and allays coryza, anorexia and fever. [100-102]

कटुकादिकुष्ठादिक्वाथौ

कटुकं चित्रकं निम्बं हरिद्राऽतिविषे वचा। कुष्ठमिन्द्रयवं मूर्वा पटोलश्चापि साधितम्।।
पिबेन्मरिचसंयुक्तं सक्षौद्रं श्लैष्मिके ज्वरे।।१०३।।

Kaṭukādi - Kuṣṭhādi

Decoction of (1) Kaṭukā, citraka, nimba, haridrā, ativiṣā and vacā (2) Kuṣṭha, indrayava, mūrvā and paṭola added with marica powder and honey are useful in fever caused by kapha. [103]

निम्बादिक्वाथ:

निम्बविश्वामृतादारु शटी भूनिम्बपौष्करम्। पिप्पल्यौ बृहती चेति क्वाथो हन्ति कफज्वरम्।।१०४।।

Nimbādi

Nimba, śuṇṭhī, guḍūcī, devadāru, śaṭī, kirātatikta, puṣkaramūla, pippalī and bṛhatī— the decoction of these destroys kaphaja fever. [104]

कफज्वरे सिन्दुवारदलक्वाथ:

सिन्दुवारदलक्वाथ: सोषण: कफजे ज्वरे। जङ्घयोश्च बले क्षीणे कर्णे वा पिहिते पिबेत्।।१०५।।

Decoction of Sinduvāra leaves added with marica powder is used in kaphaja fever, debility of legs and obstruction in ears. [105]

आमलक्यादिकषाय:

आमलक्यभया कृष्णा चित्रकश्चेत्ययं गण:। सर्वज्वरकफातङ्कभेदी दीपनपाचन: ।।१०६।।

Āmalakyādi

Āmalakī, harītakī, pippalī and citraka — this group acts as appetiser and digestive and alleviates all types of fever and diseases caused by kapha. [106]

त्रिफलाऽऽदिक्वाथ:

त्रिफलापटोलवासा-च्छिन्नरुहातिक्तरोहिणीषड्ग्रन्था:। मधुना श्लेष्मसमुत्थे दशमूलीवासकस्य वा क्राथ:।।

Triphalādi

Triphalā, paṭola, vāsā, guḍūcī, kaṭukā and vacā — this decoction added with honey is efficacious in kaphaja fever. Similar in effect is the decoction of daśamūla and vāsā. [107]

मुस्तादिकषाय:

मुस्तं वत्सकबीजानि त्रिफला कटुरोहिणी। परूषकाणि च क्राथ: कफज्वरविनाशन: ।।१०८।।

Mustādi

Musta, indrayava, triphalā, kaṭukā and paruṣaka — this decoction alleviates kaphaja fever. [108]

चतुर्भद्रावलेहिका

कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह। कासश्वासज्वरहर: श्रेष्ठो लेह: कफान्तकृत् ।।१०९।।

Caturbhadrāvalehikā

(Powders of) kaṭphala, puṣkaramūla, karkaṭaśṛṅgī and pippalī mixed with honey make a good linctus to alleviate cough, dyspnoea, fever and other disorders of kapha. [109]

चूर्णादीनां मात्रा

कर्षश्चूर्णस्य कल्कस्य गुडिकानाञ्च सर्वश:। द्रवशुक्त्या स लेढव्य: पातव्यश्च चतुर्द्रव: ।।११०।।

Powder, paste and pills are taken in the dose of 10 gm. The liquid for lictus is added in the quantity of 20 ml and for drink four times (40 mls). [110]

अवलेहसेवनकाल:

ऊर्ध्वजत्रुगरोगघ्नी सायं स्यादवलेहिका। अधोरोगहरी या तु सा पूर्वं भोजनान्मता ।।१११।।

The linctus, in supraclaricular diseases, should be used before meal. [111]

मधुपिप्पलीप्रयोग:

क्षौद्रोपकुल्यासंयोग: कासश्वासज्वरापह:। प्लीहानं हन्ति हिक्काञ्च बालानाञ्च प्रशस्यते ।।११२।।

The use of pippalī (powder) with honey alleviates cough, asthma, fever, splenomegaly and hiccough. It is also beneficial for children. [112]

द्वन्द्वजज्वर - चिकित्सा

संसृष्टदोषेषु हितं संसृष्टमथ पाचनम् ।।११३।।

Fever caused by dual doṣas

In case where there is combination of two doṣas, digestive remedy is prescribed in which drugs are combined accordingly. [113]

वातपित्तज्वर - चिकित्सा

नवाङ्गकषाय:

विश्वामृताब्दभूनिम्बै: पञ्चमूलीसमन्वितै:। कृत: कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम्॥११४॥

Fever caused by vāta and pitta

Navāṅga

Decoction prepared of śuṇṭhī, guḍūcī, musta, kirātatikta and laghu pañcamūla alleviates the fever caused by vāta and pitta. [114]

त्रिफलाऽऽदिकषाय:

त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकै:। शृतमम्बु हरेत् तूर्णं वातपित्तोद्भवं ज्वरम्॥११५॥

Triphalādi

Water processed with triphalā, śālmalī (root), rāsnā, āragvadha (fruit-pulp) and vāsā removes quickly the fever caused by vāta and pitta. [115]

किराततिक्तादिकषाय:

किराततिक्तममृतां द्राक्षामामलकीं शटीम्। निष्क्वाथ्य पित्तानिलजे क्काथं तं सगुडं पिबेत्॥११६॥

Kirātatiktādi

Kirātatikta, guḍūcī, drākṣā, āmalakī and śaṭī— decoction of these added with jaggery should be taken in vātapittaja fever. [116]

निदिग्धिकाऽऽदिकषाय:

निदिग्धिकाबलारास्नात्रायमाणाऽमृतायुतै:। मसूरविदलै: क्काथो वातपित्तज्वरं जयेत्॥११७॥

Nidigdhikādi

Decoction of Nidigdhikā (kaṇṭakārī), balā, rāsnā, trāyamāṇā, guḍūcī and lentil grains allays vātapittaja fever. [117]

पञ्चभद्रकषाय:

गुडूची पर्पटं मुस्तं किरातं विश्वभेषजम्। वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम्॥११८॥

Pañcabhadra

Guḍūcī, parpaṭa, musta, kirātatikta and śuṇṭhī— this is known as pañcabhadra and is beneficial in vātapittaja fever. [118]

मधुकादिशीतकषाय:

मधुकं शारिवे द्राक्षा मधूकं चन्दनोत्पलम्। काश्मरी पद्मकं लोध्रं त्रिफलां पद्मकेशरम्॥११९॥
परूषकं मृणालञ्च न्यसेदुत्तमवारिणि। मधुलाजसितायुक्तं तत् पीतमुषितं निशि॥१२०॥
वातपित्तज्वरं दाहतृष्णामूर्च्छावमिभ्रमान्। शमयेद्रक्तपित्तञ्च जीमूतानिव मारुतः॥१२१॥

Madhukādi

Madhuka, white and black types of sārivā, drākṣā, madhūka (flowers), candana, utpala, kāśmarī, padmaka, lodhra, triphalā, kamala (stamens), paruṣaka and lotus-stalk — these should be kept overnight in rice-water and should be taken added with honey, sugar and parched paddy. It pacifies vātapittaja fever, burning sensation, thirst, fainting, vomiting, giddiness and innate haemorrhage as wind removes the clouds. [119-121]

पित्तश्लेष्मज्वर - चिकित्सा

पटोलादिक्वाथ:

पटोलं चन्दनं मूर्वा तिक्ता पाठाऽमृता गणः। पित्तश्लेष्मारुचिच्छर्दिज्वरकण्डूविषापहः॥१२२॥

Fever caused by pitta and kapha

Paṭolādi

Paṭola, candana, mūrvā, kaṭukā, pāṭhā and guḍūcī — this group of drugs pacifies pitta and kapha and alleviates loss of relish, vomiting, fever, itching and toxins. [122]

गुडूच्यादिक्वाथ:

गुडूचीनिम्बधन्याकं पद्मकं चन्दनानि च। एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः॥
हृल्लासारोचकच्छर्दिपिपासादाहनाशनः॥१२३॥

Guḍūcyādi

Guḍūcī, nimba, dhānyaka, padmaka and candana — this guḍūcyādi formulation stimulates digestive fire and alleviates all types of fever along with nausea, loss of appetite, vomiting, thirst and burning sensation. [123]

चातुर्भद्रकपाठासप्तकौ

किरातं नागरं मुस्तं गुडूचीञ्च कफाधिके। पाठोदीच्यमृणालैस्तु सह पित्ताधिके पिबेत्॥१२४॥

Cāturbhadraka and pāṭhāsaptaka

Kirātatikta, śuṇṭhī, musta and guḍūcī — this should be taken in predominance of kapha while the same along with pāṭhā, bālaka and lotus-stalk is prescribed in that of pitta. [124]

कण्टकार्यादिक्वाथ:

कण्टकार्य्यमृताभार्गीनागरेन्द्रयवासकम्। भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी॥१२५॥
कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम्। दाहतृष्णाऽरुचिच्छर्दिकासहृत् पार्श्वशूलनुत्॥१२६॥

Kaṇṭakāryādi

Kaṇṭakārī, guḍūcī, bhārgī, śuṇṭhī, indrayava, yavāsaka, kirātatikta, candana, musta, paṭola and kaṭukā — this decoction should be administered to alleviate pitta-śleṣmaja fever alongwith burning sensation, thirst, loss of appetite, vomiting, cough and chest-pain. [125-126]

वासास्वरस:

सपत्रपुष्पवासाया रस: क्षौद्रसितायुत:। कफपित्तज्वरं हन्ति सास्रपित्तं सकामलम्॥१२७॥

The juice of vāsā together with leaves and flowers added with honey and sugar alleviates fever caused by kapha and pitta along with raktapitta and jaundice. [127]

पटोलादिक्वाथ:

पटोलं पिचुमर्दश्च त्रिफला मधुकं बला। साधितोऽयं कषाय: स्यात् पित्तश्लेष्मोद्भवे ज्वरे॥१२८॥

Paṭolādi I

Paṭola, nimba, triphalā, madhuka and balā — this formulation in the form of decoction is useful in fever caused by pitta and kapha. [128]

अमृताष्टकक्वाथ:

गुडूचीन्द्रयवारिष्टपटोलं कटुरोहिणी। नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम्॥१२९॥
अमृताष्टक इत्येष पित्तश्लेष्मज्वरापह:। हृल्लासारोचकच्छर्दितृष्णादाहनिवारण:॥१३०॥

Amṛtāṣṭaka

Amṛtā (guḍucī), indrayava, nimba, paṭola, kaṭukā, śuṇṭhī, candana and musta — this formulation known as amṛtāṣṭaka is added with pippalī powder and is prescribed in fever caused by pitta and kapha, nausea, loss of appetite, vomiting, thirst and burning sensation. [129-130]

पटोलादिकषाय:

पटोलयवधन्याकं मुद्गामलकचन्दनम्। पैत्तिके श्लेष्मपित्तोत्थे ज्वरे तृट्छर्दिदाहनुत्॥१३१॥

Paṭolādi II

Paṭola, indrayava, dhānyaka, mudga, āmalaka and candana — this is useful in fever caused by pitta or kapha and pitta and alleviates thirst, vomiting and burning sensation. [131]

पञ्चतिक्तक्वाथ:

क्षुद्रामृताभ्यां सह नागरेण सपौष्करश्चैव किराततिक्तम्।
पिबेत् कषायन्त्विह पञ्चतिक्तं ज्वरं निहन्त्यष्टविधं समग्रम्॥१३२॥

Pañcatikta

Kaṇṭakārī, guḍūcī, śuṇṭhī, puṣkaramūla and kirātatikta— this decoction of five bitters (pañcatikta) should be taken to alleviate all the eight types of fever. [132]

कटुकाप्रयोग:

सशर्करामक्षमात्रां कटुकामुष्णवारिणा। पीत्वा ज्वरं जयेज्जन्तुः कफपित्तसमुद्भवम्॥१३३॥

One who takes kaṭukā 10 gm mixed with sugar followed by hot water wins over the fever caused by kapha and pitta. [133]

धान्यपटोलक्वाथ:

दीपनं कफविच्छेदि वातपित्तानुलोमनम्। ज्वरघ्नं पाचनं भेदि शृतं धान्यपटोलयोः॥१३४॥

The decoction of dhānyaka and paṭola promotes digestive fire, removes kapha, channelises vāta and pitta, allays fever and is digestive and laxative. [134]

वातश्लेष्मज्वर-चिकित्सा

चिकित्साक्रम:

कफवातज्वरे स्वेदान् कारयेद्रूक्षनिर्मितान्॥१३५॥

Fever caused by vāta and kapha

In fever caused by kapha and vāta one should apply fomentation with rough substances. [135]

स्रोतसां मार्दवं कृत्वा नीत्वा पावकमाशयम्। हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति॥१३६॥

Fomentation alleviates fever by softening the channels, restoring the digestive fire to its place and removing the stiffness of vāta and kapha. [136]

बालुकास्वेद:

खर्परभृष्टपटस्थितकाञ्जिकसिक्तो हि बालुकास्वेदः। शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन्॥

Sand is heated on a piece of earthen vessel and put in a cloth-pouch drenched with sour-gruel. The patient's body is fomented with this which alleviates disorders of vāta and kapha, headache, body-ache etc. [137]

मुस्तादिक्वाथ:

मुस्तानागरभूनिम्बं त्रयमेतत् त्रिकार्षिकम्। कफवातामशमनं पाचनं ज्वरनाशनम्॥१३८॥

Mustādi I

Musta, śuṇṭhī and kirātatikta— this formulation known as 'Trikārṣika' (each 10 gm.) alleviates kapha, vāta and āma and is digestive and antipyretic. [138]

पञ्चकोलक्वाथ:

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरम्। दीपनीय: स्मृतो वर्ग: कफानिलगदापह: ॥१३९॥

Pañcakola

Pippalī, pippalīmūla, cavya, citraka and śuṇṭhī— this group (Pañcakola) is appetiser and alleviates disorders of kapha and vāta. [139]

पिप्पलीशृतं जलम्

पिप्पलीभि: शृतं तोयमनभिष्यन्दि दीपनम्। वातश्लेष्मविकारघ्नं प्लीहज्वरविनाशनम्॥१४०॥

Water processed with pippalī removes obstruction of channels, stimulates digestive fire, alleviates disorders of vāta and kapha, spleen enlargement and fever. [140]

आरग्वधादिकषाय:

आरग्वधग्रन्थिकमुस्ततिक्ताहरीतकीभि: क्वथित: कषाय:।
सामे सशूले कफवातयुक्ते ज्वरे हितो दीपनपाचनश्च॥१४१॥

Āragvadhādi

Decoction made of āragvadha, pippalīmūla, musta, kaṭukā and harītakī is appetiser and digestive and is useful in fever associated with kapha and vāta. [141]

क्षुद्रादिक्वाथ:

क्षुद्राऽमृतानागरपुष्कराह्वयै: कृत: कषाय: कफमारुतोद्भवे।
सश्वासकासारुचिपार्श्वरुक्करे ज्वरे त्रिदोषप्रभवे च शस्यते॥१४२॥

Kṣudrādi

Decoction of kṣudrā (kaṇṭakārī), guḍūcī, śuṇṭhī and puṣkaramūla is useful in fever caused by kapha and vāta or three doṣas associated with dyspnoea, cough, loss of appetite and pain in chest. [142]

दशमूलक्वाथ:

दशमूलीरस: पेय: कणायुक्त: कफानिले। अविपाकेऽतिनिद्रायां पार्श्वरुक्श्वासकासके॥१४३॥

Daśamūla

Decoction of Daśamūla added with pippalī powder should be taken in (aggravation of) Kapha and vāta, indigestion, excessive sleep, pain in chest, dysponea and cough. [143]

मुस्तादिक्वाथ:

मुस्तं पर्पटक: शुण्ठी गुडूची सदुरालभा। कफवातारुचिच्छर्दिदाहशोषज्वरापह: ॥१४४॥

Mustādi II

Musta, parpaṭa, śuṇṭhī, guḍūcī and durālabhā— this formulation alleviates kapha and vāta. Loss of appetite, vomiting, burning sensation, wasting and fever. [144]

दार्वादिक्वाथ:

दारुपर्पटभार्ग्यब्दवचाधान्यककट्फलैः। साभयाविश्वपूतीकैः क्वाथो हिंगुमधूत्कटः ।।१४५।।
कफवातज्वरे पीतो हिक्काश्वासगलग्रहान्। कासशोषप्रसेकांश्च हन्यात् तरुमिवाशनिः ।।१४६।।

Dārvādi

Devadāru, parpaṭa, bhārgī, musta, vacā, dhānyaka, kaṭphala, harītakī, śuṇṭhī, pūtīka (latākarañga) — this decoction added with hiṅgu (asafoetida) and honey is useful in fever caused by kapha and vāta. It alleviates hiccough, dysponea, throat trouble, cough, bronchial asthma and salivation as thunderbolt destroys a plant. [145-146]

स्नेहादौ क्षौद्रादिप्रक्षेपमानम्

मात्रा क्षौद्रघृतादीनां स्नेहक्वाथेषु चूर्णवत्। माषिकं हिङ्गु सिन्धूत्थजरणाद्यास्तु शाणिकाः ।।१४७।।

Rule regarding addition of honey etc.

In fatty preparations (oil, ghee) and decoctions the quantity of honey, ghee etc to be added should be as of powder (e.g. 10 gm), that of asafoetida should be one māsa (1 gm) and of salt, cumin seeds, black pepper etc. one śāṇa (2.5 gm). [147]

मुखवैरस्यनाशको योग:

मातुलुङ्गफलकेशरो धृतः सिन्धुजन्ममरिचान्वितो मुखे।
हन्ति वातकफरोगमास्यगं शोषमाशु जडतामरोचकम्।।१४८।।

The piece of mātuluṅga fruit sprinkled with salt and black pepper and kept in mouth alleviates disorders of vāta and kapha, dryness of mouth, tastelessness and loss of appetite. [148]

सन्निपातज्वर-चिकित्सा

चिकित्साक्रम:

लङ्घनं बालुकास्वेदो नस्यं निष्ठीवनं तथा। अवलेहोऽञ्जनञ्चैव प्राक् प्रयोज्यं त्रिदोषजे।।१४९।।
सन्निपातज्वरे पूर्वं कुर्य्यादामकफापहम्। पश्चाच्छ्लेष्मणि संक्षीणे शमयेत् पित्तमारुतौ।।१५०।।

Sannipātaja fever

Principle of treatment

In fever caused by tridoṣa, to start with, fasting, sand fomentation, snuffing, spitting, linctus and collyrium should be applied. [149]

In sannipāta fever, initially measures to alleviate āma and kapha should be adopted and when kapha is diminished, pitta and vāta should be pacified. [150]

लङ्घनम्

त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा। लङ्घनं सन्निपातेषु कुर्य्याद्वाऽऽरोग्यदर्शनात्।।१५१।।

दोषाणामेव सा शक्तिर्लङ्घने या सहिष्णुता। न हि दोषक्षये कश्चित् सहते लङ्घनादिकम्।।१५२।।

In sannipāta, fasting should be observed for three, five or ten days (according to predominance of vāta, pitta and kapha respectively) or till recovery. [151]

It is only the power of doṣas by which one tolerates fasting as nobody can tolerate fasting etc when doṣas are diminished. [152]

निष्ठीवनविधानम्

आर्द्रकस्वरसोपेतं सैन्धवं कटुकत्रयम्। आकण्ठं धारयेदास्ये निष्ठीवेच्च पुनः पुनः।।१५३।।
तेनास्य हृदयाच्छ्लेष्मा मन्यापार्श्वशिरोगलात्। लीनोऽप्याकृष्यते शुष्को लाघवश्चास्य जायते।।१५४।।
पर्वभेदोऽङ्गमर्दश्च मूर्च्छाकासगलामयाः। मुखाक्षिगौरवं जाड्यमुत्क्लेशश्चोपशाम्यति।।१५५।।
सकृद्द्वित्रिचतुः कुर्याद् दृष्ट्वा दोषबलाबलम्। एतद्धि परमं प्राहुर्भेषजं सन्निपातिनाम्।।१५६।।

Fresh ginger juice mixed with rock salt and trikaṭu (three pungents) should be kept in mouth and spitted again and again. By this kapha, even if dried, is drawn out of chest, neck-sides, head and throat and lightness arises. Further, pain in joints, body-ache, fainting, cough, throat disorders and nausea are alleviated. This should be applied once, twice, three or four times according to severity of doṣas as this is said as effective remedy for sannipāta. [153-156]

मातुलुङ्गादिनस्यम्

मातुलुङ्गार्द्रकरसं कोष्णं त्रिलवणान्वितम्। अन्यद्वा सिद्धिविहितं तीक्ष्णं नस्यं प्रयोजयेत्।।१५७।।
तेन प्रभिद्यते श्लेष्मा प्रभिन्नश्च प्रसिच्यते। शिरोहृदयकण्ठास्यपार्श्वरुक् चोपशाम्यति।।१५८।।

Mātuluṅgādi

One should apply strong snuffing of tepid juice of mātuluṅga and fresh ginger added with three salts (saindhava, sauvarcala and biḍa) or as described in the siddhisthāna. This breaks the mass of kapha which is excreted resulting in alleviation of distress in head, cardiac region, throat, mouth and chest. [157-158]

मधूकसारादिनस्यम्

मधूकसारसिन्धूत्थवचोषणकणाः समाः। श्लक्ष्णं पिष्ट्वाऽम्भसा नस्यं कुर्यात् संज्ञाप्रबोधनम्।।१५९।।

Madhūkasārādi

Madhūka-sāra (heart wood of madhūka), rocksalt, vacā, black pepper and long pepper all in equal quantity should be pounded finely with water. This used as snuff revives consciousness. [159]

सैन्धवादिनस्यम्

सैन्धवं श्वेतमरिचं सर्षपं कुष्ठमेव च। बस्तमूत्रेण पिष्टानि नस्यं तन्द्रानिवारणम्।।१६०।।

Saindhavādi

Saindhava (rock salt), white marica, mustard and kuṣṭha are pounded with goat's urine and used as snuff. It removes drowsiness. [160]

शिरीषाद्यञ्जनम्

शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः। अञ्जनं स्यात् प्रबोधाय सरसोनशिलावचैः ॥१६१॥

Śirīsādi

The formulation consisting of śiriṣa seeds, cow's urine, pippalī, marica and saindhava along with rasona, manaḥśilā and vacā is used as collyrium to revive alertness. [161]

अष्टाङ्गावलेहिका

कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी। श्लक्ष्णचूर्णीकृतश्चैतन्मधुना सह लेहयेत् ॥१६२॥
एषाऽवलेहिका हन्ति सन्निपातं सुदारुणम्। हिक्कां श्वासञ्च कासञ्च कण्ठरोगं नियच्छति ॥१६३॥

उष्णे मधुनिषेधः

ऊर्ध्वगश्लेष्महरणे उष्णे स्वेदादिकर्मणि। विरोध्युष्णे मधु त्यक्त्वा कार्यैषाऽऽर्द्रकजै रसैः ॥१६४॥

Aṣṭāṅgāvalehikā

The fine powder of kaṭphala, puṣkaramūla, śṛṅgī, trikaṭu, yavāsa and kṛṣṇa jīraka should be administered with honey. This linctus formulation destroys severe sannipāta and alleviates hiccough, dysponea, cough and throat disease. Honey is antagonistic to heat and as such in elimination of upward-moving cough and fomentation etc. this should be applied with fresh ginger juice avoiding honey. [162-164]

पञ्चमुष्टिकयूषः

यवकोलकुलत्थानां मुद्गमूलकशुण्ठयोः। एकैकमुष्टिमाहृत्य पचेदष्टगुणे जले ॥१६५॥
पञ्चमुष्टिक इत्येष वातपित्तकफापहः। शस्यते गुल्मशूले च श्वासे कासे क्षये ज्वरे ॥१६६॥

Pañcamuṣṭika

Barley, jujube fruit, horse gram, green gram and dried radish each by the measure of closed fist should be cooked in eight times water. This is known as Pañcamuṣṭika which pacifies vāta, pitta and kapha and is efficacious in gulma, abdominal pain, dysponea, cough, wasting and fever. [165-166]

चातुर्भद्रकपञ्चमूलम्

पञ्चमूली किरातादिर्गणो योज्यस्त्रिदोषजे। पित्तोत्कटे च मधुना कणया च कफोत्कटे ॥१६७॥

Cāturbhadraka-pañcamūla

Laghu pañcamūla and Kirātādi (kiratatikta, śuṇṭhī, musta and guḍūcī) should be used in fever caused by tridoṣa with honey in predominance of pitta and with pippalī in that of kapha. [167]

बृहत्पञ्चमूलम्

बिल्वश्योनाकगम्भारीपाटलागणिकारिका: । दीपनं कफवातघ्नं पञ्चमूलमिदं महत् ॥१६८॥

Bṛhat pañcamūla

Bilva, śyonāka, gambhārī, pāṭalā and agnimantha — this is known as 'bigger five roots' (bṛhat pañcamūla). It stimulates digestive fire and alleviates kapha and vāta. [168]

लघुपञ्चमूलम्

शालपर्णीपृश्निपर्णीबृहतीद्वयगोक्षुरम् । वातपित्तहरं वृष्यं कनीय: पञ्चमूलकम् ॥१६९॥

Laghupañcamūla

Śālaparṇī, pṛśniparṇī, bṛhatī, kaṇṭakārī and gokṣura — this is 'smaller five roots'. It pacifies vāta and pitta and promotes semen. [169]

दशमूलम्

उभयं दशमूलन्तु सन्निपातज्वरापहम् । कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ।
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशम् ॥१७०॥

Daśamūla

Both combined together make daśamūla (ten roots). It alleviates sannipāta fever and is efficacious in cough, dyspnoea, drowsiness and chest-pain. If mixed with pippali powder, it removes the disorders of throat and cardiac distress. [170]

चतुर्दशाङ्गक्वाथ:

चिरज्वरे वातकफोल्वणे वा त्रिदोषजे वा दशमूलमिश्र: ।
किराततिक्तादिगण: प्रयोज्य: शुद्ध्यर्थिने वा त्रिवृताविमिश्र: ॥१७१॥

Caturdaśāṅga I

In chronic fever or that caused predominantly by vāta and kapha or tridoṣa the kirātatiktādi gaṇa mixed with daśamūla should be used. In case there is need of evacuation, it should be added with trivṛt. [171]

दशमूल्याद्यष्टादशाङ्गक्वाथ:

दशमूली शटी शृङ्गी पौष्करं सदुरालभम् । भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥१७२॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापह: । कासहृद्ग्रहपार्श्वार्त्तिश्वासहिक्कावमीहर: ॥१७३॥

Aṣṭādaśāṅga I (Daśamūlyādi)

Daśamūla, śaṭī, śṛṅgī, Puṣkaramūla, durālabhā, bhārgī, indrayava, paṭola and kaṭukā — this is known as 'aṣṭādaśāṅga' (having eighteen ingredients). It alleviates sannipāta fever, cough, cardiac distress, chest pain, dyspnoea, hiccough and vomiting. [172-173]

भूनिम्बाद्यष्टादशाङ्गक्वाथ:

भूनिम्बदारुदशमूलमहौषधाब्दतिक्तेन्द्रबीजधनिकेभकणाकषाय: ।
तन्द्राप्रलापकसनारुचिदाहमोहश्वासादियुक्तमखिलं ज्वरमाशु हन्ति ॥१७४॥

Aṣṭādaśāṅga II (Bhūnimbādi)

Bhūnimba (kirātatikta), devadāru, daśamūla, śuṇṭhī, musta, kaṭukā, indrayava, dhānyaka, gajapippalī — decoction of this formulation eliminates all types of fever attended with drowsiness, delirium, cough, anorexia, dysponea etc. [174]

मुस्ताद्यष्टादशाङ्गक्वाथ:

मुस्तपर्पटकोशीरदेवदारुमहौषधम् । त्रिफला धन्वयासश्च नीली कम्पिल्लकं त्रिवृत् ॥१७५॥
किराततिक्तकं पाठा बला कटुकरोहिणी । मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते ॥१७६॥
अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत् । पित्तोत्तरे सन्निपाते हितश्चोक्तं मनीषिभि: ॥
मन्यास्तम्भ उरोघाते उर:पार्श्वशिरोग्रहे ॥१७७॥

Aṣṭādaśāṅga III (Mustādya)

Musta, parpaṭaka, uśīra, devadāru, śuṇṭhī, triphalā, durālabhā, nīlī, kampillaka, trivṛt, kirātatikta, pāṭhā, balā, kaṭukā, madhuka and pippalīmūla — this is mustādya gaṇa. This formulation as another aṣṭādaśāṅga alleviates sannipāta. It is particularly indicated in sannipāta having predominance of pitta and also in conditions of stiffness of carotid region, dysfunctioning of chest and stiffening pain in chest, sides and head. [175-177]

शट्यादिक्वाथ:

शटी पुष्करमूलञ्च व्याघ्री शृङ्गी दुरालभा । गुडूची नागरं पाठा किरातं कटुरोहिणी ॥१७८॥
एष शट्यादिको वर्ग: सन्निपातज्वरापह: । कासहृद्ग्रहपार्श्वार्त्तिश्वासे तन्द्र्याञ्च शस्यते ॥१७९॥

Śaṭyādi

Śaṭī, puṣkaramūla, kaṇṭakārī, śṛṅgī, durālabhā, guḍūcī, śuṇṭhī, pāṭhā, kirātatikta and kaṭukā — this śaṭyādi formulation alleviates sannipāta fever and is useful in cough, cardiac distress, chest-pain, dyspnoea and drowsiness. [178-179]

बृहत्यादिगण:

बृहत्यौ पुष्करं भार्गी शटी शृङ्गी दुरालभा । वत्सकस्य च बीजानि पटोलं कटुरोहिणी ॥१८०॥
बृहत्यादिर्गण: प्रोक्त: सन्निपातज्वरापह: । कासादिषु च सर्वेषु देय: सोपद्रवेषु च ॥१८१॥

Bṛhatyādi

Bṛhatī, kaṇṭakārī, puṣkaramūla, bhārgī, śaṭī, śṛṅgī, durālabhā, indrayava, paṭola and kaṭukā — this Bṛhatyādi formulation alleviates sannipāta fever and is used in all complications such as cough etc. [180-181]

भार्ग्यादिक्वाथ:

भार्गी पुष्करमूलञ्च रास्नां बिल्वं यमानिकाम्। नागरं दशमूलञ्च पिप्पलीश्चाप्सु साधयेत्॥१८२॥
सन्निपातज्वरे देयं हृत्पार्श्वानाहशूलिनाम्। कासश्वासाग्निमन्दत्वं तन्द्रीश्च विनिवर्त्तयेत्॥१८३॥

Bhārgyādi

Bhārgī, puṣkaramūla, rāsnā, bilva, yavānī, śuṇṭhī, daśamūla and pippalī — these should be decocted in water and used in sannipāta fever. It alleviates pain in cardiac region, sides and abdomen, cough, dyspnoea, loss of appetite and drowsiness. [182-183]

चतुर्दशाङ्गक्वाथ:

द्विपञ्चमूली षड्ग्रन्था विश्वं गृध्रनखीद्वयम्। कफवातहर: क्वाथ: सन्निपातहर: पर:॥१८४॥

Caturdaśāṅga II

Daśamūla, vacā, śuṇṭhī, two types of gṛdhranakhī — this decoction alleviates sannipāta particularly kapha and vāta. [184]

अभिन्यासज्वर-चिकित्सा

कारव्यादिक्वाथ:

कारवीपुष्करैण्डत्रायन्तीनागरामृता:। दशमूलीशटीशृङ्गीयासभार्गीपुनर्नवा:॥१८५॥
तुल्या मूत्रेण निष्क्वाथ्य पीता: स्रोतोविशोधना:। अभिन्यासज्वरं घोरमाशु घ्नन्ति समुद्धतम्॥१८६॥

Abhinyāsa - jvara

Kāravyādi

Kāravī (kṛṣṇa jīraka), puṣkaramūla, eraṇḍa, trāyamāṇā, śuṇṭhī, guḍūcī, daśamūla, śaṭī, śṛṅgī, durālabhā, bhārgī and punarnavā — all these in equal quantity should be decocted in cow's urine and administered to the patient. It cleanses channels and alleviates fever quickly even the severe form of abhinyāsa fever. [185-186]

मातुलुङ्गादिक्वाथ:

मातुलुङ्गाश्मभिद्बिल्वव्याघ्रीपाठोरुबूकज:। क्वाथो लवणमूत्राढ्योऽभिन्यासानाहशूलनुत्॥१८७॥

Mātuluṅgādi

Decoction of mātuluṅga, pāṣāṇabheda, bilva, kaṇṭakārī, pāṭhā and eraṇḍa added with salt and cow's urine alleviates abhinyāsa and abdominal pain. [187]

निद्रोपेतमभिन्यासं क्षीणं विद्याद्धतौजसम्॥१८८॥

The sannipāta fever attended with sleep is known as abhinyāsa. The same is called 'hataujasa' when it is situated in wasted dhātus. [188]

कण्ठरोधकफश्वासहिक्कासंन्यासपीडित:। मातुलुङ्गार्द्रकरसं दशमूल्यम्भसा पिबेत्॥१८९॥

One afflicted with obstruction in throat, kapha, dyspnoea, hiccough and coma should take the juice of mātuluṅga and fresh ginger alongwith daśamūla decoction. [189]

व्योषादिक्वाथ:

व्योषाब्दत्रिफलातिक्तापटोलारिष्टवासकैः। सभूनिम्बामृतायासैस्त्रिदोषज्वरनुज्जलम्॥१९०॥

Vyoṣādi

The decoction of vyoṣa (trikaṭu), musta, triphalā, kaṭukā, paṭola, nimba, vāsā, kirātati-kta, guḍūcī and yavāsa alleviates tridoṣaja fever. [190]

त्रिवृतादिक्वाथ:

त्रिवृद्विशालात्रिफलाकटुकारग्वधैः कृतः। सक्षारो भेदनः क्वाथः पेयः सर्वज्वरापहः॥१९१॥

Trivṛtādi

Decoction made of trivṛt, viśālā, triphalā, kaṭukā and āragvadha and added with yavakṣāra is purgative and is efficacious in all types of fever. [191]

स्वेदाधिक्ये कुलत्थोद्धूलनम्

स्वेदोद्गमे ज्वरे देयश्चूर्णो भृष्टकुलत्थजः॥१९२॥

In sannipāta fever if there is execessive perspiration powder of parched horse gram should be used (for rubbing). [192]

जिह्वादोषे सैन्धवादिघर्षणम्

घर्षेज्जिह्वां जडां सिन्धुत्र्यूषणैः साम्लवेतसैः॥१९३॥

उच्छुष्कां स्फुटितां जिह्वां द्राक्षया मधुपिष्टया। लेपयेत् सघृतश्चास्यं सन्निपातात्मके ज्वरे॥१९४॥

In stiffened tongue, it should be rubbed with rock-salt, trikaṭu and amlavetasa. [193]

In condition of dried and cracked tongue in sannipāta fever ghee should be applied to mouth and drākṣā pounded with honey should be pasted on the tongue. [194]

निद्रानाशे काकजङ्घामूलप्रयोग:

काकजङ्घाजटा निद्रां जनयेच्छिरसि स्थिता॥१९५॥

(In case of insomnia) the root of kākajaṅghā placed on the head brings sleep. [195]

सन्निपाते विशेषव्यवस्था

सन्निपाते प्रकम्पन्तं प्रलपन्तं न बृंहयेत्। तृष्णादाहाभिभूतेऽपि न दद्याच्छीतलं जलम्॥१९६॥

In sannipāta, in condition of trembling and delirium, no saturative treatment should be given, even if the patient is afflicted with thirst and burning sensation no cold water should be given. [196]

कर्णमूलशोथस्तच्चिकित्सा

सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः। शोथः सञ्जायते तेन कश्चिदेव प्रमुच्यते॥१९७॥

रक्तावसेचनैः पूर्वं सर्पिष्पानैश्च तं जयेत्। प्रदेहैः कफपित्तघ्नैर्वमनैः कवलग्रहैः॥१९८॥

In the terminal phase of sannipāta jvara there arises a severe inflammation at the root of the ear by which one is rarely spared. [197]

It should be controlled by blood-letting, intake of ghee, applications of pastes and emetics to eliminate kapha and pitta and gargles. [198]

गैरिकादिलेप:

गैरिकं पांशुजं शुण्ठीवचाकटुककाञ्जिकैः। कर्णशोथहरो लेपः सन्निपातज्वरे भृशम्॥१९९॥

Gairikādi

The paste of gairika (red ochre), earthen salt, dry ginger, vacā and kaṭukā pounded with sour gruel destroys the inflammation at the ear in sannipāta fever. [199]

कुलत्थादिलेप:

कुलत्थकट्फले शुण्ठी कारवी च समांशिकैः। सुखोष्णैर्लेपनं कार्य्यं कर्णमूले मुहुर्मुहुः॥२००॥

Kulatthādi

For the same, frequent applications of warm paste of kulatha (horse gram), kaṭphala, dry ginger and kṛṣṇa jīraka (all in equal parts) to the root of the ear is efficacious. [200]

जीर्णज्वर-चिकित्सा

निदिग्धिकाऽऽदिक्वाथ:

निदिग्धिकानागरकामृतानां क्वाथं पिबेन्मिश्रितपिप्पलीकम्।
जीर्णज्वरारोचककासशूलश्वासाग्निमान्द्यार्दितपीनसेषु॥२०१॥

Jīrṇa jvara (chronic fever)

Nidigdhikādi

Nidigdhikā (kaṇṭakārī), śuṇṭhī and guḍūcī — this decoction added with pippalī powder should be taken in chronic fever, non-relish, cough, dyspnoea, abdominal pain, loss of digestive fire, facial pralysis and chronic coryza. [201]

क्वाथप्रयोगस्य काल:

हन्त्यूर्ध्वगामयं प्रायः सायं तेनोपयुज्यते॥२०२॥

This decoction is particularly efficacious in diseases located in uppar parts and is thus used in the evening. [202]

गुडूची-पञ्चमूलक्वाथौ

पिप्पलीचूर्णसंयुक्तः क्वाथश्छिन्नरुहोद्भवः। जीर्णज्वरकफध्वंसी पञ्चमूलीकृतोऽथवा॥२०३॥

The decoction of guḍūcī mixed with pippalī powder destroys chronic fever and kapha. Similar is the action of that of bṛhat pañcamūla. [203]

कासाजीर्णारुचिश्वासहृत्पाण्डुक्रिमिरोगनुत्। जीर्णज्वरेऽग्निसादे च शस्यते गुडपिप्पली॥२०४॥

The combination of jaggery and pippalī alleviates cough, indigestion, non-relish, dyspnoea, cardiac disorder, anaemia and worms and is useful in chronic fever and diminution of digestive fire. [204]

विषमज्वर - चिकित्सा

सन्ततादिहराः पञ्च क्वाथाः

कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी। पटोलं शारिवा मुस्तं पाठा कटुकरोहिणी॥२०५॥
निम्बं पटोलं त्रिफला मृद्वीका मुस्तवत्सकौ। किराततिक्तममृता चन्दनं विश्वभेषजम्॥२०६॥
गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापनाः। कषायाः शमयन्त्याशु पञ्च पञ्चविधाञ्ज्वरान्॥
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान्॥२०७॥

Viṣamajvara (Intermittent fever)

(1) Indrayava, paṭola leaves and kaṭukā (2) paṭola (leaves), sārivā, musta, pāṭhā and kaṭukā (3) nimba, paṭola (leaves), triphalā, drākṣā, musta and indrayava (4) kirātatikta, guḍūcī, candana and śuṇṭhī (5) guḍūcī, āmalaka and musta — these five decoctions ending in half verses pacify the five types of (irregular) fever e.g. santata (remittent), satata (double quotidian), anyedyuṣka (quotidian), tṛtīyaka (tertian) and caturthaka (quartan). [205-207]

गुडत्रिफलायोगः

गुडप्रगाढां त्रिफलां पिबेद्वा विषमार्दितः॥२०८॥

One suffering from irregular fever should take decoction of triphalā mixed with ample quantity of jaggery. [208]

दीर्घपत्रकमूलप्रयोगः

दीर्घपत्रककर्णाख्यनेत्रं खदिरसंयुतम्। ताम्बूलैस्तद्दिने भुक्तं प्रातर्विषमनाशनम्॥२०९॥

The root of long-leaved karṇākhya combined with catechu and taken with betel leaves the same morning alleviates irregular fever. [209]

गुडूच्यादिक्वाथः

गुडूचीमुस्तधात्रीणां कषायं वा समाक्षिकम्॥२१०॥

Guḍūcyādi

Or one should take decoction of guḍūcī, musta and āmalaka mixed with honey. [210]

मुस्तादिक्वाथः

मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्काथः। पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति॥२११॥

Mustādi

The decoction of musta, āmalaka, guḍūcī, śuṇṭhī and kaṇṭakārī added with pippalī powder and honey alleviates irregular fever. [211]

महौषधादिक्वाथ:

महौषधामृतामुस्तचन्दनोशीरधान्यकैः। काथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥२१२॥

Mahauṣadhādi

Decoction of mahauṣadha (śuṇṭhi), guḍūcī, musta, candana, uśīra and dhānyaka mixed with sugar and honey alleviates tertian fever. [212]

वासाऽऽदिक्वाथ:

वासाधात्रीस्थिरादारुपथ्यानागरसाधितः। सितामधुयुतः क्वाथश्चातुर्थकनिवारणः ॥२१३॥

Vāsādi

Decoction prepared with vāsā, āmalakī, śālaparṇī, devadāru, harītakī and śuṇṭhī and added with sugar and honey alleviates quartan fever. [213]

अन्ये प्रयोगा:

मधुना सर्वज्वरनुच्छेफालीदलजो रसः ॥२१४॥
अजाजी गुडसंयुक्ता विषमज्वरनाशिनी। अग्निसादं जयेत् सम्यग् वातरोगांश्च नाशयेत् ॥२१५॥
रसोनकल्कं तिलतैलमिश्रं योऽश्नाति नित्यं विषमज्वरार्त्तः।
विमुच्यते सोऽप्यचिराज्ज्वरेण वातामयैश्चापि सुघोररूपैः ॥२१६॥
प्रातः प्रातः ससर्पिर्वा रसोनमुपयोजयेत्। पिप्पलीवर्द्धमानं वा पिबेत् क्षीररसाशनः।
षट्पलं वा पिबेत् सर्पिः पथ्यां वा मधुना लिहेत् ॥२१७॥
पयस्तैलं घृतञ्चैव विदारीक्षुरसं मधु। सम्मूर्च्छ्य पाययेदेतद् विषमज्वरनाशनम् ॥२१८॥
पिप्पली शर्करा क्षौद्रं घृतं क्षीरं यथाबलम्। खजेन मथितं पेयं विषमज्वरनाशनम् ॥२१९॥
पयसा वृषदंशस्य शकृद्वेगागमे पिबेत्। वृषस्य दधिमण्डेन सुरया वा ससैन्धवम् ॥२२०॥
नीलिनीमजगन्धाञ्च त्रिवृतां कटुरोहिणीम्। पिबेज्ज्वरस्यागमने स्नेहस्वेदोपपादितः ॥२२१॥
सुरां समण्डां पानार्थे भक्ष्यार्थे चरणायुधान्। तित्तिरांश्च मयूरांश्च प्रयुञ्ज्याद्विषमज्वरे ॥२२२॥
अम्लोटजसहस्रेण दलेन सुकृतां पिबेत्। पेयां घृतप्लुतां जन्तुश्चातुर्थकहरां त्र्यहम् ॥२२३॥

The juice of śephālī leaves mixed with honey alleviates all types of fever. [214]

Jīraka mixed with jaggery alleviates irregular fever. It also restores diminished digestive fire to normalcy and destroys vātika disorders. [215]

One who, suffering from irregular fever, takes the paste of garlic mixed with sesamum oil regularly is relieved of the fever quickly and also of the severe vātika disorders. [216]

(Such patient) should use (1) garlic with ghee every morning (2) Pippalī-vardhamāna having diet of milk or meat-soup (3) ṣaṭpala ghṛta or (4) harītakī with honey. [217]

Milk, oil, ghee, juice of vidārī and sugarcane and honey — all this combined together should be administered to the patient. It alleviates irregular fever. [218]

Pippalī powder, sugar, honey, ghee and milk — this should be churned with stick and

given to the patient according to strength. It alleviates irregular fever. [219]

The faeces of cat should be taken with milk when the rigor comes or the same of bull added with rock salt should be taken with curd-scum or wine. [220]

One should take, after being properly uncted and fomented, the decoction of nīlinī, ajagandhā, trivṛt and kaṭukā at the time of the advent of fever. [221]

In irregular fever, one should use wine with scum for drink and meat of cock, partridge and peacock as food. [222]

To alleviate quartan fever, one should take liquid gruel made of thousand leaves of cāṅgrī and added with ample quantity of ghee for three (preceding) days. [223]

सैन्धवाद्यञ्जनम्

सैन्धवं पिप्पलीनाञ्च तण्डुला: समन:शिला:। नेत्राञ्जनं तैलपिष्टं विषमज्वरनाशनम्॥२२४॥

Saindhavādi añjana

Saindhava (rock-salt), grains of pippalī and realgar should be pounded with oil and applied to eyes as collyrium. It alleviates irregular fever. [224]

नस्ययोग:

व्याघ्रीवसा हिङ्गुसमा नस्यं तद्वत् ससैन्धवा॥२२५॥

Similar is the effect of tigress's fat mixed with equal asafoetida and rock salt. [225]

चातुर्थिकज्वरहरो गुग्गुलादिधूप:

कृष्णाम्बरदृढाबद्धगुग्गुलूलूकपुच्छज:। धूपश्चातुर्थकं हन्ति तम: सूर्य्य इवोदित:॥२२६॥

Fumigation with guggulu and owl's tail tied firmly in black cloth destroys quartan fever as the rising sun dispels darkness. [226]

नस्ययोगद्वयम्

शिरीषपुष्पस्वरसो रजनीद्वयसंयुत:। नस्यं सर्पि:समायोगाच्चातुर्थकज्वरं जयेत्॥२२७॥
नस्यं चातुर्थकं हन्ति रसो वाऽगस्त्यपत्रज:॥२२८॥

The fresh juice of śirīṣa flowers combined with two types haridrā (haridrā and dāruharidrā) used as snuff with ghee overcomes quartan fever. [227]

The snuff of the juice of agastya leaves also destroys quartan fever. [228]

अष्टाङ्गधूप:

पलङ्कषा निम्बपत्रं वचा कुष्ठं हरीतकी। सर्षपा: सयवा: सर्पिर्धूपनं ज्वरनाशनम्॥२२९॥

Aṣṭāṅga dhūpa

Fumigation with guggulu, nimba leaves, vacā, kuṣṭha, harītakī, mustard, barley and ghee alleviates fever. [229]

अपराजितो धूपः

पुरध्यामवचासर्जनिम्बार्कागुरुदारुभिः। सर्वज्वरहरो धूपः कार्य्योऽयमपराजितः ॥२३०॥

Aparājita dhūpa

Guggulu, dhānyaka, vacā, sarjarasa, nimba, arka, aguru and devadāru— this aparājita dhūpa (furnigation) destroys all types of fever. [230]

बिडालशकृद्धूपः

बैडालं वा शकृद् योज्यं वेपमानस्य धूपने ॥२३१॥

In case of rigor, cat's faeces should be used for fumigation. [231]

मूलधारणम्

अपामार्गजटा कट्यां लोहितैः सप्ततन्तुभिः। बद्धा वारे रवेस्तूर्णं ज्वरं हन्ति तृतीयकम् ॥२३२॥
काकजङ्घा बला श्यामा ब्रह्मदण्डी कृताञ्जलिः। पृश्निपर्णी त्वपामार्गस्तथा भृङ्गरजोऽष्टमः ॥२३३॥
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः। रक्तसूत्रेण संवेष्ट्य बद्धमैकाहिकं जयेत् ॥२३४॥
मूलं जयन्त्याः शिरसा धृतं सर्वज्वरापहम् ॥२३५॥

Wearing apāmārga root in waist with seven red threads on sunday allays the tertain fever quickly. [232]

Kākajaṅghā, balā, śyāmā, brahmadaṇḍī, lajjālu, pṛśniparṇī, apāmārga and bhṛṅgarāja, the eighth one— the root of any one of these should be taken out carefully in puṣya constellation and should be tied with red thread. This alleviates quotidian fever. [233-234]

Similarly, the root of jayantī worn on head allays all types of fever. [235]

साधारणं कर्म

कर्म साधारणं जह्यात् तृतीयकचतुर्थकौ। आगन्तुरनुबन्धो हि प्रायशो विषमज्वरे ॥२३६॥

The general treatment (rational as well as godly) alleviates tertian and quartan fevers because in these types of irregular fever mostly there is association of exogeneus factors. [236]

दैवव्यपाश्रयं कर्म

''गङ्गाया उत्तरे कूले अपुत्रस्तापसो मृतः। तस्मै तिलोदकं दद्यान्मुञ्चत्यैकाहिको ज्वरः ॥''
एतमन्त्रेण चाश्वत्थपत्रहस्तः प्रतर्पयेत् ॥२३७॥
सोमं सानुचरं देवं समातृगणमीश्वरम्। पूजयन् प्रयतः शीघ्रं मुच्यते विषमज्वरात् ॥२३८॥
विष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुम्। स्तुवन् नामसहस्रेण ज्वरान् सर्वान् व्यपोहति ॥२३९॥

Godly treatment of tertian and quartan fever:

"The issue-less hermit died on the northern bank of the ganges. One should offer sesamum and water to him, by this quotidian fever goes off" one putting aśvattha leaf

in hand, should offer tarpaṇa (oblation) with this hymn.

One is relieved of the irregular fever instanteneously by worshiping Lord Śiva along with the goddess, other mother deities and attendants.

Similarly by reciting the thousand names of Lord Viṣṇu having thousand heads, master of mobile and immobile and all pervasive one is freed from all types of fever. [237-239]

घृतप्रयोग:

ज्वरा: कषायैर्वमनैर्लङ्घनैर्लघुभोजनै: । रूक्षस्य ये न शाम्यन्ति सर्पिस्तेषां भिषग्जितम् ।।२४०।।

For the types of fever in the rough patient which are not subsided by application of decoction, emetics, fasting and light diet, ghee is the remedy. [240]

घृतनिषेध:

निर्दशाहमपि ज्ञात्वा कफोत्तरमलङ्घितम् । न सर्पि: पाययेत् प्राज्ञ: शमनैस्तमुपाचरेत् ।।२४१।।

Even after expiry of ten days, if there is predominance of kapha and no desired result of fasting ghee should not be administered in such cases, rather he should be treated with pacifying measures till lightness appears. [241]

मांसरसस्य प्रयोग: कालश्च

यावल्लघुत्वादशनं दद्यान्मांसरसेन तु । मांसार्थमेणलावादीन् युक्त्या दद्याद्विचक्षण: ।।२४२।।
कुक्कुटांश्च मयूरांश्च तित्तिरिं क्रौञ्चमेव च । गुरूष्णत्वान्न शंसन्ति ज्वरे केचिच्चिकित्सका: ।।२४३।।
लङ्घनेनानिलबलं ज्वरे यद्यधिकं भवेत् । भिषङ्मात्राविकल्पज्ञो दद्यात् तानपि कालवित् ।।२४४।।

However, food with meat-soup should be given. For meat, deer, quail etc should be used. [242]

Some physicians do not recommend the meat of cock, pea-cock, partridge and heron because of their heaviness and hotness. Nevertheless, the physician conversant with variations of quantity and time, should use even them in case where vāyu gets stronger due to fasting. [243-244]

पिप्पल्याद्यं घृतम्

पिप्पल्यश्चन्दनं मुस्तमुशीरं कटुरोहिणी । कलिङ्गकास्तामलकी शारिवाऽतिविषे स्थिरा ।।२४५।।
द्राक्षाऽऽमलकबिल्वानि त्रायमाणा निदिग्धिका । सिद्धमेतैर्घृतं सद्यो ज्वरं जीर्णमपोहति ।।२४६।।
क्षयं कासं शिर:शूलं पार्श्वशूलं हलीमकम् । अङ्गाभितापमग्निश्च विषमं सन्नियच्छति ।।
पिप्पल्याद्यमिदं क्वापि तन्त्रे क्षीरेण पच्यते ।।२४७।।

Pippalyādya ghṛta

Pippalī, candana, musta, uśīra, kaṭukā, indrayava, bhūmyāmalakī, sārivā, two types of ativiṣā, śālaparṇī, drākṣā, āmalaka, bilva, trāyamāṇā, kaṇṭakārī— ghee cooked with these alleviates the chronic fever instantaneously. It also controls wasting, cough, headache,

pain in sides, halīmaka, burning sensation and irregularity of digestive fire. In some text, this formulation is to be cooked with milk. [245-247]

स्नेहपाके परिभाषा

यत्राधिकरणे नोक्तिर्गणे स्यात् स्नेहसंविधौ। तत्रैव कल्कनिर्य्यूहाविष्येते स्नेहवेदिना।
एतद्वाक्यबलेनैव कल्कसाध्यपरं घृतम्॥२४८॥

Only in cases of prescribed gaṇas, both paste and decoction should be used for cooking of ghee etc. By this it is also concluded that ghee is mostly cooked with paste. [248]

जलस्नेहौषधानान्तु प्रमाणं यत्र नेरितम्। तत्र स्यादौषधात् स्नेहः स्नेहात् तोयं चतुर्गुणम्॥
अनुक्ते द्रवकार्य्ये तु सर्वत्र सलिलं मतम्॥२४९॥

घृततैलगुडादींश्च नैकाहादवतारयेत्। व्युषितास्तु प्रकुर्वन्ति विशेषेण गुणान् यतः॥२५०॥

Where there is no mention of the quantity of water, fatty substance and drugs fatty substance should be four times the drugs and water four times the fatty substance. If there is no specific mention of liquid, water should be taken. [249]

Ghṛta, tails, guḍa etc should hot be prepared in one day because they become more effective thereafter. [250]

स्नेहकल्को यदाऽङ्गुल्या वर्त्तितो वर्त्तिवद्भवेत्। वह्नौ क्षिप्ते च नो शब्दस्तदा सिद्धिं विनिर्दिशेत्॥२५१॥
शब्दस्योपरमे प्राप्ते फेनस्योपरमे तथा। गन्धवर्णरसादीनां सम्पत्तौ सिद्धिमादिशेत्॥२५२॥

When the paste in fatty substance on being rolled by fingers becomes like a wick and produces no sound on being put on fire, it should be taken as completely cooked. Moreover, when the sound is subsided, froth also gets off and desirable smell, colour, taste etc. appear it should be taken as cooked. [251-252]

क्षीरषट्पलकं घृतम्

पञ्चकोलैः ससिन्धूत्थैः पलिकैः पयसा समम्। सर्पिः प्रस्थं शृतं प्लीहविषमज्वरगुल्मनुत्॥२५३॥
अत्र द्रवान्तरानुक्ते क्षीरमेव चतुर्गुणम्। द्रवान्तरेण योगे हि क्षीरं स्नेहसमं भवेत्॥२५४॥

Kṣīraṣaṭpalaka ghṛta

Drugs of Pañcakola group and rocksalt each 40 gm are added to ghee 640 gm which is cooked with equal quantity of milk (and three times water). This formulation alleviates splenomegaly, irregular fevers as well as gulma. [253]

Where no other liquid is mentioned milk itself is taken four times (of the fatty substance) but when there is another liquid too, milk is taken equal to the fatty substance. [254]

दशमूलषट्पलकं घृतम्

दशमूलीरसे सर्पिः सक्षीरे पञ्चकोलकैः। सक्षारैर्हन्ति तत् सिद्धं ज्वरकासाग्निमन्दताः॥
वातपित्तकफव्याधीन् प्लीहानञ्चापि पाण्डुताम्॥२५५॥

Daśamūla-ṣaṭpalaka ghṛta

Ghee is cooked with decoction of daśamūla and milk alongwith (the paste of) pañcakola and yavakṣāra. It alleviates fever, cough, loss of appetite, disorders caused by vāta, pitta and kapha; splenomegaly and anaemia. [255]

स्नेहपाके परिभाषा

क्वाथ्याच्चतुर्गुणं वारि पादस्थं स्याच्चतुर्गुणम्। स्नेहात् स्नेहसमं क्षीरं कल्कस्तु स्नेहपादिकः।
चतुर्गुणन्त्वष्टगुणं द्रवद्वैगुण्यतो भवेत्॥२५६॥
पञ्चप्रभृति यत्र स्युर्द्रवाणि स्नेहसंविधौ। तत्र स्नेहसमान्याहुरर्वाक् च स्याच्चतुर्गुणम्॥२५७॥

Water is taken four times the decoctive and by boiling reduced to one-fourth. Such decoction is taken four times the fatty substance while milk is taken equal to the latter. The quantity of paste added is one-fourth of the fatty substance and that of water, when doubled, becomes eight times. [256]

In formulation of fatty substances where there are liquids numbering five, they are taken equal to the former but if they are less they are taken four times. [257]

वासाद्यं घृतम्

वासां गुडूचीं त्रिफलां त्रायमाणां यवासकम्। पक्त्वा तेन कषायेण पयसा द्विगुणेन च॥२५८॥
पिप्पलीमूलमृद्वीकाचन्दनोत्पलनागरैः। कल्कीकृतैश्च विपचेद् घृतं जीर्णज्वरापहम्॥२५९॥

Vāsādya ghṛta

Vāsā, guḍūcī, triphalā, trāyamāṇā and yavāsa — with this decoction and double (quantity of) milk ghee is cooked after adding the paste of pippalīmūla, drākṣā, candana, utpala and śuṇṭhī. It alleviates chronic fever. [258-259]

गुडूच्यादीनि पञ्च घृतानि

गुडूच्याः क्वाथकल्काभ्यां त्रिफलाया वृषस्य च। मृद्वीकाया बलायाश्च सिद्धाः स्नेहा ज्वरच्छिदः॥

Ghee cooked with the decoction and paste of each of guḍūcī, triphalā, vāsā, drākṣā and balā alleviate fever. [260]

पेयादिदानकालः

ज्वरे पेयाः कषायाश्च सर्पिः क्षीरं विरेचनम्। षडहे षडहे देयं कालं वीक्ष्यामयस्य च॥२६१॥

In fever, liquid gruel, decoction, ghee, milk and purgative should be given one after the other on interval of six days or according to condition of disease whenever necessary. [261]

क्षीरपानस्य गुणदोषौ

जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम्। तदेव तरुणे पीतं विषवद्धन्ति मानवम्॥२६२॥

In chronic fever when kapha is attenuated milk works like nectar while the same taken in acute one kills the patient like poison. [262]

कासाच्छ्वासाच्छिर:शूलात् पार्श्वशूलात् सपीनसात्। मुच्यते ज्वरित: पीत्वा पञ्चमूलीशृतं पय: ।।२६३।।

Pañcamūlī-kṣīra

The person suffering from fever is relieved of cough, dyspnoea, headache, chest-pain and chronic coryza after taking milk decocted with (laghu) pañcamūla. [263]

क्षीरपाकपरिभाषा

द्रव्यादष्टगुणं क्षीरं क्षीरात् तोयं चतुर्गुणम्। क्षीरावशेष: कर्त्तव्य: क्षीरपाके त्वयं विधि: ।।२६४।।

Milk is taken eight times the drugs and water four times the former. This is boiled till only milk remains. This is the method of kṣīrapāka (milk-cooking). [264]

त्रिकण्टकादिक्षीरम्

त्रिकण्टकबलाव्याघ्रगुडनागरसाधितम्। वर्च्चोमूत्रविबन्धघ्नं शोथज्वरहरं पय: ।।२६५।।

Trikaṇṭakādi kṣīra

Milk processed with trikaṇṭaka (gokṣura), balā, kaṇṭakārī, jaggery and śuṇṭhī removes obstruction in (passing) faeces and urine and alleviates oedema and fever. [265]

वृश्चीरादिक्षीरम्

वृश्चीरबिल्ववर्षाभ्व: पयश्चोदकमेव च। पचेत् क्षीरावशिष्टन्तु तद्धि सर्वज्वरापहम्।।२६६।।

Vṛścīrādi kṣīra

Vṛścīra (śveta punarnavā), bilva and varṣābhū (rakta punarnavā) are cooked with milk alongwith water till only milk remains. It destroys all types of fever. [266]

औषधसिद्धं क्षीरम्

शीतं वोष्णं ज्वरे क्षीरं यथास्वैरौषधैर्युतम्।।२६७।।

Milk is made cold or hot, as desired, by adding respective drugs. [267]

एरण्डमूलक्षीरम्

एरण्डमूलसिद्धं वा ज्वरे सपरिकर्त्तिके।।२६८।।

Milk processed with eraṇḍa root is given in fever associated with cutting pain in rectum. [268]

संशोधनम्

ज्वरिभ्यो बहुदोषेभ्य ऊर्ध्वञ्चाधश्च बुद्धिमान्। दद्यात् संशोधनं काले कल्पे यदुपदेक्ष्यते।।२६९।।

The patient of fever having enormous impurity should be subjected to upward and downward evacuation as described in kalpasthāna (of the Caraka-saṃhitā) in proper time. [269]

वमनम्

मदनं पिप्पलीभिर्वा कलिङ्गैर्मधुकेन वा। युक्तमुष्णाम्बुना पीतं वमनं ज्वरशान्तये ॥२७०॥

Emesis produced by madanaphala combined with pippalī or indrayava or madhuka taken with warm water leads to alleviation of fever. [270]

विरेचनम्

आरग्वधं वा पयसा मृद्वीकानां रसेन वा। त्रिवृतां त्रायमाणां वा पयसा ज्वरितः पिबेत् ॥२७१॥

(For purgation), the patient of fever should take āragvadha with milk or grape juice, or trivṛt or trāyamāṇā with milk. [271]

संशोधननिषेधः

ज्वरक्षीणस्य न हितं वमनं न विरेचनम्। कामन्तु पयसा तस्य निरूहैर्वा हरेन्मलान् ॥२७२॥

The patient emaciated due to fever should not be subjected to either emesis or purgation, rather his impurities should be eliminated by milk or non-unctuous enema. [272]

वस्तिविधानम्

प्रयोजयेज्ज्वरहरान् निरूहान् सानुवासनान्। पक्वाशयगते दोषे वक्ष्यन्ते ये च सिद्धिषु ॥२७३॥

In case of impurity being situated in pakvāśaya one should use non-unctuous or unctuous enema as described in siddhisthāna (of the Caraka-saṃhitā) to alleviate fever. [273]

शिरोविरेचनम्

गौरवे शिरसः शूले विबद्धेष्विन्द्रियेषु च। जीर्णज्वरे रुचिकरं दद्याच्छीर्षविरेचनम् ॥२७४॥

Head-evacuation should be used in chronic fever to remove heaviness and pain in head and loss of function of sense organs and to produce relish. [274]

अभ्यङ्गादिगुणाः

अभ्यङ्गांश्च प्रदेहांश्च सस्नेहान् सानुवासनान्। विभज्य शीतोष्णकृतान् दद्याज्जीर्णज्वरे भिषक् ॥
तैराशु प्रशमं याति बहिर्मार्गगतो ज्वरः। लभन्ते सुखमङ्गानि बलं वर्णश्च वर्द्धते ॥२७६॥

In chronic fever, the physician should prescribe anointment, paste, use of fatty substances and unctuous enema made or processed with hot or cold drugs as necessary. By these fever situated in external passages is subsided quickly, the organs regain normalcy and strength and complexion improves. [275-276]

षट्कट्वरतैलम्

सुवर्चिकानागरकुष्ठमूर्वालाक्षानिशालोहितयष्टिकाभिः।
तैलं ज्वरे षड्गुणकट्वसिद्धमभ्यञ्जनाच्छीतविदाहनुत् स्यात् ॥२७७॥
दध्नः ससारकस्यात्र तक्रं कट्वरमिष्यते। घृतवत् तैलपाकोऽपि तैले फेनोऽधिकः परः ॥२७८॥

Ṣaṭkaṭvara taila

Oil cooked with suvarcikā, śuṇṭhī, kuṣṭha, mūrvā, lākṣā, haridrā and manjiṣṭhā along with six times butter-milk is useful in fever. By anointment it removes cold as well as burning sensation. [277]

Butter-milk prepared of curd with supernatant fatty layer is known as 'Kaṭvara' which is used in the above formulation. The preparation of oil is like that of ghee but in the former there appears more froth. [278]

अङ्गारकतैलम्

मूर्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी। बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी॥२७९॥
आरनालाढकेनैव तैलप्रस्थं विपाचयेत्। तैलमङ्गारकं नाम सर्वज्वरविमोक्षणम्॥२८०॥

Aṅgāraka taila

Mūrvā, lākṣā, two types of haridrā, mañjiṣṭhā, indravāruṇī, bṛhatī, rocksalt, kuṣṭha, rāsnā, jaṭāmāṇsī and śatāvarī— with these drugs oil 640 ml should be cooked alongwith sour gruel 2.56 litre. This formulation known as 'aṅgāraka taila' alleviates all types of fever. [279-280]

लाक्षादितैलम्

लाक्षाहरिद्रामञ्जिष्ठाकल्कैस्तैलं विपाचयेत्। षड्गुणेनारनालेन दाहशीतज्वरापहम्॥२८१॥

Lākṣādi taila

Oil is cooked with the paste of lākṣā, haridrā and mañjiṣṭhā along with six times sour gruel. It alleviates fever attended with both cold and heat. [281]

यवचूर्णादितैलम्

यवचूर्णार्द्धकुडवं मजिष्ठाऽर्द्धपलेन च। तैलप्रस्थः शतगुणे काञ्जिके साधितो जयेत्॥
ज्वरं दाहं महावेगमङ्गानाञ्च प्रहर्षनुत्॥२८२॥

Yavacūrṇādi taila

Oil 640 ml cooked with yavacūrṇa (barley powder) 80 gm and mañjiṣṭhā 20 gm alongwith hundred times sour gruel alleviates fever and accompanying severe burning sensation and horripilation. [282]

सर्जतैलप्रदेहः

सर्जकाञ्जिकसंसिद्धं तैलं शीताम्बुमर्दितम्। ज्वरदाहापहं लेपात् सद्यो वातास्रदाहनुत्॥२८३॥

Oil cooked with sarjarasa and sour gruel is mixed well with cold water and applied externally. It destroys burning sensation in fever and vātarakta quickly. [283]

विविधतैलयोगाः

चन्दनाद्यमगुर्वाद्यं तैलं चरककीर्तितम्। तथा नारायणं तैलं जीर्णज्वरहरं परम्॥२८४॥

In chronic fever, candanādya and agurvādya tailas as described by Caraka and also nārāyaṇa taila are used to alleviate it. [284]

आगन्तुज्वर-चिकित्सा

अभिघातादिज्वरे प्रयोगाः

अभिघातज्वरो न स्यात् पानाभ्यंगेन सर्पिषः। क्षतानां व्रणितानाञ्च क्षतव्रणचिकित्सया ।।२८५।।
ओषधिगन्धविषजौ विषपीतप्रबाधनम्। जयेत् कषायैर्मतिमान् सर्वगन्धकृतैस्तथा ।।२८६।।
अभिचाराभिशापोत्थौ ज्वरौ होमादिना जयेत्। दानस्वस्त्ययनातिथ्यैरुत्पातग्रहपीडजौ ।।२८७।।

Āgantu jvara (fever caused by exogenous factors)

In fever caused by injury, intake and anointment of ghee is useful. That caused by wounds and ulcers is treated for them. Fever caused by odour of plants and poisons should be treated like the case of poison particularly by the decoctions of 'Sarvagandha' (a group of aromatic drugs). The fever caused by exorcism and cursing should be treated with sacrifices etc. and these caused by natural calamaties and demonic seizures should be managed with charity, auspicious incantations and offerings. [285-287]

मानसज्वरचिकित्सा

क्रोधजे पित्तजित् काम्या अर्थाः सद्वाक्यमेव च। आश्वासेनेष्टलाभेन वायोः प्रशमनेन च ।।
हर्षणैश्च शमं यान्ति कामक्रोधभयज्वराः ।।२८८।।
कामात् क्रोधज्वरो नाशं क्रोधात् कामसमुद्भवः। याति ताभ्यामुभाभ्याञ्च भयशोकसमुद्भवः ।।२८९।।

Mānasa jvara (psychic fever)

The fever caused by wrath is managed with the pitta-pacifying agents, desired objects and soothing conversation.

Fever caused by passion, wrath and fear is subsided by assurance, getting the desired object, pacification of vāyu and gladdening.

The fever caused by wrath is alleviated by passion, that arisen from passion gets subsided by wrath while both passion and wrath allay the fever caused by fear and anxiety. [288-289]

भूतज्वरचिकित्सा

भूतविद्यासमुद्दिष्टैर्बन्धावेशनताडनैः। जयेद् भूताभिषङ्गोत्थं मनःशान्तैश्च मानसम् ।।२९०।।

Bhūtajvara

One should control the fever caused by infestation of bhūta (invisible agents) with binding, restricting and striking as prescribed in the section on bhūtavidyā. The psychic fever should be treated with psychiatric measures. [290]

ज्वरमुक्तौ वर्जनीयं कर्म

व्यायामश्च व्यवायश्च स्नानं चङ्क्रमणानि च। ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत् ॥२९१॥

Post-treatment Care

Exercise, sexual intercourse, bathing and walking— these should not be undertaken during couvalescence till normal strength is regained. [291]

ज्वरमुक्तिलक्षणम्

देहो लघुर्व्यपगतक्लममोहतापः पाको मुखे करणसौष्ठवमव्यथत्वम्।
स्वेदः क्षवः प्रकृतियोगिमनोऽन्नलिप्सा कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि ॥२९२॥

Symptoms of Cure

Lightness in body, absence of exhaustion, mental confusion and heat, inflammation or boils in mouth, normalcy of senses and organs, freedom from destress, sweating, sneezing, normalcy of mind, appetite and itching in head— these are the signs of the person freed from fever. [292]

॥ इति ज्वरचिकित्सा ॥ १ ॥

Thus ends the treatment of jvara. [1]

२. द्वितीयोऽध्यायः

CHAPTER II

ज्वरातिसार - चिकित्सा

Treatment of Jvarātisāra (diarrhoea associated with fever)

चिकित्साक्रमः

ज्वरातिसारे पेयाऽऽदिक्रमः स्याल्लङ्घिते हितः ॥ १ ॥

In jvarātisāra, the dietetic regimen of liquid gruel etc, should be followed after proper lightening (of the patient). [1]

उत्पलषट्कपेया

ज्वरातिसारी पेयां वा पिबेत् साम्लां शृतां नरः । पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः ॥ २ ॥

Utpalaṣaṭka

One suffering from jvarātisāra should take liquid gruel cooked with pṛśniparṇī, balā, bilva, nāgara (śuṇṭhī), utpala and dhānyaka as well as added with sours. [2]

पाठाऽऽदिकषायः

पाठेन्द्रयवभूनिम्बमुस्तपर्पटकामृताः । जयन्त्याममतीसारं सज्वरं समहौषधाः ॥ ३ ॥

Pāṭhādi

Pāṭhā, indrayava, bhūnimba, musta, parpaṭaka and amṛtā combined with mahauṣadha (śuṇṭhī) overcome the āma atisāra associated with fever. [3]

नागरादिकषायः

नागरातिविषामुस्तभूनिम्बामृतवत्सकैः । सर्वज्वरहरः क्वाथः सर्वातीसारनाशनः ॥ ४ ॥

Nāgarādi

The decoction of nāgara (śuṇṭhī), ativiṣā, musta, bhūnimba, amṛtā and vatsaka (indrayava) alleviates all types of fever and diarrhoea. [4]

ह्रीबेरादिकषायः

ह्रीबेरातिविषामुस्तबिल्वधान्यकनागरैः । पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ॥
सरक्तं हन्त्यतीसारं सज्वरं वाऽथ विज्वरम् ॥ ५ ॥

Hrīberādi

The decoction prepared with haridrā, ativiṣā, musta, bilva, dhānyaka and nāgara (śuṇṭhī) destroys sliminess and constipation, pacifies abdominal pain and digests doṣa and āma. It alleviates bloody diarrhoea accompanied or not by fever. [5]

गुडूच्यादिक्वाथ:

गुडूच्यतिविषाधान्यशुण्ठीबिल्वाब्दबालकैः। पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः॥ ६॥
कषायः शीतलः पेयो ज्वरातीसारशान्तये। हृल्लासारोचकच्छर्दिपिपासादाहनाशनः॥ ७॥

Guḍūcyādi

The decoction of guḍūcī, ativiṣā, dhānyaka, śuṇṭhī, bilva, musta, pāṭhā, bhūnimba, kaṭukā, candana, uśīra and padmaka, when it becomes cold, should be administered in the case of jvarātisāra to pacify nausea, anorexia, vomiting, thirst and burning sensation. [6-7]

उशीरादिक्वाथ:

उशीरं बालकं मुस्तं धन्याकं विश्वभेषजम्। समङ्गा धातकी लोध्रं बिल्वं दीपनपाचनम्॥ ८॥
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम्। सशोणितमतीसारं सज्वरं वाऽथ विज्वरम्॥ ९॥

Uśīrādi

The formulation containing uśīra, bālaka, musta, dhānyaka, viśvabheṣaja (śuṇṭhī), samaṅgā (lajjālu), dhātakī, lodhra and bilva promotes digestive fire, is digestive and alleviates anorexia, sliminess, āma, constipation and diarrhoea associated with severe pain, haemorrhage febrile or afebrile. [8-9]

पञ्चमूल्यादिक्वाथ:

पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः। पाठाभूनिम्बह्रीबेरकुटजत्वक्फलैः शृतम्॥ १०॥
हन्ति सर्वानतीसाराञ्ज्वरदोषं वमिं तथा। सशूलोपद्रवं श्वासं कासं हन्यात् सुदारुणम्॥ ११॥

Pañcamūlyādi

Pañcamūlī, balā, bilva, guḍūcī, musta, nāgara, pāṭhā, bhūnimba, hrībera and kuṭaja (bark and seeds) — decoction prepared with these alleviates all types of diarrhoea, fever and vomiting complicated with pain, severe dyspnoea and cough. [10-11]

कलिङ्गादिक्वाथ:

कलिङ्गातिविषाशुण्ठीकिराताम्बुयवासकम्। ज्वरातिसारसन्तापं नाशयेदविकल्पितः॥ १२॥

Kaliṅgādi

Kaliṅga (indrayava), ativiṣā, śuṇṭhī, kirāta (tikta), bālaka and yavāsa — this formulation destroys the distress caused by jvarātisāra. [12]

वत्सकादि-श्वदंष्ट्रादिक्वाथौ

वत्सकस्य फलं दारु रोहिणी गजपिप्पली। श्वदंष्ट्रा पिप्पली धान्यं बिल्वं पाठा यमानिका॥ १३॥
द्वावप्येतौ सिद्धयोगौ श्लोकार्द्धेनाभिभाषितौ। ज्वरातीसारशमनौ विशेषाद्दाहनाशनौ॥ १४॥

Vatsakādi and śvadaṃṣṭrādi

(1) Vatasaka fruit (indrayava), devadāru, rohiṇī (kaṭukā) and gajapippalī (2) śvada-

mṣṭrā (gokṣura), pippalī, dhānyaka, bilva, pāṭhā and yavānī— both these formulations, mentioned in half- verses, pacify jvarātisāra particularly burning sensation. [13-14]

नागरादिक्वाथः

नागरामृतभूनिम्बबिल्वबालकवत्सकैः। समुस्तातिविषोशीरैर्ज्वरातीसारहृज्जलम्॥ १५॥

Nāgarādi

The decoction of Nāgara (śuṇṭhī), amṛtā (guḍūcī), bhūnimba, bilva, bālaka and vatsaka along with musta, ativiṣā and uśīra alleviates jvarātisāra. [15]

मुस्तकादिक्वाथः

मुस्तकबिल्वातिविषापाठाभूनिम्बवत्सकैः क्वाथः। मकरन्दगर्भयुक्तो ज्वरातिसारौ जयेद् घोरौ॥ १६॥

Mustakādi

Mustaka, bilva, ativiṣā, pāṭhā, bhūnimba, vatsaka (kuṭaja)— decoction of these mixed with honey overcomes jvarātisāra even if severe. [16]

घनादिक्वाथः

घनजलपाठातिविषापथ्योत्पलधान्यरोहिणीविश्वैः। सेन्द्रयवैः कृतमम्भः सातीसारं ज्वरं जयति॥ १७॥

Ghanādi

Ghana (musta), bālaka, pāṭhā, ativiṣā, harītakī, utpala, dhānyaka, kaṭukā, śuṇṭhī and indrayava— decoction of these pacifies fever associated with diarrhoea. [17]

ज्वरातिसारे कलिङ्गाद्यगुडिका

कलिङ्गबिल्वजम्ब्वाम्रकपित्थं सरसाञ्जनम्। लाक्षां हरिद्रे ह्रीबेरं कट्फलं शुकनासिकाम्॥ १८॥
लोध्रं मोचरसं शङ्खं धातकीं वटशुङ्गकम्। पिष्ट्वा तण्डुलतोयेन वटकानक्षसम्मितान्॥ १९॥
छायाशुष्कान् पिबेच्छीघ्रं ज्वरातीसारशान्तये। रक्तप्रसादनाश्चैते शूलातीसारनाशनाः॥ २०॥

Kaliṅgādya guḍikā

Kaliṅga (indrayava), bilva, seed-kernel of jambū and āmra; kapittha, raśañjana, lākṣā, haridrā, dāruharidrā, bālaka, kaṭphala, śukanāsikā, lodhra, mocarasa, śaṅkha (bhasma), dhātakī and leaf-bud of vaṭa— these are pounded together with rice-water and made into boluses each weighing 10 gm. which are dried in the sun. These, if taken, pacify fever and diarrhoea, purify blood and alleviate diarrhoea with griping. [18-20]

उत्पलादिचूर्णम्

उत्पलं दाडिमत्वक् च पद्मकेशरमेव च। पिबेत् तण्डुलतोयेन ज्वरातीसारनाशनम्॥ २१॥

Utpalādi cūrṇa

Utpala, dāḍima (fruit-rind), lotus-stamen— this formulation taken with rice-water alleviates jvarātisāra. [21]

व्योषाद्यचूर्णम्

व्योषं वत्सकबीजञ्च निम्बभूनिम्बमार्कवम्। चित्रकं रोहिणीं पाठां दार्वीमतिविषां समाम्॥ २२॥

श्लक्ष्णचूर्णीकृतान् सर्वांस्तत्तुल्यां वत्सकत्वचम्। सर्वमेकत्र संयोज्य प्रपिबेत् तण्डुलाम्बुना ॥ २३ ॥
सक्षौद्रं वा लिहेदेतत् पाचनं ग्राहि भेषजम्। तृष्णारुचिप्रशमनं ज्वरातीसारनाशनम् ॥ २४ ॥
कामलां ग्रहणीदोषान् गुल्मं प्लीहानमेव च। प्रमेहं पाण्डुरोगञ्च श्वयथुञ्च विनाशयेत् ॥ २५ ॥

Vyoṣādya cūrṇa

Vyoṣa (trikaṭu), kuṭaja (seeds), nimba, bhūnimba, mārkava (bhṛṅgarāja), citraka, kaṭukā, pāṭhā, dāruharidrā and ativiṣā— all are taken in equal quantity and powdered finely. Kuṭaja bark equal to the total quantity of the above is added thereto. This formulation is taken with rice-water or honey. It is digestive as well as checking and alleviates jvarātisāra and pacifies thirst and anorexia. It also destroys jaundice, grahaṇī disorders, gulma, spleen enlargement, prameha, anaemia and oedema. [22-25]

दशमूलीक्वाथ:

दशमूलीकषायेण विश्वमक्षसमं पिबेत्। ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥ २६ ॥

Daśamūlī-kvātha

One should take śuṇṭhī 10 gm. with the decoction of daśamūlī in fever, diarrhoea, oedema and grahaṇī disorders. [26]

विडङ्गादिक्वाथ:

विडङ्गातिविषामुस्तं दारुपाठाकलिङ्गकम्। मरिचेन समायुक्तं शोथातीसारनाशनम् ॥ २७ ॥

Viḍaṅgādi

Viḍaṅga, ativiṣā, musta, devadāru, pāṭhā and indrayava combined with marica alleviate diarrhoea complicated with oedema. [27]

किरातादिक्वाथ: प्रथम:

किराताब्दामृताविश्वचन्दनोदीच्यवत्सकै:। शोथातिसारशमनं विशेषाज्ज्वरनाशनम् ॥ २८ ॥

Kirātādi I

Kirāta (tikta), musta, amṛtā, śuṇṭhī, candana, bālaka and kuṭaja— this formulation pacifies diarrhoea with oedema particularly fever. [28]

किरातादिक्वाथ: अपर:

किराताब्दामृतोदीच्यमुस्तचन्दनधान्यकै:। शोथातिसारतृड्दाहशमनो ज्वरनाशन: ॥ २९ ॥

Kirātādi II

Kirātatikta, musta, amṛtā, bālaka, candana and dhānyaka— this pacifies oedema, diarrhoea, thirst, burning sensation and fever. [29]

॥ इति ज्वरातिसारचिकित्सा ॥ २ ॥

Thus ends treatment of jvarātisāra. [2]

३. तृतीयोऽध्याय:

CHAPTER III

अतिसार-चिकित्सा

Treatment of Atisāra (diarrhoea)

अतिसारे आमपक्वताज्ञानस्यावश्यकता

आमपक्वक्रमं हित्वा नातिसारे क्रिया यत:। अत: सर्वातिसारेषु ज्ञेयं पक्वामलक्षणम्॥ १॥

As there can't be any treatment leaving the stages of āma (immature) and pakva (mature), it is necessary to know the characters of pakva and āma in all types of atisāra. [1]

आमपक्वपुरीषयो: लक्षणम्

मज्जत्यामा गुरुत्वाद्विट् पक्वा तूत्प्लवते जले। विनाऽतिद्रवसंघातशैत्यश्लेष्मप्रदूषणात्॥ २॥

The stool, if immature, sinks in water whereas the mature one floats on except in conditions of execessive liquidity, compactness, coldness and presence of mucus. [2]

शकृद् दुर्गन्धि साटोपविष्टम्भार्तिप्रसेकिन:। विपरीतं निरामन्तु कफात् पक्वञ्च मज्जति॥ ३॥

Moreover, the immature stool has foul smell and is associated with painful flatulence, distressing constipation, abdominal pain and salivation. Contrary is that free from āma. The mature stool sinks due to presence of kapha. [3]

आमातिसारे चिकित्साक्रम:

आमे विलङ्घनं शस्तमादौ पाचनमेव च। कार्य्यश्चानशनस्यान्ते प्रद्रवं लघु भोजनम्॥ ४॥

In condition of āma, first of all, one should abstain from food and take digestive remedy. Thereafter, at the end of fasting, light and thinly liquid diet should be taken. [4]

लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं बलिन:। समुदीर्णं दोषचयं शमयति तत् पाचयत्यपि च॥ ५॥

(In condition of āma) there is no medicine for the strong patient except only the lightening which pacifies the excited dosic accumulation and also effects digestion. [5]

ह्रीबेरादिपानीयत्रयम्

ह्रीबेरशृङ्गबेराभ्यां मुस्तपर्पटकेन वा। मुस्तोदीच्यशृतं तोयं देयं वाऽपि पिपासवे॥ ६॥

In case there is thirst, water processed with (1) bālaka and śuṇṭhī or (2) musta and parpaṭa or (3) musta and bālaka should be given. [6]

अतिसारे पथ्यक्रम:

युक्तेऽन्नकाले क्षुत्क्षामं लघून्यन्नानि भोजयेत्॥ ७॥

औषधसिद्धाः पेया लाजानां शक्तवोऽतिसारहिताः। वस्त्रप्रसुतमण्डः पेया च मसूरयूषश्च॥ ८॥
गुर्वी पिण्डी खराऽत्यर्थं लघ्वी सैव विपर्य्ययात्। शक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका॥ ९॥

In proper time of taking food when the patient is weakened by hunger he should be given light diet. [7]

In diarrhoea, liquid gruel processed with drugs and parched paddy flour, rice-scum strained through cloth and lentil soup are wholesome. [8]

The hard mass of parched grain flour is heavy while the contrary is light. That in the linctus form is digested easily due to softness. [9]

बृहच्छालिपर्ण्यादिः

शालिपर्णी पृश्निपर्णी बृहती कण्टकारिका। बलाश्वदंष्ट्राबिल्वानि पाठानागरधान्यकम्।
एतदाहारसंयोगे हितं सर्वातिसारिणाम्॥ १०॥

Śāliparṇī, pṛśniparṇī, bṛhatī, kaṇṭakārikā, balā, gokṣura, bilva, pāṭhā, śuṇṭhī and dhānyaka — this (śāliparṇyādi) formulation is beneficial for all types of diarrhoea for processing of diet. [10]

स्वल्पशालिपर्ण्यादिः

शालिपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता। दाडिमाम्ला हिता पेया पित्तश्लेष्मातिसारिणाम्॥ ११॥

In cases of diarrhoea caused by pitta and kapha, liquid gruel processed with śāliparṇī, balā, bilva and pṛśniparṇī and soured with pomegranate is wholesome. [11]

यवागूमुपभुञ्जानो न तु व्यञ्जनमाचरेत्। शाकमांसफलैर्युक्ता यवाग्वोऽम्लाश्च दुर्जराः॥ १२॥

While using gruel one should not take vegetables as on being combined with vegetable, meat and fruits, it becomes acidic and is digested with difficulty. [12]

धान्यपञ्चकसंसिद्धो धान्यविश्वकृतोऽथवा। आहारो भिषजा योज्यो वातश्लेष्मातिसारिणाम्॥ १३॥

The diet processed with dhānyapañcaka or dhānyaka and śuṇṭhī should be used in case of diarrhoea caused by vāta and kapha. [13]

वातपित्ते पञ्चमूल्या कफे वा पञ्चकोलकैः॥ १४॥

The same should be processed with pañcamūlī and pañcakola in vāta-pitta and kapha respectively. [14]

धान्योदीच्यजलम्

धान्योदीच्यशृतं तोयं तृष्णादाहातिसारनुत्। आभ्यामेव सपाठाभ्यां सिद्धमाहारमाचरेत्॥ १५॥

Water processed with dhānyaka and bālaka allays thirst, burning sensation and diarrhoea. These two along with pāṭhā should be used to process food. [15]

दोषाः सन्निचिता यस्य विदग्धाहारमूर्छिताः। अतिसाराय कल्पन्ते भूयस्तान् सम्प्रवर्त्तयेत्॥ १६॥

When doṣas accumulated and aggravated by undigested food cause diarrhoea, they should be further eliminated. [16]

न तु सङ्ग्रहणं दद्यात् पूर्वमामातिसारिणे। दोषा ह्यादौ रुद्ध्यमाना जनयन्त्यामयान् बहून्॥ १७॥
शोथपाण्ड्वामयप्लीहकुष्ठगुल्मोदरज्वरान्। दण्डकालसकाध्मानग्रहण्यर्शोगदांस्तथा॥ १८॥

In condition of āma diarrhoea, it should not be checked in the first instance as the doṣas held up may produce many complications such as oedema, anaemia, spleen-enlargement, kuṣṭha, gulma, udara, fever, daṇḍālasaka, flatulence, grahaṇī disorder and piles. [17-18]

क्षीणधातुबलार्त्तस्य बहुदोषोऽतिनिस्रुतः। आमोऽपि स्तम्भनीयः स्यात् पाचनान्मरणं भवेत्॥ १९॥

But if the patient is emaciated and weak and the motions are excessive and severe even āma should be checked as by administering only digestive he would die. [19]

स्तोकं स्तोकं विबद्धं वा सशूलं योऽतिसार्यते। अभयापिप्पलीकल्कैः सुखोष्णैस्तं विरेचयेत्॥ २०॥

If, in diarrhoea, the stool comes in little quantity with difficulty and pain frequently, purgative of warm paste of harītakī and pippalī should be administered. [20]

धान्यपञ्चकम्

धान्यकं नागरं मुस्तं बालकं बिल्वमेव च। आमशूलविबन्धघ्नं पाचनं वह्निदीपनम्॥ २१॥

Dhānyapañcaka

Dhānyaka, śuṇṭhī, musta, bālaka and bilva — this formulation stimulates digestive fire, is digestive and alleviates āma, pain and constipation. [21]

धान्यचतुष्कम्

इदं धान्यचतुष्कं स्यात् पित्ते शुण्ठीं विना पुनः॥ २२॥

Dhānyacatuṣka

The above without śuṇṭhī is known as dhānyacatuṣka and is used in (the condition of) pitta. [22]

प्रमथ्यात्रयम्

पिप्पली नागरं धान्यं भूतीकञ्चाभया वचा। ह्रीबेरभद्रमुस्तानि बिल्वं नागरधान्यकम्॥ २३॥
पृश्निपर्णी श्वदंष्ट्रा च समङ्गा कण्टकारिका। तिस्रः प्रमथ्या विहिताः श्लोकार्धैरतिसारिणाम्।
कफे पित्ते च वाते च क्रमादेताः प्रकीर्त्तिताः॥ २४॥
संज्ञा प्रमथ्या ज्ञातव्या योगे पाचनदीपने॥ २५॥

Pramathyā

(1) Pippalī, śuṇṭhī, dhānyaka, bhūtīka (yavānī), harītakī and vacā (2) bālaka, bhadramusta, bilva, śuṇṭhī and dhānyaka (3) pṛśniparṇī, gokṣura, samaṅgā (lajjālu) and kaṇṭakāri —

these formulations of pramathyā in half-verses are prescribed for diarrhoea caused by kapha, pitta and vāta respectively.

'Pramathyā' is a technical term for the formulation stimulating digestive fire and effecting digestion. [23-25]

त्र्यूषणादिचूर्णम्

त्र्यूषणातिविषाहिङ्गुबलासौवर्चलाभयाः। पीत्वोष्णेनाम्भसा हन्यादामातीसारमुद्धतम्॥ २६॥

Tryūṣaṇādi cūrṇa

Tryūṣaṇa (trikaṭu), ativiṣā, hiṅgu, balā, sauvarcala and harītakī — this formulation taken with hot water alleviates even severe āmātisāra (diarrhoea associated with āma). [26]

पिप्पलीमूलादिचूर्णम्

अथवा पिप्पलीमूलपिप्पलीद्वयचित्रकान्॥ २७॥

Pippalīmūlādi cūrṇa

Or (the formulation of) pippalīmūla, pippalīdvaya (pippalī and gajapippalī) and citraka does the same. [27]

सौवर्चलादिचूर्णम्

सौवर्चलवचाव्योषहिङ्गुप्रतिविषाऽभयाः। पिबेच्छ्लेष्मातिसारार्त्तश्चूर्णिताश्चोष्णवारिणा॥ २८॥

Sauvarcalādi cūrṇa

Sauvarcala, vacā, vyoṣa (trikaṭu), hiṅgu, prativiṣā and harītakī — this powder formulation should be taken with hot water by one suffering from diarrhoea caused by kapha. [28]

हरिद्राऽऽदिं वचाऽऽदिं वा पिबेदामेषु बुद्धिमान्॥ २९॥

In case of āma, one should take haridrādi or vacādi (group of drugs). [29]

खडयूषयवागूषु पिप्पल्यादिं प्रयोजयेत्॥ ३०॥

In preparation of khaḍayūṣa and gruels pippaliyādi (group of drugs) should be used. [30]

खडयूषकाम्बलिकौ

तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः। सुपक्वः खडयूषोऽयमयं काम्बलिकोऽपरः॥ ३१॥
दध्यम्लो लवणस्नेहतिलमाषसमन्वितः॥ ३२॥

Khaḍayūṣa and kāmbalika

Butter-milk cooked with kapittha, cāṅgerī, marica, jīraka and citraka is called khaḍayūṣa.

The same is known as kāmbalika when soured with curd and added with salt, oil, sesamum and black gram. [31-32]

नागरादिधान्यादिक्वाथ:

नागरातिविषामुस्तैरथवा धान्यनागरैः । तृष्णाऽतीसारशूलघ्नं पाचनं दीपनं लघु ॥ ३३ ॥

Nāgarādi and dhānyādi kvātha

(1) the decoction of nāgara (śuṇṭhī), ativiṣā and musta or (2) dhānyaka and śuṇṭhī is light, appetiser, digestive and alleviates thirst and diarrhoea. [33]

पाठाऽऽदि:

पाठावत्सकबीजानि हरीतक्यो महौषधम् । एतदामसमुत्थानमतिसारं सवेदनम् ॥
कफात्मकं सपित्तञ्च वर्च्चो बध्नाति च ध्रुवम् ॥ ३४ ॥

Pāṭhādi

Pāṭhā, indrayava, harītakī and śuṇṭhī— this formulation alleviates diarrhoea caused by āma, kapha and pitta and with pain. It positively checks the stool. [34]

अतिसारे मुस्ताक्षीरम्

पयस्युत्क्वाथ्य मुस्ता वा विंशतिं भद्रकाह्वयाः । क्षीरावशिष्टं तत् पीतं हन्यादामं सवेदनम् ॥ ३५ ॥

Mustaka-kṣīra

Twenty (tubers of) musta are boiled in milk and residual milk is taken (by the patient). It destroys āma associated with pain. [35]

ग्राहिभेषजप्रयोगकाल:

पक्वोऽसकृदतीसारो ग्रहणीमार्दवाद् यदा । प्रवर्त्तते तदा कार्य्यः क्षिप्रं साङ्ग्राहिको विधिः ॥ ३६ ॥

If due to laxity of grahaṇī, the diarrhoea, mature and frequent, continues the checking remedy should be applied immediately. [36]

पञ्चमूल्यादि:

पञ्चमूलीबलाविश्वधान्यकोत्पलबिल्वजाः । वातातिसारिणे देयास्तक्रेणान्यतमेन वा ॥ ३७ ॥

Pañcamūlyādi

Pañcamūlī, balā, śuṇṭhī, dhānyaka, utpala and bilva — this formulation should be given with butter-milk or other vehicles in diarrhoea caused by vāta. [37]

कञ्चटादिक्वाथ:

कञ्चटजम्बूदाडिमशृंगाटकपत्रबिल्वह्रीबेरम् । जलधरनागरसहितं गङ्गामपि वेगिनीं रुन्ध्यात् ॥ ३८ ॥

Kañcaṭādi

The leaves of kañcaṭa, jambū, dāḍima and śṛṅgāṭa, bilva, bālaka, musta and śuṇṭhī — this decoction checks diarrhoea even forceful like Gaṅgā. [38]

कृत्वाऽऽलबालं सुदृढं पिष्टैर्वाऽऽमलकैर्भिषक् । आर्द्रकस्वरसेनाशु पूरयेन्नाभिमण्डलम् ॥
नदीवेगोपमं घोरमतीसारं निरोधयेत् ॥ ३९ ॥

One should fill up the umbilicus with the juice of fresh ginger surrounding it firmly with the paste of āmalaka. It checks diarrhoea even severe like the current of river. [39]

किराततिक्तकादिचूर्णम्

किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम्। पित्तातिसाररोगघ्नं सक्षौद्रं वेदनाऽपहम्॥ ४० ॥

Kirātatiktādi cūrṇa

Kirātatikta, musta, vatsaka, and rasāñjana — this formulation given with honey alleviates diarrhoea caused by pitta and associated with pain. [40]

इन्द्रयवक्वाथः

पलं वत्सकबीजस्य श्रपयित्वा जलं पिबेत्। यो रसाशी जयेच्छीघ्रं स पैत्तं जठरामयम्॥ ४१ ॥

If one takes decoction of one pala (40 gm) of kuṭaja seeds (indrayava) keeping on the diet of meat-soup, he overcomes the abdominal disorder (diarrhoea) caused by pitta quickly. [41]

मधूकादिचूर्णम्

मधूकं कट्फलं लोध्रं दाडिमस्य फलत्वचम्। पित्तातिसारे मध्वाक्तं पाययेत् तण्डुलाम्बुना ॥ ४२ ॥

Madhūkādi cūrṇa

Madhūka, kaṭphala, lodhra and fruit-rind of pomegranate— this formulation should be given with rice-water mixed with honey in pittātisāra. [42]

कुटजादिक्वाथः

कुटजातिविषामुस्तं हरिद्रा पर्णिनीद्वयम्। सक्षौद्रशर्करं शस्तं पित्तश्लेष्मातिसारिणाम्॥ ४३ ॥

Kuṭajādi I

The decoction of kuṭaja, ativiṣā, musta, haridrā and two parṇinīs (śālaparṇī and pṛśniparṇī) added with honey and sugar is effecacious in diarrhoea caused by pitta and kapha. [43]

द्वितीयः कुटजादिक्वाथः

कुटजत्वक्फलं मुस्तं क्राथयित्वा जलं पिबेत्। अतीसारं जयत्याशु शर्करामधुयोजितम्॥ ४४ ॥

Kuṭajādi II

Kuṭaja (bark and fruit) and musta should be decocted with water and be administered after adding sugar and honey thereto. It controls diarrhoea quickly. [44]

बिल्वादिकषायः

बिल्वचूतास्थिनिर्यूहः पीतः सक्षौद्रशर्करः। निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम्॥ ४५ ॥

Bilvādi

The decoction of bilva and mango seed-kernel taken with honey and sugar alleviates vomiting and diarrhoea like fire devouring oblation. [45]

पटोलादिकषायः

पटोलयवधन्याकक्वाथः पेयः सुशीतलः। शर्करामधुसंयुक्तश्छर्द्यतीसारनाशनः॥ ४६॥

Paṭolādi

The decoction of paṭola, yava (indrayava) and dhānyaka taken cold and added with sugar and honey alleviates vomiting and diarrhoea. [46]

प्रियङ्ग्वादिचूर्णम्

प्रियङ्ग्वञ्जनमुस्ताख्यं पाययेत् तु यथाबलम्। तृष्णाऽतिसारच्छर्दिघ्नं सक्षौद्रं तण्डुलाम्बुना॥ ४७॥

Priyaṅgvādi cūrṇa

The powder of priyaṅgu, rasāñjana and musta should be added with honey and administered with rice-water. It alleviates thirst, diarrhoea and vomiting. [47]

कलिङ्गकादिचूर्णम्

कलिंगकवचामुस्तं दारु सातिविषं समम्। कल्कं तण्डुलतोयेन पिबेत् पित्तानिलामयी॥ ४८॥

Kaliṅgādi cūrṇa

The kalka (powder) of kalinga, vacā, musta, devadāru and ativiṣā, all in equal quantity, should be taken with rice-water by one suffering from (diarrhoea caused by) pitta and vāta. [48]

कुटजादिकषायः

कुटजं दाडिमं मुस्तं धातकीबिल्वबालकम्। लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत्॥ ४९॥
सामे सशूले रक्तेऽपि पिच्छास्रावेषु शस्यते। कुटजादिरिति ख्यातः सर्वातीसारनाशनः॥ ५०॥

Kuṭajādi III

Kuṭaja, dāḍima, musta, dhātakī, bilva, bālaka, lodhra, candana and pāṭhā — this decoction known as kuṭajādi destroys all types of diarrhoea particularly that associated with āma, pain, blood and sliminess. [49-50]

समङ्गाऽऽदिक्वाथः

समङ्गाऽतिविषा मुस्तं विश्वं ह्रीबेरधातकी। कुटजत्वक्फलं बिल्वं क्वाथः सर्वातिसारनुत्॥ ५१॥

Samaṅgādi

Samaṅgā (lajjālu), ativiṣā, musta, śuṇṭhī, bālaka, dhātaki and kuṭaja (bark and seeds) — this decoction alleviates all types of diarrhoea. [51]

दलोत्थः स्वरसः पेयो हिज्जलस्य समाक्षिकः। जयत्याममतीसारं क्वाथो वा कुटजत्वचः॥ ५२॥

The leaf-juice of hijjala or the decoction of kuṭaja bark added with honey controls āmātisāra. [52]

सर्वातिसारे योगाः

वटारोहन्तु सम्पिष्य श्लक्ष्णं तण्डुलवारिणा। तत् पिबेत् तक्रसंयुक्तमतीसाररुजाऽपहम्॥ ५३॥

The hanging roots of vaṭa pounded finely with rice-water and taken with butter-milk alleviates diarrhoea. [53]

तण्डुलजलपिष्टाङ्कोठमूलकर्षार्द्धपानमपहरति। सर्वातिसारग्रहणीरोगसमूहं महावीरम्॥ ५४॥

The root of aṅkotha one-half karṣa (5 gm) pounded with rice-water is taken to alleviate all types of diarrhoea and grahaṇī disorder even if severe. [54]

कल्कः कोमलबब्बूलदलात् पीतोऽतिसारहा॥ ५५॥

The paste of the tender leaves of babbūla is given to alleviate diarrhoea. [55]

सर्वातिसारे कुटजलेहः

कुटजत्वक्कृतः क्वाथो घनीभूतः सुशीतलः। लेहितोऽतिविषायुक्तः सर्वातीसारनुद्भवेत्॥ ५६॥
वदन्त्यत्राष्टमांशेन क्वाथादतिविषारजः। प्रक्षेप्यत्वात् पादिकन्तु लेहादिति च नो मतिः॥ ५७॥

Kuṭaja-leha

The decoction of kuṭaja bark thickened as linctus with ativiṣā (powder) allays all types of diarrhoea. Some say that the ativiṣā powder should be taken one-eighth of the decoction but in our view, it should be one-fourth as it is added to the same. [56-57]

अङ्कोठवटकः

सदार्व्यङ्कोठपाठानां मूलं त्वक् कुटजस्य वा। शाल्मलीशालनिर्यासधातकीलोध्रदाडिमम्॥ ५८॥
पिष्ट्वाऽक्षसम्मितान् कृत्वा वटकांस्तण्डुलाम्बुना। तेनैव मधुसंयुक्तानेकैकान् प्रातरुत्थितः॥ ५९॥
पिबेदत्ययमापन्नो विड्विसर्गेण मानवः। अङ्कोठवटको नाम्ना सर्वातीसारनाशनः॥ ६०॥

Aṅkoṭha-vaṭaka

Dāruharidrā, aṅkoṭha and pāṭhā (roots of all), kuṭaja bark, exudation of śālmalī (mocarasa) and śāla (rāla), dhātakī, lodhra and dāḍima— these should be pounded with rice-water and made into boluses each weighing 10 gm. one bolus mixed with honey is taken with rice-water in early morning by one suffering from severe diarrhoea. Aṅkoṭha-vaṭaka alleviates all types of diarrhoea. [58-60]

ह्रीबेरादिपेया

पयस्यर्द्धोदके छागे ह्रीबेरोत्पलनागरैः। पेया रक्तातिसारघ्नी पृश्निपर्ण्या च साधिता॥ ६१॥

Liquid gruel prepared in goat's milk added with half water and processed with bālaka, utpala, nāgara (musta) and pṛśniparṇī checks bloody diarrhoea. [61]

रसाञ्जनादिचूर्णम्

रसाञ्जनं सातिविषं कुटजस्य फलत्वचम्। धातकीशृङ्गबेरञ्च प्रपिबेत् तण्डुलाम्बुना॥ ६२॥

क्षौद्रेण युक्तं नुदति रक्तातीसारमुल्वणम्। मन्दं दीपयते चाग्निं शूलञ्चापि निवर्त्तयेत्॥ ६३॥

Rasāñjanādi cūrṇa

Rasāñjana, ativiṣā, kuṭaja (fruit and bark), dhātaki and śuṇṭhī— this powder mixed with honey should be taken with rice-water. It controls severe bloody diarrhoea, stimulates digestive fire and allyas pain. [62-63]

विडङ्गादिक्वाथ:

विडंगातिविषामुस्तं दारुपाठाकलिङ्गकम्। मरिचेन समायुक्तं शोथातीसारनाशनम्॥ ६४॥

Viḍaṅgādi

Viḍaṅga, ativiṣā, musta, devadāru, pāṭhā and kaliṅgaka— this decoction added with marica allays diarrhoea complicated with oedema. [64]

वत्सकादिक्वाथ:

सवत्सक: सातिविष: सबिल्व: सोदीच्यमुस्तश्च कृत: कषाय:।
सामे सशूले सहशोणिते च चिरप्रवृत्तेऽपि हितोऽतिसारे॥ ६५॥

Vatsakādi

The decoction of vatsaka, ativiṣā, bilva, bālaka and musta is efficacious in diarrhoea, even if chronic, associated with āma, griping and blood. [65]

दाडिमादिक्वाथ:

कषायो मधुना पीतस्त्वचो दाडिमवत्सकात्। सद्यो जयेदतीसारं सरक्तं दुर्निवारकम्॥ ६६॥

Dāḍimādi

The decoction of dāḍima (fruit-rind) and vatsaka (kuṭaja bark) is taken after adding honey. It controls even severe diarrhoea with blood quickly. [66]

गुडबिल्वप्रयोग:

गुडेन खादयेद्बिल्वं रक्तातिसारनाशनम्। आमशूलविबन्धघ्नं कुक्षिरोगविनाशनम्॥ ६७॥

One should take bilva with jaggery. It checks bloody diarrhoea, allays āma, pain and constipation and destroys abdominal diseases. [67]

बिल्वादिकल्क:

बिल्वाब्दधातकीपाठाशुण्ठीमोचरसा: समा:। पीता रुन्धन्त्यतीसारं गुडतक्रेण दुर्जयम्॥ ६८॥

The paste of bilva, musta, dhātaki, pāṭhā, śuṇṭhī and mocarasa, all in equal quantity, is taken with buttermilk sweetened with jaggery. It controls severe diarrhoea. [68]

रक्तातिसारहरा योगा:

शल्लकीबदरीजम्बूपियालाम्रार्जुनत्वच:। पीता: क्षीरेण मध्वाढ्या: पृथक् शोणितनाशना:॥ ६९॥

The bark of śallakī, badarī, jambū, piyāla, āmra and arjuna, each singly, added with honey and taken with milk controls bloody diarrhoea. [69]

जम्ब्वादिस्वरसः

जम्ब्वाम्रामलकीनान्तु पल्लवानथ कुट्टयेत्।
संगृह्य स्वरसं तेषामजाक्षीरेण योजयेत्। तं पिबेन्मधुना युक्तं रक्तातीसारनाशनम्॥ ७०॥

Juice is extracted from the tender leaves of jambū, āmra and āmalakī by pounding and added with goat's milk. It should be taken mixed with honey to alleviate bloody diarrhoea. [70]

बिल्वादिकल्कः

बिल्वं छागपयःसिद्धं सितामोचरसान्वितम्। कलिङ्गचूर्णसंयुक्तं रक्तातीसारनाशनम्॥ ७१॥

Bilva (immature fruit) steamed with goat's milk and mixed with sugar, mocarasa and powder of kaliṅga (indrayava) alleviates blood diarrhoea. [71]

ज्येष्ठाम्बुना ताण्डुलीयं पीतञ्च ससितामधु॥ ७२॥

Likewise does taṇḍulīya (root) mixed with sugar and honey and taken with rice-water. [72]

शतावरीकल्कः घृतञ्च

पीत्वा शतावरीकल्कं पयसा क्षीरभुग् जयेत्। रक्तातिसारी पीत्वा वा तया सिद्धं घृतं नरः॥ ७३॥

One taking śatāvarī paste with milk and keeping on milk diet overcomes blood diarrhoea or so by taking ghee processed with it. [73]

कुटजादिरसक्रिया

कुटजस्य पलं ग्राह्यमष्टभागजले शृतम्। तथैव विपचेद् भूयो दाडिमोदकसंयुतम्॥ ७४॥
यावच्चैव लसीकाभं शृतं तमुपकल्पयेत्। तस्यार्द्धकर्षं तक्रेण पिबेद्रक्तातिसारवान्॥ ७५॥
अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम्। क्वाथतुल्यं दाडिमाम्बु भागानुक्तौ समं यतः॥ ७६॥

Kuṭajādi Rasakriyā

Kuṭaja (bark) one pala (40 gm.) should be decocted with water 8 times in quantity (320 ml) and cooked again with decoction of pomegranate (rind) till it becomes like lymph. It should be used by one suffering from blood diarrhoea in the quantity of 1/2 karṣa (5 gm) with buttermilk. It averts even imminent death. As there is no mention of specific proportion decoction of pomegranate is taken equal to that of Kuṭaja. [74-76]

रक्तातिसारे तिलशर्कराप्रयोगः

कल्कस्तिलानां कृष्णानां शर्कराभागसंयुतः। आजेन पयसा पीतः सद्यो रक्तं नियच्छति॥ ७७॥

The paste of black sesamum mixed with four times sugar and taken with goat's milk checks blood instantaneously. [77]

गुददाहादिचिकित्सा

गुददाहे प्रपाके वा पटोलमधुकाम्बुना। सेकादिकं प्रशंसन्ति छागेन पयसाऽपि वा॥ ७८॥
गुदभ्रंशे प्रकर्त्तव्या चिकित्सा तत्प्रकीर्त्तिता॥ ७९॥

If there is burning sensation or inflammation in anus sprinkling etc. with decoction of paṭola and madhuka or goat's milk is recommended. In prolapse of rectum the treatment prescribed for the same be adopted. [78-79]

पुटपाकसाध्यातिसार:

अवेदनं सुसम्पक्वं दीप्ताग्नेः सुचिरोत्थितम्। नानावर्णमतीसारं पुटपाकैरुपाचरेत्॥ ८०॥

When diarrhoea is free from pain, is matured, chronic and with various colours and appetite has arisen, it should be treated with puṭapāka. [80]

कुटजपुटपाक:

स्निग्धं घनं कुटजवल्कमजन्तुजग्धमादाय तत्क्षणमतीव च पोथयित्वा।
जम्बूपलाशपुटतण्डुलतोयसिक्तं बद्धं कुशेन च बहिर्घनपङ्कलिप्तम्॥ ८१॥
सुस्विन्नमेतदवपीड्य रसं गृहीत्वा क्षौद्रेण युक्तमतिसारवते प्रदद्यात्।
कृष्णात्रिपुत्रमतपूजित एष योगः सर्वातिसारहरणे स्वयमेव राजा॥ ८२॥

Kuṭaja - puṭapāka

One should take shining, compact and undamaged bark of kuṭaja and after grinding should sprinkle with rice-water and put it within a pouch made of jambū leaves. It should be tied with kuśa grass and pasted with thick mud. (After drying in the sun) it is heated on fire and when it is steamed and softened juice is extracted on pressing the bark. It should be used with honey in diarrhoea. This formulation is highly honoured in the tradition of kṛṣṇātreya and is the chief drug in alleviation of all types of diarrhoea. [81-82]

स्वरसस्य गुरुत्वेन पुटपाकपलं पिबेत्। पुटपाकस्य पाकोऽयं बहिरारक्तवर्णता॥ ८३॥

Because of heaviness, the juice extracted from puṭapāka should be taken in the dose of one pala (40 ml). The sign of the completion of puṭapāka is that if becomes quite red outside. [83]

श्योनाकपुटपाक:

त्वक्पिण्डं दीर्घवृन्तस्य काश्मरीपत्रवेष्टितम्। मृदाऽवलिप्तं सुकृतमंगारेष्ववकूलयेत्॥ ८४॥
स्विन्नमुद्धृत्य निष्पीड्य रसमादाय यत्नतः। शीतीकृतं मधुयुतं पाययेदुदरामये॥ ८५॥

(Similarly) the paste of the bark of dīrghavṛnta (śyonāka) covered with kāśmarī leaves and pasted with mud is cooked on fire till it is steamed properly. Then it is taken out and juice is extracted by pressing it. When it is cold, honey is added to it and is administered in the disorder of abdomen (diarrhoea). [84-85]

कुटजलेह:

शतं कुटजमूलस्य क्षुण्णं तोयार्मणे पचेत्। क्काथे पादावशेषेऽस्मिंल्लेहं पूते पुनः पचेत्॥ ८६॥
सौवर्चलयवक्षारबिडसैन्धवपिप्पली-। धातकीन्द्रयवाजाजीचूर्णं दत्त्वा पलद्वयम्॥ ८७॥
लिह्याद्बदरमात्रं तच्छीतं क्षौद्रेण संयुतम्। पक्कापक्कमतीसारं नानावर्णं संवेदनम्।
दुर्वारं ग्रहणीरोगं जयेच्चैव प्रवाहिकाम्॥ ८८॥

Kuṭajaleha

Hundred (Palas = 4 kg) of kuṭaja root (bark) is pounded and decocted in water one droṇa (10.24 litre) reduced to one-fourth. This is strained and again cooked adding thereto the powders of sauvarcala, yavakṣāra, biḍa, rocksalt, pippalī, dhātakī, indrayava and jīraka in (total) quantity of two palas (80 gms) till it attains the form of linctus. It should be used when cooled in the dose of badara (kola = 5 gm) mixed with honey. It alleviates diarrhoea, mature or immature, with various colours and pain and also obstinate grahaṇī disorders and pravāhikā (dysentery). [86-88]

कुटजाष्टक:

तुलामथार्द्रां गिरिमल्लिकायाः संक्षुद्य पक्त्वा रसमाददीत।
तस्मिन् सुपूते पलसम्मितानि श्लक्ष्णानि पिष्ट्वा सह शाल्मलेन॥ ८९॥
पाठां समङ्गाऽतिविषां समुस्तां बिल्वञ्च पुष्पाणि च धातकीनाम्।
प्रक्षिप्य भूयो विपचेत्तु तावद् दर्वीप्रलेपः स्वरसस्तु यावत्॥ ९०॥
पीतस्त्वसौ कालविदा जलेन मण्डेन वाऽजापयसाऽथवाऽपि।
निहन्ति सर्वन्त्वतिसारमुग्रं कृष्णं सितं लोहितपीतकं वा॥ ९१॥
दोषं ग्रहण्यां विविधञ्च रक्तं शूलं तथाऽर्शांसि सशोणितानि।
असृग्दरञ्चैवमसाध्यरूपं निहन्त्यवश्यं कुटजाष्टकोऽयम्॥ ९२॥
तुलाद्रव्ये जलद्रोणो द्रोणे द्रव्यतुला मता॥ ९३॥

Kuṭajāṣṭaka

Juice should be extracted from fresh kuṭaja (bark) one tulā (4 Kg.). After pounding and decocting it, It should be strained well and the following drugs ground finely should be added thereto in the quantity of one pala (40 gm) each — mocarasa, pāṭhā, samaṅgā (lajjālu), ativiṣā, musta, bilva and dhātakī flowers. Then it is cooked again till it sticks to the laddle. Taken in proper time with water or scum or goat's milk, this kuṭajāṣṭaka alleviates all types of diarrhoea, severe, black, white, red or yellow, grahaṇī disorders, haemorrhages, abdominal pain, bleeding piles and menorrhagia.

As a rule, for one tulā (4 Kg) of drugs, one droṇa (10.24 litre) water is required and vice-verse. [89-93]

षडङ्गघृतम्

वत्सकस्य च बीजानि दार्व्याश्च त्वच उत्तमाः। पिप्पली शृङ्गवेरञ्च लाक्षा कटुकरोहिणी॥ ९४॥
षड्भिरेभिर्घृतं सिद्धं पेयं मण्डावचारितम्। अतीसारं जयेच्छीघ्रं त्रिदोषमपि दारुणम्॥ ९५॥

Ṣaḍaṅga ghṛta

Kuṭaja seeds (indrayava), dāruharidrā (bark), pippalī, śuṇṭhī, lākṣā and kaṭukā — these six drugs are used for preparing ṣaḍaṅga ghṛta. It is taken with rice - scum. It alleviates diarrhoea even if severe and caused by tridoṣa. [94-95]

क्षीरिद्रुमाद्यं घृतम्

क्षीरिद्रुमाभीरुरसे विपक्वं तज्जैश्च कल्कैः पयसा च सर्पिः।
सितोपलार्द्धं मधुपादयुक्तं रक्तातिसारं शमयत्युदीर्णम्॥ ९६॥

Kṣīridrumādya ghṛta

This ghee is cooked with the decoction of (five) laticiferous trees and the juice of śatāvarī along with their paste and milk. Taken with sugarcandy and honey it pacifies severe blood diarrhoea. [96]

जीर्णातिसारे क्षीरप्रयोगः

जीर्णेऽमृतोपमं क्षीरमतिसारे विशेषतः। छागं तद्भेषजैः सिद्धं देयं वा वारिसाधितम्॥ ९७॥

In chronic diarrhoea milk, particularly goat's, is beneficial like nectar. It should be taken after processing with relevant drugs or simple water. [97]

बालबिल्वादिलेहः

बालबिल्वं गुडं तैलं पिप्पलीं विश्वभेषजम्। लिह्याद्वाते प्रतिहते सशूले सप्रवाहिके॥ ९८॥

Bālabilvādi leha

Bālabilva (Tender bilva fruit), jaggery, oil, pippalī and śuṇṭhī — these mixed together should be taken as linctus in condition of obstruction of wind, griping and tenesmus. [98]

पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः। त्र्यहात् प्रवाहिकां हन्ति चिरकालानुबन्धिनीम्॥ ९९॥

The paste of pippalī or marica taken with milk removes dysentery, even chronic, in three days. [99]

बालबिल्वादिखडः

कल्कः स्याद्बलबिल्वानां तिलकल्कश्च तत्समः।
दध्नः सरोऽम्लः स्नेहाढ्यः खडो हन्यात् प्रवाहिकाम्॥१००॥

Bālabilvādi Khaḍa

Khaḍa prepared of the paste of tender bilva fruit and equal quantity of the same of sesamum added with sourish supernatant fatty layer of curd alleviates dysentery. [100]

बिल्वोषणादिलेह:

बिल्वोषणं गुडं लोध्रं तैलं लिह्यात् प्रवाहणे ।। १०१ ।।

To relieve tenesmus in dysentery, one should take linctus prepared by mixing bilva, marica, jaggery, lodhra and oil. [101]

निश्चारके योगद्वयम्

दध्ना ससारेण सामक्षिकेण भुञ्जीत निश्चारकपीडितस्तु।
सुतप्तकुप्यक्कथितेन वाऽपि क्षीरेण शीतेन मधुप्लुतेन ।। १०२ ।।

One suffering from desyntery should take in diet curd with full fat mixed with honey or milk boiled in a metallic utensil and then made cold and added with honey. [102]

फाणितयोग:

दीप्ताग्निर्निष्पुरीषो यः सार्यते फेनिलं शकृत्। स पिबेत् फाणितं शुण्ठीदधितैलपयोघृतम् ।। १०३ ।।

One having increased appetite who excretes frothy faeces without solid stool should take phāṇita (semisolid jaggery), śuṇṭhī, oil, milk and ghee. [103]

असाध्यातीसारलक्षणम्

शोथं शूलं ज्वरं तृष्णां कासं श्वासमरोचकम्। छर्दिं मूर्च्छाञ्च हिक्काञ्च दृष्ट्वाऽतीसारिणं त्यजेत् ।। १०४ ।।
बहुमेही नरो यस्तु भिन्नविट्को न जीवति ।। १०५ ।।

Symptoms of incurable diarrhoea

If oedema, pain, fever, thirst, cough, dyspnoea, anorexia, vomiting, fainting and hiccough are observed in case of diarrhoea, it should be taken as incurable.

The patient of diarrhoea having polyuria does not survive. [104-105]

अतीसारेऽपथ्यानि

स्नानाभ्यङ्गावगाहांश्च गुरुस्निग्धातिभोजनम्। व्यायाममग्निसन्तापमतीसारी विवर्जयेत् ।। १०६ ।।

Unwholsome items in diarrhoea

Sprinkling bath, anointing, dipping bath, food consisting of heavy and unctuous items, over-eating, exertion and fire-heat (fomentation) should be avoided in diarrhoea. [106]

।। इत्यतीसारचिकित्सा ।। ३ ।।

Thus ends treatment of atisāra. [3]

४. चतुर्थोऽध्याय:

CHAPTER IV

ग्रहणी-चिकित्सा

Treatment of Grahaṇī (disorder of grahaṇī)

क्रियाक्रम:

ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत्। अतिसारोक्तविधिना तस्यामञ्च विपाचयेत्॥ १॥
शरीरानुगते सामे रसे लङ्घनपाचनम्॥ २॥
विशुद्धामाशयायास्मै पञ्चकोलादिभिर्युतम्। दद्यात् पेयाऽऽदि लघ्वन्नं पुनर्योगांश्च दीपकान्॥ ३॥

The disorder located in grahaṇī should be treated like ajīrṇa (indigestion) and steps should be taken for digestion of āma by the method prescribed in diarrhoea. [1]

In case of the general circulation of rasa associated with āma, laṅghana (lightening) and digestion should be adopted. [2]

When stomach is cleaned, the patient should be given light diet of liquid gruel etc. added with pañcakola etc. followed by appetising formulations. [3]

पेयाद्वयम्

कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता। पाचनी ग्राहिणी पेया सवाते पाञ्चमूलिकी॥ ४॥

The liquid gruel prepared with kapittha, bilva, cāṅgerī, buttermilk and pomegranate is digestive as well as checking while in (predominance of) vāta that of (smaller) pañcamūla is efficacious. [4]

ग्रहण्यां तक्रस्य प्राशस्त्यम्

ग्रहणीदोषिणां तक्रं दीपन-ग्राहि-लाघवात्। पथ्यं मधुरपाकित्वान्न च पित्तप्रकोपणम्॥ ५॥
कषायोष्णविकासित्वाद् रौक्ष्याच्चैव कफे हितम्। वाते स्वाद्वम्लसान्द्रत्वात् सद्यस्कमविदाहि तत्॥ ६॥

Buttermilk is wholesome for those suffering from the disorder of grahaṇī because of being appetiser, checking and light. (it is efficacious in all the three doṣas) it does not aggravate pitta due to madhura vipāka, is wholesome in kapha due to astringent, hot and vikāsī properties and so in vāta because of being sweet, sour and thick. Moreover, if it is fresh, it does not cause burning (during digestion). [5-6]

शुण्ठ्यादिक्वाथ:

शुण्ठीं समुस्तातिविषां गुडूचीं पिबेज्जलेन क्वथितां समांशाम्।
मन्दानलत्वे सततामतायामामानुबन्धे ग्रहणीगदे च॥ ७॥

Śuṇṭhyādi

Śuṇṭhī, musta, ativiṣā and guḍūcī all in equal quantity are decocted in water. It is useful in sluggish digestive fire, chronic āma and grahaṇī disorder associated with āma. [7]

धान्यकादिक्वाथः

धान्यकातिविषोदीच्ययमानीमुस्तनागरम्। बलाद्विपर्णीबिल्वञ्च दद्याद् दीपनपाचनम्॥ ८॥

Dhānyakādi

(The decoction of) dhānyaka, ativiṣā, bālaka, yavānī, musta, śuṇṭhī, balā, two parṇīs (śālaparṇī and pṛśniparṇī) and bilva stimulates digestive fire and is digestive (and as such useful in grahaṇī disorder). [8]

चित्रकाद्यगुडिका

चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च। व्योषहिङ्ग्वजमोदाश्च चव्यञ्चैकत्र चूर्णयेत्॥ ९॥
गुडिका मातुलुङ्गस्य दाडिमाम्लरसेन वा। कृता विपाचयत्यामं दीपयत्याशु चानलम्॥ १०॥
सौवर्चलं सैन्धवञ्च विडमौद्भिदमेव च। सामुद्रेण समं पञ्च लवणान्यत्र योजयेत्॥ ११॥

Citrakādya guḍikā

Citraka, pippalīmūla, yavakṣāra, sarjikṣāra, salts, trikaṭu, hiṅgu, ajamodā and cavya — all should be powdered together and made into pills with the juice of mātuluṅga or pomegranate. It digests āma and stimulates digestive fire instantaneously. Here sauvarcala, saindhava, viḍa, audbhida and sāmudra - these five salts should be used. [9-11]

श्रीफलादिकल्कः

श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः सगुडः। ग्रहणीगदमत्युग्रं तक्रभुजा शीलितो जयति॥ १२॥
जम्बूदाडिमशृङ्गाटपाठाकञ्चटपल्लवैः। पक्वं पर्य्युषितं बालबिल्वं सगुडनागरम्॥
हन्ति सर्वानतीसारान् ग्रहणीमतिदुस्तराम्॥ १३॥

The paste of the tender fruit of bilva added with śuṇṭhī powder and jaggery alleviates even severe grahaṇī disorder of the patient kept on buttermilk diet. [12]

The tender fruit of bilva staled and steamed with the tender leaves of jambū, dāḍima, śṛṅgāṭa, pāṭhā and kañcaṭa is taken with jaggery and śuṇṭhī. It alleviates all types of diarrhoea and severe grahaṇī disorder. [13]

नागरादिक्वाथः

नागरातिविषामुस्तक्वाथः स्यादामपाचनः॥ १४॥
चूर्णं हिङ्ग्वष्टकं वातग्रहण्यान्तु घृतानि च॥ १५॥

Nāgarādi

The decoction of nāgara (śuṇṭhī) and ativiṣā is digestive of āma. [14]

In vātika grahaṇī hiṅgvaṣṭaka cūrṇa as well as ghṛta formulations are useful. [15]

नागराद्यं चूर्णम्

नागरातिविषामुस्तं धातकीं सरसाञ्जनम्। वत्सकत्वक्फलं बिल्वं पाठां कटुकरोहिणीम्॥ १६॥
पिबेत् समांशं तच्चूर्णं सक्षौद्रं तण्डुलाम्बुना। पैत्तिके ग्रहणीदोषे रक्तं यच्चोपवेश्यते॥ १७॥
अर्शांस्यथ गुदे शूलं जयेच्चैव प्रवाहिकाम्। नागराद्यमिदं चूर्णं कृष्णात्रेयेण पूजितम्॥ १८॥

Nāgarādya cūrṇa

Nāgara (śuṇṭhī), ativiṣā, musta, dhātakī, rasāñjana, kuṭaja (bark and fruits), bilva, pāṭhā and kaṭukā - these in equal quantity are powdered together. This powder is added with honey and taken with rice-water. It is indicated in paittika grahaṇī disorder, blood diarrhoea, piles, pain in rectum and dysentery. This Nāgarādya cūrṇa is recommended by Kṛṣṇātreya. [16-18]

तण्डुलोदककल्पना

शीतकषायमानेन तण्डुलोदककल्पना। केऽप्यष्टगुणतोयेन प्राहुस्तण्डुलभावनाम्॥ १९॥

Taṇḍulodaka

Taṇḍulodaka (rice-water) is prepared according to the method of śīta kaṣāya (cold infusion). However, some recommend eight times water for impregnation of rice. [19]

भूनिम्बाद्यं चूर्णम्

भूनिम्बकटुकाव्योषमुस्तकेन्द्रयवान् समान्। द्वौ चित्रकात् वत्सकत्वगभागान् षोडश चूर्णयेत्॥ २०॥
गुडशीताम्बुना पीतं ग्रहणीदोषगुल्मनुत्। कामलाज्वरपाण्डुत्वमेहारुच्यतिसारनुत्॥
गुडयोगाद् गुडाम्बु स्याद् गुडवर्णरसान्वितम्॥ २१॥

Bhūnimbādya cūrṇa

Bhūnimba (kirātatikta), kaṭukā, trikaṭu, mustaka and indrayava equal parts, citraka two parts and kuṭaja bark 16 parts— These are powdered together and taken with cold jaggery-water. It alleviates grahaṇī disorder, gulma, jaundice, fever, anaemia, polyuria, anorexia and diarrhoea. Guḍāmbu (jaggery-water) is prepared by adding jaggery to water which has thus colour and taste of jaggery. [20-21]

कफग्रहण्यां चिकित्साक्रम:

ग्रहण्यां श्लेष्मदुष्टायां वमितस्य यथाविधि। कट्वम्ललवणक्षारैस्तीक्ष्णैश्चाग्निं विवर्द्धयेत्॥ २२॥

In case of the grahaṇī disorder caused by kapha, the patient should be given emesis according to prescribed method followed by administration of pungents, sours, salts and alkali and sharp drugs to stimulate digestive fire. [22]

पिप्पलीमूलादिचूर्णम्

समूलां पिप्पलीं क्षारौ द्वौ पञ्च लवणानि च। मातुलुङ्गाभयारास्नाशटीमरिचनागरम्॥ २३॥
कृत्वा समांशं तच्चूर्णं पिबेत् प्रातः सुखाम्बुना। श्लैष्मिके ग्रहणीदोषे बलवर्णाग्निवर्द्धनम्॥ २४॥

Pippalīmūlādi cūrṇa

Pippalīmūla, yavakṣāra, sarjikṣāra, five salts, mātuluṅga, harītakī, rāsnā, śaṭī, marica and śuṇṭhī— all in equal quantity should be powdered together. This should be taken with tepid water in the morning in grahaṇī disorder caused by kapha. It improves strength, lustre and digestive fire. [23-24]

पिप्पलीमूलादिघृतम्

एतैरेवौषधैः सिद्धं सर्पिष्पेयं समारुते ॥ २५ ॥

Pippalīmūlādi ghṛta

Ghee processed with the above drugs should be taken in that caused by vāta. [25]

भल्लातकादिक्षारः

भल्लातकं त्रिकटुकं त्रिफला लवणत्रयम्। अन्तर्धूमं द्विपलिकं गोपुरीषाग्निना दहेत् ॥ २६ ॥
स क्षारः सर्पिषा पेयो भोज्ये चाऽप्यवचारितः। हृत्पाण्डुग्रहणीदोषगुल्मोदावर्त्तशूलनुत् ॥ २७ ॥
सर्वजायां ग्रहण्यान्तु सामान्यो विधिरिष्यते ॥ २८ ॥

Bhallātaka-kṣāra

Bhallātaka, trikaṭu, triphalā, three salts (saindhava, sauvarcala and viḍa) each 80 gms are burnt together in a closed vessel in cowdung fire. This alkali is taken with ghee or in food. It alleviates cardiac distress, anaemia, grahaṇī disorder, gulma, udāvarta and abdominal pain. [26-27]

In grahaṇī disorder caused by all doṣas, the general treatment should be followed. [28]

मरिचादिचूर्णम्

चूर्णं मरिचमहौषधकुटजत्वग्भवं क्रमाद् द्विगुणम्। गुडमिश्रमथितपीतं ग्रहणीदोषापहं ख्यातम् ॥ २९ ॥

Maricādi cūrṇa

Powder made of marica, śuṇṭhī and kuṭaja bark successively in double quantity and taken with buttermilk mixed with jaggery alleviates grahaṇī disorder. [29]

पाठाद्यं चूर्णम्

पाठाबिल्वानलव्योषजम्बूदाडिमधातकी-। कटुकातिविषामुस्तदार्वीभूनिम्बवत्सकैः ॥ ३० ॥
सर्वैरेतैः समं चूर्णं कौटजं तण्डुलाम्बुना। सक्षौद्रश्च पिबेच्छर्दिज्वरातीसारशूलवान् ॥
तृडदाहग्रहणीदोषारोचकानलसादजित् ॥ ३१ ॥

Pāṭhādya cūrṇa

Pāṭhā, bilva, citraka, trikaṭu, jambū (seed-kernel), pomegranate (succulent seeds), dhātakī, kaṭukā, ativiṣā, musta, dāruharidrā, kirātatikta and indrayava— all in equal parts, kuṭaja bark equal to the total of the above. All are powdered and mixed together. This taken with rice-water mixed with honey alleviates vomiting, fever, diarrhoea, pain, thirst, burning sensation, grahaṇī disorder, anorexia and sluggishness of digestive fire. [30-31]

कपित्थाष्टकचूर्णम्

यमानीपिप्पलीमूलचातुर्जातकनागरैः। मरिचाग्निजलाजाजीधान्यसौवर्चलैः समैः ॥ ३२ ॥
वृक्षाम्लधातकीकृष्णाबिल्वदाडिमतिन्दुकैः। त्रिगुणैः षड्गुणसितैः कपित्थाष्टगुणैः कृतः ॥ ३३ ॥
चूर्णोऽतीसारग्रहणीक्षयगुल्मगलामयान्। कासश्वासाग्निसादार्शःपीनसारोचकान् जयेत् ॥ ३४ ॥

Kapitthāṣṭaka cūrṇa

Yavānī, pippalīmūla, caturjātaka, śuṇṭhī, marica, citraka, bālaka, jīraka, dhānyaka and sauvarcala each 1 part, vṛkṣāmla, dhataki, pippalī, bilva, dāḍima and tinduka each 3 parts, sugar 6 parts and kapittha 8 parts — all these are powdered and mixed together. This powder alleviates diarrhoea, grahaṇī disorder, wasting, gulma, throat disorders, cough, dyspnoea, mildness of fire, piles, chronic coryza and anorexia. [32-34]

दाडिमाष्टकः

कर्षोन्मिता तुगाक्षीरी चातुर्जातं द्विकार्षिकम्। यमानीधान्यकाजाजीग्रन्थिव्योषं पलांशिकम् ॥ ३५ ॥
पलानि दाडिमादष्टौ सितायाश्चैकतः कृतः। गुणैः कपित्थाष्टकवच्चूर्णोऽयं दाडिमाष्टकः ॥ ३६ ॥

Dāḍimāṣṭaka

Vaṃśalocana 10 gm, caturjāta 20 gm (each), yavānī, dhānyaka, jīraka, pippalīmūla, śuṇṭhī, pippalī and marica each 40 gm, pomegranate seeds 320 gm — All are powdered and mixed together. This dāḍimāṣṭaka cūrṇa is similar to kapitthāṣṭaka in properties and actions. [35-36]

वार्ताकुगुडिका

चतुष्पलं सुधाकाण्डात् त्रिपलं लवणत्रयात्। वार्त्ताकुकुडवश्चार्कादष्टौ द्वे चित्रकात् पले ॥ ३७ ॥
दग्ध्वा रसेन वार्ताकोर्गुडिका भोजनोत्तराः। भुक्ता भुक्तं पचन्त्याशु कासश्वासार्शसां हिताः ॥
विसूचिकाप्रतिश्यायहृद्रोगशमनाश्च ताः ॥ ३८ ॥

Vārtāku-guḍikā

Snuhi stem 160 gm, three salts (saindhava, sauvarcala and viḍa) total 120 gm, vārtāku (dried) 160 gm, arka (root) 320 gm and citraka 80 gm — all together are subjected to closed heating so as to make ash. This is made into pills with the juice of vārtāku and are taken after meals. They are digestive and are efficacious in cough, dyspnoea, piles, visūcikā, coryza and cardiac distress. [37-38]

अष्टपलं घृतम्

त्र्यूषणत्रिफलाकल्के बिल्वमात्रे गुडात् पले। सर्पिषोऽष्टपलं पक्त्वा मात्रां मन्दानलः पिबेत् ॥ ३९ ॥

Aṣṭapala ghṛta

Ghee 8 palas (320 gm) is cooked with the paste of trukaṭu and triphalā total 40 gm and jaggery 40 gm. This should be taken in proper dose by one having sluggish fire. [39]

बिल्वगर्भघृतम्

मसूरस्य कषायेण बिल्वगर्भं पचेद् घृतम्। हन्ति कुक्ष्यामयान् सर्वान् ग्रहणीपाण्डुकामला: ॥
केवलं व्रीहिजन्त्वङ्गक्वाथो व्युष्टस्तु दोषल: ॥ ४० ॥

Bilvagarbha ghṛta

Ghṛta should be processed with the decoction of masūra and bilva paste. It alleviates all abdominal disorders, grahaṇī disorder, anaemia and jaundice.

Decoction of simple paddy and animal parts, if stale, becomes defective. [40]

शुण्ठीघृतम्

विश्वौषधस्य गर्भेण दशमूलजले शृतम्। घृतं निहन्याच्छ्वयथुं ग्रहणीसामतामयम् ॥ ४१ ॥

Śuṇṭhīghṛta

Ghee cooked with the paste of śuṇṭhī and decoction of dasamūla allays oedema and āma located in grahaṇī. [41]

नागरघृतम्

घृतं नागरकल्केन सिद्धं वातानुलोमनम्। ग्रहणीपाण्डुरोगघ्नं प्लीहकासज्वरापहम् ॥ ४२ ॥

Nāgaraghṛta

Ghee processed with the paste of nāgara (śuṇṭhī) normalises the course of vāta and alleviates grahaṇī, anaemia, splenomegaly, cough and fever. [42]

चित्रकघृतम्

चित्रकक्वाथकल्काभ्यां ग्रहणीघ्नं शृतं हवि:। गुल्मशोथोदरप्लीहशूलार्शोघ्नं प्रदीपनम् ॥ ४३ ॥

Citrakaghṛta

Ghee cooked with the paste and decoction of citraka stimulates digestive fire and alleviates grahaṇīroga. Besides it is useful in gulma, oedema, abdominal enlargement, splenomegaly and pain in piles. [43]

बिल्वादिघृतम्

बिल्वाग्निचव्यार्द्रकशृङ्गबेरक्वाथेन कल्केन च सिद्धमाज्यम्।
सच्छागदुग्धं ग्रहणीगदोत्थशोथाग्निमान्द्यारुचिनुद्वरिष्ठम् ॥ ४४ ॥

Bilvādi ghṛta

Ghee cooked with the decoction and paste of bilva, citraka, cavya, fresh ginger along with goat's milk is efficacious in oedema, mildness of fire and anorexia caused by grahaṇī disorder. [44]

ग्रहण्यादौ चाङ्गेरीघृतम्

नागरं पिप्पलीमूलं चित्रको हस्तिपिप्पली। श्वदंष्ट्रा पिप्पली धान्यं बिल्वं पाठा यमानिका ॥ ४५ ॥

चाङ्गेरीस्वरसे सर्पिः कल्कैरेतैर्विपाचितम्। चतुर्गुणेन दध्ना च तद् घृतं कफवातनुत्॥ ४६॥
अर्शांसि ग्रहणीदोषं मूत्रकृच्छ्रं प्रवाहिकाम्। गुदभ्रंशार्त्तिमानाहं घृतमेतद् व्यपोहति॥ ४७॥

Cāṅgerīghṛta

Ghee cooked with the paste of śuṇṭhī, pippalīmūla, citraka, gajapippalī, gokṣura, pippalī, dhānyaka, bilva, pāṭhā and yavānī in cāṅgerī juice and fourfold curd pacifies kapha and vāta. It alleviates piles, grahaṇī disorder, dysuria, dysentery, rectal prolapse, pain and obstuicted wind. [45-47]

मरिचाद्यं घृतम्

मरिचं पिप्पलीमूलं नागरं पिप्पली तथा। भल्लातकं यमानी च विडङ्गं हस्तिपिप्पली॥ ४८॥
हिङ्गु सौवर्चलञ्चैव विडसैन्धवचव्यथ। सामुद्रं सयवक्षारं चित्रको वचया सह॥ ४९॥
एतैरर्द्धपलैर्भागैर्घृतप्रस्थं विपाचयेत्। दशमूलीरसे सिद्धं पयसा द्विगुणेन च॥ ५०॥
मन्दाग्नीनां हितं सिद्धं ग्रहणीदोषनाशनम्। विष्टम्भमामं दौर्बल्यं प्लीहानमपकर्षति॥ ५१॥
कासं श्वासं क्षयञ्चैव दुर्नाम सभगन्दरम्। कफजान् हन्ति रोगांश्च वातजान् क्रिमिसम्भवान्।
तान् सर्वान् नाशयत्याशु शुष्कं दार्वनलो यथा॥ ५२॥

Maricādya ghṛta

Marica, pippalīmūla, śuṇṭhī, pippalī, bhallātaka, yavānī, viḍaṅga, gajapippalī, hiṅgu, sauvarcala, viḍa, saindhava, cavya, sāmudra, yavakṣāra, citraka and vacā — with (the paste of) these each 20 gm. ghee one prastha (640 gm) is cooked in decoction of daśamūla and double milk. This is useful for those having mild digestive fire and alleviates grahaṇī disorder, stiffness in abdomen, āma, debility, splenomegaly, cough, dyspnoea, wasting, piles and fistula-in-ano. Besides, it destroys diseases caused by kapha and vāta as well as helminths as fire consumes dry wood. [48-52]

महाषट्पलकघृतम्

सौवर्चलं पञ्चकोलं सैन्धवं हवुषां वचाम्। अजमोदां यवक्षारं हिङ्गु जीरकमौद्भिदम्॥ ५३॥
कृष्णाऽजाजीसभूतीकं कल्कीकृत्य पलार्द्धकम्। आर्द्रकस्य रसं चुक्रं क्षीरं मस्त्वम्लकाञ्जिकम्॥ ५४॥
दशमूलकषायेण घृतप्रस्थं विपाचयेत्। भक्तेन सह दातव्यं निर्भक्तं वा विचक्षणैः॥ ५५॥
क्रिमिप्लीहोदराजीर्णज्वरकुष्ठप्रवाहिकाः। वातरोगान् कफव्याधीन् हन्याच्छूलमरोचकम्॥ ५६॥
पाण्डुरोगं क्षयं कासं दौर्बल्यं ग्रहणीगदम्। महाषट्पलकं नाम वृक्षमिन्द्राशनिर्यथा॥ ५७॥

Mahāṣaṭpalaka ghṛta

Ghee should be cooked with the paste of sauvarcala, pañcakola, saindhava, hapuṣā, vacā, ajamodā, yavakṣāra, hiṅgu, jīraka, audbhida (salt), kṛṣṇajīraka, yavānī each 20 gm along with the juice of fresh ginger, cukra, milk, curdwater, sour gruel and decoction of daśamūla. It should be taken with or without meal. This Mahāṣaṭpalaka ghṛta alleviates worms, splenomegaly, abdominal enlargement, indigestion, fever, kuṣṭha, dysentery,

diseases caused by vāta and kapha, pain, anorexia, wasting, cough, debility and grahaṇī disorder as thunderbolt destroys tree. [53-57]

स्वल्पचुक्रम्

यन्मस्त्वादि शुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम्। धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते।
द्विगुणं गुडमध्वारनालमस्तु क्रमादिह ॥ ५८ ॥

Svalpacukra

Curd-water etc are kept in clean vessel with jaggery, honey and sour gruel in a heap of paddy for three days. The sour product thus prepared is known as cukra.

Here the quantity of jaggery, honey, sour gruel and curd-water should be double successively. [58]

बृहच्चुक्रम्

प्रस्थं तण्डुलतोयतस्तुषजलात् प्रस्थत्रयञ्चाम्लतः, प्रस्थार्द्धं दधितोऽम्लमूलकपलान्यष्टौ गुडान्मानिके।
मान्यौ शोधितशृङ्गबेरशकलाद् द्वे सिन्धवजाज्योः पले, द्वे कृष्णोषणयोर्निशापलयुगं निक्षिप्य भाण्डे दृढे ॥
स्निग्धे धान्ययवादिराशिनिहितं त्रीन् वासरान् स्थापयेद्, ग्रीष्मे तोयधरात्यये च चतुरो वर्षासु पुष्पागमे।
षट् शीतेऽष्टदिनान्यतः परमिदं विस्राव्य सञ्चूर्णयेच्चातुर्जातपलेन संहितमिदं शुक्तञ्च चुक्रञ्च तत् ॥ ६० ॥
हन्याद्वातकफामदोषजनितान् नानाविधानामयान्, दुर्नामानिलगुल्मशूलजठरान् हत्वाऽनलं दीपयेत् ॥ ६१ ॥

Bṛhaccukra

Rice-water 640 ml, sour gruel 1.92 kg., sour curd 320 ml, soured radish 320 gm, jaggery 640 gm, cleaned ginger pieces 640 gm, rocksalt 80 gm, jīraka 80 gm, pippalī 80 gm, marica 80 gm and haridrā 160 gm should be kept in an anointed firm vessel in a heap of paddy, barley etc. for three days. However, this period may be of four days in summer and autumn, six days in rainy season and spring and eight days in winter (hemanta and śiśira). Then it should be strained and added with the powder of caturjāta (total) 40 gm. This sour preparation is known as (bṛhat) cukra. It stimulates digestive fire and alleviates various disorders caused by vāta, kapha and āmadoṣa as well as piles, vātagulma, pain and udararoga. [59-61]

तक्रारिष्टः

यमान्यामलकं पथ्या मरिचं त्रिपलांशकम्। लवणानि पलांशानि पञ्च चैकत्र चूर्णयेत् ॥ ६२ ॥
तक्रकंसासुतं जातं तक्रारिष्टं पिबेन्नरः। दीपनं शोथगुल्मार्शःक्रिमिमेहोदरापहम् ॥ ६३ ॥

Takrāriṣṭa

Yavānī, āmalaka, harītakī and marica each 120 gm, five salts each 40 gm. powdered together are added to buttermilk 2.56 litre which is kept for fermentation till it becomes sour. This takrāriṣṭa stimulates digestive fire and alleviates oedema, gulma, piles, worms, prameha and udararoga. [62-63]

आयामकाञ्जिकः

वाट्यस्य दद्याद् यवशक्तुकानां पृथक् पृथक् त्वाढकसम्मितञ्च ।
मध्यप्रमाणानि च मूलकानि दद्याच्चतुःषष्टिसुकल्पितानि ।। ६४ ।।
द्रोणेऽम्भसः प्लाव्य घटे सुधौते दद्यादिदं भेषजजातयुक्तम् ।
क्षारद्वयं तुम्बुरु बस्तगन्धां धनीयकं स्याद्बिडसैन्धवञ्च ।। ६५ ।।
सौवर्चलं हिङ्गु शिवाटिकाञ्च चव्यञ्च दद्याद् द्विपलप्रमाणम् ।
इमानि चान्यानि पलोन्मितानि विजर्ज्जरीकृत्य घटे क्षिपेच्च ।। ६६ ।।
कृष्णामजाजीमुपकुञ्चिकाञ्च तथाऽऽसुरीकारविचित्रकञ्च ।
पक्षस्थितोऽयं बलवर्णदेहवयस्करोऽतीव बलप्रदश्च ।। ६७ ।।
काञ्जीवयामीति यतः प्रवृत्तस्तत्काञ्जिकेति प्रवदन्ति तज्ज्ञाः ।
आयामकालाज्जरयेच्च भक्तमायामकेति प्रवदन्ति चैनम् ।। ६८ ।।
दकोदरं गुल्ममथ प्लिहानं हृद्रोगमानाहमरोचकञ्च ।
मन्दाग्नितां कोष्ठगतञ्च शूलमर्शोविकारान् सभगन्दरांश्च ।। ६९ ।।
वातामयानाशु निहन्ति सर्वान् संसेव्यमानं विविधान्नराणाम् ।। ७० ।।

Āyāmakāñjika

Vāṭya (barley-scum) and barley flour each 2.56 kg and medium-sized radish made into pieces sixty four (in number) should be added to water 10.24 litres in an earthen vessel. Then the following drugs should be mixed-two alkalis (yavakṣāra and sarjikṣāra), tumburu, ajagandhā, dhānyaka, viḍa, saindhava, sauvarcala, hiṅgu, śivāṭikā and cavya each 80 gm. and the powder of the following should be added-pippalī, jīraka, upakuñcikā, āsurī, kāravī and citraka 40 gm each and kept for a fornight. It improves strength, lustre, physique and life-span, it is particularly strength-promoting.

It is known as kāñjika as it declares 'Whom should I enliven' and it is known as 'āyāma' because it digests the food in half period of a yāma (three hours)

If it is taken regularly it alleviates ascites, gulma, splenomegaly, cardiac distress, obstructed wind, anorexia, mild fire, abdominal pain, piles, fistula-in-ano and various disorders of vāta. [64-70]

कल्याणगुडः

प्रस्थत्रयेणामलकीरसस्य शुद्धस्य दत्त्वाऽर्द्धतुलां गुडस्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्यव्योषेभकृष्णाहवुषाजमोदैः ।। ७१ ।।
विडङ्गसिन्धुत्रिफलायमानीपाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टावष्टौ च तैलस्य पचेद् यथावत् ।। ७२ ।।
तं भक्षयेदक्षफलप्रमाणं यथेष्टचेष्टं त्रिसुगन्धियुक्तम् ।
अनेन सर्वे ग्रहणीविकाराः सश्वासकासस्वरभेदशोथाः ।। ७३ ।।

शाम्यन्ति चायं चिरमन्थराग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः।
स्त्रीणाञ्च वन्ध्याऽऽमयनाशनोऽयं कल्याणको नाम गुडः प्रदिष्टः ॥ ७४ ॥
तैले मनाग् भर्जयन्ति त्रिवृदत्र चिकित्सकाः। अत्रोक्तमानसाधर्म्यात् त्रिसुगन्धि पलं पृथक् ॥ ७५ ॥

Kalyāṇaguḍa

(Tila) oil 320 gm, trivṛt powder 320 gm, jaggery 2 kg. and fresh āmalakī juice 1.92 litre should be cooked together added with pippalīmūla, jīraka, cavya, trikaṭu, gajapippalī, hapuṣā, ajamodā, viḍaṅga, rock salt, triphalā, yavānī, pāṭhā, citraka and dhānyaka each 40 gm. This is known as kalyāṇaguḍa. It should be mixed with three aromatics (tvak, elā and patra). Taken in the dose of 10 gm it stimulates slow digestive fire and sexual potency and alleviates all types of grahaṇī disorder, dyspnoea, cough, hoarseness of voice, oedema and sterility in women. Here physicians recommend little frying of trivṛt in oil. As in case of other drugs the three aromatics are taken 40 gm each. [71-75]

कूष्माण्डगुडकल्याणकः

कूष्माण्डकानां रूढानां सुस्विन्नं निष्कुलत्वचाम्। सर्पिःप्रस्थे पलशतं ताम्रभाण्डे शनैः पचेत् ॥ ७६ ॥
पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली। धान्यकानि विडङ्गानि यमानी मरिचानि च ॥ ७७ ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम्। एकैकस्य पलञ्चैव त्रिवृदष्टपलं भवेत् ॥ ७८ ॥
तैलस्य च पलान्यष्टौ गुडपञ्चाशदेव तु। प्रस्थैस्त्रिभिः समेतन्तु रसेनामलकस्य तु ॥ ७९ ॥
यदा दर्वीप्रलेपस्तु तदैनमवतारयेत्। यथाशक्ति गुडान् कुर्यात् कर्षं कर्षार्द्धमानकान् ॥ ८० ॥
अनेन विधिना चैव प्रयुक्तस्तु जयेदिमान्। प्रसह्य ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥ ८१ ॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः। कामलापाण्डुरोगांश्च प्रमेहांश्चैव विंशतिम् ॥ ८२ ॥
वातशोणितवीसर्पान् दद्रुचर्महलीमकान्। कफपित्तानिलान् सर्वान् प्ररूढांश्च व्यपोहति ॥ ८३ ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये नराः। तेषां वृष्यश्च बल्यश्च वयःस्थापन एव च।
गुडकल्याणको नाम वन्ध्यानां गर्भदः परः ॥ ८४ ॥

Kūṣmāṇḍaguḍakalyāṇaka

The mature fruits of Kūṣmāṇḍa decorticated and steamed 4 kg are cooked with ghee 640 gm on mild fire in a copper vessel along with oil 320 ml., jaggery 2 kg and juice of āmalaka 1.92 litre. The following drugs are added to it— Pippalī, pippalīmūla, citraka, gajapippalī, dhānyaka, viḍaṅga, yavānī, marica, triphalā, ajamodā, indrayava, jīraka and saindhava each 40 gm and trivṛt 320 gm. When it sticks to laddle (it should be taken as prepared) and the vessel should be put down. Boluses should be made weighing 10 or 5 gm each. If taken regularly it overcomes grahaṇī disorders, kuṣṭha, piles, fistula-in-ano, fever, hardness in bowels, cardiac distress, gulma, udara, visūcikā, jaundice, anaemia, prameha, vātarakta, erysipelas, ring worm, psoriasia, halīmaka and other chronic disorders caused by vāta, pitta and kapha. It acts as aphrodisiac, tonic and rejuvenating for those who are debilitated due to disease, age and women. Moreover, this guḍakalyāṇaka is good for sterile women by promoting conception. [76-84]

रसपर्पटिका

याऽम्लपित्ते विधातव्या गुडिका च क्षुधावती। तत्र प्रोक्तविधा शुद्धौ समानौ रसगन्धकौ ॥ ८५ ॥
सम्मर्द्य कज्जलाभन्तु कुर्य्यात् पात्रे दृढाश्रये। ततो बादरवह्निस्थलौहपात्रे द्रवीकृतम् ॥ ८६ ॥
गोमयोपरि विन्यस्तकदलीपत्रपातनात्। कुर्यात् पर्पटिकाऽऽकारमस्य रक्तिद्वयं क्रमात् ॥ ८७ ॥
द्वादशरक्तिकां यावत् प्रयोगः प्रहरार्द्धतः। तदूर्ध्वं बहुपूगस्य भक्षणं दिवसे पुनः ॥ ८८ ॥
तृतीय एव मांसाज्यदुग्धाद्यत्र विधीयते। वर्ज्यं विदाहि स्त्री रम्भामूलं तैलञ्च सार्षपम् ॥ ८९ ॥
क्षुद्रमत्स्याम्बुजखगांस्त्यक्त्वोन्निद्रः पयः पिबेत्। ग्रहणीक्षयकुष्ठार्शःशोषाजीर्णविनाशिनी ॥
रसपर्पटिका ख्याता निबद्धा चक्रपाणिना ॥ ९० ॥

Rasaparpaṭikā

Mercury and sulphur purified according to the method described in the context of kṣudhāvatī guḍikā (under amlapitta) are taken in equal quantity and are made like lamp-soot (kajjala) by rubbing in a hard mortar. Then it is put in an iron laddle on fire of badara wood, liquified and then poured on a banana leaf put on cow dung and pressed by the same making it scale-like thin material. It should be taken in the dose starting from two ratti (250 mg) gradually increasing to twelve ratti (1.5 gm). On intake of the drug after 11/2 hours, the patient should chew profuse quantity of betelnut in the day; on the third day he is allowed to take meat, ghee, milk etc avoiding burning items, sexual intercourse, banana root, mustard oil, small fish and aquatic birds. He should take water after getting up (in early morning). This Rasaparpaṭikā is documented by Cakrapāṇi and is famous for alleviating grahaṇī, wasting, kuṣṭha, piles, consumption and indigestion. [85-90]

ताम्रयोगः

स्थाल्यां सम्मर्द्य दातव्यौ माषिकौ रसगन्धकौ। नखक्षुण्णं तदुपरि तण्डुलीयं द्विमाषिकम् ॥ ९१ ॥
ततो नैपालताम्रादि विधाय सुकरालितम्। पांशुना पूरयेदूर्ध्वं सर्वां स्थालीं ततोऽनलः ॥ ९२ ॥
स्थाल्यधो नालिकां यावद् देयस्तेन मृतस्य च। ताम्री ताम्रस्य रक्त्येका त्रिफलाचूर्णरक्तिका ॥ ९३ ॥
त्र्यूषणस्य च रक्त्येका विडङ्गस्य च तन्मधु। घृतेनालोड्य लेढव्यं प्रथमे दिवसे ततः ॥ ९४ ॥
रक्तिवृद्धिः प्रतिदिनं कार्या ताम्रादिषु त्रिषु। स्थिरा विडङ्गरक्तिस्तु यदा भेदो विवक्षितः ॥ ९५ ॥
तदा विडङ्गन्त्वधिकं दद्याद्रक्तिद्वयं पुनः। द्वादशाहं योगवृद्धिस्ततो ह्रासक्रमोऽप्ययम् ॥ ९६ ॥
ग्रहणीमम्लपित्तञ्च क्षयं शूलं च सर्वदा। ताम्रयोगो जयत्येष बलवर्णाग्निवर्द्धनः ॥ ९७ ॥

Tāmrayoga

In an earthen vessel are kept mercury and sulphur one gm each and rubbed well together covered by small pieces of taṇḍulīya 2 gm. Thereon copper is put and the whole thing is covered firmly with pasted rice. Now the vessels is filled with sand and put on fire for 40 minutes. By this copper is killed (and bhasma is prepared). 125 mg of this mixed with triphalā powder (total), trikaṭu (total) and viḍaṅga 125 mg each is taken with honey

and ghee. The dose is increased 125 mg per day in respect of all the ingredients except viḍaṅga which is given in the dose of 250 mg when purgation is required. The order of increase is upto 12 days, thereafter the dose is decreased in the same order. This tāmrayoga is efficacious in grahaṇī disorder, amlapitta, wasting, abdominal pain and promotes strength, lustre and digestive fire. [91-97]

॥ इति ग्रहणीचिकित्सा ॥ ४ ॥

Thus ends treatment of grahaṇī. [4]

(Grahaṇī is the seat of digestive fire and it retains food till it is digested. The disorder of grahaṇī is known as 'grahaṇī-roga' or in short 'grahaṇī'. It is characterised by lack of digestion and diarrhoea alternating with constipation.)

५. पञ्चमोऽध्यायः

CHAPTER V

अर्शश्चिकित्सा

Treatment of Arśa (piles)

चतुर्विधोपक्रमः

दुर्नाम्नां साधनोपायश्चतुर्धा परिकीर्त्तितः। भेषजक्षारशस्त्राग्निसाध्यत्वादाद्य उच्यते॥ १॥

There are four remedial measures for piles - medical treatment, application of alkali, surgical operation and cuaterization out of which the first one is described because of convenience. [1]

सामान्यचिकित्सा

यद्वायोरानुलोम्याय यदग्निबलवृद्धये। अन्नपानौषधद्रव्यं तत् सेव्यं नित्यमर्शसैः॥ २॥

Those suffering from piles should take that food, drink and drug which is conducive for normalization of the course of vāyu and stimulant for digestive fire. [2]

शुष्करक्तार्शसोश्चिकित्साविशेषः

शुष्कार्शसां प्रलेपादिक्रिया तीक्ष्णा विधीयते। स्राविणां रक्तमालोक्य क्रिया कार्य्याऽस्रपैत्तिकी॥ ३॥

In case of dry piles, sharp paste etc are applied while in that of bleeding ones, the measures as prescribed for raktapitta are applied after examining the blood. [3]

स्नुक्क्षीरादिप्रलेपौ

स्नुक्क्षीरं रजनीयुक्तं लेपाद् दुर्नामनाशनम्। कोषातकीरजोघर्षान्निपतन्ति गुदोद्भवाः॥ ४॥

The paste of latex of snuhī mixed with haridrā destroys piles. The haemorrhoids fall down by rubbing the powder of koṣātakī. [4]

अर्कक्षीरादिलेपः

अर्कक्षीरं सुधाक्षीरं तिक्ततुम्बयाश्च पल्लवाः। करञ्जो बस्तमूत्रञ्च लेपनं श्रेष्ठमर्शसाम्॥ ५॥

Application of the paste of arka latex, snuhī latex, tender leaves of kaṭutumbī, karañja and goat's urine (combined together) is efficacious for piles. [5]

घोषाफलवर्तिः ज्योत्स्निकाकल्कलेपश्च

अर्शोघ्नी गुदगा वर्त्तिर्गुडघोषाफलोद्भवा। ज्योत्स्निकामूलकल्केन लेपो रक्तार्शसां हितः॥ ६॥

Suppository made of kośātakī fruit and jaggery and applied in rectum destroys piles. Application of the paste of jyotsnikā root is useful for bleeding piles. [6]

तुम्बीबीजादिगुडी

तुम्बीबीजं सौद्भिदन्तु काञ्जीपिष्टं गुडीत्रयम्। अर्शोहरं गुदस्थं स्याद् दधि माहिषमश्नतः ॥ ७ ॥

Kaṭutumbī seeds and audhbida salt are rubbed with sour gruel and made into suppository. Application of only three suppositories in rectum destroys piles. The patient is kept on diet of bufallo's curd. [7]

पथ्यादिलेपः

महाबोधिप्रदेशस्य पथ्या कोषातकीरजः। कफेन लेपतो हन्ति लिङ्गवर्त्तिमसंशयम् ॥ ८ ॥

Harītakī of the Mahābodhi's region (magadha), koṣātakī powder mixed with samudra-phena, on application, destroys the penile warts undoubtedly. [8]

अपामार्गक्षारादिलेपः

अपामार्गाङ्घ्रिजः क्षारो हरितालेन संयुतः। लेपनं लिङ्गसम्भूतमर्शो नाशयति ध्रुवम् ॥ ९ ॥

Application of the paste of alkali of the apāmārga root mixed with orpiment destroys the warts of penis positively. [9]

भिन्नवर्चोगाढवर्चसोः चिकित्साविधिः

वातातीसारवद्भिन्नवर्चांस्यर्शांस्युपाचरेत्। उदावर्त्तविधानेन गाढविट्कानि चासकृत् ॥ १० ॥

If there is diarrhoea in piles, it should be treated like vātika diarrhoea. In case of constipation, the measures as adopted in udāvarta should be applied. [10]

तक्रप्रयोगः

बिड्विबन्धे हितं तक्रं यमानीविडसंयुतम्। वातश्लेष्मार्शसां तक्रात् परं नास्तीह भेषजम् ॥ ११ ॥
तत् प्रयोज्यं यथादोषं सस्नेहं रूक्षमेव वा। न विरोहन्ति गुदजाः पुनस्तक्रसमाहताः ॥ १२ ॥

In case of constipation, butter-milk mixed with yavānī and viḍa is useful. There is no remedy for piles caused by vāta and kapha better than buttermilk which is used with or without fat according to doṣa. The haemorrhoids destroyed by buttermilk do not recur. [11-12]

चित्रकतक्रप्रयोगः

त्वचं चित्रकमूलस्य पिष्ट्वा कुम्भं प्रलेपयेत्। तक्रं वा दधि वा तत्र जातमर्शोहरं पिबेत् ॥ १३ ॥

The root bark of citraka should be pounded and pasted within a jar. Buttermilk or curd made therein should be taken to alleviate piles. [13]

गुडाभयाप्रयोगः

पित्तश्लेष्मप्रशमनी कच्छुकण्डूरुजाऽपहा। गुदजान् नाशयत्याशु योजिता सगुडाऽभया ॥ १४ ॥

Harītakī mixed with jaggery, if taken, pacifies pitta and kapha, alleviates scabies and itching and destroys piles. [14]

अभयाप्रयोगः

सगुडां पिप्पलीयुक्तामभयां घृतभर्जिताम्। त्रिवृद्दन्तीयुतां वाऽपि भक्षयेदानुलोमिकीम्॥ १५॥

Harītakī mixed with jaggery and pippalī and fried with ghee or mixed with trivṛt and dantī should be taken to normalise the course of vāyu. [15]

तिलारुष्करप्रयोगः

तिलारुष्करसंयोगं भक्षयेदग्निवर्द्धनम्। कुष्ठरोगहरं श्रेष्ठमर्शसां नाशनं परम्॥ १६॥

One should take the combination of sesamum and bhallātaka (marking nut) which promotes digestive fire, alleviates kuṣṭha and destroys piles. [16]

तिलभल्लातकादियोगः

तिलं भल्लातकं पथ्या गुडश्चेति समांशकम्। दुर्नामकासश्वासघ्नं प्लीहपाण्डुज्वरापहम्॥ १७॥

Tilādi yoga

Tila, bhallātaka, harītakī and jaggery should be mixed in equal quantity. It is useful in piles, dyspnoea, cough, splenomegaly, anaemia and fever. [17]

योगद्वयम्

गोमूत्रव्युषितां दद्यात् सगुडां वा हरीतकीम्। पञ्चकोलकयुक्तं वा तक्रमस्मै प्रदापयेत्॥ १८॥

Or harītakī soaked with cow's urine overnight should be given with jaggery or buttermilk mixed with pañcakola should be given. [18]

शूरणपुटपाकः

मृल्लिप्तं शौरणं कन्दं पक्त्वाऽग्नौ पुटपाकवत्। अद्यात् सतैललवणं दुर्नामविनिवृत्तये॥ १९॥

Śūraṇapuṭapāka

The tuber of śūraṇa covered with mud is cooked on fire like puṭapāka (heating in closed container). This is taken with oil and salt to alleviate piles. [19]

वार्ताकुफलप्रयोगः

स्विन्नं वार्त्ताकुफलं घोषायाः क्षारजेन सलिलेन। तद् घृतभृष्टं युक्तं गुडेनातृप्तितो योऽत्ति॥ २०॥
पिबति च तक्रं नूनं तस्याश्वेवातिवृद्धगुदजानि। यान्ति विनाशं पुंसां सहजान्यपि सप्तरात्रेण॥ २१॥

The brinjal fruit is steamed with alkali-water of ghoṣā and fried with ghee. It is then mixed with jaggery and taken to full contentment followed by instake of buttermilk. By this even the chronic and congenital piles are destroyed in a week. [20-21]

कृष्णतिलप्रयोगः

असितानां तिलानां प्राक् प्रकुञ्चं शीतवार्य्यनु। खादतोऽर्शांसि नश्यन्ति द्विजदार्ढ्याङ्गपुष्टिदम्॥ २२॥

Black sesamum 40 gm, if taken with cold water, destroys piles and provides strength to teeth and body-parts. [22]

दन्त्यरिष्टम्

दन्तीचित्रकमूलानामुभयोः पञ्चमूलयोः। भागान् पलांशानापोथ्य जलद्रोणे विपाचयेत्॥ २३॥
त्रिपलं त्रिफलायाश्च दलानां तत्र दापयेत्। रसे चतुर्थशेषे तु पूतशीते प्रदापयेत्॥ २४॥
तुलां गुडस्य तत् तिष्ठेन्मासार्द्धं घृतभाजने। तन्मात्रया पिबेन्नित्यमर्शोभ्यो विप्रमुच्यते॥ २५॥
ग्रहणीपाण्डुरोगघ्नं वातवर्चोऽनुलोमनम्। दीपनश्चारुचिघ्नश्च दन्त्यरिष्टमिदं विदुः॥
पात्रेऽरिष्टादिसन्धानं धातकीलोध्रलेपिते॥ २६॥

Dantyariṣṭa

Dantī root, citraka root, both pañcamulas — each 40 gm, triphalā 120 gm - all should be crushed and cooked in water 10.24 litre reduced to one-fourth. It is strained and allowed to stay till it becomes cold. Then jaggery 4 kg is mixed therewith and kept in a ghee-anointed jar for a fortnight. On taking it in proper dose regularly one is freed from piles. Besides, dantyariṣṭa is useful in grahaṇī disorder and aneamia, is carminative and laxative, stimulates digestive fire and alleviates anorexia. For fermentation of ariṣṭa etc. the jar should be pasted with dhātakī (flowers) and lodhra (bark). [23-26]

नागरादिमोदकः

सनागरारुष्करवृद्धदारकं गुडेन यो मोदकमत्त्युदारकम्।
अशेषदुर्नामकरोगदारकं करोति वृद्धं सहसैव दारकम्॥ २७॥

Nāgarādi modaka

Nāgara (śuṇṭhī), bhallātaka and vṛddhadāraka are mixed with jaggery and made into bolus. It destroys all types of piles and transforms the old into the young. [27]

चूर्णे चूर्णसमो ज्ञेयो मोदके द्विगुणो गुडः॥ २८॥

The quantity of jaggery should be equal in powder and double in modaka (bolus). [28]

प्राणदा गुडिका

त्रिपलं शृङ्गबेरस्य चतुर्थं मरिचस्य च। पिप्पल्याः कुडवार्धञ्च चव्यायाः पलमेव च॥ २९॥
तालीशपत्रस्य पलं पलार्धं केशरस्य च। द्वे पले पिप्पलीमूलादर्द्धकर्षञ्च पत्रकात्॥ ३०॥
सूक्ष्मैलाकर्षमेकन्तु कर्षं त्वगमृणालयोः। गुडात् पलानि तु त्रिंशच्चूर्णमेकत्र कारयेत्॥ ३१॥
अक्षप्रमाणा गुडिका प्राणदेति च सा स्मृता। पूर्वं भक्ष्या तु पश्चात्तु भोजनस्य यथाबलम्॥ ३२॥
मद्यं मांसरसं यूषं क्षीरं तोयं पिबेत् तथा। हन्यादर्शांसि सर्वाणि सहजान्यस्रजानि च॥ ३३॥
वातपित्तकफोत्थानि सन्निपातोद्भवानि च। पानात्यये मूत्रकृच्छ्रे वातरोगे गलग्रहे॥ ३४॥
विषमज्वरे च मन्देऽग्नौ पाण्डुरोगे तथैव च। क्रिमिहृद्रोगिणाञ्चैव गुल्मशूलार्त्तिनां तथा॥ ३५॥
श्वासकासपरीतानामेषा स्यादमृतोपमा। शुण्ठ्याः स्थानेऽभया देया विड्ग्रहे पित्तपायुजे॥ ३६॥
प्राणदेयं सितां दत्त्वा चूर्णमानाच्चतुर्गुणाम्। अम्लपित्ताग्निमान्द्यादौ प्रयोज्या गुदजातुरे॥ ३७॥
अनुपानं प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलम्। पलद्वयन्त्वनिलजे पित्तजे तु पलत्रयम्॥ ३८॥

Prāṇadā guḍikā

Śuṇṭhī 120 gm, marica 40 gm, pippalī 80 gm, cavya 40 gm, tālīśapatra 40 gm, nāgakesāra 20 gm, pippalīmūla 80 gm, patraka 5 gm, sūkṣna elā 10 gm, tvak and uśīra jointly 10 gm — they are powdered together, mixed with jaggery 1 kg 200 gm and made into boluses weighing 10 gm each. This is known as 'Prāṇadā guḍikā'. It is taken before and after meals according to strength with urine, meat-soup, vegetable soup, milk or water. It destroys all types of piles including congenital and bleeding ones. Besides, it acts like nectar in irregular fever, slow digestive fire, anaemia, worms, cardiac disorders, gulma, abdomonal pain, dyspnoea and cough. In case of paittika piles and constipation, śuṇṭhī may be substituted by harītakī. Likewise, it there are acid gastritis, mildness of fire etc. sugar should be mixed (instead of jaggery) four times the total powder.

The dose of anupāna is 40, 80 and 120 ml. in case of diseases caused by kapha, vāta and pitta respectively. [29-38]

काङ्कायनमोदकः

पथ्यापञ्चपलान्येकमजाज्या मरिचस्य च। पिप्पलीपिप्पलीमूलचव्यचित्रकनागराः ॥ ३९ ॥
पलाभिवृद्धाः क्रमशो यवक्षारपलद्वयम्। भल्लातकपलान्यष्टौ कन्दस्तु द्विगुणो मतः ॥ ४० ॥
द्विगुणेन गुडेनैषां वटकानक्षसम्मितान्। कृत्वैनं भक्षयेत् प्रातस्तक्रमम्भोऽनु वा पिबेत् ॥
मन्दाग्निं दीपयत्येष ग्रहणीपाण्डुरोगनुत् ॥ ४१ ॥
काङ्कायनेन शिष्येभ्यः शस्त्रक्षाराग्निभिर्विना। भिषग्जितमिति प्रोक्तं श्रेष्ठमर्शोविकारिणाम् ॥ ४२ ॥

Kāṅkāyana modaka

Harītakī 200 gm, jīraka 40 gm, marica 40 gm, pippalī 40 gm, pippalīmūla 80 gm, cavya 120 gm, śuṇṭhī 160 gm, yavakṣāra 80 gm, bhallātaka 320 gm, śūraṇa 640 gm — they all are powdered together, mixed with jaggery double of the total powder and made into boluses each weighing 10 gm, It should be taken with buttermilk or water in the morning. It stimulates digestive fire and alleviates grahaṇī disorder and anaemia. Kāṅkāyana has delivered to his disciples this efficacious remedy for piles which eliminates the other measures such as surgical operation, application of alkali and cauterization. [39-42]

माणिभद्रो मोदकः

विडङ्गसारामलकाभयानां पलं पलं स्यात् त्रिवृतात्रयश्च।
गुडस्य षड् द्वादशभागयुक्ता मासेन त्रिंशद् गुडिका विधेयाः ॥ ४३ ॥
निवारणे यक्षवरेण सृष्टः स माणिभद्रः किल शाक्यभिक्षवे।
अयं हि कासक्षयकुष्ठनाशनो भगन्दरप्लीहजलोदरार्शसाम् ॥ ४४ ॥
यथेष्टचेष्टान्नविहारसेवी अनेन वृद्धस्तरुणो भवेच्च ॥ ४५ ॥

Māṇibhadra modaka

Viḍaṅgasāra, āmalaka and harītakī each 40 gm, trivṛt 120 gm and jaggery 240 gm —

this is divided into twelve parts and then made into thirty boluses for a month. This remedy known as 'māṇibhadra' is formulated by the great yakṣa (Maṇibhadra) and delivered to Śākya bhikṣu. It alleviates cough, wasting, kuṣṭha, fistula-in-ano, splenomegaly, ascites and piles. By (taking) this old becomes young without any restriction in diet, movements and behaviour. [43-45]

स्वल्पशूरणमोदकः

मरिचमहौषधचित्रकशूरणभागा यथोत्तरं द्विगुणाः। सर्वसमो गुडभागः सेव्योऽयं मोदकः प्रसिद्धफलः॥
ज्वलनं ज्वलयति जाठरमुन्मूलयति शूलगुल्मगदान्। निःशेषयति श्लीपदमर्शांसि नाशयत्याशु॥ ४७॥

Svalpaśūraṇa modaka

Marica, śuṇṭhī, citraka and śūraṇa successively double and jaggery equal to the total quantity of the above. This is a well known modaka which stimulates digestive fire and alleviates abdominal pain, gulma, filaria and piles. [46-47]

बृहच्छूरणमोदकः

शूरणषोडशभागा वह्नेरष्टौ महौषधस्यातः। अर्द्धेन भागयुक्तिर्मरिचस्य च ततोऽपि चार्द्धेन॥ ४८॥
त्रिफलाकणासमूलातालीशारुष्करक्रिमिघ्नानाम्। भागा महौषधसमा दहनांशा तालमूली च॥ ४९॥
भागः शूरणतुल्यो दातव्यो वृद्धदारकस्यापि। भृङ्गैले मरिचांशे सर्वाण्येकत्र सञ्चूर्ण्य॥ ५०॥
द्विगुणेन गुडेन युतः सेव्योऽयं मोदकः प्रकामधनैः। गुरुवृष्यभोज्यरहितेष्वितरेषूपद्रवं कुर्य्यात्॥ ५१॥
भस्मकमनेन जनितं पूर्वमगस्त्यस्य योगराजेन। भीमस्य मारुतेरपि येन तौ महाशनौ जातौ॥ ५२॥
अग्निबलवृद्धिहेतुर्न केवलं शूरणो महावीर्य्यः। प्रभवति शस्त्रक्षाराग्निभिर्विनाऽप्यर्शसामेषः॥ ५३॥
श्वयथुश्लीपदजिद् ग्रहणीमपि कफवातसम्भूताम्। नाशयति वलीपलितं मेधां कुरुते वृषत्वञ्च॥ ५४॥
हिक्कां श्वासं कासं सराजयक्ष्मप्रमेहांश्च। प्लीहानञ्चाथोग्रं हन्ति च नूनं रसायनं पुंसाम्॥ ५५॥

Bṛhacchūraṇa modaka

Śūraṇa 16 parts, citraka 8 parts, śuṇṭhī 4 parts, marica 2 parts, triphalā (each), pippalī, pippalīmūla, tālīśa, bhallātaka, viḍaṅga each 4 parts, tālamūlī 8 parts, vṛddhadāruka 16 parts, tvak and elā 2 parts— all are powdered together, mixed with double quantity of jaggery and made into boluses. It is to be taken by wealthy person as in want of heavy and nourishing diet, it may create complications. Earlier it has infuriated the digestive fire of Agastya, Bhīma and Hanūman by which they became gluttonous. This efficacious śūraṇa (modaka) not only improves digestive fire but also cures piles without undergoing surgery, alkali and cauterization. Besides, it alleviates oedema, filaria, grahaṇī caused by kapha and vāta, wrinkles and greying of hairs, hiccough, dyspnoea, cough, consumption, prameha and splenomegaly. It is also rasāyana, aphrodisiac and promotes intellect. [48-55]

शूरणपिण्डी

चूर्णीकृताः षोडश शूरणस्य भागास्ततोऽर्द्धेन च चित्रकस्य।
महौषधाद् द्वौ मरिचस्य चैको गुडेन दुर्नामजयाय पिण्डी॥५६॥
पिण्ड्यां गुडो मोदकवत् पिण्डत्वापत्तिकारकः॥५७॥

Sūraṇapiṇḍī

Sūraṇa 16 parts, citraka 8 parts, śuṇṭhī 2 parts, marica 1 part— they are powdered and mixed with jaggery to make into piṇḍa (solid mass) for use in piles.

In piṇḍī also jaggery is mixed in the quantity as in modaka so as to make solid mass. [56-57]

व्योषाद्यं चूर्णम्

व्योषाग्न्यरुष्करविडङ्गतिलाभयानां चूर्णं गुडेन सहितन्तु सदोपयोज्यम्।
दुर्नामकुष्ठगरशोथशकृद्विबन्धानग्नेर्जयत्यबलतां क्रिमिपाण्डुताश्च॥५८॥

Vyosādya cūrṇa

Vyoṣa (Trikaṭu), citraka, bhallātaka, viḍaṅga, tila and harītakī— powder of these with jaggery should be used regularly. It alleviates piles, kuṣṭha, poisoning, oedema, constipation, mildness of fire, worms and anaemia. [58]

समशर्करं चूर्णम्

शुण्ठीकणामरिचनागदलत्वगेलं चूर्णीकृतं क्रमविवर्द्धितमूर्ध्वमन्त्यात्।
खादेदिदं समसितं गुदजाग्निमान्द्यकासारुचिश्वसनकण्ठहृदामयेषु॥५९॥

Samaśarkara cūrṇa

Suṇṭhī, pippalī, marica, nāgakeśara, patraka, tvak and elā - gradually increasing in quantity in regressive order - are powdered together and mixed with equal sugar. It is useful in piles, mildness of fire, cough, anorexia, dyspnoea and disorder of throat and heart. [59]

लवणोत्तमाद्यं चूर्णम्

लवणोत्तमवह्निकलिङ्गयवांश्चिरबिल्वमहापिचुमर्दयुतान्।
पिब सप्तदिनं मथितालुलितान् यदि मर्दितुमिच्छसि पायुरुहान्॥६०॥

Lavaṇottamādya cūrṇa

Lavaṇottama (saindhava), citraka, indrayava, cirabilva and mahānimba— powder of these mixed with buttermilk is taken for a week to alleviate piles. [60]

अर्शआदिरोगेषु नागार्जुनयोगः

त्रिफला पञ्चलवणं कुष्ठं कटुकरोहिणी। देवदारुविडङ्गानि पिचुमर्दफलानि च॥६१॥
बला चातिबला चैव हरिद्रे द्वे सुवर्चला। एतत् सम्भृतसम्भारं करञ्जत्वग्रसेन च॥६२॥

पिष्ट्वा च गुडिकां कृत्वा बदरास्थिसमां बुधः। एकैकां तां समुद्धृत्य रोगे रोगे पृथक् पृथक्।। ६३।।
उष्णेन वारिणा पीता शान्तमग्निं प्रदीपयेत्। अर्शांसि हन्ति तक्रेण गुल्ममम्लेन निर्हरेत्।। ६४।।
जन्तुदष्टन्तु तोयेन त्वग्दोषं खदिराम्बुना। मूत्रकृच्छ्रन्तु तोयेन हृद्रोगं तैलसंयुता।। ६५।।
इन्द्रस्वरससंयुक्ता सर्वज्वरविनाशिनी। मातुलुङ्गरसेनाथ सद्यः शूलहरी स्मृता।। ६६।।
कपित्थतिन्दुकानान्तु रसेन सह मिश्रिता। विषाणि हन्ति सर्वाणि पानाशनप्रयोगतः।। ६७।।
गोशकृद्रससंयुक्ता हन्यात् कुष्ठानि सर्वशः। श्यामाकषायसहिता जलोदरविनाशिनी।। ६८।।
भक्तच्छन्दं जनयति भुक्तस्योपरि भक्षिता। अक्षिरोगेषु सर्वेषु मधुनाऽऽघृष्य चाञ्जयेत्।।
लेहमात्रेण नारीणां सद्यः प्रदरनाशिनी।। ६९।।
व्यवहारे तथा द्यूते संग्रामे मृगयाऽऽदिषु। समालभ्य नरो ह्येनां क्षिप्रं विजयमाप्नुयात्।। ७०।।

Nāgārjuna yoga

Triphalā, five salts, kuṣṭha, kaṭukā, devadāru, viḍaṅga, nimba fruit, balā, atibalā, haridrā, dāruharidrā and suvarcalā — they are powdered and pounded with the juice of karañja bark and made into pills of the size of badara seed. It is used in various disorders with different anupānas such as it stimulates digestive fire with hot water, destroys piles with buttermilk, gulma with sours, animal bites with water, skin diseases with khadira decoction, dysuria with water, cardiac disorder with oil, all fevers with indra juice and with mātuluṅga juice alleviates abdominal pain immediately. Mixed with the juice of kapittha and tinduka it destroys all poisons if the patient is kept on proper diet. Mixed with cowdung juice it destroys all types of kuṣṭha and with śyāmā (trivṛt) decoction it alleviates ascites. If taken after meals, it generates appetite. In all types of eye diseases it is applied to eye as collyrium after rubbing with honey and in case of pradara in woman it is taken as linctus. By applying it on body, man attains victory in debate, gambling, war, hunting etc. [61-70]

विजयचूर्णम्

त्रिकत्रयवचाहिङ्गुपाठाक्षारनिशाद्वयम्। चव्यतिक्ताकलिङ्गाग्निशताह्वालवणानि च।। ७१।।
ग्रन्थिबिल्वाजमोदाश्च गणोऽष्टाविंशतिर्मतः। एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्।। ७२।।
ततो बिडालपदकं पिबेदुष्णेन वारिणा। एरण्डतैलयुक्तन्तु सदा लिह्यात्ततो नरः।। ७३।।
श्वासं हन्यात्तथा शोथमर्शांसि च भगन्दरम्। हृच्छूलं पार्श्वशूलञ्च वातगुल्मं तथोदरम्।। ७४।।
हिक्काश्वासप्रमेहांश्च कामलां पाण्डुरोगताम्। आमान्वयमुदावर्त्तमन्त्रवृद्धिं गुदक्रिमीन्।। ७५।।
अन्ये च ग्रहणीदोषा ये मया परिकीर्त्तिताः। महाज्वरोपसृष्टानां भूतोपहतचेतसाम्।। ७६।।
अप्रजानान्तु नारीणां प्रजावर्द्धनमेव च। विजयो नाम चूर्णोऽयं कृष्णात्रेयेण पूजितः।। ७७।।

Vijayacūrṇa

Three trios (trikaṭu, triphalā and trijāta), vacā, hiṅgu, pāṭhā, yavakṣāra, haridrā, dāruharidrā, cavya, kaṭukā, indrayava, citraka, śatapuṣpā, five salts, pippalīmūla, bilva and ajamodā — these twenty eight drugs are taken in equal quantity and powdered finely.

It is taken in the dose of 10 gm with hot water or mixed with caster oil: it alleviates dyspnoea, oedema, piles, fistula-in-ano, cardiac pain, chest pain, vātika gulma, udararoga, hiccough and dyspnoea combined with jaundice, anaemia, āmadoṣa, udāvarta, atisāra, antravṛddhi (hernia), worms, grahaṇī, severe fevers and mental derangement. This vijaya cūrṇa, recognised by Kṛṣṇātreya, promotes fertility in sterile woman. [71-77]

श्रीबाहुशालो गुड:

त्रिवृत् तेजोवती दन्ती श्वदंष्ट्रा चित्रकं शटी। गवाक्षीमुस्तविश्वाह्वविडङ्गानि हरीतकी ॥ ७८ ॥
पलोन्मितानि चैतानि पलान्यष्टावरुष्करात्। षट्पलं वृद्धदारस्य शूरणस्य तु षोडश ॥ ७९ ॥
जलद्रोणद्वये क्वाथ्यं चतुर्भागावशेषितम्। पूतन्तु तं रसं भूय: क्वाथेभ्यस्त्रिगुणो गुड: ॥ ८० ॥
लेहं पचेत् तु तं तावद् यावद्दर्वीप्रलेपनम्। अवतार्य तत: पश्चाच्चूर्णानीमानि दापयेत् ॥ ८१ ॥
त्रिवृत्तेजोवतीकन्दचित्रकान् द्विपलांशिकान्। एलात्वङ्मरिचश्चापि गजाह्वाश्चापि षट्पलाम् ॥
द्वात्रिंशतं पलान्येवं चूर्णं दत्त्वा निधापयेत्। ततो मात्रां प्रयुञ्जीत जीर्णे क्षीररसाशन: ॥ ८३ ॥
पञ्च गुल्मान् प्रमेहांश्च पाण्डुरोगं हलीमकम्। जयेदर्शांसि सर्वाणि तथा सर्वोदराणि च ॥ ८४ ॥
दीपयेद् ग्रहणीं मन्दां यक्ष्माणञ्चापकर्षति। अपीनसं प्रतिश्यायमाढ्यवातं तथैव च ॥ ८५ ॥
अयं सर्वगदेष्वेव कल्याणो लेह उत्तम:। दुर्नामारिरयश्चाशु दृष्टो वारसहस्रश: ॥ ८६ ॥
भवन्त्येनं प्रयुञ्जाना: शतवर्षं निरामया:। आयुषो दैर्घ्यजननो वलीपलितनाशन: ॥ ८७ ॥
रसायनवरश्चैष मेधाजनन उत्तम:। गुड: श्रीबाहुशालोऽयं दुर्नामारि: प्रकीर्त्तित: ॥ ८८ ॥

Śrībāhuśāla guḍa

Trivṛt, tejovatī, dantī, gokṣura, citraka, śaṭī, Indravāruṇī, musta, śuṇṭhī, viḍaṅga, harītakī each 40 gm, bhallātaka 320 gm, vṛddhadāruka 240 gm, śurana 640 gm — all together are decocted in water 20.48 litre reduced to one-fourth. It is strained and again cooked with three times jaggery till it becomes linctus sticking to laddle. After putting down, powder of the following should be added - trivṛt, tejovatī, śūraṇa and citraka each 80 gm, elā, tvak, marica and gajapippalī each 240 gm total being 32 palas (1 kg 280 gm). It is used in proper dose with the diet of milk or meat-soup. It alleviates five types of gulma, prameha, anaemia, halīmaka, all types of piles and udararoga, grahaṇīroga, consumption, chronic coryza and vātarakta. It is one of the best linctus preparations useful in all diseases particularly piles in which it is tried successfully thousand times. The persons using it become free from disorders and live for hundred years. This formulation known as 'śrībāhuśāla guḍa' provides longevity, destroys wrinkles and greying of hairs, is rasāyana and intellect - promoting and particularly destroyer of piles. [78-88]

गुडपाकलक्षणम्

तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुड:। क्षिप्तश्च निश्चलस्तिष्ठेत् पतितस्तु न शीर्य्यते ॥ ८९ ॥
यदा दर्वीप्रलेप: स्याद् यावद्वा तन्तुलो भवेत्। एष पाको गुडादीनां सर्वेषां परिकीर्त्तित: ॥ ९० ॥
सुखमर्द: सुखस्पर्शो गुड: पाकमुपागत:। पीडितो भजते मुद्रां गन्धवर्णरसान्वित: ॥ ९१ ॥

Test of Guḍapāka

If cooked guḍa (jaggery) put in a jar full of water does not float but settles down silently without any disintegration and while cooking it sticks to laddle or becomes thready the cooking of guḍa etc should be taken as proper. Moreover, the guḍa, after proper cooking, is soft in touch, easily pressed and marked and is endowed with proper smell, colour and taste. [89-91]

गुडभल्लातक:

भल्लातकसहस्रे द्वे जलद्रोणे विपाचयेत्। पादशेषे रसे तस्मिन् पचेद् गुडतुलां भिषक्॥ ९२॥
भल्लातकसहस्रार्द्धं छित्त्वा तत्रैव दापयेत्। सिद्धेऽस्मिंस्त्रिफलाव्योषयमानीमुस्तसैन्धवम्॥ ९३॥
कर्षांशसम्मितं दद्यात् त्वगेलापत्रकेशरम्। खादेदग्निबलापेक्षी प्रातरुत्थाय मानव:॥ ९४॥
कुष्ठार्श:कामलामेहग्रहणीगुल्मपाण्डुता:। हन्यात् प्लीहोदरं कासक्रिमिरोगभगन्दरान्॥
गुडभल्लातको ह्येष श्रेष्ठश्चार्शोविकारिणाम्॥ ९५॥

Guḍabhallātaka I

Bhallātaka nuts 2000 in number are boiled in water 10.24 litre reduced to one-fourth. Now jaggery 4 kg along with cut bhallātaka nuts 500 in number is cooked with it. When the cooking is completed triphalā, trikaṭu, yavānī, musta, saindhava, tvak, elā, patraka and nāgakeśara each 10 gm are added thereto. This should be taken in the morning (in the dose) according to digestive power. It alleviates kuṣṭha, piles, jaundice, prameha, grahaṇīroga, gulma, anaemia, splenomegaly, cough, worms and fistula-in-ano. This guḍabhallāta is one of the best drugs for piles. [92-95]

अपरो गुडभल्लातक:

दशमूल्यमृता भार्गी श्वदंष्ट्रा चित्रकं शटी। भल्लातकसहस्रञ्च पलांशं क्राथयेद् बुध:॥ ९६॥
पादशेषे जलद्रोणे रसे तस्मिन् विपाचयेत्। दत्त्वा गुडतुलामेकां लेहीभूतं समुद्धरेत्॥ ९७॥
माक्षिकं पिप्पलीं तैलमौरुवूकञ्च दापयेत्। कुडवं कुडवञ्चात्र त्वगेलामरिचं तथा॥ ९८॥
अर्श: कासमुदावर्त्तं पाण्डुत्वं शोथमेव च। नाशयेद्वह्निसादञ्च गुडभल्लातक: स्मृत:॥ ९९॥

Guḍabhallātaka II

Daśamūla, guḍūcī, bhārgī, gokṣura, citraka and śaṭī each 40 gm with bhallātaka nuts 1000 in number are decocted in water 10.24 litre reduced to one-fourth. This again is cooked with jaggery 4 kg till it becomes linctus adding thereto honey, pippalī and castor oil, tvak, elā and marica each 160 gm. This guḍabhallātaka alleviates piles, cough, udāvarta, anaemia, oedema and mildness of digestive fire. [96-99]

चव्याद्यं घृतम्

चव्यं त्रिकटुकं पाठां क्षारं कुस्तुम्बुरूणि च। यमानीं पिप्पलीमूलमुभे च विडसैन्धवे॥ १००॥
चित्रकं बिल्वमभयां पिष्ट्वा सर्पिर्विपाचयेत्। शकृद्वातानुलोम्यार्थं जाते दध्नि चतुर्गुणे॥ १०१॥
प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्। गुदवङ्क्षणशूलञ्च घृतमेतद् व्यपोहति॥ १०२॥

Cavyādya ghṛta

Ghee should be cooked with four times curd along with the paste of cavya, trikaṭu, pāṭhā, yavakṣāra, dhānyaka, yavānī, pippalīmūla, viḍa, saindhava, citraka, bilva and harītakī. It normalises the course of faeces and wind and alleviates dysentery, rectal prolapse, dysuria, discharge from anus, pain in rectum and groin. [100-102]

व्योषाद्यं घृतम्

व्योषगर्भं पलाशस्य त्रिगुणे भस्मवारिणि। साधितं पिबतः सर्पिः पतन्त्यर्शांस्यसंशयम्॥ १०३॥

Vyoṣādya ghṛta

Ghee is cooked with (the paste of) vyoṣa (trikaṭu) alongwith three times alkali water of palāśa. The use of this undoubtedly fells haemorrhoids. [103]

उदकषट्पलं घृतम्

सक्षारैः पञ्चकोलैस्तु पलिकैस्त्रिगुणोदके। समक्षीरं घृतप्रस्थं ज्वरार्शःप्लीहकासनुत्॥ १०४॥

Udakaṣaṭpala ghṛta

Ghee cooked with (the paste of) yavakṣāra and pañcakola each 40 gm alongwith three times water and equal (quantity of) milk alleviates fever, piles, splenomegaly and cough. [104]

सिंह्यमृतं घृतम्

पचेद्वारिचतुर्द्रोणे कण्टकार्य्यमृताशतम्। तत्राग्नित्रिफलाव्योषपूतीकत्वक्कलिङ्गकैः॥ १०५॥
सकाश्मर्य्यविडङ्गैस्तु सिद्धं दुर्नाममेहनुत्। घृतं सिंह्यमृतं नाम बोधिसत्त्वेन भाषितम्॥ १०६॥

Siṃhyamṛta ghṛta

Ghee cooked with water 40.96 litre alongwith (the paste of) siṃhī (kaṇṭakārī) and amṛtā (guḍūcī) combined 4 kg and citraka, triphalā, trikaṭu, pūtīka (bark), indrayava, gambhārī and viḍaṅga alleviates piles and prameha. This siṃhyamṛta is formulated by Bodhisattva. [105-106]

पिप्पल्याद्यं तैलम्

पिप्पलीं मधुकं बिल्वं शताह्वां मदनं वचाम्। कुष्ठं शटीं पुष्कराख्यं चित्रकं देवदारु च॥ १०७॥
पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयुतम्। अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम्॥ १०८॥
गुदनिःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम्। कठ्यूरुपृष्ठदौर्बल्यमानाहं वङ्क्षणाश्रयम्॥ १०९॥
पिच्छास्रावं गुदे शोथं वातवर्चोविनिग्रहम्। उत्थानं बहुदोषञ्च जयेच्चैवानुवासनात्॥ ११०॥

Pippalyādi taila

Oil is cooked with the paste of pippalī, madhuka, bilva, śatapuṣpā, madana, vacā, kuṣṭha, śaṭī, puṣkaramūla, citraka and devadāru along with double (quantity of) milk. This is used for enema in piles and abnormal course of vāyu. It alleviates rectal prolapse, pain, dysuria, dysentery, weakness in waist, thighs and back; stretching in groins, slimy discharge

(from anus), swelling in anus, obstruction in wind and faeces and frequent urges. [107-110]

रक्तार्शसश्चिकित्सा

रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक्। दुष्टास्रे निगृहीते तु शूलानाहावसृग्गदाः।। १११।।

Bleeding piles

At first instance, the haemorrhage from the bleeding piles should be ignored as the checking of impure blood gives rise to pain, stretching and blood disorders. [111]

पेयाद्वयम्

लाजैः पेया पीताऽथ चुक्रिकाकेशरोत्पलैः सिद्धा। हन्ति सदाऽस्रस्रावं तथा बलापृश्निपर्णीभ्याम्।।

Liquid gruel of parched paddy processed with (1) cukrikā (cāṅgerī) nāgakeśara and nīlotpala or (2) balā and pṛśniparṇī checks haemorrhage. [112]

क्वाथलेपौ

शक्रक्काथः सविश्वो वा किंवा बिल्वशलाटवः। योज्या रक्तार्शसैस्तद्वज्ज्योत्स्निकामूललेपनम्।।

Those suffering from bleeding piles should take decoction of indrayava and śuṇṭhī or tender fruits of bilva. The paste of the jyotsnikā root should be applied externally. [113]

योगत्रयम्

नवनीततिलाभ्यासात् केशरनवनीतशर्कराऽभ्यासात्। दधिसरमथिताभ्यासाद् गुदजाः शाम्यन्ति रक्तवहाः।।

The bleeding haemorrhoids subside by regular use of (1) butter with sesamum (2) nāgakeśara with butter and sugar and (3) churned supernatant layer of curd. [114]

समङ्गादिकल्कः

समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः। छागक्षीरं प्रयोक्तव्यं गुदजे शोणितापहम्।। ११५।।

Goat's milk added with (the paste of) samaṅgā (lajjālu), nīlotpala, mocarasa, lodhra, tila and candana should be used in bleeding piles. [115]

कुटजलेहः

कुटजत्वक्पलशतं जलद्रोणे विपाचयेत्। अष्टभागावशिष्टन्तु कषायमवतारयेत्।। ११६।।
वस्त्रपूतं पुनः क्वाथं पचेल्लेहत्वमागतम्। भल्लातकं विडङ्गानि त्रिकटु त्रिफलां तथा।। ११७।।
रसाञ्जनं चित्रकञ्च कुटजस्य फलानि च। बचामतिविषां बिल्वं प्रत्येकञ्च पलं पलम्।। ११८।।
त्रिंशत्पलानि गुडस्य चूर्णीकृत्य निधापयेत्। मधुनः कुडवं दद्याद् घृतस्य कुडवं तथा।। ११९।।
एष लेहः शमयति चार्शो रक्तसमुद्भवम्। वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्।। १२०।।
ये च दुर्नामजा रोगास्तान् सर्वान् नाशयत्यपि। अम्लपित्तमतीसारं पाण्डुरोगमरोचकम्।। १२१।।
ग्रहणीमार्दवं कार्श्यं श्वयथुं कामलामपि। अनुपानं घृतं दद्यान्मधु तक्रं जलं पयः।।
रोगानीकविनाशाय कौटजो लेह उच्यते।। १२२।।

Kuṭajaleha

Kuṭaja bark 4 kg, is boiled in water 10.24 litre, reduced to one-eighth. This decoction is strained and again cooked till it becomes linctus adding thereto bhallātaka, viḍaṅga, trikaṭu, triphalā, rasāñjana, citraka, indrayava, vacā, ativiṣā and bilva each 40 gm with jaggery 120 gm. At the end, honey and ghee each 160 gm are added. This linctus is efficacious for bleeding and other types of piles with their complications such as acid gastritis, diarrhoea, anaemia, anorexia, grahaṇī disorder, emaciation, oedema and jaundice. This kuṭajaleha may be taken with ghee, honey, buttermilk, water or milk according to disorder. [116-122]

कुटजरसक्रिया

कुटजत्वचो विपाच्यं शतपलमार्द्रं महेन्द्रसलिलेन। यावत् स्यादरसं तद् द्रव्यं स रसस्ततो ग्राह्यः॥
मोचरसः ससमङ्गः फलिनी पलांशिभिस्त्रिभिस्तैश्च। वत्सकबीजं तुल्यं चूर्णीकृतमत्र दातव्यम्॥
पूतोत्क्वथितः सान्द्रः सरसो दर्वीप्रलेपनो ग्राह्यः। मात्राकालोपहिता रसक्रियैषा जयत्यसृक्स्रावम्॥
छगलीपयसा युक्ता पेया मण्डेन वा यथाऽग्निबलम्। जीर्णौषधश्च शालीन् पयसा छागेन भुञ्जीत॥
रक्तार्शांस्यतिसारं शूलं सासृग्रुजो निहन्त्याशु। बलवच्च रक्तपित्तं रसक्रियैषा ह्युभयभागम्॥ १२७॥

Kuṭajarasakriyā

Fresh kuṭaja bark 4 kg should be boiled in rain water till it is extracted completely. After straining it is again cooked till it becomes thick and sticks to laddle adding thereto the following drugs powdered- mocarasa, samaṅgā (lajjālu), priyaṅgu and indrayava each 40 gm. This rasakriyā, taken in proper dose and time, checks haemorrhage with goat's milk or rice-scum according to digestive power. After the drug is digested, the patient should take diet of sāli rice with goat's milk. It alleviates bleeding piles, diarrhoea, abdominal pain and all types of haemorrhage including severe raktapitta involving both the passages. [123-127]

कुटजाद्यं घृतम्

कुटजफलवल्ककेशरनीलोत्पललोध्रधातकीकल्कैः। सिद्धं घृतं विधेयं सशूलरक्तार्शसां भिषजा॥ १२८॥

Kuṭajādya ghṛta

Ghee processed with the paste of kuṭaja (fruits and bark), nāgakeśara, nīlotpala, lodhra and dhātakī is prescribed in pain and bleeding piles. [128]

सुनिषण्णकचाङ्गेरीघृतम्

अवाक्पुष्पी बला दार्वी पृश्निपर्णी त्रिकण्टकम्। न्यग्रोधोदुम्बराश्वत्थशुङ्गाश्च द्विपलोन्मिताः॥ १२९॥
कषाय एष पेष्यास्तु जीवन्ती कटुरोहिणी। पिप्पली पिप्पलीमूलं मरिचं देवदारु च॥ १३०॥
कलिङ्गं शाल्मलीपुष्पं वीरा चन्दनमञ्जनम्। कट्फलं चित्रकं मुस्तं प्रियङ्ग्वतिविषे स्थिरा॥ १३१॥
पद्मोत्पलानां किञ्जल्कः समङ्गा सनिदिग्धिका। बिल्वं मोचरसः पाठा भागाः स्युः कार्षिकाः पृथक्॥ १३२॥

चतुःप्रस्थशृतं प्रस्थं कषायमवतारयेत्। त्रिंशत् पलानि तु प्रस्थो विज्ञेयो द्विपलाधिकः॥ १३३॥
सुनिषण्णकचाङ्गेर्योः प्रस्थौ द्वौ स्वरसस्य च। सर्वैरेतैर्यथोद्दिष्टैर्घृतप्रस्थं विपाचयेत्॥ १३४॥
एतदर्शःस्वतीसारे त्रिदोषे रुधिरस्रुतौ। प्रवाहणे गुदभ्रंशे पिच्छासु विविधासु च॥ १३५॥
उत्थाने चातिबहुशः शोथशूलगुदामये। मूत्रग्रहे मूढवाते मन्दाग्नावरुचावपि॥ १३६॥
प्रयोज्यं विधिवत् सर्पिर्बलवर्णाग्निवर्द्धनम्। विविधेष्वन्नापानेषु केवलं वा निरत्ययम्॥ १३७॥

Sunişaṇṇaka-cāṅgerī ghṛta

Adhaḥpuṣpī, balā, dāruharidrā, pṛśniparṇī, gokṣura and leaf-buds of nyagrodha, udumbara and aśvattha each 80 gm — these are decocted and the paste is made of jīvantī, kaṭukā, pippalī, pippalīmūla, marica, devadāru, indrayava, śālmalī flower, vīrā, candana, añjana, kaṭphala, citraka, musta, priyaṅgu, ativiṣā, śālaparṇī, stamens of lotus and lily, samaṅgā (lajjālu), kaṇṭakārī, bilva, mocarsa and pāṭhā each 10 gm. For decoction water should be given four prastha (doubled as 5.12 litre) reduced to one-fourth. Prastha here is equal to thirty two palas. Juice of sunisaṇṇaka and cāṅgerī (combined) should be 1.28 litre. With these mentioned above ghee 640 gm should be cooked. It is useful in piles, diarrhoea caused by all the three diṣas, haemorrhage, tenesmus, rectal prolapse, various slimy discharges, frequent urges, rectal disorders associated with swelling and pain, obstruction in urine and wind, mild fire and anorexia. This ghee is safe and promotes strength, lustre and digestive power and should be used with food and drinks or alone. [129-137]

प्रतिसारणीयःक्षारः

प्रशस्तेऽहनि नक्षत्रे कृतमङ्गलपूर्वकम्। कालमुष्ककमाहृत्य दग्ध्वा भस्म समाहरेत्॥ १३८॥
आढकन्त्वेकमादाय जलद्रोणे पचेद्भिषक्। चतुर्भागावशिष्टेन वस्त्रपूतेन वारिणा॥ १३९॥
शङ्खचूर्णस्य कुडवं प्रक्षिप्य विपचेत् पुनः। शनैः शनैर्मृदावग्नौ यावत् सान्द्रतनुर्भवेत्॥ १४०॥
सर्जिकायावशूकाभ्यां शुण्ठी मरिचपिप्पली। वचा चातिविषा चैव हिङ्गुचित्रकयोस्तथा॥ १४१॥
एषां चूर्णानि निक्षिप्य पृथक्त्वेनाष्टमाषकम्। दर्व्या सङ्घट्टितश्चापि स्थापयेदायसे घटे।
एष वह्निसमः क्षारः कीर्त्तितः काश्यपादिभिः॥ १४२॥

Pratisāraṇīya Kṣāra I

(Alkali for external application)

In auspicious day and constellation, having observed auspicious rites, one should collect kālamuṣkaka and prepare its ash after burning. This ash 2.56 kg should be cooked in water 10.24 litre reduced to one-fourth. This liquid is strained through cloth and again heated on mild fire after adding conch-shell powder 160 gm thereto till it becomes thick. svarjikṣāra, yavakṣāra, śuṇṭhī, marica, pippalī, vacā, ativiṣā, hiṅgu, citraka each eight māṣa (gm) are added to it and stirred with laddle. This should be kept in an iron-container. This alkali is stated to be like fire by kāśyapa etc. [138-142]

प्रतिसारणीयः क्षारः

तोये कालकमुष्ककस्य विपचेद् भस्माढकं षड्गुणे पात्रे लोहमये दृढे विपुलधीर्दर्व्या शनैर्घट्टयन्।
दग्ध्वाऽग्नौ बहुशङ्खनाभिशकलान् पूतावशेषे क्षिपेद् यद्येरण्डजनालमेष दहति क्षारो वरो वाक्शतात्॥
प्रायस्त्रिभागशिष्टेऽस्मिन्नच्छपैच्छिल्यरक्तता। सञ्जायते तदाऽऽस्राव्य क्षाराम्भो ग्राह्यमिष्यते॥ १४४॥
तुर्य्येणाष्टमकेन षोडशभवेनांशेन संव्यूहिमो मध्यः श्रेष्ठ इति क्रमेण विहितः क्षारोदकाच्छङ्खकः॥ १४५॥
नातिसान्द्रो नातितनुः क्षारपाक उदाहृतः। दुर्नामकादौ निर्दिष्टः क्षारोऽयं प्रतिसारणः॥ १४६॥

Pratisāranīya kṣāra ll

The ash of kālamuṣkaka 2.56 kg should be cooked with water six times (in quantity) in a firm iron vassel stirring slowly with a laddle. The remaining liquid should be strained and added with pieces of śaṅkhanābhi burnt on fire. This alkali should be taken as standerd if it burns the stalk of castor (leaf) in a period of hundred words (seconds).

Generally here water is reduced to one-third when clarity, sliminess and redness appear and then the alkali-water is taken out. Alkali is said as mild, medium and strong when the conchshell-powder, in relation to alkali water, is added in one-fourth, one-eighth and one-sixteenth quantity respectively. The prepared alkali should not be too thick or too thin. This alkali for external application is prescribed in piles etc. [143-146]

पानीयक्षारविधिः

पानीयो यस्तु गुल्मादौ तं वारानेकविंशतिम्। स्रावयेत् षड्गुणे तोये केचिदाहुश्चतुर्गुणे॥ १४७॥

Pānīya kṣāra

(Alkali for intake)

Pānīya kṣāra is used in gulma etc. It is prepared by pouring out, twenty one times (after dissolving the ash) in water six or four times in quantity. [147]

क्षारसूत्रम्

भावितं रजनीचूर्णैः स्नुहीक्षीरे पुनः पुनः। बन्धनात् सुदृढं सूत्रं भिनत्त्यर्शो भगन्दरम्॥ १४८॥

Kṣārasūtra

(Alkaline thread)

Firm thread having been impregnated with haridrā powder and snuhī latex several times cuts haemorrhoids and fistula-in-ano by tying. [148]

प्राग्दक्षिणं ततो वामं पृष्ठजञ्चाग्रजं क्रमात्। पञ्चतिक्तेन संस्नेह्य दहेत् क्षारेण वह्निना॥ १४९॥
वातजं श्लेष्मजञ्चार्शः क्षारेणास्रजपित्तजे। महान्ति तनुमूलानि च्छित्त्वैव बलिनो दहेत्॥ १५०॥
चर्मकीलं तथा च्छित्त्वा दहेदन्यतरेण वा॥ १५१॥

At first on right and then on left and again in back and front, the affected part should be burnt with alkali or fire after uncting with pañcatikta (ghṛta) in case of piles caused

by vāta and kapha while in that caused by rakta or pitta alkali should be applied. In strong patient the haemorrhoids big but with thin roots should be excised and then burnt. [149-150]

Likewise, skin warts should be excised and then burnt with either of them (alkali or fire). [151]

सम्यक्क्षारदग्धस्य लक्षणम्

पक्वजम्बूपमो वर्णः क्षारदग्धः प्रशस्यते ॥ १५२ ॥

After burning the part should attain colour like that of ripe jambū fruit. [152]

प्रतिसारणीयक्षारस्य प्रयोगविधिः

गोजीशेफालिकापत्रैरर्शः संलिख्य लेपयेत्। क्षारेण वाक्शतं तिष्ठेद् यन्त्रद्वारं पिधाय च ॥ १५३ ॥
तच्चापनीय वीक्षेत पक्वजम्बूफलोपमम्। यदि च स्यात् ततो भद्रं नो चेल्लिम्पेत् तथा पुनः ॥
तत् तुषाम्बुप्लुतं साज्यं यष्टीकल्केन लेपयेत् ॥ १५४ ॥

Method of cauterizing with alkali

The haemorrhoid should first be rubbed with coarse leaves of gojī and śephālikā and then pasted with alkali for a period of hundred words while covering the opening of speculum. Then the covering is removed and observed. If the part becomes like ripe jambū fruit then it should be taken as completed otherwise alkali is applied again. At the end, it should be washed with sour gruel and the paste of yaṣṭīmadhu mixed with ghee is applied thereto. [153-154]

प्रशस्ताग्निदग्धस्य लक्षणम्

न निम्नं तालवर्णाभं वह्निदग्धं स्थितासृजम् ॥ १५५ ॥

After burning with fire (cauterization) the part should not be depressed, should attain colour like that of ripe palm fruit and haemorrhage should be checked. [155]

दाहोत्तरं कर्तव्यम्

निर्वाप्य मधुसर्पिर्भ्यां वह्निसञ्जातवेदनाम्। सम्यग्दग्धे तुगाक्षीरीप्लक्षचन्दनगैरिकैः ॥ १५६ ॥
सामृतैः सर्पिषा युक्तैरालेपं कारयेद्भिषक्। मुहूर्त्तमुपवेश्यासौ तोयपूर्णेऽथ भाजने ॥ १५७ ॥
क्षारमुष्णाम्बुना पाय्यं विबन्धे मूत्रवर्चसोः। दाहे वस्त्यादिजे लेपः शतधौतेन सर्पिषा ॥ १५८ ॥
नवान्नं माषतक्रादि सेव्यं पाकाय जानता। पिबेद् व्रणविशुद्ध्यर्थं वराक्वाथं सगुग्गुलुम् ॥
जीर्णे शाल्यन्नमुद्गादि पथ्यं तिक्ताज्यसैन्धवम् ॥ १५९ ॥

Post - operative measures

Pain produced by fire should be treated with (the application of) honey and ghee. In case of proper burn, the paste of vaṃśalocana, plakṣa, candana, gairika and guḍūcī mixed with ghee should be applied and the patient should take tub-bath for a while. If there

is obstruction in urine and faeces yavakṣāra should be given with hot water. In burning sensation in pelvis etc. ghee washed hundred times should be applied. For ripening (of abscess) new cereals, black gram, butter etc. should be given; for cleaning of wound triphalā decoction mixed with guggulu should be administered. After it is digested the wholesome diet consisting of śāli rice, green gram etc, bitters, ghee and rock salt is advised. [156-159]

रूढसर्वव्रणं वैद्यः क्षारं दत्त्वाऽनुवासयेत्। पिप्पल्याद्येन तैलेन सेवेद्दीपनपाचनम्॥ १६०॥

When the entire wound is healed, the physician should administer enema with alkali followed by unctuous enema with pippalyādi taila. The appetisers and digestives should also be used. [160]

अग्निमुखलौहम्

त्रिवृच्चित्रकनिर्गुण्डीस्नुहीमुण्डतिकाऽञ्जटाः। प्रत्येकशोऽष्टपलिका जलद्रोणे विपाचयेत्॥
पलत्रयं विडङ्गस्य व्योषात् कर्षत्रयं पृथक्। त्रिफलायाः पञ्चपलं शिलाजतुपलं न्यसेत्॥ १६२॥
दिव्यौषधिहतस्यापि वैकङ्कतहतस्य वा। पलद्वादशकं देयं रुक्मलौहस्य चूर्णितम्॥ १६३॥
पलैश्चतुर्विंशतिभिर्मधुशर्करयोर्युतम्। घनीभूते सुशीते च दापयेदवतारिते॥ १६४॥
एतदग्निमुखं नाम दुर्नामान्तकरं परम्। सममग्निं करोत्याशु कालाग्निसमतेजसम्॥ १६५॥
पर्वता अपि जीर्य्यन्ति प्राशनादस्य देहिनः। गुरुवृष्यान्नपानानि पयो मांसरसो हितः॥ १६६॥
दुर्नामपाण्डुश्वयथुकुष्ठप्लीहोदरापहम्। अकालपलितश्चैतदामवातगुदामयम्॥
न स रोगोऽस्ति यश्चापि न निहन्यादिदं क्षणात्॥ १६७॥
करीरकाञ्जिकादीनि ककारादीनि वर्जयेत्। स्रवत्यतोऽन्यथा लौहं देहात् किट्टञ्च दुर्जरम्॥ १६८॥

Agnimukha Lauha

Trivṛt, citraka, nirguṇḍī, snuhī, muṇḍī and bhūmyāmalakī each 320 gm are boiled in water 10.24 litre (reduced to one-fourth). Viḍaṅga 120 gm, trikaṭu each 30 gm, triphalā (combined) 200 gm and śilājatu 40 gm also should be added to it. When it is thickened and cold, it should be put down and lauhabhasma killed with divine drug (svaṇarṃākṣika or manaḥśilā) or vikaṅkata 480 gm along with honey and sugar (combined) 960 gm should be added thereto.

This is known as agnimukha lauha, one of the best remedies for piles. It normalises the fierce fire and promotes digestive power. In diet, heavy, aphrodisiac food and drinks, milk and meat-soup are wholesome. It alleviates all diseases particularly piles, anaemia, oedema, kuṣṭha, splenomegaly, premature greying of hairs, āmavāta and diseases of anus. (During its use), the items beginning with 'Ka' (karīra, kāñjika etc.) should be avoided otherwise lauha with its product is not assimilated and is excreted out. [161-168]

भल्लातकलौहम्

चित्रकं त्रिफला मुस्तं ग्रन्थिकं चविकाऽमृता। हस्तिपिप्पल्यपामार्गदण्डोत्पलकुठेरकाः॥ १६९॥
एषां चतुष्पलान् भागाञ्जलद्रोणे विपाचयेत्। भलातकसहस्रे द्वे छित्त्वा तत्रैव दापयेत्॥ १७०॥

UNIVERSITÄT HAMBURG
Institut für Kultur und Geschichte Indiens und Tibets
Neue Rabenstraße 3, 20354 Hamburg

तेन पादावशेषेण लौहपात्रे पचेद्भिषक्। तुलाऽर्द्धं तीक्ष्णलौहस्य घृतस्य कुडवद्वयम्॥ १७१॥
त्र्यूषणं त्रिफला वह्निः सैन्धवं विडमौद्भिदम्। सौवर्चलविडङ्गानि पलिकांशानि कल्पयेत्॥ १७२॥
कुडवं वृद्धदारस्य तालमूल्यास्तथैव च। शूरणस्य पलान्यष्टौ चूर्णं कृत्वा विनिक्षिपेत्॥ १७३॥
सिद्धे शीते प्रदातव्यं मधुनः कुडवद्वयम्। प्रातर्भोजनकाले च ततः खादेद् यथाबलम्॥ १७४॥
अर्शांसि ग्रहणीदोषं पाण्डुरोगमरोचकम्। क्रिमिगुल्माश्मरीमेहाञ्छूलञ्चाशु व्यपोहति॥ १७५॥
करोति शुक्रोपचयं वलीपलितनाशनम्। रसायनमिदं श्रेष्ठं सर्वरोगहरं परम्॥ १७६॥

Bhallātaka Lauha

Citraka, triphalā, musta, pippalīmūla, cavya, guḍūcī, gajapippalī, apāmārga, daṇḍotpala, kuṭheraka - each 160 gm are boiled in water 10.24 litre. Cut bhallātaka nuts 2000 (in number) are also added thereto. It is reduced to one-fourth and the decoction is again cooked in iron-vessel with tīkṣṇa lauha 2 kg, ghee 320 gm, powder of triphalā, trikaṭu, citraka, saindhava, viḍa, audbhida, sauvarcala and viḍaṅga each 40 gm, vṛddhadāraka and tālamūlī each 160 gm and śūraṇa 320 gm. When the processing is completed and the product is cold honey 320 gm should be added thereto. It is taken, according to strength, in the morning and at the time of meal. It alleviates piles, grahaṇī disorder, anaemia, anorexia, worms, gulma, calculus, prameha and abdominal pain. It promotes semen, destroys wrinkles and greying of hairs, alleviates all diseases and is the best rasāyana. [169-176]

रसगुडिका

रसस्तु पादिकस्तुल्या विडङ्गमरिचाभ्रकाः। गङ्गापालङ्कजरसे खल्वयित्वा पुनः पुनः॥
रक्तिमात्रा गुदार्शोघ्नी वह्नेरत्यर्थदीपनी॥ १७७॥

Rasa-guḍikā

Viḍaṅga, marica and abhraka-bhasma each 1 part and mercury 1/4 part should be rubbed with the juice of gaṅgāpālaṅka and made into pills weighing 125 mg each. It destroys piles and stimulates digestive fire. [177]

अर्शोरोगे वर्ज्यानि

वेगावरोधस्त्रीपृष्ठयानमुत्कटुकासनम्। यथास्वं दोषलञ्चान्नमर्शसः परिवर्जयेत्॥ १७८॥

(Unwholsome items)

Suppression of urges, sexual intercourse, riding, squatting and the diet increasing respective doṣa should be avoided by one suffering from piles. [178]

॥ इत्यर्शश्चिकित्सा॥ ५॥

Thus ends treatment of arśa. [5]

६. षष्ठोऽध्याय:

CHAPTER VI

अग्निमान्द्यादि-चिकित्सा

Treatment of Agnimāndya (deficient digestion) etc.

क्रियाक्रम:

समस्य रक्षणं कार्य्यं विषमे वातनिग्रह:। तीक्ष्णे पित्तप्रतीकारो मन्दे श्लेष्मविशोधनम्॥ १॥

(Digestive fire is of four types-normal, irregular, intense and slow. While treating these) one should protect the normal one and should pacify vāta, pitta and kapha in the other three (irregular, intense and slow) respectively. [1]

हिंग्वष्टकचूर्णम्

त्रिकटुकमजमोदा सैन्धवं जीरके द्वे समधरणधृतानामष्टमो हिङ्गुभाग:।
प्रथमकवलभुक्तं सर्पिषा चूर्णमेतज्जनयति जठराग्निं वातरोगांश्च हन्यात्॥ २॥

Hiṅgvaṣṭaka cūrṇa

Trikaṭu, ajamodā, saindhava, jīraka, kṛṣṇa jīraka and hiṅgu all in equal parts should be powdered. This powder if taken in the first morsel of food with ghee stimulates digestive fire and alleviates vātika disorders. [2]

अग्निवर्द्धका: योगा:

समयावशूकमहौषधचूर्णं लीढं घृतेन गोसर्गे। कुरुते क्षुधां सुखोदकपीतं विश्वौषधं वैकम्॥ ३॥

The powder of yavakṣāra and śuṇṭhī each in equal quantity mixed together with ghee and taken in the morning generates appetites or only śuṇṭhī (powder) taken with tepid water does this. [3]

अन्नमण्ड:

अन्नमण्डं पिबेदुष्णं हिङ्गुसौवर्चलान्वितम्। विषमोऽपि समस्तेन मन्दो दीप्येत पावक:॥ ४॥

क्षुद्बोधनो बस्तिविशोधनश्च प्राणप्रद: शोणितवर्द्धनश्च।
ज्वरापहारी कफपित्तहन्ता वायुं जयेदष्टगुणो हि मण्ड:॥ ५॥

One should take hot rice-scum mixed with hiṅgu and sauvarcala. By this the irregular fire becomes regular and the mild one is intensified.

The rice-scum has eight properties — it increases appetite, cleans urinary bladder, gives energy, promotes blood, alleviates fever and pacifies kapha, pitta and vāta. [4-5]

तीक्ष्णाग्नि-चिकित्सा

नारीक्षीरेण संयुक्तां पिबेदौदुम्बरीं त्वचम्। आभ्यां वा पायसं सिद्धं पिबेदत्यग्निशान्तये॥ ६॥
यत्किञ्चिद् गुरु मेद्यञ्च श्लेष्मकारि च भेषजम्। सर्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा॥ ७॥
मुहुर्मुहुरजीर्णेऽपि भोज्यमस्योपकल्पयेत्। निरिन्धनोऽन्तरं लब्ध्वा यथैनं न निपातयेत्॥ ८॥

Treatment of intense agni

One should take udumbara bark with women's breast-milk or pāyasa (rice-milk) prepared with them to pacify intense agni.

Whatever remedy is heavy, fatty or kapha-promoting including sleep in day after eating is wholsome in intense digestive fire.

Even during indigestion food should be given frequently so that there should not be any disaster in absence of fuel (food). [6-8]

विश्वादिक्वाथ:

विश्वभयागुडूचीनां कषायेण षडूषणम्। पिबेच्छ्लेष्मणि मन्देऽग्नौ त्वक्पत्रसुरभीकृतम्॥ ९॥

Viśvādi

Ṣaḍūṣaṇa (six pungents) combined with tvak and patra is taken with the decoction of śuṇṭhī, harītakī and guḍūcī in case of kapha and slow digestive fire caused thereby. [9]

पञ्चकोलं समरिचं षडूषणमुदाहृतम्॥ १०॥

Ṣaḍūṣaṇa

Pañcakola (Pippalī, pippalīmūla, cavya, citraka and śuṇṭhī) combined with marica is known as ṣaḍūṣaṇa. [10]

हरीतकीप्रयोग:

हरीतकी भक्ष्यमाणा नागरेण गुडेन वा। सैन्धवोपहिता वाऽपि सातत्येनाग्निदीपनी॥ ११॥

Harītakī taken regularly with śuṇṭhī, jaggery or saindhava stimulates digestive fire. [11]

सिन्धूत्थादिचूर्णम्

सिन्धूत्थपथ्यमगधोद्भववह्निचूर्णमुष्णाम्बुना पिबति य: खलु नष्टवह्नि:।
तस्यामिषेण सघृतेन वरं नवान्नं भस्मीभवत्यशितमात्रमिह क्षणेन॥ १२॥

Sīndhūtthādi cūrṇa

Sindhūttha (saindhava), harītakī, pippalī and citraka — powder of these, if taken with hot water, generates power even to digest heavy foods like meat and ghee in a short time. [12]

सिन्धूत्थादिगुडका:

सिन्धूत्थहिङ्गुत्रिफलायमानीव्योषैर्गुडांशैर्गुडकान् प्रकुर्यात्।

तैर्भक्षितैस्तृप्तिमवाप्नुवन् ना भुञ्जीत मन्दाग्निरपि प्रभूतम्॥ १३॥

Sindhūtthādi guḍaka

Sindhūtthā (saindhava), hiṅgu, triphalā, yavānī and trikaṭu are powdered and made into big pills with jaggery. By this even one having slow appetite can eat enormously till contentment. [13]

विडङ्गादिलेह:

विडङ्गभल्लातकचित्रकामृता: सनागरास्तुल्यगुडेन सर्पिषा।
लिहन्ति ये मन्दहुताशना नरा भवन्ति ते बाडवतुल्यवह्नय:॥ १४॥

Viḍaṅgādi leha

Viḍaṅga, bhallātaka, citraka, guḍūcī and śuṇṭhī if taken with equal (quantity of) jaggery and ghee stimulates digestive fire and as such is efficacious in mildness of fire. [14]

गुडशुण्ठ्यादियोगचतुष्टयम्

गुडेन शुण्ठीमथवोपकुल्यां पथ्यां तृतीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुदामयेषु वर्च्चोविबन्धेषु च नित्यमद्यात्॥ १५॥

One should take śuṇṭhī or pippalī or dāḍima with jaggery and harītakī in cases of āmājīrṇa, anal diseases and constipation. [15]

लवणार्द्रकप्रयोग:

भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम्। अग्निसंदीपनं हृद्यं लवणार्द्रकभक्षणम्॥ १६॥

(In case of mildness of fire) taking pieces of fresh ginger with salt in the beginning of meal is always wholsome. It stimulates digestive fire, cleanses tongue and throat and is pleasant. [16]

कपित्थादिखड:

कपित्थतक्रचाङ्गेरीमरिचाजाजिचित्रकै:। कफवातहरो ग्राही खडो दीपनपाचन:॥ १७॥

Khaḍa (a type of soup) prepared with kapittha, buttermilk, cāṅgerī, marica, jīraka and citraka pacifies kapha and vāta, checks diarrhoea, stimulates digestive fire and is digestive. [17]

शार्दूलकाञ्जिक:

पिप्पलीं शृङ्गबेरञ्च देवदारु सचित्रकम्। चविकां बिल्वपेशीञ्चाजमोदाञ्च हरीतकीम्॥ १८॥
महौषधं यमानीञ्च धान्यकं मरिचं तथा। जीरकञ्चापि हिङ्गुञ्च काञ्जिकं साधयेद्भिषक्॥ १९॥
एष शार्दूलको नाम काञ्जिकोऽग्निबलप्रद:। सिद्धार्थतैलसम्भृष्टो दश रोगान् व्यपोहति॥ २०॥
कासं श्वासमतीसारं पाण्डुरोगं सकामलम्। आमञ्च गुल्मशूलञ्च वातगुल्मं सवेदनम्॥
अर्शांसि श्वयथुञ्चैव भुक्ते पीते च सात्म्यत:॥ २१॥

क्षीरपाकविधानेन काञ्जिकस्यापि साधनम् ।। २२ ।।

Śārdūlakāñjika

Pippalī, fresh ginger, devadāru, citraka, cavya, bilva (fruit-pulp), ajamodā, harītakī, śuṇṭhī, yavānī, dhānyaka, marica, jīraka, and hiṅgu— with these sour gruel should be prepared. This śārdūlakāñjika fried with mustard oil stimulates digestive fire and alleviates ten diseases such as cough, dyspnoea, diarrhoea, anaemia, jaundice, āma, gulma, abdominal pain, piles, and oedema keeping on wholsome food and drinks. [18-21]

Sour gruel is also prepared by the method of kṣīrapāka (processing of milk). [22]

अग्निमुखं चूर्णम्

हिङ्गुभागो भवेदेको वचा च द्विगुणा भवेत्। पिप्पली त्रिगुणा चैव शृङ्गवेरं चतुर्गुणम् ।। २३ ।।
यमानिका पञ्चगुणा षड्गुणा च हरीतकी। चित्रकं सप्तगुणितं कुष्ठञ्चाष्टगुणं भवेत् ।। २४ ।।
एतद्वातहरं चूर्णं पीतमात्रं प्रसन्नया। पिबेद् दध्ना मस्तुना वा सुरया कोष्णवारिणा ।। २५ ।।
सोदावर्त्तमजीर्णञ्च प्लीहानमुदरं तथा। अङ्गानि यस्य शीर्य्यन्ते विषं वा येन भक्षितम् ।। २६ ।।
अर्शोहरं दीपनञ्च श्लेष्मघ्नं गुल्मनाशनम्। कासं श्वासं निहन्त्याशु तथैव यक्ष्मनाशनम् ।।
चूर्णमग्निमुखं नाम न क्वचित् प्रतिहन्यते ।। २७ ।।

Agnimukha cūrṇa

Hiṅgu 1 part, vacā 2 parts, pippalī 3 parts, śuṇṭhī 4 parts, yavānī 5 parts, harītakī 6 parts, citraka 7 parts and kuṣṭha 8 parts are powdered together. It pacifies vāta instantaneously if taken with clear wine. It is also taken with curd, curd-water, wine or tepid water. It is useful in udāvarta, indigestion, splenomegaly, udararoga, necrosis, poisoning, piles, gulma, cough, dyspnoea and consumption. It stimulates digestive fire and pacifies kapha. This agnimukha cūrṇa fails nowhere. [23-27]

पानीयभक्तगुडिका

रसोऽर्द्धभागिकस्तुल्या विडङ्गमरिचाभ्रकाः । भक्तोदकेन सम्मर्द्य कुर्य्याद् गुञ्जानिभाः गुडीः ।। २८ ।।
भक्तोदकानुपानैका सेव्या वह्निप्रदीपनी। वार्य्यन्नभोजनञ्चात्र प्रयोगे सात्म्यमिष्यते ।। २९ ।।

Pānīyabhakta guḍikā

Mercury 1/2 part, viḍaṅga, marica and abhraka-bhasma each 1 part - they are rubbed together with sour gruel and made into pills like guñjā (125 mg), one pill is taken with sour gruel keeping on wholsome food and drink. It stimulates digestive fire. [28-29]

बृहदग्निमुखचूर्णम्

द्वौ क्षारौ चित्रकं पाठाकरञ्जलवणानि च। सूक्ष्मैला पत्रकं भार्गी क्रिमिघ्नं हिङ्गु पौष्करम् ।। ३० ।।
शटी दार्वी त्रिवृन्मुस्तं वचा सेन्द्रयवा तथा। धात्रीजीरकवृक्षाम्लं श्रेयसी चोपकुञ्चिका ।। ३१ ।।
अम्लवेतसमम्लीका यमानी सुरदारु च। अभयाऽतिविषा श्यामा हवुषाऽऽरग्वधं समम् ।। ३२ ।।
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः। क्षाराणि लौहकिट्टञ्च तप्तगोमूत्रसेचितम् ।। ३३ ।।

सर्वाणि समभागानि सूक्ष्मचूर्णानि कारयेत्। मातुलुङ्गरसेनैव भावयेच्च दिनत्रयम्॥ ३४॥
दिनत्रयञ्च शुक्तेन चार्द्रकस्वरसेन च। अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभम्॥ ३५॥
उपयुक्तविधानेन नाशयत्यचिराद्ददान्। अजीर्णकमथो गुल्मं प्लीहानं गुदजानि च॥ ३६॥
उदराण्यन्त्रवृद्धिश्चाप्यष्ठीलां वातशोणितम्। प्रणुदत्युल्बणान् रोगान् नष्टमग्निञ्च दीपयेत्॥ ३७॥
समस्तव्यञ्जनोपेतं भक्तं दत्त्वा सुभाजने। दापयेदस्य चूर्णस्य बिडालपदमात्रकम्॥
गोदोहमात्रात् तत्सर्वं द्रवीभवति सोष्मकम्॥ ३८॥

Bṛhadagnimukha cūrṇa

Two kṣāras (yavakṣāra and svarjikṣāra), citraka, pāṭhā, karañja, five salts, sūkṣmailā, patraka, bhārgī, viḍaṅga, hiṅgu, puṣkaramūla, śaṭī, dāruharidrā, trivṛt, musta, vacā, indrayava, āmalakī, jīraka, vṛksāmla, gajapippalī, upakuñcikā, amlavetasa, amlikā, yavānī, devedāru, harītakī, ativiṣā, śyāmā, hapuṣā, āragvadha, alkali of tila, muṣkaka, śigru, kokilākṣa and palāśa, lauhakiṭṭa (iron-slag) heated and immersed in cow's urine— all in equal quantity are powdered and mixed together. It should be impregnated with mātuluṅga juice, vinegar and fresh ginger juice each for three days. This powder intensifies digestive fire vigorously and taken properly alleviates the following diseases - indigestion, gulma, splenomegaly, piles, udararoga, hernia, aṣṭhīlā and vātarakta. It destroys even the diseases in severity and stimulates even the extinguished fire. Food with all the items put in a plate is mixed with 10 gm of this powder which liquifies it in no time. [30-38]

भास्करलवणम्

पिप्पली पिप्पलीमूलं धन्याकं कृष्णजीरकम्। सैन्धवञ्च विडञ्चैव पत्रं तालीशकेशरम्॥ ३९॥
एषां द्विपलिकान् भागान् पञ्च सौवर्चलस्य च। मरिचाजाजिशुण्ठीनामेकैकस्य पलं पलम्॥ ४०॥
त्वगेले चार्द्धभागे च सामुद्रात् कुडवद्वयम्। दाडिमात् कुडवञ्चैव द्वे पले चाम्लवेतसात्॥ ४१॥
एतच्चूर्णीकृतं श्लक्ष्णं गन्धाढ्यममृतोपमम्। लवणं भास्करं नाम भास्करेण विनिर्मितम्॥ ४२॥
जगतस्तु हितार्थाय वातश्लेष्मामयापहम्। वातगुल्मं निहन्त्येतद् वातशूलानि यानि च॥ ४३॥
तक्रमस्तुसुरासीधुशुक्तकाञ्जिकयोजितम्। जाङ्गलानान्तु मांसेन रसेषु विविधेषु च॥ ४४॥
मन्दाग्नेरश्नतः शक्तो भवेदाश्वेव पावकः। अर्शांसि ग्रहणीदोषं कुष्ठामयभगन्दरान्॥ ४५॥
हृद्रोगमामदोषांश्च विविधानुदरस्थितान्। प्लीहानमश्मरीञ्चैव श्वासकासोदरक्रिमीन्॥ ४६॥
विशेषतः शर्कराऽऽदीन् रोगान् नानाविधांस्तथा। पाण्डुरोगांश्च विविधान् नाशयत्यशनिर्यथा॥ ४७॥

Bhāskaralavaṇa

Pippalī, pippalīmūla, dhānyaka, kṛṣṇa jīraka, saindhava, viḍa, patraka, tālīśapatra, nāgakeśara each 80 gm, sauvarcala 200 gm, marica, jīraka and śuṇṭhī each 40 gm, tvak and elā each 20 gm, sāmudra 320 gm, dāḍima 160 gm, amlavetasa 80 gm.— These are powdered finely and mixed together. This is good-smelling and wholesome and is known as Bhāskara lavaṇa formulated by Bhāskara (the Sun-god) for the well-being of creatures. It alleviates diseases caused by vāta and kapha, vātagulma and vātika śūla.

In patients of mild digestive fire it stimulates digestive fire if given with curdwater, wine, sīdhu, vinegar or sour gruel keeping on diet of the meat-soup of wild animals. It also destroys piles, grahaṇī disorder, kuṣṭha, fistula-in-ano, cardiac diseases, āmadoṣa situated in abdomen, splenomegaly, calculus, dyspnoea, cough, udararoga, worms, gravels and anaemia. [39-47]

अग्निघृतम्

पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली। हिङ्गु चव्याजमोदा च पञ्चैव लवणानि च॥ ४८॥
द्वौ क्षारौ हवुषा चैव दद्यादर्द्धपलोन्मितान्। दधिकाञ्जिकशुक्तानि स्नेहमात्रासमानि च॥ ४९॥
आर्द्रकस्वरसप्रस्थं घृतप्रस्थं विपाचयेत्। एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते॥ ५०॥
अर्शसां नाशनं श्रेष्ठं तथा गुल्मोदरापहम्। ग्रन्थ्यर्बुदापचीकासकफमेदोऽनिलानपि॥
नाशयेद् ग्रहणीदोषं श्वयथुं सभगन्दरम्॥ ५१॥
ये च वस्तिगता रोगा ये च कुक्षिसमाश्रिताः। सर्वांस्तान् नाशयत्याशु सूर्य्यस्तम इवोदितः॥ ५२॥

Agnighṛta

Pippalī, pippalīmūla, citraka, gajapippalī, hiṅgu, cavya, ajamodā, five salts, two alkalis (yavakṣāra and svarjikṣāra), hapuṣā - each 20 gm, curd, sour gruel and vinegar equal to ghee, fresh ginger juice 640 gm and ghee 640 gm should be cooked together. This known as agnighṛta is useful for those suffering from mildness of fire. It is one of the best remedies for piles and also alleviates gulma, udararoga, cyst, tumour, scrofula, cough, kapha, medas (fat), wind, grahaṇī disorder, swelling and fistula-in-ano. Besides, it destroys all the diseases located in pelvic region and abdomen as the sun destroys darkness. [48-52]

मस्तुषट्पलकघृतम्

पलिकैः पञ्चकोलैस्तु घृतं मस्तुचतुर्गुणम्। सक्षारैः सिद्धमल्पाग्निं कफगुल्मं विनाशयेत्॥ ५३॥

Mastuṣaṭpalaka ghṛta

Ghee (640 gm) cooked with pañcakola and yavakṣāra, each 40 gm, along with four times curdwater alleviates mildness of digestive fire and kapha-gulma. [53]

बडवामुखचूर्णम्

पथ्यानागरकृष्णाकरञ्जबिल्वाग्निभिः सितातुल्यैः। बडवामुखं विजयते गुरुतरमपि भोजनं चूर्णम्॥ ५४॥

Baḍavāmukha cūrṇa

Harītakī, śuṇṭhī, pippalī, karañja, bilva and citraka are powdered together and mixed with equal sugar. This baḍavāmukha cūrṇa digests even the heavier food. [54]

बृहदग्निघृतम्

भल्लातकसहस्रार्द्धं जलद्रोणे विपाचयेत्। अष्टभागावशेषञ्च कषायमवतारयेत्॥ ५५॥
घृतप्रस्थं समादाय कल्कानीमानि दापयेत्। त्र्यूषणं पिप्पलीमूलं चित्रको हस्तिपिप्पली॥ ५६॥

हिङ्गु चव्याजमोदा च पञ्चैव लवणानि च। द्वौ क्षारौ हवुषा चैव दद्यादर्द्धपलोन्मितान्॥ ५७॥
दधिकाञ्जिकशुक्तानि स्नेहमात्रासमानि च। आर्द्रकस्वरसञ्चैव शोभाञ्जनरसं तथा॥ ५८॥
तत्सर्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत्। एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते॥ ५९॥
अर्शसां नाशनं श्रेष्ठं मूढवातानुलोमनम्। कफवातोद्भवे गुल्मे श्लीपदे च दकोदरे॥ ६०॥
शोथं पाण्ड्वामयं कासं ग्रहणीं श्वासमेव च। एतान् विनाशयत्याशु तमः सूर्य्य इवोदितः॥ ६१॥

Bṛhadagnighṛta

500 bhallātaka nuts are boiled in water 10.24 litre reduced to one-eighth, with this decoction ghee 640 gm should be cooked on mild fire adding thereto the paste of trikaṭu, pippalīmūla, citraka, gajapippalī, hiṅgu, cavya, ajamodā, five salts, two alkalis (yavakṣāra and svarjiksāra) and hapuṣā each 20 gm along with curd, sour gruel, vinegar, fresh ginger juice and śobhāñjana juice equal to ghee. This agnighṛta is useful for those suffering from mildness of digestive fire. It normalises the course of wind and destroys piles, gulma caused by kapha and vāta, filaria, ascites, oedema, aneamia, cough, dysonoea and grahaṇī disorder. [55-61]

क्षारगुडः

द्वे पञ्चमूले त्रिफलामर्कमूलं शतावरीम्। दन्तीं चित्रकमास्फोतां रास्नां पाठां सुधां शटीम्॥ ६२॥
पृथग्दशपलान् भागान् दग्ध्वा भस्म समावपेत्। त्रिःसप्तकृत्वस्तद्भस्म जलद्रोणे च गालयेत्॥ ६३॥
तद्रसं साधयेदग्नौ चतुर्भागावशेषितम्। ततो गुडतुलां दत्त्वा साधयेन्मृदुनाग्निना॥ ६४॥
सिद्धं गुडन्तु विज्ञाय चूर्णानीमानि दापयेत्। वृश्चिकालीं द्विकाकोल्यौ यवक्षारं समावपेत्॥ ६५॥
एते पञ्चपला भागाः पृथक् पञ्च पलानि च। हरीतकीं त्रिकटुकं सर्जिकां चित्रकं वचाम्॥ ६६॥
हिङ्ग्वम्लवेतसाभ्याञ्च द्वे पले तत्र दापयेत्। अक्षप्रमाणां गुडिकां कृत्वा खादेद् यथाबलम्॥ ६७॥
अजीर्णं जरयत्येष जीर्णे सन्दीपयत्यपि। भुक्तं भुक्तञ्च जीर्य्येत पाण्डुत्वमपकर्षति॥ ६८॥
प्लीहार्शः श्वयथुञ्चैव श्लेष्मकासमरोचकम्। मन्दाग्निविषमाग्नीनां कफे कण्ठोरसि स्थिते॥ ६९॥
कुष्ठानि च प्रमेहांश्च गुल्मञ्चाशु व्यपोहति। ख्यातः क्षारगुडो ह्येष रोगयुक्ते प्रयोजयेत्॥ ७०॥

Kṣāraguḍa

Two pañcamūlas (daśamūla), triphalā, arka root, śatāvarī, dantī, citraka, āsphotā, rāsnā, pāṭhā, snuhi root and śaṭī each 400 gm are burnt to ash. This is put in water 10.24 litre and decanted twenty one times. This liquid is heated on fire reduced to one-fourth. Now jaggery 4 kg is added thereto and cooked on mild fire. When completed, the powder of the following is added to it— vṛścikālī, kākolī, kṣīrakākolī and yavakṣāra each 200 gm, harītakī, trikaṭu, svarjikṣāra, citraka and vacā total 200 gm, hiṅgu and amlavetesa total 80 gm. Big pills each weighing 10 gm are made. It is digestive and stimulates digestive fire. Moreover, it allays anaemia, splenomegaly, piles, oedema, kaphaja cough, anorexia, mildness and irregularity of digestive fire, phlegm located in throat and chest, kuṣṭha, prameha and gulma. This kṣāraguḍa should be used in the diseased (and never in the healthy). [62-70]

चित्रकगुड:

नासारोगे विधातव्या या चित्रकहरीतकी। विना धात्रीरसं सोऽस्मिन् प्रोक्तश्चित्रगुडोऽग्निदः ॥ ७१ ॥

Citrakaguḍa

Citrakaharītakī which is prescribed in nasal disorders is known as 'citrakaguḍa' if prepared without āmalaka juice. It promotes digestive fire. [71]

आमाजीर्णस्य चिकित्सासूत्रम्

वचालवणतोयेन वान्तिरामे प्रशस्यते ॥ ७२ ॥

In the condition of āma (ajīrṇa), vomiting is induced with water mixed with vacā and salt. [72]

विदग्धाजीर्णस्य चिकित्सासूत्रम्

अन्नं विदग्धं हि नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति।
तद्ध्यस्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात् ॥ ७३ ॥

Vidagdhājīrṇa

The vidagdha (semi-digested) food is digested quickly with cold water which pacifies pitta by coldness and pushes it downwards due to moistening nature. [73]

अभयालेह:

विदह्यते यस्य च भुक्तमात्रं दह्येत हृत्कोष्ठगलश्च यस्य।
द्राक्षासितामाक्षिकसम्प्रयुक्तां लीढ्वाऽभयां वै स सुखं लभेत ॥ ७४ ॥

Abhayāleha

One who suffers from burning of food and burning sensation in cardiac region, abdomen and throat, gets relief by taking harītakī mixed with drākṣā, sugar and honey. [74]

हरीतकीप्रयोग:

हरीतकी धान्यतुषोदसिद्धा सपिप्पली सैन्धवहिङ्गुयुक्ता।
सोद्गारधूमं भृशमप्यजीर्णं विजित्य सद्यो जनयेत् क्षुधाञ्च ॥ ७५ ॥

Harītakī steamed with dhānyatuṣodaka, a type of sour gruel, and mixed with pippalī, rocksalt and hiṅgu overcomes indigestion associated with eructation and fuming and generates appetite quickly. [75]

विष्टब्धाजीर्णस्य चिकित्सासूत्रम्

विष्टब्धे स्वेदनं पथ्यं पेयञ्च लवणोदकम् ॥ ७६ ॥

In viṣṭabdhājīrṇa, sudation is applied and saline water is given. [76]

रसशेषाजीर्णचिकित्सा

रसशेषे दिवास्वप्नो लङ्घनं वातवर्जनम् ॥ ७७ ॥

In Rasaśeṣājīrṇa, day-sleep, lightening and avoidance of wind are prescribed. [77]

दिवानिद्रार्हाः

व्यायामप्रमदाऽध्ववाहनरतक्लान्ताननतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान् ।
क्षीणान् क्षीणकफाञ्छिशून् मदहतान् वृद्धान् रसाजीर्णिनो
रात्रौ जागरितान्नरान्निरशनान् कामं दिवा स्वापयेत् ॥ ७८ ॥

Sleeping during day is recommended in the following conditions - those who are exhausted by exercise, sex, wayfaring and riding; patients suffering from diarrhoea, abdominal pain, dyspnoea, thirst, hiccough and vātika disorders; those who are emaciated and have diminished kapha, children, old persons, affected with narcosis, rasājīrṇa, having kept awake in night and during fasting. [78]

हिङ्ग्वादिलेपः

आलिप्य जठरं प्राज्ञो हिङ्गुत्र्यूषणसैन्धवैः । दिवास्वप्नं प्रकुर्वीत सर्वाजीर्णप्रणाशनम् ॥ ७९ ॥

One should apply the paste of hiṅgu, trikaṭu and rocksalt and should sleep during day. Thus all types of indigestion are alleviated. [79]

धान्यकादिक्वाथः

धान्यनागरसिद्धन्तु तोयं दद्याद्विचक्षणः । आमाजीर्णप्रशमनं दीपनं वस्तिशोधनम् ॥ ८० ॥

The wise should administer water processed with dhānyaka and śuṇṭhī. It pacifies āmājīrṇa, stimulates digestive fire and cleanses urinary bladder. [80]

पथ्यात्रिकम्

पथ्यापिप्पलिसंयुक्तं चूर्णं सौवर्चलं पिबेत् । मस्तुनोष्णोदकेनाथ बुद्ध्वा दोषगतिं भिषक् ॥ ८१ ॥
चतुर्विधमजीर्णञ्च मन्दानलमथारुचिम् । आध्मानं वातगुल्मञ्च शूलञ्चाशु नियच्छति ॥ ८२ ॥

Considering the condition of doṣa, the physician should administer powder of sauvarcala mixed with harītakī and pippalī with curd-water or hot water. It alleviates four types of indigestion, mildness of fire, anorexia, flatulence, vātika gulma and abdominal pain. [81-82]

शुण्ठ्यभयायोगः

भवेदजीर्णं प्रति यस्य शङ्का स्निग्धस्य जन्तोर्बलिनोऽन्नकाले ।
पूर्वं सशुण्ठीमभयामशङ्कः स प्राश्य भुञ्जीत हितं हिताशी ॥ ८३ ॥

The uncted and strong person who has some indication of indigestion beforehand should take harītakī mixed with dry ginger before meal keeping on wholesome diet. [83]

अभयादि:

किञ्चिदामेन मन्दाग्निरभयागुडनागरम्। जग्ध्वा तक्रेण भुञ्जीत युक्तेनान्नं षडूषणैः॥ ८४॥

If there is sluggishness of digestive fire due to āma, one should take harītakī and śuṇṭhī mixed with jaggery and then take food with buttermilk mixed with ṣaḍūṣaṇa. [84]

विसूचिकाचिकित्सा

विसूचिकायां वमितं विरिक्तं सुलङ्घितं वा मनुजं विदित्वा।
पेयाऽऽदिभिर्दीपनपाचनैश्च सम्यक क्षुधाऽऽर्त्तं समुपक्रमेच्च॥ ८५॥

Visūcikā

In visūcikā, the patient should be given emesis and purgation or lightening and then be managed with liquid gruels etc. and appetisers and digestives to generate hunger. [85]

कुष्ठादितैलम्

कुष्ठसैन्धवयोः कल्कं चुक्रतैलसमन्वितम्। विसूच्यां मर्दनं कोष्णं खल्वीशूलनिवारणम्॥ ८६॥

Warm oil mixed with cukra and paste of kuṣṭha and saindhava is rubbed to remove cramps in visūcikā. [86]

करञ्जादिक्वाथ:

करञ्जनिम्बशिखरिगुडूच्यर्जकवत्सकैः। पीतः कषायो वमनाद्धोरां हन्ति विसूचिकाम्॥ ८७॥

Karañjādi kvātha

The patient is given emesis with the decoction of karañja, nimba, apāmārga, guḍūcī, arjaka and kuṭaja. It alleviates even severe visūcikā. [87]

व्योषादिगुडिकाञ्जनम्

व्योषं करञ्जस्य फलं हरिद्रां मूलं समावाप्य च मातुलुङ्ग्याः।
छायाविशुष्का गुडिकाः कृतास्ता हन्युर्विसूर्ची नयनाञ्जनेन॥ ८८॥

Vyoṣādi guḍikā

Vyoṣa (trikaṭu), karañja fruit, haridrā and mātuluṅgī root - These are pounded together and made into pills dried in shade. It destroys visūcikā by applying in eyes as collyrium. [88]

गुडपुष्पादिगुडिकाञ्जनम्

गुडपुष्पसारशिखरितण्डुलगिरिकर्णिकाहरिद्राभिः।
अञ्जनगुडिका विलयति विसूचिकां त्रिकटुकसनाथा॥ ८९॥

Guḍapuṣpādi guḍikā

Guḍapuṣpa (madhūka) sāra, apāmārga seeds, aparājitā (root) and haridrā mixed with trikaṭu are powdered and made into pills for collyrium which destroys visūcikā. [89]

त्वक्पत्राद्युद्वर्तनं तैलञ्च

त्वक्पत्ररास्नाऽगुरुशिग्रुकुष्ठैरम्लेन पिष्टैः सवचाशताह्वैः।
उद्वर्त्तनं खल्विविसूचिकाघ्नं तैलं विपक्वञ्च तदर्थकारि।। ९०।।

Tvak, patra, rāsnā, agaru, śigru, kuṣṭha, vacā and śatapuṣpā - all pounded together with sour gruel is applied as anointment which alleviates visūcikā with cramps. Oil cooked with these also exerts the same effect. [90]

पिपासायां लवंगादिजलप्रयोग:

पिपासायामनूत्क्लेशे लवङ्गस्याम्बु शस्यते। जातीफलस्य वा शीतं शृतं भद्रघनस्य वा।। ९१।।
विसूच्यामतिवृद्धायां पार्ष्ण्योर्दाहः प्रशस्यते।। ९२।।

In condition of thirst and slight nausea water processed with clove is recommended or the same processed with jātīphala or bhadramusta and cold. [91]

When visūcikā is too advanced, cauterization in heels is prescribed. [92]

अलसकस्य चिकित्सा

वमनं त्वलसे पूर्वं लवणेनोष्णवारिणा। स्वेदो वर्त्तिर्लङ्घनञ्च क्रमश्चातोऽग्निवर्द्धनः।। ९३।।

Treatment of alasaka

In alasaka, first of all vomiting is induced with saline water followed by fomentation, suppository, lightening and other appetising measures. [93]

दार्वादिलेप:

सरुक् चानद्धमुदरमम्लपिष्टैः प्रलेपयेत्। दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः।। ९४।।

In condition of pain and hardness in abdomen, paste of devadāru, haimavatī, kuṣṭha, śatapuṣpā, hiṅgu and saindhava processed with sour gruel should be applied (on abdomen). [94]

यवचूर्णादिलेप:

तक्रेण युक्तं यवचूर्णमुष्णं सक्षारमर्तिं जठरे निहन्यात्।। ९५।।

The paste of barley powder and yavakṣāra pounded with buttermilk applied on abdomen alleviates pain. [95]

स्वेद:

स्वेदो घटैर्वा बहुवाष्पपूर्णैरुष्णैस्तथाऽन्यैरपि पाणितापैः।। ९६।।

Or Heat should be applied with steam or with warm hands. [96]

अजीर्णे शूलघ्नौषधनिषेध:

तीव्रार्त्तिरपि नाजीर्णी पिबेच्छूलघ्नमौषधम्। दोषाच्छन्नोऽनलो नालं पक्तुं दोषौषधाशनम्।। ९७।।

Even in case of severe pain, the patient of indigestion should not take drug to check pain because the digestive fire already slowed by āma is not able to digest doṣa, drugs and food. [97]

॥ इत्यग्निमान्द्यादिचिकित्सा ॥ ६ ॥

Thus ends treatment of agnimāndya etc. [6]

७. सप्तमोऽध्याय:

CHAPTER VII

क्रिमि-चिकित्सा

Treatment of Krimi (worms)

पारसीकयवानिकायोग:

पारासीकयमानी पीता पर्य्युषितवारिणा प्रात:। गुडपूर्वा क्रिमिजातं कोष्ठगतं पातयत्याशु ॥ १ ॥

Pārasīka yavānī, preceded by (intake of) jaggery and taken in the morning with stale water eliminates all the intestinal worms. [1]

स्वरस-योगा:

पारिभद्रकपत्रोत्थं रसं क्षौद्रयुतं पिबेत्। केवुकस्य रसं वाऽपि पत्तूरस्याथवा रसम् ॥ २ ॥

(For this) one should take juice of pāribhadra leaves or kevuka or pattūra with honey. [2]

विडङ्गलेह:

लिह्यात् क्षौद्रेण वैडङ्गं चूर्णं क्रिमिविनाशनम् ॥ ३ ॥

One should take the powder of viḍaṅga with honey. It acts as authelminitic. [3]

मुस्तक्काथ:

मुस्ताखुपर्णीफलशिग्रुदारुक्काथ: सकृष्णाक्रिमिशत्रुकल्क:।
मार्गद्वयेनापि चिरप्रवृत्तान् क्रिमीन् निहन्ति क्रिमिजांश्च रोगान् ॥ ४ ॥

Mustādi kvātha

The decoction of musta, mūṣākarṇī, phala (triphalā), śigru and devadāru added with the paste of pippalī and viḍaṅga destroys even persistent worms coming out of both the passages and the disorders caused by them. [4]

पूपिकायोग:

आखुपर्णीदलै: पिष्टै: पिष्टकेन च पूपिकाम्। जग्ध्वा सौवीरकञ्चानुपिबेत् क्रिमिहरं परम् ॥ ५ ॥

One should eat sweet cakes prepared of (barley or rice) flour mixed with powder of tender leaves of mūṣākarṇī followed by drink of sour gruel. It destroys worms. [5]

पलाशबीजप्रयोग:

पलाशबीजस्वरसं पिबेद्वा क्षौद्रसंयुतम्। पिबेत् तद्बीजकल्कं वा तक्रेण क्रिमिनाशनम् ॥ ६ ॥

The decoction of palāśa seeds mixed with honey or the paste of them with buttermilk should be taken to destroys worms. [6]

सुरसादिगण:

सुरसादिगणं वाऽपि सर्वथैवोपयोजयेत् ।। ७ ।।

Or (the drugs of) surasādi gaṇa should be used in various forms. [7]

विडङ्गादिकल्क:

विडङ्गसैन्धवक्षारकम्पिल्लकहरीतकी: । पिबेत् तक्रेण सम्पिष्य सर्वक्रिमिनिवृत्तये ।। ८ ।।

Viḍaṅgādi Kalka

The paste of viḍaṅga, kampillaka and harītakī mixed with rock salt and yavakṣāra should be taken with buttermilk to eliminate all types of worms. [8]

विडङ्गादिसिद्धा यवागू:

विडङ्गपिप्पलीमूलशिग्रुभिर्मरिचेन च। तक्रसिद्धा यवागू: स्यात् क्रिमिघ्नी ससुवर्चिका ।। ९ ।।

Gruel prepared of viḍaṅga, pippalīmūla, śigru, marica and svarjikṣāra with buttermilk is anthelmintic. [9]

बिम्बीघृतम्

पीतं बिम्बीघृतं हन्ति पक्वामाशयगान् क्रिमीन् ।। १० ।।

Bimbīghṛta

The intake of bimbīghṛta destroys worms situated in stomach and intestines. [10]

त्रिफलाघृतम्

त्रिफला त्रिवृता दन्ती वचा कम्पिल्लकं तथा। सिद्धमेभिर्गवां मूत्रे सर्पि: क्रिमिविनाशनम् ।। ११ ।।

Triphalāghṛta

Ghee cooked with triphalā, trivṛt, dantī, vacā and kampillaka with cow-urine destroys worms. [11]

विडङ्गघृतम्

त्रिफलायास्त्रय: प्रस्था विडङ्गप्रस्थ एव च। द्विपलं दशमूलञ्च लाभत: समुपाचरेत् ।। १२ ।।
पादशेषे जलद्रोणे शृते सर्पिर्विपाचयेत्। प्रस्थोन्मितं सिन्धुयुतं तत्परं क्रिमिनाशनम् ।। १३ ।।
विडङ्गघृतमेतच्च लेह्यं शर्करया सह। सर्वान् क्रिमीन् प्रणुदति वज्रं मुक्तमिवासुरान् ।। १४ ।।

Viḍangaghṛta

Triphalā 1.92 kg, viḍaṅga 640 gm, daśamūla 80 gm — these are decocted in water 10.24 litre reduced to one-fourth. Ghee is cooked with this (decoction) adding rocksalt 640 gm. This is a good anthelmintic. Viḍaṅgaghṛta should be taken with sugar and thus it destroys all types of worms as thunderbolt does to demons. [12-14]

रसेन्द्रप्रयोग:

रसेन्द्रेण समायुक्तो रसो धुस्तूरपत्रज: । ताम्बूलपत्रजो वाऽपि लेपो यूकविनाशन: ।। १५ ।।

The juice of dhattūra or betel leaves mixed with mercury applied externally destroys louse. [15]

विडङ्गतैलम्

सविडङ्गगन्धकशिलासिद्धं सुरभीजलेन कटुतैलम्। आजन्म नयति नाशं लिक्षासहितास्तु यूकाश्च॥

Viḍaṅgataila

Mustard oil cooked with viḍaṅga, sulphur and realgar with cow-urine eradicates louse and its eggs. [16]

॥ इति क्रिमिचिकित्सा ॥ ७ ॥

Thus ends treatment of krimi. [7]

८. अष्टमोऽध्यायः

CHAPTER VIII

पाण्डुरोगादि-चिकित्सा

Treatment of Pāṇḍuroga (anaemia) etc.

चिकित्साक्रमः

साध्यन्तु पाण्ड्वामयिनं समीक्ष्य स्निग्धं घृतेनोर्ध्वमधश्च शुद्धम्।
सम्पादयेत् क्षौद्रघृतप्रगाढैर्हरीतकीचूर्णमयैः प्रयोगैः ॥ १ ॥

After diagnosing the patient of anaemia as curable he should be uncted with ghee followed by upper and lower evacuation and thereafter should be prescribed formulations containing harītakī powder mixed profusely with honey and ghee. [1]

घृतप्रयोगः

पिबेद् घृतं वा रजनीविपक्वं सत्रैफलं तैल्वकमेव वापि।
विरेचनद्रव्यकृतं पिबेद्वा योगांश्च वैरेचनिकान् घृतेन ॥ २ ॥

One should take ghee cooked with haridrā or triphalā or tilvaka or other purgative drugs or he should use purgative formulation with ghee. [2]

हेतुविपरीतचिकित्सा

विधिः स्निग्धस्तु वातोत्थे तिक्तशीतस्तु पैत्तिके। श्लैष्मिके कटुरूक्षोष्णः कार्यो मिश्रस्तु मिश्रके ॥ ३ ॥

Oleative measure should be adopted in that caused by vāta, bitter and cold in that caused by pitta; pungent, rough and hot in that caused by kapha and combined measures in the mixed one. [3]

त्रिवृत्प्रयोगः

द्विशर्करं त्रिवृच्चूर्णं पलार्द्धं पैत्तिके पिबेत् ॥ ४ ॥

Trivṛt powder mixed with double sugar should be taken in the dose of 20 gm in the paittika type. [4]

हरीतकीप्रयोगः

कफपाण्डौ तु गोमूत्रक्लिन्नयुक्तां हरीतकीम् ॥ ५ ॥

नागरं लौहचूर्णं वा कृष्णां पथ्यां तथाऽश्मजम्। गुग्गुलुं वाऽथ मूत्रेण कफपाण्ड्वामयी पिबेत् ॥ ६ ॥

In anaemia caused by kapha harītakī impregnated with cow-urine should be taken. [5]

One suffering from kaphaja aneamia should take śuṇṭhī and lauhabhasma, pippalī and harītakī, śilājatu or guggulu with (cow) urine. [6]

सप्तरात्रं गवां मूत्रे भावितं वाऽप्ययोरजः। पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः॥ ७॥

Lauhabhasma impregnated with cow-urine for a week should be taken with milk to alleviate anaemia. [7]

फलत्रिकादिक्वाथः

फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः। क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम्॥ ८॥

Phalatrikādi kvātha

The decoction of triphalā, guḍūcī, vāsā, kaṭukā, kirātatikta and nimba mixed with honey destroys anaemia and jaundice. [8]

अयस्तिलादिमोदकः

अयस्तिलत्र्यूषणकोलभागैः सर्वैः समं माक्षिकधातुचूर्णम्।
तैर्मोदकः क्षौद्रयुतोऽनुतक्रः पाण्ड्वामये दूरगतेऽपि शस्तः॥ ९॥

Ayastilādi modaka

Lauhabhasma, tila, trikaṭu and dried jujube fruit — all in equal quantity, svarṇamākṣika bhasma equal to the above total should be mixed together and made into boluses with honey. Taken with buttermilk it alleviates even chronic anaemia. [9]

मण्डूरप्रयोगः

अयोमलन्तु सन्तप्तं भूयो गोमूत्रसेचितम्। मधुसर्पिर्युतं चूर्णं सह भक्तेन योजयेत्॥
दीपनश्चाग्निजननं शोथपाण्ड्वामयापहम्॥ १०॥

Maṇḍūra is heated and then dipped into cow's urine (this is repeated seven times). This powder is taken with honey and ghee mixed with meal. It stimulates appetite and digestive fire and alleviates anaemia and oedema. [10]

नवायसं चूर्णम्

त्र्यूषणं त्रिफला मुस्तविडङ्गचित्रकाः समाः। नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा॥ ११॥
भक्षयेत् पाण्डुहृद्रोगकुष्ठार्शःकामलापहम्। नवायसमिदं चूर्णं कृष्णात्रेयेण भाषितम्॥ १२॥

Navāyasa cūrṇa

Trikaṭu, triphalā, musta, viḍaṅga and citraka — all in equal quantity and lauhabhasma nine parts (equal to the above total) are mixed together. This powder is taken with honey and ghee. This navāyasa cūrṇa formulated by Kṛṣṇātreya alleviates anaemia, cardiac disorder, kuṣṭha, piles and jaundice. [11-12]

योगराजः

त्रिफलायास्त्रयो भागास्त्रयस्त्रिकटुकस्य च। भागश्चित्रकमूलस्य विडङ्गानां तथैव च॥ १३॥
पञ्चाश्मजतुनो भागाःपञ्च रूप्यमलस्य च। माक्षिकस्य च शुद्धस्य लौहस्य रजसस्तथा॥ १४॥

अष्टौ भागाः सितायाश्च तत् सर्वं श्लक्ष्णचूर्णितम्। माक्षिकेणाप्लुतं स्थाप्यमायसे भाजने शुभे।। १५।।
उदुम्बरसमां मात्रां ततः खादेद् यथाग्नि ना। दिने दिने प्रयुञ्जीत जीर्णे भोज्यं यथेप्सितम्।। १६।।
वर्जयित्वा कुलत्थांश्च काकमाचीं कपोतकान्। योगराज इति ख्यातो योगोऽयममृतोपमः ।। १७।।
रसायनमिदं श्रेष्ठं सर्वरोगहरं परम्। पाण्डुरोगं विषं कासं यक्ष्माणं विषमज्वरम्।। १८।।
कुष्ठान्यजरकं मेहं श्वासं हिक्कामरोचकम्। विशेषाद्धन्त्यपस्मारं कामलां गुदजानि च।। १९।।

Yogarāja

Triphalā 3 parts, trikaṭu 3 parts, citraka root 1 part, viḍaṅga 1 part, śilājatu 5 parts, silver excrete 5 parts, svarṇamākṣika-bhasma 5 parts, lauhabhasma 5 parts, sugar 8 parts — all finely powdered are mixed together and added with profuse honey and kept in an iron container. It is taken in the dose of 10 gm according to digestive power. After it is digested, the patient should take food as desired avoiding horsegram, kākamācī and pigeon. This formulation known as yogarāja is like nectar and one of the best rasāyanas and panacea for all disorders. Particularly it is efficacious in anaemia, poisoning, cough, consumption, irregular fever, kuṣṭha, indigestion, prameha, dyspnoea, hiccough, anorexia, epilepsy, jaundice and piles. [13-19]

विशालादिचूर्णम्

विशालाकटुकामुस्तकुष्ठदारुकलिङ्गकाः। कर्षांशा द्विपिचुर्मूर्वा कर्षार्द्धा च घुणप्रिया।। २०।।
पीत्वा तच्चूर्णमम्भोभिः सुखैर्लिह्यात् ततो मधु। पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम्।।
गुल्मानाहामवातांश्च रक्तपित्तञ्च तज्जयेत्।। २१।।

Viśālādi cūrṇa

Viśālā, kaṭukā, musta, kuṣṭha, devadāru, indrayava each 10 gm; mūrvā 20 gm and ativiṣā 5 gm — all are powdered together. It is taken with water followed by licking of honey. It alleviates anaemia, fever, burning sensation, cough, dyspnoea, anorexia, gulma, hardness in bowels, āmavāta and raktapitta. [20-21]

क्षीरप्रयोगः

लौहपात्रे शृतं क्षीरं सप्ताहं पथ्यभोजनः। पिबेत् पाण्ड्वामयी शोथी ग्रहणीदोषपीडितः ।। २२।।

One suffering from anaemia, oedema, and grahaṇī disorder should take milk boiled in iron vessel for a week keeping on wholesome diet. [22]

स्नेहनविधानम्

कल्याणकं पञ्चगव्यं महातिक्तमथापि वा। स्नेहनार्थं घृतं दद्यात् कामलापाण्डुरोगिणे।। २३।।

Kalyāṇaka, pañcagavya or mahātikta ghṛta should be used for unction in cases of anaemia and jaundice. [23]

कामलायां चिकित्साक्रमः

रेचनं कामलाऽऽर्त्तस्य स्निग्धस्यादौ प्रयोजयेत्। ततः प्रशमनी कार्या क्रिया वैद्येन जानता॥ २४॥

In jaundice, the patient should be given unction first followed by purgation and then pacifying measures. [24]

स्वरसप्रयोगः

त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः। प्रातर्माक्षिकसंयुक्तः शीलितः कामलाऽपहः॥ २५॥

The juice of triphalā or guḍūcī or dāruharidrā or nimba mixed with honey and taken in morning regularly destroys jaundice. [25]

अञ्जनं नस्यञ्च

अञ्जनं कामलाऽर्त्तानां द्रोणपुष्पीरसः स्मृतः। निशागैरिकधात्रीणां चूर्णं वा सम्प्रकल्पयेत्॥ २६॥
नस्यं कर्कोटमूलं वा घ्रेयं वा जालिनीफलम्॥ २७॥

The juice of droṇapuṣpī is applied to eyes as collyrium in jaundice. Similarly is used the powder of haridrā, red ochre and āmalakī. [26]

Karkoṭa root or devadālī fruit should be inhaled through nose. [27]

योगपञ्चकम्

अयोरजोव्योषविडङ्गचूर्णं लिहेद्धरिद्रां त्रिफलाऽन्वितां वा।
सशर्करा कामलिनां त्रिभण्डी हिता गवाक्षी सगुडा च शुण्ठी॥ २८॥

In jaundice the following (few) formulations are efficacious (1) lauhabhasma, trikaṭu and viḍaṅga powder (2) haridrā and triphalā (3) trivṛt with sugar and (4) Indravāruṇī and śuṇṭhī with jaggery. [28]

दार्व्यादिचूर्णम्

दार्वी सत्रिफला व्योषविडङ्गान्ययसो रजः। मधुसर्पिर्युतं लिह्यात् कामलापाण्डुरोगवान्॥ २९॥

Dārvyādi cūrṇa

Dārvī (dāruharidrā), triphalā, trikaṭu, viḍaṅga, lauhabhasma — this formulation should be taken by one suffering from jaundice and anaemia. [29]

योगद्वयम्

तुल्या अयोरजःपथ्याहरिद्राः क्षौद्रसर्पिषा। चूर्णिताः कामली लिह्याद् गुडक्षौद्रेण वाऽभयाम्॥ ३०॥

One suffering from jaundice should take the powder of lauhabhasma, harītakī and haridrā mixed together with honey and ghee or the powder of harītakī with jaggery and honey. [30]

धात्र्यादिचूर्णम्

धात्रीलौहरजोव्योषनिशाक्षौद्राज्यशर्कराः। लीढा निवारयन्त्याशु कामलामुद्धतामपि॥ ३१॥

Dhātryādi Cūrṇa

Dhātrī (āmalaka), lauhabhasma, trikaṭu, haridrā and sugar — all are mixed together. It is taken with honey and ghee. It alleviates jaundice even if severe. [31]

कुम्भकामलायां मण्डूरप्रयोगः

दग्ध्वाऽक्षकाष्ठैर्मलमायसन्तु गोमूत्रनिर्वापितमष्टवारान्।
विचूर्ण्य लीढं मधुनाऽचिरेण कुम्भाह्वयं पाण्डुगदं निहन्ति॥ ३२॥

The slag of iron (maṇḍūra) is heated on the fire of bibhītaka wood and dipped into cow-urine. It is done eight times- Then it is powdered finely and taken with honey. It alleviates quickly the pāṅḍuroga known as kumbha (kumbhakāmalā). [32]

हलीमकस्य चिकित्साविधिः

पाण्डुरोगक्रियां सर्वां योजयेच्च हलीमके। कामलायाञ्च या दृष्टा साऽपि कार्या भिषग्वरैः॥ ३३॥

In halīmaka, all the measures adopted for anaemia and jaundice should be followed. [33]

विडङ्गाद्यं लौहम्

विडङ्गमुस्तत्रिफलादेवदारुषडूषणैः। तुल्यमात्रमयश्चूर्णं गोमूत्रेऽष्टगुणे पचेत्॥ ३४॥
तैरक्षमात्रां गुडिकां कृत्वा खादेद् दिने दिने। कामलापाण्डुरोगार्त्तः सुखमापद्यतेऽचिरात्॥ ३५॥

Viḍaṅgādya lauha

Viḍaṅga, musta, triphalā, devadāru and ṣaḍūṣaṇa — all equal parts and lauhabhasma equal to the above total should be cooked in eight times cow-urine and then made into big pills each of 10 gm. It should be taken regularly. By this the patient of jaundice and anaemia gets relief quickly. [34-35]

त्र्यूषणाद्यं मण्डूरम्

त्र्यूषणं त्रिफला मुस्तं विडङ्गं चव्यचित्रकौ। दार्वीत्वङ्माक्षिको धातुर्ग्रन्थिकं देवदारु च॥ ३६॥
एषां द्विपलिकान् भागांश्चूर्णीकृत्य पृथक् पृथक्। मण्डूरं द्विगुणं चूर्णाच्छुद्धमञ्जनसन्निभम्॥ ३७॥
मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तु प्रक्षिपेत् ततः। उदुम्बरसमान् कुर्याद् वटकांस्तान् यथाबलम्॥ ३८॥
उपभुञ्जीत तक्रेण सात्म्यं जीर्णे च भोजनम्। मण्डूरवटका ह्येते प्राणदाः पाण्डुरोगिणाम्॥ ३९॥
कुष्ठान्यजरकं शोथमूरुस्तम्भं कफामयान्। अर्शांसि कामला मेहान् प्लीहानं शमयन्ति च॥ ४०॥
निर्वाप्य बहुशो मूत्रे मण्डूरं ग्राह्यमिष्यते। ग्राहयन्त्यष्टगुणितं मूत्रं मण्डूरचूर्णतः॥ ४१॥

Tryūṣaṇādya maṇḍūra

Tryūṣaṇa (trikaṭu), triphalā, musta, viḍaṅga, cavya, citraka, dāruharidrā bark, svarṇamākṣika, pippalīmūla and devadāru — each 80 gm should be powdered together. Purified maṇḍūra double in quantity (e.g. 2 Kg. 240 gm) should be cooked in eight times cow-urine and then the above powder is added to it and made into big pills each of 10

gm. It should be used, according to strength, with buttermilk taking suitable diet when the drug is digested. These maṇḍūra vaṭakas revitalise the patients of anaemia and also alleviate kuṣṭha, indigestion, oedema, prameha and splenomegaly.

Here maṇḍūra is taken after having been dipped into cow-urine several times. Cow-urine is taken in quantity eight times the maṇḍūra powder. [36-41]

पुनर्नवामण्डूरम्

पुनर्नवा त्रिवृच्छुण्ठीपिप्पलीमरिचानि च। विडङ्गं देवकाष्ठञ्च चित्रकं पुष्कराह्वयम्॥ ४२॥
त्रिफलां द्वे हरिद्रे च दन्तीञ्च चविकां तथा। कुटजस्य फलं तिक्ता पिप्पलीमूलमुस्तकम्॥ ४३॥
एतानि समभागानि मण्डूरं द्विगुणं ततः। गोमूत्रेऽष्टगुणे पक्त्वा स्थापयेत् स्निग्धभाजने॥
पाण्डुशोथोदरानाहशूलार्शःकृमिगुल्मनुत्॥ ४४॥

Punarnavāmaṇḍūra

Punarnavā, trivṛt, śuṇṭhī, pippalī, marica, viḍaṅga, devadāru, citraka, puṣkaramūla, pippalī, haridrā, dāruharidrā, dantī, cavya, indrayava, kaṭukā, pippalīmūla and musta all in equal parts and maṇḍūra double the above total are cooked in eight times cow-urine and kept in uncted container. It alleviates anaemia, oedema, udararoga, hardness of bowels, abdominal pain, piles, worms and gulma. [42-44]

मण्डूरवज्रवटकः

पञ्चकोलं समरिचं देवदारु फलत्रिकम्। विडङ्गमुस्तयुक्ताश्च भागास्त्रिपलसम्मिताः॥ ४५॥
यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः। पक्त्वा चाष्टगुणे मुत्रे घनीभूते तदुद्धरेत्॥ ४६॥
ततोऽक्षमात्रान् वटकान् पिबेत् तक्रेण तक्रभुक्। पाण्डुरोगं जयत्येष मन्दाग्नित्वमरोचकम्॥ ४७॥
अर्शांसि ग्रहणीरोगमूरुस्तम्भमथापि वा। क्रिमिं प्लीहानमुदरं गलरोगञ्च नाशयेत्॥
मण्डूरवज्रनामाऽयं रोगानीकविनाशनः॥ ४८॥

Maṇḍūra-vajravaṭaka

Pañcakola, marica, devadāru, triphalā, viḍaṅga and musta total 120 gm and maṇḍūra double the above powder— all are cooked in eight times cow-urine till it thickens. Out of it big pills each of 10 gm are made and taken with buttermilk and also keeping on the diet of buttermilk. This known as maṇḍūra vajravaṭaka destroys groups of disorders particularly anaemia, loss of appetite, anorexia, piles, grahaṇī disorders, ūrustambha, worms, spleen enlargement, udararoga and diseases of throat. [45-48]

धात्र्यरिष्टः

धात्रीफलसहस्रे द्वे पीडयित्वा रसं भिषक्। क्षौद्राष्टभागं पिप्पल्याश्चूर्णार्द्धकुडवान्वितम्॥ ४९॥
शर्कराऽर्द्धतुलोन्मिश्रं पक्वं स्निग्धघटे स्थितम्। प्रपिबेत् पाण्डुरोगार्त्तो जीर्णे हितमिताशनः॥ ५०॥
कामलापाण्डुहृद्रोगवातासृग्विषमज्वरान्। कासहिक्कारुचिश्वासांश्चैषोऽरिष्टः प्रणाशयेत्॥ ५१॥

Dhātryariṣṭa

Expressed juice of 2000 āmalaka fruits, honey 1/8 (of the juice), pippalī powder 80 gm and sugar 2 kg. should be put together in an uncted vessel for fermentation, when it is prepared it should be taken by the one suffering from anaemia keeping on wholesome and measured diet. This ariṣṭa alleviates jaundice, anaemia, cardiac disorder, vātarakta, irregular fever, cough, hiccough, anorexia and dyspnoea. [49-51]

द्राक्षाघृतम्

पुराणसर्पिषः प्रस्थो द्राक्षाऽर्द्धप्रस्थसाधितः। कामलागुल्मपाड्वर्तिज्वरमेहोदरापहः ॥ ५२ ॥

Drākṣāghṛta

Old ghee 640 gm cooked with drākṣā 320 gm destroys jaundice, gulma, anaemia, fever, prameha and udararoga. [52]

हरिद्राघृतम्

हरिद्रात्रिफलानिम्बबलामधुकसाधितम्। सक्षीरं माहिषं सर्पिः कामलाहरमुत्तमम् ॥ ५३ ॥

Haridrāghṛta

Buffallo's ghee cooked with milk and haridrā, pippalī, nimba, balā and madhuyaṣṭī is a good remedy for jaundice. [53]

मूर्वाद्यं घृतम्

मूर्वातिक्तानिशायासकृष्णाचन्दनपर्पटैः। त्रायन्तीवत्सभूनिम्बपटोलाम्बुददारुभिः ॥ ५४ ॥
अक्षमात्रैर्घृतप्रस्थं सिद्धं क्षीरं चतुर्गुणम्। पाण्डुताज्वरविस्फोटशोथार्शोरक्तपित्तनुत् ॥ ५५ ॥

Mūrvādya ghṛta

Mūrvā katukā, haridrā, yavāsa, pippalī, candana, parpaṭa, trāyamāṇā, kuṭaja, kirātatikta, paṭola, musta and devadāru- each 10 gm with the (paste of) these ghee 640 gm should be cooked with four times milk. It alleviates anaemia, fever, eruptions, oedema, piles and raktapitta. [54-55]

व्योषाद्यं घृतम्

व्योषं बिल्वं द्विरजनी त्रिफला द्विपुनर्नवम्। मुस्तान्ययोरजः पाठा विडङ्गं देवदारु च ॥ ५६ ॥
वृश्चिकाली च भार्गी च सक्षीरैस्तैः शृतं घृतम्। सर्वान् प्रशमयत्येतद् विकारान् मृत्तिकाकृतान् ॥

Vyoṣādya ghṛta

Vyoṣa (trikaṭu), bilva, haridrā, dāruharidrā, triphalā, both types of punarnavā, musta, lauhabhasma, pāṭhā, viḍaṅga, devadāru, vṛścikālī and bhārgī— with these ghee cooked along with milk pacifies all disorders caused by earth (eating). [56-57]

॥ इति पाण्डुरोगचिकित्सा ॥ ८ ॥

Thus ends treatment of pāṇḍuroga etc. [8]

९. नवमोऽध्याय:

CHAPTER IX

रक्तपित्त-चिकित्सा

Treatment of Raktapitta (innate haemorrhage)

क्रियाक्रम:

नोद्रिक्तमादौ संग्राह्यं बलिनोऽप्यश्नतश्च यत्। हृत्पाण्डुग्रहणीदोषप्लीहगुल्मज्वरादिकृत्॥ १॥

Innate haemorrhage severely occured should not be checked at the very beginning particularly in starting and saturated patients as it may cause cardiac disorder, anaemia, grahaṇī disorder, spleen enlargement, gulma, fever etc. [1]

ऊर्ध्वं प्रवृत्तदोषस्य पूर्वं लोहितपित्तिन:। अक्षीणबलमांसाग्ने: कर्त्तव्यमपतर्पणम्॥ २॥

In the case of innate haemorrhage directed upwards and if the patient has no debility, emaciation and diminished appetite, at first, desaturation is prescribed. [2]

ऊर्ध्वगे तर्पणं पूर्वं कर्त्तव्यञ्च विरेचनम्। प्रागधोगमने पेया वमनञ्च यथाबलम्॥ ३॥

According to strength of the patient in upward haemorrhage saturation is given followed by purgation while in the downward one liquid gruel followed by vomiting is prescribed. [3]

तर्पणयोग:

तर्पणं सघृतक्षौद्रलाजचूर्णै: प्रदापयेत्। ऊर्ध्वगं रक्तपित्तं तत् पीतं काले व्यपोहति॥ ४॥

For saturation, powder of parched paddy mixed with ghee and honey is given. If administered timely it alleviates the upward haemorrhage. [4]

तर्पणीयजलम्

जलं खर्जूरमृद्वीकामधुकै: सपरूषकै:। शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करम्॥ ५॥

Cold water processed with kharjūra, drākṣā, madhuka and paruṣaka and mixed with sugar is used for saturation. [5]

त्रिवृतामोदक:

त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु। मोदक: सन्निपातोर्ध्वरक्तपित्तज्वरापह:॥ ६॥

Trivṛt, triphalā, śyāmā (trivṛt), pippalī, sugar and honey - all are mixed and made into modaka (sweet balls) which pacifies sannipāta, upward haemorrhage and fever. [6]

पेयादिनिर्देश:

शालिपर्ण्यादिना सिद्धा पेया पूर्वमधोगते। वमनं मदनोन्मिश्रो मन्थ: सक्षौद्रशर्कर:॥ ७॥

In the downward type, first, liquid gruel processed with śālaparṇyādi drugs should be given followed by emesis with madanaphala mixed with churned drink having honey and sugar. [7]

रक्तपित्ते पथ्यम्

शालिषष्टिकनीवारकोरदूषप्रशातिकाः। श्यामाकश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम्॥ ८॥
मसूरमुद्गचणकाः समकुष्ठाढकीफलाः। प्रशस्ताः सूपयूषार्थं कल्पिता रक्तपित्तिनाम्॥ ९॥
शाकं पटोलवेत्राग्रतण्डुलीयादिकं हितम्। मांसं लावकपोतादिशशैणहरिणादिजम्॥ १०॥
विना शुण्ठीं षडङ्गेन सिद्धं तोयञ्च दापयेत्॥ ११॥

The patients of innate haemorrhage should take in diet the following - (a) among cereals-śāli, ṣaṣṭika, nīvāra, kodrava, praśātikā, śyāmāka and priyaṅgu (kaṅgu) (b) For pulse-soups- lentils, green gram, bengal gram, makuṣṭha and āḍhakī (c) among vegetables-paṭola, vetrāgra, taṇḍulīyaka etc and (d) among meats those derived from quail, pigeon etc. and rabbit, black antelope, deer etc. [8-10]

. Water processed with ṣaḍaṅga without śuṇṭhī should be given. [11]

स्तम्भनीयाः

क्षीणमांसबलं बालं वृद्धं शोषानुबन्धिनम्। अवम्यमविरेच्यञ्च स्तम्भनैः समुपाचरेत्॥ १२॥

In case of patients who are children and old, have debility, emaciation and residue of consumption and are unfit for emesis and purgation, checking (haemostatic) measures should be adopted. [12]

वासापत्रस्वरसः

वृषपत्राणि निष्पीड्य रसं समधुशर्करम्। पिबेत् तेन शमं याति रक्तपित्तं सुदारुणम्॥ १३॥

One should take the juice expressed of the vāsā leaves mixed with honey and sugar which pacifies even the severe innate haemorrhage. [13]

प्रियङ्ग्वादिचूर्णम्

आटरूषकनिर्यूहे प्रियङ्गुं मृत्तिकाऽञ्जने। विनीय लोध्रं सक्षौद्रं रक्तपित्तहरं पिबेत्॥ १४॥

The powder of priyaṅgu, fuller's earth, rasāñjana and lodhra suspended in decoction of vāsā mixed with honey should be taken to alleviate innate haemorrhage. [14]

उत्पलादिचूर्णम्

वासाकषायोत्पलमृत्प्रियङ्गुलोध्राञ्जनाम्भोरुहकेशराणि। पीत्वा सिताक्षौद्रयुतानि हन्यात् पित्तासृजो वेगमुदीर्णमाशु॥

Utpalādi cūrṇa

Utpala, fuller's earth, priyaṅgu, lodhra, rasāñjana and lotus stamens— this powder dissolved in vāsā decoction mixed with sugar and honey should be taken. It checks even the severe force of innate haemorrhage. [15]

तालीशचूर्णम्

तालीशचूर्णसहित: पेय: क्षौद्रेण वासकस्वरस:। कफपित्ततमकश्वासस्वरभेदरक्तपित्तहर: ॥ १६ ॥

The juice of vāsā mixed with tālīsa powder and honey should be taken. It alleviates kapha, pitta, bronchial asthma, hoarseness of voice and innate haemorrhage. [16]

आटरूषकादिक्वाथ:

आटरूषकमृद्वीकापथ्याक्वाथ: सशर्कर:। क्षौद्राढ्य: कसनश्वासरक्तपित्तनिबर्हण: ॥ १७ ॥

Āṭarūṣakādi kvātha

The decoction of āṭarūṣaka (vāsā), drākṣā and harītakī mixed with sugar and honey alleviates cough, dyspnoea and innate haemorrhage. [17]

वासायां विद्यमानायामाशायां जीवितस्य च। रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥ १८ ॥

In the presence of vāsā and if there is hope of life why should one suffering from innate haemorrhage, wasting and cough despair ? [18]

समाक्षिक: फल्गुफलोद्भवो वा पीतो रस: शोणितमाशु हन्ति ॥ १९ ॥
मदयन्त्यङ्घ्रिज: क्वाथस्तद्वत् समधुशर्कर: ॥ २० ॥

The juice of phalgu (fig) fruit mixed with honey checks haemorrhage instantaneously. [19]

Similarly acts the decoction of madayantī root mixed with honey and sugar. [20]

अतसीकुसुमादियोग:

अतसीकुसुमसमङ्गावटावरोहत्वगम्भसा पीता। प्रशमयति रक्तपित्तं यदि भुङ्क्ते मुद्गयूषेण ॥ २१ ॥

(The paste of) linseed flower, samaṅgā (lajjālu) and bark of hanging roots of banyan tree taken with water pacifies innate haemorrhage if kept on diet with the soup of green gram. [21]

क्षीरप्रयोग:

कषाययोगैर्विविधैर्दीप्ताग्नौ निर्जिते कफे। रक्तपित्तं न चेच्छाम्येत् तत्र वातोल्वणे पय: ॥ २२ ॥

On the use of different extracts of drugs when digestive fire is stimulated and kapha is pacified but the haemorrhage is not checked, in that condition of the predominance of vāta intake of milk is prescribed. [22]

छागं पयोऽथवा गव्यं शृतं पञ्चगुणे जले। अभ्यस्येत् ससिताक्षौद्रं पञ्चमूलीशृतं पय: ॥ २३ ॥
द्राक्षया पर्णिनीभिर्वा बलया मधुकेन या। श्वदंष्ट्रया शतावर्या रक्तजित् साधितं पय: ॥ २४ ॥

Goat's or cow's milk boiled with five times water or processed with laghu pañcamūla or drākṣā or four parṇinīs (śālaparṇī, pṛśniparṇī, mudgaparṇī and māṣaparṇī), or balā or madhuka or gokṣura or śatāvarī should be used to check the haemorrhage. [23-24]

पक्वोदुम्बरादिलेहा:

पक्वोदुम्बरकाश्मर्य्यपथ्याखर्जूरगोस्तना: । मधुना घ्नन्ति संलीढा रक्तपित्तं पृथक् पृथक् ॥ २५ ॥

Ripe udumbara fruit, gambhārī fruit, harītakī, kharjūra and drākṣā each singly taken with honey alleviates innate haemorrhage. [25]

भूनिम्बकल्कप्रयोग:

भद्रशाखोटकत्वग्रसबिन्दुद्वययुतो घृतद्विगुण: । भूनिम्बकल्क ऊर्ध्वगपित्तास्रश्वासकासघ्न: ॥ २६ ॥

The paste of kirātatikta mixed with two drops of the juice of the tender śākhoṭaka bark and the double (quantity of) ghee alleviates innate haemorrhage, cough and dyspnoea. [26]

खदिरपुष्पादीनां प्रयोग:

खदिरस्य प्रियङ्गूणां कोविदारस्य शाल्मले: । पुष्पचूर्णन्तु मधुना लीढ्वा चारोग्यमश्नुते ॥ २७ ॥

One regains health by taking powder of the flowers of khadira, priyaṅgu, kovidāra and śālmali mixed with honey. [27]

अभयाप्रयोग:

अभया मधुसंयुक्ता पाचनी दीपनी मता। श्लेष्माणं रक्तपित्तञ्च हन्ति शूलातिसारनुत् ॥ २८ ॥
वासकस्वरसे पथ्या सप्तधा परिभाविता। कृष्णा वा मधुना लीढा रक्तपित्तं द्रुतं जयेत् ॥
भावनायां द्रवो देय: सम्यगार्द्रत्वकारक: ॥ २९ ॥

Harītakī (powder) mixed with honey is digestive and appetiser. It pacifies kapha and alleviates innate haemorrhage and painful diarrhoea. [28]

Harītakī or pippalī impregnated seven times with vāsā juice if taken with honey overcomes the innate haemorrhage quickly. The liquid for impregnation should be so much as to cause adequate moistening. [29]

एलादिगुडिका

एलापत्रत्वचोऽर्द्धाक्षा: पिप्पल्यर्द्धपलं तथा। सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिता: ॥ ३० ॥
सञ्चूर्ण्य मधुना युक्त्या गुडिका: कारयेद्भिषक्। अक्षमात्रां ततश्चैकां भक्षयेत्तु दिने दिने ॥ ३१ ॥
कासं श्वासं ज्वरं हिक्कां छर्दिं मूर्च्छां मदं भ्रमम्। रक्तनिष्ठीवनं तृष्णां पार्श्वशूलमरोचकम् ॥ ३२ ॥
शोथप्लीहाढ्यवातांश्च स्वरभेदं क्षतक्षयम्। गुडिका तर्पणी वृष्या रक्तपित्तञ्च नाशयेत् ॥ ३३ ॥

Elādi guḍikā

Elā, patra and tvak each 5 gm, pippalī 20 gm, śarkarā, madhuka, kharjūra and drākṣā each 40 gm — all are powdered, mixed together with honey and made into pills each of 10 gm. Such one pill should be taken per day. It is saturating, aphrodisiac and destroys cough, asthma, fever, hiccough, vomiting, fainting, narcosis, giddiness, haemoptysis, thirst,

pain in chest, anorexia, oedema, splenomegaly, vātarakta, hoarseness of voice, chest-wound with wasting and innate haemorrhage. [30-33]

पृथ्वीकाचूर्णम्

लोहगन्धिनि निश्वासे चोद्गारे रक्तगन्धिनि। पृथ्वीकां शाणमात्रान्तु खादेद् द्विगुणशर्कराम्॥ ३४॥

If breath and eructation are iron-smelling, pṛthvīkā 2.5 gm mixed with double sugar should be taken. [34]

घृतभृष्टामलकप्रयोग:

नासाप्रवृत्तरुधिरं घृतभृष्टं श्लक्ष्णपिष्टमामलकम्। सेतुरिव तोयवेगं रुणद्धि मूर्ध्नि प्रलेपेन॥ ३५॥

Epistaxis is controlled by applying paste of finely powdered āmalaka fruits fried with ghee as the flow of water by a dam. [35]

घ्राणप्रवृत्तरक्ते योगा:

घ्राणप्रवृत्ते जलमाशु देयं सशर्करं नासिकया पयो वा।
द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करञ्चेक्षुरसं हितं वा॥ ३६॥

In epistaxis, water or milk with sugar should be instilled in nostrils or the patient should drink grape juice, ghee extracted of milk or sugarcane juice mixed with sugar through nose. [36]

नस्यं दाडिमपुष्पोत्थो रसो दूर्वाभवोऽथवा। आम्रास्थिज: पलाण्डोर्वा नासिकास्रुतरक्तजित्॥ ३७॥

Snuffing with the juice of dāḍima flowers, dūrvā, mango– kernel or onion controls the nasal haemorrhage. [37]

मेढ्रगरक्तपित्ते वस्तिप्रयोग:

मेढ्रगेऽतिप्रवृत्ते तु वस्तिरुत्तरसंज्ञित:। शृतं क्षीरं पिबेद्वाऽपि पञ्चमूल्या तृणाह्वया॥ ३८॥

In case of excessive haemorrhage from urethra, uttarabasti (urethral douche) is advised. Moreover, intake of milk processed with tṛṇapañcamūla is prescribed. [38]

दूर्वाद्यं घृतम्

दूर्वा सोत्पलकिञ्जल्का मञ्जिष्ठा सैलबालुका। सिता शीतमुशीरञ्च मुस्तं चन्दनपद्मकम्॥ ३९॥
विपचेत् कार्षिकैरेतै: सर्पिराजं सुखाग्निना। तण्डुलाम्बु त्वजाक्षीरं दत्त्वा चैव चतुर्गुणम्॥ ४०॥
तत्पानं वमतो रक्तं नावनं नासिकागते। कर्णाभ्यां यस्य गच्छेत्तु तस्य कर्णौ प्रपूरयेत्॥ ४१॥
चक्षु:स्राविणि रक्ते तु पूरयेत् तेन चक्षुषी। मेढ्रपायुप्रवृत्ते तु वस्तिकर्मसु तद्धितम्॥
रोमकूपप्रवृत्ते तु तदभ्यङ्गे प्रयोजयेत्॥ ४२॥

Dūrvādya ghṛta

Dūrvā, lotus stamens, mañjiṣṭhā, elavāluka, śarkarā, sandal, uśīra, musta, rakta candana,

padmaka each 10 gm — with these goat's ghee is cooked on mild fire with rice water and goat's milk four times (in quantity). This ghee is given by mouth in haematemesis and by nose in epistaxis. In haemorrhage from ear and eyes it should be filled there. In haemorrhage from urethra and rectum, it should be administered for enema and in generalised haemorrhage from hair follicles in skin, it should be anointed on the body. [39-42]

शतावरीघृतम्

शतावरीदाडिमतिन्तिडीकं काकोलिमेदे मधुकं विदारीम्।
पिष्ट्वा च मूलं फलपूरकस्य घृतं पचेत् क्षीरचतुर्गुणं ज्ञः ॥
कासज्वरानाहविबन्धशूलं तद्रक्तपित्तं घृतमाशु हन्यात् ॥ ४३ ॥

Śatāvarīghṛta

Śatāvarī, dāḍima, harītakī, tintiḍīka, kākolī, medā, mahāmedā, madhuka, vidārī and bījapūra root - with the paste of these ghee is cooked along with four times milk. It alleviates cough, fever, hardness of bowels, constipation, pain and innate haemarroge. [43]

बृहच्छतावरीघृतम्

शतावर्य्यास्तु मूलानां रसप्रस्थद्वयं मतम्। तत्समश्च भवेत् क्षीरं घृतप्रस्थं विपाचयेत् ॥ ४४ ॥
जीवकर्षभकौ मेदा महामेदा तथैव च। काकोली क्षीरकाकोली मृद्वीका मधुकं तथा ॥ ४५ ॥
मुद्गपर्णी माषपर्णी विदारी रक्तचन्दनम्। शर्करामधुसंयुक्तं सिद्धं विस्रावयेद्भिषक् ॥ ४६ ॥
रक्तपित्तविकारेषु वातरक्तगदेषु च। क्षीणशुक्रेषु दातव्यं वाजीकरणमुत्तमम् ॥ ४७ ॥
अङ्गदाहं शिरोदाहं ज्वरं पित्तसमुद्भवम्। योनिशूलञ्च दाहञ्च मूत्रकृच्छ्रञ्च पैत्तिकम् ॥ ४८ ॥
एतान् रोगान् निहन्त्याशु छिन्नाभ्राणीव मारुतः। शतावरीसर्पिरिदं बलवर्णाग्निवर्द्धनम् ॥ ४९ ॥
स्नेहपादः स्मृतः कल्कः कल्कवन्मधुशर्करे। इति वाक्यबलात् स्नेहे प्रक्षेप्यं पादिकं भवेत् ॥ ५० ॥

Bṛhacchatāvarī-ghṛta

Ghee 640 gm should be cooked with śatāvarī juice 1.28 litre and equal quantity of milk alongwith (the paste) of the following drugs-jīvaka, ṛṣabhaka, medā, mahāmedā, kākolī, kṣīrakākolī, drākṣā, madhuka, mudgaparṇī, māṣaparṇī, vidārī and rakta candana. After completion, sugar and honey should be added to it. This śatāvarī-ghṛta promotes strength, lustre and digestive fire and is a good aphrodisiac. It is indicated in innate haemorrhage, vātarakta, diminished semen, burning sensation in body and fever caused by pitta, pain in uterus, burning sensation in vagina and urethra and dysuria. It destroys these diseases quickly as strong wind disperses clouds.

The quantity of paste should be one-fourth of the sneha (ghee) and honey and sugar should be equal to the paste. On this basis the additive material in sneha should be one-fourth (in quantity). [44-50]

वासाद्यं घृतम्

वासां सशाखां सपलाशमूलां कृत्वा कषायं कुसुमानि चास्या: ।
प्रदाय कल्कं विपचेद् घृतं तत् सक्षौद्रमाश्वेव निहन्ति रक्तम् ।। ५१ ।।
शणस्य कोविदारस्य वृषस्य ककुभस्य च । कल्काढ्यत्वात् पुष्पकल्कं प्रस्थे पलचतुष्टयम् ।। ५२ ।।

Vāsādya ghṛta

Ghee is cooked with the decoction and paste of the whole plant of vāsā and added with honey. It checks haemorrhage. [51]

The quantity of the paste of the flowers of śaṇa, kovidāra, vāsā and arjuna should be 160 gm in 640 gm ghee. [52]

कामदेवघृतम्

अश्वगन्धापलशतं तदर्द्धं गोक्षुरस्य च। शतावरी विदारी च शालपर्णी बला तथा ।। ५३ ।।
अश्वत्थस्य च शुङ्गानि पद्मबीजं पुनर्नवा। काश्मरीफलमेतत्तु माषबीजं तथैव च ।। ५४ ।।
पृथग्दशपलान् भागांश्चतुर्द्रोणेऽम्भसः पचेत्। चतुर्भागावशेषन्तु कषायमवतारयेत् ।। ५५ ।।
मृद्वीका पद्मकं कुष्ठं पिप्पली रक्तचन्दनम्। बालकं नागपुष्पञ्च आत्मगुप्ताफलं तथा ।। ५६ ।।
नीलोत्पलं शारिवे द्वे जीवनीयं विशेषतः। पृथक् कर्षसमञ्चैव शर्करायाः पलद्वयम् ।। ५७ ।।
रसस्य पौण्ड्रकेक्षूणामाढकं तत्र दापयेत्। चतुर्गुणेन पयसा घृतप्रस्थं विपाचयेत् ।। ५८ ।।
रक्तपित्तं क्षतक्षीणं कामलां वातशोणितम्। हलीमकं तथा शोथं स्वरभेदं बलक्षयम् ।। ५९ ।।
अरोचकं मूत्रकृच्छ्रं पार्श्वशूलञ्च नाशयेत्। एतद्राज्ञां प्रयोक्तव्यं बह्वन्तःपुरचारिणाम् ।। ६० ।।
स्त्रीणाञ्चैवानपत्यानां दुर्बलानाञ्च देहिनाम्। क्लीबानामल्पशुक्राणां जीर्णानामल्परेतसाम् ।। ६१ ।।
श्रेष्ठं बलकरं हृद्यं वृष्यं पेयं रसायनम्। ओजस्तेजस्करञ्चैव आयुःप्राणविवर्द्धनम् ।। ६२ ।।
संवर्द्धयति शुक्रञ्च पुरुषं दुर्बलेन्द्रियम्। सर्वरोगविनिर्मुक्तस्तोयसिक्तो यथा द्रुमः ।
कामदेव इति ख्यातः सर्वर्तुषु च शस्यते ।। ६३ ।।

Kāmadeva ghṛta

Aśvagandhā 4 kg, gokṣura, śatāvarī, vidārī, śālaparṇī and balā each 2 kg; aśvattha (leaf buds), lotus seeds, punarnavā, gambhārī fruits and māṣa each 400 gm — all this is boiled in water 40.96 litre reduced to one-fourth. Paste of the following drugs be prepared – drākṣā, padmaka, kuṣṭha, pippalī, raktacandana, bālaka, nāgakeśara, kapikacchū seeds, nīlotpala, sārivā, kṛṣṇasārivā and drugs of jīvanīya group- each 10 gm and śarkarā 80 gm. Ghee 640 gm should be cooked with the above decoction and paste alongwith sugarcane juice 10.24 litre and four times milk.

This ghṛta alleviates innate haemorrhage, chest-wound with wasting, jaundice, vātarakta, halīmaka, oedema, hoarseness of voice, debility, anorexia, dysuria and chest-pain. It should be used by kings having numerous wives, infertile women, weak

persons and also by those who are impotent, with diminished semen and old. It is a good tonic, promotes dhātus particularly semen, immunity, lustre, vitality and life-span. It makes man free from all disorders like a plant well irrigated with water. This kāmadeva ghṛta is well known and can be used in all the seasons. [53-63]

सप्तप्रस्थघृतम्

शतावरीपयोद्राक्षाविदारीक्ष्वामलै रसैः। सर्पिषा सह संयुक्तैः सप्तप्रस्थं पचेद् घृतम्॥ ६४॥
शर्करापादसंयुक्तं रक्तपित्तहरं पिबेत्। उरःक्षते पित्तशूले चोष्णवातेऽप्यसृग्दरे॥
बल्यमूर्जस्करं वृष्यं क्षयहृद्रोगनाशनम्॥ ६५॥

Saptaprastha ghṛta

Ghee one prastha (640 gm) should be cooked with the juice of śatāvarī, drākṣā, vidārī, sugarcane and āmalakī and milk each one prastha (640 ml). Because of having seven prasthas of ingredients, it is known as saptaprastha ghṛta. Sugar one-fourth should be mixed with it. It is useful in innate haemorrhage, chest-wound, pain caused by pitta, uṣṇavāta, menorrhagia, wasting and cardiac disorder and for promoting strength, energy and sexual vigour. [64-65]

खण्डकूष्माण्डकः

कूष्माण्डकात् पलशतं सुस्विन्नं निष्कुलीकृतम्। पचेत् तप्ते घृतप्रस्थे शनैस्ताम्रमये दृढे॥ ६६॥
यदा मधुनिभः पाकस्तदा खण्डशतं न्यसेत्। कूष्माण्डपीडनात् तोयेनाढकेन पुनः पचेत्॥ ६७॥
मुक्तसर्पिर्यदा पश्येत् तदा सिद्धेऽत्र निक्षिपेत्। पिप्पलीशृङ्गबेराभ्यां द्वे पले जीरकस्य च॥ ६८॥
त्वगेलापत्रमरिचधान्यकानां पलार्द्धकम्। न्यस्येच्चूर्णीकृतं तत्र दर्व्या सङ्घट्टयेत् पुनः॥ ६९॥
तत् पक्वं स्थापयेद्भाण्डे दत्त्वा क्षौद्रं घृतार्द्धकम्। तद् यथाऽग्निबलं खादेद् रक्तपित्ती क्षतक्षयी॥ ७०॥
कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः। वृष्यं पुनर्नवकरं बलवर्णप्रसाधनम्॥ ७१॥
उरःसन्धानकरणं बृंहणं स्वरवर्द्धनम्। अश्विभ्यां निर्मितं सिद्धं कूष्माण्डकरसायनम्॥ ७२॥
खण्डामलकमानानुसारात् कूष्माण्डकद्रवात्। पात्रं पाकाय दातव्यं यावान् वाऽत्र रसो भवेत्॥
अत्रापि मुद्रया पाको निस्त्वचं निष्कुलीकृतम्॥ ७३॥

Khaṇḍakūṣmāṇḍaka

Kūṣmāṇḍa is steamed and juice is pressed out and seeds are removed. The pulp is slightly dried in the sun and pounded. This paste 4 kg is cooked mildly with ghee 640 gm in a copper vessel till it acquires honey-like appearance. Then sugar 4 kg along with the above expressed juice of kūṣmāṇḍa should be added to it and again cooked. When ghee comes out and the process is almost completed the following drugs should be added thereto — pippalī, śuṇṭhī and jīraka each 80 gm, tvak, elā, patra, marica and dhānyaka each 20 gm and stirred well with laddle. Now honey should be added half of ghee and the product is kept in a container. It should be used in dose according to digestive power in innate haemorrhage, chest-wound and wasting, cough, dyspnoea, feeling of darkness,

vomiting, thirst and fever. It promotes semen, strength, lustre, body-weight, voice, union of chest-wound and makes younger. This kūṣmāṇḍaka rasāyana is formulated by Aśvins and is unfailing. As in khaṇḍāmalaka, the liquid from kūṣmāṇḍa is given 10.24 litre for cooking or whatever juice is expressed. The sign of the completion of pāka is determined by finger-print and also there should not be any bark or seed. [66-73]

वासाखण्डकूष्माण्डक:

पञ्चाशच्च पलं स्विन्नकूष्माण्डात् प्रस्थमाज्यतः । ग्राह्यं पलशतं खण्डं वासाक्वाथाढके पचेत् ।। ७४ ।।
मुस्ताधात्रीशुभाभार्गीत्रिसुगन्धैश्च कार्षिकैः । ऐलेयविश्वधन्याकमरिचैश्च पलांशिकैः ।। ७५ ।।
पिप्पलीकुडवश्चैव मधुमाणीं प्रदापयेत् । एतच्चूर्णीकृतं तत्र दर्व्या सङ्घट्टयेत् पुनः ।। ७६ ।।
तद् यथाऽग्निबलं खादेद् रक्तपित्ती क्षतक्षयी । वृष्यं पुनर्नवकरं बलवर्णकरञ्च तत् ।। ७७ ।।
कासं श्वासं क्षय हिक्कां रक्तपित्तं हलीमकम् । हृद्रोगमम्लपित्तञ्च पीनसञ्च व्यपोहति ।। ७८ ।।

Vāsākhaṇḍakūṣmāṇḍaka

Steamed kūṣmāṇḍa 2 kg, ghee 640 gm and sugar 4 kg should be cooked in decoction of vāsā 10.24 litre. (when it is almost cooked) the powder of musta, āmalaka, vaṃśalocana, bhārgī, trijāta, dhānyaka and marica each 40 gm, pippali 160 gm along with honey 320 gm should be added thereto and stirred well with laddle. It should be taken according to digestive power. It promotes semen, strength and lustre and makes younger. It alleviates innate haemorrhage, chest-wound and wasting, cough, dyspnoea, consumption, hiccough, halīmaka, cardiac disorder, acid gastritis and chronic coryza. [74-78]

वासाखण्ड:

तुलामादाय वासायाः पचेदष्टगुणे जले । तेन पादावशेषेण पाचयेदाढकं भिषक् ।। ७९ ।।
चूर्णानामभयानाञ्च खण्डाच्छुद्धाच्छतं तथा । द्वे पले पिप्पलीचूर्णात् सिद्धशीते च माक्षिकात् ।। ८० ।।
कुडवं पलमानन्तु चातुर्जातं सुचूर्णितम् । क्षिप्त्वा विलोडितं खादेद् रक्तपित्ती क्षतक्षयी ।।
श्वासकासपरीतश्च यक्ष्मणा च प्रपीडितः ।। ८१ ।।

Vāsākhaṇḍa

Vāsā 4 kg is decocted in eight times water reduced to one-fourth. Now harītakī powder 2.56 kg, sugar 4 kg and pippalī 80 gm are added thereto and cooked. When it is completed and becomes cold, honey 160 gm and caturjāta 40 gm (each) should be mixed with it. It alleviates innate haemorrhage, chest-wound and wasting, dyspnoea, cough and consumption. [79-81]

रक्तपित्तादौ खण्डकाद्यो लौहः

शतावरी छिन्नरुहा वृषो मुण्डतिका बला । तालमूली च गायत्री त्रिफलायास्त्वचस्तथा ।। ८२ ।।
भार्गी पुष्करमूलञ्च पृथक् पञ्च पलानि च । जलद्रोणे विपक्तव्यमष्टभागावशेषितम् ।। ८३ ।।

दिव्यौषधिहतस्यापि माक्षिकेण हतस्य वा। पलद्वादशकं देयं रुक्मलौहस्य चूर्णितम्॥ ८४॥
खण्डतुल्यं घृतं देयं पलषोडशिकं बुधैः। पचेत् ताम्रमये पात्रे गुडपाको यथा मतः॥ ८५॥
प्रस्थार्द्धं मधुनो देयं शुभाऽश्मजतुकत्वचः। शृङ्गी विडङ्गं कृष्णा च शुण्ठ्यजाजी पलं पलम्॥ ८६॥
त्रिफला धान्यकं पत्रं द्व्यक्षं मरिचकेशरम्। चूर्णं दत्त्वा सुमथितं स्निग्धे भाण्डे निधापयेत्॥ ८७॥
यथाकालं प्रयुञ्जीत बिडालपदकं ततः। गव्यक्षीरानुपानञ्च सेव्यं मांसरसं पयः॥ ८८॥
गुरुवृष्यानुपानानि स्निग्धं मांसादि बृंहणम्। रक्तपित्तं क्षयं कासं पक्तिशूलं विशेषतः॥ ८९॥
वातरक्तं प्रमेहञ्च शीतपित्तं वमिं क्रिमीन्। श्वयथुं पाण्डुरोगञ्च कुष्ठं प्लीहोदरं तथा॥ ९०॥
आनाहं रक्तसंस्रावमम्लपित्तं निहन्ति च। आरोग्यपुत्रदं श्रेष्ठं कामाग्निबलवर्धनम्॥ ९१॥
चक्षुष्यं बृंहणं वृष्यं मङ्गल्यं प्रीतिवर्द्धनम्। श्रीकरं लाघवकरं खण्डकाद्यं प्रकीर्तितम्॥ ९२॥
छागं पारावतं मांसं तित्तिरिः क्रकराः शशाः। कुरङ्गाः कृष्णसाराश्च तेषां मांसानि योजयेत्॥ ९३॥
नारिकेलपयःपानं सुनिषण्णकवास्तुकम्। शुष्कमूलकजीराख्यं पटोलं बृहतीफलम्॥ ९४॥
फलं वार्त्ताकु पक्वाम्रं खर्जूरं स्वादु दाडिमम्। ककारपूर्वकं यच्च मांसञ्चानूपसम्भवम्॥ ९५॥
वर्जनीयं विशेषेण खण्डकाद्यं प्रकुर्वता। लोहान्तरवदत्रापि पुटनादिक्रियेष्यते॥ ९६॥

Khaṇḍakādya lauha

Śatāvarī, guḍūcī, vāsā, muṇḍī, balā, tālamūlī (kṛṣṇa muśali), khadira, triphalā (decorticated), bhārgi and puṣkaramūla— each 200 gm are decocted in water 10.24 litre reduced to one-eighth. Now lauhabhasma killed with divyauṣadhi (manaḥśilā) or svarṇamākṣika 480 gm, sugar 480 gm and ghee 640 gm are added thereto and the whole is cooked in a copper vessel according to the method of guḍapāka. After it is completed, honey 320 gm should be added and also the following drugs well powdered- vaṃśalocana, śilājatu, tvak, karkaṭaśṛṅgī, viḍaṅga, pippalī, śuṇṭhī and jīraka each 40 gm, triphalā, dhānyaka, patra, marica and nāgakeśara each 20 gm. After stirring and mixing well it should be kept in an uncted container. It should be taken in dose of 10 gm and proper time with cow milk and taking meat-soup, milk, heavy, unctuous, aphrodisiac and weight-promoting food and drink.

It alleviates innate haemorrhage, wasting, cough, pain during digestion, vātarakta, prameha, urticaria, vomiting, worms, oedema, anaemia, kuṣṭha, splenomegaly, hardness in bowels, haemorrhage and acid gastritis. This khaṇḍakādya provides health, progeny and pleasure and promotes vision, body-weight, semen, sexual vigour, digestion and strength.

During its use meat of goat, pigeon, partridges, hare and antelopes and coconut water are useful. Among vegetables, suniṣaṇṇaka, vāstūka, dried radish, jīrakhya, paṭola and fruits of bṛhatī and vārtāka and among fruits ripe mango, dates and sweet pomegranates are wholesome. The items beginning with 'ka' (kāravellaka etc.) and meat of aquatic and marshy animals are particularly to be avoided during the use of khaṇḍakādya. Here puṭa etc are given as in other lauhas. [82-96]

रक्तपित्ते पथ्यम्

यच्च पित्तज्वरे प्रोक्तं बहिरन्तश्च भेषजम्। रक्तपित्ते हितं तच्च क्षीणक्षतहितश्च यत्॥ ९७॥

The measure, external as well as internal, as described in the contexts of pittaja fever and kṣatakṣīṇa (chest-wound and wasting) are also useful in innate haemorrhage. [97]

॥ इति रक्तपित्तचिकित्सा ॥ ९ ॥

Thus ends treatment of raktapitta. [9]

१०. दशमोऽध्यायः

CHAPTER X

यक्ष्म - चिकित्सा

Treatment of Yakṣmā (consumption)

राजयक्ष्मणि पथ्यम्

शालिषष्टिकगोधूमयवमुद्गादयः शुभाः। मद्यानि जाङ्गलाः पक्षिमृगाः शस्ता विशुष्यताम्॥ १॥
शुष्यतां क्षीणमांसानां कल्पितानि विधानवित्। दद्यात् क्रव्यादमांसानि बृंहणानि विशेषतः॥ २॥

For those suffering from consumption śāli, ṣaṣṭika, wheat, barley, green gram etc. wine and meat of wild animals are wholesome in diet. They should be given particularly the meat of carnivorous animals which promote body-weight prepared properly in case of emaciation. [1-2]

क्रियाक्रमः

दोषाधिकानां वमनं शस्यते सविरेचनम्। स्नेहस्वेदोपपन्नानां सस्नेहं यन्न कर्शनम्॥ ३॥
शुद्धकोष्ठस्य युञ्जीत विधिं बृंहणदीपनम्॥ ४॥
शुक्रायत्तं बलं पुंसां मलायत्तं हि जीवितम्। तस्माद् यत्नेन संरक्षेद् यक्ष्मिणो मलरेतसी॥ ५॥

In cases where there is profuse morbidity, unctuous emesis and purgation should be given preceded by unction and sudation which may not deplete dhātus. [3]

After the belly is evacuated properly, weight-promoting and appetising measures should be prescribed. [4]

In men, strength depends on semen and life on excreta hence semen and excreta should be carefully protected in the patient of consumption. [5]

षडङ्गयूषः

सपिप्पलीकं सयवं सकुलत्थं सनागरम्। दाडिमामलकोपेतं स्निग्धमाजरसं पिबेत्॥ ६॥
तेन षड् विनिवर्त्तन्ते विकाराः पीनसादयः। रसे द्रव्याम्बु पेयावत् सूदशास्त्रवशादिह॥ ७॥

One should take goat's meat-soup unctuous and processed with pippalī, barley, horsegram, śuṇṭhī, pomegranate and āmalakī. By this the six disorders, chronic coryza etc., are alleviated. In meat-soup drugs and water are given (in the quantity) as in liquid gruel according to the method of sūdaśāstra (Science of cooking). [6-7]

पलानि द्वादश प्रस्थे घनेऽथ तनुके तु षट्। मांसस्य वटकं कुर्य्यात् पलमच्छतरे रसे॥ ८॥

If thick, thin and clear soup is desired in 640 ml liquid 480, 240 and 40 gm meat should be given respectively. [8]

त्रयोदशाङ्गः

धन्याकपिप्पलीविश्वदशमूलीजलं पिबेत्। पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥ ९ ॥

Trayodaśāṅga

Water (decocted) of dhānyaka, pippalī, śuṇṭhī and daśamūla should be taken to alleviate chest-pain, fever, dyspnoea, chronic coryza etc. [9]

अश्वगन्धादिः

अश्वगन्धाऽमृताभीरुदशमूलीबलावृषाः। पुष्करातिविषे घ्नन्ति क्षयं क्षीररसाशिनः ॥ १० ॥

Aśvagandhādi

Aśvagandhā, guḍūcī, śatāvarī, daśamūla, balā, vāsā, puṣkaramūla and ativiṣā (in decoction form) destroy wasting, (during the treatment) the patient is kept on the diet of milk and meat soup. [10]

दशमूलादिः

दशमूलबलारास्नापुष्करसुरदारुनागरैः क्वथितम्। पेयं पार्श्वांसशिरोरुक्क्षयकासादिशान्तये सलिलम् ॥

Daśamūlādi

Decoction of daśamūla, balā, rāsnā, puṣkaramūla, devadāru and śuṇṭhī is taken in case of pain in sides, shoulder and head, wasting, cough etc. [11]

ककुभादिमोदकः

ककुभत्वङ्नागबलावानरिबीजानि चूर्णितं पयसि। पक्वं मधुघृतयुक्तं ससितं यक्ष्मादिकासहरम् ॥

Kakubhādi modaka

Kakubha (arjuna) bark, nāgabalā, kapikacchū seeds — all powdered are fried with ghee and cooked in milk with sugar. When it becomes cold, honey is added. It alleviates consumption, cough etc. [12]

मांसचूर्णप्रयोगः

पारावतकपिच्छागकुरङ्गाणां पृथक् पृथक्। मांसचूर्णमजाक्षीरं पीतं यक्ष्महरं परम् ॥ १३ ॥

The meat-powder of pigeon, monkey, goat and deer separately taken with goat milk is a good remedy for consumption. [13]

नागबलादियोगौ

घृतकुसुमसारलीढं क्षयं क्षयं नयति गजबलामूलम्। दुग्धेन केवलेन तु वायसजङ्घा निपीतैव ॥ १४ ॥

The nāgabala root (powder) taken with ghee and honey removes wasting similarly acts kākajaṅghā taken with milk only. [14]

कृष्णाद्यश्वगन्धादिलेहौ

कृष्णाद्राक्षासितालेहः क्षयहा क्षौद्रतैलवान्। मधुसर्पिर्युतो वाऽश्वगन्धाकृष्णासितोद्भवः ॥ १५ ॥

Kṛṣṇādi and Aśvagandhādi leha

The linctus of (1) pippalī, drākṣā and sugar mixed with honey and oil or (2) aśvagandhā, pippalī and sugar mixed with honey and ghee alleviate wasting. [15]

नवनीतादिप्रयोग:

शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी। क्षीराशी लभते पुष्टिमतुल्ये चाज्यमाक्षिके॥ १६॥

One suffering from wasting regains corpulence by taking butter mixed with sugar and honey or ghee and honey mixed together in unequal quantity. [16]

सितोपलादिलेह:

सितोपलातुगाक्षीरीपिप्पलीबहुलात्वचः। अन्त्यादूर्ध्वं द्विगुणितं लेहयेत् क्षौद्रसर्पिषा॥ १७॥
चूर्णितं प्राशयेदेतच्छ्वासकासक्षयापहम्। सुप्तजिह्वारोचकिनमल्पाग्निं पार्श्वशूलिनम्॥
हस्तपादांसदाहेषु ज्वरे रक्ते तथोर्ध्वगे॥ १८॥

Sitopalādi leha

(Powder of) sitopalā (sugarcandy), vaṃśalocana, pippalī, elā and tvak — doubled from the end regressively should be given to lick with honey and ghee or simply powder (with water or milk). It is indicated for patients of dyspnoea, cough, wasting, loss of gustatory sensation, anorexia, diminished digestion, chest-pain, in condition of burning sensation in head, foot, and shoulders, fever and haemoptysis. [17-18]

लवङ्गाद्यं चूर्णम्

लवङ्गकक्कोलमुशीरचन्दनं नतं सनीलोत्पलजीरकं समम्।
त्रुटिः सकृष्णागुरुभृङ्गकेशरं कणा सविश्वा नलदं सहाम्बुदम्॥ १९॥
अहीन्द्रजातीफलवंशलोचनाः सिताष्टभागं समसूक्ष्मचूर्णितम्।
सुरोचनं तर्पणमग्निदीपनं बलप्रदं वृष्यतमं त्रिदोषजित्॥ २०॥
उरोविबन्धं तमकं गलग्रहं सकासहिक्काऽरुचियक्ष्मपीनसम्।
ग्रहण्यतीसारभगन्दरार्बुदप्रमेहगुल्मांश्च निहन्ति सज्वरान्॥ २१॥

Lavaṅgādya cūrṇa

Lavaṅga, kakkola, uśīra, candana, tagara, nīlotpala, jīraka, elā, aguru, tvak, nāgakeśara, pippalī, śuṇṭhī, jaṭāmāṃsī, mustaka, anantamūla, jātīphala, vaṃśalocana – all in equal parts and sugar eight parts should be powdered finely and mixed together. It promotes relish, contentment, digestive power, strength and sexual vigour and pacifies all the three doṣas. It alleviates obstruction in chest, bronchial asthma, obstruction in throat, cough, hiccough, anorexia, consumption, chronic coryza, grahaṇī disorder, diarrhoea, fistula-in-ano, arbuda, prameha, gulma and fever. [19-21]

तालीशाद्यं चूर्णं मोदकश्च

तालीशपत्रं मरिचं नागरं पिप्पली शुभा। यथोत्तरं भागवृद्ध्या त्वगेले चार्द्धभागिके॥ २२॥
पिप्पल्यष्टगुणा चात्र प्रदेया सितशर्करा। श्वासकासारुचिहरं तच्चूर्णं दीपनं परम्॥ २३॥
हृत्पाण्डुग्रहणीरोगप्लीहशोषज्वरापहम्। छर्द्यतीसारशूलघ्नं मूढवातानुलोमनम्॥ २४॥
कल्पयेद् गुडिकाश्चैतच्चूर्णं पक्त्वा सितोपलाम्। गुडिका ह्यग्निसंयोगाच्चूर्णाल्लघुतराः स्मृताः॥
पैत्तिके ग्राहयन्त्येके शुभया वंशलोचनाम्॥ २५॥

Tālīśādya cūrṇa and modaka

Tālīśapatra, marica, śuṇṭhī and pippalī successively increased in parts, tvak and elā one-half parts and sugar eight times of pippalī— all are powdered and mixed together. This powder is a good appetiser and alleviates asthma, cough, anorexia, cardiac distress, anaemia, grahaṇī disorder, splenomegaly, consumption, fever, vomiting, diarrhoea and abdominal pain. It also normalises the course of abdominal wind.

One may also make it in pill form by cooking the powder with sugar which is regarded as lighter than the latter because of the contact with fire.

In paittika condition, some take vaṃśalocana by 'śubhā' (in this formulation). [22-25]

शृङ्ग्यर्जुनाद्यचूर्णम्

शृङ्ग्यर्जुनाश्वगन्धानागबलापुष्कराभयाच्छिन्नरुहाः। तालीशादिसमेता लेह्या मधुसर्पिर्भ्यां यक्ष्महराः॥

Śṛṅgyarjunādya cūrṇa

Śṛṅgī (karkaṭaśṛṅgī), arjuna, aśvagandhā, nāgabalā, puṣkaramūla, harītakī and guḍūcī combined with the tāliśādi drugs should be taken with honey and ghee to alleviate consumption. [26]

ताप्यादिलौहम्

मधुताप्यविडङ्गाश्मजतुलौहघृताभयाः। घ्नन्ति यक्ष्माणमत्युग्रं सेव्यमाना हिताशिना॥ २७॥

Tāpyādi lauha

Honey, svarṇamākṣika, viḍaṅga, śilājatu, lauhabhasma, ghṛta and harītakī — This taken regularly while keeping on wholesome diet alleviates severe consumption. [27]

विन्ध्यवासियोगः

व्योषं शतावरी त्रीणि फलानि द्वे बले तथा। सर्वामयहरो योगः सोऽयं लौहरजोऽन्वितः॥ २८॥
एष वक्षःक्षतं हन्ति कण्ठजांश्च गदांस्तथा। राजयक्ष्माणमत्युग्रं बाहुस्तम्भमथार्दितम्॥ २९॥

Vindhyavāsiyoga

Trikaṭu, śatāvarī, triphalā and two types of balā are mixed with (equal) lauhabhasma. This formulation destroys all diseases particularly chest-wound, throat disorders, severe consumption, stiffness of arms and facial paralysis. [28-29]

रसेन्द्रगुडिका

कर्षं शुद्धं रसेन्द्रस्य स्वरसेन जयाऽऽर्द्रयोः। शिलायां खल्लयेत् तावत् यावत् पिण्डं घनं ततः ॥ ३० ॥
जलकर्णाकाकमाचीरसाभ्यां भावयेत् पुनः। सौगन्धिकपलं भृङ्गस्वरसेन विभावितम् ॥ ३१ ॥
चूर्णितं रससंयुक्तमजाक्षीरपलद्वये। खल्लितं घनपिण्डन्तु गुडीं स्विन्नकलायवत् ॥ ३२ ॥
कृत्वाऽऽदौ शिवमभ्यर्च्य द्विजातीन् परितोष्य च। जीर्णान्नो भक्षयेदेकां क्षीरमांसरसाशनः ॥ ३३ ॥
सर्वरूपं क्षयं श्वासं रक्तपित्तमरोचकम्। अपि वैद्यशतैस्त्यक्तमम्लपित्तं नियच्छति ॥ ३४ ॥

Rasendragudikā

Purified mercury 10 gm should be rubbed with the juice of jayantī and fresh ginger till it becomes a solid mass. Then it should be impregnated with the juice of jalakarṇā (musta) and kākamācī. Purified sulphur 40 gm impregnated with the juice of bhṛṅgarāja and powdered should be mixed with (the above) mercury and rubbed alongwith goat milk 80 ml till it becomes solid. Now pills of the size of steamed peas should be made. Having worshipped Lord Śiva and made brāhmaṇas well satisfied one should take one such pill, after the food is digested, keeping on the diet of milk and meat-soup. It alleviates wasting having all symptoms, dyspnoea, innate haemorrhage, anorexia and acid gastritis even rejected by scores of physicians. [30-34]

एलादिमन्थः

एलाऽजमोदामलकाभयाक्षगायत्रिनिम्बासनशालसारान्।
विडङ्गभल्लातकचित्रकांश्च कटुत्रिकाम्भोदसुराष्ट्रिकाश्च ॥ ३५ ॥
पक्त्वा जले तेन पचेत्तु सर्पिस्तस्मिन् सुसिद्धे त्ववतारिते च।
त्रिंशत्पलान्यत्र सितोपलाया दद्यात् तुगाक्षीरिपलानि षट् च ॥ ३६ ॥
प्रस्थे घृतस्य द्विगुणञ्च दद्यात् क्षौद्रं ततो मन्थहतं निदध्यात्।
पलं पलं प्रातरतो लिहेच्च पश्चात् पिबेत् क्षीरमतन्द्रितश्च ॥ ३७ ॥
एतद्धि मेध्यं परमं पवित्रं चक्षुष्यमायुष्यतमं तथैव।
यक्ष्माणमाशु व्यपहन्ति शूलं पाण्ड्वामयञ्चापि भगन्दरञ्च ॥ ३८ ॥
न चात्र किञ्चित् परिवर्जनीयं रसायनञ्चैतदुपास्यमानम् ॥ ३९ ॥

Elādi mantha

Elā, ajamodā, āmalaka, harītakī, bibhītaka, heart-wood of khadira, nimba, bījaka and śāla, viḍaṅga, bhallātaka, citraka, trikaṭu, musta and fuller's earth should be decocted with water, with this decoction ghee should be cooked, when it is completed and kept down sugarcandy 1 kg 200 gm, vaṃśalocana 240 gm and in 640 gm ghee double honey should be mixed and then churned with stick and kept in container. 40 gm from this should be taken in morning followed by intake of milk. It is an excellent promoter of intellect, purity, vision and life-span and alleviates consumption, abdominal pain, anaemia and fistula-in-ano. There is no restriction of any kind during its use. [35-39]

सर्पिर्गुडः

बला विदारी ह्रस्वा च पञ्चमूली पुनर्नवा। पञ्चानां क्षीरिवृक्षाणां शुङ्गा मुष्ट्यंशिकाः पृथक् ॥ ४० ॥
एषां कषाये द्विक्षीरे विदार्याजरसांशिके। जीवनीयैः पचेत् कल्कैरक्षमात्रैर्घृताढकम् ॥ ४१ ॥
सितोपलानि पूते च शीते द्वात्रिंशदावपेत्। गोधूमपिप्पलीवांशीचूर्णं शृङ्गाटकस्य च ॥ ४२ ॥
समाक्षिकं कौडविकं तत्सर्वं खजमूर्च्छितम्। स्त्यानं सर्पिर्गुडान् कृत्वा भूर्जपत्रेण वेष्टयेत् ॥ ४३ ॥
ताञ्जग्ध्वा पलिकान् क्षीरं मद्यञ्चानुपिबेत् कफे। शोषे कासे क्षतक्षीणे श्रमस्त्रीभारकर्शिते ॥ ४४ ॥
रक्तनिष्ठीवने तापे पीनसे चोरसि स्थिते। शस्ताः पार्श्वशिरःशूले भेदे च स्वरवर्णयोः ॥ ४५ ॥
क्वाथ्ये त्रयोदशपले द्रव्याल्पत्वभयाज्जलम्। अष्टगुणं क्वाथसमौ विदार्याजरसौ पृथक् ॥
केचिद् यथोक्तक्वाथ्ये तु क्वाथं घृतसमं जगुः ॥ ४६ ॥

Sarpirguḍa

Balā, vidārī, laghu pañcamūla, punarnavā and leaf-buds of five laticiferous plants-each 40 gm should be decocted (in water). Ghee 2.56 kg should be cooked with this decoction alongwith double milk, vidārī juice and goat's meat-soup and with the paste of jīvanīya drugs each 10 gm. When it is completed and cooked sugar 1.28 kg, wheat flour, pippalī, vaṃśalocana, śṛṅgāṭaka and honey each 160 gm should be added thereto and churned with a stick. When it is solidified boluses may be made and wrapped with bhūrjapatra. It should be taken in the dose of 40 gm followed by intake of milk but that of wine in (predominance of) kapha. It is prescribed in consumption, cough, chest-wound and wasting, emaciation caused by exertion, sex and load-carrying, haemoptysis, high temperature, chronic corzya affecting chest, pain in chest and head and hoarsness of voice and loss of lustre.

As the decoctive drugs are 13 palas (520 gm), because of the small quantity of material, water is given eight times and the juice of vidārī and meat soup of goat each equal to decoction. However, some take decoction, in spite of the same quantity of decoctives, equal to ghee. [40-46]

च्यवनप्राशः

बिल्वाग्निमन्थश्योनाककाश्मर्य्यः पाटला बला।
पर्ण्यश्चतस्रः पिप्पल्यः श्वदंष्ट्रा बृहतीद्वयम् ॥ ४७ ॥
शृङ्गी तामलकी द्राक्षा जीवन्ती पुष्करागुरू। अभया सामृता ऋद्धिर्जीवकर्षभकौ शटी ॥ ४८ ॥
मुस्तं पुनर्नवा मेदे सूक्ष्मैलोत्पलचन्दने। विदारी वृषमूलानि काकोली काकनासिका ॥ ४९ ॥
एषां पलोन्मितान् भागाञ्छतान्यामलकस्य च। पञ्च दद्यात् तदैकध्यं जलद्रोणे विपाचयेत् ॥ ५० ॥
ज्ञात्वा गतरसान्येतान्यौषधान्यथ तं रसम्। तच्चामलकमुद्धृत्य निष्कुलं तैलसर्पिषोः ॥ ५१ ॥
पलद्वादशके भृष्ट्वा दत्त्वा चार्द्धतुलां भिषक्।
मत्स्यण्डिकायाः पूताया लेहवत् साधु साधयेत् ॥ ५२ ॥
षट्पलं मधुनश्चात्र सिद्धशीते प्रदापयेत्। चतुष्पलं तुगाक्षीर्य्याः पिप्पल्या द्विपलं तथा ॥ ५३ ॥

पलमेकं निदध्याच्च त्वगेलापत्रकेशरात्। इत्ययं च्यवनप्राशः परमुक्तो रसायनः॥ ५४॥
कासश्वासहरश्चैव विशेषेणोपदिश्यते। क्षीणक्षतानां वृद्धानां बालानाञ्चाङ्गवर्द्धनम्॥ ५५॥
स्वरक्षयमुरोरोगं हृद्रोगं वातशोणितम्। पिपासां मूत्रशुक्रस्थान् दोषांश्चैवापकर्षति॥ ५६॥
अस्य मात्रां प्रयुञ्जीत योपरुन्ध्यान्न भोजनम्। अस्य प्रयोगाच्च्यवनः सुवृद्धोऽभूत् पुनर्युवा॥ ५७॥
मेधां स्मृतिं कान्तिमनामयत्वं वपुःप्रकर्षं बलमिन्द्रियाणाम्।
स्त्रीषु प्रहर्षं परमग्निवृद्धिं वर्णप्रसादं पवनानुलोम्यम्॥ ५८॥
रसायनस्यास्य नरः प्रयोगाल्लभेत जीर्णोऽपि कुटीप्रवेशात्।
जराकृतं पूर्वमपास्य रूपं विभर्ति रूपं नवयौवनस्य॥ ५९॥
सिता मत्स्यण्डिकालाभे धात्र्याश्च मृदु भर्जनम्। चतुर्भागजले प्रायो द्रव्यं गतरसं भवेत्॥ ६०॥

Cyavanaprāśa

Bilva, agnimantha, śyonāka, gambhārī, pāṭalā, balā, the four leaved herbs (śālaparṇī, pṛśniparṇī, mudgaparṇī and māṣaparṇī), pippalī, gokṣura, bṛhatī, kaṇṭakārī, karkaṭaśṛṅgī, bhūmyāmalakī, drākṣā, jivantī, puṣkaramūla, aguru, harītakī, guḍūcī, ṛddhi, jīvaka, ṛṣabhaka, śaṭī, musta, punarnavā, medā, elā, nīlotpala, candana, vidārī, vāsā root, kākolī and kākanāsā each 40 gm, along with five hundred āmalaka fruits should be boiled in water 10.24 litre till they are fully extracted. Then the āmalaka fruits should be taken out, decorticated, (made into paste) and fried in oil and ghee (mixed) 480 gm. Then this along with the above decoction added with sugarcandy 2 kg. should be cooked till it becomes linctus. When it is cooled, honey 240 gm, vaṃśalocana 160 gm, pippalī 80 gm and tvak, elā, patra and nāgakeśara (mixed) 40 gm should be added. This is known as Cyavanaprāśa which is an excellent rasāyana and is specifically indicated in cough, dyspnoea, wasting, chest-wound and to promote the growth of children. It alleviates loss of voice, chest diseases, cardiac disorders, vātarakta, thirst and disorders of urine and semen. It should be taken in the dose which may not hamper (digestion and appetite of) food. The extremely old Cyavana was rejuvenated by its use. One attains intellect, memory, lustre, freedom from ailments, physical development, strength in sense organs, sexual pleasure, digestive power, clarity of complexion, normalisation of the course of vāyu by the use of this raśayana. Even old man, by its use indoor, gets rid of seniity and acquires fresh youthfulness.

In absence of sugarcandy, sugar may be given, āmalaka fruits should be fried mildly and the drugs generally are extracted in four times water. [47-60]

जीवन्त्याद्यं घृतम्

जीवन्तीं मधुकं द्राक्षां फलानि कुटजस्य च। शटीं पुष्करमूलञ्च व्याघ्रीं गोक्षुरकं बलाम्॥ ६१॥
नीलोत्पलं तामलकीं त्रायमाणां दुरालभाम्। पिप्पलीञ्च समं पिष्ट्वा घृतं वैद्यो विपाचयेत्॥ ६२॥
एतद्व्याधिसमूहस्य रोगेशस्य समुत्थितम्। रूपमेकादशविधं सर्पिरग्र्यं व्यपोहति॥ ६३॥

Jīvantyādya ghṛta

Jīvantī, madhuka, drākṣā, indrayava, śaṭī, puṣkaramūla, kaṇṭakārī, gokṣura, balā, nīlotpala, bhūmyāmalakī, trāyamāṇā, durālabhā and pippalī all in equal quantity – with the paste of these ghee should be cooked (along with four times water).

This excellent ghṛta alleviates all the eleven forms of the king of diseases (consumption) having a lot of symptoms. [61-63]

पिप्पलीघृतम्

पिप्पलीगुडसंसिद्धं छागक्षीरयुतं घृतम्। एतदग्निप्रवृद्ध्यर्थं सर्पिश्च क्षयकासिनाम्॥ ६४॥

Pippalīghṛta

Ghṛta prepared with (the paste of) pippalī and jaggery along with (four times) goat-milk is used to promote digestive fire in those suffering from wasting and cough. [64]

पाराशरघृतम्

यष्टीबलागुडूच्यल्पपञ्चमूलीतुलां पचेत्। शूर्पेऽपामष्टभागस्थे तत्र पात्रं पचेद् घृतम्॥ ६५॥
धात्रीविदारीक्षुरसे त्रिपात्रे पयसोऽर्मणे। सुपिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम्।
ससैन्यं राजयक्ष्माणमुन्मूलयति शीलितम्॥ ६६॥

Pārāśaraghṛta

Madhuyaṣṭī, balā, guḍūcī and laghu pañcamula jointly 4 kg are boiled in water 20.48 litre reduced to one-fourth. With this decoction ghee 2.56 kg is cooked alongwith juice of āmalaka, vidārī, and sugarcane each 2.56 litre and milk 10.24 litre adding the paste of jīvaniya drugs. This pārāśara ghṛta used regularly eradicates consumption with its retinues. [65-66]

छागलाद्यं घृतम्

छागमांसतुलां गृह्य साधयेन्नल्वणेऽम्भसि। पादशेषेण तेनैव सर्पिःप्रस्थं विपाचयेत्॥ ६७॥
ऋद्धिवृद्धी च मेदे द्वे जीवकर्षभकौ तथा।
काकोलीक्षीरकाकोलीकल्कैः पृथक् पलोन्मितैः॥ ६८॥
सम्यक् सिद्धे चावतार्य्य शीते तस्मिन् प्रदापयेत्। शर्करायाः पलान्यष्टौ मधुनः कुडवं क्षिपेत्॥ ६९॥
पलं पलं पिबेत् प्रातर्यक्ष्माणं हन्ति दुर्जयम्। क्षतक्षयञ्च कासञ्च पार्श्वशूलमरोचकम्॥ ७०॥
स्वरक्षयमुरोरोगं श्वासं हन्यात् सुदारुणम्। बल्यं मांसकरं वृष्यमग्निसन्दीपनं परम्॥ ७१॥

Chāgalādya ghṛta I

Goat's meat 4 kg is cooked in water 10.24 litre reduced to one-fourth. With this ghee 640 gm is cooked along with the paste of ṛddhi, vṛddhi, medā, mahāmedā, jivaka, ṛṣabhaka, kākolī and kṣīrakākolī each 40 gm. When it is completed it is kept down and after cooling sugar 320 gm and honey 160 gm are added thereto. It should be taken in the dose of 40 gm in morning. It alleviates even severe consumption, chest-wound

and wasting, cough, chest pain, anorexia, loss of voice, chest diseases and severe dyspnoea. It is an excellent promoter of strength, muscles, semen and digestive fire. [67-71]

अपरं छागलाद्यं घृतम्

तोयद्रोणद्वितये छागलमांसस्य पलशतं पक्त्वा। जलमष्टांशं सुकृतं तस्मिन् विपचेद् घृतं प्रस्थम्॥ ७२॥
कल्केन जीवनीयानां कुडवेन तु मांससर्पिरिदम्। पित्तानिलं निहन्यात् तज्जानपि रसकयोजितं पीतम्॥ ७३॥
कासश्वासावुग्रौ यक्ष्माणं पार्श्वहृद्रुजां घोराम्। अध्वव्यवायशोषं शमयति चैवापरं किञ्चित्॥ ७४॥

Chāgalādya ghṛta II

Goat's meat 4 kg is cooked in water 20.48 litre reduced to one-eighth. With this ghee 640 gm is cooked along with the paste of jīvanīya drugs mixed 160 gm. This māmsasarpi (ghee prepared with meat) used regularly with the diet of meat-soup pacifies pitta and vāta and disorders caused by them. It alleviates cough, dyspnoea, even severe consumption, pain in chest and cardic region and wasting caused by wayfaring, sexual intercourse etc. [72-74]

अजापञ्चकं घृतम्

छागशकृद्रसमूत्रक्षीरैर्दध्ना च साधितं सर्पिः। सक्षारं यक्ष्महरं कासश्वासोपशान्तये परमम्॥ ७५॥

Ajāpañcaka ghṛta

Ghṛta processed with goat's dung, juice, urine, milk and curd mixed with yavakṣāra is an excellent remedy for consumption, cough and dyspnoea. [75]

बलागर्भं घृतम्

द्विपञ्चमूलस्य पचेत् कषाये प्रस्थद्वये मांसरसस्य चैके।
कल्कं बलायाः सुनियोज्य गर्भं सिद्धं पयःप्रस्थयुतं घृतञ्च॥
सर्वाभिघातोत्थितयक्ष्मशूलक्षतक्षयोत्कासहरं प्रदिष्टम्॥ ७६॥

Balāgarbha ghṛta

Ghee cooked with decoction of daśamūla 1.28 litre, meat soup 640 ml and milk 640 ml along with the paste of balā alleviates consumption due to any cause, pain, chest-wound, wasting and cough. [76]

नागबलाघृतम्

पादशेषे जलद्रोणे पचेन्नागबलातुलाम्। तेन क्वाथेन तुल्यांशं घृतं क्षीरञ्च साधयेत्॥ ७७॥
पलार्द्धिकैश्चातिबलाबलायष्टिपुनर्नवा-। प्रपौण्डरीककाश्मर्य्यप्रियालकपिकच्छुभिः॥ ७८॥
अश्वगन्धासिताभीरुमेदायुग्मत्रिकण्टकैः। मृणालबिसशालूकशृङ्गाटककशेरुकैः॥ ७९॥
एतन्नागबलासर्पी रक्तपित्तक्षतक्षयम्। हन्ति दाहं भ्रमं तृष्णां बलपुष्टिकरं परम्॥ ८०॥
बल्यमोजस्यमायुष्यं वलीपलितनाशनम्। उपयुञ्जीत षण्मासान् वृद्धोऽपि तरुणायते॥ ८१॥

Nāgabalā-ghṛta

Nāgabalā 4 kg is boiled in water 10.24 litre reduced to one-fourth. With this decoction ghee should be cooked with equal milk and the paste of the following drugs– atibalā, balā, madhuka, punarnavā, prapauṇḍarīka, gambhārī, piyāla, kapikacchū, aśvagandhā, śarkarā, śatāvarī, medā, mahāmedā, gokṣura; lotus stalk, stem and root; śṛṅgāṭaka and kaśeruka each 20 gm. This nāgabalā-ghṛta alleviates innate haemorrhage, chest-wound or wasting, burning sensation, giddiness and thirst. It destroys wrinkles and greying of hairs and promotes strength, texture, immunity and life-span and by taking it regularly for six months even old becomes young. [77-81]

निर्गुण्डीघृतम्

समूलफलपत्राया निर्गुण्डचाः स्वरसैर्घृतम्। सिद्धं पीत्वा क्षतक्षीणो निर्व्याधिर्भाति देववत्॥ ८२॥

Nirguṇḍī-ghṛta

One suffering from chest-wound and wasting is relieved of the disease by taking ghṛta cooked with nirguṇḍī (root, fruit and leaves). [82]

बलाद्यं घृतम्

बलां श्वदंष्ट्रां बृहतीं कलसीं धावनीं स्थिराम्। निम्बं पर्पटकं मुस्तं त्रायमाणां दुरालभाम्॥ ८३॥
कृत्वा कषायं पेष्यार्थं दद्यात् तामलकीं शटीम्। द्राक्षां पुष्करमूलञ्च मेदामामलकानि च॥ ८४॥
घृतं पयश्च तत्सिद्धं सर्पिर्ज्वरहरं परम्। क्षयकासप्रशमनं शिरःपार्श्वरुजाऽपहम्॥ ८५॥
चरकोदितवासाऽऽद्यघृतानन्तरमुक्तितः। वदन्तीह घृतात् क्वाथं पयश्च द्विगुणं पृथक्॥ ८६॥

Balādya ghṛta

Balā, gokṣura, bṛhatī, pṛśniparṇī, kaṇṭakārī, śālaparṇī, nimba, parpaṭa, musta, trāyamāṇā, durālabhā – these should be decocted and for the paste the following drugs should be taken– bhūmyāmalakī, śaṭī, drākṣā, puṣkaramūla, medā and āmalaka. With these ghee should be cooked. It is an excellent remedy for fever, wasting, cough, headache and chest-pain. As it is described after vāsādyaghrta of Caraka, decoction and milk each should be taken double the ghee. [83-86]

चन्दनाद्यं तैलम्

चन्दनाम्बु नखं वाप्यं यष्टीशैलेयपद्मकम्। मञ्जिष्ठा सरलं दारु शटयेला पूति केशरम्॥ ८७॥
पत्रं तैलं मुरा मांसी कक्कोलं वनिताऽम्बुदम्। हरिद्रे शारिवे तिक्ता लवङ्गागुरुकुङ्कमम्॥ ८८॥
त्वग्रेणु नलिका चैभिस्तैलं मस्तुचतुर्गुणम्। लाक्षारससमं सिद्धं ग्रहघ्नं बलवर्णकृत्॥ ८९॥
अपस्मारज्वरोन्मादकृत्यालक्ष्मीविनाशनम्। आयुःपुष्टिकरश्चैव वशीकरणमुत्तमम्॥ ९०॥

Candanādya taila

Candana, bālaka, nakha, kuṣṭha, madhuka, śaileya, padmaka, mañjiṣṭhā, sarala, devadāru, śaṭī, elā, pūti (khaṭṭāśī), nāgakeśara, patra, silhaka, murā, māṃsī, kakkola,

priyaṅgu, musta, haridrā, dāruharidrā, sārivā, kṛṣṇasārivā, kaṭukā, lavaṅga, agaru, kuṅkuma, tvak, reṇu and nalikā— with (the paste of) these oil is prepared along with four times curd-water and equal lac-juice. It destroys grahas, improves strength and lustre, provides longevity and compactness, alleviates epilepsy, fever, insanity, witchcraft, inauspiciousness and is a good charming agent. [87-90]

छागसेवा

छागं मांसं पयश्छागं सर्पिः सशर्करम्। छागोपसेवा शयनं छागमध्ये तु यक्ष्मनुत्॥ ९१॥

Use of goat's meat, milk, ghee with sugar, living with goats and sleeping in the midst of them alleviates consumption. [91]

उरःक्षतचिकित्सा

उरो मत्वा क्षतं लाक्षां पयसा मधुसंयुताम्। सद्य एवं पिबेज्जीर्णे पयसाऽद्यात् सशर्करम्॥ ९२॥

If the chest is wounded, lac with honey should be taken followed by (intake of) milk, when the drug is digested the patient should take food with milk and sugar. [92]

इक्ष्वालिकादिक्षीरम्

इक्ष्वालिकाबिसग्रन्थिपद्मकेशरचन्दनैः। शृतं पयो मधुयुतं सन्धानार्थं पिबेत् क्षती॥ ९३॥

One having chest-wound should take for its healing milk processed with ikṣuvālikā, bisagrathi, lotus stamen and candana mixed with honey. [93]

बलादिचूर्णम्

बलाऽश्वगन्धाश्रीपर्णीबहुपुत्रीपुनर्नवाः। पयसा नित्यमभ्यस्ताः क्षपयन्ति क्षतक्षयम्॥ ९४॥

Balādi cūrṇa

(The powder of) balā, aśvagandhā, gambhārī fruit, śatāvarī and punarnavā taken regularly with milk alleviates chest-wound and wasting. [94]

बलाद्यं घृतम्

घृतं बलानागबलाऽर्जुनाम्बुसिद्धं सयष्टीमधुकल्कपादम्।
हृद्रोगशूलक्षतरक्तपित्तकासानिलासृक् शमयत्युदीर्णम्॥ ९५॥

Balādya ghṛta

Ghee cooked with decoction of balā, nāgabalā and arjuna along with one-fourth paste of yaṣṭīmadhu pacifies the aggravated diseases- cardiac disorders, pain, chest-wound, innate haemorrhage, cough and vātarakta. [95]

॥ इति यक्ष्मचिकित्सा॥ १०॥

Thus ends treatment of yakṣmā. [10]

११. एकादशोऽध्याय:

CHAPTER XI

कास - चिकित्सा

Treatment of Kāsa (cough)

वातिककास-चिकित्सा

वास्तुको वायसीशाकं मूलकं सुनिषण्णकम्। स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौडिकाः ॥ १ ॥
दध्यारनालाम्लफलं प्रसन्नापानमेव च। शस्यते वातकासेषु स्वाद्वम्ललवणानि च॥ २॥
ग्राम्यानूपौदकैः शालियवगोधूमषष्टिकान्। रसैर्माषात्मगुप्तानां यूषैर्वा भोजयेद्धितान्॥ ३॥

Vātika kāsa

Vāstuka, vāyasī (kākamācī), mūlaka, sunisaṇṇaka, among fats oil etc.; edibles prepared with milk, sugarcane juice and jaggery; curd, sour gruel and sour fruits, alchoholic drink, sweet, sours and sality items are wholesome in vātika kāsa. The diet of the patient should consist of meat of domestic, marshy and aquatic animals, śāli, ṣaṣṭika, barley, wheat, meat-soups or soups of black gram and kapikacchū (seeds). [1-3]

पञ्चमूलीक्वाथ:

पञ्चमूलीकृतः क्वाथः पिप्पलीचूर्णसंयुतः। रसान्नमश्नतो नित्यं वातकासमुदस्यति॥ ४॥

Decoction of (bṛhat) pañcamūla added with pippalī powder along with the diet of cereals and meat-soup throws the vātika kāsa away. [4]

अपराजितलेह:

शटीशृङ्गीकणाभार्गीगुडवारिदयासकैः। सतैलैर्वातकासघ्नो लेहोऽयमपराजितः॥ ५॥

Aparājita leha

Śaṭī, karkaṭaśṛṅgī, pippalī, bhārgī, musta and yavāsa are mixed with jaggery and oil. This linctus known as 'aparājita' alleviates vātika kāsa. [5]

विश्वादि-चूर्णम् SiSa 16.8

चूर्णिता विश्व-दुःस्पर्शा-शृङ्गी-द्राक्षा-शटी-सिताः। लीढा तैलेन वातोत्थं कासं जयति दारुणम्॥

Viśvādi cūrṇa

The powder of śuṇṭhī, durālabhā, karkaṭaśṛṅgī and śaṭī mixed with drākṣā (paste), sugar and oil is used as linctus. It overcomes even severe cough caused by vāta. [6]

भार्ग्यादि-चूर्णम्

भार्गीद्राक्षाशटीशृङ्गीपिप्पलीविश्वभेषजैः। गुडतैलयुतो लेहो हितो मारुतकासिनाम्॥ ७॥

Bhārgyādi cūrṇa

The linctus of bhārgī, drākṣā, śaṭī, karkataśṛṅgī, pippalī and śuṇṭhī mixed with jaggery and oil is useful for those suffering from vātika kāsa. [7]

पैत्तिककास-चिकित्सा

क्रियाक्रमः

पितकासे तनुकफे त्रिवृतां मधुरैर्युताम्। दद्याद्घनकफे तिक्तैर्विरेकार्थं युतां भिषक्॥ ८॥

Paittika Kāsa

In kāsa caused by pitta trivṛt should be given for purgation added with sweets and bitters in case of thin and thick sputum respectively. [8]

पथ्यम्

मधुरैर्जाङ्गलरसैः श्यामाकयवकोद्रवाः। मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिताः॥ ९॥

The diet should consist of sweet soups of wild animals, śyāmāka, barley and kodo, soups of green gram etc. and bitter vegetables in proper quantity. [9]

बलाऽऽदिः

बलाद्विबृहतीवासाद्राक्षाभिः क्वथितं जलम्। पित्तकासापहं पेयं शर्करामधुयोजितम्॥ १०॥

Balādi

Water decocted with balā, two types of bṛhatī (bṛhatī and kaṇṭakārī), vāsā and drākṣā added with sugar and honey should be used in paittika kāsa. [10]

पञ्चतृणादि क्षीरम्

शरादिपञ्चमूलस्य पिप्पलीद्राक्षयोस्तथा। कषायेण शृतं क्षीरं पिबेत् समधुशर्करम्॥ ११॥

Pañcatṛṇādi kṣīra

Milk processed with the decoction of śarādi pañcamūla (tṛṇa-pañcamūla), pippalī and drākṣā and added with honey and sugar should be taken. [11]

काकोल्यादिसिद्धरसादीनां प्रयोगः

काकोलीबृहतीमेदायुग्मैः सवृषनागरैः। पित्तकासे रसक्षीरयूषांश्चाप्युपकल्पयेत्॥ १२॥

Two types of kākolī, bṛhatī and medā, vāsā and śuṇṭhī should be used for processing of meat-soup, milk and vegetable soups in paittika kāsa. [12]

द्राक्षादिलेह:

द्राक्षामलकखर्जूरं पिप्पलीमरिचान्वितम्। पित्तकासापहं ह्येतल्लिह्यान्माक्षिकसर्पिषा॥ १३॥

Drākṣādi leha

The linctus made of drākṣā, āmalaka, kharjūra, pippalī and marica added with honey and ghee should be taken to alleviate cough caused by pitta. [13]

खर्जूरादिलेह:

खर्जूरपिप्पलीद्राक्षासितालाजा: समांशिका:। मधुसर्पिर्युतो लेह: पित्तकासहर: पर:॥ १४॥

Kharjūrādi leha

Kharjūra, pippalī, drākṣā, parched paddy and sugar – all in equal parts are mixed with honey and ghee. This linctus is an excellent remedy for paittika kāsa. [14]

शट्यादि:

शटीह्रीबेरबृहतीशर्कराविश्वभेषजम्। पिष्ट्वा रसं पिबेत् पूतं सघृतं पित्तकासनुत्॥ १५॥

Śaṭyādi

Śaṭī, haridrā, bṛhatī, śarkarā and śuṇṭhī – they are pounded and the juice is strained. It is added with ghee and is taken to alleviate paittika kāsa. [15]

पद्मबीजचूर्णम्

मधुना पद्मबीजानां चूर्णं पैत्तिककासनुत्॥ १६॥

The powder of lotus seeds mixed with honey alleviates cough caused by pitta. [16]

कफजकास-चिकित्सा

क्रियाक्रम:

बलिनं वमनेनादौ शोधितं कफकासिनाम्। यवान्नै: कटुरूक्षोष्णै: कफघ्नैश्चाप्युपाचरेत्॥ १७॥
पिप्पलीक्षारकैर्यूषै: कौलत्थैर्मूलकस्य च। लघून्यन्नानि भुञ्जीत रसैर्वा कटुकान्वितै:॥ १८॥

Kaphaja kāsa

At first, the patient of kaphaja kāsa, if strong, should be evacuated with emesis and then managed with edibles made of barley, pungent, rough and hot substances and other kapha- decreasing items. [17]

The diet should consist of light cereals with soups of kulattha and radish processed with pippalī and yavakṣāra or meat-soups processed with pungents. [18]

पञ्चकोलक्षीरम्

पञ्चकोलै: शृतं क्षीरं कफघ्नं लघु शस्यते। श्वासकासज्वरहरं बलवर्णाग्निवर्द्धनम्॥ १९॥

Pañcakolakṣīra

Milk processed with pañcakola is light, kapha-decreasing, alleviates dyspnoea, cough and fever and promotes strength, lustre and digestion. [19]

पौष्करादि:

पौष्करकट्फलभार्गीविश्वपिप्पलीसाधितम्। पिबेत् क्राथं कफोद्रेके कासे श्वासे च हृद्ग्रहे॥ २०॥

Pauṣkarādi

The decoction of puṣkaramūla, kaṭphala, bhārgī, śuṇṭhī and pippalī is useful in aggravation of kapha, cough, dyspnoea and cardiac distress. [20]

आर्द्रकस्वरस:

स्वरसं शृङ्गबेरस्य माक्षिकेण समन्वितम्। पाययेच्छ्वासकासघ्नं प्रतिश्यायकफापहम्॥ २१॥

The juice of fresh ginger mixed with honey should be taken to alleviate dyspnoea, cough, coryza and kapha. [21]

नवाङ्गयूष:

मुद्गामलाभ्यां यवदाडिमाभ्यां कर्कन्धुना मूलकशुण्ठकेन।
शुण्ठीकणाभ्याञ्च कुलत्थकेन यूषो नवाङ्ग: कफरोगहन्ता॥ २२॥

Navāṅga yūṣa

The soup prepared of green gram, āmalaka, barley, pomegranate, badara, dried radish, śuṇṭhī, pippalī and horse gram is known as navāṅga (having nine ingredients) which destroys the diseases caused by kapha. [22]

दशमूलीक्वाथ:

पार्श्वशूले ज्वरे कासे श्वासे श्लेष्मसमुद्भवे। पिप्पलीचूर्णसंयुक्तं दशमूलीजलं पिबेत्॥ २३॥

In condition of chest-pain, fever, cough and dyspnoea caused by kapha decoction of daśamūla added with pippalī powder should be taken. [23]

कट्फलादि:

कट्फलं कत्तृणं भार्गी मुस्तं धान्यं वचाऽभया। शृङ्गी पर्पटकं शुण्ठी सुराह्वञ्च जले शृतम्॥ २४॥
मधुहिङ्गुयुतं पेयं कासे वातकफात्मके। कण्ठरोगे क्षये शूले श्वासहिक्काज्वरेषु च॥ २५॥

Kaṭphalādi

Kaṭphala, kattṛṇa, bhārgī, musta, dhānyaka, vacā, harītakī, karkaṭaśṛṅgī, parpaṭaka, śuṇṭhī and devadāru decocted in water and added with honey and asafoctida is prescribed in cough caused by vāta and kapha, throat – diseases, wasting, abdominal pain, dyspnoea, hiccough and fever. [24-25]

कण्टकारीक्वाथ:

कण्टकारीकृत: क्वाथ: सकृष्ण: सर्वकासहा ।। २६ ।।

The decoction of kaṇṭakārī added with pippalī alleviates all types of cough. [26]

बिभीतकयोग:

बिभीतकं घृताभ्यक्तं गोशकृत्परिवेष्टितम् । स्विन्नमग्नौ हरेत् कासं ध्रुवमास्यविधारितम् ।। २७ ।।

Bibhītaka (fruit-pulp) smeared with ghee is covered with cow-dung and heated on fire. Its pieces are kept in mouth to check cough. [27]

वासकस्वरस:

वासकस्वरस: पेयो मधुयुक्तो हिताशिना । पित्तश्लेष्मकृते कासे रक्तपित्ते विशेषत: ।। २८ ।।

The juice of vāsaka added with honey should be taken in cough caused by pitta and kapha particularly innate heamorrhage. Meanwhile, the patient should keep on wholesome diet. [28]

मधुकादि:

मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी । द्विगुणा च तुगाक्षीरी सिता सर्वैश्चतुर्गुणा ।
तं लिह्यान्मधुसर्पिर्भ्यां क्षतकासनिवृत्तये ।। २९ ।।

Madhukādi

Madhuka, pippalī, drākṣā, lākṣā, karkaṭaśṛṅgī and śatāvarī each in equal parts, vaṃśalocana double and sugar four times (of the total) – this (powder) should be licked with honey and ghee to alleviate cough caused by chest-wound. [29]

पिप्पल्यादिलेह:

पिप्पली पद्मकं द्राक्षा सम्पक्वं बृहतीफलम् । घृतक्षौद्रयुतो लेह: श्वासकासनिबर्हण: ।। ३० ।।

Pippalyādi leha

Pippalī, padmaka, drākṣā and ripe bṛhatī fruits – these should be mixed with ghee and honey and licked to alleviate dyspnoea and cough. [30]

हरीतक्यादिगुडिका

हरीतकीनागरमुस्तचूर्णं गुडेन तुल्यं गुडिका विधेया ।
निवारयत्यास्यविधारितेयं श्वासं प्रवृद्धं प्रबलञ्च कासम् ।। ३१ ।।

Harītakyādi guḍikā

Harītakī, śuṇṭhī and musta are powdered and mixed with equal (quantity of) jaggery to make pills. It is kept in mouth which relieves even severe dyspnoea and cough. [31]

मरिचाद्यचूर्णम्

कर्षः कर्षार्द्धमथो पलं पलद्वयमथार्द्धकर्षश्च। मरिचस्य पिप्पलीनां दाडिमगुडयावशूकानाम्॥ ३२॥
सर्वौषधैरसाध्या ये कासाः सर्ववैद्यविवर्जिताः। अपि पूयं छर्दयतां तेषामिदमौषधं पथ्यम्॥ ३३॥

Maricādya cūrṇa

Marica 10 gm, pippali 5 gm, pomegranate 40 gm, jaggery 80 gm and yavakṣāra 5 gm- This formulation is a remedy for obstinate and severe cough even expectorating pus, not amenable to other remedies and rejected by physician. [32-33]

समशर्करचूर्णम्

लवङ्गजातीफलपिप्पलीनां भागान् प्रकल्प्याक्षयुतानमीषाम्।
पलार्द्धमेकं मरिचस्य दद्यात् पलानि चत्वारि महौषधस्य॥ ३४॥
सितासमं चूर्णमिदं प्रसह्य रोगानिमानाशु बलान् निहन्यात्।
कासज्वरारोचकमेहगुल्मश्वासाग्निमान्द्यग्रहणीप्रदोषान्॥ ३५॥

Samaśarkara cūrṇa

Lavaṅga, jātīphala and pippalī- each 10 gm, marica 20 gm, śuṇṭhī 160 gm and sugar equal to the above powder. It overcomes cough, fever, anorexia, prameha, gulma, dyspnoea, loss of appetite and grahaṇī disorder. [34-35]

हरीतक्यादिमोदकः

हरीतकीकणाशुण्ठीमरिचं गुडसंयुतम्। कासघ्नो मोदकः प्रोक्तस्तृष्णाऽरोचकनाशनः॥ ३६॥

Harītakyādi modaka

Harītakī, pippalī, śuṇṭhī and marica are mixed with jaggery and made into sweet balls. It destroys cough, thirst and anorexia. [36]

व्योषान्तिका गुडिका

तालीशवह्निदीप्यकचविकाऽम्लवेतसव्योषैः। तुल्यैस्त्रिसुगन्धियुतैर्गुडेन गुडिका प्रकर्त्तव्या॥ ३७॥
कासश्वासारोचकपीनसहृत्कण्ठवाङ्निरोधेषु। ग्रहणीगदोद्भवेषु गुडिका व्योषान्तिका नाम॥ ३८॥

Vyoṣāntikā guḍikā

Tālīśa, citraka, yavānī, cavya, amlavetasa and vyoṣa (trikaṭu) all in equal parts added with trisugadhi (one-fourth of the total) and jaggery and made into pills. This vyoṣāntikā guḍikā alleviates cough, dyspnoea, anorexia, chronic coryza, obstruction in cardiac region, throat and speech and symptoms of grahaṇī disorder. [37-38]

मनःशिलाऽऽदिः

मनःशिलाऽऽलमधुकमांसीमुस्तेङ्गुदैः पिबेत्। धूमं त्र्यहञ्च तस्यानु सगुडञ्च पयः पिबेत्॥ ३९॥
एष कासान् पृथग्द्वन्द्वसर्वदोषसमुद्भवान्। शतैरपि प्रयोगाणां साधयेदप्रसाधितान्॥ ४०॥

Manaḥśilādi I

Smoking should be used with realgar, orpiment, madhuka, jaṭāmāṃsī, musta and iṅguda for three days followed by intake of milk with jaggery. It cures cough caused by doṣas, singly or combined, and even obstinate. [39-40]

अपर: मन:शिलादि:

मन:शिलालिप्तदलं बदर्य्यातपशोषितम्। सक्षीरं धूमपानञ्च सर्वकासनिवारणम्॥ ४१॥

Manaḥśilādi II

The leaf of badarī is pasted with realgar and dried in the sun. It is smoked followed by intake of milk which alleviates all types of cough. [41]

अर्कत्वगादि:

अर्कच्छल्लशिले तुल्ये ततोऽर्द्धेन कटुत्रिकम्। चूर्णितं वह्निनिक्षिप्तं पिबेद् धूमन्तु योगवित्॥ ४२॥
भक्षयेदथ ताम्बूलं पिबेद् दुग्धमथाम्बु वा। कासा: पञ्चविधा यान्ति शान्तिमाशु न संशय:॥ ४३॥

Arkatvagādi

Arka (root-bark) and realgar in equal quantity, trikaṭu half of the above – all are powdered together and kept on fire. The smoke is inhaled followed by chewing of betel and intake of milk or water. This undoubetedly relieves five types of cough. [42-43]

मरिचादि:

मरिचशिलाऽर्कक्षीरैर्वार्ताकीत्वचमाशु भावितां शुष्काम्। कृत्वा विधिना धूमं पिबत: कासा: शमं यान्ति॥

Maricādi

The bark of vārtākī (bṛhatī) is impregnated with marica, realgar and arka latex and dried in the sun. It is taken as smoking which relieves all types of cough. [44]

दशमूलघृतम्

दशमूलकषायेण भार्गीकल्कं पचेद् घृतम्। दक्षतित्तिरिनिर्यूहे तत्परं वातकासनुत्॥ ४५॥

Daśamūlaghṛta

Ghee should be cooked with decoction of daśamūla and (meat of) cock and partridge alongwith the paste of bhārgī. It is a good remedy for vātika cough. [45]

दशमूलाद्यघृतम्

दशमूलाढके प्रस्थं घृतस्याक्षसमै: पचेत्। पुष्कराह्वशटीबिल्वसुरसव्योषहिङ्गुभि:॥ ४६॥
पेयाऽनुपानं तत् पेयं कासे वातकफाधिके। श्वासरोगेषु सर्वेषु कफवातात्मकेषु च॥ ४७॥

Daśamūlādya ghṛta

Ghee 640 gm should be cooked in daśamūla (decoction) 2.56 litre along with the paste of the following drugs— puṣkaramūla, śaṭī, bilva, tālīśa, trikaṭu and hiṅgu— each 10 gm. It should be taken with liquid gruel. It is useful in cough and asthma predominant in vāta and kapha. [46-47]

दशमूलषट्पलकं घृतम्

दशमूलीचतु:प्रस्थे रसे प्रस्थोन्मितं हवि:। सक्षारै: पञ्चकोलैस्तु कल्कितं साधु साधितम्॥ ४८॥
कासहृत्पार्श्वशूलघ्नं हिक्काश्वासनिवारणम्। कल्कं षट्पलमेवात्र ग्राहयन्ति भिषग्वरा:॥ ४९॥

Daśamūlaṣaṭpalaka ghṛta

Ghee 640 gm is cooked in daśamūla decoction 2.56 litre with the paste of pañcakola and yavakṣāra. It alleviates cough, pain in heart and chest, hiccough and bronchial asthma. Here paste is taken (in quantity of) six palas (240 gm) (so the name 'ṣaṭpalaka'). [48-49]

कण्टकारीघृतम्

कण्टकारीगुडूचीभ्यां पृथक् त्रिंशत्पलाद्रसे। प्रस्थ: सिद्धो घृताद्वातकासनुद्वह्निदीपन:॥ ५०॥

Kaṇṭakārī-ghṛta I

Ghee 640 gm is cooked in the decoction of kaṇṭakārī and guḍūcī each 1.2 litre. It alleviates vātika cough and stimulates digestive fire. [50]

अपरं कण्टकारीघृतम्

घृतं रास्नाबलाव्योषश्वदंष्ट्राकल्कपाचितम्। कण्टकारीरसे पानात् पञ्चकासनिषूदनम्॥ ५१॥

Kaṇṭakārī-ghṛta II

Ghee cooked in decoction of kaṇṭakārī with the paste of rāsnā, balā, trikaṭu and gokṣura alleviates five types of cough. [51]

बृहत्कण्टकारीघृतम्

समूलपत्रशाखाया: कण्टकार्य्या रसाढके। घृतप्रस्थं बलाव्योषविडङ्गशटीचित्रकै:॥ ५२॥
सौवर्चलयवक्षारबिल्वामलकपुष्करै:। वृश्चीरबृहतीपथ्यायमानीदाडिमर्द्धिभि:॥ ५३॥
द्राक्षापुनर्नवाचव्यधन्वयासाम्लवेतसै:। शृङ्गीतामलकीभार्गीरास्नागोक्षुरकै: पचेत्॥ ५४॥
कल्कैस्तु सर्वकासेषु हिक्काश्वासे च शस्यते। कण्टकारीघृतं सिद्धं कफव्याधिविनाशनम्॥ ५५॥

Bṛhat Kaṇṭakārī-ghṛta

Ghee 640 gm is cooked in decoction of kaṇṭakārī 2.56 litre with the paste of balā, trikaṭu, viḍaṅga, śaṭī, citraka, sauvarcala, yavakṣāra, bilva, āmalaka, puṣkaramūla, vṛścīra, bṛhatī, harītakī, yavānī, dāḍima, ṛddhi, drākṣā, punarnavā, cavya, durālabhā, amlavetasa, karkaṭaśṛṅgī, tāmalakī, bhārgi, rāsnā and gokṣura. It is prescribed in all types of cough, hiccough and dyspnoea and other disorders of kapha. [52-55]

रास्नाद्यं घृतम्

द्रोणेऽपां साधयेद्रास्नां दशमूलीं शतावरीम्। पलिकां माणिकांशांस्त्रीन् कुलत्थान् बदरान् यवान्॥ ५६॥
तुलार्द्धं छागमांसस्य पादशेषेण तेन च। घृताढकं समक्षीरं जीवनीयैः पलोन्मितैः॥ ५७॥
सिद्धं तद्दशभिः कल्कैर्नस्यपानानुवासनैः। समीक्ष्य वातरोगेषु यथाऽवस्थं प्रयोजयेत्॥ ५८॥
पञ्च कासान् शिरःकम्पं शूलं वंक्षणयोनिजम्। सर्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्ध्वानिलं जयेत्॥ ५९॥

Rāsnā, daśamūla and śatāvarī each 40 gm, kulattha, badara and yava each 320 gm, goat's flesh 2 kg – These are boiled in water 10.24 litre reduced to one-fourth. Now ghee 2.56 kg is cooked with this decoction along with equal (quantity of) milk and paste of the ten jīvanīya drugs each 40 gm. It is used in vātika disorders, according to condition, as snuffing, intake and unctuous enema. It alleviates five types of cough, trembling of head, pain in inguinal region and genitals, general and partial disorders (of vāta), splenomegaly and udāvarta. [56-59]

जीवनीयगणः

जीवकर्षभकौ मेदे काकोल्यौ शूर्पपर्णिके। जीवन्ती मधुकश्चैव दशको जीवको गणः॥ ६०॥

Jīvanīya gaṇa consists of jīvaka, ṛṣabhaka, medā, mahāmedā, kākolī, kṣīrakākolī, mudgaparṇī, māṣaparṇī, jīvantī and madhuka. [60]

अगस्त्यहरीतकी

दशमूलीं स्वयंगुप्तां शङ्खपुष्पीं शटीं बलाम्। हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान्॥ ६१॥
भार्गीं पुष्करमूलञ्च द्विपलांशं यवाढकम्। हरीतकीशतञ्चैकं जले पञ्चाढके पचेत्॥ ६२॥
यवैः स्विन्नैः कषायं तं पूतं तच्चाभयाशतम्। पचेद् गुडतुलां दत्त्वा कुडवञ्च पृथग् घृतात्॥ ६३॥
तैलात् सपिप्पलीचूर्णात् सिद्धशीते च माक्षिकात्। लिह्याद् द्वे चाभये नित्यमतः खादेद्रसायनात्॥ ६४॥
तद्वलीपलितं हन्याद् वर्णायुर्बलवर्द्धनम्। पञ्च कासान् क्षयं श्वासं हिक्कां सविषमज्वराम्॥ ६५॥
हन्यात् तथा ग्रहण्यर्शोहृद्रोगारुचिपीनसान्। अगस्त्यविहितं धन्यमिदं श्रेष्ठं रसायनम्॥ ६६॥

Agastyaharītakī

Daśamūla, kapikacchū (seeds), śaṅkhapuṣpī, śaṭī, balā, gajapippalī, apāmārga, pippalīmūla, citraka, bhārgi and puṣkaramūla each 80 gm, barley 2.56 kg and harītakī 100 fruits – these are boiled in water 12.8 litre. When barley is cooked the decoction is strained. Now the harītakī fruits are fried in ghee and oil each 160 gm and then cooked in the decoction added with jaggery 4 kg. When completed and cooled pippalī powder 160 gm and honey 320 gm are added. From this rasāyana two harītakī fruits and linctus 10 gm should be taken regularly. It removes wrinkles and greying of hairs, promotes lustre, life-span and strength and alleviates five types of cough, wasting, dyspnoea,

hiccough, irregular fevers, grahaṇī disorder, piles, heart diseases, anorexia and chronic coryza, this is an excellent rasāyana formulated by Agastya. [61-66]

व्याघ्रीहरीतकी

समूलपुष्पच्छदकण्टकार्य्यास्तुलां जलद्रोणपरिप्लुताञ्च।
हरीतकीनाञ्च शतं निदध्यादथात्र पक्त्वा चरणावशेषम्॥ ६७॥
गुडस्य दत्त्वा शतमेतदग्नौ विपक्कमुत्तार्य्य ततः सुशीते।
कटुत्रिकञ्च द्विपलप्रमाणं पलानि षट् पुष्परसस्य तत्र॥ ६८॥
क्षिपेच्चतुर्जातपलं यथाऽग्नि प्रयुज्यमानो विधिनाऽवलेहः।
वातात्मकं पित्तकफात्मकञ्च द्विदोषकासानपि यांस्त्रिदोषान्॥ ६९॥
क्षयोद्भवञ्च क्षतजञ्च हन्यात् सपीनसश्वासमुरःक्षतञ्च।
यक्ष्माणमेकादशरूपमुग्रं भृगूपदिष्टं हि रसायनं स्यात्॥ ७०॥

Vyāghrīharītakī

Kaṇṭakārī (whole plant) 4 Kg, along with harītakī fruits 100 are boiled in water 10.24 litre reduced to one-fourth. Again this is cooked after mixing jaggery 4 kg. When it is completed and cooled, trikaṭu (each) 80 gm, honey 240 gm and caturjātaka (total) 40 gm are added thereto. This linctus taken according to digestive power alleviates all types of cough, chronic coryza, bronchial asthma, chest-wound and consumption. This rasāyana is formulated by Bhṛgu. [67-70]

॥ इति कासचिकित्सा ॥ ११ ॥

Thus ends treatment of kāsa. [11]

१२. द्वादशोऽध्याय:

CHAPTER XII

हिक्काश्वास-चिकित्सा

Treatment of Hikkā-Śvāsa (hiccough and dyspnoea)

चिकित्साक्रम:

हिक्काश्वासातुरे पूर्वं तैलाक्ते स्वेद इष्यते। स्निग्धैर्लवणयोगैश्च मृदु वातानुलोमनम्।
ऊर्ध्वाधःशोधनं शक्ते दुर्बले शमनं मतम्॥ १॥

In the patient of hikkā and śvāsa, at first, anointment with salty oils and unctuous fomentation should be applied followed by mild carmination, emesis and purgation, if he is strong, otherwise pacifying measures are used. [1]

षड्लेहयोगा:

कोलमज्जाऽञ्जनं लाजास्तिक्ता काञ्चनगैरिकम्। कृष्णा धात्री सिता शुण्ठी कासीसं दधिनाम च॥ २॥
पाटल्याः सफलं पुष्पं कृष्णा खर्जूरमस्तकम्। षडेते पादिका लेहा हिक्काघ्ना मधुसंयुता:॥ ३॥

Six linctus formulations

(1) badara (seed-kernel), añjana and parched paddy, (2) kaṭukā and svarṇagairika, (3) pippalī, āmalaka, sugar and śuṇṭhī, (4) kāsīsa and kapittha, (5) Pāṭali (flower and fruit) and (6) pippalī and top end of kharjūra – these linctus formulations mentioned in quarter verses are administered with honey to alleviate hiccough. [2-3]

मधुकादिनस्यत्रयम्

मधुकं मधुसंयुक्तं पिप्पली शर्कराऽन्विता। नागरं गुडसंयुक्तं हिक्काघ्नं नावनत्रयम्॥ ४॥

(1) Madhuka mixed with honey, (2) pippalī with sugar and (3) śuṇṭhī with jaggery – these three used as snuff check hiccough. [4]

अपरं नस्यत्रयम्

स्तन्येन माक्षिकाविष्ठा नस्यं वाऽलक्तकाम्बुना। योज्यं हिक्काऽभिभूताय स्तन्यं वा चन्दनान्वितम्॥ ५॥

Snuff of fly's faeces with woman's milk or lac-juice or sandal mixed with woman's milk should be given to one suffering from hiccough. [5]

मातुलुङ्गप्रयोग: शुण्ठीक्षीरञ्च

मधुसौवर्चलोपेतं मातुलुङ्गरसं पिबेत्। हिक्काऽर्त्तस्य पयश्छागं हितं नागरसाधितम्॥ ६॥

One should take mātuluṅga juice mixed with honey and sauvarcala. Goat's milk processed with śuṇṭhī is wholesome in hiccough. [6]

कृष्णादिचूर्णम्

कृष्णाऽऽमलकशुण्ठीनां चूर्णं मधुसितायुतम्। मुहुर्मुहुः प्रयोक्तव्यं हिक्काश्वासनिबर्हणम्॥ ७॥

Kṛṣnādi cūrṇa

Powder of pippalī, āmalaka and śuṇṭhī added with honey and sugar should be used frequently to alleviate hiccough and asthma. [7]

भार्ग्यादिचूर्णं नागरादिचूर्णञ्च

हिक्काश्वासी पिबेद् भार्गीं सविश्वामुष्णवारिणा। नागरं वा सिताभार्गीसौवर्चलसमन्वितम्॥ ८॥

Bhārgyādi cūrṇa-Nāgarādi cūrṇa

One suffering from hiccough and asthma should take (the powder of) bhārgī and śuṇṭhī with hot water or (that of) śuṇṭhī, sugar, bhārgī and sauvarcala. [8]

शृङ्ग्यादिचूर्णम्

शृङ्गीकटुत्रिकफलत्रयकण्टकारीभार्गीसपुष्करजटा लवणानि पञ्च।
चूर्णं पिबेदशिशिरेण जलेन हिक्काश्वासोर्ध्ववातकसनारुचिपीनसेषु॥ ९॥

Śṛṅgyādi cūrṇa I

Karkaṭaśṛṅgī, trikaṭu, triphalā, kaṇṭakārī, bhārgī, puṣkaramūla and five salts— this powder should be taken with hot water in hiccough, asthma, ūrdhvavāta, cough, anorexia and chronic coryza. [9]

अभयादिकल्कं पौष्करादिकल्कञ्च

अभयानागरकल्कं पौष्करयवशूकमरिचकल्कं वा। तोयेनोष्णेन पिबेत् श्वासी हिक्की च तच्छान्त्यै॥ १०॥

The patient of hiccough and asthma should take, for its amelioration, paste of harītakī and śuṇṭhī or that of puṣkaramūla, yavakṣāra and marica with hot water. [10]

पर्णासपञ्चकम्

अमृतानागरफञ्जीव्याघ्रीपर्णाससाधितः क्राथः। पीतः सकणाचूर्णः कासश्वासौ निहन्त्याशु॥ ११॥

Parṇāsapañcaka

Decoction of guḍūcī, śuṇṭhī, phañjī, kaṇṭakārī, and parṇāsa (tulasī) mixed with pippalī powder checks cough and asthma instantaneously. [11]

दशमूलीक्वाथः

दशमूलीकषायस्तु पुष्करेणावचूर्णितः। कासश्वासप्रशमनः पार्श्वहृच्छूलनाशनः॥ १२॥

Decoction of daśamūla added with puṣkaramūla (powder) checks cough and asthma and alleviates pain in cardiac region and sides. [12]

कुलत्थादिः

कुलत्थनागरव्याघ्रीवासाभिः क्वथितं जलम्। पीतं पुष्करसंयुक्तं हिक्काश्वासनिबर्हणम्॥ १३॥

Kulatthādi

Decoction of kulattha, śuṇṭhī, kaṇṭakārī and vāsā added with puṣkaramūla alleviates hiccough and asthma. [13]

गुडतैलप्रयोग:

गुडं कटुकतैलेन मिश्रयित्वा समं लिहेत्। त्रिसप्ताहप्रयोगेण श्वासं निर्मूलतो जयेत्॥ १४॥

Use of jaggery with equal mustard oil for three weeks eradicates asthma. [14]

अपरं शृङ्ग्यादिचूर्णम्

शृङ्गीमहौषधकणाघनपुष्कराणां चूर्णं शटीमरिचशर्करया समेतम्।
क्काथेन पीतममृतावृषपञ्चमूल्याः श्वासं त्र्यहेण शमयेदतिदोषमुग्रम्॥ १५॥

Śṛṅgyādi cūrṇa II

Powder of karkaṭaśṛṅgī, śuṇṭhī, pippalī, musta, puṣkaramūla, śaṭī, marica and sugar taken with the decoction of guḍūcī, vāsā and (bṛhat) pañcamūla relieves asthma, even if severe, within three days. [15]

हरिद्राऽऽदिलेह:

हरिद्रां मरिचं द्राक्षां गुडं रास्नां कणां शटीम्। जह्यात् तैलेन विलिहन् श्वासान् प्राणहरानपि॥ १६॥

Haridrādi leha

Haridrā, marica, drākṣā, jaggery, rāsnā, pippalī and śaṭī – this linctus used with oil relieves even fatal dyspnoea. [16]

मयूरपिच्छादि: लेह:

हिक्कां हरति प्रबलां प्रबलं श्वासं च नाशयत्याशु। शिखिपुच्छभूतिपिप्पलिचूर्णं मधुमिश्रितं लीढम्॥ १७॥

The use of peacock's feather (ash) and pippali powder mixed with honey as linctus checks hiccough and asthma, even if severe. [17]

बिभीतकप्रयोग:

कर्षं कलिफलचूर्णं लीढश्चात्यन्तमिश्रितं मधुना। अचिराद्धरति श्वासं प्रबलामुद्ध्वंसिकाञ्चैव॥ १८॥

The powder of bibhītaka fruit 10 gm. mixed with honey checks asthma and severe bouts of cough immediately. [18]

हिंस्राद्यं घृतम्

हिंस्राविडङ्गपूतीकत्रिफलाव्योषचित्रकैः। द्विक्षीरं सर्पिषः प्रस्थं चतुर्गुणजलान्वितम्॥ १९॥
कोलमात्रैः पचेत् तद्धि श्वासकासौ व्यपोहति। अर्शांस्यरोचकं गुल्मं शकृद्भेदं क्षयं तथा॥ २०॥

Hiṃsrādya ghṛta

Ghee 640 gm cooked with double milk and four times water along with (the paste

of) hiṃsrā, viḍaṅga, pūtīka, triphalā, trikaṭu and citraka each 5 gm. alleviates asthma, cough, piles, anorexia, gulma, derangement of faeces and wasting. [19-20]

तेजोवत्याद्यं घृतम्

तेजोवत्यभया कुष्ठं पिप्पली कटुरोहिणी। भूतीकं पौष्करं मूलं पलाशश्चित्रकं शटी॥ २१॥
सौवर्चलं तामलकी सैन्धवं बिल्वपेशिका। तालीशपत्रं जीवन्ती वचा तैरक्षसम्मितैः॥ २२॥
हिङ्गुपादैर्घृतप्रस्थं पचेत् तोयचतुर्गुणे। एतद् यथाबलं पीत्वा हिक्काश्वासौ जयेन्नरः॥
शोथानिलार्शोग्रहणीहृत्पार्श्वरुज एव च॥ २३॥

Tejovatyādya ghṛta

Ghee 640 gm is cooked with (the paste of) tejovatī, harītakī, kuṣṭha, pippalī, kaṭukā, bhūtīka, puṣkaramūla, palāśa, citraka, śaṭī, sauvarcala, tāmalakī, rocksalt, bilva (pulp), tālīśapatra, jīvantī and vacā each 10 gm and hiṅgu 2.5 gm along with four times water, it should be taken, according to strength, by the patient of hiccough and asthma. Besides, it alleviates oedema, vātika piles, grahaṇīroga, pain in heart and chest. [21-23]

भार्गीगुडः

शतं संगृह्य भार्ग्यास्तु दशमूल्यास्तथापरम्। शतं हरीतकीनाञ्च पचेत् तोयचतुर्गुणे॥ २४॥
पादावशेषे तस्मिंस्तु रसे वस्त्रपरिस्रुते। आलोड्य च तुलां पूतां गुडस्य त्वभयां ततः॥ २५॥
पुनः पचेत्तु मृद्वग्नौ यावल्लेहत्वमागतम्। शीते तु मधुनश्चात्र षट् पलानि प्रदापयेत्॥ २६॥
त्रिकटु त्रिसुगन्धञ्च पलिकानि पृथक् पृथक्। कर्षद्वयं यवक्षारं सञ्चूर्ण्य प्रक्षिपेत् ततः॥ २७॥
भक्षयेदभयामेकां लेहस्यार्द्धपलं लिहेत्। श्वासं सुदारुणं हन्ति कासं पञ्चविधं तथा॥ २८॥
स्वरवर्णप्रदो ह्येष जठराग्नेश्च दीपनः। पलोल्लेखागते माने न द्वैगुण्यमिहेष्यते॥
हरीतकीशतस्यात्र प्रस्थत्वादाढकं जलम्॥ २९॥

Bhārgīguḍa

Bhārgī and daśamūla each 4 kg with harītakī 100 fruits are boiled in four times water reduced to one-fourth. This is strained through cloth and in the liquid so obtained clean jaggery 4 kg and the (above) harītakī fruits are again cooked on mild fire till it becomes linctus. After it is cooled down, honey 240 gm, trikaṭu and trijāta (powdered) each 40 gm and yavakṣāra 20 gm are added thereto. From this, the patient should take one harītakī fruit and 20 gm linctus. It checks severe asthma and five types of cough, promotes voice and lustre and stimulates digestive fire.

When the measure is mentioned in terms of 'pala' there is no doubling. The harītakī fruits are 640 gm (in weight) and as such water is given 2.56 litre. [24-29]

कुलत्थगुडः

कुलत्थं दशमूलञ्च तथैव द्विजयष्टिका। शतं शतञ्च संगृह्य जलद्रोणे विपाचयेत्॥ ३०॥
पादावशेषे तस्मिंस्तु गुडस्यार्द्धतुलां क्षिपेत्। शीतीभूते च पक्वे च मधुनोऽष्टौ पलानि च॥ ३१॥

षट् पलानि तुगाक्षीर्य्याः पिप्पल्याश्च पलद्वयम्। त्रिसुगन्धिसुगन्धं तं खादेदग्निबलं प्रति॥ ३२॥
श्वासं कासं ज्वरं हिक्कां नाशयेत् तमकं तथा। प्रतिशतं द्रोणनियमाज्ज्ञेयं द्रोणत्रयन्त्विह॥ ३३॥

Kulatthaguḍa

Kulattha, dasāmūla and bhārgī each 4 kg. are boiled in water 10.24 litre reduced to one-fourth. This should be added with jaggery 2 kg and again cooked. When it is prepared and cooled, honey 320 gm vaṃśalocana 240 gm, pippalī 80 gm and trijāta 80 gm are added thereto. It should be used according to power of digestion. It alleviates dyspnoea, cough, fever, hiccough and bronchial asthma. According to the rule of 1 droṇa (10.24 litre) water per 100 palas (4 kg) here it comes to 3 droṇa (30.72 litre). [30-33]

॥ इति हिक्काश्वासचिकित्सा॥ १२॥

Thus ends treatment of hikkāśvāsa. [12]

१३. त्रयोदशोऽध्यायः

CHAPTER XIII

स्वरभेद-चिकित्सा

Treatment of Svarabheda (hoarseness of voice)

क्रियाक्रमः

वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकम्। कफे सक्षारकटुकं क्षौद्रं कवल इष्यते॥ १॥
गले तालुनि जिह्वायां दन्तमूलेषु चाश्रितः। तेन निष्कृष्यते श्लेष्मा स्वरश्चास्य प्रसीदति॥ २॥

In vāta salt and oil, in pitta ghee with honey and in kapha pungents with yavakṣāra should be kept in mouth. By this mucus located in throat, palate, tongue and root of teeth is eliminated and thus voice becomes clear. [1-2]

आद्ये कोष्णं जलं पेयं जग्ध्वा घृतगुडौदनम्। क्षीरान्नपानं पित्तोत्थे पिबेत् सर्पिरतन्द्रितः॥ ३॥

In the former (vātika), tepid water should be taken after eating rice with jaggery and ghee while in the latter (paittika) one should take ghee followed by intake of milk. [3]

पिप्पल्यादिः

पिप्पली पिप्पलीमूलं मरिचं विश्वभेषजम्। पिबेन्मूत्रेण मतिमान् कफजे स्वरसंक्षये॥ ४॥

Pippalyādi

In loss of voice caused by kapha one should take pippalī, pippalīmūla, marica and śuṇṭhī with (cow) urine. [4]

मेदोजादिस्वरभेदस्योपचारः

स्वरोपघाते मेदोजे कफवद्विधिरिष्यते। क्षयजे सर्वजे चापि प्रत्याख्याय समाचरेत्॥ ५॥

In svarabheda caused by medas, it should be managed like that of kapha while in that caused by wasting and all doṣas one should proceed after declaring them as incurable. [5]

चव्याद्यं चूर्णम्

चव्याम्लवेतसकटुत्रिकतिन्तिडीकतालीशजीरकतुगादहनैः समांशैः।
चूर्णं गुडप्रमृदितं त्रिसुगन्धियुक्तं वैस्वर्य्यपीनसकफारुचिषु प्रशस्तम्॥ ६॥

Cavyādya cūrṇa

Cavya, amlavetasa, trikaṭu, tintiḍīka, tālīśa, jīraka, vaṃśalocana and citraka – all in equal quantity are powdered and added with jaggery and trijāta. It is prescribed in abnormal voice, chronic coryza and anorexia caused by kapha. [6]

योगत्रयम्

तैलाक्तं स्वरभेदे वा खदिरं धारयेन्मुखे। पथ्यां वा पिप्पलीयुक्तां संयुक्तां नागरेण वा॥ ७॥

In hoarseness of voice, one should keep in mouth (1) catechu smeared with oil (2) or harītakī with pippalī or sunthi. [7]

अजमोदादिचूर्णम्

अजमोदां निशां धात्रीं क्षारं वह्निं विचूर्ण्य च। मधुसर्पिर्युतं लीढ्वा स्वरभेदं व्यपोहति॥ ८॥

Ajamodādi cūrṇa

Ajamodā, haridrā, āmalakī, yavakṣāra and citraka – these are powdered and taken with honey and ghee to alleviate svarabheda. [8]

कलितरुफलादिचूर्णमामलकचूर्णञ्च

कलितरुफलसिन्धुकणाचूर्णं तक्रेण लीढमपहरति। स्वरभेदं गोपयसा पीतं वाऽऽमलकचूर्णञ्च॥ ९॥

The powder of bibhītaka fruit, rocksalt and pippalī taken with buttermilk or powder of āmalaka taken with cow-milk removes svarabheda. [9]

बदरीपत्रादिलेह:

बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्। स्वरोपघाते कासे च लेहमेनं प्रयोजयेत्॥ १०॥

The paste of badarī leaves mixed with rocksalt and fried in ghee should be used in hoarseness of voice and cough. [10]

काकोल्यादिक्षीरम्

शर्करामधुमिश्राणि शृतानि मधुरैः सहः। पिबेत् पयांसि यस्योच्चैर्वदतोऽभिहतः स्वरः॥ ११॥

If there is loss of voice due to loud speaking, one should take milk cooked with sweet (jīvanīya) drugs and added with sugar and honey. [11]

कण्टकारीघृतम्

व्याघ्रीस्वरसविपक्वं रास्नावाटयालगोक्षुरव्योषैः। सर्पिः स्वरोपघातं हन्यात् कासञ्च पञ्चविधम्॥ १२॥

Vyāghrīghṛta

Ghee cooked with kaṇṭakārī juice with (the paste of) rāsnā, balā, gokṣura and trikaṭu alleviates svarabheda and five types of cough. [12]

शुष्कद्रव्यमुपादाय स्वरसानामसम्भवे। वारिण्यष्टगुणे साध्यं ग्राह्यं पादावशेषितम्॥ १३॥

To obtain juice from dry drug the latter should be boiled in eight times water reduced to one-fourth. [13]

भृङ्गराजाद्यं घृतम्

भृङ्गराजामृतवल्लीवासकदशमूलकासमर्दरसैः। सर्पिः सपिप्पलीकं सिद्धं स्वरभेदकासजिन्मधुना॥ १४॥

Bhṛṅgarājādya ghṛta

Ghee should be cooked with decoction of bhṛṅgarāja, guḍūcī, vāsaka, daśamūla and kāsamarda alongwith (the paste of) pippalī. Honey should be added when it is cooled. It alleviates svarabheda, and kāsa. [14]

॥ इति स्वरभेदचिकित्सा ॥ १३ ॥

Thus ends treatment of svarabheda. [13]

१४. चतुर्दशोऽध्याय:

CHAPTER XIV

अरोचकचिकित्सा

Treatment of Arocaka (anorexia)

क्रियाक्रम:

वस्तिं समीरणे पित्ते विरेकं वमनं कफे। कुर्य्याद्धृद्यानुकूलानि हर्षणञ्च मनोघ्नजे॥ १॥ SiYo 14.3

Enema, purgation and emesis should be applied in vāta, pitta and kapha respectively. If it is of psychic origin, the patient is managed with pleasing and agreeable items. [1]

कृष्णादिचूर्णम्

वान्तो वचाद्भिरनिले विधिवत् पिबेत्तु स्नेहोष्णतोयमदिराऽन्यतमेन चूर्णम्।
कृष्णाविडङ्गयवभस्महरेणुभार्गीरास्नैलहिङ्गुलवणोत्तमनागराणाम्॥ २॥

Kṛṣṇādi cūrṇa

Kṛṣṇā (pippalī), viḍaṅga, yavabhasma (yavakṣāra), hareṇu, bhārgī, rāsnā, elavāluka, hiṅgu, saindhava and śuṇṭhī – this powder is given with ghee or hot water or wine in vātika type after emesis is induced with vāca water. [2]

पैत्ताद्यरोचके चिकित्साक्रम:

पैत्ते गुडाम्बुमधुरैर्वमनं प्रशस्तं लेह: ससैन्धवसितामधुसर्पिरिष्ट:॥ ३॥

In paittika type, emesis is induced with sweet drugs and with jaggery-water followed by intake of linctus consisting of rock-salt, sugar, honey and ghee. [3]

निम्बाम्बुछर्दितवत: कफजे तु पानं राजद्रुमाम्बु मधुना सह दीप्यकाढ्यम्।
चूर्णं यदुक्तमथवाऽनिलजे तदेव सर्वैश्च सर्वकृतमेवमुपक्रमेच्च॥ ४॥

In kaphaja type, decoction of āragvadha mixed with honey and yavānī powder should be given after inducing emesis with nimba water; or the powder mentioned in vātika type (see 2) should be given with āragvadha decoction. If it is caused by all doṣas, combined treatment should be applied. [4]

चत्वार: कवलग्रहयोगा:

कुष्ठसौवर्चलाजाजीशर्करामरिचं विडम्। धात्र्येलापद्मकोशीरपिप्पलीचन्दनोत्पलम्॥ ५॥
लोध्रं तेजोवती पथ्या त्र्यूषणं सयवाग्रजम्। आर्द्रदाडिमनिर्यासश्चाजाजीशर्करायुत:॥ ६॥
सतैलमाक्षिकाश्चैते चत्वार: कवलग्रहा:। चतुरोऽरोचकान् हन्युर्वाताद्येकजसर्वजान्॥ ७॥

(1) Kuṣṭha, sauvarcala, jīraka, sugar, marica and viḍa (2) āmalakī, elā, padmaka, uśīra, pippalī, candana and utpala (3) lodhra, tejovatī, harītakī, trikaṭu and yavakṣāra and (4) fresh pomegranate juice with jīraka and sugar – these combined with oil and honey are kept in mouth in anorexia caused by vāta, pitta, kapha and tridoṣa respectively. [5-7]

त्वगादियोगपञ्चकम्

त्वङ्मुस्तमेला धान्यानि मुस्तमामलकानि च। त्वक् च दार्वी यमान्यश्च पिप्पल्यस्तेजोवत्यपि॥ ८॥
यमानी तिन्तिडीकश्च पञ्चैते मुखशोधनाः। श्लोकपादैरभिहिताः सर्वारोचकनाशनाः॥ ९॥

(1) Tvak, musta, elā and dhānyaka (2) musta and āmalaka (3) tvak, dāruharidrā and yavānī (4) pippalī and tejovatī and (5) yavānī and tintiḍīka – these five formulations stated in quarter verses are mouth-cleaning and used for alleviating all types of anorexia. [8-9]

अम्लीकादिकवलः

अम्लीका गुडतोयश्च त्वगेलामरिचान्वितम्। अभक्तच्छन्दरोगेषु शस्तं कवलधारणम्॥ १०॥ SiYo 14.6

Water mixed with tamarind and jaggery and added with tvak, elā and marica is kept in mouth in anorexia. [10]

कारव्यादिगुडिका

कारव्यजाजीमरिचं द्राक्षावृक्षाम्लदाडिमम्। सौवर्चलं गुडं क्षौद्रं सर्वारोचकनाशनम्॥ ११॥

Kāravyādi guḍikā

Kāravī (kṛṣṇa jīraka), jīraka, marica, drākṣā, vṛkṣāmla, dāḍima, sauvarcala, jaggery and honey – pill prepared of these (is kept in mouth which) alleviates all types of anorexia. [11]

त्र्यूषणादिचूर्णम्

त्रीण्यूषणानि त्रिफला रजनीद्वयश्च चूर्णीकृतानि यवशूकविमिश्रितानि।
क्षौद्रान्वितानि वितरेन्मुखधावनार्थमन्यानि तिक्तकटुकानि च भेषजानि॥ १२॥ SiYo 14.10

Trikaṭu, triphalā, haridrā and dāruharidrā are powdered and mixed with yavakṣāra. This along with honey is used for mouthwash and so the other bitter and pungent drugs. [12]

दाडिमस्वरसः

विट्चूर्णमधुसंयुक्तो रसो दाडिमसम्भवः। असाध्यामपि संहन्यादरुचिं वक्त्रधारितः॥ १३॥

Pomegranate juice mixed with viḍa powder and honey, if kept in mouth, removes anorexia even if incurable. [13]

यमानीषाडवः

यमानी तिन्तिडीकश्च नागरश्चाम्लवेतसम्। दाडिमं बदरश्चाम्लं कार्षिकाण्युपकल्पयेत्॥ १४॥
धान्यसौवर्चलाजाजीवराङ्गश्चार्द्धकार्षिकम्। पिप्पलीनां शतश्चैकं द्वे शते मरिचस्य च॥ १५॥

शर्करायाश्च चत्वारि पलान्येकत्र चूर्णयेत्। जिह्वाविशोधनं हृद्यं तच्चूर्णं भक्तरोचनम्॥ १६॥
हृत्पीडापार्श्वशूलघ्नं विबन्धानाहनाशनम्। कासश्वासहरं ग्राहि ग्रहण्यर्शोविकारनुत्॥ १७॥

Yamānīṣāḍava

Yavānī, tintiḍīka, śuṇṭhī, amlavetasa, pomegranate and sour badara each 10 gm, dhānyaka, sauvarcala, jīraka and tvak each 5 gm, pippalī 100 and marica 200 (in number) and sugar 160 gm – these are powdered together. This powder cleanses tongue, is cordial, gives relish, forms stool, alleviates cardiac and chest-pain, constipation, hardness in bowels, cough, asthma, grahaṇī disorder and piles. [14-17]

कलहंसम्

अष्टादश शिग्रुफलानि दश मरिचानि विंशतिश्च पिप्पल्यः। आर्द्रकपलं गुडपलं प्रस्थत्रयमारनालस्य॥
एतद्विडलवणयुतं खजाहतं सुरभिगन्धाढ्यम्। व्यञ्जनसहस्रघाति ज्ञेयं कलहंसकं नाम॥ १९॥

Kalahaṃsa

Śigru seeds 18, marica 10, pippalī 20, fresh ginger 40 gm, jaggery 40 gm, sour gruel 1.92 litre – these added with viḍa salt is churned with stick and mixed with aromatics (caturjāta). This is known as 'kalahaṃsa' which supercedes thousands of pickles. [18-19]

॥ इत्यरोचकचिकित्सा ॥ १४ ॥

Thus ends treatment of arocaka.[14]

१५. पञ्चदशोऽध्याय:

CHAPTER XV

छर्दि-चिकित्सा

Treatment of Chardi (vomiting)

क्रियाक्रम:

आमाशयोत्क्लेशभवा हि सर्वाश्छर्द्यो मता लङ्घनमेव तस्मात्।
प्राक् कारयेन्मारुतजां विमुच्य संशोधनं वा कफपित्तहारि॥ १॥

As all types of vomiting are caused by gastric irritation, at first, fasting should be observed except in the case of vātika one, or evacuative therapy to eliminate kapha and pitta should be applied. [1]

हन्यात् क्षीरोदकं पीतं छर्दिं पवनसम्भवाम्। ससैन्धवं पिबेत् सर्पिर्वातच्छर्दिनिवारणम्॥ २॥

Intake of milk mixed with water or ghee (cooked) with rocksalt alleviates vātika chardi. [2]

मुद्गामलकयूषं वा ससर्पिष्कं ससैन्धवम्। यवागूं मधुमिश्रां वा पञ्चमूलीकृतां पिबेत्॥ ३॥

Or (in such case), one should take soup of green gram and āmalaka added with rocksalt and fried with ghee or gruel processed with pañcamūla and added with honey. [3]

पित्तात्मिकायान्त्वनुलोमनार्थं द्राक्षाविदारीक्षुरसैस्त्रिवृत् स्यात्।
कफाशयस्थन्त्वतिमात्रवृद्धं पित्तं जयेत् स्वादुभिरूर्ध्वमेव॥ ४॥

In paittika type, for carmination, trivṛt should be given with the juice of drākṣā, vidārī and sugarcane. However, if pitta is situated in kaphāśaya (upper part of āmāśaya) and is immensely aggravated, it should be controlled by applying emesis with the above sweet drugs. [4]

शुद्धस्य काले मधुशर्कराभ्यां लाजैश्च मन्थं यदि वाऽपि पेयाम्।
प्रदापयेन्मुद्गरसेन वाऽपि शाल्योदनं जाङ्गलजै रसैर्वा॥ ५॥

When the patient is evacuated, he should be provided with churned drink of parched paddy added with honey and sugar or with liquid gruel or he should be fed on cooked śāli rice with green gram soup or meat soup of wild animals. [5]

चन्दनामलकयोग:

चन्दनेनाक्षमात्रेण संयोज्यामलकीरसम्। पिबेत् माक्षिकसंयुक्तं छर्दिस्तेन निवर्त्तते॥ ६॥

Āmalaka juice (40 ml) mixed witrh candana 10 gm added with honey is administered to check vomiting. [6]

चन्दनादिचूर्णम्

चन्दनश्चामृणालश्च बालकं नागरं वृषम्। सतण्डुलोदकक्षौद्रः पीतः कल्को वमिं जयेत्॥ ७॥

Candanādi cūrṇa

Candana, uśīra, bālaka, śuṇṭhī and vāsā – the paste of these mixed with honey and taken with rice-water relieves vomiting. [7]

भृष्टमुद्गकषाय:

कषायो भृष्टमुद्गस्य सलाजमधुशर्करः। छर्द्यतीसारतृड्दाहज्वरघ्नः सम्प्रकाशितः॥ ८॥

Decoction of parched green gram added with parched paddy (powder), honey and sugar alleviates vomiting, diarrhoea, thirst, burning sensation and fever. [8]

हरीतकीलेह:

हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम्। अधोभागीकृते दोषे छर्दिः क्षिप्रं निवर्त्तते॥ ९॥

If the pathos has turned to the lower part (of G.I.T.) harītakī powder should be taken with honey. It controls vomiting quickly. [9]

गुडूच्यादिक्वाथ:

गुडूचीत्रिफलाऽरिष्टपटोलैः क्वथितं पिबेत्। क्षौद्रयुक्तं निहन्त्याशु छर्दिं पित्ताम्लसम्भवाम्॥ १०॥

Guḍūcyādi kvātha

One should take the decoction of guḍūcī, triphalā, nimba, and paṭola added with honey to check vomiting caused by amlapitta (acid gastritis). [10]

पपर्टक्वाथ:

क्वाथः पर्पटजः पीतः सक्षौद्रश्छर्दिनाशनः॥ ११॥

Decoction of parpaṭa taken with honey checks vomiting. [11]

पिप्पल्यादिक्वाथ:

कफात्मिकायां वमनं प्रशस्तं सपिप्पलीसर्षपनिम्बतोयैः।
पिण्डीतकैः सैन्धवसंप्रयुक्तैश्छर्द्यां कफामाशयशोधनार्थम्॥ १२॥

In kaphaja type, emesis should be induced with (hot) water mixed with pippalī, sarṣapa, nimba, madanaphala and rocksalt in order to evacuate stomach. [12]

विडङ्गादिचूर्णद्वयम्

विडङ्गत्रिफलाविश्वचूर्णं मधुयुतं जयेत्। विडङ्गप्लवशुण्ठीनामथवा श्लेष्मजां वमिम्॥ १३॥

Vomiting caused by kapha is controlled by the powder of viḍaṅga, triphalā and śuṇṭhī or viḍaṅga, kaivartta mustaka and śuṇṭhī. [13]

योगत्रयम्

सजाम्बवं वा बदरस्य चूर्णं मुस्तायुतां कर्कटकस्य शृङ्गीम्।
दुरालभां वा मधुसम्प्रयुक्तां लिह्यात्कफच्छर्दिविनिग्रहार्थम्॥ १४॥

One should take (1) jambū (seed) and badara (2) karkaṭaśṛṅgī and musta (3) or durālabhā and musta with honey to control vomiting caused by kapha. [14]

तर्पणयोग:

तर्पणं वा मधुयुतं तिसृणामपि भेषजम्॥ १५॥

Or tarpaṇa (saturating drink) mixed with honey is the remedy for all the three types (vātaja, pittaja and kaphaja). [15]

गुडूचीहिम:

कृतं गुडूच्या विधिवत् कषायं हिमसंज्ञितम्। तिसृष्वपि भवेत् पथ्यं माक्षिकेण समायुतम्॥ १६॥

Guḍūcī-hima

Hima (cold infusion) of guḍūcī added with honey is wholesome in all the three types. [16]

हिमकषायविधि:

द्रव्यादापोथितात् तोये प्रतप्ते निशि संस्थितात्। कषायो योऽभिनिर्याति स शीत: समुदाहृत: ॥ १७॥
षड्भि: पलैश्चतुर्भिर्वा सलिलाच्छीतफाण्टयो: । आप्लुतं भेषजपलं रसाख्यायां पलद्वयम्॥ १८॥

The method of preparation of hima (śīta kaṣāya) is as follows – the drug is pounded and kept in hot water overnight. The extract thus obtained is śīta or hima. The quantity of water should be 240 or 160 ml. and that of drug 40 gm in cases of hima and phāṇṭa (hot infusion) and 80 gm in that of rasa (juice). [17-18]

योगत्रयम्

श्रीफलस्य गुडूच्या वा कषायो मधुसंयुत: । पेयश्छर्दित्रये शीतो मूर्वा वा तण्डुलाम्बुना॥ १९॥

Decoction of bilva or guḍūcī mixed with honey should be taken when cooled or murvā with rice-water in three types of vomiting. [19]

जम्ब्वादिक्वाथ:

जम्ब्वाम्रपल्लवगवेधुकधान्यसेव्यह्रीबेरवारि मधुना पिबताऽल्पमल्पम्।
छर्दिः प्रयाति शमनं त्रिसुगन्धियुक्ता लीढा निहन्ति मधुनाऽथ दुरालभा वा ॥ २० ॥

Cold infusion of tender leaves of jambū and āmra, gavedhuka, dhānyaka, uśīra and bālaka mixed with honey should be taken frequently in small quantity, or durālabhā added with trijāta and honey alleviates vomiting. [20]

जातीकपित्थरस:

जात्या रसः कपित्थस्य पिप्पलीमरिचान्वितः। क्षौद्रेण युक्तः शमयेल्लेहोऽयं छर्दिमुल्बणाम् ॥ २१ ॥

Juice of jātī and kapittha is added with (powder of) pippalī and marica and mixed with honey. This linctus controls severe vomiting. [21]

धात्रीफलादिपानकम्

पिष्ट्वा धात्रीफलं द्राक्षां शर्कराञ्च पलोन्मिताम्। भुक्त्वा मधुपलञ्चात्र कुडवं सलिलस्य च।
वाससा गालितं पीतं हन्ति छर्दिं त्रिदोषजाम् ॥ २२ ॥

Dhātrīphalādi Pānaka

Pounded dhātrīphala (āmalaka fruits) and drākṣā are mixed with sugar and honey each 40 gm in water 160 ml. It is strained through cloth and taken to check vomiting caused by three doṣas. [22]

एलादिचूर्णम्

एलालवङ्गगजकेशरकोलमज्जलाजाप्रियङ्गुघनचन्दनपिप्पलीनाम्।
चूर्णानि माक्षिकसितासहितानि लीढ्वा छर्दिं निहन्ति कफमारुतपित्तजाञ्च ॥ २३ ॥

Elādi cūrṇa

Elā, lavaṅga, nāgakeśara, badara (seed– kernel), parched paddy, priyaṅgu, musta, candana and pippalī– these are powdered together and taken with honey and sugar in case of vomiting. [23]

कोलमज्जादिलेह:

कोलामलकमज्जानौ मक्षिकाविट् सिता मधु। सकृष्णातण्डुलो लेहश्छर्दिमाशु नियच्छति ॥ २४ ॥

Linctus made of the seed-kernel of badara and āmalaka, fly's faeces, sugar, honey and pippalī checks vomiting instantaneously. [24]

अश्वत्थवल्कलजलम्

अश्वत्थवल्कलं शुष्कं दग्ध्वा निर्वापितं जले। तत्तोयपानमात्रेण छर्दिं जयति दुस्तराम् ॥ २५ ॥

Dried bark of aśvattha is burnt and then immersed in water. By taking this water vomiting is controlled quickly. [25]

यष्ट्यादिकल्कः

यष्ट्याह्वं चन्दनोपेतं सम्यक् क्षीरप्रपेषितम्। तेनैवालोड्य पातव्यं रुधिरच्छर्दिनाशनम्।। २६ ।।

Madhuyaṣṭī and candana pounded with milk and taken with the same (milk) checks haematemesis. [26]

लाजादिलेहत्रयम्

लाजाकपित्थमधुमागधिकोषणानां क्षौद्राभयात्रिकटुधान्यकजीरकाणाम्।
पथ्याऽमृतामरिचमाक्षिकपिप्पलीनां लेहास्त्रयः सकलवम्यरुचिप्रशान्त्यै।। २७।।

(1) Parched paddy, kapittha, honey, pippalī and marica (2) honey, harītakī, trikaṭu, dhānyaka and jīraka and (3) harītakī, guḍūcī, marica, honey and pippalī – These three formulations used as linctus control all types of vomiting and anorexia. [27]

पद्मकाद्यं घृतम्

पद्मकामृतनिम्बानां धान्यचन्दनयोः पचेत्। कल्के क्वाथे च हविषः प्रस्थं छर्दिर्निवारणम्।
तृष्णाऽरुचिप्रमशनं दाहज्वरहरं परम्।। २८।।

Padmakādya ghṛta

Ghee 640 gm is cooked with paste and decoction of padmaka, guḍūcī, nimba, dhānyaka and candana. It controls vomiting, thirst, anorexia, burning sensation and fever. [28]

।। इति छर्दिचिकित्सा।। १५ ।।

Thus ends treatment of chardi. [15]

१६. षोडशोऽध्यायः

CHAPTERX VI

तृष्णा-चिकित्सा

Treatment of Tṛṣṇā (polydipsia)

योगत्रयम्

तृष्णायां पवनोत्थायां सगुडं दधि शस्यते। रसश्च बृंहणः शीतो गुडूच्या रस एव च॥ १॥

In polydipsia caused by vāta curd with jaggery is useful and so are the meat-soups which are cold and bulk-promoting, and the juice of guḍūcī. [1]

पञ्चपञ्चमूलपानीयम्

पञ्चाङ्गकाः पञ्चगणा य उक्तास्तेष्वम्बु सिद्धं प्रथमे गणे वा।
पिबेत् सुखोष्णं मनुजोऽल्पशो वा तृष्णोपरोधं न कदापि कुर्य्यात्॥ २॥

Out of the five pentads of roots already mentioned the first group (laghu pañcamūla) is selected for processing of water. This processed water should be taken warm and in small quantity, but, in any way, the urge of thirst should not be suppressed. [2]

पित्तहरपानीयम्

पित्तोत्थितां पित्तहरैर्विपक्वं निहन्ति तोयं पय एव वाऽपि॥ ३॥

Similarly, water or milk processed with pitta- alleviating drugs checks thirst caused by pitta. [3]

काश्मर्यादिशीतः

काश्मर्य्यशर्करायुक्तं चन्दनोशीरपद्मकम्। द्राक्षामधुकसंयुक्तं पित्ततर्षे जलं पिबेत्॥ ४॥

Kāśmaryādi śīta

The cold infusion prepared of gambhārī fruit, śarkarā, candana, uśīra, padmaka, drākṣā and madhuka should be taken in thirst caused by pitta. [4]

योगत्रयम्

पित्तजायान्तु तृष्णायां पक्वोदुम्बरजो रसः। तत्क्वाथो वा हिमस्तद्वच्छारिवाऽऽदिगणाम्बु वा॥ ५॥

In paittika thirst juice, decoction or cold infusion of ripe udumbara fruits is useful and so is that of sārivādi group. [5]

जीवनीयघृतं द्राक्षादिपानीयञ्च

स्याज्जीवनीयसिद्धं क्षीरघृतं वातपित्तजे तर्षे। तद्वद् द्राक्षाचन्दनखर्जूरोशीरमधुयुतं तोयम्॥ ६॥

Ghee extracted from milk and cooked with jīvanīya drugs is prescribed in thirst caused by vāta and pitta and so is water added with drākṣā, candana, kharjūra, uśīra and honey. [6]

पञ्च कषाया:

सशारिवाऽदौ तृणपञ्चमूले तथोत्पलादौ मधुरे गणे वा।
कुर्य्यात् कषायांश्च तथैव युक्तान् मधूकपुष्पादिषु चापरेषु॥ ७॥

In paittika thirst, decoction prepared of sārivādi, tṛṇapañcamūla, utpalādi, jīvanīya or madhūkapuṣpādi group (flowers of madhūka, śobhāñjana, kovidāra and priyaṅgu or madhūka (flowers), drākṣā, kāśmarya and kharjūra) should be used in paittika thirst. [7]

बिल्वादिक्वाथ:

बिल्वाढकीधातकिपञ्चकोलदर्भेषु सिद्धं कफजां निहन्ति।
हितं भवेच्छर्दनमेव चात्र तप्तेन निम्बप्रसवोदकेन॥ ८॥

Bilvādi Kvātha

Decoction of bilva, āḍhakī, dhātakī, pañcakola and darbha alleviates thirst caused by kapha. This should be preceded by emesis with hot decoction of nimba leaves. [8]

मद्यप्रयोग:

सजीरकाण्यार्द्रकशृङ्गबेरसौवर्चलान्यर्द्धजलप्लुतानि।
मद्यानि हृद्यानि च गन्धवन्ति पीतानि सद्यः शमयन्ति तृष्णाम्॥ ९॥

Alcoholic bevereges pleasant and well-flavoured and added with jīraka, fresh ginger, sauvarcala and half water check thirst quickly. [9]

क्षतजक्षयजतृष्णोपचार:

क्षतोत्थितां रुग्विनिवारणेन जयेद्रसानामसृजश्च पानैः।
क्षयोत्थितां क्षीरजलं निहन्यान्मांसोदकं वाऽथ मधूदकं वा॥ १०॥

Thirst caused by wound should be treated first with removal of the etiological factor followed by intake of meat-soups and blood (blood-transfusion). That caused by wasting should be controlled with milk-water, meat-soup or honey-water. [10]

गुर्वन्नजादितृष्णोपचार:

गुर्वन्नजामुल्लिखनैर्जयेत्तु क्षयादृते सर्वकृताञ्च तृष्णाम्॥ ११॥

Emesis is applied in thirst caused by heavy food and also in other types except that caused by wasting. [11]

लाजोदकम्

लाजोदकं मधुयुतं शीतं गुडविमर्दितम्। काश्मर्य्यशर्करायुक्तं पिबेत् तृष्णाऽर्दितो नरः॥ १२॥

One suffering from thirst should take cold water added with parched paddy (power), honey, jaggery, gambhārī fruit and sugar. [12]

तृष्णाघ्नौ योगौ

अतिरूक्षदुर्बलानां तर्षं शमयेन्नृणामिहाशु पयः। छागो वा घृतभृष्टः शीतो मधुरो रसो हृद्यः॥ १३॥

In case of excessively rough and debilitated patient milk or soup of goat's meat fried in ghee, cold, sweet and flavoured should be given to check thirst. [13]

आम्रादिकषायः

आम्रजम्बूकषायं वा पिबेन्माक्षिकसंयुतम्। छर्दिं सर्वां प्रणुदति तृष्णां चैवापकर्षति॥ १४॥

Decoction of āmra and jambū (seed or tender leaves) added with honey should be taken. It controls thirst as well as all types of vomiting. [14]

वटशुङ्गादिचूर्णम्

वटशुङ्गसितालोध्रदाडिमं मधुकं मधु। पिबेत् तण्डुलतोयेन छर्दितृष्णानिवारणम्॥ १५॥

Vaṭaśuṅgādi cūrṇa

Vaṭaśuṅga (leaf-buds of vaṭa), sugar, lodhra, dāḍima and madhuka – this powder taken with honey and followed by intake of rice-water checks vomiting and thirst. [15]

नस्ययोगाः

गोस्तनेक्षुरसक्षीरयष्टीमधुमधूत्पलैः। नियतं नस्यतः पानैस्तृष्णा शाम्यति दारुणा॥ १६॥

Drākṣā, sugarcane-juice, milk, yaṣṭīmadhu, honey and utpala – each of them is applied separately in the nostrils. It checks even severe thirst. [16]

गण्डूषधारणम्

क्षीरेक्षुरसमाध्वीकैः क्षौद्रशीधुगुडोदकैः। वृक्षाम्लाम्लैश्च गण्डूषास्तालुशोषनिवारणाः॥ १७॥

Gargle with milk, sugarcane juice, mādhvīka (a type of wine), honey, vinegar, jaggery-water, sour juices of vṛkṣāmla etc relieves dryness of palate. [17]

घृतप्रयोगः

तालुशोषे पिबेत् सर्पिर्घृतमण्डमथापि वा॥ १८॥

In case of dryness of palate, ghee or ghee-scum should be used. [18]

शीतलजलप्रयोगार्हाः

मूर्च्छाच्छर्दितृषादाहस्त्रीमद्यभृशकर्शिताः। पिबेयुः शीतलं वारि रक्तपित्ते मदात्यये॥ १९॥

Cold water should be used in fainting, vomiting, thirst, burning sensation, extreme debility due to sex and drink, innate haemorrhage and alcoholism. [19]

धान्याम्लप्रयोगः

धान्याम्लमास्यवैरस्यमलदौर्गन्ध्यनाशनम्। तदेवालवणं पीतं मुखशोषहरं परम्॥ २०॥

Sour gruel removes abnormal taste, coating and bad smell in mouth. The same taken without salt is a good remedy for dryness of palate. [20]

मधुगण्डूषधारणम्

वैशद्यं जनयत्यास्ये सन्दधाति मुखव्रणान्। दाहतृष्णाप्रशमनं मधुगण्डूषधारणम्॥ २१॥

Keeping honey in mouth produces clarity, heals wounds and pacifies burning sensation and thirst. [21]

पञ्चाम्लकलेप:

कोलदाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः। पञ्चाम्लको मुखालेपः सद्यः तृष्णां नियच्छति॥ २२॥

Application of the paste of five sours (badara, dāḍima, vṛkṣāmla, cukrīkā and cāṅgerī) in mouth (or on face) checks thirst quickly. [22]

मधूदकप्रयोग:

वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम्। पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति॥ २३॥

Cold water mixed with honey is given to drink upto throat in order to induce emesis. By this thirst is checked. [23]

वटशुङ्गादिगुडिका

वटशुङ्गामयक्षौद्रलाजनीलोत्पलैर्दृढा। गुडिका वदनन्यस्ता क्षिप्रं तृष्णां नियच्छति॥ २४॥

Vaṭaśuṅgādi guḍikā

Vaṭa (leaf buds), kuṣṭha, parched paddy and nīlotpala – these are powdered and made into pills with honey. The pills are kept in mouth to check thirst. [24]

पानीयभक्तप्रयोग:

ओदनं रक्तशालीनां शीतं माक्षिकसंयुतम्। भोजयेत् येन शाम्येत्तु छर्दिस्तृष्णा चिरोत्थिता॥ २५॥

Cooked rice of red śāli, cold and added with honey, should be given to eat. It relieves even chronic thirst. [25]

तृष्णायामप्राप्तजले दोष:

पूर्वामयातुरः सन् दीनस्तृष्णाऽर्दितो जलं याचन्। न लभेत चेदाश्वेव मरणमाप्नोति दीर्घरोगं वा॥ २६॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति। तस्मात् सर्वास्ववस्थासु न क्वचिद्वारि वार्य्यते॥ २७॥

If the patient afflicted with the diseases said earlier suffers from thirst and does not get water, he succumbs shortly or gets some chronic disorder. Thirst gives rise to mental confusion which further leads to death and as such water is not contra-indicated in any condition. [26-27]

॥ इति तृष्णाचिकित्सा॥ १६॥

Thus ends treatment of tṛṣṇā. [16]

१७. सप्तदशोऽध्यायः

CHAPTER XVII

मूर्च्छा-चिकित्सा

Treatment of Mūrcchā (fainting)

क्रियाक्रमः

**सेकावगाहौ मणयः सहाराः शीताः प्रदेहा व्यजनानिलश्च।
शीतानि पानानि च गन्धवन्ति सर्वासु मूर्च्छास्वनिवारितानि॥ १॥**

Sprinkling and bath, (wearing) necklaces of pearl etc, cold anointings, fan-air and aromatic cold beverages – these are (prescribed and) not restricted in any type of mūrcchā. [1]

**सिद्धानि वर्गे मधुरे पयांसि सदाडिमा जाङ्गलजा रसाश्च।
तथा यवा लोहितशालयश्च मूर्च्छासु शस्ताश्च सतीनमुद्गाः॥ २॥**

Milk cooked with sweet (vitaliser) group, meat-soup of wild animals soured with pomegranate, barley, red śāli rice, pea and green gram – these are useful in mūrcchā. [2]

यथादोषं कषायाणि ज्वरघ्नानि प्रयोजयेत्॥ ३॥

Moreover, the decoctions indicated in fever should also be used according to doṣa. [3]

**रक्तजायान्तु मूर्च्छायां हितः शीतक्रियाविधिः। मद्यजायां वमेन्मद्यं निद्रां सेवेद् यथासुखम्।
विषजायां विषघ्नानि भेषजानि प्रयोजयेत्॥ ४॥**

In raktaja type (fainting caused by blood disorder) cold measures are wholesome. In that caused by alcoholic drinks, the wine taken should be vomited followed by relaxation and sleep. In fainting caused by poison, anti-poison drugs should be administered. [4]

कोलमज्जाऽऽदिचूर्णं पिप्पलीचूर्णञ्च

कोलमज्जोषणोशीरकेशरं शीतवारिणा। पीतं मूर्च्छां जयेल्लीढ्वा कृष्णां वा मधुसंयुताम्॥ ५॥

(the powder of) badara (seed-kernel), marica, uśīra and nāgakeśara, taken with cold water, alleviates fainting; similarly does pippalī (powder) taken with honey. [5]

महौषधादिक्वाथः

महौषधामृताक्षुद्रापौष्करग्रन्थिकोद्भवम्। पिबेत् कणायुतं क्वाथं मूर्च्छायेषु मदेषु च॥ ६॥

Mahauṣadhādi kvātha

Mahauṣadha (śuṇṭhī), guḍūcī, kaṇṭakārī, puṣkaramūla and pippalīmūla – this decoction added with pippalī powder should be taken in mūrcchā and mada (narcosis). [6]

शतावर्यादिक्षीरं बलाबीजञ्च

शतावरीबलामूलद्राक्षासिद्धं पयः पिबेत्। ससितं भ्रमनाशाय बीजं वाट्यालकस्य वा॥ ७॥

To control vertigo, one should take milk processed with śatāvarī, balā root and drākṣā added with sugar, or the seeds of balā. [7]

भ्रमनाशकाः योगाः

पिबेद् दुरालभाक्काथं सघृतं भ्रमशान्तये॥ ८॥

The decoction of durālabhā added with ghee should be taken to check vertigo. [8]

त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा। रसायनानां कौम्भस्य सर्पिषो वा प्रशस्यते॥ ९॥

Or the use of triphalā, milk, rasāyanas or ten years old ghee is recommended. [9]

त्रिफलागुडार्द्रकयोगः

मधुना हन्त्युपयुक्ता त्रिफला रात्रौ गुडार्द्रकं प्रातः।
सप्ताहात् पथ्यभुजो मदमूर्च्छाकासकामलोन्मादान्॥ १०॥

The use of triphalā with honey in night and fresh ginger with jaggery in morning keeping on wholesome diet for a week alleviates narcosis, fainting, cough, jaundice and insanity. [10]

अवबोधनोपायाः

अञ्जनान्यवपीडाश्च धूमाः प्रधमनानि च। सूचीभिस्तोदनं शस्तं दाहः पीडा नखान्तरे॥ ११॥
लुञ्चनं केशरोम्णाञ्च दन्तैर्दशनमेव च। आत्मगुप्ताऽवघर्षश्च हितास्तस्यावबोधने॥ १२॥

Collyrium, pressed juice, smoking, blowing, piercing needle in nail bed, pulling out hairs, biting with teeth and rubbing with (irritant and itching hairs) of kapikacchū are used for resuscitation. [11-12]

॥ इति मूर्च्छाचिकित्सा॥ १७॥

Thus ends treatment of mūrcchā. [17]

१८. अष्टादशोऽध्याय:

CHAPTER XVIII

मदात्यय-चिकित्सा

Treatment of Madātyaya (alcoholism)

मन्थप्रयोग:

मन्थ: खर्जूरमृद्वीकावृक्षाम्लाम्लीकदाडिमै:। परूषकै: सामलकैर्युक्तो मद्यविकारनुत्॥ १॥

Churned drink prepared of kharjūra, drākṣā, vṛkāṣmla, amlikā, dāḍima, paruṣaka and āmalaka alleviates disorders (caused by improper intake) of wine. [1]

तर्पणयूषादिकल्पना

सतीनमुद्गमिश्रान् वा दाडिमामलकान्वितान्। द्राक्षामलकखर्जूरपरूषकरसेन वा।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधात्मकान्॥ २॥

Likewise, various saturating drinks, soups and meat-soups should be prepared (particularly consisting) of pea and green gram or dāḍima and āmalaka or the juice of drākṣā, āmalaka, kharjūra and paruṣaka. [2]

वातिकमदात्ययचिकित्सा

मद्यं सौवर्च्चलव्योषयुक्तं किञ्चिज्जलान्वितम्। जीर्णमद्याय दातव्यं वातपानात्ययापहम्॥ ३॥

In vātika (type of) madātyaya, wine may be given combined with sauvarcala and trikaṭu and little water after the (previous dose) of wine is digested. [3]

पैत्तिकमदात्ययचिकित्सा

मुद्गयूष: सितायुक्त: स्वादुर्वा पैशितो रस:। पित्तपानात्यये योज्या: सर्वतश्च क्रिया हिमा:॥ ४॥

In paittika madātyaya, soup of green gram added with sugar or sweet meat-soup should be used with overall cold measures. [4]

श्लैष्मिकमदात्ययचिकित्सा

पानात्यये कफोद्भूते लङ्घनञ्च यथाबलम्। दीपनीयौषधोपेतं पिबेन्मद्यं समाहित:॥ ५॥

In madātyaya caused by kapha, one should observe fasting according to strength and take wine added with appetising (pungent) drugs. [5]

सान्निपातिकमदात्ययचिकित्सा

सर्वजे सर्वमेवेदं प्रयोक्तव्यं चिकित्सितम्॥ ६॥

In madātyaya caused by all doṣas, all these remedies should be used. [6]

क्षीरप्रयोग:

आभि:क्रियाभिर्मिश्राभि: शान्तिं याति मदात्यय:। न चेन्मद्यक्रमं मुक्त्वा क्षीरमस्य प्रयोजयेत्॥ ७॥

Even if by all these combined measures madātyaya does not subside the course of wine should be abandoned and milk should be used. [7]

लङ्घनाद्यै: कफे क्षीणे जातदौर्बल्यलाघवे। ओजस्तुल्यगुणं क्षीरं विपरीतश्च मद्यत:॥ ८॥
क्षीरप्रयोगं मद्यं वा क्रमेणाल्पाल्पमाचरेत्॥ ९॥

When kapha is diminished with appearance of debility and lightness by fasting etc. Milk should be used which is similar to ojas and opposite to wine in properties. After the disorder is eliminated and strength is regained the use of milk is withdrawn or that of wine should be restored in a gradual order in small quantity. [9]

पुनर्नवाद्यं घृतम्

पय:पुनर्नवाक्काथयष्टीकल्कप्रसाधितम्। घृतं पुष्टिकरं पानान्मद्यपानहतौजस:॥ १०॥

Punarnavādya ghṛta

Ghee cooked with milk, punarnavā decoction and paste of madhuyaṣṭī promotes strength in person with ojas affected by alcoholic drink. [10]

अष्टाङ्गलवणम्

सौवर्च्चलमजाज्यश्च वृक्षाम्लं साम्लवेतसम्। त्वगेलामरिचार्धांशं शर्कराभागयोजितम्॥ ११॥
हितं लवणमष्टाङ्गमग्निसन्दीपनं परम्। मदात्यये कफप्राये दद्यात् स्रोतोविशोधनम्॥ १२॥

Aṣṭāṅga lavaṇa

Sauvarcala, jīraka, vṛkṣāmla and amlavetasa each one part, tvak, elā and marica each one-half part and sugar one part – this aṣṭāṅga lavana is a good appetiser, channel-clearing and wholesome in madātyaya predominant in kapha. [11-12]

चव्यादिचूर्णम्

चव्यं सौवर्चलं हिङ्गु पूरकं विश्वदीप्यकम्। चूर्णं मद्येन पातव्यं पानात्ययरुजाऽपहम्॥ १३॥

Cavyādi cūrṇa

Cavya, sauvarcala, hiṅgu, bījapūra (fruit-rind), śuṇṭhī and yavānī – this powder should be taken with wine to alleviate disorders caused by madātyaya. [13]

मद्यपानविधि:

जलाप्लुतश्चन्दनरूषिताङ्ग: स्रग्वी सभक्तां पिशितोपदंशाम्।
पिबन् सुरां नैव लभेत रोगान् मनोमतिघ्नश्च मदं न याति॥ १४॥

If one drinks wine after taking bath, applying paste of sandal on body, wearing garland and taking rice (food) with meat he does not get affected with alcoholic disorders nor

nacrosis with mental aberrations. [14]

द्राक्षादिपानकम्

द्राक्षाकपित्थफलदाडिमपानकं यत् तत् पानविभ्रमहरं मधुशर्कराऽऽढ्यम्।। १५ ।।

Syrup of drākṣā, kapittha (fruit) and pomegranates added with honey and sugar destroys affliction (caused by preverted use) of alcoholic drinks. [15]

घृतयोगा:

पथ्याक्वाथेन संसिद्धं घृतं धात्रीरसेन वा। सर्पिः कल्याणकं वाऽपि मदमूर्च्छाहरं पिबेत्।। १६ ।।

Ghṛta cooked with harītakī decoction or āmalaka juice or kalyāṇaka ghṛta should be used to alleviate narcosis and fainting. [16]

पूगमदोपचार:

सच्छर्दिमूर्च्छाऽतीसारं मदं पूगफलोद्भवम्। सद्यः प्रशमयेत् पीतमातृप्तेर्वारि शीतलम्।। १७ ।।
वन्यकरीषघ्राणाज्जलपानाल्लवणभक्षणाद्वाऽपि। शाम्यति पूगफलमदश्चूर्णरुजा शर्कराकवलात्।। १८ ।।
शङ्खचूर्णरजोघ्राणात् स्वल्पं मदमपोहति।। १९ ।।

Narcosis produced by intake of betel nut causing vomiting, fainting and diarrhoea is pacified quickly by intake of cold water upto full satisfaction. [17]

Narcosis caused by (intake of) betel nut subsides by smelling wild cow-dung, drinking water and taking salt. The distress due to (excessive) lime is relieved by keeping sugar in mouth. [18]

If slight, the (above) marcosis is removed by inhaling the lime of conch-shell. [19]

कोद्रवादिमदचिकित्सा

कूष्माण्डरसः सगुडः शमयति मदमाशु मदनकोद्रवजम्। धौस्तूरकश्च दुग्धं सशर्करं पानयोगेन।। २० ।।

Narcosis caused by intake of toxic kodo grains is removed by taking kūṣmāṇḍa (fruit) juice added with jaggery; likewise, intake of sugared milk alleviates narcosis caused by dhattūra. [20]

।। इति मदात्ययचिकित्सा।। १८ ।।

Thus ends treatment of madātyaya. [18]

१९. ऊनविंशोऽध्यायः

CHAPTER XIX

दाह-चिकित्सा

Treatment of Dāha (burning sensation)

सामान्योपचारः

यत् पित्तज्वरदाहोक्तं दाहे तत् सर्वमिष्यते ॥ १ ॥

Whatever is prescribed in burning sensation arisen in paittika fever should be adopted in (treatment of) dāha. [1]

प्रदेहद्वयम्

शतधौतघृताभ्यक्तं दिह्याद्वा यवशक्तुभिः। कोलामलकयुक्तैर्वा धान्याम्लैरपि बुद्धिमान् ॥ २ ॥

The patient, at first, should be anointed with śatadhauta ghṛta (ghee washed hundred times with water) and then should apply the paste of barley flour or badara and āmalaka mixed with sour gruel. [2]

अपरे विविधोपचाराः

छादयेत् तस्य सर्वाङ्गमारनालार्द्रवाससा। लामज्जेनाथ शुक्तेन चन्दनेनानुलेपयेत् ॥ ३ ॥

Entire body of the patient should be covered with cloth wetted with sour gruel and the paste of lāmajjaka, vinegar and sandal should be applied. [3]

चन्दनाम्बुकणास्यन्दितालवृन्तोपवीजितः। सुप्याद्दाहार्दितोऽम्भोजकदलीदलसंस्तरे ॥ ४ ॥

One suffering from burning sensation should sleep on the bed of the lotus and banana leaves being served with palm-fan drizzling sandal water. [4]

दाहे शीतलजलप्रयोगः

परिषेकावगाहेषु व्यजनानाञ्च सेवने। शस्यते शिशिरं तोयं तृष्णादाहप्रशान्तये ॥ ५ ॥

For pacifying thirst and burning sensation cold water should be used in sprinkling, bath and fans. [5]

क्षीरैः क्षीरिकषायैश्च सुशीतैश्चन्दनान्वितैः। अन्तर्दाहं प्रशमयेदेतैरन्यैश्च शीतलैः ॥ ६ ॥

The internal heat should be pacified by cold milk and decoction of laticiferous plants combined with sandal and other cold items. [6]

कुशाद्यं तैलं घृतञ्च

कुशादिशालपर्णीभिर्जीवकाद्येन साधितम्। तैलं घृतं वा दाहघ्नं वातपित्तविनाशनम् ॥ ७ ॥

Kuśādya taila and ghṛta

Oil or ghee cooked with (decoction of) kuśādi (tṛṇapañcamūla) and laghupañcamūla and (paste of) aṣṭavarga alleviates vāta and pitta. [7]

फलिन्यादिप्रलेप:

फलिनी लोध्रसेव्याम्बु हेम पत्रं कुटन्नटम्। कालीयकरसोपेतं दाहे शस्तं प्रलेपनम्॥ ८॥

Priyaṅgu, lodhra, uśīra, bālaka, nāgakeśara, patra, kaivarttamustaka – these are pounded with the juice (decoction) of kālīyaka and applied as paste to relieve burning sensation. [8]

अवगाहनार्थं ह्रीबेरादि

ह्रीबेरपद्मकोशीरचन्दनक्षोदवारिणा। सम्पूर्णामवगाहेत द्रोणीं दाहार्दितो नरः॥ ९॥

The patient suffering from burning sensation should take bath in a tub filled with water mixed with the powder of bālaka, padmaka, uśīra and candana. [9]

॥ इति दाहचिकित्सा॥ १९॥

Thus ends treatment of dāha. [19]

२०. विंशोऽध्यायः

CHAPTER XX

उन्माद-चिकित्सा

Treatment of Unmāda (insanity)

क्रियाक्रमः

उन्मादे वातिके पूर्वं स्नेहपानं विरेचनम्। पित्तजे कफजे वान्तिः परो वस्त्यादिकः क्रमः ॥ १ ॥
यच्चोपदेक्ष्यते किञ्चिदपस्मारचिकित्सिते। उन्मादे तच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः ॥ २ ॥

In insanity, at first, intake of sneha, purgation and emesis should be applied in vātika, paittika and kaphaja types respectively and thereafter the measures like enema etc. [1]

Whatever is prescribed in treatment of epilepsy should be adopted in insanity as well because of similarity in etiology and basic pathogenic material. [2]

चत्वारः स्वरसंयोगाः

ब्राह्मीकूष्माण्डीफलषड्ग्रन्थाशङ्खपुष्पिकास्वरसाः । उन्मादहृतो दृष्टाः पृथगेते कुष्ठमधुमिश्राः ॥ ३ ॥

The juice of each brāhmī, kūṣmāṇḍa, vacā and śaṅkhapuṣpī mixed with kuṣṭha and honey alleviates insanity. [3]

दशमूलकषायः पुराणघृतञ्च

दशमूलाम्बु सघृतं युक्तं मांसरसेन वा। ससिद्धार्थकचूर्णं वा पुराणं वैककं घृतम् ॥ ४ ॥

Decoction of Daśamūla is used added with ghee or meat-soup or mustard powder or old ghee alone is sufficient. [4]

पुराणघृतस्य लक्षणम्

उग्रगन्धं पुराणं स्याद् दशवर्षस्थितं घृतम्। लाक्षारसनिभं शीतं प्रपुराणमतः परम् ॥ ५ ॥

Ghee ten years old is known as 'purāna: It has intense small, consistency like that of lac- juice and is cold. Thereafter it is known as' 'Prapurāṇa'. [5]

धुस्तूरमूलपायसः

श्वेतोन्मत्तोत्तरदिङ्मूलसिद्धस्तु पायसः। गुडाज्यसंयुतो हन्ति सर्वोन्मादांस्तु दोषजान् ॥ ६ ॥

Pāyasa (rice cooked with milk) cooked with northern root of white dhattūra added with jaggery and ghee destroys all types of insanity caused by doṣas. [6]

उन्मादघ्ना उपचाराः

उन्मादे समधुः पेयः शुद्धो वा तालशाखजः। रसो नस्येऽभ्यञ्जने च सार्षपं तैलमिष्यते ॥ ७ ॥

अपक्वचटकी क्षीरपीतोन्मादविनाशनी। बद्धं सार्षपतैलोक्तमुत्तानश्चातपे न्यसेत्॥ ८॥

In insanity the juice of palm tree should be taken added with honey. Besides, mustard oil should be used for snuffing and anointing. [7]

Uncooked pounded sparrow taken with milk destroys insanity. The patient after anointing with mustard oil, should be tied and laid down in the sun. [8]

सिद्धार्थकादि:

सिद्धार्थको हिङ्गु वचा करञ्जो देवदारु च। मञ्जिष्ठा त्रिफला श्वेता कटभीत्वक् कटुत्रिकम्॥ ९॥
समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम्। बस्तमूत्रेण पिष्टोऽयमगदः पानमञ्जनम्॥ १०॥
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा। अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहः॥ ११॥
भूतेभ्यश्च भयं हन्ति राजद्वारे च शस्यते। सर्पिरेतेन सिद्धं वा सगोमूत्रं तदर्थकृत्॥ १२॥

Siddharthakādi

Siddhārtha (yellow mustard), vacā, hingu, karañja, devadāru, mañjiṣṭhā, triphalā, śvetā, kaṭabhī (bark), trikaṭu, priyaṅgu, śirīṣa, haridrā and dāruharidrā – these in equal quantity are pounded together with goat's urine. It is antitoxic and used in the form of intake, collyrium, snuff, paste, bath and anointing. It destroys epilepsy, poisoning, insanity, witchcraft, inauspiciousness and fever. It also averts fear from evil spirits and is auspicious in royal palace.

Ghee cooked with the above along with Cow's urine acts similarly. [9-12]

त्र्यूषणाद्या वर्त्तिः

त्र्यूषणं हिङ्गु लवणं वचा कटुकरोहिणी। शिरीषनक्तमालानां बीजं श्वेताश्च सर्षपाः॥ १३॥
गोमूत्रपिष्टैरेतैर्वा वर्त्तिर्नेत्राञ्जने हिता। चतुर्थकमपस्मारमुन्मादञ्च नियच्छति॥ १४॥

Tryūṣaṇādya vartti

Tryūṣaṇa (trikaṭu), hingu, salt, vacā, kaṭukā, seeds of śiriṣa and naktamāla and white mustard – these pounded together with cow's urine are made into sticks. It is used as collyrium in eyes in quartan fever, epilepsy and insanity. [13-14]

विशेषोपचारः

शुद्धस्याचारविभ्रंशे तीक्ष्णं नावनमञ्जनम्। ताडनञ्च मनोबुद्धिस्मृतिसंवेजनं हितम्॥ १५॥
तर्जनं त्रासनं दानं सान्त्वनं हर्षणं भयम्। विस्मयो विस्मृतेर्हेतोर्नयन्ति प्रकृतिं मनः॥ १६॥
कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान्। परस्परं प्रतिद्वन्द्वैरेभिरेव शमं नयेत्॥ १७॥

In case of disorderly behaviour, after proper evacuation, irritant snuff, collyrium and striking should be resorted to which agitate mind, intellect and memory. Threatening, frightening, persecution, assurance, pleasantries, fear and surprise – these lead to recovery of mind by forgetting (pushing the etiological factor in background). [15-16]

Insanity caused by lust, anxiety, fear, anger, exhilaration, envy and greed should be controlled by antagonistic emotions among these. [17]

इष्टद्रव्यविनाशात्तु मनो यस्योपहन्यते। तस्य तत्सदृशप्राप्तैः सान्त्वाश्वासैश्च ताञ्जयेत्॥ १८॥

If mind is wounded by loss of some cherished thing it should be treated with providing similar one coupled with assurance and consolation. [18]

संज्ञाप्रबोधनसाधनानि

प्रदेहोत्सादनाभ्यङ्गधूमाः पानञ्च सर्पिषः। प्रयोक्तव्यं मनोबुद्धिस्मृतिसंज्ञाप्रबोधनम्॥ १९॥

Paste, anointing, massage, smoking and intake of ghee – these should be used to arouse mind, intellect, memory and consciousness. [19]

विशिष्टयोगाः

कल्याणकं महद्वाऽपि दद्याद्वा चैतसं घृतम्। तैलं नारायणञ्चापि महानारायणं तथा॥ २०॥

Besides, Kalyānaka ghṛta, mahācaitasa ghṛta, nārāyaṇa taila and mahānārāyaṇa taila should be used. [20]

पानीयकल्याणकं घृतम्

विशाला त्रिफला कौन्ती देवदार्वेलबालुकम्। स्थिरा नतं रजन्यौ द्वे शारिवे द्वे प्रियङ्गुका॥ २१॥
नीलोत्पलैलामञ्जिष्ठादन्तीदाडिमकेशरम्। तालीशपत्रं बृहती मालत्याः कुसुमं नवम्॥ २२॥
विडङ्गं पृश्निपर्णी च कुष्ठं चन्दनपद्मकौ। अष्टाविंशतिभिः कल्कैरेतैरक्षसमन्वितैः॥ २३॥
चतुर्गुणं जलं दत्त्वा घृतप्रस्थं विपाचयेत्। अपस्मारे ज्वरे कासे शोषे मन्दानले क्षये॥ २४॥
वातरक्ते प्रतिश्याये तृतीयकचतुर्थके। वम्यर्शोमूत्रकृच्छ्रेषु विसर्पोपहतेषु च॥ २५॥
कण्डूपाण्ड्वामयोन्मादे विषमेहगरेषु च। भूतोपहतचित्तानां गद्गदानामरेतसाम्॥ २६॥
शस्तं स्त्रीणांञ्च वन्ध्यानामायुर्वर्णबलप्रदम्। अलक्ष्मीपापरक्षोघ्नं सर्वग्रहविनाशनम्॥
कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च॥ २७॥

Pānīyakalyānaka ghṛta

Ghee 640 gm is cooked with (the paste of) viśālā, triphalā, reṇukā, devadāru, elavāluka, śālaparṇī, tagara, haridrā, dāruharidrā, sārivā, kṛṣṇasārivā, priyaṅgu, nīlotpala, elā, mañjiṣṭhā, dantī, dāḍima, nāgakeśara, tālīśapatra, bṛhatī, fresh flowers of jātī, viḍaṅga, pṛśniparṇī, kuṣṭha, candana and padmaka (total twenty eight drugs) along with four times water. It is useful in epilepsy, fever, cough, consumption, diminished digestive fire, wasting, vātarakta, coryza, tertian and quartan fevers, vomiting, piles, dysuria, erysipelas, itching, anaemia, insanity, poisons, prameha and those who are mentally afflicted by evil spirits and have indistinct speech and loss of semen and sterile women. It promotes life-span, lustre and strength, destroys inauspiciousness, sins and evil spirits with all seizures. This kalyānaka ghṛta is also good for puṃsavana. [21-27]

क्षीरकल्याणकं घृतम्

द्विजलं सचतुःक्षीरं क्षीरकल्याणकन्त्विदम्॥ २८॥

Kṣīrakalyāṇaka ghṛta

The same (cooked) with double water and four times milk is known as kṣīrakalyāṇaka. [28]

महाकल्याणकं घृतम्

एभ्य एव स्थिराऽऽदीनि जले पक्त्वैकविंशतिम्। रसे तस्मिन् पचेत् सर्पिर्गृष्टिक्षीरं चतुर्गुणम्॥ २९॥
वीराद्विमाषकाकोलीस्वयंगुप्तर्षभर्द्धिभिः। मेदया च समैः कल्कैस्तत् स्यात् कल्याणकं महत्।
बृंहणीयं विशेषण सन्निपातहरं परम्॥ ३०॥

Mahākalyāṇaka ghṛta

The above viśālā etc. (as in pānīyakalyāṇaka ghṛta) along with (drugs of) vidārigandhādi group (twenty one in number) are decocted. In this decoction ghee is cooked with four times cow-milk along with the paste of vīrā, two types of māṣa (rājamāṣa and ordinary māṣa), kākolī, kṣīrakākolī, kapikacchū, ṛṣabhaka, ṛddhi and medā (all in equal quantity). This is known as mahākalyāṇaka ghṛta which promotes body-weight and is a good remedy for sannipāta. [29-30]

चैतसं घृतम्

पञ्चमूल्यावकाश्मर्य्यौ रास्नैरण्डत्रिवृद्बलाः। मूर्वा शतावरी चेति क्वाथ्यैर्द्विपलिकैरिमैः॥ ३१॥
कल्याणकस्य चाङ्गेन तद् घृतं चैतसं स्मृतम्। सर्वचेतोविकाराणां शमनं परमं मतम्॥ ३२॥
घृतप्रस्थोऽत्र पक्तव्यः क्वाथो द्रोणाम्भसा घृतात्। चतुर्गुणोऽत्र सम्पाद्यः कल्कः कल्याणकेरितः॥ ३३॥

Caitasa ghṛta

Daśamūla (without gambhārī), rāsnā, eraṇḍa, trivṛt, balā, mūrvā and śatāvarī each 80 gm – with this decoction and the paste of drugs mentioned in pānīyakalyāṇaka (ghṛta) ghee is cooked which is known as 'caitasa'. It is an excellent remedy for all mental diseases. Here ghee is 640 gm, decoction made in water 10.24 litre being four times of ghee and paste as in pānīyakalyāṇaka. [31-33]

महापैशाचिकं घृतम्

जटिला पूतना केशी चारटी मर्कटी वचा। त्रायमाणा जया वीरा चोरकः कटुरोहिणी॥ ३४॥
वयःस्था शूकरी छत्रा सातिच्छत्रा पलङ्कषा। महापुरुषदन्ता च वयःस्था नाकुलीद्वयम्॥ ३५॥
कटम्भरा वृश्चिकाली स्थिरा चैव च तैर्घृतम्। सिद्धं चातुर्थकोन्मादग्रहापस्मारनाशनम्॥ ३६॥
महापैशाचिकं नाम घृतमेतद् यथाऽमृतम्। मेधाबुद्धिस्मृतिकरं बालानाञ्चाङ्गवर्द्धनम्॥ ३७॥

Mahāpaiśācika ghṛta

Ghee is cooked with jaṭāmāṃsī, harītakī, bhūtakeśī, cāraṭī, kapikacchū, vacā, trāyamāṇā,

jayantī, vīrā, coraka, kaṭukā, brāhmī, vārāhīkanda, śatapuṣpā, madhuka, guggulu, śatāvarī, guḍūcī, nākulī, gandhanākulī, kaṭabhī, vṛścikālī and śālaparṇī. It destroys quartan fever, insanity, seizures and epilepsy. This ghṛta known as mahāpaiśācika is like nectar and promotes intellect, retention and memory and development in children. [34-37]

हिङ्ग्वाद्यं घृतम्

हिङ्गुसौवर्च्चलव्योषैर्द्विपलांशैर्घृताढकम्। चतुर्गुणे गवां मूत्रे सिद्धमुन्मादनाशनम्॥ ३८॥

Hiṅgvādya ghṛta

Ghee 2.56 kg cooked with hiṅgu, sauvarcala and trikaṭu (each 80 gm) alongwith four times cow-urine is a tried remedy for insanity. [38]

लशुनाद्यं घृतम्

लशुनस्याविनष्टस्य तुलाऽर्द्धं निस्तुषीकृतम्। तदर्द्धं दशमूल्यास्तु द्व्याढकेऽपां विपाचयेत्॥ ३९॥
पादशेषे घृतप्रस्थं लशुनस्य रसं तथा। कोलमूलकवृक्षाम्लमातुलुङ्गार्द्रकै रसैः॥ ४०॥
दाडिमाम्बुसुरामस्तुकाञ्जिकाम्लैस्तदर्धिकैः। साधयेत् त्रिफलादारुलवणव्योषदीप्यकैः॥ ४१॥
यमानीचव्यहिङ्ग्वम्लवेतसैश्च पलार्धिकैः। सिद्धमेतत् पिबेच्छूलगुल्मार्शोजठरापहम्॥ ४२॥
ब्रध्नपाण्ड्वामयप्लीहयोनिदोषक्रिमिज्वरान्। वातश्लेष्मामयांश्चान्यानुन्मादांश्चापकर्षति॥ ४३॥

Laśunādya ghṛta

Undamaged and clean garlic dehusked 2 kg and daśamūla 1 kg are boiled in water 5.12 litre reduced to one-fourth. Now ghee 640 gm is cooked therewith adding garlic juice 640 ml, juice of badara, mūlaka, vṛkṣāmla, bījapūra, fresh ginger, pomegranate, wine, curd water and sour gruel each 320 ml and the paste of triphalā, devadāru, saindhava, trikaṭu, ajamodā, yavānī, cavya, hiṅgu and amlavetasa – each 20 gm. This ghrta alleviates abdominal pain, gulma, piles, udararoga, bradhna, anaemia, splenomegaly, uterine disorders, worms, fever, other disorders caused by vāta and kapha and insanity. [39-43]

आगन्तून्मादचिकित्सा

सर्पिःपानादिरागन्तोर्मन्त्रादिश्चेष्यते विधिः। पूजाबल्युपहारेष्टिहोममन्त्राञ्जनादिभिः।
जयेदागन्तुमुन्मादं यथाविधि शुचिर्भिषक्॥ ४४॥

Treatment of insanity of exogenous origin

In the exogenous type (of insanity) intake of ghee etc. and incantation etc. are prescribed. The physician, purified himself, should treat exogenous insanity with worship, oblations, offering, sacrifices, fire-oblation, incantation, anointing etc. [44]

कृष्णाद्यमञ्जनम्

कृष्णामरिचसिन्धूत्थमधुगोपित्तनिर्मितम्। अञ्जनं सर्वभूतोत्थमहोन्मादविनाशनम्॥ ४५॥

Kṛṣṇādyañjana

Colliyrium prepared of kṛṣṇā (pippalī), marica, saindhava, honey and ox-bile destroys insanity caused by all types of evil spirits and seizures. [45]

दार्व्यादिगुडिकाञ्जनम्

दार्वीमधुभ्यां पुष्यायां कृतश्च गुडिकाञ्जनम् ॥ ४६ ॥

Guḍikāñjana

Pill made of dāruharidrā and honey in puṣya constellation is (rubbed and) used as collyrium. [46]

मरिचाञ्जनम्

मरिचं वाऽऽतपे मासं सपित्तं हितमञ्जनम्। वैकृतं पश्यतः कार्य्यं दोषभूतहतस्मृतेः ॥ ४७ ॥

Marica impregnated with ox-bile in the sun for a month is beneficial as collyrium. It is used in distorted vision and loss of memory due to doṣa and evil spirits. [47]

निम्बपत्रादिधूपः

निम्बपत्रवचाहिङ्गुसर्पनिर्मोकसर्षपैः। डाकिन्यादिहरो धूपो भूतोन्मादविनाशनः ॥ ४८ ॥

Nimbapatrādi dhūpa

Nimba leaves, vacā, hiṅgu, serpent's slough and mustard– This incense destroys witchcraft and insanity caused by evil spirits. [48]

कार्पासास्थ्यादिधूपः

कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिण्डीतकैस्त्वग्वांशीवृषदंशविट्तुषवचाकेशाहिनिर्मोककैः।
गोशृङ्गद्विपदन्तहिङ्गुमरिचैस्तुल्यैस्तु धूपः कृतः स्कन्दोन्मादपिशाचराक्षससुरावेशज्वरघ्नः स्मृतः ॥ ४९ ॥

Kārpāsāsthyādi dhūpa

Kārpāsa seeds, peacock's feather, bṛhatī, nirmālya, madana, tvak, vaṁśalocana, cat's excreta, husk, vacā, hair, serpent's slough, cow-horn, elephant-tusk, hiṅgu and marica – this used as incense alleviates insanity of exogenous origin and fever. [49]

नस्यद्वयम्

ब्रह्मराक्षसजिन्नस्यं पक्वैन्द्रीफलमूलजम्। साज्यं भूतहरं नस्यं श्वेताज्येष्ठाम्बुनिर्मितम् ॥ ५० ॥

Snuff made of ripe fruits of indravāruṇī mixed with cow-urine and ghee destroys evil spirits and so does that of śvetā and rice-water. [50]

देवाद्यावेशोन्मादे निषिद्धानि

देवर्षिपितृगन्धर्वैरुन्मत्तस्य च बुद्धिमान्। वर्जयेदञ्जनादीनि तीक्ष्णानि क्रूरमेव च ॥ ५१ ॥

In insanity caused by gods, sages, forefathers and gandharvas, one should avoid the irritant types of collyrium etc. and other harsh measures. [51]

मुक्तोन्मादस्य लक्षणम्

प्रसादश्चेन्द्रियार्थानां बुद्ध्यात्ममनसां तथा। धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम् ॥ ५२ ॥

Normal perception and clarity of senses, intellect and mind and normalcy of dhātus – this is the sign of recovery in insanity. [52]

॥ इत्युन्मादचिकित्सा ॥ २० ॥

Thus ends treatment of unmāda. [20]

२१. एकविंशोऽध्याय:

CHAPTER XXI

अपस्मार-चिकित्सा

Treatment of Apasmāra (epilepsy)

क्रियाक्रम:

वातिकं वस्तिभि: प्राय: पैत्तं प्रायो विरेचनै:। श्लैष्मिकं वमनप्रायैरपस्मारमुपाचरेत् ॥ १ ॥
सर्वत: सुविशुद्धस्य सम्यगाश्वासितस्य च। अपस्मारविमोक्षार्थं योगान् संशमनाञ्छृणु ॥ २ ॥

Vātika, paittika and kaphaja types of apasmāra are mostly treated with enema, purgation and emesis respectively. When the patient is evacuated in every way and is well assured, the pacifying formulations to alleviate the disease should be used which are as follows. [1-2]

मनोह्वाद्यञ्जनम्

मनोह्वा तार्क्ष्यजश्चैव शकृत् पारावतस्य च। अञ्जनं हन्त्यपस्मारमुन्मादञ्च विशेषत: ॥ ३ ॥

Manohvādi añjana

Manohvā (realgar), rasāñjana, pigeon's faeces – this used as collyrium destroys insanity as well as epilepsy. [3]

अपस्मारादौ यष्ट्यादिनस्याञ्जने

यष्टिहिङ्गुवचावक्रशिरीषलशुनामयै:। साजामूत्रैरपस्मारे सोन्मादे नावनाञ्जने ॥ ४ ॥

Yaṣṭyādi yoga

Yaṣṭī (madhuka), hiṅgu, vacā, tagara, śirīṣa, laśuna, and kuṣṭha – these are pounded with goat's urine and used as snuff and collyrium in epilepsy and insanity. [4]

कुक्कुरपित्तप्रयोग:

पुष्योद्धृतं शुन: पित्तमपस्मारघ्नमञ्जनम्। तदेव सर्पिषा युक्तं धूपनं परमं स्मृतम् ॥ ५ ॥

The bile of dog extracted in puṣya constellation and used as collyrium destroys epilepsy. The same is also used as incense after mixing with ghee. [5]

नकुलादितुण्डादिभि: धूपनम्

नकुलोलूकमार्जारगृध्रकीटाहिकाकजै:। तुण्डै: पक्षै: पुरीषैश्च धूपनं कारयेद्भिषक् ॥ ६ ॥

Mongoose, owl, cat, vulture, a type of scorpion, snake and crow – beaks, feathers and excreta of these should be used as incense. [6]

कायस्थादिवर्त्तिः

कायस्थां शारदान् मुद्गान् मुस्तोशीरयवांस्तथा। सव्योषान् बस्तमूत्रेण पिष्ट्वा वर्त्तीः प्रकल्पयेत्॥ ७॥
अपस्मारे तथोन्मादे सर्पदष्टे गरार्दिते। विषपीते जलमृते चैताः स्युरमृतोपमाः॥ ८॥

Kāyasthādi vartti

Kāyasthā (nirguṇḍī), green gram harvested in autumn, uśīra, barley and trikaṭu – these are pounded with goat's urine and made into small sticks. These are efficacious in epilepsy, insanity, snake-bite, poisoning and drowning. [7-8]

बाह्यप्रयोगाः

अपेतराक्षसीकुष्ठपूतनाकेशिचोरकैः। उत्सादनं मूत्रपिष्टैर्मूत्रैरेवावसेचनम्॥ ९॥

Tulasī, kuṣṭha, bhūtakeśī and coraka – these are anointed after pounding with (goat's or cow's) urine which is also used for sprinkling. [9]

जतुकाशकृता तद्वद् दग्धैर्वा बस्तरोमभिः। अपस्मारहरो लेपो मूत्रसिद्धार्थशिग्रुभिः॥ १०॥

The paste with bat's faeces, burnt goat's hair or mustard and śigru pounded with cow's urine destroys epilepsy. [10]

वचाचूर्णम्

यः खादेत् क्षीरभक्ताशी माक्षिकेण वचारजः। अपस्मारं महाघोरं सुचिरोत्थं जयेद् ध्रुवम्॥ ११॥

One who takes vacā powder with honey keeping on the diet of milk and rice overcomes even severe and chronic epilepsy. [11]

पाशरज्जुमसीप्रयोगः

उल्लम्बितनरग्रीवापाशं दग्ध्वा कृता मसी। शीताम्बुना समं पीता हन्त्यपस्मारमुद्धतम्॥ १२॥

The ash of the rope used for death by hanging taken with cold water alleviates severe epilepsy. [12]

अपरे योगाः

प्रयोज्यं तैललशुनं पयसा वा शतावरी। ब्राह्मीरसश्च मधुना सर्वापस्मारभेषजम्॥ १३॥

Oil and garlic, śatāvarī with milk or brāhmī juice with honey – these are remedies for all types of epilepsy. [13]

निर्दह्य निर्द्रवां कृत्वा छागिकामरनालिकाम्। तामम्लसाधितां खादन्नपस्मारमुदस्यति॥ १४॥

The umbilical cord of goat should be dried and burnt. This ash cooked with sour gruel is taken to alleviate epilepsy. [14]

विशेषोपचारः

हृत्कम्पोऽक्षिरुजा यस्य स्वेदो हस्तादिशीतता। दशमूलीजलं तस्य कल्याणाज्यञ्च योजयेत्॥ १५॥

In case of palpitation of heart, ocular pain, perspiration and coldness of hands etc decoction of daśamūla and kalyāṇa ghṛta should be used. [15]

स्वल्पपञ्चगव्यं घृतम्

गोशकृद्रसदध्यम्लक्षीरमूत्रैः समैर्घृतम्। सिद्धं चतुर्थकोन्मादग्रहापस्मारनाशनम्।। १६ ।।

Svalpapañcagavya ghṛta

Ghee cooked with equal quantity of cow's dung, sour curd, milk and urine destroys quartan fever, insanity, epilepsy and seizures. [16]

बृहत्पञ्चगव्यं घृतम्

द्वे पञ्चमूले त्रिफलां रजन्यौ कुटजत्वचम्। सप्तपर्णमपामार्गं नीलिनीं कटुरोहिणीम्।। १७ ।।
शम्पाकं फल्गु मूलञ्च पौष्करं सदुरालभम्। द्विपलानि जलद्रोणे पक्त्वा पादावशेषिते।। १८ ।।
भार्गीं पाठां त्रिकटुकं त्रिवृतां निचुलानि च। श्रेयसीमाढकीं मूर्वां दन्तीं भूनिम्बचित्रकौ।। १९ ।।
द्वे शारिवे रोहिषञ्च भूतीकं मदयन्तिकाम्। क्षिपेत् पिष्ट्वाऽक्षमात्राणि तैः प्रस्थं सर्पिषं पचेत्।। २० ।।
गोशकृद्रसदध्यम्लक्षीरमूत्रैश्च तत्समैः। पञ्चगव्यमिति ख्यातं महत् तदमृतोपमम्।। २१ ।।
अपस्मारे ज्वरे कासे श्वयथावुदरेषु च। गुल्मार्शःपाण्डुरोगेषु कामलायां हलीमके।
अलक्ष्मीग्रहरक्षोघ्नं चातुर्थकविनाशनम्।। २२ ।।

Bṛhat pañcagavya ghṛta

Daśamūla, triphalā, haridrā, dāruharidrā, kuṭaja bark, saptaparṇa, apāmārga, nīlinī, kaṭukā, āragvadha, kākodumbara, puṣkaramūla and durālabhā each 80 gm are boiled in water 10.24 litre reduced to one-fourth. With this decoction ghee 640 gm should be cooked along with the paste of bhārgī, trikaṭu, trivṛt, nicula, gajapippalī, ādhakī, mūrvā, dantī, bhūnimba, citraka, sārivā, kṛṣṇasārivā, rohiṣa, bhūtīka (yavānī) and madayantikā each 10 gm and also equal quantity of cow's dung, sour curd, milk and urine. This is known as 'mahat pañcagavya' which is like nectar and is useful in epilepsy, fever, cough, oedema, udararoga, gulma, piles, anaemia, jaundice and halīmaka. It destroys inauspiciousness, seizures, evil spirits and quartan fever. [17-22]

महाचैतसं घृतम्

शणस्त्रिवृत् तथैरण्डो दशमूली शतावरी। रास्ना मागधिका शिग्रुः क्वाथ्यं द्विपलिकं भवेत्।। २३ ।।
विदारी मधुकं मेदे द्वे काकोल्यौ सिता तथा। एभिः खर्जूरमृद्वीकाभीरुमुञ्जातगोक्षुरैः ।। २४ ।।
चैतसस्य घृतस्याङ्गैः पक्तव्यं घृतमुत्तमम्। महाचैतससंज्ञन्तु सर्वापस्मारनाशनम्।। २५ ।।
गरोन्मादप्रतिश्यायतृतीयकचतुर्थकान्। पापालक्ष्म्यौ जयेदेतत् सर्वग्रहविनाशनम्।। २६ ।।
श्वासकासहरञ्चैव शुक्रार्त्तवविशोधनम्। घृतमानं क्वाथविधिरिह चैतसवन्मतः ।। २७ ।।
कल्कश्चैतसकल्कोक्तद्रव्यैः सार्द्धञ्च पादिकः। नित्यं मुञ्जातकाप्राप्तौ तालमस्तकमिष्यते।। २८ ।।

Mahācaitasa ghṛta

Śaṇa (root or seed), trivṛt, eraṇḍa, daśamūla, śatāvarī, rāsnā, pippalī and śigru each 80 gm are decocted. The paste consists of vidārī, madhuka, medā, mahāmedā, kākolī, kṣīrakākolī, śarkarā, kharjūra, mṛdvīkā, śatāvarī, muñjāta, gokṣura and such ingredients of caitasa ghṛta. Now ghee is cooked with these which is known as mahācaitasa ghṛta. It destroys all types of epilepsy, poison, insanity, coryza, tertian and quartan fevers, sins and inauspiciousness, all seizures, dyspnoea and cough. It also purifies semen and ārtava.

The quantity of ghee and method of decoction should be as in caitasa ghṛta; the paste also should be, together with the ingredients of caitasa ghṛta, one-fourth (of ghee). As a rule, the head (top portion) of palm is taken in case muñjātaka is not available. [23-28]

कूष्माण्डकघृतम्

कूष्माण्डकरसे सर्पिरष्टादशगुणे पचेत्। यष्ट्याह्वकल्कं तत्पानमपस्मारविनाशनम्॥ २९॥

Kūṣmāṇḍaka ghṛta

Ghee should be cooked with eighteen times juice of kūṣmāṇḍa along with the paste of madhuyaṣṭī. Its use alleviates epilepsy. [29]

ब्राह्मीघृतम्

ब्राह्मीरसे वचाकुष्ठशङ्खपुष्पीभिरेव च। पुराणं मेध्यमुन्मादग्रहापस्मारनुद् घृतम्॥ ३०॥

Brāhmīghṛta

Old ghee cooked in (four times) brāhmī juice with (the paste of) vacā, kuṣṭha and śaṅkhapuṣpī promotes intellect and alleviates insanity, seizures and epilepsy. [30]

पलङ्कषाद्यं तैलम्

पलङ्कषावचापथ्यावृश्चिकाल्यर्कसर्षपैः। जटिलापूतनाकेशीनाकुलीहिङ्गुचोरकैः॥ ३१॥
लशुनातिरसाचित्राकुष्ठैर्विड्भिश्च पक्षिणाम्। मांसाशिनां यथालाभं बस्तमूत्रे चतुर्गुणे॥
सिद्धमभ्यञ्जने तैलमपस्मारविनाशनम्॥ ३२॥

Palaṅkaṣādya taila

Oil is cooked with guggulu, vacā, harītakī, vṛścikālī, arka, sarṣapa, jaṭāmāṃsī, bhūtakeśī, nākulī, hiṅgu, coraka, laśuna, atirasā, dantī, kuṣṭha and faeces of carnivorus birds, as available, in four times goat's urine. By massage, it alleviates epilepsy. [31-32]

अभ्यङ्गः स्नानोत्सादनञ्च

अभ्यङ्गः सार्षपं तैलं बस्तमूत्रे चतुर्गुणे। सिद्धं स्याद्गोशकृन्मूत्रैः स्नानोत्सादनमेव च॥ ३३॥

Mustard oil cooked in four times goat's urine should be used for massage. Likewise, cow-dung should be used for anointing and cow's urine for bath. [33]

॥ इत्यपस्मारचिकित्सा॥ २१॥

Thus ends treatment of apasmāra. [21]

२२. द्वाविंशोऽध्याय:

CHAPTER XXII

वातव्याधि-चिकित्सा

Treatment of Vātavyādhi (specific vātika disorder)

क्रियाक्रम:

स्वाद्वम्ललवणैः स्निग्धैराहारैर्वातरोगिणः। अभ्यङ्गस्नेहवस्त्याद्यैः सर्वानेवोपपादयेत्॥ १॥

All patients of vātavyādhi should be treated with sweets, sours, salty and fatty diet as well as (oily) massage, intake of sneha, enema etc. [1]

विशेषतस्तु कोष्ठस्थे वाते क्षारं पिबेन्नरः। आमाशयस्थे शुद्धस्य यथादोषहरी क्रिया॥ २॥

Particularly in case of vāta located in abdomen one should take alkali and of that in āmāśaya (stomach) evacuation should be done followed by pacificatory measure for the respective doṣa. [2]

आमाशयगते वाते छर्दिताय यथाक्रमम्। देयः षड्धरणो योगः सप्तरात्रं सुखाम्बुना॥ ३॥

If vāta is situated in āmāśaya, at first, emesis should be administered according to prescribed method (unction, sudation and gruel etc) and thereafter be given ṣaḍdharaṇa yoga with tepid water for a week. [3]

षड्धरणयोग:

चित्रकेन्द्रयवाः पाठा कटुकातिविषाऽभयाः। महाव्याधिप्रशमनो योगः षड्धरणः स्मृतः॥ ४॥
पलदशमांशो धरणं योगोऽयं सौश्रुतस्तस्य। माषेण पञ्चगुञ्जकमानेन प्रत्यहं देयः॥ ५॥

Ṣaḍdharaṇa yoga

Citraka, indrayava, pāṭhā, kaṭukā, ativiṣā and harītakī – each in quantity of a dharaṇa. This ṣaḍdharaṇa yoga is a good remedy for mahāvyādhi (vāta covered with medas and kapha). Dharaṇa is one-tenth of a pala (40 gm) and as the formulation is of Suśruta it should be reckoned with māṣa as of five guñjā. It should be administered daily in the same dose. [4-5]

पक्वाशयस्थवातस्य चिकित्सा

पक्वाशयगते वाते हितं स्नेहविरेचनम्। वस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः॥ ६॥

In vāta situated in pakvāśaya (intestines), unctuous purgation is useful as well as evacuative enemas and formulation with salts predominating. [6]

स्नेहलवणम्

स्नुहीलवणवार्त्ताकुस्नेहांश्छन्ने घटे दहेत्। गोमयैः स्नेहलवणं तत्परं वातनाशनम्॥ ७॥

Snehalavaṇa

Snuhī, lavaṇa (five salts), vārtāku and sneha (four fats) – all should be put in an earthen vessel, covered and subjected to cow-dung fire. This snehalavaṇa is an excellant remedy for vāta. [7]

वस्त्यादिगतवातस्य चिकित्सा

कार्यो वस्तिगते चापि विधिर्वस्तिविशोधनः। त्वङ्मांसासृक्शिराप्राप्ते कुर्याच्चासृग्विमोक्षणम्॥ ८॥

In vāta situated in urinary bladder evacuative enema should be applied. Likewise, blood-letting is prescribed in case of that affecting skin, blood and blood vessels. [8]

स्नेहोपनाहाग्निकर्मबन्धनोन्मर्दनानि च। स्नायुसन्ध्यस्थिसम्प्राप्ते कुर्याद्वाते विचक्षणः॥ ९॥

If vāta is located in ligaments, joints and bone sneha (unction), upanāha (poultice), cauterization, bandage and massage are applied. [9]

स्वेदाभ्यङ्गावगाहांश्च हृद्यञ्चान्नं त्वगाश्रिते। शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम्॥ १०॥

In vāta situated in rasa sudation, massage, bath and relishing food should be given while in that in blood, cold applications, purgation and blood-letting are recommended. [10]

विरेको मांसमेदःस्थे निरूहाः शमनानि च। बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत्॥ ११॥

If vāta is situated in māṃsa and medas purgation, nonunctuous enema and pacificatory measures are applied. In case of that situated in asthi and majjā, vāta should be overcome by applying unction externally as well as internally. [11]

हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम्। विबद्धमार्गं शुक्रन्तु दृष्ट्वा दद्याद्विरेचनम्॥ १२॥

If vāta is situated in semen, sexual stimulation and semen-promoting and strengthening diet should be applied. If the seminal passage is obstructed one should administer drug to evacuate (semen). [12]

गर्भशोषे मधुकादिक्षीरम्

गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम्। सितामधुककाश्मर्य्यैर्हितमुत्थापने पयः॥ १३॥

In wasting of foetus and emaciation of children, milk boiled with sitā, madhuka and kāśmarya (gambhārī fruit) acts as a good stimulant for growth. [13]

शिरोगतवातस्य चिकित्सा

शिरोगतेऽनिले वातशिरोरोगहरी क्रिया॥ १४॥

If vāta is located in head, it should be treated with the measure as prescribed for vātika śiroroga. [14]

व्यादितास्यचिकित्सा

व्यादितास्ये हनुं स्विन्नामङ्गुष्ठाभ्यां प्रपीड्य च। प्रदेशिनीभ्याञ्चोन्नाम्य चिबुकोन्नामनं हितम्॥ १५॥

If mouth is opened (stiffened outwardly), the jaw should be fomented and pressed with thumbs. At the same time, the chin should be raised with index fingers. [15]

अर्दितस्य चिकित्सा

अर्दिते नवनीतेन खादेन्माषेण्डरीं नरः। क्षीरमांसरसैर्भुक्त्वा दशमूलीजलं पिबेत्॥ १६॥
स्नेहाभ्यङ्गशिरोवस्तिपाननस्यपरायणः। अर्दितं स जयेत् सर्पिः पिबेदौत्तरभक्तिकम्॥ १७॥

In facial paralysis, one should take cakes prepared of black gram with butter and eat with milk and meat-soup followed by intake of daśamūla decoction. Moreover, he should use oily massage, head-pouch, drink and snuff and intake of ghee after meal. [16-17]

मन्यास्तम्भस्य चिकित्सा

पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा। रूक्षः स्वेदस्तथा नस्यं मन्यास्तम्भे प्रशस्यते॥ १८॥

In manyāstambha (torticollis or stiffening of neck-sides) use of the decoction of pañcamūla or daśamūla, rough fomentation and snuff are wholesome. [18]

वाग्धमनीगतवातस्य चिकित्सा

वाताद्वाग्धमनीदुष्टौ स्नेहगण्डूषधारणम्॥ १९॥

If speech-vessel is affected by vāta, unctuous substances should be kept in mouth. [19]

कल्याणकलेहः

सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम्। अजाजी चाजमोदा च यष्टीमधुकसैन्धवम्॥ २०॥
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्। तच्चूर्णं सर्पिषाऽऽलोड्य प्रत्यहं भक्षयेन्नरः॥ २१॥
एकविंशतिरात्रेण भवेच्छुतिधरो नरः। मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः।
जडगद्गदमूकत्वं लेहः कल्याणको जयेत्॥ २२॥

Kalyāṇakaleha

Haridrā, vacā, kuṣṭha, pippalī, śuṇṭhī, jīraka, ajamodā, yaṣṭīmadhu and rocksalt – all in equal quantity are finely powdered together and taken regularly with ghee. This kalyāṇaka leha (linctus providing well-being) makes a man with instant memory, resonant and sweet voice in three weeks. It removes dullness (of mind), defects of speech and dumbness. [20-22]

वक्षस्त्रिकादिगतवातस्य चिकित्सा

वक्षस्त्रिकस्कन्धगतं वायुं मन्यागतं तथा। वमनं हन्ति नस्यञ्च कुशलेन प्रयोजितम्॥ २३॥

Vāta affecting chest, sacral region, shoulders and neck-sides can be alleviated by judicious application of emesis and snuff. [23]

माषबलादि:

माषबलाशूकशिम्बिकत्तृणरास्नाऽश्वगन्धोरुबूकाणाम्।
क्वाथो नस्यनिपीतो रामठलवणान्वित: कोष्ण: ॥ २४ ॥
अपहरति पक्षवातं मन्यास्तम्भं सकर्णनादरुजम्। दुर्जयमर्दितवातं सप्ताहाज्जयति चावश्यम्॥ २५ ॥

Māṣabalādi

Māṣa, balā, kapikacchū, kattṛṇa, rāsnā, aśvagandhā and eraṇḍa – this decoction warm and added with asafoetida and salt should be taken by nostrils. It alleviates hemeplegia, torticollis, tinnitus and facial paralysis definitely within a week. [24-25]

दशमूल्यादि:

दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम्। सायं भुक्त्वा पिबेन्नस्यं विश्वाच्यामवबाहुके॥ २६ ॥

Daśamūlyādi

Decoction of daśamūla, balā and māṣa added with oil and ghee should be taken after evening meal through nostrils in affection of arms and shoulders. [26]

बलामूलादि नस्यचतुष्टयम्

मूलं बलायास्त्वथ पारिभद्रात् तथाऽऽत्मगुप्तास्वरसं पिबेद्वा।
नस्यन्तु यो मांसरसेन कुर्यान् मासादसौ वज्रसमानबाहु: ॥ २७ ॥

Juice of balā root, pāribhadra, kapikacchū and meat-soup taken through nostrils for a month makes man's arms (strong) like thunderbolt. [27]

माषादि:

माषात्मगुप्तकैरण्डवाटयालकशृतं पिबेत्। हिङ्गुसैन्धवसंयुक्तं पक्षाघातनिवारणम्॥ २८ ॥

Māṣādi

One should take the decoction of māṣa, kapikacchū, eraṇḍa and balā added with asafoetida and rocksalt to alleviate hemiplegia. [28]

बाहुशोषचिकित्सा

बाहुशोषे पिबेत् सर्पिर्भुक्त्वा कल्याणकं महत्॥ २९ ॥

In wasting of arms, mahākalyāṇaka ghṛta should be taken after meal. [29]

हृदगतवातस्य चिकित्सा

हृदि प्रकुपिते वाते चांशुमत्या पयो हितम्॥ ३० ॥

If vāta is aggravated in cardiac region, milk processed with śālaparṇī is wholesome. [30]

हरीतक्यादि:

हरीतकी वचा रास्ना सैन्धवश्चाम्लवेतसम्। घृतमात्रासमायुक्तमपतानकनाशनम्॥ ३१ ॥

Harītakyādi

Harītakī, vacā, rāsnā, saindhava, and amlavetasa – this formulation in form of decoction or powder added with ghee alleviates apatānaka (convulsions). [31]

स्वल्परसोनपिण्ड:

पलमर्द्धपलं वापि रसोनस्य सुकुट्टितम्। हिङ्गुजीरकसिन्धूत्थैः सौवर्चलकटुत्रयैः ॥ ३२ ॥
चूर्णितैर्माषकोन्मानैरवचूर्ण्य विलोडितम्। यथाऽग्नि भक्षितं प्रातारुबुकाथानुपानतः ॥ ३३ ॥
दिने दिने प्रयोक्तव्यं मासमेकं निरन्तरम्। वातरोगं निहन्त्याशु अर्दितं सापतन्त्रकम् ॥ ३४ ॥
एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे। ऊरुस्तम्भे च गृध्रस्यां क्रिमिकोष्ठे विशेषतः।
कटीपृष्ठामयं हन्यादुदरञ्च विशषेतः ॥ ३५ ॥

Svalparasonapiṇḍa

Rasona (garlic) 60 gm is pounded well and added with hiṅgu, jīraka, saindhava, sauvarcala and trikaṭu – all powdered and each 1 gm. This should be taken in the morning according to digestive power with the decoction of eraṇḍa regularly for a month. It is useful particularly in vātika disorders like facial paralysis, apatantraka, localised or generalised paralysis, ūrustambha, sciatica, intestinal worms, lumbago, backache and particularly udararoga. [32-35]

वचादिचूर्णम्

हन्ति प्राग्भोजनात् पीतं दध्यम्लं सवचोषणम्। अपतानकमन्योऽपि वातव्याधिक्रमो हितः ॥ ३६ ॥

Vacādi cūrṇa

Sour curd mixed with vacā and marica and taken before meal destroys apatānaka, other measures useful in vātavyādhi are also advised. [36]

कुब्जरोगस्य चिकित्सा

वातघ्नैर्दशमूल्या च नवं कुब्जमुपाचरेत्। स्नेहैर्मांसरसैर्वाऽपि प्रवृद्धं तं विवर्जयेत् ॥ ३७ ॥

Acute case of humpedness should be treated with vātaghna (bhadradārvādi) and daśamula groups along with application of uncting substances and meat-soup. Nevertheless, the advanced case should be rejected. [37]

तूनीप्रतितूनीचिकित्सा

पिप्पल्यादिरजस्तूनीप्रतितून्योः सुखाम्बुना। पिबेद्वा स्नेहलवणं सघृतं क्षारहिङ्गु वा ॥ ३८ ॥

In tūnī and pratitūnī[1], powder of pippalyādi group should be taken with tepid water and also snehalavaṇa or ghṛta added with yavakṣāra and hiṅgu. [38]

1. Tūnī is excruciating pelvic pain radiating downwards and pratitūnī is the same radiating upwards.

आध्मानचिकित्सा

आध्माने लङ्घनं पाणितापश्च फलवर्त्तयः। दीपनं पाचनश्चैव वस्तिश्चाप्यत्र शोधनः॥ ३९॥

In ādhmāna (intestinal flatulence) fasting, palm-heating, suppository, appetisers, digestives and evacuating enema are prescribed. [39]

प्रत्याध्मानचिकित्सा

प्रत्याध्माने तु वमनं लङ्घनं दीपनं तथा॥ ४०॥

In pratyādhmāna (gastric flatulence) emesis, fasting and appetisers are useful. [40]

प्रत्यष्ठीलाऽष्ठीलयोश्चिकित्सा

प्रत्यष्ठीलाऽष्ठीलिकयोरन्तर्विद्रधिगुल्मवत्॥ ४१॥

Aṣṭhīlā and pratyaṣṭhīlā[1] should be treated like internal abscess and gulma. [41]

दशमूल्यादिः

दशमूलीबलारास्नागुडूचीविश्वभेषजम्। पिबेदरेण्डतैलेन गृध्रसीखञ्जपङ्गुषु॥ ४२॥

Daśamūlyādi

(Decoction of) Daśamūla, balā, rāsnā, guḍūcī and śuṇṭhī added with castor oil should be taken in sciatica, limping and lameness. [42]

शेफालिकाक्वाथः

शेफालिकादलैः क्वाथो मृद्वग्निपरिसाधितः। दुर्वारं गृध्रसीरोगं पीतमात्रं समुद्धरेत्॥ ४३॥

Decoction of śephālikā leaves prepared on mild fire removes even severe sciatica. [43]

पञ्चमूलीक्वाथादिप्रयोगः

पञ्चमूलीकषायस्तु रुबुतैलं त्रिवृद्घृतम्। त्रिवृतैवाथवा युक्तं गृध्रसीगुल्मशूलनुत्॥ ४४॥

Decoction of (bṛhat) pañcamūla, castor oil, trivṛt-ghṛta (alone) or mixed with trivṛt destroys sciatica, gulma and abdominal pain. [44]

तैलघृतादिप्रयोगः

तैलं घृतं वाऽऽर्द्रकमातुलुङ्ग्योः रसं सचुक्रं सगुडं पिबेद्वा।
कट्यूरुपृष्ठत्रिकगुल्मशूलगृध्रस्युदावर्त्तहरः प्रदिष्टः॥ ४५॥

Oil or ghee or juice of fresh ginger and mātuluṅga mixed with cukra and jaggery should be taken. It alleviates pain in waist, thigh, back and sacral region, gulma, abdominal pain, sciatica and udāvarta. [45]

1. Types of hard growth below umbilicus obstructing urination and defaecation.

एरण्डतैलप्रयोगः

तैलमेरण्डजं वापि गोमूत्रेण पिबेन्नरः। मासमेकं प्रयोगोऽयं गृध्रस्यूरुग्रहापहः ॥ ४६ ॥

Or one should take castor oil mixed with cow-urine for a month. It destroys sciatica and ūrustambha. [46]

पिप्पलीप्रयोगः

गोमूत्रैरण्डतैलाभ्यां कृष्णा पीता सुचूर्णिता। दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम् ॥ ४७ ॥

The powder of pippalī taken with cow-urine and castor oil alleviates chronic sciatica caused by kapha and vāta. [47]

वार्त्ताकुप्रयोगः

अश्नाति यो नरः सिद्धामेरण्डतैलसाधिताम्। वार्त्ताकुं गृध्रसीक्षीणः पूर्वामाप्नोत्यसौ गतिम् ॥ ४८ ॥

The patient of sciatica who eats brinjal cooked in castor oil regains his previous movement. [48]

एरण्डफलादिपायसद्वयम्

पिष्ट्वैरण्डफलं क्षीरे सविश्वं वा फलं रुबोः। पायसो भक्षितः सिद्धो गृध्रसीकटिशूलनुत् ॥ ४९ ॥

The castor seeds are pounded alone or with śuṇṭhī in milk and pāyasa (rice cooked with milk) is prepared of that. It's intake destroys sciatica and lumbago. [49]

रास्नागुग्गुलुः

रास्नायास्तु पलञ्चैकं कर्षान् पञ्च च गुग्गुलोः। सर्पिषा गुडिकां कृत्वा खादेद्वा गृध्रसीहराम् ॥ ५० ॥

Rāsnā 40 gm and guggulu 50 gm should be mixed and pounded together with ghee and made into pills. It destroys sciatica. [50]

वस्तिप्रयोगः

गृध्रस्यार्त्तं नरं सम्यक् पाचनाद्यैर्विशोधितम्। ज्ञात्वा नरं प्रदीप्ताग्निं वस्तिभिः समुपाचरेत् ॥ ५१ ॥
नादौ वस्तिविधिं कुर्य्याद् यावदूर्ध्वं न शुध्यति। स्नेहो निरर्थकस्तस्य भस्मन्येवाहुतिर्यथा ॥ ५२ ॥

The patient of sciatica should be given, first, digestive etc and then be evacuated (with emesis and purgation) and after the digestive fire is stimulated be treated with enema. No enema should be given in the beginning till the preceeding portion of pakvāśaya (e.g. āmāśaya) is not properly evacuated as in such case unction is quite useless like oblation in ash. [51-52]

शस्त्राग्निप्रयोगः

गृध्रस्यार्त्तस्य जङ्घायाः स्नेहस्वेदे कृते भृशम्। पद्भ्यां निर्मर्दितायाश्च सूक्ष्ममार्गेण गृध्रसीम् ॥ ५३ ॥
अवतार्य्याङ्गुलौ सम्यक् कनिष्ठायां शनैः शनैः। ज्ञात्वा समुन्नतं ग्रन्थिं कण्डरायां व्यवस्थितम् ॥ ५४ ॥
तं शस्त्रेण विदार्य्याशु प्रवालाङ्कुरसन्निभम्। समुद्धृत्याग्निना दग्ध्वा लिम्पेद् यष्ट्याह्वचन्दनैः ॥ ५५ ॥

Surgical intereference and cauterization

At first, the leg of the patient of sciatica should be massaged, fomented and pressed with feet so as to make the nerve prominent. Then it should be put on the little finger gradually and prominently elevated pointed should be incised, the sprout-like portion be removed and finally be cauterized and pasted with madhuyaṣṭī and candana. [53-55]

सिराव्यधदाहविधि:

विध्येच्छिरामिन्द्रवस्तेरधस्ताच्चतुरङ्गुले। यदि नोपशमं गच्छेद् दहेत् पादकनिष्ठिकाम्॥ ५६॥

Venesection and cauterization

The vein four fingers below indravasti (calf) should be punctured. If it does not give relief, the little finger of the foot be cauterized. [56]

तगरप्रयोग:

तगरस्य शिफां सार्द्रां पिष्ट्वा तक्रेण य: पिबेत्। वङ्क्षणानिलरोगार्त्तः स क्षणादेव मुच्यते॥ ५७॥

One who takes the fresh root of tagara pounded with buttermilk is relieved of vātika disorder in the inguinal region (Vardhma) instantaneously. [57]

एरण्डतैलप्रयोग:

दशमूलीकषायेण पिबेद् वा नागराम्भसा। कटीशूलेषु सर्वेषु तैलमेरण्डसम्भवम्॥ ५८॥

In all cases of lumbago, one should take castor oil mixed with the decoction of daśamūla or śuṇṭhī. [58]

विश्वाच्यादिचिकित्सा

विश्वाच्यां खञ्जपङ्ग्वोश्च दाहे हर्षे च पादयो:। क्रोष्टुशीर्षे विकारे च विकारे वातकण्टके।
शिरां यथोक्तां निर्विध्य चिकित्सा वातरोगनुत्॥ ५९॥

Venesection

In viśvācī (Radio-ulnar paralysis), limping, lameness, burning and tingling sensation in feet, kroṣṭuśīrṣa (arthritis of knee-joint) and vātakaṇṭaka – the concerned vein should be punctured followed by vāta-alleviating measures. [59]

पाददाहचिकित्सा

शिराव्यध: पाददाहे वातकण्टकवत् क्रिया॥ ६०॥
शतधौतघृतोन्मिश्रैर्नागकेशरकण्टकै:। पिष्टै: प्रलेप: सेकश्च दशमूल्यम्बुनेष्यते॥ ६१॥
आलिप्य नवनीतेन स्वेदो हस्तादिदाहहा॥ ६२॥

In burning sensation of feet, venesection should be performed along with the treatment as prescribed in vātakaṇṭaka. [60]

Paste of nāgakeśara stamens mixed with ghee washed hundred times should be applied and the part should be sprinkled with daśamūla decoction. [61]

Fomentation after applying butter removes burning sensation in hand etc. [62]

पादहर्षचिकित्सा

अभितप्तेष्टकाखण्डं काञ्जिकैः परिषिच्य तु। तद्बाष्पस्वेदनं कार्य्यं पादहर्षविनाशनम्॥ ६३॥

In pādaharṣa (tingling sensation of feet) the part should be fomented with vapour arising from the heated brick-piece washed with sour gruel. [63]

झिञ्झिनीवातचिकित्सा

दशमूलस्य निर्य्यूहो हिङ्गुपुष्करसंयुतः। शमयेत् परिपीतस्तु वातं झिञ्झिनिसंज्ञितम्॥ ६४॥

The intake of daśamūla decoction added with hiṅgu and puṣkaramūla pacifies jhinjhinī vāta (a type of tingling sensation). [64]

क्रोष्टुशीर्ष-चिकित्सा

गुग्गुलुं क्रोष्टुशीर्षे च गुडूचीत्रिफलाऽम्भसा। क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारकम्॥ ६५॥

In kroṣṭuśirṣa (arthritis of knee-joint) guggulu should be taken with the decoction of guḍūcī and triphalā or castor oil with milk or vṛddhadāraka (with milk). [65]

वातकण्टकस्य चिकित्सा

रक्तावसेचनं कुर्यादभीक्ष्णं वातकण्टके। पिबेदेरण्डतैलं वा दहेत् सूचीभिरेव वा॥ ६६॥

In vātakaṇṭaka (pain in ankle), blood-letting should be done frequently or castor oil should be taken or the part should be cauterized with needles. [66]

खल्लीचिकित्सा

कुष्ठसैन्धवयोः कल्कश्चुक्रतैलसमन्वितः। सुखोष्णो मर्द्दने योज्यः खल्लीशूलनिवारणः॥ ६७॥
खल्ल्यां स्निग्धाम्ललवणैः स्वेदमर्दोपनाहनम्॥ ६८॥

Anointing with warm paste of kuṣṭha and saindhava mixed with cukra and oil removes pain of khallī. [67]

In khallī (cramps) fomentation, anointing and poultice with unctuous substances, sour gruel and salt are prescribed. [68]

आदित्यपाकगुग्गुलुवटकः

पृथक् पलांशा त्रिफला पिप्पली चेति चूर्णितम्। दशमूलाम्बुना भाव्यं त्वगेलाऽर्द्धपलान्वितम्॥ ६९॥
दत्त्वा पलानि पञ्चैव गुग्गुलुर्वटकीकृतः। एष मांसरसाभ्यासाद् वातरोगान् विशेषतः।
हन्ति सन्ध्यस्थिमज्जस्थान् वृक्षमिन्द्राशनिर्यथा॥ ७०॥

Ādityapāka gugguluvaṭaka

Triphalā and pippalī each powdered 40 gm, tvak and elā (mixed) 20 gm and guggulu 200 gm – all pounded together are impregnated with daśamūla decoction, dried in the sun and made into pill. If it is taken, keeping on the diet of meat-soup, alleviates all vātika

disorders, particularly those located in joints, bone and marrow as thunderbolt destroys tree. [69-70]

भावनाविधि:

भाव्यद्रव्यसमं क्वाथ्यं क्वाथोऽष्टांशस्तु तेन च। आर्द्रं यावद्दिनं भाव्यं सप्ताहं भावनाविधिः ॥ ७१ ॥

For impregnation the method is as follows – the decoctive should be taken equal to the drug to be impregnated and the decoction is reduced to one-eighth, for the whole day it should be kept wet. It should be repeated for a week. [71]

त्रयोदशाङ्गगुग्गुलु:

आभाऽश्वगन्धा हवुषा गुडूची शतावरी गोक्षुरवृद्धदारम्।
रास्ना शताह्वा सशटी यमानी सनागरा चेति समैश्च चूर्णम्॥ ७२॥
तुल्यं भवेत् कौशिकमत्र मध्ये देयं तथा सर्पिरतोऽर्द्धभागम्।
अर्द्धाक्षमात्रन्त्वथ तत्प्रयोगात् कृत्वाऽनुपानं सुरयाऽथ यूषैः॥ ७३॥
मद्येन वा कोष्णजलेन वाऽथ क्षीरेण वा मांसरसेन वाऽपि।
कटीग्रहे गृध्रसिबाहुपृष्ठे हनुग्रहे जानुनि पादयुग्मे॥ ७४॥
सन्धिस्थिते चास्थिगते च वाते मज्जाश्रिते स्नायुगते च कोष्ठे।
रोगाञ्जयेद्वातकफानुविद्धान् वातेरितान् हृद्ग्रहयोनिदोषान्।
भग्नास्थिविद्धेषु च खञ्जवाते त्रयोदशाङ्गं प्रवदन्ति तज्ज्ञाः॥ ७५॥

Trayodaśāṅga guggulu

Ābhā, aśvagandhā, hapuṣā, guḍūcī, śatāvarī, gokṣura, vṛddhadāraka, rāsnā, śatapuṣpā, śaṭī, yavānī and śuṇṭhī – all in equal quantity powdered, guggulu equal to the above (total) and ghee half of guggulu – all are pounded well and made into pills. 5 gm of this should be taken with beer, vegetable soup, wine, warm water, milk or meat-soup. This trayodaśa-ṅga guggulu (guggulu with thirteen ingredients) is useful in lumbago, sciatica, lockjaw, vāta located in arms, back, knee, feet, joints, bone, marrow, ligaments and abdomen. It alleviates diseases caused by vāta and kapha particularly vātika disorders of heart, uterus (including genital tract), bone fractures and limping. [72-75]

आवृतवातस्य चिकित्सा

जित्वाऽऽवरकमग्रे तु वाते वातहरं हितम्। अन्नावृते तदुल्लेखो दीपनं पाचनं लघु॥ ७६॥

In case of covering, first of all, the active agent should be overcome and then the vāta – alleviating treatment should be given. If vāta is covered by food, it should be vomited and then appetiser and digestive should be administered along with light diet. [76]

सुप्तिवातस्य चिकित्सा

सुप्तिवाते त्वसृङ्मोक्षं कारयेद्बहुशो बुधः। दिह्याच्च लवणागारधूमैस्तैलविमर्दितैः॥ ७७॥

In numbness, frequent blood-letting is prescribed and also application of the paste of salt and soot rubbed with oil. [77]

वातरोगे क्रियाक्रमः

सर्पिस्तैलवसामज्जपानाभ्यञ्जनवस्तयः। स्वेदाः स्निग्धा निवातश्च स्थानं प्रावरणानि च॥ ७८॥
रसाः पयांसि भोज्यानि स्वाद्वम्ललवणानि च। बृंहणं यत्तु तत् सर्वं कर्तव्यं वातरोगिणाम्॥ ७९॥

Intake, massage and enema with ghee, oil, muscle-fat and marrow, unctuous sudation, windless place, clothing and meat-soups, milk, diet consisting of sweets, sours and salt and whatever is body-promoting should be applied in vātayyādhi. [78-79]

वातविनाशनयूषौ

पटोलफलकैर्यूषो वृष्यो वातहरो लघुः। वाट्यालककृतो यूषः परं वातविनाशनः॥ ८०॥

The soup of paṭola fruits is semen-promoting, vāta-allviating and light. The same prepared with balā is an excellent remedy for vāta. [80]

बलादिसिद्धाः मांसरसाः

बलायाः पञ्चमूलस्य दशमूलस्य वा रसे। अजाशीर्षाम्बुजानूपक्रव्यादपिशितैः पृथक्॥ ८१॥
साधयित्वा रसान् स्निग्धान् दध्यम्लव्योषसंस्कृतान्। भोजयेद्वातरोगार्त्तं तैर्व्यक्तलवणैर्नरम्॥ ८२॥

Meat-soups should be prepared separately of goat's head, meat of aquatic, marshy and carnivorous animals with balā or pañcamūla or daśamūla adding with unctous substance and processed with sour curd and trikaṭu. They should be added with salts prominently and fed to the patient of vātavyādhi. [81-82]

पञ्चमूल्यादिक्षीरम्

पञ्चमूलीबलासिद्धं क्षीरं वातामये हितम्॥ ८३॥

Milk cooked with (laghu) pañcamūla and balā is wholesome in vātika disorder. [83]

वाजिगन्धादिगणः

वाजिगन्धा बलास्तिस्रो दशमूली महौषधम्। द्वे गृध्रनख्यौ रास्ना च गणो मारुतनाशनः॥ ८४॥

Vājigandhādi gaṇa

Vājigandhā (aśvagandhā), three types of balā (balā, atibalā and nāgabalā), daśamūla, śuṇṭhī, two types of hiṃsrā and rāsnā – this group (of drugs) is vāta-alleviating. [84]

कोलादिलेपः

कोलं कुलत्थं सुरदारु रास्ना माषातसीतैलफलानि कुष्ठम्।
वचाशताह्वे यवचूर्णमम्लमुष्णानि वातामयिनां प्रदेहः॥ ८५॥

Kolādi lepa

Kola (badara), horse gram, devadāru, rāsnā, black gram, linseed, oily seeds, kuṣṭha,

vacā, śatapuṣpā and barley powder – these should be pounded with sour gruel and heated. This is applied locally to the affected part in vātavyādhi. [85]

वेशवारप्रदेह:

आनूपवेशवारोष्णप्रदेहो वातनाशन: ॥ ८६ ॥

The hot application of veśavāra made of marshy animals alleviates vāta. [86]

वेशवारस्य लक्षणम्

निरस्थि पिशितं पिष्टं स्विन्नं गुडघृतान्वितम्। कृष्णामरिचसंयुक्तं वेशवार इति स्मृत: ॥ ८७ ॥

Veśavāra is a preparation in which meat, devoid of bone, is pounded and steamed with jaggery and ghee later added with pippalī and marica. [87]

शाल्वणस्वेद:

काकोल्यादि: सवातघ्न: सर्वाम्लद्रव्यसंयुत:। सानूपमांस: सुस्विन्न: सर्वस्नेहसमन्वित: ॥ ८८ ॥
सुखोष्ण: स्पष्टलवण: शाल्वण: परिकीर्त्तित:। तेनोपनाहं कुर्वीत सर्वदा वातरोगिणाम् ॥ ८९ ॥
वातघ्नो भद्रदार्वादि: काकोल्यादिस्तु सौश्रुत:। मांसेनात्रौषधं तुल्यं यावताऽम्लेन चाम्लता ॥ ९० ॥
पट्वी स्यात् स्वेदनार्थञ्च काञ्जिकाद्यम्लमिष्यते। चतु:स्नेहोऽत्र तावान् स्यात् सुस्विन्नत्वं यतो भवेत् ॥
समस्तं वर्गमर्द्धं वा यथालाभमथापि वा। प्रयुञ्जीतेति वचनं सर्वत्र गणकर्मणि ॥ ९२ ॥

Śālvaṇasveda

Kākolyādi and vātaghna (bhadradārvādi) gaṇas, all sours and marshy meats are well steamed and added with all (four) fats, salted prominently and heated mildly. This is known as 'śālvaṇa' which is used for application as poultice in vātika disorders.

Here vātaghna (bhadradarvādi) and kākolyādi are meant as described in the Suśruta-saṃhitā. These should be equal to meat. Sours are used so much as to make it distinctly sour. For steaming sour gruel etc. are used. The four fats are given in the quantity by which it becomes properly unctuous. [88-91]

In the context of gaṇas, in all cases, the entire group or half or whatever is available should be used. [92]

अश्वगन्धाद्यं घृतम्

अश्वगन्धाकषाये च कल्के क्षीरचतुर्गुणम्। घृतं पक्वन्तु वातघ्नं वृष्यं मांसविवर्द्धनम् ॥ ९३ ॥

Aśvagandhādya ghṛta

Ghee cooked with the decoction and the paste of aśvagandhā along with four times milk alleviates vāta and promotes semen and flesh. [93]

दशमूलाद्यं घृतम्

दशमूलस्य निर्य्यूहे जीवनीयै: पलोन्मितै:। क्षीरेण च घृतं पक्वं तर्पणं पवनार्त्तिजित् ॥
क्वाथोऽत्र त्रिगुण: सर्पि:प्रस्थ: साध्य: पय: समम् ॥ ९४ ॥

Daśamūlādya ghṛta

Ghee cooked with the decoction of daśamūla and the paste of jīvanīya gaṇa (of Caraka) each 40 gm alongwith milk is saturating and alleviates vātika disorders. Here decoction should be three times and milk equal to ghee (640 gm). [94]

छागलाद्यं घृतम्

आजं चर्मविनिर्मुक्तं त्यक्तशृङ्गखुरादिकम्। पञ्चमूलीद्वयश्चैव जलद्रोणे विपाचयेत्॥ ९५॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत्। जीवनीयैः सयष्ट्याह्वैः क्षीरश्चैव शतावरीम्॥ ९६॥
छागलाद्यमिदं नाम्ना सर्ववातविकारनुत्। अर्दिते कर्णशूले च बाधिर्य्ये मूकमिन्मिने॥ ९७॥
जडगद्गदपङ्गूनां खञ्जे गृध्रसिकुब्जयोः। अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते॥ ९८॥
द्रोणे द्रव्यतुलाश्रुत्या स्याच्छागदशमूलयोः। पृथक् तुलाऽर्द्धं यष्ट्याह्वद्वयं देयं द्विधोक्तितः॥ ९९॥

Chāgalādya ghṛta

Goat's flesh devoid of skin, horn, hoof etc and daśamūla should be cooked in water 10.24 litre reduced to one-fourth. With this decoction ghee 640 gm should be cooked along with milk and śatāvarī (juice) and the paste of jīvanīya gaṇa with madhuyaṣṭī. This is known as chhāgalādya ghṛta which alleviates all vātika disorders and is particularly recommended in facial paralysis, earache, deafness, dumbness and other disorders of voice, idiocy, limping, sciatica, humpedness, apatānaka and apatantraka. As in one droṇa (10.24 litre) water decoctive drug should be 4 kg, goat's flesh and daśamūla should be taken each 2 kg. As yaṣṭī is mentioned twice both types of madhuyaṣṭī should be taken. [95-99]

एलादितैलम्

एलामुरासरलशैलजदारुकौन्तीचण्डाशटीनलदचम्पकहेमपुष्पम्।
स्थौणेयगन्धरसपूतिदलामृणालश्रीवासकुन्दुरुनखाम्बुवराङ्गकुष्ठम्॥ १००॥
कालीयकं जलदकर्कटचन्दनश्रीर्जात्याः फलं सविकसं सहकुङ्कुमञ्च।
स्पृक्कातुरुष्कलघु लाभतया विनीय तैलं बलाक्वथनदुग्धयुतञ्च दध्ना।
सार्द्धं पचेत्तु हितमेतदुदाहरन्ति वातामयेषु बलवर्णवयःप्रकारि॥ १०१॥

Elādi taila

Elā, murā, sarala, śaileya, devadāru, reṇukā, caṇḍā, śaṭī, māṃsī, flowers of campaka and nāgakeśara, sthauṇeyaka, balā, khaṭṭāśī, patra, uśīra, śrīveṣṭaka, kunduru, nakha, bālaka, tvak, kuṣṭha, kālīyaka, musta, karkaṭaśṛṅgī, śveta candana, jātīphala, mañjiṣṭhā, kuṅkuma, spṛkkā, turuṣka and aguru – with these drugs, as available, oil is cooked with the decoction of balā, milk and curd. It is effective in vātika disorders and promotes strength, lustre and life-span. [100-101]

बलासैरीयतैलम्

बलानिःक्वाथकल्काभ्यां तैलं पक्वं पयोऽन्वितम्। सर्ववातविकारघ्नमेवं सैरीयसाधितम्॥ १०२॥

Balātaila and sairīyataila

Oil cooked with the decoction and the paste of balā along with milk alleviates all types of vātika disorder. So is that cooked with sairīya. [102]

महाबलातैलम्

बलामूलकषायस्य दशमूलीकृतस्य च। यवकोलकुलत्थानां क्वाथस्य पयसस्तथा॥ १०३॥
अष्टावष्टौ शुभा भागास्तैलादेकस्तदेकतः। पचेदावाप्य मधुरं गणं सैन्धवसंयुतम्॥ १०४॥
तथाऽगुरु सर्जरसं सरलं देवदारु च। मञ्जिष्ठां चन्दनं कुष्ठमेलां कालानुसारिवाम्॥ १०५॥
मांसीं शैलेयकं पत्रं तगरं शारिवां वचाम्। शतावरीमश्वगन्धां शतपुष्पां पुनर्नवाम्॥ १०६॥
तत् साधु सिद्धं सौवर्णे राजते मृन्मयेऽपि वा। प्रक्षिप्य कलशे सम्यक् सुनिगुप्तं निधापयेत्॥ १०७॥
बलातैलमिदं नाम्ना सर्ववातविकारनुत्। यथाबलमतो मात्रां सूतिकायै प्रदापयेत्॥ १०८॥
या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान्। क्षीणवाते मर्महतेऽभिहते मथितेऽपि वा॥ १०९॥
भग्ने श्रमाभिपन्ने च सर्वथैवोपयोजयेत्। सर्वानाक्षेपकादींश्च वातव्याधीन् व्यपोहति॥ ११०॥
हिक्कां कासमधीमन्थं गुल्मं श्वासं सुदारुणम्। षण्मासानुपयुज्यैतदन्त्रवृद्धिमपोहति॥ १११॥
प्रत्यग्रधातुः पुरुषो भवेच्च स्थिरयौवनः। एतद्धि राज्ञा कर्त्तव्यं राजमात्राश्च ये नराः॥
सुखिनः सुकुमाराश्च धनिनश्चैव ये नराः॥ ११२॥

Mahābalātaila

Decoction of (1) balā root (2) daśamūla and (3) yava, kola and kulattha and milk each 8 parts and oil 1 part (640 ml) – They all should be cooked together alongwith the paste of madhura (kākolyādi) gaṇa, rocksalt, aguru, sarjarasa, sarala, devadāru, mañjiṣṭhā, candana, kuṣṭha, elā, kālānusārivā, mānṃsī, śaileya, patra, tagara, sārivā, balā, śatāvarī, aśvagandhā, śatapuṣpā and punarnavā. When it is well cooked, it should be preserved in golden, silver or earthen container. It is known as (mahā) balātaila which alleviates all disorders of vāta. It should be given in proper dose, according to strength, to women having pregnancy and desire for pregnancy and to men with deficient semen. It is used in cases of wasting with vāta, injury in vital parts, fracture and exertion. It alleviates vātika disorders such as convulsion etc. hiccough, cough, adhimantha, gulma, severe dyspnoea and hernia by regular use for six months. Moreover, it makes the person with fresh dhātus and stable youthfulness. This should be used by kings, nobles, wealthy, delicate and strong persons. [103-112]

विष्णुतैलम्

शालपर्णी पृश्निपर्णी बला च बहुपुत्रिका। एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च॥ ११३॥
गवेधुकस्य मूलानि तथा सहचरस्य च। एषान्तु पलिकैः कल्कैस्तैलप्रस्थं विपाचयेत्॥ ११४॥

आजं वा यदि वा गव्यं क्षीरं दद्याच्चतुर्गुणम्। अस्य तैलस्य पक्कस्य श्रृणु वीर्य्यमतः परम्॥ ११५॥
अश्वानां वातभग्नानां कुञ्जराणां तथा नृणाम्। तैलमेतत् प्रयोक्तव्यं सर्वव्याधिनिवारणम्॥ ११६॥
आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत्। गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी यथा॥ ११७॥
हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्। कामलापाण्डुरोगघ्नं शर्कराश्मरिनाशनम्॥ ११८॥
क्षीणेन्द्रिया नष्टशुक्रा जरया जर्जरीकृताः। येषाञ्चैव क्षयो व्याधिरन्त्रवृद्धिश्च दारुणा॥ ११९॥
अर्दितं गलगण्डञ्च वातशोणितमेव च। स्त्रियो या न प्रसूयन्ते तासाञ्चैव प्रयोजयेत्॥
एतदङ्ग वरं तैलं विष्णुना परिकीर्त्तितम्॥ १२०॥

Viṣṇu taila

Śālaparṇī, pṛśniparṇī, balā, śatāvarī, root of eraṇḍa, bṛhatī, kaṇṭakārī, pūtīka, gavedhaka and saireyaka each 40 gm – with the paste of these drugs oil 640 ml is cooked along with four times cow's or goat's milk. Now listen about its effects. This oil is useful for horses, elephants and men crippled by all types of vāta. By its regular use man attains longevity and stability and she-donkey gets pregnancy. It alleviates cardiac pain, chest-pain, hemicrania, jaundice, anaemia, gravels, calculus, weakness of sense organs, loss of semen, senile degeneration, consumption, hernia, facial paralysis, goitre, vātarakta and female sterility. This excellent oil is formulated by Viṣṇu (and as such named as Viṣṇutaila). [113-120]

नारायणतैलम्

बिल्वोऽग्निमन्थः श्योनाकः पाटला पारिभद्रकः। प्रसारण्यश्वगन्धा च बृहती कण्टकारिका॥ १२१॥
बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा। एषां दशपलान् भागांश्चतुर्द्रोणेऽम्भसः पचेत्॥ १२२॥
पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत्। शतपुष्पा देवदारु मांसी शैलेयकं वचा॥ १२३॥
चन्दनं तगरं कुष्ठमेला पर्णीचतुष्टयम्। रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्॥ १२४॥
एषां द्विपलिकान् भागान् पेषयित्वा विनिक्षिपेत्। शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत्॥ १२५॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्। पाने वस्तौ तथाऽभ्यङ्गे भोज्ये चैव प्रशस्यते॥ १२६॥
अश्वो वा वातसंभग्नो गजो वा यदि वा नरः। पङ्गुलः पीठसर्पी च तैलेनानेन सिध्यति॥ १२७॥
अधोभागे च ये वाताः शिरोमध्यगताश्च ये। दन्तशूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे॥ १२८॥
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला। क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः॥ १२९॥
बधिरा लल्लजिह्वाश्च मन्दमेधस एव च। अल्पप्रजा च या नारी या च गर्भं न विन्दति॥ १३०॥
वातार्त्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा। एतत् तैलवरं तेषां नाम्ना नारायणं स्मृतम्।
तगरं नतमत्र स्यादभावे शीतलीजटा॥ १३१॥

Nārāyaṇa taila

Bilva, agnimantha, śyonāka, pāṭalā, pāribhadra, prasāraṇī, asvagandhā, bṛhatī, kaṇṭakārī, balā, atibalā, gokṣura and punarnavā – each 400 gm are cooked in water 40.96 litre reduced to one-fourth. With this decoction oil 2.56 litre is cooked along with the

paste of śatapuṣpā, devadāru, māṃsī, śaileyaka, vacā, candana, tagara, kuṣṭha, elā, parṇīcatuṣṭaya (śālaparṇi, pṛśniparṇī, mudgparṇī and māṣaparṇī), rāsnā, aśvagandhā, rocksalt and punarnavā each 80 gm, added with śatāvarī juice equal to oil and cow's or goat's milk four times.

This oil is used as intake, enema, massage and with edibles. Men or animals affected with vāta recover by its use. It is effective in vāta affecting lower, middle or upper part, toothache, lockjaw, torticollis, obstruction in neck, emaciation, abnormal movements, weakness of sense organs, diminished semen, wasting caused by fever, deafness, stiffness of tongue, idiocy, female sterility, scrotal enlargement and hernia. This excellent oil is known as nārāyaṇa taila.

Here by 'nata' tagara should be taken and in its absence root of śihalī (śītalī) as its substitute. [121-131]

महानारायणतैलम्

शतावरी चांशुमती पृश्निपर्णी शटी बला। एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च॥ १३२॥
गवेधुकस्य मूलानि तथा सहचरस्य च। एषां दशपलान् भागाञ्जलद्रोणे विपाचयेत्॥ १३३॥
पादावशेषे पूते च गर्भश्चैनं समावपेत्। पुनर्नवा वचा दारु शताह्वा चन्दनागुरु॥ १३४॥
शैलेयं तगरं कुष्ठमेला मांसी स्थिरा बला। अश्वाह्वा सैन्धवं रास्ना पलार्द्धानि च पेषयेत्॥ १३५॥
गव्याजपयसोः प्रस्थौ द्वौ द्वावत्र प्रदापयेत्। शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्॥ १३६॥
अस्य तैलस्य सिद्धस्य श्रृणु वीर्यमतः परम्। अश्वानां वातभग्नानां कुञ्जराणां नृणां तथा॥ १३७॥
तैलमेतत् प्रदातव्यं सर्ववातनिवारणम्। आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत्॥ १३८॥
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी तथा। हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्॥ १३९॥
अपचीं गण्डमालाञ्च वातरक्तं हनुग्रहम्। कामलां पाण्डुरोगञ्च अश्मरीश्चापि नाशयेत्॥ १४०॥
तैलमेतद् भगवता विष्णुना परिकीर्त्तितम्। नारायणमिति ख्यातं वातान्तकरणं परम्॥ १४१॥

Mahānārāyaṇa taila

Śatāvarī, śālaparṇī, pṛśniparṇī, śaṭī, balā, root of eraṇḍa, bṛhatī, kaṇṭakārī, pūtīka, gavedhuka and saireyaka – each 400 gm are boiled in water 10.24 litre reduced to one-fourth. With this decoction oil 640 ml is cooked along with the paste of punarnavā, vacā, devadāru, śatapuṣpā, candana, aguru, śaileya, tagara, kuṣṭha, elā, māmsī, śālaparṇī, balā, aśvagandhā, saindhava and rāsnā each 20 gm and cow's and goat's milk each 1.28 litre and śatāvarī juice 640 ml.

Now listen about its effeciency. It alleviates all sorts of vāta (vikāra) in men, horses and elephants. By its regular use man attains longevity and stability while woman is blessed with progeny. It is efficacious particularly in cardiac pain, chest pain, hemicrania, scrofula, cervical adenits, vātarakta, lock-jaw, jaundice and calculus. This oil formulated by god Viṣṇu and as such known as 'Nārāyaṇa' is an excellent remedy for vātika disorders. [132-141]

अश्वगन्धातैलम्

शतं पक्त्वाऽश्वगन्धाया जलद्रोणेंऽशशेषितम्। विस्राव्य विपचेत् तैलं क्षीरं दत्त्वा चतुर्गुणम्॥ १४२॥
कल्कैर्मृणालशालूकबिसकिञ्जल्कमालती-। पुष्पैर्ह्रीबेरमधुकशारिवापद्मकेशरैः॥ १४३॥
मेदापुनर्नवाद्राक्षामञ्जिष्ठाबृहतीद्वयैः। एलैलवालुत्रिफलामुस्तचन्दनपद्मकैः॥ १४४॥
पक्वरक्ताश्रयं वातं रक्तपित्तमसृग्दरम्। हन्यात् पुष्टिं बलं कुर्यात् कृशानां मांसवर्द्धनम्॥ १४५॥
रेतोयोनिविकारघ्नं व्रणदोषापकर्षणम्। षण्ढानपि वृषान् कुर्य्यात् पानाभ्यङ्गानुवासनैः॥ १४६॥

Aśvagandhādi taila

Aśvagandhā 4 kg is cooked in water 10.24 litre reduced to one-fourth. With this decoction oil is cooked alongwith four times milk and the paste of stalk, stem, root and seed of lotus, jātī flowers, bālaka, madhuka, sārivā, lotus stamens, medā, punarnavā, drākṣā, mañjiṣṭhā, bṛhatī, kaṇṭakārī, elā, elavālu, triphalā, musta, candana and padmaka. This oil is useful in koṣṭhavāta, raktavāta, raktapitta, rakta pradara (menorrhagia), disorders of semen and uterus and wounds. It promotes strength and corpulence and makes even impotent bulls by intake massage and enema. [142-146]

मूलकाद्यं तैलम्

मूलकस्वरसं तैलं क्षीरदध्यम्लकाञ्जिकम्। तुल्यं विपाचयेत् कल्कैर्बलाचित्रकसैन्धवैः॥ १४७॥
पिप्पल्यतिविषारास्नाचविकाऽगुरुचित्रकैः। भल्लातकवचाकुष्ठश्वदंष्ट्राविश्वभेषजैः॥ १४८॥
पुष्कराह्वशटीबिल्वशताह्वानतदारुभिः। तत् सिद्धं पीतमत्युग्रान् हन्ति वातात्मकान् गदान्॥ १४९॥

Mūlakādya taila

Oil is cooked with mūlaka juice, milk, sour curd and sour gruel (each equal to oil) along with the paste of balā, śigru, rocksalt, pippalī, ativiṣā, rāsnā, cavya, aguru, citraka, bhallātaka, vacā, kuṣṭha, gokṣura, śuṇṭhī, puṣkaramūla, śaṭī, bilva, śatapuṣpā, tagara and devadāru. It alleviates, by intake, even severe disorders of vāta. [147-149]

रसोनतैलम्

रसोनकल्कस्वरसेन पक्वं तैलं पिबेद् यस्त्वनिलामयार्त्तः।
तस्याशु नश्यन्ति च वातरोगाः ग्रन्था विशाला इव दुर्गृहीताः॥ १५०॥

Rasona-taila

One who takes oil cooked with juice and paste of rasona (garlic) is relieved of all the vātika disorders. [150]

केतक्याद्यं तैलम्

केतकिनागबलातिबलानां यद्बहुलेन रसेन विपक्वम्।
तैलमनल्पतुषोदकसिद्धं मारुतमस्थिगतं विनिहन्ति॥ १५१॥
अनल्पवचनात् तत्र तुल्ये क्वाथतुषोदके। अकल्कोऽपि भवेत् स्नेहो यः साध्यः केवले द्रवे॥ १५२॥

Ketakyādya taila

Oil cooked with sufficient decoction of ketakī, nāgabalā and atibalā along with sour gruel destroys the vātika disorders located in bone. The word 'analpa' (sufficient) here denotes equal quantity of decoction and sour gruel. Sneha (fatty substance) is cooked sometimes without adding paste only with liquids. [151-152]

सैन्धवाद्यं तैलम्

द्वे पले सैन्धवात् पञ्च शुण्ठ्या ग्रन्थिकचित्रकात्। द्वे द्वे भल्लातकास्थीनि विंशतिर्द्वे तथाऽऽढके॥ १५३॥
आरनालात् पचेत् प्रस्थं तैलमेतदपत्यदम्। गृध्रस्यूरुग्रहार्शोऽर्त्तिसर्ववातविकारनुत्॥ १५४॥

Saindhavādya taila

Oil 640 ml is cooked with rocksalt 80 gm, suṇṭhī 200 gm, pippalīmūla 80 gm, citraka 80 gm, bhallātaka nuts 20 (in number) in sour gruel 5.12 litre. It gives progeny and alleviates sciatica, ūrustambha, piles and all disorders of vāta. [153-154]

स्वल्पमाषतैलम्

तैलं सङ्कुचितेऽभ्यङ्गो माषसैन्धवसाधितम्। बाहुशीर्षगते नस्यं पानञ्चौत्तरभक्तिकम्।
क्वाथोऽत्र माषनिष्पाद्यः सैन्धवं कल्कमेव च॥ १५५॥

Svalpamāṣa taila

In contractures, massage with the oil cooked with māṣa (black gram) and rocksalt is useful. The same is used in vāta located in arms and head as snuff and post-meal intake. Here black gram is decocted and rocksalt is used as paste. [155]

सप्ताङ्गं माषतैलम्

माषात्मगुप्तातिविषोरुवूकरास्नाशताह्वालवणैः प्रपिष्टैः।
चतुर्गुणे माषबलाकषाये तैलं कृतं हन्ति च पक्षवातम्॥ १५६॥

Saptāṅga māṣataila

Oil cooked with the paste of māṣa, kapikacchū, śatāvarī, eraṇḍa, rāsnā, śatapuṣpā and rocksalt along with four times decoction of māṣa and balā (combined) alleviates hemiplegia. [156]

अष्टादशाङ्गं माषतैलम्

माषप्रस्थं समावाप्य पचेत् सम्यग्जलाढके। पादशेषे रसे तस्मिन् क्षीरं दत्त्वा चतुर्गुणम्॥ १५७॥
प्रस्थञ्च तिलतैलस्य कल्कं दत्त्वाऽक्षसम्मितम्। जीवनीयानि यान्यष्टौ शतपुष्पां ससैन्धवाम्॥ १५८॥
रास्नाऽऽत्मगुप्ता मधुकं बला व्योषं त्रिकण्टकम्। पक्षाघातेऽर्दिते वाते कर्णशूले सुदारुणे॥ १५९॥
मन्दश्रुतौ चाश्रवणे तिमिरे च त्रिदोषजे। हस्तकम्पे शिरःकम्पे विश्वाच्यामवबाहुके॥ १६०॥
शस्तं कलायखञ्जे च पानाभ्यञ्जनवस्तिभिः। माषतैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहम्॥ १६१॥

Aṣṭādaśāṅga māṣataila

Māṣa 640 gm is boiled in water 2.56 litre reduced to one-fourth. With this decoction and four times milk, tila oil 640 ml is cooked along with the paste of the following (eighteen) drugs 10 gm each – aṣṭavarga, śatapuṣpā, saindhava, rāsnā, kapikacchū, madhuka, balā, trikaṭu and gokṣura. This is useful by intake, massage and enema, in hemiplegia, facial paralysis, severe earache, hard hearing, deafness, defects of vision, trembling in hand and head, viśvācī, avabāhuka and kalāyakhañja (lathyrism). This maṣataila is particularly efficacious in diseases located above the collar bone. [157-161]

दशाङ्गं माषतैलम्

माषातसीयवकुरण्टककण्टकारीगोकण्टटुण्टुकजटाकपिकच्छुतोयैः।
कार्पासकास्थिशणबीजकुलत्थकोलक्काथेन बस्तपिशितस्य रसेन चापि॥ १६२॥
शुण्ठ्या समागधिकया शतपुष्पया च सैरण्डमूलसपुनर्नवया सरण्या।
रास्नाबलाऽमृतलताकटुकैर्विपक्कं माषाख्यमेतदवबाहुहरञ्च तैलम्॥ १६३॥
अर्द्धाङ्गशोषमपतानकमाढ्यवातमाक्षेपकं सभुजकम्पशिरःप्रकम्पम्।
नस्येन वस्तिविधिना परिषेचनेन हन्यात् कटीजघनजानुरुजश्च सर्वाः॥ १६४॥

Daśāṅga māṣataila

With decoction of (1) māṣa, atasī, yava, kuraṇṭaka, kaṇṭakārī, gokṣura, śyonāka (root) and kapikacchū (2) kārpāsa seeds, śaṇa seeds, kulattha and kola, and soup of goat's meat oil is cooked along with the paste of śuṇṭhī, pippalī, śatapuṣpā, eraṇḍa root, punarnavā, prasāriṇī, rāsnā, balā, guḍūcī and marica (ten drugs that is why daśāṅga). This māṣataila alleviates avabāhuka, hemiplegia, emaciation, apatānaka, vātarakta, convulsions, trembling in arm and head, pain in waist, thigh and knee by snuff, enema and sprinkling. [162-164]

महामाषतैलम्

भाषस्यार्द्धाढकं दत्त्वा तुलाऽर्द्धं दशमूलतः। पलानि छागमांसस्य त्रिंशद्द्रोणेऽम्भसः पचेत्॥ १६५॥
पूते शीते कषाये च चतुर्थांशावतारिते। प्रस्थञ्च तिलतैलस्य पयो दत्त्वा चतुर्गुणम्॥ १६६॥
आत्मगुप्तोरुबूकञ्च शताह्वा लवणत्रयम्। जीवनीयानि मञ्जिष्ठा चव्यचित्रककट्फलम्॥ १६७॥
सव्योषं पिप्पलीमूलं रास्ना मधुकसैन्धवम्। देवदार्वमृता कुष्ठं वाजिगन्धा वचा शटी॥ १६८॥
एतैरक्षसमैः कल्कैः साधयेन्मृदुनाऽग्निना। पक्षाघातार्दिते वाते बाधिर्य्ये हनुसंग्रहे॥ १६९॥
कर्णनादे शिरःशूले तिमिरे च त्रिदोषजे। पाणिपादशिरोग्रीवाभ्रमणे मन्दचङ्क्रमे॥ १७०॥
कलायखञ्जे पाङ्गुल्ये गृध्रस्यामवबाहुके। पाने वस्तौ तथाभ्यङ्गे नस्यकर्णाक्षिपूरणे॥
तैलमेतत् प्रशंसन्ति सर्ववातरुजाऽपहम्॥ १७१॥

Mahāmāṣa taila

Māṣa 1.28 kg, daśamūla 2 kg, goat's flesh 1.2 kg, are cooked in water 10.24 litre

reduced to one-fourth. Now with this decoction tila oil 640 ml is cooked along with milk four times and the paste of kapikacchū, eraṇḍa, śatapuṣpā, three salts (saindhava, sauvarcala and biḍa), (drugs of) jīvanīya gaṇa, mañjiṣṭhā, cavya, citraka, kaṭphala, trikaṭu, pippalīmūla, rāsña, madhuka, saindhava, devadāru, guḍūcī, kuṣṭha, aśvagandhā, vacā and śaṭī each 10 gm on mild fire.

This oil destroys all vātika disorders by intake, enema, massage, snuff and dropping in eye and ears. It is useful particularly in hemiplegia, facial paralysis, deafness, lockjaw, tinnitus, headache, defects of vision; trembling of hand, foot, head and neck; slow movement, kalāyakhañja (lathyrism), sciatica and avabāhuka. [165-171]

निरामिषमहामाषतैलम्

द्विपञ्चमूलीं निःक्वाथ्य तैलात् षोडशभिर्गुणैः। माषाढकं साधयित्वां तं निर्य्यूहं चतुर्गुणम्॥ १७२॥
ग्राहयित्वा तु विपचेत् तैलप्रस्थं पयःसमम्। कल्कार्थञ्च समावाप्य भिषग् द्रव्याणि बुद्धिमान्॥ १७३॥
अश्वगन्धां शटीं दारुं बलां रास्नां प्रसारणीम्। कुष्ठं परूषकं भार्गी द्वे विदार्य्यौ पुनर्नवाम्॥ १७४॥
मातुलुङ्गफलाजाज्यौ रामठं शतपुष्पिकाम्। शतावरीं गोक्षुरकं पिप्पलीमूलचित्रकौ॥ १७५॥
जीवनीयगणं सर्वं संहृत्यैव ससैन्धवम्। तत् साधु सिद्धं विज्ञाय माषतैलमिदं महत्॥ १७६॥
वस्त्यभ्यञ्जनपानेषु नावने च प्रयोजयेत्। पक्षाघाते हनुस्तम्भे सार्दिते सापतन्त्रके॥ १७७॥
अवबाहुकविश्वाच्योः खञ्जपङ्गुलयोरपि। हनुमन्याग्रहे चैव साधिमन्थे च वातिके॥ १७८॥
शुक्रक्षये कर्णनादे कर्णशूले च दारुणे। कलायखञ्जशमने भैषज्यमिदमादिशेत्॥ १७९॥
दशमूलाढकं द्रोणे निःक्वाथ्य पादिको भवेत्। क्वाथश्चतुर्गुणस्तैलान्माषक्वाथेऽप्ययं विधिः॥ १८०॥

Nirāmiṣa mahāmāṣa taila

Oil 640 ml is cooked with four times decoction of daśamūla prepared in water 10.24 litre and the same of māṣa 2.56 kg and equal quality of milk along with the paste of aśvagandhā, śaṭī, devadāru, balā, rāsnā, prasāriṇī, kuṣṭha, paruṣaka, bhārgī, vidārī, kṣīravidārī, punarnavā, mātuluṅga (fruit), jīvaka, hiṅgu, sātapuṣpā, śatāvarī, gokṣura, pippalīmūla, citraka, (drugs of) jīvanīya gaṇa and saindhava. This great māṣataila, when cooked well, should be used as enema, massage, intake and snuff. It is useful in hemiplegia, lockjaw, facial paralysis, apatantraka, avabāhuka, viśvācī, limping, lameness, torticollis, vātika adhimantha, loss of semen, tinnitus, earache and kalāyakhañja.

Daśamūla 2.56 kg is decocted in water 10.24 litre reduced to one-fourth. This decoction is given four times the oil. The same method is followed in preparation of the decoction of māṣa. [172-180]

सप्तप्रस्थमहामाषतैलम्

माषक्वाथे बलाक्वाथे रास्नाया दशमूलके। यवकोलकुलत्थानां छागमांसरसे पृथक्॥ १८१॥
रास्नाऽऽत्मगुप्तासिन्धूत्थशताह्वैरण्डमुस्तकैः॥ १८२॥
जीवनीयबलाव्योषैः पचेदक्षसमैर्भिषक्। हस्तकम्पे शिरःकम्पे बाहुशोषेऽवबाहुके॥ १८३॥

बाधिर्य्ये कर्णशूले च कर्णनादे च दारुणे। विश्वाच्यामर्दिते कुब्जे गृध्रस्यामपतानके॥ १८४॥
वस्त्यभ्यञ्जनपानेषु नावनेषु च दापयेत्। माषतैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहम्॥
क्वाथप्रस्थाः षडेवात्र विभक्त्यन्तेन भाषिताः॥ १८५॥

Saptaprastha māṣa-taila

Sesamum oil one prastha (640 ml) is cooked with decoction of (1) māṣa (2) balā (3) rāsnā (4) daśamūla (5) yava, kola and kulattha and (6) soup of goat's flesh and milk four times along with the paste of rāsnā, kapikachū, saindhava, śatāhvā, eraṇḍa, musta, (drugs of) jīvanīya gaṇa, balā, trikaṭu each 10 gm. This māṣataila is used as enema, massage, intake and snuff and is an excellent remedy for diseases located above the collar bone. It is useful in trembling of hand and head, wasting of arms, avabāhuka, deafness, earache, tinnitus, viśvācī, facial paralysis, humpedness, sciatica and apatānaka.

Six prathas of decoctions are mentioned here separately, added with the remaining one prastha of oil, it becomes saptaprastha. [181-185]

मज्जस्नेहः

ग्राम्यानूपौदकानान्तु भित्त्वाऽस्थीनि पचेज्जले। तं स्नेहं दशमूलस्य कषायेण पुनः पचेत्॥ १८६॥
जीवकर्षभकास्फोताविदारीकपिकच्छुभिः। वातघ्नैर्जीवनीयैश्च कल्कैर्द्विक्षीरभागिकम्॥ १८७॥
तत्सिद्धं नावनाभ्यङ्गात् तथा पानानुवासनात्। शिरापर्वास्थिकोष्ठस्थं प्रणुदत्याशु मारुतम्॥ १८८॥
ये स्युः प्रक्षीणमज्जानः क्षीणशुक्रौजसश्च ये। बलपुष्टिकरं तेषामेतत् स्यादमृतोपमम्॥ १८९॥

Majjasneha

The disintegrated bones of domestic, marshy and aquatic animals are boiled in water (so that the marrow is extracted). This marrow is cooked with daśamūla decoction and double milk along with the paste of jīvaka, ṛṣabhaka, āsphotā, vidārī, kapikacchū, (drugs of) bhadradārvādi and jīvanīya gaṇas. This is used as snuff, massage, intake and enema. It alleviates vāta located in blood vessels, joints, bones and viscera and promotes strength and corpulence. It is like nectar for those having diminished marrow, semen and ojas. [186-189]

चतुःस्नेहः

प्रस्थः स्यात् त्रिफलायास्तु कुलत्थकुडवद्वयम्। कृष्णगन्धात्वगाढक्योः पृथक् पञ्चपलं भवेत्॥ १९०॥
रास्नाचित्रकयोर्द्वे द्वे दशमूलं पलोन्मितम्। जलद्रोणे पचेत् पादशेषं प्रस्थोन्मितं पृथक्॥ १९१॥
सुराऽऽरनालदध्यम्लसौवीरकतुषोदकम्। कोलदाडिमवृक्षाम्लरसं तैलं घृतं वसाम्॥ १९२॥
मज्जानञ्च पयश्चैव जीवनीयपलानि षट्। कल्कं दत्त्वा महास्नेहं सम्यगेनं विपाचयेत्॥ १९३॥
शिरामज्जास्थिगे वाते सर्वाङ्गैकाङ्गरोगिषु। वेपनाक्षेपशूलेषु तमभ्यङ्गे प्रदापयेत्॥ १९४॥

Catuḥsneha

Triphalā 640 gm, kulattha 320 gm, śobhāñjana (root bark) 200 gm, āḍhakī 200

gm, rāsnā 90 gm, citraka 80 gm, daśamūla 40 gm, (each component) are boiled together in water 10.24 litre reduced to one-fourth. This is added with beer, sour gruel, sour curd, sauvīraka, tuṣodaka, juice of kola, dāḍima and vṛkṣāmla, oil, ghee, muscle-fat, marrow and milk each 640 ml. This is cooked along with (the drugs of) jīvanīya gaṇa 240 gm (total). It is useful for massage in vāta located in blood vessels, marrow and bone, generalised or localised, characterized by trembling, convulsions and pain. [190-194]

कुब्जप्रसारणीतैलम्

प्रसारणीशतं क्षुण्णं पचेत् तोयार्मणे शुभे। पादशेषे समं तैलं दधि दद्यात् सकाञ्जिकम्॥ १९५॥
द्विगुणञ्च पयो दत्त्वा कल्कान् द्विपलिकांस्तथा। चित्रकं पिप्पलीमूलं मधुकं सैन्धवं वचाम्॥ १९६॥
शतपुष्पां देवदारु रास्नां वारणपिप्पलीम्। प्रसारण्याश्च मूलानि मांसी भल्लातकानि च॥ १९७॥
पचेन्मृद्वग्निना तैलं वातश्लेष्मामयाञ्जयेत्। अशीतिं नरनारीस्थान् वातरोगान् व्यपोहति॥ १९८॥
कुब्जस्तिमितपङ्गुत्वं गृध्रसीं खुडकार्दितम्। हनुपृष्ठशिरोग्रीवास्तम्भञ्चाशु नियच्छति॥ १९९॥

Kubjaprasāraṇī-taila

Prasāraṇī 4 kg is boiled in water 10.24 litre reduced to one-fourth. This decoction is added with quantity of oil, curd, sour gruel and double milk along with the paste of the following drugs 80 gm each— citraka, pippalīmūla, madhuka, saindhava, vacā, śatapuṣpā, devadāru, rāsnā, gajapippalī, prasāraṇī (root), māṃsī and bhallātaka and cooked on mild fire.

This oil overcomes all disease caused by vāta and kapha and eighty disorders of vāta particularly humpedness, ūrustambha, lameness, sciatica, vātakaṇṭaka and stiffness in jaw, back, head and neck. [195-199]

त्रिशतीप्रसारणीतैलम्

समूलपत्रशाखाञ्च जातसारां प्रसारणीम्। कुट्टयित्वा पलशतं दशमूलशतं तथा॥ २००॥
अश्वगन्धापलशतं कटाहे समधिक्षिपेत्। वारिद्रोणे पृथक् पक्त्वा पादशेषावतारितम्॥ २०१॥
कषायसममात्रन्तु तैलमत्र प्रदापयेत्। दध्नस्तथाऽढकं दत्त्वा द्विगुणञ्चापि काञ्जिकम्॥ २०२॥
चतुर्द्रोणेन पयसा जीवनीयैः पलोन्मितैः। शृङ्गबेरपलान् पञ्च त्रिंशद्भल्लातकानि च॥ २०३॥
द्वे पले पिप्पलीमूलाच्चित्रकस्य पलद्वयम्। यवक्षारपले द्वे च मधुकस्य पलद्वयम्॥ २०४॥
सौवर्चलपले द्वे च मञ्जिष्ठायाः पलद्वयम्। प्रसारणीपले द्वे च सैन्धवस्य पलद्वयम्॥ २०५॥
सर्वाण्येतानि संस्कृत्य शनैर्मृद्वग्निना पचेत्। एतदभ्यञ्जने श्रेष्ठं वस्तिकर्मनिरूहणे॥ २०६॥
पाने नस्ये च दातव्यं न क्वचित् प्रतिहन्यते। अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान्॥ २०७॥
विंशतिं श्लैष्मिकांश्चैव सर्वानेतान् व्यपोहति। गृध्रसीमस्थिभङ्गञ्च मन्दाग्नित्वमरोचकम्॥ २०८॥
अपस्मारमथोन्मादं विभ्रमं मन्दगामिताम्। त्वग्गताश्चैव ये वाताः शिरासन्धिगताश्च ये॥ २०९॥
जानुसन्धिगताश्चैव पादपृष्ठगतास्तथा। अश्वो वा वातसम्भग्नो गजो वा यदि वा नरः॥ २१०॥
प्रसारयति यस्माद्धि तस्मादेषा प्रसारणी। इन्द्रियाणां प्रजननी वृद्धानाञ्च रसायनी॥ २११॥

एतेनान्धकवृष्णीनां कृतं पुंसवनं महत्। प्रसारणीतैलमिदं बलवर्णाग्निवर्द्धनम्॥ २१२॥
अपनयति वलीपलितमुत्पाटयति पक्षाघातम्। वातस्तम्भं सर्वाङ्गगतं वातगुल्मञ्च नाशयति॥
एतदुपसेव्यमान: प्रसन्नवर्णेन्द्रियो भवति॥ २१३॥

Triṣatī prasāraṇītaila I

The whole plant of mature prasāraṇī, daśamūla and aśvagandhā each 4 kg pounded are decocted in water 10.24 litre reduced to one-fourth. Oil is added in equal quantity, curd 2.56 kg, sour gruel 5.12 litre and milk 40.96 litre along with the paste of the following drugs – (drugs of) jīvanīya gaṇa each 40 gm, śuṇṭhī 200 gm, bhallātaka nuts (30 in number), pippalīmūla, citraka, yavakṣāra, saindhava, sauvarcala, mañjiṣṭhā, prasāraṇī and madhuka each 80 gm and cooked on mild fire. It is excellent for massage, enema, intake and snuff and never fails.

It alleviates eighty, fourty and twenty diseases caused by vāta, pitta and kapha respectively and is particularly useful in sciatica, bone fracture, loss of appetite, anorexia, epilepsy, insanity, giddiness and slow movement. It pacifies vāta located in skin, head, knee-joint, leg and back in animals or men. Its name 'Frasāraṇī' is significant as it extends (limbs by removing contractures). It improves the power of sense organs and is rasāyana for the old people. It is also used as 'puṃsavana' (giving male progeny); promotes strength, lustre and digestive power; removes wrinkles and greying of hairs, destroys hemiplegia, generalised stiffness and vātagulma and makes the person happy. [200-213]

त्रिशतीप्रसारणीतैलम्

प्रसारण्यास्तुलामश्वगन्धाया दशमूलत:। तुलां तुलां पृथग्वारिद्रोणे पादावशेषिते॥ २१४॥
तैलाढकं चतु:क्षीरं दधितुल्यं द्विकाञ्जिकम्। द्विपलैर्ग्रन्थिकक्षारप्रसारण्यक्षसैन्धवै:॥ २१५॥
समञ्जिष्ठाऽग्नियष्ट्याह्वै: पलिकैर्जीवनीयकै:। शुण्ठ्या: पञ्चपलं दत्त्वा त्रिंशद्भल्लातकानि च॥ २१६॥
पचेद्बस्त्यादिना वातं हन्ति सन्धिशिराऽस्थिगम्। पुंस्त्वोत्साहस्मृतिप्रज्ञाबलवर्णाग्निवृद्धये।
प्रसारणीयं त्रिशती, अक्षं सौवर्चलन्त्विह॥ २१७॥

Triśatī prasāraṇītaila II

Prasāraṇī, aśvagandha and daśamūla (total) each 4 kg are decocted in water 10.24 litre reduced to one-fourth. Now oil 2.56 kg, milk four times, curd equal and sour gruel double added to it and cooked alongwith the paste of pippalīmūla, yavakṣāra, sauvarcala, saindhava, mañjiṣṭhā, citraka and madhyaṣṭī each 80 gm, (drugs of) jīvanīya gaṇa (each) 40 gm, śuṇṭhī 200 gm and bhallātaka (30 nuts).

It is useful, as enema etc, in vāta located in joints and blood vessels and promotes sexual potency, energy, memory, intellect, strength, lustre and digestive power. It is known as 'Triśatī prasāraṇī'. Here 'akṣa' is taken as sauvarcala. [214-217]

सप्तशतिकं प्रसारणीतैलम्

समूलपत्रामुत्पाट्य शरत्काले प्रसारणीम्। शतं ग्राह्यं सहचराच्छतावर्य्याः शतं तथा ॥ २१८ ॥
बलाऽऽत्मगुप्ताश्वगन्धाकेतकीनां शतं शतम्। पचेच्चतुर्गुणे तोये द्रवैस्तैलाढकं भिषक् ॥ २१९ ॥
मस्तु मांसरसं चुक्रं पयश्चाढकमाढकम्। दध्याढकसमायुक्तं पाचयेन्मृदुनाऽग्निना ॥ २२० ॥
द्रव्याणान्तु प्रदातव्या मात्रा चार्द्धपलांशिका। तगरं मदनं कुष्ठं केशरं मुस्तकं त्वचम् ॥ २२१ ॥
रास्ना सैन्धवपिप्पल्यौ मांसी मञ्जिष्ठयष्टिके। तथा मेदा महामेदा जीवकर्षभकौ तथा ॥ २२२ ॥
शतपुष्पा व्याघ्रनखं शुण्ठी देवाह्वमेव च। काकोली क्षीरकाकोली वचा भल्लातकं तथा ॥ २२३ ॥
पेषयित्वा समानेतान् साधनीया प्रसारणी। नातिपक्वं न हीनञ्च सिद्धं पूतं निधापयेत् ॥ २२४ ॥
यत्र यत्र प्रदातव्या तन्मे निगदतः श्रृणु। कुब्जानामथ पङ्गूनां वामनानां तथैव च ॥ २२५ ॥
यस्य शुष्यति चैकाङ्गं ये च भग्नास्थिसन्धयः। वातशोणितदुष्टानां वातोपहतचेतसाम् ॥ २२६ ॥
स्त्रीमद्यक्षीणशुक्राणां वाजीकरणमुत्तमम्। वस्तौ पाने तथाऽभ्यङ्गे नस्ये चैव प्रदापयेत् ॥
प्रयुक्तं शमयत्याशु वातजान् विविधान् गदान् ॥ २२७ ॥

Saptaśatika prasāraṇītaila

The whole palnt of prasāraṇī collected in autumm, saireyaka, śatāvarī, balā, kapikacchū, aśvagandha and ketakī each 4 kg are decocted in four times water reduced to one-fourth. Oil 2.56 litre is cooked with this decoction and curd-water, meat-soup, cukra, milk and curd each 2.56 litre along with the paste of the following drugs each 20 gm – tagara, madana, kuṣṭha, nāgakeśara, mustaka, tvak, rāsnā, saindhava, pippalī, māṃsī, mañjiṣṭhā, madhuyaṣṭī, medā, mahāmedā, jīvaka, ṛṣabhaka, śatapuṣpā, vyāghranakha, śuṇṭhī, devadāru, kākolī, kṣīrakakolī, vacā and bhallātaka. It should be cooked properly on mild fire.

It is useful in humpedness, lameness, dwarfism, wasting, fracture, dislocation, vātarakta, vātika insanity and as aphrodisiac for those having diminished semen due to indulgence in sex and drink. It is used in the form of enema, intake, massage and snuff. [218-227]

एकादशशतिकं प्रसारणीतैलम्

शाखामूलदलैः प्रसारणितुलास्तिस्रः कुरुण्टात् तुले छिन्नायाश्च तुले तुले रुबुकतो रास्नाशिरीषात् तुलाम्।
देवाह्वाच्च सकेतकाद् घटशते निःक्वाथ्य कुम्भांशिके तोये तैलघटं तुषाम्बुकलसौ दत्त्वाऽऽढकं मस्तुनः ॥
शुक्ताच्छागरसादथेक्षुरसतः क्षीराच्च दत्त्वाऽऽढकम् स्पृक्काकर्कटजीवकाद्यविकसाकाकोलिकाकच्छुरा।
सूक्ष्मैलाघनसारकुन्दुसरलाकाश्मीरमांसीनखैः कालीयोत्पलपद्मकाह्वयनिशाकक्कोलकग्रन्थिकैः ॥ २२९ ॥
चाम्पेयाभयचोचपूगकटुकाजातीफलाभीरुभिः श्रीवासामरदारुचन्दनवचाशैलेयसिन्धूद्भवैः।
तैलाम्भोदकटुम्भराऽङ्घ्रिनलिकावृश्चीरकच्चोरकैः कस्तूरीदशमूलकेतकनतध्यामाश्वगन्धाऽम्बुभिः ॥
कौन्तीतार्क्ष्यजशल्लकीफललघुश्यामाशताह्वामयैर्भल्लातत्रिफलाऽब्जकेशरमहाश्यामालवङ्गान्वितैः।
सव्योषैस्त्रिपलैर्महीयसि पचेन्मन्देन पात्रेऽग्निना पानाभ्यञ्जनवस्तिनस्यविधिना तन्मारुतं नाशयेत् ॥ २३१ ॥
सर्वार्द्धाङ्गगतं तथाऽवयवगं सन्ध्यस्थिमज्जाश्रितं श्लेष्मोत्थानथ पैत्तिकांश्च शमयेन्नानाविधानामयान्।

धातून् बृंहयति स्थिरश्च कुरुते पुंसां नवं यौवनं वृद्धस्यापि बलं करोति सुमहद्वन्ध्यासु गर्भप्रदम् ॥ २३२ ॥
पीत्वा तैलमिदं जरत्यपि सुतं सूतेऽमुना भूरुहाः सिक्ताःशोषमुपागताश्च फलिनः स्निग्धाः भवन्ति स्थिराः ॥
भग्नाङ्गाः सुदृढीभवन्ति मनुजा गावो हयाः कुञ्जराः ॥ २३३ ॥

Ekādaśaśatika prasāraṇītaila

Whole plant of prasāraṇī 12 kg, saireyaka 8 kg, guḍūcī 8 kg, eraṇḍa 8 kg, rāsnā and śiriṣa combined 4 kg, devadāru and ketaka (combined) 4 kg. These are boiled in water 10.24 litre reduced to 20.48 litre. With this decoction oil 10.24 litre, tuṣāmbu 20.48 litre, curd-water, vinegar, goat's meat-soup, sugarcane juice and milk each 2.56 litre are cooked on mild fire along with the paste of the following drugs – spṛkkā, karkaṭaśṛṅgī, aṣṭavarga, mañjiṣṭhā, kākolī, durālabhā, elā, karpūra, kunduru, sarala, kuṅkuma, māṃsī, nakha, kālīyaka, utpala, padmaka, haridrā, kakkola, pippalīmūla, campaka (flower), uśīra, tvak, pūga, kaṭuka, jātīphala, śatāvarī, śrīveṣṭaka, devadāru, candana, vacā, śaileya, saindhava, śilārasa, musta, kaṭambharā (root), nalikā, vṛścīra, karcūra, kastūrī, daśamūla, ketaka, tagara, gandhatṛṇa, aśvagandhā, bālaka, reṇukā, rasāñjana, śallakī, madanaphala, aguru, priyaṅgu, śatapuṣpā, kuṣṭha, bhallātaka, triphalā, kamalakeśara, mahāśyāmā, lavaṅga and trikaṭu (combined) each 120 gm.

Its use by intake, massage, enema, and snuff pacifies vāta located in part or whole body, joint, bone and marrow and also various disorders caused by kapha and pitta. It promotes dhātus, brings youthfulness and stability, strengthens the old people and provides progeny by removing sterility. By its intake even the old man becomes virile, men and animals get firmness in body parts and even the dried plants are revive if irrigated therewith. [228-233]

अष्टादशशतिकं प्रसारणीतैलम्

समूलदलशाखायाः प्रसारण्याः शतत्रयम्। शतमेकं शतावर्य्या अश्वगन्धाशतं तथा ॥ २३४ ॥
केतकीनां शतञ्चैकं दशमूलाच्छतं शतम्। शतं वाटयालकस्यापि शतं सहचरस्य च ॥ २३५ ॥
जलद्रोणशतं दत्त्वा शतभागावशेषितम्। तच्छेषेण कषायेण कषायद्विगुणेन च ॥ २३६ ॥
सुव्यक्तेनारनालेन दधिमण्डाढकेन च। क्षीरशुक्तेक्षुनिर्यासच्छागमांसरसाढकैः ॥ २३७ ॥
तैलाद् द्रोणं समायुक्तं दृढे पात्रे निधापयेत्। द्रव्याणि यानि पेष्याणि तानि वक्ष्याम्यतः परम् ॥ २३८ ॥
भल्लातकं नतं शुण्ठी पिप्पली चित्रकं शटी। वचा पृक्का प्रसारण्याः पिप्पल्या मूलमेव च ॥ २३९ ॥
देवदारु शताह्वा च सूक्ष्मैला त्वक् च बालकम्। कुङ्कमं मदमञ्जिष्ठातुरुष्कं नखिकागुरु ॥ २४० ॥
कर्पूरकुन्दुरुनिशालवङ्गध्यामचन्दनम्। कक्कोलं नलिका मुस्तं कालीयोत्पलपत्रकम् ॥ २४१ ॥
शटीहरेणुशैलेयश्रीवासश्च सकेतकम्। त्रिफलाकच्छुराभीरुसरलापद्मकेशरम् ॥ २४२ ॥
प्रियङ्गूशीरनलदं जीवकाद्यं पुनर्नवा। दशमूल्यश्वगन्धा च नागपुष्पं रसाञ्जनम् ॥ २४३ ॥
कटुकाजातिपूगानां फलानि शल्लकीरसः। भागांस्त्रिपलिकान् दत्त्वा शनैर्मृद्वग्निना पचेत् ॥ २४४ ॥
विस्तीर्णे सुदृढे पात्रे पाक्यैषा तु प्रसारणी। प्रयोगः षड्विधश्चात्र रोगार्त्तानां विधीयते ॥ २४५ ॥

अभ्यङ्गात् त्वग्गतं हन्ति पानात् कोष्ठगतं तथा। भोजनात् सूक्ष्मनाडीस्थान् नस्यादूर्ध्वगतं तथा।। २४६ ।।
पक्काशयगते वस्तिर्निरूहः सार्वकायिके। एतद्धि बडवाश्वानां किशोराणां यथाऽमृतम्।। २४७ ।।
एतदेव मनुष्याणां कुञ्जराणां गवामपि। अनेनैव च तैलेन शुष्यमाणा महाद्रुमाः।। २४८ ।।
सिक्ताः पुनः प्ररोहन्ति भवन्ति फलशालिनः। वृद्धोऽप्यनेन तैलेन पुनश्च तरुणायते।। २४९ ।।
न प्रसूते च या नारी सा च पीत्वा प्रसूयते। अप्रजः पुरुषो यस्तु सोऽपि पीत्वा सुतं लभेत्।। २५० ।।
अशीतिं वातजान् रोगाञ् श्लैष्मिकान् पित्तजानपि। सन्निपातसमुत्थांश्च नाशयेत् क्षिप्रमेव तु।। २५१ ।।
एतेनान्धकवृष्णीनां कृतं पुंसवनं महत्। कृत्वा विष्णोर्बलिञ्चापि तैलमेतत् प्रयोजयेत्।। २५२ ।।
क्वाथे तुलाऽर्द्धं रास्नायाः किलिमस्य च दीयते। भल्लातकासहत्वे तु तत्स्थाने रक्तचन्दनम्।। २५३ ।।
त्वक्पत्रपत्रमधुरीकुष्ठचम्पकचोरिकाः। ग्रन्थिकोषौ मरुवकमधिकत्वेन दीयते।। २५४ ।।
कर्पूरमददानञ्च शुक्तगन्धोदकक्रिया। द्रव्यशुद्धिः पाकविधिर्भाविप्रसारणीसमः।। २५५ ।।

Aṣṭādaśaśatika prasāraṇītaila

Prasāraṇī (whole plant) 12 kg, śatāvarī, aśvagandhā, ketakī, daśamūla (each), balā and saireyaka each 4 kg are boiled in water 1024 litre reduced to 10.24 litres. Thereto are added sour gruel 20.48 litre, curdscum, milk, vinegar, sugarcane juice, goat's meat-soup each 2.56 litre and oil 10.24 litre. This is cooked on mild fire with the paste of the following drugs each 120 gm – bhallātaka, tagara, śuṇṭhī, pippalī, citraka, śaṭī, vacā, spṛkkā, prasāraṇī (root), pippalīmūla, devadāru, śatapuṣpā, elā, tvak, bālaka, kuṅkuma, kastūrī, mañjiṣṭhā, turuṣka, nakhī, aguru, karpūra, kunduru, haridrā, lavaṅga, gandhatṛṇa, candana, kakkola, nalikā, musta, kālīya, utpala, patra, śaṭī, hareṇu, śaileya, śrīveṣṭaka, ketaka, triphalā (total), durālabhā, śatāvarī, saralā, kamalakeśara, priyaṅgu, uśīra, māṃsī, jīvanīya gaṇa (total), punarnavā, daśamūla (total), aśvagandhā, nāgakeśara, rasāñjana, fruits of kaṭukā (latākastūrī), jātīphala and pūga, śallakī and bola, the cooking is done in a big and firm pan.

It is used in six ways – by massage, it removes vāta located in skin, by drink that located in belly, by eating that located in minute nerves, by snuff that located in upper parts, by unctuous enema that located in intestines and by non-unctuous enema that located in the whole body. It is like nectar for horses, elephants, cows and men. On being irrigated with it even dried plants regain growth and become fruitful. Likewise, by the use of this oil even the old man becomes young. It removes sterility in male and female and provides progeny. It alleviates the eighty disease caused by vāta, and those caused by kapha, pitta and sannipāta. This was used, in early times, for puṃsavana by the clans of andhaka and vṛṣṇi. Its use should be started after offering oblations to god Viṣṇu.

In this formulation rāsnā and devadāru are also added to the decoction in the quantity of 2 kg each. In case of intolerence to bhallātaka, rakta candana is given in its place. Tvakpatra, patra, madhurikā, kuṣṭha, campaka, corikā, granthi (parṇa), jātipatrī, and marubaka are given in addition. Addition of camphor and musk, preparation of vinegar and aromatic water, purification of drugs and method of cooking are as those to be

described in the context of the following formulation of (mahārāja) prasāraṇī taila. [234-255]

महाराजप्रसारणीतैलम्

शतत्रयं प्रसारण्या द्वे च पीतसहाचरात्। अश्वगन्धैरण्डबला वरी रास्ना पुनर्नवा॥ २५६॥
केतकी दशमूलञ्च पृथक् त्वक् पारिभद्रतः। प्रत्येकमेषान्तु तुला तुलाऽर्द्धं किलिमात् तथा॥ २५७॥
तुलाऽर्द्धं स्याच्छिरीषाच्च लाक्षायाः पञ्चविंशतिः। पलानि लोध्राच्च तथा सर्वमेकत्र साधयेत्॥ २५८॥
जले पञ्चाढकशते सपादे तत्र शेषयेत्। द्रोणद्वयं काञ्जिकञ्च षड्विंशत्याढकोन्मितम्॥ २५९॥
क्षौरदध्नोः पृथक् प्रस्थान् दश मस्त्वाढकं तथा। इक्षुरसाढकौ चैव छागमांसतुलात्रये॥ २६०॥
जलपञ्चचत्वारिंशत् प्रस्थान् पक्के तु शेषयेत्। सप्तदश रसप्रस्थान् मञ्जिष्ठाक्काथ एव च॥ २६१॥
कुडवोनाढकोन्मानो द्रवैरेतैस्तु साधयेत्। सुशुद्धतिलतैलस्य द्रोणं प्रस्थेन संयुतम्॥ २६२॥

प्रथमः कल्कपाकः

काञ्जिकं मानतो द्रोणं शुक्तेनात्र विधीयते। आद्य एभिर्द्रवैः पाकः कल्को भल्लातकं कणा॥ २६३॥
नागरं मरिचञ्चैव प्रत्येकं षट्पलोन्मितम्। भल्लातकासहत्वे तु रक्तचन्दनमुच्यते॥ २६४॥
पथ्याक्षधात्र्याः सरलं शताह्वा कर्कटी वचा। चोरपुष्पी शटी मुस्तद्वयं पद्माञ्च सोत्पलम्॥ २६५॥
पिप्पलीमूलमञ्जिष्ठे साश्वगन्धा पुनर्नवा। दशमूलं समुदितं चक्रमर्दो रसाञ्जनम्॥ २६६॥
गन्धतृणं हरिद्रा च जीवनीयगणस्तथा। एषां त्रिपलिकैर्भागैराद्यः पाको विधीयते॥ २६७॥

द्वितीयः कल्कपाकः

देवपुष्पीबोलपत्रं शल्लकीरसशैलजे। प्रियङ्गूशीरमधुरीमांसीदारुबलाचलम्॥ २६८॥
श्रीवासो नलिका खोटिः सूक्ष्मैला कुन्दुरुर्मुरा। नखीत्रयञ्च त्वक्पत्री पामरा पूतिचम्पकम्॥ २६९॥
मदनं रेणुका स्पृक्का मरुवञ्च पलत्रयम्। प्रत्येकं गन्धतोयेन द्वितीयः पाक इष्यते॥ २७०॥

गन्धोदकनिर्माणप्रकारः

गन्धोदकन्तु त्वक्पत्री पत्रकोशीरमुस्तकम्। प्रत्येकं सबलामूलं पलानि पञ्चविंशतिः॥ २७१॥
कुष्ठार्द्धभागोऽत्र जलप्रस्थास्तु पञ्चविंशतिः। अर्द्धावशिष्टाः कर्त्तव्याः पाके गन्धाम्बुकर्मणि॥ २७२॥

तृतीयः कल्कपाकः

गन्धाम्बुचन्दनाम्बुभ्यां तृतीयः पाक इष्यते। कल्कोऽत्र केशरं कुष्ठं त्वक् कालीयककुङ्कुमम्॥
भद्रश्रियं ग्रन्थिपर्णं लताकस्तूरिका तथा। लवङ्गागुरुकक्कोलजातीकोषफलानि च॥ २७४॥
एला लवङ्गवल्ली च प्रत्येकं त्रिपलोन्मितम्। कस्तूरी षट्पलं चन्द्रात् पलं सार्द्धञ्च गृह्यते॥ २७५॥
वेधार्थञ्च पुनश्चन्द्रमदौ देयौ तथोन्मितौ। महाप्रसारणी सेयं राजयोग्या प्रकीर्त्तिता॥ २७६॥
गुणान् प्रसारणीनान्तु वहत्येषा बलोत्तमान्। काञ्जिकं मानतो द्रोणः शुक्तेनात्र विधीयते॥ २७७॥

Mahārājaprasāraṇī-taila

Prasāraṇī 12 kg, yellow (variety of) saireyaka 8 kg, aśvagandhā, eraṇḍa, balā, śatāvarī,

rāsnā, punarnavā, ketakī, daśamūla (each separately), pāribhadra (bark) each 4 kg, devadāru and śirīṣa each 2 kg, lākṣā and lodhra each 1 kg – all these are boiled together in water 1344 litre reduced to 20.48 litre. Now sour gruel 66.56 litre, milk and curd each 6.4 litre, curd water 2.56 litre, sugarcane juice 5.12 litre, 10.88 litre of meatsoup prepared by cooking goat's flesh 12 kg in water 28.8 litre and decoction of mañjiṣṭhā 2.4 litre – With these liquids tila oil 10.66 is cooked. Sour gruel, in practice, is taken only one droṇa (10.24 litre) and in the form of vinegar. The cooking is done in the following three phases:

Phase I – This is done with the above liquids and the paste of the following drugs – bhallātaka, pippalī, śuṇṭhī, marica each 240 gm (in case of allergy to bhallātaka raktacandana should be used as substitute), harītakī, bibhītaka, āmalaka, sarala, śatapuṣpā, karkaṭaśṛṅgī, vacā, corapuṣpī, śaṭī, two types of musta, flowers of lotus and lily, pippalīmūla, mañjiṣṭhā, aśvagandhā, punarnavā, daśamūla (total), cakramarda (seeds), rasāñjana, gandhatṛṇa, haridrā, jīvanīya gaṇa each 120 gm.

Phase II – Cooking in the second phase is done with aromatic water along with the paste of devapuṣpī, bola, patra, śallaki-rasa, śailey, priyaṅgu, uśīra, madhurikā, māṃsī, devadāru, balā, silhaka, śrīveṣṭaka, nalikā, khoṭī, elā, kunduru, murā, three types of nakhī, tvakpatrī, pāmarā, pūti, campaka, madana, reṇukā, spṛkkā and maruvaka each 120 gm.

The aromatic water (gandhodaka) is prepared as follows – tvakpatrī, patraka, uśīra, mustaka and balā root each 1 kg, kuṣṭha 500 gm are boiled in water 16 litre reduced to half. This aromatic water is used in cooking.

Phase III – In the third phase the cooking is completed with aromatic water and sandal-water with the paste of the following drugs – nāgakeśara, kuṣṭha, tvak, kālīyaka, kuṅkuma, candana, granthiparṇa, latākastūrī, lavaṅga, aguru, kakkola, jātikośa, jātīphala, elā, lavangavallī each 120 gm, musk 240 gm and camphor 60 gm. The latter two are added again in the same quantity at the end.

This mahā (rāja) prasāraṇī is suitable for kings. It possesses all the excellent qualities of the prasāraṇī tailas (described earlier). [256-277]

शुक्तविधि:

अत्र शुक्तविधिर्मण्डप्रस्थः पञ्चाढकोन्मितम्। काञ्जिकं कुडवौ दध्नो गुडप्रस्थोऽम्लमूलकात्॥ २७८॥
पलान्यष्टौ शोधितार्द्रात् पलषोडशकं तथा। कणाजीरकसिन्धूत्थहरिद्रामरिचं पृथक्॥ २७९॥
द्विपलं भाविते भाण्डे घृतेनाष्टदिनं स्थितम्। सिद्धं भवति तच्छुक्तं यदाऽवतार्य्य गृह्यते॥
तदा देयं चतुर्जातं पृथक्कर्षत्रयोन्मितम्॥ २८०॥

Preparation of śukta (vinegar)

Rice-scum 640 ml, kāñjika (sour gruel) 12.8 litre, curd 320 gm, jaggery 640 gm, soured radish (as sediment in the sour gruel) 320 gm, purified fresh ginger 640 gm, pippalī, jīraka, saindhava, haridrā and marica each 80 gm – all these should be kept

together in a jar (uncted with ghee) for eight days. At the end, caturjāta (separately) 30 gm should be added thereto. [278-280]

गन्धद्रव्यशुद्धिः

पञ्चपल्लवतोयेन गन्धानां क्षालनं तथा। शोधनञ्चापि संस्कारो विशेषश्चात्र वक्ष्यते ॥ २८१ ॥

पञ्चपल्लवम्

आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः। गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम् ॥ २८२ ॥

Purification of aromatic drugs

Purification and processing of aromatic drugs is done by washing with water (decoction) of pañcapallava which consists of tender leaves of five plants – āmra, jambū, kapittha, bījapūra and bilva. Now specific processing would be dealt with. [281-282]

नखशोधनम्

चण्डीगोमयतोयेन यदि वा तिन्तिडीजलैः। नखं संक्राथयेदेभिरभावे मृन्मयेन तु ॥ २८३ ॥

पुनरुद्धृत्य प्रक्षाल्य भर्जयित्वा निषेचयेत्। गुडपथ्याऽम्बुना ह्येवं शुध्यते नात्र संशयः ॥ २८४ ॥

Purification of nakha

Nakha is boiled with buffallo's dung or tamarind juice or mud-water in absence of the above. Now it is washed, then fried and again dipped into the decoction of harītakī mixed with jaggery. [283-284]

वचाहरिद्राशोधनम्

गोमूत्रे चालम्बुषके पक्त्वा पञ्चदलोदके। पुनः सुरभितोयेन बाष्पस्वेदेन स्वेदयेत्।

गन्धोग्रा शुद्ध्यते ह्येवं रजनी च विशेषतः ॥ २८५ ॥

Purification of vacā and haridrā

Vacā and particularly haridrā are purified by boiling with cow-urine and decoction of alambuṣā and pañcapallava and lastly by steaming with aromatic water. [285]

मुस्तकशोधनम्

मुस्तकन्तु मनाक् क्षुण्णं काञ्जिके त्रिदिनोषितम्। पञ्चपल्लवपानीयस्विन्नमातपशोषितम् ॥ २८६ ॥

गुडाम्बुना सिच्यमानं भर्जयेच्चूर्णयेत् ततः। आजशोभाञ्जनजलैर्भावयेच्चेति शुध्यति ॥ २८७ ॥

Purification of mustaka

Mustaka is ground slightly and kept in sour gruel for three days, then steamed with decoction of pañcapallava and dried in the sun. Again it is sprinkled with jaggery water, fried and powdered. Finally it is impregnated with goat's urine and decoction of śobhāñjana. [286-287]

शैलजशोधनम्

काञ्जिके क्वथितं शैलं भृष्ट्वा पथ्यागुडाम्बुना। सिञ्चेदेवं पुनः पुष्पैर्विविधैरधिवासयेत्॥ २८८॥

Purification of śaileya

Śaileya is decocted with sour gruel, fried and then sprinkled with decoction of harītakī mixed with jaggery. Lastly it is scented with various flowers. [288]

खट्टाशीशोधनम्

यथालाभमपामार्गस्नुह्यादिक्षारलेपितम्। बाष्पस्वेदेन संस्वेद्य पूतिं निर्लोमतां नयेत्॥ २८९॥
दोलापाकं पचेत् पश्चात् पञ्चपल्लववारिणि। खलः साधुमिवोत्पीड्य ततो निःस्नेहतां नयेत्॥ २९०॥
आजशोभाञ्जनजलैर्भावयेच्च पुनः पुनः। शिग्रुमूले च केतक्याः पुष्पपत्रपुटे च तम्॥
पचेदेवं विशुद्धः सन् मृगनाभिसमो भवेत्॥ २९१॥

Purification of khaṭṭāśī

Khaṭṭāśī is pasted with the alkali of apāmārga, snuhī etc, as available, and subjected to vapour steam in order to remove its hairs. Then it is boiled in dolā-yantra with decoction of pañcapallava and pressed so as to eliminate fatty substances. Again it is impregnated with goat's urine and decoction of śobhāñjana continuously. Thereafter it is kept within the paste of śigru root, wrapped with ketakī flower petals and subjected to puṭapāka. Thus it becomes pure and like musk. [289-291]

तुरुष्कादिशोधनम्

तुरुष्कं मधुना भाव्यं काश्मीरञ्चापि सर्पिषा। रुधिरेणायसं प्राज्ञैर्गोमूत्रैर्ग्रन्थिपर्णकम्।
मधूदकेन मधुरीं पत्रकं तण्डुलाम्बुना॥ २९२॥

Purification of silhaka etc.

Silhaka, kuṅkuma, aguru, granthiparṇa, madhurikā and patraka are purified by impregnation with honey, ghee, kuṅkuma, cow-urine, honey-water and rice-water respectively. [292]

विशुद्धकस्तूर्या लक्षणम्

ईषत् क्षारानुगन्धा तु दग्धा याति न भस्मताम्। पीता केतकगन्धाढ्या लघुस्निग्धा मृगोत्तमा॥ २९३॥

Characters of pure musk

Pure musk possesses slight alkaline odour, yellowish tinge, fragrance like that of ketakī flower, is light and unctuous and does not become ash on burning. [293]

कर्पूरस्य स्वरूपम्

पक्वात् कर्पूरतः प्राहुरपक्वं गुणवत्तरम्। तत्रापि स्याद् यदक्षुद्रं स्फटिकाभं तदुत्तमम्॥ २९४॥
पक्वञ्च सदलं स्निग्धं हरितद्युति चोत्तमम्। भङ्गे मनागपि न चेन्निपतन्ति ततः कणाः॥ २९५॥

Character of camphor

Natural camphor is better in qualities than the artificial one. There also big and crystal-like is regarded as the best one.

As regards the artificial one, scaly, unctuous and greenish is taken as the best and also which does not leave gravels on breaking. [294-295]

कुष्ठचन्दनागुरूणां प्राशस्त्यस्वरूपम्

मृगशृङ्गोपमं कुष्ठं चन्दनं रक्तपीतकम्। काकतुण्डाकृतिः स्निग्धो गुरुश्चैवोत्तमोऽगुरुः ॥ २९६ ॥

Characters of kuṣṭha etc

Kuṣṭha is like deer's horn, candana with reddish and yellowish tinge while aguru is like crow's beak unctuous and heavy. [296]

कुङ्कुमादीनां प्राशस्त्यस्वरूपम

स्निग्धाल्पकेशरन्त्वस्रं शालिजो वृत्तमांसलः। मुरा पीता वरा प्रोक्ता मांसी पिङ्गजटाऽऽकृतिः ॥ २९७ ॥

Kuṅkuma (saffron) consists of unctuous and small stamens, khaṭṭāśī is round and fleshy, murā is yellow and māṃsī is like grey jotted hair. [297]

रेणुकादीनां प्राशस्त्यलक्षणम्

रेणुका मुद्गसंस्थाना शस्तमानूपजं घनम्। जातीफलं सशब्दञ्च स्निग्धं गुरु च शस्यते ॥ २९८ ॥

Reṇukā is like green gram, mustaka grown in marshy land is better and jātīphala with sound, unctuous and heavy is good. [298]

एलादीनां प्राशस्त्यलक्षणम्

एला सूक्ष्मफला श्रेष्ठा प्रियङ्गुः श्यामपाण्डुरा। नखमश्वखुरं हस्तिकर्णञ्चैव प्रशस्यते ॥
एतेषामपरेषाञ्च नवता प्रवरो गुणः ॥ २९९ ॥

Elā having small seeds, priyaṅgu dark, yellowish and nakha like horse's hoof and elephant's ear are good.

Of these and others freshness is the outstanding quality. [299]

महासुगन्धिलक्ष्मीविलासतैलम्

जिङ्गीचोरकदेवदारुसरलव्याघ्रीवचाचेलकत्वक्पत्रैः सह गन्धपत्रकशटीपथ्याऽक्षधात्रीघनैः।
एतैः शोधितसंस्कृतैः पलयुगेत्याख्यातया संख्यया तैलप्रस्थमवस्थितैः स्थिरमतिः कल्कैः पचेद्गान्धिकैः ॥
मांसीमुरादमनचम्पकसुन्दरीत्वग्ग्रन्थ्यम्बुरुङ्मरुवकैर्द्विपलैः सपृक्कैः।
श्रीवासकुन्दुरुनखीनलिकामिशीणां प्रत्येकतः पलमुपार्ज्य पुनः पचेत्तु ॥ ३०१ ॥
एलालवङ्गचलचन्दनजातिपूतिकक्कोलकागुरुलताघुसृणैः पलार्द्धैः।
कस्तूरिकाऽक्षसहितामलदीप्तियुक्तैः पक्त्वा तु मन्दशिखिनैव महासुगन्धम् ॥ ३०२ ॥
पञ्चद्विकेन वाऽर्द्धेन मदात् कर्पूरमिष्यते। कर्पूरमदयोरर्द्धं पत्रकल्कादिहेष्यते ॥ ३०३ ॥

पक्वपूतेऽप्युष्ण एव सम्यक् पेषणवर्त्तितम्। दीयते गन्धवृद्ध्यर्थं पत्रकल्कं तदुच्यते॥ ३०४॥

वातादौ लक्ष्मीविलासतैलम्

प्रागुक्तौ शुद्धिसंस्कारौ गन्धानामिह तैः पुनः। द्विगुणैर्लक्ष्मीविलासः स्यादयं तैलसत्तमः॥ ३०५॥
पञ्चपत्राम्बुना चाद्यो द्वितीयो गन्धवारिणा। तृतीयोऽपि च तेनैव पाको वा धूपिताम्बुना॥ ३०६॥
तैलयुग्ममिदं तूर्णं विकारान् वातसम्भवान्। क्षपयेज्जनयेत् पुष्टिं कान्तिं मेधां धृतिं धियम्॥ ३०७॥

Mahāsugandhi and Lakṣmīvilāsa taila

Mañjiṣṭhā, coraka, devadāru, sarala, vyāghrī (nakhi), vacā, pūga (bark), patra, gandhapatraka, śaṭī, harītakī, bibhītaka and mustaka each purified 80 gm— with the paste of these oil 640 ml is cooked in the first phase. Again it is cooked with māṃsī, murā, damana (Ka), campaka, priyaṅgu, tvak, granthiparṇa, bālaka, kuṣṭha, maruvaka and spṛkkā each 80 gm; śrīveṣṭaka, kunduru, nakhī, nalikā and madhurikā each 40 gm. Finally it is cooked on mild fire with elā, lavaṅga, silhaka, candana, jātīphala, pūti, kakkola, aguru, latākastūri and kuṅkuma each 20 gm, kastūrī 10 gm along with camphor. It is mahāsugandhi taila.

Camphor, in proportion to musk, should be given 2/5 or 1/2 (e.g. 4 or 5 gm). The quantity of musk and comphor in paste is 1/2 of that required in patrakalka (It indicates that in patrakalka musk and camphor should be added 20 gm and 8 or 10 gm respectively).

Oil cooked and strained and when it is still warm is added with aromatic substances pounded in order to improve its aroma. This is termed as patrakalka.

The aromatic substances should be used after proper purification and processing.

With the same drugs (as in mahāsugandhi) but doubled another oil is prepared which is known as Lakṣmīvilāsa taila.

The cooking in first, second and third phases should be done with decoction of pañcapallava, aromatic water and water scented with aguru etc. respectively.

These two oils alleviate vātika disorders instantaneously and promote corpulence, lustre, intellect and restraint. [300-307]

॥ इति वातव्याधिचिकित्सा ॥ २२ ॥

Thus ends treatment of vātavyādhi. [22]

२३. त्रयोविंशोऽध्याय:

CHAPTER XXIII

वातरक्त-चिकित्सा

Treatment of Vātarakta

क्रियाक्रम:

बाह्यं लेपाभ्यङ्गसेकोपनाहैर्वातशोणितम्। विरेकास्थापनस्नेहपानैर्गम्भीरमाचरेत्॥ १॥

The superficial type of vātakarta should be treated with paste, massage and poultice while the deep one with purgation, non-unctuous enema and intake of sneha. [1]

द्वयोर्मुञ्चेदसृक् शृङ्गसूच्यलाबुजलौकसा। देशाद् देशं व्रजत् स्राव्यं शिराभिः प्रच्छनेन वा॥ २॥

In both the types, blood-letting should be done with horn, needle, gourd and leeches while in that shifting from place to place venesection or scarification should be applied. [2]

अङ्गग्लानौ च न स्राव्यं रूक्षे वातोत्तरे च यत्॥ ३॥

Blood-letting is contra- indicated in emaciation, roughness and predominance of vāta. [3]

त्रिकार्षिक:

अमृतानागरधान्यककर्षत्रयेण पाचनं सिद्धम्। जयति सरक्तं वातं सामं कुष्ठान्यशेषाणि॥ ४॥

Trikārṣika

Guḍūcī, śuṇṭhī and dhānyaka each 10 gm. This decoction is digestive, alleviates vātarakta associated with āma and all types of kuṣṭha. [4]

वत्सादनीक्वाथ:

वत्सादन्युद्भवः क्वाथः पीतो गुग्गुलुसंयुतः। समीरणसमायुक्तं शोणितं सम्प्रसाधयेत्॥ ५॥

The decoction of guḍūcī taken with guggulu cures vātarakta. [5]

वासादि:

वासागुडूचीचतुरङ्गुलानारण्डतैलेन पिबेत् कषायम्। क्रमेण सर्वाङ्गजमप्यशेषं जयेदसृग्वातभवं विकारम्॥

Vāsādi

The decoction of vāsā, guḍūcī and āragvadha mixed with castor oil should be taken to alleviate the disorder of vātarakta even generalised. [6]

मुण्डितिकाप्रयोग:

लीढ्वा मुण्डितिकाचूर्णं मधुसर्पिःसमायुतम्। छिन्नाक्वाथं पिबन् हन्ति वातरक्तं सुदुस्तरम्॥ ७॥

If one takes the powder of muṇḍitikā mixed with honey and ghee followed by the decoction of guḍūcī it destroys vātarakta even severe. [7]

पथ्याप्रयोगः

तिस्रोऽथवा पञ्च गुडेन पथ्या जग्ध्वा पिबेच्छिन्नरुहाकषायम्।
तद्वातरक्तं शमयत्युदीर्णमाजानु सम्भिन्नमपि ह्यवश्यम्॥ ८॥

One should take three or five fruits of harītakī with jaggery followed by guḍūcī decoction. It destroys vātarakta even in advanced stage damaging the entire lower limb. [8]

गुडूच्याः षट् प्रयोगाः

घृतेन् वातं सगुडा विबन्धं पित्तं सिताऽऽढ्या मधुना कफञ्च।
वातासृगुग्रं रुबुतैलमिश्रा शुण्ठ्याऽऽमवातं शमयेद् गुडूची॥ ९॥

Guḍūcī (alone) pacifies vāta when taken with ghee, constipation with jaggery, pitta with sugar, kapha with honey, severe vātarakta when mixed with castor oil and āmavata when mixed with śuṇṭhī. [9]

गुडूच्याश्चत्वारः कल्पाः

गुडूच्याः स्वरसं कल्कं चूर्णं वा क्वाथमेव वा। प्रभूतकालमासेव्य मुच्यते वातशोणितात्॥ १०॥

Guḍūcī used in the form of fresh juice, paste, powder or decoction regularly alleviates vātarakta. [10]

परिषेकद्वयम्

दशमूलीशृतं क्षीरं सद्यः शूलनिवारणम्। परिषेकोऽनिलप्राये तद्वत् कोष्णेन सर्पिषा॥ ११॥

Milk processed with daśamūla removes pain immediately. Similar is the effect of warm ghee in predominating vātika type by sprinkling. [11]

पटोलादिः

पटोलकटुकाभीरुत्रिफलाऽमृतसाधितम्। क्वाथं पीत्वा जयेज्जन्तुः सदाहं वातशोणितम्॥ १२॥

Paṭolādi

Decoction prepared with paṭola, kaṭukā, śatāvarī, triphalā and guḍūcī overcomes, by intake, vātarakta with burning sensation. [12]

गोधूमचूर्णादिलेपत्रयं सेकश्च

गोधूमचूर्णाजपयो घृतञ्च सच्छागदुग्धोरुबुबीजकल्कः।
लेपे विधेयं शतधौतसर्पिः सेके पयश्चाविकमेव शस्तम्॥ १३॥

The part is pasted with (1) wheat-flour mixed with goat's milk and ghee (2) pounded castor seeds mixed with goat's milk or (3) ghee washed hundred times and is also sprinkled with sheep milk. [13]

भृष्टतिलकल्कप्रलेपः

लेपः पिष्टास्तिलास्तद्वद् भृष्टाः पयसि निर्वृताः ॥ १४ ॥

The sesamum seeds are pounded and fried and then dipped into milk. This is useful as paste in vātarakta. [14]

कटुकादिः

कटुकाऽमृतयष्ट्याह्वशुण्ठीकल्कं समाक्षिकम्। गोमूत्रपीतं जयति सकफं वातशोणितम्॥ १५ ॥

Kaṭukādi

Kaṭukā, guḍūcī, madhuyaṣṭī and śuṇṭhī are pounded together, mixed with honey and taken with cow's urine. It alleviates vātarakta associated with kapha. [15]

धात्र्यदिः

धात्रीहरिद्रामुस्तानां कषायं वा कफाधिके॥ १६ ॥

Dhātryādi

Or decoction of āmalakī, haridrā and musta is useful in the condition having predominance of kapha. [16]

कोकिलाक्षादिः

कोकिलाक्षामृताक्वाथे पिबेत् कृष्णां कफाधिके। पथ्यभोजी त्रिसप्ताहान्मुच्यते वातशोणितात्॥ १७ ॥

Kokilākṣādi

In decoction of kokilākṣa (root) and guḍūcī pippalī powder is added and taken in predominance of kapha. Thus, keeping on wholesome diet, one is relieved of vātarakta in three weeks. [17]

वातरक्ते गुडघृतप्रयोगः

कफरक्तप्रशमनं कच्छूवीसर्पनाशनम्। वातरक्तप्रशमनं हृद्यं गुडघृतं स्मृतम्॥ १८ ॥

Jaggery mixed with ghee in equal quantity (and taken in diet) pacifies kapha and rakta, destroys scabies and erysipelas and alleviates vātarakta. It is also pleasant. [18]

द्वन्द्वजे चिकित्साविधिः

संसर्गेषु यथोद्रेकं मिश्रं वा प्रतिकारयेत्॥ १९ ॥

When two doṣas are combined one should apply remedial measures according to predominance or in the mixed form. [19]

पथ्यादिप्रयोगत्रयम्

सर्वेषु सगुडां पथ्यां गुडूचीक्वाथमेव वा। पिप्पलीवर्धमानं वा शीलयेत् सुसमाहितः॥ २० ॥

In all types one should use regularly harītakī with jaggery or guḍūcī decoction or pippalī-vardhamāna. [20]

गुडूचीतैलम्

गुडूचीक्वाथकल्काभ्यां पचेत् तैलं तिलस्य च। पयसा च समं पक्त्वा भिषङ्मन्देन वह्निना॥ २१॥
हन्ति वातं तथा रक्तं कुष्ठं जयति दुस्तरम्। त्वग्दोषं व्रणवीसर्पकण्डूदद्रुविनाशनम्॥ २२॥

Guḍūcī-taila

Sesamum oil is cooked with decoction and paste of guḍūcī along with equal quantity or milk on mild fire. It destroys vātarakta, kuṣṭha, skin diseases, erysipelas, itches and ring worm. [21-22]

नवकार्षिक:

त्रिफलानिम्बमञ्जिष्ठा वचा कटुकरोहिणी। वत्सादनी दारुनिशा कषायो नवकार्षिक:॥ २३॥
वातरक्तं तथा कुष्ठं पामानं रक्तमण्डलम्। कुष्ठं कापालिकं कुष्ठं पानादेवापकर्षति॥ २४॥
पञ्चरक्तिकमाषेण काय्र्योऽयं नवकार्षिक:। किन्त्वेवं साधिते क्वाथे योग्या मात्राऽत्र दीयते॥ २५॥

Navakārṣika

Triphalā (separately), nimba, mañjiṣṭhā, vacā, kaṭukā, guḍūcī and dāruharidrā each one karṣa (10 gm). This is known as 'navakārṣika' and alleviates vātarakta, kuṣṭha, exzema and red patches by intake. In navakārṣika formulation 'māṣa' is taken as of five raktikās but even if the decoction be prepared in this way the dose should be given as applicable. [23-25]

गुडूचीघृतम्

गुडूचीक्वाथकल्काभ्यां सपयस्कं शृतं घृतम्। हन्ति वातं तथा रक्तं कुष्ठं जयति दुस्तरम्॥ २६॥

Guḍūcīghṛta

Ghee cooked with decoction and paste of guḍūcī alongwith milk alleviates vātarakta and kuṣṭha even if severe. [26]

शतावरीघृतम्

शतावरीकल्कगर्भं रसे तस्याश्चतुर्गुणे। क्षीरतुल्यं घृतं पक्वं वातशोणितनाशनम्॥ २७॥

Śatāvarīghṛta

Ghee cooked with paste of śatāvarī along with its juice four times and milk destroys vātarakta. [27]

अमृताद्यं घृतम्

अमृता मधुकं द्राक्षा त्रिफला नागरं बला। वाताऽऽरग्वधवृश्चीरदेवदारुत्रिकण्टकम्॥ २८॥
कटुका सवरी कृष्णा काश्मर्य्यस्य फलानि च। रास्नाक्षुरकगन्धर्ववृद्धदारघनोत्पलै:॥ २९॥
कल्कैरेभि: समै: कृत्वा सर्पि:प्रस्थं विपाचयेत्। धात्रीरसं समं दत्त्वा वारित्रिगुणसंयुतम्॥ ३०॥
सम्यक्सिद्धन्तु विज्ञाय भोज्ये पाने च शस्यते। बहुदोषान्वितं वातं रक्तेन सह मूर्च्छितम्॥ ३१॥

उत्तानश्चापि गम्भीरं त्रिकजङ्घोरुजानुजम्। क्रोष्टुशीर्षे महाशूले चामवाते सुदारुणे।। ३२।।
वातरोगोपसृष्टस्य वेदनाश्चातिदुस्तराम्। मूत्रकृच्छ्रमुदावर्त्तं प्रमेहं विषमज्वरम्।। ३३।।
एतान् सर्वान् निहन्त्याशु वातपित्तकफोद्भवान्। सर्वकालोपयोगेन वर्णायुर्बलवर्द्धनम्।
अश्विभ्यां निर्म्मितं श्रेष्ठं घृतमेतदनुत्तमम्।। ३४।।

Amṛtādya ghṛta

Triphalā, śuṇṭhī, balā, vāsā, amṛtā (guḍūcī), āragvadha, punarnavā, devadāru, gokṣura, kaṭukā, śatāvarī, pippalī, gambhārī (fruit), rāsnā, ikṣuraka, eraṇḍa, vṛddhadāraka, musta, utpala each in equal quantity – with the paste of these ghee 640 gm should be cooked with equal quantity of āmalakī juice and water three times. When it is cooked well, it is used in food and drink. It alleviates vātarakta, severe, superficial or deep and located in sacral region, legs, thigh and knee, kroṣṭuśīrsa with severe pain, severe āmavata, intense pain in vātavyādhi, dysuria, udāvarta, prameha, viṣamajvara and all the disorders caused by vāta, pitta and kapha. This excellent ghṛta is formulated by Aśvins and by regular use, it promotes lustre, life-span and strength. [28-34]

दशपाकबलातैलम्

बलाकषायकल्काभ्यां तैलं क्षीरचतुर्गुणम्। दशपाकं भवेदेतद् वातासृग्वातपित्तजित्।। ३५।।
धन्यं पुंसवनश्चैव नराणां शुक्रवर्द्धनम्। रेतोयोनिविकारघ्नमेतद्वातविकारनुत्।। ३६।।

Daśapākabalā-taila

Oil is cooked with decoction and paste of balā alongwith milk four times and the process is repeated ten times (daśapāka). It alleviates vātarakta and vātapitta and is useful in puṃsavana, for promoting semen, removing disorders of semen and uterus and alleviating vātika disorders. [35-36]

गुडूच्यादीनि तैलानि

गुडूचीक्वाथदुग्धाभ्यां तैलं द्राक्षारसेन वा। सिद्धं मधुककाश्मर्य्यरसैर्वा वातरक्तनुत्।। ३७।।

Oil cooked with (1) guḍūcī decoction and milk (2) grape juice or (3) decoction of madhuka and gambhārī alleviates vātarakta. [37]

खुड्डाकपद्मकतैलम्

पद्मकोशीरयष्ट्याह्वरजनीक्वाथसाधितम्। स्यात् पिष्टैः सर्जमञ्जिष्ठावीराकाकोलिचन्दनैः।
खुड्डापकपद्मकमिदं तैलं वातास्रदाहनुत्।। ३८।।

Khuḍḍākapadmaka-taila

Oil is cooked with the decoction of padmaka, uśīra, madhuyaṣṭī and haridrā along with the paste of sarjarasa, mañjisthā, vīrā, kākolī and candana. This is known as khuḍḍāka-padmaka and alleviates vātarakta and burning sensation. [38]

नागबलातैलम्

शुद्धां पचेन्नागबलातुलान्तु विस्राव्य तैलाढकमत्र दद्यात्।
अजापयस्तुल्यविमिश्रितन्तु नतस्य यष्टीमधुकस्य कल्कम्॥ ३९॥
पृथक् पचेत् पञ्च पलं विपक्वं तद्वातरक्तं शमयत्युदीर्णम्।
वस्तिप्रदानादिह सप्तरात्रात् पीतं दशाहात् प्रकरोत्यरोगम्॥ ४०॥
तुलाद्रव्ये जलद्रोणो द्रोणे द्रव्यतुला मता॥ ४१॥

Nāgabalā-taila

Clean nāgabalā 4 kg is made into decoction. With this oil 2.56 litre is cooked along with equal goat's milk and paste of tagara and yaṣṭīmadhu each 200 gm. It alleviates vātarakta, even if severe, in a week by using in enema and in ten days by intake. If drug is 4 kg, water should be 10.24 litre and vice versa. [39-41]

पिण्डतैलम्

समधूच्छिष्टमञ्जिष्ठं ससर्जरसशारिवम्। पिण्डतैलं तदभ्यङ्गाद् वातरक्तरुजापहम्॥ ४२॥

Piṇḍa-taila

Piṇḍataila is prepared with bee-wax, mañjiṣṭhā, sarjarasa and sārivā. By its anointment the pain of vātarakta vanishes. [42]

महापिण्डतैलम्

शारिवासर्जमञ्जिष्ठायष्टिसिक्थैः पयोऽन्वितैः। तैलं पक्वं विमञ्जिष्ठै रुवोर्वा वातरक्तनुत्॥ ४३॥

Mahāpiṇḍataila

This is prepared by cooking oil with sārivā, sarjarasa, mañjiṣṭhā, madhuyaṣṭī and bee-wax along with milk. It is also prepared by deleting mañjiṣṭhā and cooking castor oil with the above paste. It alleviates vātarakta. [43]

कैशोरगुग्गुलुः

वरमहिषलोचनोदरसन्निभवर्णस्य गुग्गुलोः प्रस्थम्।
प्रक्षिप्य तोयराशौ त्रिफलाञ्च यथोक्तपरिमाणाम्॥ ४४॥
द्वात्रिंशच्छिन्नरुहापलानि देयानि यत्नेन। विपचेत् तदप्रमत्तो दर्व्या सङ्घट्टयन् मुहुर्यावत्॥ ४५॥
अर्द्धक्षपितं तोयं जातं ज्वलनस्य सम्पर्कात्। अवतार्य्य वस्त्रपूतं पुनरपि सम्पादयेत् पात्रे॥ ४६॥
सान्द्रीभूते तस्मिन्नवतार्य्य हिमोपलप्रख्ये।
त्रिफलाचूर्णार्द्धपलं त्रिकटोश्चूर्णं षडक्षपरिमाणम्॥ ४७॥
क्रिमिरिपुचूर्णार्द्धपलं कर्षं कर्षं त्रिवृद्दन्त्योः। पलमेकञ्च गुडूच्याः दत्वा सम्मूर्द्य यत्नेन॥ ४८॥
उपयुज्य चानुपानं यूषं तोयं सुगन्धिसलिलेन।
इच्छाहारविहारी भेषजमुपयुज्य सर्वकालमिदम्॥ ४९॥

तनुरोधि वातशेणितमेकजमथ द्वन्द्वजं चिरोत्थञ्च।
जयति स्रुतं परिशुष्कं स्फुटितञ्चाजानुजञ्चापि॥ ५०॥
व्रणकासकुष्ठगुल्मं श्वयथूदरपाण्डुमेहांश्च। मन्दाग्निञ्च विबन्धं प्रमेहपिडकाश्च नाशयत्याशु॥ ५१॥
सततं निषेव्यमाणः कालवशाद्धन्ति सर्वगदान्। अभिभूय जरादोषं याति हि कैशोरकं रूपम्॥ ५२॥
प्रत्येकं त्रिफलाप्रस्थो जलं तत्र षडाढकम्। गुडवद् गुग्गुलोः पाकः संबन्धस्तु विशेषतः॥ ५३॥

Kaiśoraguggulu

Reddish brown guggulu (of good quality) 640 gm is closed in a pouch, put in water 10 litre along with triphalā in equal quantity and guḍūcī 1.28 kg and cooked, stirring constantly with laddle, till water is reduced to one-half. Then it is strained through a cloth-piece and guggulu is again cooked therein till it is solidified. Now the following powders are added to it.- triphalā 20 gm, trikaṭu 60 gm, viḍaṅga 20 gm, trivṛt 10 gm, dantī 10 gm and guḍūcī 40 gm.

It should be taken with soup, water or aromatic water while there is no restriction of diet and movements. It alleviates all types of vātarakta, dry or wet, caused singly or dually and (acute) or chronic. Besides, it is useful in wound, cough, kuṣṭha, gulma, oedema, udararoga, anaemia, prameha, diminished digestive fire, constipation and diabetic boils. By constant use it destroys all disorders and restores youth after eliminating senile digeneration.

In triphalā each component should be 640 gm and water 15.36 litre. The pāka (cooking) is like that of jaggery except solidification. [44-53]

अमृतागुग्गुलुः

प्रस्थमेकं गुडूच्यास्तु अर्द्धप्रस्थञ्च गुग्गुलोः। प्रत्येकं त्रिफलायाश्च तत्प्रमाणं विनिर्द्दिशेत्॥ ५४॥
सर्वमेकत्र संक्षुद्य साधयेत् त्वर्म्मणेऽम्भसि। पादशेषं परिस्राव्य पुनरग्नावधिश्रयेत्॥ ५५॥
तावत् पचेत् कषायं तं यावत् सान्द्रत्वमागतम्। दन्तीव्योषविडङ्गानि गुडूचीत्रिफलात्वचः॥ ५६॥
ततश्चार्द्धपलं पूतं गृह्णीयाच्च प्रति प्रति। कर्षन्तु त्रिवृतायास्तु सर्वमेकत्र कारयेत्॥ ५७॥
तस्मिन् सुसिद्धं विज्ञाय कवोष्णे प्रक्षिपेद् बुधः। ततश्चाग्निबलं ज्ञात्वा तस्य मात्रां प्रदापयेत्॥ ५८॥
वातरक्तं तथा कुष्ठं गुदजान्यग्निसादनम्। दुष्टव्रणप्रमेहांश्च सामवातं भगन्दरम्॥ ५९॥
नाड्याढ्यवातश्वयथून् सर्वानेतान् व्यपोहति। अश्विभ्यां निर्म्मितः पूर्वममृताख्यो हि गुग्गुलुः॥
अर्द्धप्रस्थं त्रिफलायाः प्रत्येकमिह गृह्यते॥ ६०॥

Amṛtāguggulu

Amṛtā (guḍūci) 640 gm, guggulu 320 gm, triphalā (each) 320 gm – all are pounded together and then boiled in water 10.24 litre reduced to one quarter. Now guggulu is again cooked in this decoction till it becomes thick. Then the following powders are added thereto- dantī, trikaṭu (each), viḍaṅga, guḍūcī, triphalā each 320 gm and trivṛt 10 gm. The dose should be decided according to digestive power.

It destroys vātarakta, kuṣṭha, piles, diminished digestive fire, chronic wound, prameha, āmavāta, fistula-in-ano, sinus, āḍhyavāta and oedema. This amṛtāguggulu was formulated by Aśvins in early times. Here triphalā (each component) should be taken 320 gm. [54-60]

पुनर्नवागुग्गुलुः

अमृतायाश्च द्विप्रस्थं प्रस्थमेकञ्च गुग्गुलोः। प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थमेव च॥ ६१॥
सर्वमेतच्च संक्षुद्य क्वाथयेन्नल्वणेऽम्भसि। पुनः पचेत् पादशेषं यावत् सान्द्रत्वमागतम्॥ ६२॥
दन्तीचित्रकमूलानां कणाविश्वफलत्रिकम्। गुडूचीत्वग्विडङ्गानां प्रत्येकार्द्धपलोन्मितम्॥ ६३॥
त्रिवृताकर्षमेकन्तु सर्वमेकत्र चूर्णयेत्। सिद्धे चोष्णे क्षिपेत् तत्र अमृतागुग्गुलोः परम्॥ ६४॥
यथा वह्निबलं खादेदम्लपित्ती विशेषतः। वातरक्तं तथा कुष्ठं गुदजान्यग्निसादनम्॥ ६५॥
दुष्टव्रणप्रमेहांश्च सामवातं भगन्दरम्। नाड्याढ्यवातं श्वयथून् हन्यात् सर्वामयानयम्॥
अश्विभ्यां निर्मितो ह्येषोऽमृताख्यो गुग्गुलुः पुरा॥ ६६॥

Punarnavā-guggulu

Guḍūcī 1.28 kg, guggulu 640 gm, triphalā (each) 640 gm and punarnavā 640 gm— all pounded should be boiled together in water 10.24 litre reduced to one-fourth. Now guggulu is again cooked in this till it is thickened. Then the following powders are added thereto— root of dantī, and citraka, pippalī, śuṇṭhī, triphalā, guḍūcī, tvak, viḍaṅga each 320 gm and trivṛt 10 gm. It should be taken like amṛtāguggulu according to digestive power particularly by one suffering from acid gastritis.

It alleviates vātarakta, kuṣṭha, piles, diminished digestive power, chronic wound, prameha, āmavāta, fistula-in-ano, sinus, āḍhyavāta and odema, previously it was formulated as amṛtāguggulu by Aśvins. [61-66]

योगसारामृतम्

शतावरी नागबला वृद्धदारकमुच्चटा। पुनर्नवाऽमृता कृष्णा वाजिगन्धा त्रिकण्टकम्॥ ६७॥
पृथग्दशपलान्येषां श्लक्ष्णचूर्णानि कारयेत्। तदर्द्धशर्करायुक्तं चूर्णं सम्मर्दयेद् बुधः॥ ६८॥
स्थापयेत् सुदृढे भाण्डे मध्वर्द्धाढकसंयुतम्। घृतप्रस्थेन चालोड्य त्रिसुगन्धिपलेन तु॥ ६९॥
तं खादेदिष्टचेष्टान्नो यथावह्निबलं नरः। वातरक्तं क्षयं कुष्ठं कार्श्यं पित्तास्रसम्भवम्॥ ७०॥
वातपित्तकफोत्थांश्च रोगानन्यांश्च तद्विधान्। हत्वा करोति पुरुषं वलीपलितवर्जितम्॥
योगसारामृतं नाम लक्ष्मीकान्तिविवर्द्धनम्॥ ७१॥
दिवास्वप्नाग्निसन्तापं व्यायामं मैथुनं तथा। कटूष्णगुर्वभिष्यन्दिलवणाम्लानि वर्जयेत्॥ ७२॥

Yogasārāmṛta

Śatāvarī, nāgabalā, vṛddhadāraka, uccaṭā, punarnavā, guḍūcī, pippalī, aśvagandhā, gokṣura— each 400 gm should be powdered finely and mixed with half quality of sugar. Then it is added with honey 1.28 kg, ghee 640 gm and trijātaka (each) 40 gm and kept in a good container.

It should be taken according to digestive power while there is no restriction of diet and movements. It destroys vātarakta, wasting, kuṣṭha, emaciation, raktapitta and other disorders caused by vāta, pitta and kapha and makes the person free from wrinkles and greying of hairs. This yogasārāmṛta promotes lustre and vigour. [67-71]

Day-sleep, fire-heat, excessive sexual intercourse and food consisting of pungent, hot, heavy, channel-blocking, salty and sour items are unwholsome and should be avoided. [72]

बृहद्गुडूचीतैलम्

तुलां पचेज्जलद्रोणे गुडूच्याः पादशेषितम्। क्षीरद्रोणश्च ताभ्यान्तु पचेत् तैलाढकं शनैः ॥ ७३ ॥
कल्कैर्मधुकमञ्जिष्ठाजीवनीयगणैस्तथा। कुष्ठैलाऽगुरु मृद्वीका मांसी व्याघ्रीनखं नखी ॥ ७४ ॥
हरेणु स्राविणी व्योषं शताह्वा भृङ्गशारिवे। त्वक्पत्रे वचविक्रान्ते स्थिरा चामलकी तथा ॥ ७५ ॥
नतं केशरह्रीबेरपद्मकोत्पलचन्दनैः। सिद्धं कर्षसमैर्भागैः पानाभ्यङ्गानुवासने ॥ ७६ ॥
परं वातास्रजान् हन्ति सर्वजानन्तरस्थितान्। धन्यं पुंसवनं स्त्रीणां गर्भदं वातपित्तनुत् ॥ ७७ ॥
स्वेदकण्डूरुजापामाशिरःकम्पार्दितामयान्। हन्याद् व्रणकृतान् दोषान् गुडूचीतैलमुत्तमम् ॥ ७८ ॥

Bṛhad guḍūcītaila

Guḍūcī 4 kg is boiled in water 10.24 litre reduced to one-fourth. With this decoction oil 2.56 litre is cooked alongwith milk 10.24 litre and the paste of the following drugs each 10 gm – madhuka, mañjiṣṭhā, jīvanīya gaṇa, kuṣṭha, elā, aguru, drākṣā, māṃsī, vyāghranakha, nakhī, hareṇu, srāvinī, trikaṭu, śatāhvā, bhṛṅgarāja, sārivā, tvak, patra, vacā, viṣṇukrāntā, śālaparṇī, āmalaki, tagara, nāgakeśara, haridrā, padmaka, utpala and candana.

This oil used as intake, anointment and enema destroys all types of vātarakta, removes sterlity in females and provides them male progeny. Guḍūcītaila pacifies vāta and pitta and is also useful in sweating, itching, pain, eczema, trembling of hand, facial paralysis and wounds. [73-78]

॥ इति वातरक्तचिकित्सा ॥ २३ ॥

Thus ends treatment of vātarakta. [23]

(Vātarakta is a syndrome caused by combination of aggravated vāta and vitiated blood. It is characterised by numbness, hyperaesthesia, tingling sensation, appearance of rashes or patches on skin, itching and pain in joints.)

२४. चतुर्विंशोऽध्यायः

CHAPTER XXIV

ऊरुस्तम्भ-चिकित्सा

Treatment of Ūrusthambha (paraplegia)

चिकित्साक्रमः

श्लेष्मणः क्षपणं यत् स्यान्न च मारुतकोपनम्। तत् सर्वं सर्वदा कार्य्यमूरुस्तम्भस्य भेषजम्॥ १॥
न तस्य स्नेहनं कार्य्यं न वस्तिर्न विरेचनम्। सर्वो रूक्षः क्रमः कार्य्यस्तत्रादौ कफनाशनः।
पश्चाद्वातविनाशाय कृत्स्नः कार्य्यः क्रियाक्रमः॥ २॥

Whatever diminishes kapha and does not aggravate vāta should always be applied for the treatment of ūrustambha. No unction, enema or purgative be administered to him. At first, all rough remedies should be given to alleviate kapha and thereafter the course of treatment for pacifying vāta should be adopted. [1-2]

चत्वारो योगाः

शिलाजतुं गुग्गुलुं वा पिप्पलीमथ नागरम्। ऊरुस्तम्भे पिबेन्मूत्रैर्दशमूलीरसेन वा॥ ३॥

In ūrustambha, one should take śilājatu, guggulu, pippalī or śuṇṭhī with cow's urine or daśamūla decoction. [3]

भल्लातकादिः

भल्लातकामृताशुण्ठीदारुपथ्यापुनर्नवाः। पञ्चमूलीद्वयोन्मिश्रा ऊरुस्तम्भनिबर्हणाः॥ ४॥

Bhallātakādi (kvātha)

Bhallātaka, guḍūcī, śuṇṭhī, devadāru, harītakī, punarnavā and daśamūla – this formulation (used as decoction) alleviates ūrustambha. [4]

पिप्पल्यादिः

पिप्पलीपिप्पलीमूलभल्लातक्काथ एव वा। कल्को वा समधुर्देय ऊरुस्तम्भनिबर्हणः॥ ५॥

Pippalyādi

Pippalī, pippalīmūla and bhallātaka – This, in the form of decoction or paste (or powder), mixed with honey should be given to alleviate ūrustambha. [5]

त्रिफलादिचूर्णद्वयम्

त्रिफलाचव्यकटुकं ग्रन्थिकं मधुना लिहेत्। ऊरुस्तम्भविनाशाय पुरं मूत्रेण वा पिबेत्॥ ६॥
लिह्याद्वा त्रिफलाचूर्णं क्षौद्रेण कटुकायुतम्। सुखाम्बुना पिबेद्वाऽपि चूर्णं षड्धरणं नरः॥ ७॥

In order to alleviate ūrustambha, one should take the powder of triphalā, cavya, trikaṭu and pippalīmūla with honey or jaggery with cow's urine. [6]

Or one should take the powder of pippalī mixed with trikaṭu (or kaṭukā) along with honey or ṣaḍdharaṇa powder with tepid water. [7]

पिप्पलीवर्द्धमानादियोगद्वयम्

पिप्पलीवर्द्धमानं वा माक्षिकेण गुडेन वा। ऊरुस्तम्भे प्रशंसन्ति गण्डीरारिष्टमेव वा॥ ८॥

In (the treatment of ūrustambha) intake of pippalī – vardhamāna with honey or jaggery or that of gaṇḍīrāriṣṭa is recommended. [8]

चव्यादिचूर्णम्

चव्याभयाग्निदारूणां समधुः स्यादुरुग्रहे। कल्को दिहेच्च मूत्राढ्यैः करञ्जफलसर्षपैः॥ ९॥

In (the treatment of) ūrustambha, the powder of cavya, harītakī, citraka and devadāru should be given with honey and the paste of karañja seeds and mustard mixed with cow's urine should be applied externally. [9]

क्षौद्राद्युत्सादनम्

क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतं भिषक्। गाढमुत्सादनं कुर्य्यादूरुस्तम्भे सलेपनम्॥ १०॥

Honey, mustard and ant-hill earth mixed together should be rubbed and pasted in ūrustambha. [10]

व्यायामः

कफक्षयार्थं व्यायामेष्वेनं शक्येषु योजयेत्। स्थानान्याक्रामयेत् कल्यं प्रतिस्रोतो नदीं तरेत्॥ ११॥

Moreover, the patient should be instructed to take physical exercises such as jumping and swimming against current. [11]

अष्टकट्वरं तैलम्

पलाभ्यां पिप्पलीमूलनागरादष्टकट्वरः। तैलप्रस्थः समो दध्ना गृध्रस्यूरुग्रहापहः।
अष्टकट्वरतैलेऽस्मिंस्तैलं सार्षपमिष्यते॥ १२॥

Aṣṭakaṭvara taila

Oil 640 ml should be cooked with equal quantity of curd along with (the paste of) pippalīmūla and śuṇṭhī 80 gm. This destroys sciatica and ūrustambha. In this formulation 'taila' means 'sarṣapataila' (mustard oil). [12]

कुष्ठाद्यं तैलम्

कुष्ठश्रीवेष्टकोदीच्यं सरलं दारु केशरम्। अजगन्धाऽश्वगन्धा च तैलं तैः सार्षपं पचेत्॥
सक्षौद्रं मात्रया तस्मादूरुस्तम्भार्दितः पिबेत्॥ १३॥

Kuṣṭhādya taila

Mustard oil should be cooked with kuṣṭha, śrīveṣṭaka, udīcya (bālaka), sarala, devadāru, nāgakeśara, ajagandhā, and aśvagandhā. This should be used internally with honey in proper dose in the case of ūrustambha. [13]

योगत्रयम्

सैन्धवाद्यं हितं तैलं वर्षाभ्वमृतगुग्गुलु ॥ १४ ॥

Besides, saindhavādya taila, punarnavā-guggulu and amṛtāguggulu are efficacious (in this case). [14]

॥ इत्यूरुस्तम्भचिकित्सा ॥ २४ ॥

Thus ends treatment of ūrustambha. [24]

२५. पञ्चविंशोऽध्यायः

CHAPTER XXV

आमवात-चिकित्सा

Treatment of Āmavāta

चिकित्साक्रमः

लङ्घनं स्वेदनं तिक्तं दीपनानि कटूनि च। विरेचनं स्नेहपानं वस्तयश्चाममारुते।
सैन्धवाद्येनानुवास्य क्षारवस्तिः प्रशस्यते॥ १॥

Lightening, sudation, bitters, appetisers, pungents, purgative, intake of sneha and application of enemas are recommeneded in (treatment of) āmavāta. Unctuous enema with saindhavādi (oil) followed by kṣārabasti is also prescribed. [1]

आमवाते पञ्चकोलसिद्धं पानान्नमिष्यते। रूक्षः स्वेदः प्रकर्त्तव्यो बालुकापुटकैस्तथा॥ २॥

In āmavata, food and drinks processed with pañcakola are wholesome. (At the same time), rough foenmtation should be applied with sand-pouches. [2]

शट्यादिः

शटी शुण्ठ्यभया चोग्रा देवाह्वातिविषाऽमृता। कषायमामवातस्य पाचनं रूक्षभोजनम्॥ ३॥

Śaṭyādi (kvātha)

Śaṭī, śuṇṭhī, harītakī, vacā, devadāru, ativiṣā and guḍūcī – this decoction is digestive for āmavāta. The patient should be kept on rough diet (during the period). [3]

शट्यादिकल्कः

शटीविश्वौषधीकल्कं वर्षाभूक्काथसंयुतम्। सप्तरात्रं पिबेज्जन्तुरामवातविनाशनम्॥ ४॥

Śatyādi kalka

The paste of śaṭī and śuṇṭhī taken with punarnavā decoction for a week alleviates āmavāta. [4]

रास्नादशमूलकम्

दशमूलामृतैरण्डरास्नानागरदारुभिः। क्काथो रुवूकतैलेन सामं हन्त्यनिलं गुरुम्॥ ५॥

Rāsnādaśamūlaka

Daśamūla, guḍūcī, eraṇḍa, rāsnā, śuṇṭhī and devadāru – this decoction mixed with castor oil destroys vāta associated with āma (āmavāta) even if severe. [5]

एरण्डतैलप्रयोगः

दशमूलीकषायेण पिबेद्वा नागराम्भसा। कुक्षिवस्तिकटीशूले तैलमेरण्डसम्भवम्॥ ६॥

Castor oil mixed with the decoction of daśamūla or śuṇṭhī should be used in pain located in belly, pelvic region and wrist. [6]

रास्नापञ्चकम्

रास्नां गुडूचीमेरण्डं देवदारु महौषधम्। पिबेत् सार्वाङ्गिके वाते सामे सन्ध्यस्थिमज्जगे॥ ७॥

Rāsnāpañcaka

Rāsnā, guḍūcī, eraṇḍa, devadāru and śuṇṭhī – this formulation should be taken in generalised vāta associated with āma particularly located in joints, bone and marrow. [7]

रास्नासप्तकम्

रास्नाऽमृताऽऽरग्वधदेवदारुत्रिकण्टकैरण्डपुनर्नवानाम्।
क्वाथं पिबेन्नागरचूर्णमिश्रं जङ्घोरुपृष्ठत्रिकपार्श्वशूली॥ ८॥

Rāsnāsaptaka

One suffering from pain in leg, thigh, back, sacrum and chest should take decoction of rāsnā, guḍūcī, āragvadha, devadāru, gokṣura, eraṇḍa and punarnavā mixed with śuṇṭhī powder. [8]

शुण्ठ्यादि:

शुण्ठीगोक्षुरकक्वाथ: प्रात: प्रातर्निषेवित:। सामवाते कटीशूले पाचनो रुक्प्रणाशन:॥ ९॥

Śuṇṭhyādi

Decoction of śuṇṭhī and gokṣura taken in early morning acts as digestive and analgesic in lumbago affected with āmavāta. [9]

योगत्रयम्

आमवाते कणायुक्तं दशमूलीजलं पिबेत्। खादेद्वाऽप्यभयाविश्वं गुडूचीं नागरेण वा॥ १०॥

In āmavāta, daśamūla decoction mixed with pippalī should be taken or harītakī with śuṇṭhī or guḍūcī should be used. [10]

हरीतकीप्रयोग:

एरण्डतैलयुक्तां हरीतकीं भक्षयेन्नरो विधिवत्। आमानिलार्त्तियुक्तो गृध्रसिवृद्ध्यर्दितो नित्यम्॥ ११॥

Harītakī (powder) mixed with castor oil should be used by one suffering from āmavāta particularly sciatica and scrotal enlargement. [11]

नागरचूर्णम्

कर्षं नागरचूर्णस्य काञ्जिकेन पिबेत् सदा। आमवातप्रशमनं कफवातहरं परम्॥ १२॥

One should use śuṇṭhī powder 10 gm with sour gruel. It pacifies āmavāta and is a good remedy for kapha and vāta. [12]

पञ्चकोलचूर्णम्

पञ्चकोलकचूर्णञ्च पिबेदुष्णेन वारिणा। मन्दाग्निशूलगुल्मामकफारोचकनाशनम्॥ १३॥

Pañcakola powder should be taken with warm water. It alleviates sluggishness of digestion, colic, gulma, āma, kapha and anorexia. [13]

अमृतादिचूर्णम्

अमृतानागरगोक्षुरमुण्डितिकावरुणकैः कृतं चूर्णम्। मस्त्वारनालपीतमामानिलनाशनं ख्यातम्॥ १४॥

Amṛtādi cūrṇa

The powder of amṛtā (guḍūcī), śuṇṭhī, gokṣura, muṇḍī and varuṇa is taken with curd-water or sour gruel. It is a popular remedy for āmavāta. [14]

वैश्वानरं चूर्णम्

माणिमन्थस्थ द्वौ भागौ यमान्यास्तद्वदेव तु। भागास्त्रयोऽजमोदाया नागराद्भागपञ्चकम्॥ १५॥
दश द्वौ च हरीतक्याः श्लक्ष्णचूर्णीकृताः शुभाः। मस्त्वारनालतक्रेण सर्पिषोष्णोदकेन वा॥ १६॥
पीतं जयत्यामवातं गुल्मं हृद्वस्तिजान् गदान्। प्लीहानं ग्रन्थिशूलादीनानाहार्शांसि पीनसम्॥ १७॥
विबन्धं जाठरान् रोगांस्तथा वै हस्तपादजान्। वातानुलोमनमिदं चूर्णं वैश्वानरं स्मृतम्॥ १८॥

Vaiśvānara Cūrṇa

Rocksalt 2 parts, yavānī 2 parts, ajamodā 3 parts, śuṇṭhī 5 parts and harītakī 12 parts – they are all finely powdered and mixed together. This is taken with curd-water, sour gruel, butter-milk, ghee or warm water. It is a good carminative and is useful in āmavāta, gulma, disorders of heart and urinary bladder, splenomegaly, glands, pain etc, hardness of bowels, piles, chronic coryza, constipation and the disorders of abdomen and extremities. [15-18]

अलम्बुषाद्यं चूर्णम्

अलम्बुषां गोक्षुरकं गुडूचीं वृद्धदारकम्। पिप्पलीं त्रिवृतां मुस्तं वरुणं सपुनर्नवम्॥ १९॥
त्रिफलां नागरञ्चैव श्लक्ष्णचूर्णानि कारयेत्। मस्त्वारनालतक्रेण पयोमांसरसेन वा॥
आमवातं निहन्त्याशु श्वयथुं सन्धिसंस्थितम्॥ २०॥

Alambuṣādya cūrṇa

Alambuṣā (muṇḍī), gokṣura, guḍūcī, vṛddhadāraka, pippalī, trivṛt, musta, varuṇa, punarnavā, triphalā, and śuṇṭhī – they are all together powdered finely. It is taken with curd-water, sour gruel, buttermilk, milk or meat-soup. It destroys āmavāta particularly swelling in joints. [19-20]

भागोत्तरम् अलम्बुषाऽऽद्यं चूर्णम्

अलम्बुषागोक्षुरकत्रिफलानागरामृताः। यथोत्तरं भागवृद्ध्या श्यामाचूर्णञ्च तत्समम्॥ २१॥
पिबेन्मस्तुसुरातक्रकाञ्जिकोष्णोदकेन वा। पीतं जयत्यामवातं सशोथं वातशोणितम्॥ २२॥
त्रिकजानूरुसन्धिस्थं ज्वरारोचकनाशनम्। पथ्याऽक्षधात्र्यस्त्रिफला भागवृद्धावयं क्रमः॥ २३॥

Bhāgottara alambuṣādya cūrṇa

Alambuṣā (muṇḍī), gokṣura, triphalā (harītakī, vibhītaka, āmalaka), śuṇṭhī and guḍūcī – in parts successively increased are pounded together and mixed with the powder of śyāmā (vṛddhadāruka) equal to the above total. It is taken with curdwater, wine, buttermilk, sour gruel or hot water. It alleviates āmavāta with swelling and vātarakta particularly located in sacral region, knee and hip joint and attended with fever and anorexia. In triphalā, for successive increase, the order should be harītakī, bibhītaka and āmalaka. [21-23]

पथ्यादिचूर्णम्

पथ्याविश्वयमानीभिस्तुल्याभिश्चूर्णितं पिबेत्। तक्रेणोष्णोदकेनापि अथवा काञ्जिकेन वा॥
आमवातं निहन्त्याशु शोथं मन्दाग्नितामपि॥ २४॥

Pathyādi cūrṇa

The powder of pathyā (harītakī), śuṇṭhī and yavānī (in equal parts) should be taken with buttermilk, hot water or sour gruel. It destroys āmavāta, swelling and diminution of digestive fire. [24]

शतपुष्पाद्यं चूर्णम्

शतपुष्पा विडङ्गञ्च सैन्धवं मरिचं समम्। चूर्णमुष्णाम्बुना पीतमग्निसन्दीपनं परम्॥ २५॥

Śatapuṣpādya cūrṇa

The powder of śatapuṣpā, viḍaṅga, saindhava and marica (in equal parts) taken with hot water is a good stimulant of digestive fire. [25]

हिङ्ग्वाद्यं चूर्णम्

हिङ्गु चव्यं विडं शुण्ठी कृष्णाजाजी सपौष्करम्। भागोत्तरमिदं चूर्णं पीतं वातामजिद्भवेत्॥ २६॥

Bhāgottara hiṅgvādya cūrṇa

Hiṅgu, cavya, śuṇṭhī, kṛṣṇā (pippali), jīraka, puṣkaramūla – increased successively in parts are powdered together. This alleviates āmavāta. [26]

योगराजगुग्गुलुः

चित्रकं पिप्पलीमूलं यमानीं कारवीं तथा। विडङ्गान्यजमोदाञ्च जीरकं सुरदारु च॥ २७॥
चव्यैला सैन्धवं कुष्ठं रास्नागोक्षुरधान्यकम्। त्रिफला मुस्तकं व्योषं त्वगुशीरं यवाग्रजम्॥ २८॥
तालीशपत्रं पत्रञ्च श्लक्ष्णचूर्णानि कारयेत्। यावन्त्येतानि चूर्णानि तावन्मात्रन्तु गुग्गुलुम्॥ २९॥
सम्मर्द्य सर्पिषा गाढं स्निग्धे भाण्डे निधापयेत्। ततो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि॥ ३०॥
योगराज इति ख्यातो योगोऽयममृतोपमः। आमवाताढ्यवातादीन् क्रिमिदुष्टव्रणानपि॥ ३१॥
प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत्। अग्निञ्च कुरुते दीप्तं तेजोवृद्धिं बलं तथा॥
वातरोगाञ्जयत्येष सन्धिमज्जगतानपि॥ ३२॥

Yogarājaguggulu

Citraka, pippalīmūla, yavānī, kṛṣṇa jīraka, viḍaṅga, ajamodā, jīraka, devadāru, cavya, elā, saindhava, kuṣṭha, rāsnā, gokṣura, dhānyaka, triphalā, musta, trikaṭu, tvak, uśīra, yavakṣāra, tālīśapatra and patraka— these should be finely powdered. Guggulu should be taken equal to the above total and all pounded together added with ghee. This is kept in a good container and used in proper dose keeping on usual diet. Yogrāja is like nectar and alleviates āmavāta, āḍhyavata etc, worms, chronic ulcers, spleen enlargement, gulma, udararoga, hardness of bowels and piles. It stimulates digestive fire, promotes energy and strength and overcomes vātika disorders even if located in joints and marrow. [27-32]

सिंहनादगुग्गुलुः

पलत्रयं कषायस्य त्रिफलाया: सुचूर्णितम्। सौगन्धिकपलञ्चैकं कौशिकस्य पलं तथा॥ ३३॥
कुडवं चित्रतैलस्य सर्वमादाय यत्नत:। पाचयेत् पाकविद्वैद्य: पात्रे लौहमये दृढे॥ ३४॥
हन्ति वातं तथा पित्तं श्लेष्माणं खञ्जपङ्गुताम्। श्वासं सुदुर्जयं हन्ति कासं पञ्चविधं तथा॥ ३५॥
कुष्ठानि वातरक्तानि गुल्मशूलोदराणि च। आमवातं जयेदेतदपि वैद्यविवर्जितम्॥ ३६॥
एतदभ्यासयोगेन जरापलितनाशनम्। सर्पिस्तैलरसोपेतमश्नीयाच्छालिषष्टिकम्॥ ३७॥
सिंहनाद इति ख्यातो रोगवारणदर्पहा। वह्निवृद्धिकर: पुंसां भाषितो दण्डपाणिना॥ ३८॥

Siṃhanāda guggulu

Decoction of triphalā 120 ml, purified sulphur 40 gm, guggulu 40 gm and castor oil 160 ml— all put together are cooked in an iron vessel.

It alleviates vāta, pitta and kapha and is useful in limping, lameness, dyspnoea, all types of cough, kuṣṭha, vātaraka, gulma, colic, udararoga and āmavāta even if rejected by physicians. It also checks ageing and greying of hairs. Diet during the period should consist of śāli and ṣaṣṭika rice with ghee, oil and meat-soup. It is known as 'siṃhanāda' as it destroys the valour of disease - elephants and is formulated by Daṇḍapāṇi. It stimulates digestive fire. [33-38]

बृहत्सिंहनादगुग्गुलुः

पिट्टितां गुग्गुलोर्माणीं कटुतैलपलाष्टके। प्रत्येकं त्रिफलाप्रस्थो सार्द्धद्रोणे जले पचेत्॥ ३९॥
पादशेषे च पूतञ्च पुनरग्नावधिश्रयेत्। त्रिकटु त्रिफला मुस्तं विडङ्गामरदारु च॥ ४०॥
गुडूच्यग्नित्रिवृद्दन्तीचवीशूरणमानकम्। पारदं गन्धकञ्चैव प्रत्येकं शुक्तिसम्मितम्॥ ४१॥
सहस्रं कानकफलं सिद्धे सञ्चूर्ण्य निक्षिपेत्। ततो माषद्वयं जग्ध्वा पिबेत् तप्तजलादिकम्॥ ४२॥
अग्निञ्च कुरुते दीप्तं बडवानलसन्निभम्। धातुवृद्धिं वयोवृद्धिं बलं सुविपुलं तथा॥ ४३॥
आमवातं शिरोवातं सन्धिवातं सुदारुणम्। जानुजंघाश्रितं वातं सकटीग्रहमेव च॥ ४४॥
अश्मरीं मूत्रकृच्छ्रञ्च भग्नञ्च तिमिरोदरे। अम्लपित्तं तथा कुष्ठं प्रमेहं गुदनिर्गमम्॥ ४५॥
कासं पञ्चविधं श्वासं क्षयञ्च विषमज्वरम्। प्लीहानं श्लीपदं गुल्मं पाण्डुरोगं सकामलम्॥ ४६॥
शोथान्त्रवृद्धिशूलानि गुदजानि विनाशयेत्। मेद:कफामसंघातं व्याधिवारणदर्पहा॥

सिंहनाद इति ख्यातो योगोऽयममृतोपमः ॥ ४७ ॥

Bṛhat siṃhanāda guggulu

Guggulu 320 gm pounded with mustard oil 320 ml and triphalā, (each) 640 gm are cooked in water 15.36 litre reduced to one-fourth. After straining it is again cooked and at the end trikaṭu, triphalā, musta, viḍaṅga, devadāru, guḍūcī, citraka, trivṛt, dantī, cavya, śūraṇa and māṇaka are added. When it is cooled down, kajjalī of mercury and sulphur (each 20 gm) along with thousand fruits of dhattūra well pounded are mixed. It should be taken in the dose of 2 gm with warm water etc.

It stimulates digestive fire and promotes dhātus, strength and longevity. Besides, it alleviates āmavāta, vātika disorders of head, joints, knee, legs and waist, calculus, dysuria, fracture, defects or vision, udararoga, acid gastritis, kuṣṭha, prameha, anal prolapse, cough, dyspnoea, wasting, irregular fever, splenomegaly, filaria, gulma, anaemia, jaundice, oedema, hernia, colic, piles and accumulation of medas, kapha and āma. This 'siṃhanāda' crushes the haughtiness of elephant- like diseases and is like nectar. [39-47]

बृहत्सैन्धवाद्यं तैलम्

सैन्धवं त्रिफला रास्ना पिप्पली गजपिप्पली। सर्जिका मरिचं कुष्ठं शुण्ठी सौर्वचलं विडम् ॥ ४८ ॥
यमान्यौ पुष्कराजाजीमधुकं शतपुष्पिका। पलार्द्धिकैः पचेदेतैः प्रस्थमेरण्डतैलतः ॥ ४९ ॥
प्रस्थाम्बु शतपुष्पायाः प्रत्येकं मस्तुकाञ्जिके। दद्याद् द्विगुणिते पानवस्त्यभ्यङ्गप्रयोजितम् ॥ ५० ॥
आमवातहरं श्रेष्ठं सर्ववातघ्नमग्निदम्। कटीजानूरुसन्धिस्थे पार्श्वहृद्वङ्क्षणाश्रये ॥
शस्तं वातान्त्रवृद्धौ च सैन्धवाद्यमिदं महत् ॥ ५१ ॥

Bṛhat Saindhavādya taila

Saindhava, triphalā, rāsnā, pippalī, gajapippalī, sarjikṣāra, marica, kuṣṭha, śuṇṭhī, sauvarcala, viḍa, yavānī, ajamodā, puṣkaramūla, jīraka, madhuka, śatapuṣpā each 20 gm – with these castor oil 640 ml along with śatapuṣpā water 640 ml, curd water and sour gruel each 1.38 kg is cooked.

This oil used as intake, enema and anointment promotes digestive fire and alleviates all sorts of vātika disorders particularly āmavāta, vāta located in waist, knee, thigh, chest, cardiac region, groins and hernia. [48-51]

अजमोदाद्यवटकः

अजमोदमरिचपिप्पलिविडङ्गसुरदारुचित्रकशताह्वाः। सैन्धवपिप्पलिमूलं भागा नवकस्य पलिकाः स्युः ॥
शुण्ठी दशपलिका स्यात्पलानि तावन्ति वृद्धदारस्य। पथ्या पञ्च पलानि सर्वमेकत्र कारयेच्चूर्णम् ॥
समगुडवटकानदतश्चूर्णं वाऽप्युष्णवारिणा पिबतः। नश्यन्त्यामानिलजाः सर्वे रोगाः सुकष्टास्तु ॥ ५४ ॥
विश्वाचीप्रतितूनीहृद्रोगाश्चापि गृध्रसी चोग्रा। कटिवस्तिगुदस्फुटनश्चैवास्थिजङ्घयोस्तीव्रम् ॥ ५५ ॥
श्वयथुस्तथाऽङ्गसन्धिषु ये चान्येऽप्यामवातसम्भूताः। सर्वे प्रयान्ति नाशं तम इव सूर्य्यांशुविध्वस्तम् ॥ ५६ ॥

Ajamodādya vaṭaka

Ajamodā, marica, pippalī, viḍaṅga, devadāru, citraka, śatapuṣpā, saindhava and pippalīmūla – these nine drugs each 40 gm, śuṇṭhī 400 gm, vṛddhadāraka 400 gm and harītakī with equal quantity of jaggery are made into vaṭakas (balls). Vaṭaka or curna taken with hot water destroys all diseases caused by āma and vāta even if severe. Besides, it alleviates viśvācī, pratitūnī, tūnī, heart disease, sciatica; pain in waist, pelvis, rectum, bone and legs; swelling in joints and other affections due to āmavāta as the sun dispels darkness. [52-56]

नागरघृतम्

नागरक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत्। चतुर्गुणेन तेनाथ केवलेनोदकेन वा ।। ५७ ।।
वातश्लेष्मप्रशमनमग्निसंदीपनं परम्। नागरं घृतमित्युक्तं कट्यामशूलनाशनम् ।। ५८ ।।

Nāgara-ghṛta I

Ghee 640 gm is cooked with decoction of nāgara (śuṇṭhī) or water four times along with the paste of śuṇṭhī.

This śuṇṭhī-ghṛta stimulates digestive fire, pacifies vāta and kapha and alleviates āma and pain in waist. [57-58]

अपरं नागरघृतम्

सर्पिर्नागरकल्केन सौवीरकचतुर्गुणम्। सिद्धमग्निकरं श्रेष्ठमामवातहरं परम् ।। ५९ ।।

Nāgara-ghṛta II

Ghee cooked with the paste of nāgara (śuṇṭhī) along with sour gruel four times promotes digestive fire and is a good remedy for āmavāta. [59]

अमृताघृतम्

अमृतायाः कषायेण कल्केन च महौषधात्। मृद्वग्निना घृतं प्रस्थं वातरक्तहरं परम् ।। ६० ।।
आमवाताढ्यवातादीन् क्रिमिदुष्टव्रणानपि। अर्शांसि गुल्मांश्च तथा नाशयत्याशु योजितम् ।। ६१ ।।

Amṛtā-ghṛta

Ghee processed with the decoction of amṛtā (guḍūcī) and paste of śuṇṭhī on mild fire alleviates vātarakta, āmavāta, āḍhyavāta etc, worms, chronic ulcer, piles and gulma. [60-61]

आमवातादौ काञ्जिकषट्पलकं घृतम्

हिङ्गु त्रिकटुकं चव्यं माणिमन्थं तथैव च। कल्कान् कृत्वा च पलिकान् घृतप्रस्थं विपाचयेत् ।। ६२ ।।
आरनालाढकं दत्त्वा तत्सर्पिर्जठरापहम्। शूलं विबन्धमानाहमामवातं कटीग्रहम् ।। ६३ ।।
नाशयेत् ग्रहणीदोषं मन्दाग्नेर्दीपनं परम्। पुष्ट्यर्थं पयसा साध्यं दध्ना विण्मूत्रसंग्रहे ।।
दीपनार्थं मतिमता मस्तुना च प्रकीर्त्तितम् ।। ६४ ।।

Kāñjikaṣaṭpalaka ghṛta

Hiṅgu, trikaṭu, cavya and saindhava each 40 gm- with the paste of these ghee 640 gm is cooked along with sour gruel 2.56 litre.

It alleviates udararoga, colic, constipation, hardness of bowels, āmavāta, lumbago and grahaṇīroga and stimulates digestive fire.

This formulation is processed with milk, curd and curd-water for emaciation, obstruction in faeces and urine and diminished digestive fire. [62-64]

रसोनपिण्ड:

रसोनस्य पलशतं तिलस्य कुडवं तथा। हिङ्गु त्रिकटुकं क्षारौ द्वौ पञ्च लवणानि च ।। ६५ ।।
शतपुष्पा तथा कुष्ठं पिप्पलीमूलचित्रकौ। अजमोदा यमानी च धन्याकञ्चापि बुद्धिमान् ।। ६६ ।।
प्रत्येकन्तु पलञ्चैषां श्लक्ष्णचूर्णानि कारयेत्। घृतभाण्डे दृढे चैतत् स्थापयेद् दिनषोडशम् ।। ६७ ।।
प्रक्षिप्य तैलमाणीञ्च प्रस्थार्द्धं काञ्जिकस्य च। खादेत् कर्षप्रमाणन्तु तोयं मद्यं पिबेदनु ।। ६८ ।।
आमवाते तथा वाते सर्वाङ्गैकाङ्गसंश्रिते। अपस्मारेऽनले मन्दे कासे श्वासे गरेषु च।
सोन्मादे वातभग्ने च शूले जन्तुषु शस्यते ।। ६९ ।।

Rasonapiṇḍa

Rasona 4 kg, tila 160 gm, powder of hiṅgu, trikaṭu, yavakṣāra, sarjikṣāra, five salts, śatapuṣpā, kuṣṭha, pippalīmūla, citraka, ajamodā, yavānī and dhānyaka each 40 gm— all these are put together in an uncted vessel along with oil 320 ml and sour gruel 640 ml for sixteen days. It should be taken in the dose of 10 gm with water or wine. It is useful in āmavāta, generalised or localised vātika affection, epilepsy, diminished fire, cough, dyspnoea, poisoning, insanity, crippling with vāta, colic and worms. [65-69]

प्रसारणी-सन्धानम्

प्रसारण्याढकक्काथे प्रस्थो गुडरसोनयो:। पक्व: पञ्चोषणरज:पाद: स्यादामवातहा ।। ७० ।।

Prasāraṇīsandhāna

Jaggery and garlic (combined) 640 gm are kept in prasāraṇī decoction 2.56 litre for a week. Thereafter pañcakola powder 160 gm is added thereto. It alleviates āmavāta. [70]

रसोनसुरा

वल्कलाया: सुरायास्तु सुपक्वाया: शतं घटे। ततोऽर्द्धेन रसोनन्तु संशुद्धं कुट्टितं क्षिपेत् ।। ७१ ।।
पिप्पलीपिप्पलीमूलमजाजीकुष्ठचित्रकम्। नागरं मरिचं चव्यं चूर्णितञ्चाक्षसम्मितम् ।। ७२ ।।
सप्ताहात् परत: पेया वातरोगामनाशिनी। क्रिमिकुष्ठक्षयानाहगुल्मार्श:प्लीहमेहनुत्।
अग्निसन्दीपनी चैव पाण्डुरोगविनाशिनी ।। ७३ ।।

Rasonasurā

Mature valkala-surā (alcohol) 4 litre is kept in a jar added with crushed clean garlic 2 kg. along with the powder of pippalī, pippalīmūla, jīraka, kuṣṭa, citraka, śuṇṭhī, marica

and cavya each 10 gm for a week. Thereafter it is used in vatika disease, worms, kuṣṭha, wasting, hardness of bowels, gulma, piles, splenomegaly and anaemia. It stimulates digestive fire. (71-73)

शिण्डाकी

सिद्धार्थकखलीप्रस्थं सुधौतं निस्तुषं जले। मण्डप्रस्थं विनिक्षिप्य स्थापयेद्दिवसत्रयम्॥ ७४॥
धान्यराशौ ततो दद्यात् सञ्चूर्ण्य पलिकानि च। अलम्बुषा गोक्षुरकं शतपुष्पापुंनर्नवे॥ ७५॥
प्रसारणी वरुणत्वक् शुण्ठी मदनमेव च। सम्यक् पाकन्तु विज्ञाय सिद्धा तण्डुलमिश्रिता॥ ७६॥
भृष्टा सर्षपतैलेन हिङ्गुसैन्धवसंयुता। भक्षिता लवणोपेता जयेदामं महारुजम्॥ ७७॥
एकजं द्वन्द्वजं साध्यं सान्निपातिकमेव च। कट्यूरूवातमानाहं जानुजं त्रिकमागतम्।
उदावर्त्तहरी पेया बलवर्णाग्निकारिणी॥ ७८॥

Śiṇḍākī

Oil-cake of mustard 640 gm is dissolved in water and strained. It is put in rice-scum 640 ml within the heap of paddy for three days. Then powders of alambuṣā, gokṣura, śatapuṣpā, punarnavā, prasāraṇī, varuṇa bark, śuṇṭhī and madana each 40 gm are added thereto. When it is fully prepared, it is mixed with rice and made into gruel which is taken after frying with mustard oil and asafoetida and adding with plenty of rocksalt. It is a good remedy for all sorts of āmavāta besides vāta located in wrist, thigh, knee and sacrum. It also promotes strength, lustre and digestive fire and is useful in hardness of bowels and udāvarta (74-78)

सिध्मला

त्वगादिहीनाः संशुद्धाः प्रत्यग्राः शकुलादयः। श्लक्ष्णचूर्णीकृतं तेषां शीते पलशतत्रयम्॥ ७९॥
शतेन कटुतैलस्य व्योषरामठधान्यकैः। क्रिमिघ्नदीप्यकनिशाचविकाग्रन्थिकार्द्रकैः॥ ८०॥
जीरकद्वयवृश्चीरसुरसाऽर्जकशिग्रुकैः। दशमूलात्मगुप्ताभ्यां मार्कवैर्लवणैस्त्रिभिः॥ ८१॥
चूर्णितैः पलिकैः सार्द्धमारनालपरिप्लुतैः। विन्यसेत् स्नेहपात्रे तु धान्यराशौ पुनर्न्यसेत्॥ ८२॥
सप्तरात्रात् समुद्धृत्य पानभक्षणभोजनैः। सिध्मलेयं प्रयोक्तव्या सामे वायौ विशेषतः॥ ८३॥
भग्नरुग्णाश्च्युतहताः कम्पिनः पीठसर्पिणः। गृध्रसीमग्निसादश्च शूलगुल्मोदराणि च॥
वलीपलितखालित्यं हत्वा स्युरमलेन्द्रियाः॥ ८४॥

Sidhmalā

Śakula etc (varieties of fish?) clean, dry, fresh and devoid of skin etc are collected in winter and powdered finely. 12 kg of this powder is added with mustard oil 4 litre along with powder of trikaṭu, hiṅgu, dhānyaka, viḍaṅga, yavānī, pippalī, jīraka, punarnavā, tulasī, arjaka, śigru, daśamūla, kapikacchū, bhṛṅgarāja, three salts each 40 gm and adequate quantity of sour gruel. It is kept in an uncted vessel within heap of paddy for a week after which it is taken out for use in food and drinks. It is specifically used in vāta associated with āma including fracture, dislocation, injury, trembling, loss of movement, sciatica

diminished digestive fire, colic, gulma, udararoga, wrinkles, greying of hairs and baldness. It also promotes functions of sense organs. (79-84)

अपथ्यम्

दधिमत्स्यगुडक्षीरपोतकीमाषपिष्टकम्। वर्जयेदामवातार्त्तो गुर्वभिष्यन्दकारि यत्॥ ८५॥

Unwholesome items

The patient of āmavāta should avoid curd, fish, jaggery, milk, upōdakī, black gram, rice flour and other such items which are heavy and channel-blocking. (85)

॥ इत्यामवातचिकित्सा॥ २५॥

Thus ends treatment of āmavāta. [25]

(In āmavāta, vāta is associated with āma which produces swelling along with pain in joints thus resembling rheumatoid arthritis.)

२६. षड्विंशोऽध्यायः

CHAPTER XXVI

शूल-चिकित्सा

Treatment of Śūla (colic)

क्रियाक्रमः

वमनं लङ्घनं स्वेदः पाचनं फलवर्त्तयः। क्षारचूर्णानि गुडिकाः शस्यन्ते शूलशान्तये॥ १॥

For the treatment of śūla, emesis, lightening, fomentation, digestives, suppositories, alkalis, powders and pills are useful. (1)

पुंसः शूलाभिपन्नस्य स्वेद एव सुखावहः। पायसैः कृशरापिण्डैः स्निग्धैर्वा पिशितोत्करैः॥ २॥

To the person afflicted with colic, fomentation with rice-milk, unctuous mass of rice-pulse or pounded flesh gives relief. (2)

वातजशूलस्य चिकित्सा

नवाङ्गयूषः

वातात्मकैर्हन्त्यचिरेण शूलं स्नेहेन युक्तस्तु कुलत्थयूषः।
ससैन्धवो व्योषयुतः सलावः सहिङ्गुसौवर्चलदाडिमाढ्यः॥ ३॥

Vātika śula

Navāṅga yūṣa

The soup of horse gram and quail with ghee and asafoetida and added with rocksalt, sauvarcala, trikaṭu and pomegranate juice alleviates colic caused by vāta instantaneously. [3]

बलादिः

बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः। सहिङ्गुलवणं पीतं सद्यो वातरुजाऽपहम्॥ ४॥

Balādi

The decoction of balā, punarnavā, eraṇḍa, bṛhatī, kaṇṭakārī and gokṣura added with asafoetida and salt (preferably sauvarcala) alleviates vātika śūla. [4]

हिङ्ग्वादिचूर्णम्

शूली निरन्नकोष्ठोऽद्भिरुष्णाभिश्चूर्णिताः पिबेत्। हिङ्गुप्रतिविषाव्योषवचासौवर्चलाभयाः॥ ५॥

Hiṅgvādi cūrṇa

One afflicted with colic should take in empty stomach the powder of hiṅgu, ativiṣā, trikaṭu, vacā, sauvarcala and harītakī (all mixed together). [5]

तुम्बुर्वादिचूर्णम्

तुम्बुरूण्यभया हिङ्गु पौष्करं लवणत्रयम्। पिबेद् यवाम्बुना वातशूलगुल्मापतन्त्रकी॥ ६॥

Tumburvādi cūrṇa

Tumburu, harītakī, hiṅgu, puṣkaramúla and three salts powdered together are taken with barley decoction. It is useful in colic, gulma and apatantraka. [6]

श्यामादिकल्क:

श्यामा विडं शिग्रुफलानि पथ्या विडङ्गकम्पिल्लकमश्वमूत्री।
कल्कं समं मद्ययुतश्च पीत्वा शूलं निहन्यादनिलात्मकन्तु॥ ७॥

Śyamādi kalka

One is relieved of vātika śūla after taking paste of śyāmā, viḍa, śigru seeds, harītakī, viḍaṅga, kampillaka and aśvamūtrī (śallakī) all in equal parts, with wine. [7]

यमान्यादिचूर्णम्

यमानीहिङ्गुसिन्धूत्थक्षारसौवर्चलाभया:। सुरामण्डेन पातव्या वातशूलनिषूदना:॥ ८॥

Yavānyādi cūrṇa

The powder consisting of yavāñi, hiṅgu, saindhava, yavakṣāra, sauvarcala and harītakī should be taken with clear wine to alleviate vātika śūla. [8]

विश्वादि:

विश्वमेरण्डजं मूलं क्राथयित्वा जलं पिबेत्। हिङ्गुसौवर्चलोपेतं सद्य: शूलनिवारणम्॥ ९॥

Viśvādi

The decoction of viśva (śuṇṭhī) (one part) and eraṇḍa root (three parts) added with hiṅgu and sauvarcala should be taken. It relieves pain quickly. [9]

विश्वैरण्डादि:

हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्च्चलेन वा। विश्वैरण्डयवक्राथ: सद्य: शूलनिवारण:॥ १०॥

Viśvairaṇḍādi

The decoction of viśva (śuṇṭhī), eraṇḍa and barley added with hiṅgu and puṣkaramūla or hiṅgu and sauvarcala relieves colic quickly. [10]

एरण्डादि:

तद्वद्रुबुयवक्वाथो हिङ्गुसौवर्चलान्वित:॥ ११॥

Eraṇḍādi

Similarly acts the decoction of eraṇḍa and yava added with hiṅgu and sauvarcala. [11]

हिङ्ग्वम्लादिचूर्णम्

हिङ्ग्वम्लकृष्णालवणं यमानी क्षाराभयासैन्धवतुल्यभागम्।
चूर्णं पिबेद्वारुणिमण्डमिश्रं शूले प्रवृद्धानिलजे शिवाय॥ १२॥

Hiṅgvamlādi cūrṇa

Hiṅgu, amlavetasa, pippalī, salt (sauvarcala), yavānī, yavakṣāra, harītakī and rocksalt, all in equal parts powdered together should be taken with clear wine in severe vātika śūla. [12]

त्रयोदशाङ्गं नारिकेलखण्डम्

सुपक्वनारिकेलस्य शस्यं पलचतुष्टयम्। पिष्ट्वा घृतपले भृष्ट्वा क्षिपेत् खण्डचतु:पलम्।। १३।।
नारिकेलस्य च प्रस्थे किञ्चिच्छस्यवतो जले। धान्याकं पिप्पलीं मुस्तं द्विजीरं वंशलोचनम्।। १४।।
शाणमानं चतुर्जातं चूर्णं शीते क्षिपेद् बुधः। हन्त्यम्लपित्तमरुचिं रक्तपित्तं क्षयं वमिम्।। १५।।
शूलञ्च पृष्ठशूलञ्च पित्तरुग्घ्नं रसायनम्। विशेषाद् बलकृद् वृष्यं पुष्ट्योजस्कारकं स्मृतम्।। १६।।

Trayodaśāṅga nārikelakhaṇḍa

The pounded kernel of mature coconut 160 gm is roasted with ghee 40 gm and then mixed with sugar 160 gm. This is cooked with coconut water 640 ml. When it is cooled down, powders of dhānyaka, pippalī, musta, jīraka, kṛṣṇa jīraka, vaṃślocana and caturjāta each 2.5 gm are added.

It alleviates acid gastritis, anorexia, intrinsic haemorrhage, wasting, vomiting, colic, backache and biliary colic and is rasāyana, promotes strength, semen, corpulence and ojas. [13-16]

सौवर्चलादिगुडिका

सौवर्च्चलाम्लिकाऽजाजीमरिचैर्द्विगुणोत्तरैः। मातुलुङ्गरसैः पिष्ट्वा गुडिकाऽनिलशूलनुत्।। १७।।

Sauvarcalādi guḍikā

sauvarcala, amlikā, jīraka and marica, successively doubled, are pounded with mātuluṅga juice and made into pills. It alleviates vātika śūla. [17]

हिङ्ग्वादिगुडिका

हिङ्ग्वम्लवेतसव्योषयमानीलवणत्रिकैः। बीजपूररसोपेतैर्गुडिका वातशूलनुत्।। १८।।

Hiṅgvādi guḍikā

Hiṅgu, amlavetasa, trikaṭu, yavānī and three salts are pounded with bījapūra juice and made into pills. It relieves vātika śūla. [18]

बीजपूरकमूलयोग:

बीजपूरकमूलञ्च घृतेन सह पाययेत्। जयेद् वातभवं शूल कर्षमेकं प्रमाणतः।। १९।।

The root of bījapūra 10 gm is given with ghee. It pacifies vātika Śūla. [19]

बिल्वमूलादिगुडिका

बिल्वमूलतिलैरण्डं पिष्ट्वा चाम्लतुषाम्भसा। गुडिकां भ्रामयेदुष्णां वातशूलविनाशिनीम्।। २०।।

Bilvamūlādi guḍikā

Bilva root, tila and eraṇḍa are pounded with sour gruel and made into big pills. They are heated and rotated on the abdomen to relieve pain. [20]

तिलगुडिका

तिलैश्च गुडिकां कृत्वा भ्रामयेज्जठरोपरि। गुडिका शमयत्येषा शूलञ्चैवातिदुःसहम्॥ २१॥

Tilaguḍikā

Similarly,the pill made of tila is rotated on the abdomen. It removes severe pain. [21]

मदनकल्कः जीवन्तीकल्कश्च

नाभौ लेपाज्जयेच्छूलं मदनः काञ्जिकान्वितः। जीवन्तीमूलकल्को वा सतैलः पार्श्वशूलनुत्॥ २२॥

The paste of madanaphala mixed with sour gruel is applied on umbilical region in case of pain. Similarly the paste of jīvantī root mixed with oil alleviates pain in sides. [22]

पैत्तिकशूले क्रियाक्रमः

गुडः शालिर्यवः क्षीरं सर्पिःपानं विरेचनम्। जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम्॥ २३॥

Pittaja śūla

Jaggery (purified and old), śāli rice, barley, milk, intake of ghee, purgation and meat of wild animals. These are remedies for colic caused by pitta. [23]

पैत्ते तु शूले वमनं पयोऽम्बु रसैस्तथेक्षोः सपटोलनिम्बैः।
शीतावगाहाः पुलिनाः सवाताः कांस्यादिपात्राणि जलप्लुतानि॥ २४॥

In śūla caused by pitta emesis with milk, water or sugarcane juice mixed with (paste of) paṭola and nimba is prescribed (to eliminate pitta from stomach). Besides, cold application, bath, air and packs are prescribed. [24]

विरेचनं पित्तहरञ्च शस्तं रसाश्च शस्ताः शशलावकानाम्।
सन्तर्पणं लाजमधूपपन्नं योगाः सुशीता मधुसंप्रयुक्ताः॥ २५॥

Purgation is useful for eliminating pitta. Moreover, meatsoup of hens and quails, saturating drink of parched paddy flour and honey and other edibles cold and added with honey are given. [25]

यवपेयाप्रयोगः

छर्द्यां ज्वरे पित्तभवेऽपि शूले घोरे विदाहे त्वतितर्षिते च।
यवस्य पेयां मधुना विमिश्रां पिबेत् सुशीतां मनुजः सुखार्थे॥ २६॥

In vomiting, fever, colic caused by pitta, burning and excessive thirst one should take barley- water cold and mixed with honey. [26]

विविधस्वरसप्रयोगा:

धात्र्या रसं विदार्य्या वा त्रायन्तीगोस्तनाम्बु वा। पिबेत् सशर्करं सद्यः पित्तशूलनिषूदनम्॥ २७॥

(1) Āmalakī juice (2) vidārī juice (3) juice of trāyamānā and drākṣā- one of these should be taken after adding with sugar. It relieves paittika śūla quickly. [27]

शतावरीस्वरसप्रयोग:

शतावरीरसं क्षौद्रयुतं प्रातः पिबेन्नरः। दाहशूलोपशान्त्यर्थं सर्वपित्तामयापहम्॥ २८॥

One should take the juice of śatāvarī mixed with honey every morning. It relieves burning sensation, colic and all disorders of pitta. [28]

बृहत्यादि:

बृहत्यौ गोक्षुरैरण्डकुशकाशेक्षुबालिकाः। पीताः पित्तभवं शूलं सद्यो हन्युः सुदारुणम्॥ २९॥

Bṛhatyādi

The decoction of bṛhatī, kaṇṭakārī, gokṣura, eraṇḍa, kuśa, kāśa and ikṣubālikā removes even the severe pain caused by pitta. [29]

शतावर्यादि:

शतावरीसयष्ट्याह्ववाट्यालकुशगोक्षुरैः। शृतशीतं पिबेत् तोयं सक्षौद्रगुडशर्करम्॥
पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहम्॥ ३०॥

Śatāvaryādi

Śatāvarī, yaṣṭīmadhu, balā, kuśa and gokṣura- this decoction cooled and added with honey, jaggery and sugar should be taken in case of raktapitta, burning sensation, pain and fever. [30]

त्रिफलानिम्बादिक्वाथ:

त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैः शृतम्। पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये॥ ३१॥

Triphalānimbādi

Triphalā, nimba, madhuyaṣṭī, kaṭukā and āragvadha- this decoction mixed with honey should be given to alleviate pain with burning sensation, pain and fever. [31]

एरण्डतैलप्रयोग:

तैलमेरण्डजं वाऽपि मधुकक्वाथसंयुतम्। शूलं पित्तोद्भवं हन्याद् गुल्मं पैत्तिकमेव च॥ ३२॥

Castor oil mixed with decoction of madhuka alleviates paittika śūla and gulma. [32]

त्रिफलादि:

त्रिफलाऽऽरग्वधक्काथं सक्षौद्रं शर्कराऽन्वितम्। पाययेद्रक्तपित्तघ्नं दाहशूलनिवारणम्॥ ३३॥

Triphalādi

Decoction of triphalā and āragvadha mixed with honey and sugar should be given in case of intrinsic haemorrhage and colic associated with burning sensation. [33]

धात्रीचूर्णम्

प्रलिह्यात् पित्तशूलघ्नं धात्रीचूर्णं समाक्षिकम्॥ ३४॥

The powder of āmalakī alone taken with honey relieves pain caused by pitta. [34]

अष्टादशाङ्गं नारिकेलखण्डम्

नारिकेलपलान्यष्टौ शर्कराप्रस्थसंयुतम्। तज्जलं पात्रमेकन्तु सर्पि: पञ्च पलानि च॥ ३५॥
शुण्ठीचूर्णस्य कुडवं प्रस्थार्द्धं क्षीरमेव च। सर्वमेकीकृतं पात्रे शनैर्मृद्वग्निना पचेत्॥ ३६॥
तुगा त्रिकटुकं मुस्तं चातुर्जातं सधान्यकम्। द्वे कणे जीरकञ्चैव कर्षयुग्मं पृथक् पृथक्॥ ३७॥
श्लक्ष्णचूर्णं विनिक्षिप्य स्थापयेद्भाजने मृद:। खादेत् प्रतिदिनं शाणं यथेष्टाहारवानपि॥ ३८॥
सर्वदोषभवं शूलमामवातं विनाशयेत्। परिणामभवं शूलमम्लपित्तञ्च नाशयेत्॥ ३९॥
बलपुष्टिकरञ्चैव वाजीकरणमुत्तमम्। रक्तपित्तहरं श्रेष्ठं छर्दिहृद्रोगनाशनम्॥
अग्निसन्दीपनकरं सर्वरोगनिबर्हणम्॥ ४०॥

Aṣṭādasāṅga Nārikelakhaṇḍa

Coconut 320 gm, sugar 640 gm, coconut water 2.56 litre, ghee 200 gm, śuṇṭhī powder 160 gm, milk 320 ml– all put together should be cooked on mild fire. At the end, fine powder of vaṃśalocana, trikaṭu, musta, caturjāta, dhānyaka, pippalī, gajapippalī and jīraka each 20 gm should be added and kept in a good container. It should be taken in the dose of 2.5 gm without any restriction of diet.

It destroys colic caused by all doṣas as well as āmavāta, pariṇāmaśūla and amlapitta. Moreover, it is useful in intrinsic haemorrhage, vomiting and cardiac disorder. It also promotes strength, semen and digestive power and is a sort of panacea. [35-40]

कफजशूलचिकित्सा

श्लेष्माधिके छर्दनलङ्घनानि शिरोविरेकं मधुशीधुपानम्।
मधूनि गोधूमयवानरिष्टान् सेवेत रूक्षान् कटुकांश्च सर्वान्॥ ४१॥

Kaphaja śūla

In colic predominant in kapha one should use emesis, lightening, head-evacuation, vinegar made of honey, wheat, barley, ariṣṭas and other rough and pungent substances. [41]

यवागू:

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरै:। यवागूर्दीपनीया स्याच्छूलघ्नी चोपसाधिता॥ ४२॥

Gruel processed with pañcakola (Pippalī, pippalīmūla, cavya, citraka and śuṇṭhī) stimulates digestive fire and alleviates colic. [42]

लवणत्रयादिचूर्णम्

लवणत्रयसंयुक्तं पञ्चकोलं सरामठम्। सुखोष्णेनाम्बुना पीतं कफशूलविनाशनम्॥ ४३॥

Lavaṇatrayādi cūrṇa

Three salts (sauvarcala, saindhava, and vida), pañcakola and hiṅgu- this powder taken with tepid water destroys kaphaja śūla. [43]

बिल्वमूलादिक्वाथ:

बिल्वमूलमथैरण्डं चित्रकं विश्वभेषजम्। हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम्॥ ४४॥

Bilvamūlādi

(The decoction of) bilva root, eraṇḍa, citraka and śuṇṭhi added with hiṅgu and saindhava alleviates colic instantaneously. [44]

मुस्तादिकल्क:

मुस्तं वचां तिक्तकरोहिणीञ्च तथाऽभयां निर्दहनीञ्च तुल्याम्।
पिबेत्तु गोमूत्रयुतां कफोत्थे शूले तथाऽऽमस्य च पाचनार्थम्॥ ४५॥

Mustādi kalka

Musta, vacā, kaṭukā, harītakī and mūrvā– all in equal parts should be made into paste and taken with cow's urine. It alleviates colic caused by kapha and is digestive for āma. [45]

वचादिचूर्णं बिल्वादिश्च

वचाब्दाग्न्यभयातिक्ताचूर्णं गोमूत्रसंयुतम्। सक्षारं वा पिबेत् क्वाथं बिल्वादेः कफशूलवान्॥ ४६॥

Vacādi cūrṇa

Vacā, musta, citraka, harītakī and kaṭukā-this powder should be used with cow's urine or the decoction of bilvādi (daśamūla) added with yavakṣāra should be taken in case of kaphaja śūla. [46]

मातुलुङ्गरसशिग्रुकाथौ

मातुलुङ्गरसो वाऽपि शिग्रुक्वाथस्तथाऽपरः। सक्षारो मधुना पीतः पार्श्वहृद्बस्तिशूलनुत्॥ ४७॥

The mātuluṅga juice or decoction of śigru added with yavakṣāra and honey should be taken in case of pain in sides, cardiac region and pelvis. [47]

आमशूले क्रियासूत्रम्

आमशूले क्रिया कार्य्या कफशूलविनाशनी। सेव्यमामहरं सर्वं यदग्निबलवर्द्धनम्॥ ४८॥

Āmaja śūla

In colic caused by āma the remedial measures are applied as in kaphaja śūla. Moreover, all which eliminate āma and promote digestive power should be used. [48]

सर्वशूलचिकित्सा

हिङ्ग्वादिचूर्णम्

सहिङ्गुतुम्बुरुव्योषयमानीचित्रकाभयाः। सक्षारलवणाश्चूर्णं पिबेत् प्रातः सुखाम्बुना॥
विण्मूत्रानिलशूलघ्नं पाचनं वह्निदीपनम्॥ ४९॥

Śūla in general

Hiṅgvādi cūrṇa

Hiṅgu, tumburu, trikaṭu, yavānī, citraka, harītakī, yavakṣāra and lavaṇa (salt preferably sauvarcala)- this powder is taken in the morning with tepid water. It alleviates pain due to faeces, urine and wind and is digestive and appetiser. [49]

धात्रीलौहम्

षट्पलं शुद्धमण्डूरं यवस्य कुडवं तथा। पाकाय नीरप्रस्थार्द्धं दद्यात् पादावशेषितम्॥ ५०॥
शतमूलीरसस्याष्टावामलक्या रसस्तथा। तथा दधि पयो भूमिकूष्माण्डस्य चतुष्पलम्॥ ५१॥
चतुष्पलं सर्पिरिक्षुरसं दद्याद् विचक्षणः। प्रक्षिपेज्जीरकं धान्यं त्रिजातं करिपिप्पलीम्॥ ५२॥
मुस्तं हरीतकीश्चैव अभ्रं लौहं कटुत्रयम्। रेणुकं त्रिफलाश्चैव तालीशं नागकेशरम्॥ ५३॥
प्रत्येकं कार्षिकं चूर्णं पेषयित्वा विनिक्षपेत्। भोजनादौ तथा मध्ये चान्ते चैव समाहितः॥ ५४॥
तोलैकं भक्षयेच्चानु पेयं नित्यं पयस्तथा। शूलमष्टविधं हन्ति साध्यासाध्यामथापि वा॥ ५५॥
वातिकं पैत्तिकश्चैव श्लैष्मिकं सान्निपातिकम्। परिणामसमुत्थांश्च अन्नद्रवसमुद्भवान्॥ ५६॥
द्वन्द्वजान् पक्तिशूलांश्च अम्लपित्तं सुदारुणम्। सर्वरोगहरं श्रेष्ठं धात्रीलौहमिदं स्मृतम्॥ ५७॥

Dhātrīlauha

Purified maṇḍūra 240 gm and barley 160 gm are cooked together in water 320 ml; curd, milk, vidārīkanda (juice), ghee and sugarcane juice each 160 ml should be added. Then jīraka, dhānyaka, trijāta, gajapippalī, musta, harītakī, abhrabhasma, lauhabhasma, trikaṭu, reṇukā, triphalā, tālīśa and nāgakeśara each powdered 10 gm should be mixed. Out of it 10 gm should be taken before and after meals and also in the middle with milk.

It destroys all types of śūla including amlapitta. [50-57]

चित्रकादिः

चित्रकग्रन्थिकैरण्डशुण्ठीधान्यं जलैः शृतम्। शूलानाहविबन्धेषु सहिङ्गुविडसैन्धवम्॥ ५८॥

Citrakādi

The decoction of citraka, pippalīmūla, eraṇḍa, śuṇṭhī and dhānyaka added with hiṅgu, biḍa and saindhava is efficacious in colic, hardness of bowels and constipation. [58]

चतुःसमम्

दीप्यकं सैन्धवं पथ्या नागरञ्च चतुःपलम्। भृशं शूलं जयत्याशु मन्दस्याग्नेश्च दीपनम्॥ ५९॥

Catuḥsama

Yavānī, saindhava, harītakī and śuṇṭhī- these four in equal quantity together overcome colic and stimulates digestive fire. [59]

द्वन्द्वजशूलचिकित्सा

समाक्षिकं बृहत्यादिं पिबेत् पित्तानिलात्मके। व्यामिश्रं वा विधिं कुर्य्याच्छूले पित्तानिलात्मके ।। ६० ।।

Colic caused by dual doṣas

In colic caused by vāta and pitta bṛhatyādi (kvātha) mixed with honey should be taken or one should adopt mixed measures in such case. [60]

कफपैत्तिकशूलचिकित्सा

पित्तजे कफजे वाऽपि या क्रिया कथिता पृथक्। एकीकृत्य प्रयुञ्जीत तां क्रियां कफपित्तजे ।। ६१ ।।

In the colic caused by kapha and pitta too, the measure prescribed for these conditions singly should be used here in mixed way. [61]

पटोलादि:

पटोलत्रिफलाऽरिष्टकाथं मधुयुतं पिबेत्। पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये ।। ६२ ।।

Paṭolādi

The decoction of paṭola, triphalā and nimba added with honey should be taken to alleviate fever, vomiting, burning sensation and pain caused by pitta and kapha. [62]

रसोनप्रयोग:

रसोनं मद्यसंमिश्रं पिबेत् प्रात: प्रकाङ्क्षित:। वातश्लेष्मभवं शूलं निहन्ति वह्निदीपनम् ।। ६३ ।।

In case of śūla caused by vāta and kapha, one should take garlic mixed with wine. It also stimulates digestive fire. [63]

सर्वशूलचिकित्सा

बृहद्विश्वादि:

विश्वोरुबूकदशमूलयवाम्भसा तु द्विक्षारहिङ्गुलवणत्रयपुष्कराणाम्।
चूर्णं पिबेद्धृदयपार्श्वकटीग्रहामपक्काशयांसभृशरुग्ज्वरगुल्मशूली ।। ६४ ।।
क्काथेन चूर्णपानं यत् तत्र क्काथप्रधानता। प्रवर्त्तते न तेनात्र चूर्णापेक्षी चतुर्द्रव: ।। ६५ ।।

General treatment of śūla

Bṛhad Viśvādi

The decoction of viśva (śuṇṭhī), eraṇḍa and daśamūla mixed one part and barley one part added with two alkalis (yavakṣāra and svarjikṣāara), hiṅgu, three salts and puṣkaramu-la should be taken in case of stiffening in heart, sides and waist; severe pain in stomach, intestines and shoulders; fever, gulma and colic.

When powder is to be taken with decoction the latter predominates and is taken in the quantity four times of the powder but here it is not so. [64-65]

रुचकादि

चूर्णं समं रुचकहिङ्गुमहौषधानां शुण्ठ्यम्बुना कफसमीरणसम्भवासु।
हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु पेयं तथा यवरसेन तु विड्विबन्धे॥ ६६॥
समं शुण्ठ्यम्बुनेत्येवं योजना क्रियते बुधैः। तेनाल्पमानमेवात्र हिङ्गु सम्परिदीयते॥ ६७॥

Rucakādi

The powder of rucaka (sauvarcala), hiṅgu and śuṇṭhī (mixed together) should be taken with śuṇṭhī decoction in case of pain in heart, sides, back and abdomen as well as visūcika caused by kapha and vāta. The same with barley decoction should be taken in case of constipation.

'Sama' here does not denote 'equal' and as such hiṅgu is taken in small quantity. [66-67]

हिङ्गुसौवर्चलादिचूर्णम्

हिङ्गु सौवर्च्चलं पथ्याविडसैन्धवतुम्बुरु। पौष्करञ्च पिबेच्चूर्णं दशमूलयवाम्भसा॥ ६८॥
पार्श्वहृत्कटिपृष्ठांसशूले तन्द्राऽपतानके। शोथे श्लेष्मप्रसेके च कर्णरोगे च शस्यते॥ ६९॥

Hiṅgusauvarcalādi cūrṇa

Hiṅgu, sauvarcala, harītakī, vida, saindhava, tumburu and puṣkaramūla- this powder should be taken with decoction of daśamūla and barley. It is useful in pain in sides, heart, waist, back and shoulders; drowsiness, convulsions, oedema, excessive mucus secretion and ear diseases. [68-69]

एरण्डसप्तकक्वाथः

एरण्डबिल्वबृहतीद्वयमातुलुङ्गपाषाणभित्त्रिकटमूलकृतः कषायः।
सक्षारहिङ्गुलवणो रुबुतैलमिश्रः श्रोण्यंसमेढ्रहृदयस्तनरुक्षु पेयः॥ ७०॥

Eraṇḍasaptaka kvātha

Eraṇḍa, bilva, bṛhatī, kaṇṭakārī, mātuluṅga, pāṣāṇabheda and gokṣura- this decoction added with yavakṣāra, hiṅgu and rocksalt and mixed with castor oil should be taken in case of pain in pelvis, shoulder, genitals, heart and breast. [70]

हिङ्गुत्रिकटुकादिचूर्णम्

हिङ्गु त्रिकटुकं कुष्ठं यवक्षारोऽथ सैन्धवम्। मातुलुङ्गरसोपेतं प्लीहशूलापहं रजः॥ ७१॥

Hiṅgutrikaṭukādi cūrṇa

Hiṅgu, trikaṭu, kuṣṭha, yavaṣāra and saindhava- this powder taken with mātuluṅga juice (fruit juice or root decoction) alleviates pain in spleen. [71]

मृगशृङ्गभस्मप्रयोग:

दग्धमनिर्गतधूमं मृगशृङ्गं गोघृतेन सह पीतम्। हृदयनितम्बजशूलं हरति शिखी दारुनिवहमिव॥ ७२॥

Śṛṅgabhasma prepared by closed heating and taken with cow's ghee alleviates pain in cardiac region and buttocks as fire destroys heap of wood. [72]

विडङ्गचूर्णम्

क्रिमिरिपुचूर्णं लीढं सहितं स्वरसेन वङ्गसेनस्य। क्षपयत्यचिरान्नियतं लौहाजीर्णोद्भवं शूलम्॥ ७३॥

Viḍaṅga powder taken with the juice of agastya (leaves) pacifies pain caused by indigestion of lauha. [73]

विदार्यादिस्वरस:

विदारीदाडिमरस: सव्योषलवणान्वित:। क्षौद्रयुक्तो जयत्याशु शूलं दोषत्रयोद्भवम्॥ ७४॥

Juice of vidārī and pomegranate (fruit) added with trikaṭu, saindhava and honey overcomes the colic caused by all the doṣas. [74]

एरण्डद्वादशकम्

एरण्डफलमूलानि बृहतीद्वयगोक्षुरम्। पर्णिन्य: सहदेवा च सिंहपुच्छीक्षुबालिका॥ ७५॥
तुल्यैरेतै: शृतं तोयं यवक्षारयुतं पिबेत्। पृथग्दोषभवं शूलं हन्यात् सर्वभवं तथा॥ ७६॥

Eraṇḍadvādaśaka

Eraṇḍa (fruit and root), bṛhatī, kaṇṭakārī, gokṣura, four leaved herbs (śālaparṇī, pṛśniparṇī, māṣaparṇī and mudgaparṇī) sahadevā, siṃhapucchī and ikṣubālikā all equal parts- this decoction added with yavakṣāra should be taken. It is useful in śūla caused by doṣas singly or collectively. [75-76]

त्रिफलामण्डूरप्रयोग:

गोमूत्रशुद्धमण्डूरं त्रिफलाचूर्णसंयुतम्। विलिहन् मधुसर्पिर्भ्यां शूलं हन्ति त्रिदोषजम्॥ ७७॥

Triphalā-maṇḍūra

Maṇḍūra purified in cow's urine and mixed with triphalā powder should be taken with honey and ghee. It destroys śūla caused by three doṣas. [77]

शङ्खादिचूर्णम्

शङ्खचूर्णं सलवणं सहिङ्गु व्योषसंयुतम्। उष्णोदकेन तत् पीतं शूलं हन्ति त्रिदोषजम्॥ ७८॥

Śaṅkhādi cūrṇa

Śaṅkha powder (bhasma), rocksalt, hiṅgu and trikaṭu- this powder is taken with hot water in śūla caused by three dosas. [78]

त्रिफलालौहम्

तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम्। प्रयोज्यं मधुसर्पिर्भ्यां सर्वशूलनिवारणम्॥ ७९॥

Triphalā-lauha

Tīkṣṇa lauha-bhasma mixed with triphalā cūrṇa should be taken with honey and ghee. It alleviates all types of śūla. [79]

अभयालौहम्

मूत्रान्तःपाचितां शुष्कां लौहचूर्णसमन्विताम्। सगुडामभयामद्यात् सर्वशूलप्रशान्तये॥ ८०॥

Abhayā-lauha

Harītakī boiled in cow's urine is dried and then mixed with lauhabhasma. It should be taken mixed with jaggery in all types of śūla. [80]

दाधिकं घृतम्

पिप्पली नागरं बिल्वं कारवी चव्यचित्रकम्। हिङ्गुदाडिमवृक्षाम्लवचाक्षाराम्लवेतसम्॥ ८१॥
वर्षाभूकृष्णलवणमजाजी बीजपूरकम्। दधि त्रिगुणितं सर्पिस्तत्सिद्धं दाधिकं घृतम्॥ ८२॥
गुल्मार्शःप्लीहहृत्पार्श्वशूलयोनिरुजाऽपहम्। दोषसंशमनं श्रेष्ठं दाधिकं परमं स्मृतम्॥ ८३॥

Dādhika ghṛta

Pippalī, śuṇṭhī, bilva (root) kṛṣṇa, jīraka, cavya, citraka, hiṅgu, dāḍima, vṛkṣāmla, vacā, yavakṣāra, amlavetasa, punarnavā, kṛṣṇa lavaṇa, jīraka and bījapūraka (root)– with this paste ghee is cooked along with curd three times. This is known as dādhika ghṛta. It removes pain of gulma, piles, spleen, heart, sides and female genital and is a good pacifier of doṣa (vāta). [81-83]

प्राणायामः शक्तुधूपश्च

कम्बलावृतगात्रस्य प्राणायामं प्रकुर्वतः। कटुतैलाक्तशक्तूनां धूपः शूलहरः परः॥ ८४॥

Fumigation of parched grain-flour mixed with mustard oil is applied to the patient covered with blanket and holding the breath to relieve pain. [84]

अपथ्यानि

व्यायामं मैथुनं मद्यं लवणं कटु वैदलम्। वेगरोधं शुचं क्रोधं वर्जयेच्छूलवान् नरः॥ ८५॥

Exertion, sexual intercourse, alcoholic drinks, pungent, pulses, suppression of urges, anxiety and anger should be avoided by the patients of śūla. [85]

॥ इति शूलचिकित्सा॥

Thus ends treatment of śūla. [26]

२७. सप्तविंशोऽध्याय:

CHAPTER XXVII

परिणामशूल-चिकित्सा

Treatment of Pariṇāmaśūla (colic during or after digestion)

क्रियाक्रम:

वमनं तिक्तमधुरैर्विरेकश्चापि शस्यते। वस्तयश्च हिता: शूले परिणामसमुद्भवे ॥ १ ॥

In pariṇāmaśūla, emesis and purgation with bitter and sweet drugs as well as enema are efficacious. [1]

विडङ्गादिमोदक:

विडङ्गतण्डुलव्योषं त्रिवृद्दन्तीसचित्रकम्। सर्वाण्येतानि संहृत्य श्लक्ष्णचूर्णानि कारयेत् ॥ २ ॥
गुडेन मोदकं कृत्वा भक्षयेत् प्रातरुत्थित: । उष्णोदकानुपानन्तु दद्यादग्निविवर्द्धनम् ॥
जयेत् त्रिदोषजं शूलं परिणामसमुद्भवम् ॥ ३ ॥

Viḍaṅgādi Modaka

(dehusked) viḍaṅga fruit, trikaṭu, trivṛt, dantī and citraka- these are finely pounded and being mixed with jaggery made into sweet balls. It should be taken in the morning with hot water. It stimulates digestive fire and relieves pariṇāma śūla caused by tridoṣa. [2-3]

नागराद्युत्कारिका

नागरगुडतिलकल्कं पयसा संसाध्य य: पुमानद्यात्। उग्रं परिणामशूलं तस्यापैति सप्तरात्रेण ॥ ४ ॥

Nāgarādyutkārikā

One who takes the paste of nāgarā (śuṇṭhī), jaggery and sesamum cooked with milk overcomes even the severe pariṇāmaśūla for a week. [4]

शम्बूकभस्मप्रयोग:

शम्बूकजं भस्म पीतं जलेनोष्णेन तत्क्षणात्। पक्तिजं विनिहन्त्येतच्छूलं विष्णुरिवासुरान् ॥ ५ ॥

Bhasma of śambūka (snail-shell) taken with hot water immediately subsides the pariṇāmaśūla as Lord Viṣṇu destroys the demons. [5]

अक्षादिचूर्णम्

अक्षधात्र्यभयाकृष्णाचूर्णं मधुयुतं लिहेत् ॥ ६ ॥

Akṣādi cūrṇa

One should take powder of akṣa, dhātri, abhayā and pippalī with honey. [6]

शक्तुप्रयोग:

दध्नाऽऽलूनसरेणाद्यात् सतीनयवशक्तुकान्। अचिरान्मुच्यते शूलान्नरोऽन्नपरिवर्त्तजात्॥ ७॥

One should eat flour of parched peas and barley with curd endowed with supernatant layer. By this he is freed quickly from the colic arisen during digestion of food. [7]

तिलादिगुडिका

तिलनागरपथ्यानां भागं शम्बूकभस्मनाम्। द्विभागगुडसंयुक्तां गुडीं कृत्वाऽक्षभागिकाम्॥ ८॥
शीताम्बुपानं पूर्वाह्ने भक्षयेत् क्षीरभोजनः। सायाह्ने रसकं पीत्वा नरो मुच्येत दुर्जयात्॥
परिणामसमुत्थाच्च शूलाच्चिरभवादपि॥ ९॥

Tilādi guḍikā

Tila, śuṇṭhī, harītakī and śambūka bhasma, all in equal parts, are mixed with the double quantity of jaggery and made into big pills weighing 10 gm each. It should be taken in forenoon with cold water keeping on milk diet and intake of meat-soup in the evening. By this one is freed from even severe and chronic pariṇāmaśūla. [8-9]

शम्बूकादिगुडिका

शम्बूकं त्र्यूषणञ्चैव पञ्चैव लवणानि च। समांशां गुडिकां कृत्वा कलम्बुकरसेन वा॥ १०॥
प्रातर्भोजनकाले वा भक्षयेत् तु यथाबलम्। शूलाद्विमुच्यते जन्तुः सहसा परिणामजात्॥ ११॥

Śambūkādi guḍikā

Śambūka-bhasma, trikaṭu and five salts, all in equal parts, are pounded with the juice of kalambuka and made into pills. It should be taken in the morning or mealtime according to strength. By this one is freed from pariṇāmaśūla immediately. [10-11]

शक्तुप्रयोग:

यः पिबति सप्तरात्रं शक्तूनेकान् कलाययूषेण।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम्॥ १२॥

One who takes parched barley flour with pea-soup for a week overcomes even the chronic pariṇāmaśūla let alone the newly arisen. [12]

त्रिफलालौह: त्रिफलामण्डूरञ्च

लौहचूर्णं वरायुक्तं विलीढं मधुसर्पिषा। परिणामशूलं शमयेत् तन्मलं वा प्रयोजितम्॥ १३॥

Triphalālauha, Triphalāmaṇḍūra

Lauhabhasma or maṇḍūra bhasma mixed with triphalā and taken with honey and ghee pacifies pariṇāmaśūla. [13]

कृष्णादिलौह:

कृष्णाऽभयालौहचूर्णं गुडेन सह भक्षयेत्। पक्तिशूलं निहन्त्येतज्जठराण्यग्निमन्दताम्॥
आमवातविकारांश्च स्थौल्यञ्चैवापकर्षति॥ १४॥

Kṛṣṇādi lauha

The powder of kṛṣṇā (pippalī), harītakī and lauhabhasma should be taken with jaggery. It alleviates pariṇāmaśūla, udararoga, dimininution of fire, āmavāta and obesity. [14]

पथ्यादिलौह:

पथ्यालौहरज:शुण्ठीचूर्णं माक्षिकसर्पिषा। परिणामरुजं हन्ति वातपितकफात्मिकाम्॥ १५॥

Pathyādi lauha

The powder of pathyā (haritakī), lauhabhasma and śuṇṭhī taken with honey and ghee alleviates pariṇāmaśūla caused by vāta, pitta and kapha. [15]

सामुद्राद्यं चूर्णम्

सामुद्रं सैन्धवं क्षारो रुचकं रोमकं विडम्। दन्ती लौहरज: किट्टं त्रिवृच्छूरणकं समम्॥ १६॥
दधिगोमूत्रपयसा मन्दपावकपाचितम्। तद्यथाऽग्निबलं चूर्णं पिबेदुष्णेन वारिणा॥ १७॥
जीर्णेऽजीर्णे तु भुञ्जीत मांसादि घृतसाधितम्। नाभिशूलं यकृच्छूलं गुल्मप्लीहकृतञ्च यत्॥ १८॥
विद्रध्यष्ठीलिकां हन्ति कफवातोद्भवं तथा। शूलानामपि सर्वेषामौषधं नास्ति तत्परम्॥
परिणामसमुत्थस्य विशेषेणान्तकृन्मतम्॥ १९॥

Sāmudrādya cūrṇa

Five salts- sāmudra, saindhava, sauvarcala, romaka and viḍa, yavakṣāra, dantī, lauhabhasma, maṇḍūra, trivṛt and śūraṇa, in equal parts, are cooked with curd, cow's urine and milk (total four times) on mild fire (till it regains the powder form). This powder should be taken, according to strength, with hot water after or during digestion keeping on diet of meat etc. cooked in ghee. It destroys pain in umbilicus, liver, gulma and spleen, abscess and aṣṭhīlikā and pain caused by kapha and vāta. No other remedy excels it for colics particularly pariṇāmaśūla. [16-19]

नारिकेललवणम्

नारिकेलं सतोयञ्च लवणेन प्रपूरितम्। विपक्वमग्निना सम्यक् परिणामजशूलनुत्॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्॥ २०॥

Nārikelalavaṇa

Narikela (coconut) with water is filled with salt and cooked on fire. It alleviates all types of pariṇāmaśūla. [20]

सप्तामृतं लौहम्

मधुकं त्रिफलाचूर्णमयोरज: समं लिहन्। मधुसर्पिर्युतं सम्यग् गव्यं क्षीरं पिबेदनु॥ २१॥
छर्दिं सतिमिरां शूलमम्लपित्तं ज्वरं क्लमम्। आनाहं मूत्रसङ्गञ्च शोथञ्चैव निहन्ति स:॥ २२॥

Saptāmṛta lauha

Powders of madhuka, triphalā and lauhabhasma, all in equal parts, are mixed toget

and taken with honey and ghee followed by intake of cow's milk. It alleviates vomiting, defects of vision, colic, amlapitta, fever, exhaustion, hardness of bowels, obstruction in urine and oedema. [21-22]

गुडपिप्पलीघृतम्

सपिप्पलीगुडं सर्पिः पचेत् क्षीरचतुर्गुणे। विनिहन्त्यम्लपित्तञ्च शूलञ्च परिणामजम्॥ २३॥

Guḍapippalī ghṛta

Ghee is cooked with pippalī and jaggery along with four times milk. It alleviates amlapitta and pariṇāmaśūla. [23]

पिप्पलीघृतम्

क्वाथेन कल्केन च पिप्पलीनां सिद्धं घृतं माक्षिकसंप्रयुक्तम्।
क्षीरानुपानस्य निहन्त्यवश्यं शूलं प्रवृद्धं परिणामसंज्ञम्॥ २४॥

Pippalīghṛta

Ghee cooked with paste and decoction of pippalī is mixed with honey and taken with milk. It relieves pariṇāmaśūla. [24]

कोलादिमण्डूरम्

कोलाग्रन्थिकशृङ्गवेरचपलाक्षारैः समं चूर्णितं मण्डूरं सुरभीजलेऽष्टगुणिते पक्त्वाऽथ सान्द्रीकृतम्।
तं खादेदशनादिमध्यविरतौ प्रायेण दुग्धान्नभुग्जेतुं वातकफामयान् परिणतौ शूलञ्च शूलानि च॥ २५॥

Kolādi maṇḍūra

Maṇḍūra is cooked in eight times cow's urine till it becomes thick; at the end, the powders of cavya, pippalīmūla, śuṇṭhī, pippalī and yavakṣāra are added thereto. It should be taken before and after meals and also in the middle keeping mostly on milk cereal diet to overcome disorders of vāta and kapha, pariṇāmaśūla and other types of śūla. [25]

भीमवटकमण्डूरम्

कोलाग्रन्थिकसहितैर्विश्वौषधमागधीयवक्षारैः।
प्रस्थमयोरजसामपि पलिकांशैश्चूर्णितैर्मिश्रैः॥ २६॥
अष्टगुणमूत्रयुक्तं क्रमपाकात् पिण्डतां नयेत् सर्वम्।
कोलप्रमाणवटिकास्तिस्रो भोज्यादिमध्यविरतौ च॥ २७॥
रससर्पिर्यूषपयोमांसैरश्नन् नरो निवारयति। अन्नविवर्त्तनशूलं गुल्मं प्लीहाग्निसादांश्च॥ २८॥

Bhīmavaṭaka maṇḍūra

By the above method, maṇḍūra-bhasma 640 gm is cooked in eight times cow's urine till it is solidified. At the end, cavya, pippalīmūla, śuṇṭhī, pippalī and yavakṣara each 40 gm are added and pills are made each weighing 1.5 gm. Such three pills are taken in beginning, middle and end of meal keeping on diet of meat-soup, ghee, vegetable soup,

milk and meat. It alleviates pariṇāmaśūla, gulma, spleen enlargment and diminution of digestive fire. [26-28]

क्षीरमण्डूरम्

लौहकिट्टपलान्यष्टौ गोमूत्रार्द्धाढके पचेत्। क्षीरप्रस्थेन तत् सिद्धं पक्तिशूलहरं नृणाम्॥ २९॥

Kṣīramaṇḍūra

Maṇḍūra 320 gm is cooked in cow's urine 1.28 litre and then in milk 640 ml. It relieves pariṇāmaśūla. [29]

चविकादिमण्डूरम्

लौहकिट्टपलान्यष्टौ गोमूत्रेऽष्टगुणे पचेत्। चविकानागरक्षारपिप्पलीमूलपिप्पली: ॥ ३०॥
सञ्चूर्ण्य निक्षिपेत् तस्मिन् पलांशाः सान्द्रतां गते।
गुडिकाः कल्पयेत् तेन पक्तिशूलनिवारिणीः ॥ ३१॥

Cavikādi maṇḍūra

Maṇḍūra 320 gm is cooked in eight times cow's urine till it is thickened; (at the end), powders of cavikā, sūṇṭhī, yavakṣāra, pippalīmūla and pippalī each 40 gm are added. Then pills are made which alleviate pariṇāmaśūla. [30-31]

मण्डूरलौहप्रयोगौ

मण्डूरं शोधितं पत्रीं लोहजां वा गुडेन तु। भक्षयेन्मुच्यते शूलात् परिणामसमुद्भवात्॥ ३२॥

One should take purified maṇḍūra or lauha (bhasma) with jaggery to alleviate pariṇāma-śūla. [32]

शतावरीमण्डूरम्

संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम्। शतावरीरसस्याष्टौ दध्नस्तु पयसस्तथा॥ ३३॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः। विपचेत् सर्वमैकध्यं यावत् पिण्डत्वमागतम्॥ ३४॥
सिद्धन्तु भक्षयेन्मध्ये भोजनस्याग्रतोऽपि वा। वातात्मकं पित्तभवं शूलञ्च परिणामजम्॥
निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः॥ ३५॥

Śatāvarīmaṇḍūra

Maṇḍūra purified and powdered 320 gm, śatāvarī juice, curd and milk each 320 ml and cow's ghee 160 gm- all are cooked together till solidification. It should be taken in the middle and before meals. It relieves undoubetedly śūla caused by vāta and pitta particularly pariṇāmaśūla. [33-35]

तारामण्डूरगुडः

विडङ्गं चित्रकं चव्यं त्रिफला त्र्यूषणानि च। नवभागानि चैतानि लौहकिट्टसमानि च॥ ३६॥
गोमूत्रं द्विगुणं दत्त्वा मूत्रार्द्धिकगुडान्वितम्। शनैर्मृद्वग्निना पक्त्वा सुसिद्धं पिण्डतां गतम्॥ ३७॥

स्निग्धे भाण्डे विनिक्षिप्य भक्षयेत् कोलमात्रया।
प्राङ्मध्यान्तक्रमेणैव भोजनस्य प्रयोजितः ॥ ३८॥
योगोऽयं शमयत्याशु पक्तिशूलं सुदारुणम्। कामलां पाण्डुरोगञ्च शोथं मन्दाग्नितामपि ॥ ३९ ॥
अर्शांसि ग्रहणीदोषं क्रिमिगुल्मोदराणि च। नाशयेदम्लपित्तञ्च स्थौल्यञ्चैवापकर्षति ॥ ४० ॥
वर्जयेच्छुष्कशाकानि विदाह्यम्लकटूनि च। पक्तिशूलान्तको ह्येष गुडो मण्डूरसंज्ञकः ॥
शूलार्त्तानां कृपाहेतोस्तारया परिकीर्त्तितः ॥ ४१ ॥

Tārāmaṇḍūraguḍa

Viḍaṅga, citraka, cavya, triphalā (separately) and trikaṭu (separately) nine parts (each one part), maṇḍūra nine parts, cow's urine 36parts and jaggery 18 parts. First maṇḍūra along with jaggery is cooked in cow's urine till it is solidified, at the end, the powders of viḍaṅga etc are added. It should be kept in uncted container and taken in the dose of 5 gm. in beginning, middle and end of meal.

It alleviates severe pariṇāmaśūla, jaundice, anaemia, oedema, diminished digestion, piles, grahaṇī disorders, worms, gulma, udara, amlapitta and obesity. During its use, the intake of dried vegetables, burning, sour and pungent items should be avoided in food. This maṇḍūraguḍa, destroyer of pariṇāmaśūla, is formulated by the goddess Tārā with kindness to the people suffering from śūla. [36-41]

राममण्डूरम्

वशिरं श्वेतवाट्यालं मधुपर्णी मयूरकम्। तण्डुलीयञ्च कर्षार्द्धं दत्त्वाऽधश्चोर्ध्वमेव च ॥ ४२ ॥
पाक्यं सुजीर्णमण्डूरं गोमूत्रेण दिनद्वयम्। अन्तर्वाष्पमदग्धञ्च तथा स्थाप्यं दिनत्रयम् ॥ ४३ ॥
विचूर्ण्य द्विगुणेनैव गुडेन सुविमर्दितम्। भोजनस्यादिमध्यान्ते भक्ष्यं कर्षं त्रिभागतः ॥ ४४ ॥
तक्रानुपानं वर्ज्यञ्च वार्क्षमम्लकमत्र तु। अम्लपित्ते च शूले च हितमेतद् यथाऽमृतम् ॥ ४५ ॥

Rāmamaṇḍūra

Vaśira, śveta balā, guḍūdī, apāmārga and taṇḍulīya each 5 gm are put above and below the maṇḍūra which is cooked with cow's urine for three days by closed heating and so that it is not burnt. It is kept as such for three days. Now it is powdered and mixed with the double quantity of jaggery. It should be taken in the dose of about 3.5 gm with buttermilk in beginning, middle and end of meal. Vegetable-soups should be avoided in diet. It is useful in amlapitta and śūla like nectar. [42-45]

बृहच्छतावरीमण्डूरम्

शतावरीरसप्रस्थे प्रस्थे च सुरभीजले। अजायाः पयसः प्रस्थे प्रस्थे धात्रीरसस्य च ॥ ४६ ॥
लौहकिट्टपलान्यष्टौ शर्करायाश्च षोडश। गन्धाश्मकुडवश्चैव पचेन्मृद्वग्निना शनैः ॥ ४७ ॥
सिद्धशीते घटे नीते चूर्णानीमानि दापयेत्। विडङ्गत्रिफलाव्योषयमानीगजपिप्पली- ॥ ४८ ॥
द्विजीरकघनानाञ्च श्लक्ष्णाण्यक्षसमानि च। खादेदग्निबलापेक्षी भोजनादौ विचक्षणः ॥ ४९ ॥
निहन्ति पक्तिशूलञ्च अम्लपित्तं सुदारुणम्। रक्तपित्तञ्च शूलञ्च पाण्डुरोगं हलीमकम् ॥ ५० ॥

Bṛhacchatāvarī-maṇḍūra

Maṇḍūra 320 gm, sugar 640 gm and sulphur 160 gm are cooked with śatāvarī juice, cow's urine, goats's milk and āmalakī juice each 640 ml on mild fire. After it is completed and the product is cooled down the following powders are added thereto-viḍaṅga, triphalā, trikaṭu, yavānī, gajapippalī, jīraka, kṛṣṇa jīraka, and musta each 10 gm. It should be taken in the dose according to digestive power in the beginning of meal.

It alleviates pariṇāmaśūla, amlapitta, innate haemorrhage, śūla, anaemia and halīmaka. [46-50]

रसमण्डूरम्

कुडवं पथ्याचूर्णं द्विपलं गन्धाश्म लोहकिट्टञ्च।
शुद्धरसस्यार्द्धपलं भृङ्गस्य रसञ्च केशराजस्य॥ ५१॥
प्रस्थोन्मितञ्च दत्त्वा लौहे पात्रेऽथ दण्डसंघृष्टम्।
शुष्कं घृतमधुयुक्तं मृदितं स्थाप्यञ्च भाजने स्निग्धे॥ ५२॥
उपयुक्तमेतदचिरान्निहन्ति कफपित्तजान् रोगान्।
शूलं तथाऽम्लपित्तं ग्रहणीञ्च कामलामुग्राम्॥ ५३॥

Rasamaṇḍūra

Mercury 20 gm and sulphur 80 gm are rubbed together to make kajjalī. Then harītakī powder 160 gm and maṇḍūra 80 gm are added to it. It is put in an iron vessel, dipped in the juice of bhṛṅgarāja and keśarāja each 640 ml and rubbed with a pestle till it is dried. Now it is mixed with ghee and honey and rubbed and kept in an uncted container.

It alleviates diseases caused by kapha and pitta particularly śūla, amlapitta, grahaṇīroga and jaundice. [51-53]

त्रिफलालौह:

अक्षामलकशिवानां स्वरसैः पक्वं सुलोहजं चूर्णम्।
सगुडं यद्युपभुङ्क्ते मुञ्चति शूली त्रिदोषजं शूलम्॥ ५४॥

Triphalālauha

Lauhabhasma cooked with the juice (or decoction) of triphalā along with (equal) jaggery, if taken, alleviates śūla caused by tridoṣa. [54]

लौहगुडिका

लौहस्य रजसो भागस्त्रिफलायास्त्रयस्तथा। गुडस्याष्टौ तथा भागा गुडान्मूत्रं चतुर्गुणम्॥ ५५॥
एतत् सर्वञ्च विपचेद् गुडपाकविधानवित्। लिहेच्च तद् यथाशक्ति क्षये शूले च पाकजे॥ ५६॥

Lauhaguḍikā

Lauhabhasma 1 part, triphalā 3 parts, jaggery 8 parts, and (cow's) urine 32 parts–

all this is cooked according to method of guḍapāka. It should be taken, according to digestive power, in wasting and śūla arisen during (or after) digestion. [55-56]

धात्रीलौहम्

धात्रीचूर्णस्याष्टौ पलानि चत्वारि लोहचूर्णस्य। यष्टीमधुकरजश्च द्विपलं दद्यात् पटे घृष्टम्॥ ५७॥
अमृताक्वाथेनैतच्चूर्णं भाव्यञ्च सप्ताहम्। चण्डातपेषु शुष्कं भूयः पिष्ट्वा नवे घटे स्थाप्यम्॥ ५८॥
घृतमधुना सह युक्तं भुक्त्यादौ मध्यतस्तथान्ते च। त्रीनपि वारान् खादेत् पथ्यं दोषानुबन्धेन॥ ५९॥
भुक्त्यादौ नाशयति व्याधीन् पित्तानिलोद्भूतान्। मध्येऽन्नावष्टम्भं जयति नृणां दह्यते नान्नम्॥ ६०॥
पानान्नकृतान् दोषान् भुक्त्यन्ते शीलितं जयति। एवं जीर्य्यति चान्ने शूलं नृणां सुकष्टमपि॥ ६१॥
हरति हि सहसा युक्तो योगश्चायं जरत्पित्तम्। चक्षुष्यः पलितघ्नः कफपित्तसमुद्भवाञ्जयेद्रोगान्॥
प्रसादयत्यपि रक्तं पाण्डुत्वं कामलां जयति॥ ६२॥

Dhātrīlauha

Āmalakī powder 320 gm, lauhabhasma 160 gm, madhuyaṣṭī powder 80 gm- these are rubbed together in a mortar and impregnated with āmalaki decoction for a week. It is kept in the intense sun and dried and again rubbed. Now it is kept in a container. It is taken with ghee and honey in beginning, middle and end of meal.

Taken in the beginning of meal it alleviates disorders caused by pitta and vāta, in the middle it checks flatulence and hyperacidity and used in the end it overcomes defects caused by food and drinks. Moreover, administered during digestion, it relieves even severe colic and acid gastritis. Besides, it destroys greying of hairs, disorders caused by kapha and pitta, anaemia and jaundice, promotes vision and purifies blood. [57-62]

लौहामृतम्

तनूनि लौहपत्राणि तिलोत्सेधसमानि च। कशिकामूलकल्केन संलिप्य सर्षपेण वा॥ ६३॥
विशोष्य सूर्य्यकिरणैः पुनरेवावलेपयेत्। त्रिफलाया जले ध्मातं निर्वाप्य च पुनः पुनः॥ ६४॥
ततः सञ्चूर्णितं कृत्वा कर्पटेन तु छानयेत्। भक्षयेन्मधुसर्पिर्भ्यां यथाऽग्न्येतत् प्रयोजयेत्॥ ६५॥
माषकं त्रिगुणं वाऽथ चतुर्गुणमथापि वा। छागस्य पयसः कुर्य्यादनुपानमभावतः॥ ६६॥
गवां घृतेन दुग्धेन चतुःषष्टिगुणेन च। पक्तिशूलं निहन्त्येतन्मासेनैकेन निश्चितम्॥
लौहामृतमिदं श्रेष्ठं ब्रह्मणा निर्मितं पुरा॥ ६७॥
ककारपूर्वकं यच्च यच्चाम्लं परिकीर्त्तितम्। सेव्यं तन्न भवेदत्र मांसञ्चानूपसम्भवम्॥ ६८॥

Lauhāmṛta

Thin iron blades with thickness of a sesamum are pasted with kaśikā root or mustard and dried in the sun. This is repeated several times. Then the blades are heated and then dipped into the decoction of triphalā. This also is repeated several times. Then it is powdered and strained through a piece of cloth. It should be taken with honey and ghee in the dose of one gm. gradually increasing to three or four gm. Thereafter goat's milk or, in its absence, cow's ghee or milk should be taken sixty four times (of lauha).

This lauhāmṛta is formulated by Brahmā and certainly alleviates pariṇāmaśūla within a month. During its use, kakārādi gaṇa, sours and meat of marshy animals should be avoided in diet. [63-68]

खण्डामलकम्

स्विन्नपीडितकूष्माण्डात् तुलाऽर्द्धं भृष्टमाज्यतः। प्रस्थार्द्धे खण्डतुल्यन्तु पचेदामलकीरसात्॥ ६९॥
प्रस्थे सुस्विन्नकूष्माण्डरसप्रस्थे विघट्टयन्। दर्व्या पाकं गते तस्मिंश्चूर्णीकृत्य विनिक्षिपेत्॥ ७०॥
द्वे द्वे पले कणाजाजीशुण्ठीनां मरिचस्य च। पलं तालीशधन्याकचतुर्जातकमुस्तकम्॥ ७१॥
कर्षप्रमाणं प्रत्येकं प्रस्थार्द्धं माक्षिकस्य च। पक्तिशूलं निहन्त्येतद् दोषत्रयभवञ्च यत्॥ ७२॥
छर्द्यम्लपित्तमूर्च्छाश्च कासश्वासावरोचकम्। हृच्छूलं रक्तपितञ्च पृष्ठशूलञ्च नाशयेत्।
रसायनमिदं श्रेष्ठं खण्डामलकसंज्ञितम्॥ ७३॥

Khaṇḍāmalaka

Steamed and pressed kūṣmāṇḍa 2 kg is fried in ghee 320 gm., sugar 320 gm and juice of āmalakī and steamed kūṣmāṇḍa each 640 ml are added thereto and cooked constantly stirring it with a laddle. When cooking is completed, the following drugs powdered are added– pippalī, jīraka and śuṇṭhī each 80 gm, marica 40 gm, tālīśa, dhānyaka, caturjāta and mustaka each 10 gm along with honey 320 gm.

This formulation known as 'Khaṇḍāmalaka' is an excellent Rasāyana and is useful in pariṇāmaśūla caused by tridoṣa, vomiting, amlapitta, fainting, cough, dyspnoea, anorexia, cardiac pain, innate haemorrhage and backache. [69-73]

त्रयोदशाङ्गो नारिकेलखण्डः

कुडवमितमिह स्यान्नारिकेलं सुपिष्टं, पलपरिमितसर्पिः पाचितं खण्डतुल्यम्।
निजपयसि तदेतत् प्रस्थमात्रे विपक्वं, गुडवदथ सुशीते शाणभागान् क्षिपेच्च॥ ७४॥
धन्याकपिप्पलिपयोदतुगाद्विजीराच्छाणं त्रिजातमिभकेशरवद्विचूर्ण्य।
हन्त्यम्लपित्तमरुचिं क्षयमस्रपित्तं शूलं वमिं सकलपौरुषकारि हारि॥ ७५॥

Trayodaśāṅga nārikelakhaṇḍa

Nārikela (coconut) pounded 160 gm is fried with ghee 40 gm and cooked with sugar 160 gm in its own water 640 ml like guḍapaka. When it is cooled the following drugs each 2.5 gm, are added thereto– dhānyaka, pippalī, musta, vaṃśalocana, jīraka, kṛṣṇa jīraka, trijāta and nāgakeśara.

It alleviates amlapitta, anorexia, wasting, innate haemorrhage, colic and vomiting and promotes strength and energy. [74-75]

कलायगुडिका

कलायचूर्णभागौ द्वौ लौहचूर्णस्य चापरः। कारवेल्लपलांशानां रसेनैव विमर्दितः॥ ७६॥
कर्षमात्रां ततश्चैकां गुडिकां भक्षयेन्नरः। मण्डानुपानाज्जयति जरत्पित्तं सुदुर्जयम्॥ ७७॥

Kalāyaguḍikā

Pea powder 2 parts and lauhabhasma 1 part – this is rubbed with the juice of kāravellaka leaves and made into pills each weighing 10 gm. It is taken with rice-scum and thus relieves even severe amlapitta. [76-77]

त्रिफलादिचूर्णद्वयम्

लिह्याद्वा त्रैफलं चूर्णमयश्चूर्णसमन्वितम्। यष्टिचूर्णेन वा युक्तं लिह्यात् क्षौद्रेण तद्वदे॥ ७८॥

In amlapitta, one should take triphalā powder mixed with (equal) lauhabhasma or madhuyaṣṭī with honey. [78]

अन्नद्रवशूलचिकित्सा

पित्तान्तं वमनं कृत्वा कफान्तञ्च विरेचनम्। अन्नद्रवे च तत्कार्य्यं जरत्पित्ते यदीरितम्॥
आमपक्वाशये शुद्धे गच्छेदन्नद्रवः शमम्॥ ७९॥

Annadrava śūla

Emesis ending with pitta and purgation ending with kapha should be applied in annadrava śūla which subsides after āmāśaya and pakvāśaya are evacuated. Moreover, the measures as prescribed for amlapitta should be adopted. [79]

अन्नद्रवशूले पथ्यानि

माषेण्डरी सतुषिका स्विन्ना सर्पिर्युता हिता॥ ८०॥

गोधूममण्डकं तत्र सर्पिषा गुडसंयुतम्। ससितं शीतदुग्धेन मृदितं वा हितं मतम्॥ ८१॥
शालितण्डुलमण्डं वा कवोष्णं सिक्थवर्जितम्। वाटयं क्षीरेण संसिद्धं घृतपूरं सशर्करम्॥ ८२॥
शर्करां भक्षयित्वा वा क्षीरमुत्क्वथितं पिबेत्। पटोलपत्रयूषेण खादेच्चणकशक्तुकान्॥ ८३॥
अन्नद्रवे जरत्पित्ते वह्निर्मन्दो भवेत् यतः। तस्मादत्रान्नपानानि मात्राहीनानि कल्पयेत्॥ ८४॥

Cake prepared of black gram (with husk) by steaming and taken with ghee is wholesome. [80]

Cakes of wheat should be taken with ghee and jaggery or softened in cold milk added with sugar. [81]

Or scum of śāli rice warm and devoid of grains (is wholesome) or barley cooked with milk and ghṛtapūra with sugar (are wholesome). [82]

One should drink boiled milk after taking sugar or should take parched grain flour with soup of paṭola leaves. [83]

As in annadrava and amlapitta digestive fire is diminished, food and drink should be prescribed below the average quantity. [84]

॥ इति परिणामशूलचिकित्सा॥ २७॥

Thus ends treatment of pariṇāmaśūla. [27]

(Pariṇāmaśūla may be correlated with gastric or duodenal ulcer)

२८. अष्टाविंशोऽध्याय:

CHAPTER XXVIII

उदावर्त्त-चिकित्सा

Treatment of Udāvartta (upward movement of vāyu)

सामान्यक्रम:

त्रिवृत्सुधापत्रतिलादिशाकग्राम्यौदकानूपरसैर्यवान्नम् ।
अन्यैश्च सृष्टानिलमूत्रविड्भिरद्यात् प्रसन्नागुडशीधुपायी ॥ १ ॥

One (affected with udāvarta) should take in diet the preparation of barley with the vegetables of the leaves of trivṛt and snuhī, sesamum etc, meat-soup of domestic, aquatic and marshy animals and others which are carminative, laxative and diuretic followed by the drink of clear wine and vinegar made of jaggery. [1]

वातनिरोधजे निरूह:

आस्थापनं मारुतजे स्निग्धस्विन्नस्य शस्यते ॥ २ ॥

In udāvarta caused by (suppression of) wind, non-unctuous enema should be given after proper unction and sudation. [2]

पुरीषनिरोधजे क्रियाक्रम:

पुरीषजे तु कर्त्तव्यो विधिरानाहिकस्तु य: । क्षारवैतरणौ वस्ती युञ्ज्यात् तत्र चिकित्सक: ॥ ३ ॥

In that caused by (suppression of) faeces, remedy prescribed for ānāha particularly kṣāra and vaitaraṇa enemes should be applied by the physician. [3]

श्यामादिगण:

श्यामा दन्ती द्रवन्तीत्वङ्‌ महाश्यामा स्नुही त्रिवृत् ।
सप्तला शङ्खिनी श्वेता राजवृक्ष: सतिल्वक: ॥ ४ ॥
कम्पिल्लक: करञ्जश्च स्वर्णक्षीरी त्वयं गण: ।

उदावर्तादौ श्यामादिघृतादय:

सर्पिस्तैलरज:क्वाथकल्केष्वन्यतमेन च । उदावर्त्तोदरानाहविषगुल्मविनाशन: ॥ ५ ॥

Śyāmādi gaṇa

Śyāmā, dantī, dravantī (bark) vṛddhadāraka, snuhī, trivṛt, saptalā, śaṅkhinī, śvetā, āragvadha, tilvaka, kampillaka, karañja and svarṇakṣīrī- this group is known as ' śyāmādi gaṇa '. It should be used in any of the forms of ghee, oil, powder, decoction and paste in udāvarta, udararoga, ānāha, poisoning and gulma. [4-5]

विड्विबन्धे त्रिवृदादिगुडिका

त्रिवृत्कृष्णाहरीतक्यो द्विचतुःपञ्चभागिकाः। गुडिका गुडतुल्यास्ता विड्विबन्धगदापहाः॥ ६॥

Trivṛdādi guḍikā

Trivṛt, pippalī and harītakī 2, 3 and 5 parts, jaggery equal to the above total- these are (pounded together and) made into pills which remove the disorders caused by suppression of faeces. [6]

हरीतक्यादिचूर्णम्

हरीतकीयवक्षारपीलूनि त्रिवृता तथा। घृतैश्चूर्णमिदं पेयमुदावर्त्तविनाशनम्॥ ७॥

Harītakī, yavakṣāra, pīlu (fruits) and trivṛt- this powder should be taken with ghee to alleviate udāvarta. [7]

द्विरुत्तरं हिङ्ग्वादिचूर्णम्

हिङ्गु कुष्ठं वचा सर्जी विडश्चेति द्विरुत्तरम्। पीतं मद्येन तच्चूर्णमुदावर्त्तविनाशनम्॥ ८॥

Dviruttara Hiṅgvādi cūrṇa

Hiṅgu, kuṣṭha, vacā, śaṭī, and viḍa successively double- This powder taken with wine destroys udāvarta. [8]

नाराचचूर्णम्

खण्डपलं त्रिवृता सममुपकुल्याकर्षचूर्णितं श्लक्ष्णम्।
प्राग्भोजने च समधु बिडालपदकं लिहेत् प्राज्ञः॥ ९॥
एतद् गाढपुरीषे पित्ते कफे च विनियोज्यम्। स्वादुर्नृपयोग्योऽयं चूर्णो नाराचको नाम्ना॥ १०॥

Nārāca cūrṇa

sugar and trivṛt each 40 gm, pippalī 10 gm- this powder should be taken in the dose of 10 gm with honey before meals in the condition of hardness of faeces, (aggravation of) pitta and kapha. This nārāca cūrṇa is quite palatable and fit to be used by kings. [9-10]

रसोनप्रयोगः

रसोनं मद्यसम्मिश्रं पिबेत् प्रातः प्रकाङ्क्षितम्। गुल्मोदावर्त्तशूलघ्नं दीपनं बलवर्द्धनम्॥ ११॥

One should take garlic mixed with wine in the morning in empty stomach. It promotes digestive fire and strength and alleviates gulma, udāvarta and śūla. [11]

हिङ्ग्वादिवर्त्तिः

हिङ्गुमाक्षिकसिन्धूत्थैः पक्त्वा वर्त्तिं सुनिर्मिताम्। घृताभ्यक्तां गुदे दद्यादुदावर्त्तविनाशिनीम्॥ १२॥

Suppository made of hiṅgu, honey and rocksalt by cooking should be applied into the anus after lubricating it with ghee. It destroys udāvarta. [12]

फलवर्त्तिः

मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः। गुडक्षारसमायुक्ताः फलवर्त्तिः प्रशस्यते॥ १३॥

Madanādi phalavartti

(for the same), phalavartti made of madana, pippalī, kuṣṭha, vacā and white mustard mixed with jaggery and yavakṣāra is made. [13]

आगारधूमादिवर्त्तिः

आगारधूमसिन्धूत्थतैलयुक्ताम्लमूलकम्। क्षुण्णं निर्गुण्डिपत्रं वा स्विन्ने पायौ क्षिपेद् बुधः॥ १४॥

Āgāradhūmādi vartti

Sour radish (radish used in preparing sour gruel) mixed with soot, rocksalt and oil should be introduced into anus after fomenting it or pounded nirguṇḍī leaves may be applied as sour radish. [14]

मूत्रनिरोधजे चिकित्सा

सौवर्च्चलाढ्यां मदिरां मूत्रे त्वभिहते पिबेत्। एलां वाऽप्यथ मद्येन क्षीरवारि पिबेच्च सः॥ १५॥
दुःस्पर्शं स्वरसं वाऽपि कषायं ककुभस्य वा। एर्वारुबीजं तोयेन पिबेद्वाऽलवणीकृतम्॥ १६॥
पञ्चमूलीशृतं क्षीरं द्राक्षारसमथापि वा। सर्वथैवोपयुञ्जीत मूत्रकृच्छ्राश्मरीविधिम्॥ १७॥

In suppression of urine, one should take wine mixed with sauvarcala or elā with wine or milk added with equal water. [15]

Or the juice of durālabhā or decoction of kakubha or seeds of ervāru slightly salted with water. [16]

Or milk processed with (laghu or tṛṇa) pañcamula or grape juice should be used. Besides, the measures prescribed in dysuria and calculus should be adopted. [17]

जृम्भादिनिरोधजेषु चिकित्सा

स्नेहस्वेदैरुदावर्त्तं जृम्भाजं समुपाचरेत्। अश्रुमोक्षोऽश्रुजे कार्य्यः स्वप्नो मद्यं प्रियाः कथाः॥ १८॥

Udāvarta caused by (suppression of) yawning should be managed with unction and fomentation. That caused by (suppression of) tears should be treated with elimination of tears, good sleep, wine and pleasing talks. [18]

क्षवजे क्षवपत्रेण घ्राणस्थेनानयेत् क्षवम्। तथोर्ध्वजत्रुगोऽभ्यङ्गः स्वेदो धूमः सनावनः॥
हितं वातघ्नमाद्यञ्च घृतञ्चौत्तरभक्तिकम्॥ १९॥

In that caused by (suppression of) sneezing, the leaves of kṣava (chikkikā) should be put to nostrils to stimulate sneezing. Besides, massage and fomentation in supraclavicular region, smoking, snuffing, vāta-alleviating edibles and intake of ghee after meal are wholesome. [19]

उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत्॥ २०॥

In (udāvarta) caused by (suppression of) eructation unctuous smoking according to prescribed method should be applied. [20]

छर्द्याघातं यथादोषं नस्यस्नेहादिभिर्जयेत्। भुक्त्वा प्रच्छर्दनं धूमो लङ्घनं रक्तमोक्षणम्॥
रूक्षान्नपानं व्यायामो विरेकश्चात्र शस्यते॥ २१॥

The disorder caused by suppression of vomiting should be treated, according to doṣa, with snuffing, fomentation, etc. Moreover, emesis after eating, smoking, lightening, blood-letting, rough food and drinks, physical exercise and purgative are prescribed. [21]

वस्तिशुद्धिकरावापं चतुर्गुणजलं पयः। आवारिनाशात् क्वथितं पीतवन्तं प्रकामतः॥
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरम्॥ २२॥
अत्राभ्यङ्गावगाहाश्च मदिराश्चरणायुधाः। शालिः पयो निरूहाश्च हितं मैथुनमेव च॥ २३॥

In case of udāvarta caused by (suppression of) semen, one should take enough milk boiled with four times water and alongwith diuretic drugs till entire water is lost and then indulge in sexual intercourse with charming woman. Massage, bath, wine, cock-flesh, śāli rice, milk, non-unctuous enema and sexual intercourse are wholesome. [22-23]

क्षुद्विघाते हितं स्निग्धमुष्णमल्पञ्च भोजनम्। तृष्णाघाते पिबेन्मन्थं यवागूं वाऽपि शीतलाम्॥ २४॥

In case of suppression of hunger, unctuous, warm and little food is wholesome. Similarly in suppression of thirst one should drink mantha (churned drink) or cold gruel. [24]

रसेनाद्यात् सुविश्रान्तः श्रमश्वासातुरो नरः। निद्राघाते पिबेत् क्षीरं स्वप्नः संवाहनानि च॥ २५॥

One afflicted with exertion and dyspnoea should take complete rest and diet with meat-soup.

In suppression of sleep, one should take milk, observe sleep and massage. [25]

॥ इत्युदावर्त्तचिकित्सा॥ २८॥

Thus ends treatment of udāvartta. [28]

२९. ऊनत्रिंशोऽध्याय:

CHAPTER XXIX

आनाह-चिकित्सा

Treatment of Ānāha (hardness of bowels)

क्रियाक्रम:

उदावर्त्तक्रियाऽऽनाहे सामे लङ्घनपाचनम्।। १ ।।

In ānāha, the measures prescribed in udāvartta are applied. However, if it is associated with āma, lightening and digestive are prescribed. [1]

द्विरुत्तरहिङ्ग्वादिचूर्णम्

द्विरुत्तरा हिङ्गु वचा सकुष्ठा सुवर्च्चिका चेति विडङ्गचूर्णम्।
सुखाम्बुनाऽऽनाहविसूचिकाऽर्त्तिहृद्रोगगुल्मोर्ध्वसमीरणघ्नम्।। २ ।।

Hiṅgu, vacā, kuṣṭha, swarjikṣāra and viḍaṅga successively double- This powder taken with tepid water destroys ānāha, visūcikā, śūla, cardiac destress, gulma and ūrdhvavāta. [2]

वचादिचूर्णम्

वचाऽभयाचित्रकयावशूकान् सपिप्पलीकातिविषान् सकुष्ठान्।
उष्णाम्बुनाऽऽनाहविमूढवातान् पीत्वा जयेदाशु हितौदनाशी।। ३ ।।

Vacādi cūrṇa

Vacā, harītakī, citraka, yavakṣāra, pippalī, ativiṣā and kuṣṭha- this powder taken with hot water overcomes ānāha, and udāvartta. During the treatment the patient should take wholesome diet. [3]

त्रिवृदादिवटिका

त्रिवृद्धरीतकीश्यामा: स्नुहीक्षीरेण भावयेत्। वटिका मूत्रपीतास्ता: श्रेष्ठाश्चानाहभेदिका: ।। ४ ।।

Trivṛdādi vaṭikā

Trivṛt, harītakī, and śyāmā are impregnated with the latex of snuhī and made into pills. These taken with cow's urine break ānāha. [4]

वैरेचनिकलवणम्

फलञ्च मूलञ्च विरेचनोक्तं हिङ्ग्वर्कमूलं दशमूलमग्र्यम्।
स्नुक्चित्रकौ चैव पुनर्नवा च तुल्यानि सर्वैर्लवणानि पञ्च।। ५ ।।

स्नेहैः समूत्रैः सह जर्जराणि शरावसन्धौ विपचेत् सुलिप्ते।
पक्कं सुपिष्टं लवणं तदन्नैः पानैस्तथाऽऽनाहरुजाघ्नमग्रयम् ॥ ६ ॥

Vairecanika lavaṇa

Fruity and rooty drugs mentioned under purgatives (in CS. SU. 1), hiṅgu, arka root, daśamūla, snuhī, citraka and punarnavā- all equal parts and five salts equal to the above total are powdered and mixed with fatty substances and urines, put within the closed cavity of saucers properly wrapped and heated. After it is completely cooked, it should be powdered and used with food and drinks in case of ānāha. [5-6]

राठादिवर्त्तिः

राठधूमविडव्योषगुडमूत्रविपाचिता। गुदेऽङ्गुष्ठसमा वर्त्तिर्विधेयाऽऽनाहशूलनुत् ॥ ७ ॥

Rāṭhādi vartti

Rāṭha (madanaphala), soot, viḍa, trikaṭu, and urine- by cooking all these thumb like suppository is made. It is applied into the anus in case of pain due to ānāha. [7]

त्रिकटुकादि वर्त्तिः

वर्त्तिस्त्रिकटुकसैन्धवसर्षपगृहधूमकुष्ठमदनफलैः।
मधुनि गुडे वा पक्त्वा पाय्वीरिता चाङ्गुष्ठपरिमाणा ॥ ८ ॥
वर्त्तिरियं दृष्टफला शनैः शनैः प्रणिहिता घृताभ्यक्ता।
आनाहोदावर्त्तप्रशमनकृज्जठरगुल्मविनाशिनी ॥ ९ ॥

Trikaṭukādi vartti

Trikaṭu, saindhava, mustard, soot, kuṣṭha and madanaphala- these are cooked with honey or jaggery and made into suppositories of the thumb size. It should be smeared with ghee and introduced slowly into the anus. It is tried successfully in case of ānāha, udāvartta, udararoga and gulma. [8-9]

शुष्कमूलकाद्यं घृतम्

मूलकं शुष्कमार्द्रञ्च वर्षाभूर्मूलपञ्चकम्। आरवेतफलञ्चापि पिष्ट्वा तेन पचेद् घृतम्।
तत् पीयमानं शमयेदुदावर्त्तमसंशयम् ॥ १० ॥

Śuṣkamūlakādya ghṛta

Śūṣka mūlaka (dried radish), fresh ginger, punarnavā, pañcamūla (bṛhat or laghu) and fruits of āragvadha- with the paste of these ghee should be cooked. It pacifies udāvartta positively. [10]

स्थिराद्यं घृतम्

स्थिराऽऽदिवर्गस्य पुनर्नवायाः सम्पाकपूतीककरञ्जयोश्च।
सिद्धः कषायो द्विपलांशिकानां प्रस्थो घृतात् स्यात् प्रतिरुद्धवाते ॥ ११ ॥

Sthirādya ghṛta

Sthirādi varga (laghu pancamula), punarnavā, āragvadha and pūtikarañja each 80 gm should be decocted. With this decoction ghee 640 gm should be cooked to be used in case of obstructed urine. [11]

॥ इत्यानाहचिकित्सा ॥ २९ ॥

Thus ends treatment of ānāha. [29]

३०. त्रिंशोऽध्याय:

CHAPTER XXX

गुल्म-चिकित्सा

Treatment of Gulma (abdominal lump)

क्रियासूत्रम्

लघ्वन्नं दीपनं स्निग्धमुष्णं वातानुलोमनम्। बृंहणं यद्भवेत् सर्वं तद्धितं सर्वगुल्मिनाम्॥ १॥
स्निग्धस्य भिषजा स्वेद: कर्त्तव्यो गुल्मशान्तये। स्रोतसां मार्दवं कृत्वा जित्वा मारुतमुल्बणम्।
भित्त्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति॥ २॥
कुम्भीपिण्डेष्टकास्वेदान् कारयेत् कुशलो भिषक्। उपनाहाश्च कर्त्तव्या: सुखोष्णा: शाल्वणादय:॥ ३॥
स्थानावसेको रक्तस्य बाहुमध्ये शिराव्यध:। स्वेदोऽनुलोमनञ्चैव प्रशस्तं सर्वगुल्मिनाम्॥ ४॥

Light diet, appetisers, unctuous, hot, carminative and promotive measures are wholesome for all types of gulma. For subsidence of gulma, fomentation after unction should be applied which producing softness in channels pacifies the aggravated vāta and thus by removing obstruction destroys gulma. (For fomentation) the physician should apply pitcher, lump and brick and among poultices śālvaṇa etc should be applied warm. Besides, blood-letting from the affected site, venesection in the mid-arm, fomentation and carmination- these are prescribed in all types of gulma. [1-4]

पथ्यम्

पेया वातहरै: सिद्धा कौलत्था धन्वजा रसा:। खडा: सपञ्चमूलाश्च गुल्मिनां भोजने हिता:॥ ५॥

Liquid gruels of kulattha processed with vāta-alleviating drugs daśamūla etc, meat-soup of wild animals, khaḍa prepared with (bṛhat) pañcamūla are wholesome items in diet for the patients of gulma. [5]

वातगुल्म-चिकित्सा

मातुलुङ्गरसादियोग:

मातुलुङ्गरसो हिङ्गु दाडिमं विडसैन्धवम्। सुरामण्डेन पातव्यं वातगुल्मरुजापहम्॥ ६॥

Vātagulma

Mātuluṅga juice, hiṅgu, pomegranate, viḍa and rocksalt- this formulation should be taken with concentrated wine. It destroys the pain of vātagulma. [6]

नागरादियोग:

नागरार्द्धपलं पिष्टं द्वे पले लुञ्चितस्य च। तिलस्यैकं गुडपलं क्षीरेणोष्णेन पाययेत्॥
वातगुल्ममुदावर्त्तं योनिशूलञ्च नाशयेत्॥ ७॥

Nāgarādi yoga

Pounded nāgara (śuṇṭhi) 20 gm, dehusked sesamum 80 mg and jaggery 40 gm-

all mixed together should be given with hot milk. It destroys vātagulma, udāvartta and yoniśūla (pain in female genital tract). [7]

एरण्डतैलप्रयोग:

पिबेदेरण्डतैलं वा वारुणीमण्डमिश्रितम्। तदेव तैलं पयसा वातगुल्मी पिबेन्नरः ॥ ८ ॥

One suffering from vātagulma should take castor oil mixed with concentrated wine or milk. [8]

रसोनक्षीरम्

साधयेच्छुष्कशुद्धस्य रसोनस्य चतुःपलम्। क्षीरोदकेऽष्टगुणिते क्षीरशेषञ्च पाययेत् ॥ ९ ॥
वातगुल्ममुदावर्त्तं गृध्रसीं विषमज्वरम्। हृद्रोगं विद्रधिं शोषं नाशयत्याशु तत् पयः ॥
एवन्तु साधिते क्षीरे स्तोकमप्यत्र दीयते ॥ १० ॥

Rasonaksīra

Dehusked and dried raśona (garlic) 160 gm is cooked in eight times milk mixed with equal water till only milk remains. It is useful in vātagulma, udāvartta, sciatica, irregular fever, cardiac disorder, abscess and consumption. Smaller dose of the preparation is also given. [9-10]

सर्जिकादियोग:

सर्जिकाकुष्ठसहितः क्षारः केतकिजोऽपि वा। तैलेन पीतः शमयेद् गुल्मं पवनसम्भवम् ॥ ११ ॥

Sarjikādi yoga

Yavakṣāra or the ash of ketakī mixed with sarjikā and kuṣtha and taken with oil pacifies vātagulma. [11]

वातगुल्मे कफे वृद्धे वान्तिश्चूर्णादिरिष्यते ॥ १२ ॥

In case of increased kapha in vātagulma, emesis is induced with powder etc. [12]

पित्तगुल्मचिकित्सा

क्रियाक्रम:

पित्ते तु रेचनं स्निग्धं रक्ते रक्तस्य मोक्षणम्। स्निग्धोष्णेनोदिते गुल्मे पैतिके स्रंसनं हितम् ॥ १३ ॥
रूक्षोष्णेन तु संभूते सर्पिः प्रशमनं परम् ॥ १४ ॥

Pittagulma

In pitta unctuous purgative (castor oil etc) and in rakta blood-letting is done. [13]

If paittika gulma is caused by unctuous and hot factors, purgative is advised and if it is arisen due to rough and hot factors ghee proves to be an excellent pacifier. [14]

काकोल्यादि-महातिक्त-वासाद्यैः पित्तगुल्मिनम्। स्नेहितं स्रंसयेत् पश्चाद् योजयेद् वस्तिकर्मणा ॥ १५ ॥

The patient of pittagulma should first be uncted with ghṛta such as kākolyādi, mahātikta and vāsādya and then subjected to purgation followed by enema. [15]

स्निग्धोष्णजे पित्तगुल्मे काम्पिल्लं मधुना लिहेत्। रेचनार्थी रसं वापि द्राक्षायाः सगुडं पिबेत्॥ १६॥

In pittagulma caused by unctuous and hot one should take, for purgation, kampillaka with honey or grape juice mixed with jaggery. [16]

विदह्यमानगुल्मस्य लक्षणम्

दाहशूलानिलक्षोभस्वप्ननाशारुचिज्वरैः। विदह्यमानं जानीयाद् गुल्मं तमुपनाहयेत्॥ १७॥

Heat, pain, irritation due to vāta, insomnia, anorexia and fever- these indicate the inflammatory state of gulma when poultice should be applied thereto. [17]

पक्वगुल्मस्य चिकित्सा

पक्के तु व्रणवत् कार्य्यं व्यधशोधनरोपणम्। स्वयमूर्ध्वमधो वाऽपि स चेद्दोषः प्रपद्यते॥ १८॥
द्वादशाहमुपेक्षेत रक्षन्नन्यानुपद्रवान्। परन्तु शोधनं सर्पिः शुद्धे समधु तिक्तकम्॥ १९॥

When it is ripened, it should be treated like wound with opening, cleaning and healing measures. In case of self rupture if the pathological material is coming through upward or downward passage, it should be watched upto twelve days only preventing other complications. Thereater ghṛta processed with evacuative drugs should be administered followed by the same processed with bitters with honey after evacuation. [18-19]

रोहिण्यादिघृतम्

रोहिणीकटुका निम्बं मधुकं त्रिफलात्वचः। कर्षांशास्त्रायमाणा च पटोलत्रिवृतापले॥ २०॥
द्विपलञ्च मसूराणां साध्यमष्टगुणे जले। घृताच्छेषं घृतसमं सर्पिषश्च चतुःपलम्॥ २१॥
पिबेत् संमूर्च्छितं तेन गुल्मः शाम्यति पैत्तिकः।
ज्वरस्तृष्णा च शूलञ्च श्रमो मूर्च्छाऽरतिस्तथा॥ २२॥

उत्तममात्रार्हाः

दीप्ताग्नयो महाकायाः स्नेहसात्म्या महाबलाः। गुल्मिनः सर्पदष्टाश्च विसर्पोपहताश्च ये॥
ज्येष्ठां मात्रां पिबेयुस्ते पलान्यष्टौ विशेषतः॥ २३॥

Rohiṇyādi ghṛta

Rohiṇī kaṭukā (katukā), nimba, madhuka, triphalā (pulp) and trāyamāṇā each 10 gm, paṭola and trivṛt each 40 gm, masūra 80 gm - these are cooked in water eight times the ghee (e.g. 1.28 litre) till water is completely evaporated. Now ghee 160 gm mixed with the above decoction should be taken which alleviates pittaja gulma with symptoms like fever, thirst, pain, vertigo, fainting and restlessness. Those having big body, fatty substances as suitable, great strength and afflicted with gulma, snake-bite and erysipelas should take the maximum dose particularly 320 gm. [20-23]

कफगुल्म-चिकित्सा

क्रियाक्रम:

लङ्घनोल्लेखने स्वेदे कृतेऽग्नौ सम्प्रधुक्षिते। घृतं सक्षारकटुकं पातव्यं कफगुल्मिना॥ २४॥

Kapha-gulma

One suffering from kapha-gulma should take ghṛta processed with alkali and pungents after digestive fire is stimulated by application of lightening, emesis and fomentation. [24]

मन्दोऽग्निर्वेदना मन्दा गुरुस्तिमितकोष्ठता। सोत्क्लेशा चारुचिर्यस्य स गुल्मी वमनोपगः॥ २५॥

In case, digestion is sluggish, pain is mild, belly is heavy and motionless and there are nausea and anorexia emesis should be given to the patient of gulma. [25]

मन्देऽग्नावनिले मूढे ज्ञात्वा सस्नेहमाशयम्। गुडिकाचूर्णनिर्य्यूहाः प्रयोज्याः कफगुल्मिनाम्॥
क्षारारिष्टगणश्चापि दाहः शेषे विधीयते॥ २६॥

In kaphagulma, when digestive fire is mild and vāyu is confounded (covered) indicating the viscera full of unctuous material, pills, powders, decoctions, alkalis and ariṣṭas should be used. In case of failure of these measures, cautery is applied. [26]

योगत्रयम्

पञ्चमूलीशृतं तोयं पुराणं वारुणीरसम्। कफगुल्मी पिबेत् काले जीर्णं माध्वीकमेव वा॥ २७॥

The patient of kaphagulma should drink water processed with (bṛhat) pañcamūla, old wine (vāruṇī or mādhvīka). [27]

तिलादिप्रलेपः स्वेदश्च

तिलैरण्डातसीबीजसर्षपैः परिलिप्य च। श्लेष्मगुल्ममयःपात्रैः सुखोष्णैः स्वेदयेद्भिषक्॥ २८॥

After applying the paste of sesamum, castor, linseed and mastard, the kaphagulma should be fomented with warm iron pan. [28]

तक्रप्रयोगः

यमानीचूर्णितं तक्रं विडेन लवणीकृतम्। पिबेत् सन्दीपनं वातमूत्रवर्च्चोऽनुलोमनम्॥ २९॥

Buttermilk mixed with yavānī powder and viḍa salt should be taken. It stimulates digestive fire and normalises movement of wind, urine and faeces. [29]

द्वन्द्वजत्रिदोषजगुल्मचिकित्सा

व्यामिश्रदोषे व्यामिश्रः सर्व एव क्रियाक्रमः। सन्निपातोद्भवे गुल्मे त्रिदोषघ्नो विधिर्हितः॥
यथोक्तेन सदा कुर्य्याद् भिषक् तत्र समाहितः॥ ३०॥

In case of dual and triple aggregation of doṣas, the above measures should be applied in combined way. [30]

वचादिचूर्णम्

वचाविडाभयाशुण्ठीहिङ्गुकुष्ठाग्निदीप्यकाः। द्वित्रिषट्चतुरैकाष्टसप्तपञ्चांशिकाः क्रमात्॥ ३१॥
चूर्णं मद्यादिभिः पीतं गुल्मानाहोदरापहम्। शूलार्शःश्वासकासघ्नं ग्रहणीदीपनं परम्॥ ३२॥

Vacādi cūrṇa

Vacā, viḍa, harītakī, śuṇṭhī, hiṅgu, kuṣṭha, citraka and yavānī in 2,3,6,4,1,8,7 and 5 parts respectively (are powdered together). This powder taken with wine etc. destroys gulma, ānāha, udararoga, colic, piles, dyspnoea and cough and is a good stimulant of grahaṇī. [31-32]

यमान्यादिचूर्णम्

यमानीहिङ्गुसिन्धूत्थक्षारसौवर्चलाभयाः। सुरामण्डेन पातव्या गुल्मशूलनिषूदनाः॥ ३३॥

Yavānyādi cūrṇa

Yavānī, hiṅgu, saindhava, yavakṣāra, sauvarcala and harītakī- this powder should be taken with concentrated wine in gulma and śūla. [33]

हिङ्ग्वाद्यं चूर्णं गुडिका च

हिङ्गु त्रिकटुकं पाठां हवुषामभयां शटीम्। अजमोदाजगन्धे च तिन्तडीकाम्लवेतसौ॥ ३४॥
दाडिमं पौष्करं धान्यमजाजीं चित्रकं वचाम्। द्वौ क्षारौ लवणे द्वे च चव्यञ्चैकत्र चूर्णयेत्॥ ३५॥
चूर्णमेतत् प्रयोक्तव्यमन्नपानेष्वनत्ययम्। प्राग्भुक्तमथवा पेयं मद्येनोष्णोदकेन वा॥ ३६॥
पार्श्वहृद्बस्तिशूलेषु गुल्मे वातकफात्मके। आनाहे मूत्रकृच्छ्रे च गुदयोनिरुजासु च॥ ३७॥
ग्रहण्यर्शोविकारे च प्लीह्नि पाण्ड्वामयेऽरुचौ। उरोविबन्धे हिक्कायां कासे श्वासे गलग्रहे॥ ३८॥
भावितं मातुलुङ्गस्य चूर्णमेतद्रसेन वा।
बहुशो गुडिकाः कार्य्याः कार्म्मुकाः स्युस्ततोऽधिकम्॥ ३९॥

Hiṅgvādya cūrṇa- guḍikā

Hiṅgu, trikaṭu, pāṭhā, hapuṣā, harītakī, śaṭī, ajamodā, ajagandhā, tintiḍīka, amlavetasa, dāḍima, puṣkaramūla, dhānyaka, jīraka, citraka, vacā, yavakṣāra and sarjikṣāra, saindhava, sauvarcala and cavya- this powder should be used in food and drinks or before meals with wine or hot water in cases of pain in chest, heart and pelvis; gulma caused by vāta and kapha, ānāha, dysuria, pain in rectum and female genital fract, grahaṇīroga, piles, spleen enlargement, anaemia, anorexia, obstruction in chest, hiccough, cough, bronchial asthma and dysphagia. This formulation may also be made into pills (which are more effective) by impregnating the powder with mātuluṅga juice several times. [34-39]

पूतीकादिलवणम्

पूतीकपत्रगजचिर्भिटचव्यवह्निव्योषञ्च संस्तरचितं लवणोपधानम्।
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं गुल्मोदरश्वयथुपाण्डुगुदोद्भवेषु॥ ४०॥

Pūtīkādi lavaṇa

Pūtīka leaves, Indravāruṇī, cavya, citraka and trikaṭu are placed in layers with (equal) saindhava and burnt in a closed vessel. This powder should be taken with curd-water in gulma, udararoga, oedema, anaemia and piles. [40]

हिङ्गुपुष्करमूलादिचूर्णम्

हिङ्गु पुष्करमूलानि तुम्बुरूणि हरीतकीम्। श्यामां विडं सैन्धवञ्च यवक्षारं महौषधम्॥ ४१॥
यवक्काथोदकेनैतद् घृतभृष्टन्तु पाययेत्। तेनास्य भिद्यते गुल्मः सशूलः सपरिग्रहः॥ ४२॥

Hiṅgupuṣkaramūlādi cūrṇa

Hiṅgu, puṣkaramūla, tumburu, harītakī, śyāmā, viḍa, saindhava, yavakṣāra and śuṇṭhī- this powder should be mixed with barley decoction or hot water, fried with ghee and then taken. By this gulma with śūla and mass is broken. [41-42]

वचाद्यं चूर्णम्

वचाहरीतकीहिङ्गुसैन्धवं साम्लवेतसम्। यवक्षारं यमानीञ्च पिबेदुष्णेन वारिणा॥ ४३॥
एतद्धि गुल्मनिचयं सशूलं सपरिग्रहम्। भिनत्ति सप्तरात्रेण वह्नेर्वृद्धिं करोति च॥ ४४॥

Vacādya cūrṇa

Vacā, harītakī, hiṅgu, saindhava, amlavetasa, yavakṣāra and yavānī- this powder should be taken with hot water. It breaks the mass of gulma with appendages within a week and also stimulates the digestive fire. [43-44]

सुराप्रयोग:

पिप्पलीपिप्पलीमूलचित्रकाजाजिसैन्धवैः। युक्ता पीता सुरा हन्ति गुल्ममाशु सुदुस्तरम्॥ ४५॥

Pippalyādi cūrṇa

Intake of wine mixed with pippalī, pippalīmūla, citraka, jīraka and saindhava destroys even severe gulma. [45]

नादेय्यादिपानीयक्षार:

नादेयीकुटजार्कशिग्रुबृहतीस्नुग्बिल्वभल्लातकव्याघ्रीकिंशुकपारिभद्रकजटाऽपामार्गनीपाग्निकान्।
वासामुष्ककपाटलाः सलवणा दग्ध्वा जले पाचितं हिङ्ग्वादिप्रतिवापमेतदुदितं गुल्मोदराष्ठीलिषु॥ ४६॥

Nadeyyādi pānīya kṣāra

Nādeyī, kuṭaja, arka, śigru, bṛhatī, snuhī, bilva, bhallātaka, kaṇṭakārī, palāśa, pāribhadra (root), apāmārga, nīpa, citraka, vāsā, muskaka, pāṭalā and salt (saindhava)- these should be burnt and then on boiling with water made into pāniya kṣāra by the prescribed method. It should be taken after adding hiṅgvādi cūrṇa in gulma, udararoga and aṣṭhīlā. [46]

भागोत्तरं हिङ्ग्वादिचूर्णम्

हिङ्ग्वूग्रगन्धाविडशुण्ठ्यजाजीहरीतकीपुष्करमूलकुष्ठम्। भागोत्तरं चूर्णितमेतदिष्टं गुल्मोदराजीर्णविसूचिकासु॥४७॥

Bhāgottara Hiṅgvādi cūrṇa

Hiṅgu, vacā, biḍa, śuṇṭhī, jīraka, harītakī, puṣkaramūla and kuṣṭha- in successively increased parts (are powdered together). It is indicated in gulma, udararoga, indigestion and visūcikā. [47]

त्रिफलादिचूर्णम्

त्रिफलाकाञ्चनक्षीरीसप्तलानीलिनीवचा: । त्रायन्तीहवुषातिक्तात्रिवृत्सैन्धवपिप्पली: ॥ ४८ ॥
पिबेद्विचूर्ण्य मूत्रोष्णवारिमांसरसादिभि: । सर्वगुल्मोदरप्लीहकुष्ठार्श:शोथपीडित: ॥ ४९ ॥

Triphalādi cūrṇa

Triphalā, svarṇakṣīrī, saptalā, nīlinī, vacā, trāyamāṇā, hapuṣā, kaṭukā, trivṛt, saindhava and pippalī- This powder should be taken with cow's urine, hot water, meat-soup etc in all types of gulma, udararoga, spleen enlargent, kuṣṭha, piles and oedema. [48-49]

काङ्कायनगुडिका

शटीं पुष्करमूलञ्च दन्तीं चित्रकमाढकीम् । शृङ्गवेरं वचाञ्चैव पलिकानि समाहरेत् ॥ ५० ॥
त्रिवृताया: पलञ्चैव कुर्य्यात् त्रीणि च हिङ्गुन: । यवक्षारपले द्वे च द्वे पले चाम्लवेतसात् ॥ ५१ ॥
यमान्यजाजीमरिचं धन्याकञ्चेति कार्षिकम् । उपकुञ्च्यजमोदाभ्यां तथा चाष्टमिकामपि ॥ ५२ ॥
मातुलुङ्गरसेनैव गुडिका: कारयेद् भिषक् । तासामेकां पिबेद् द्वे वा तिस्रो वाऽपि सुखाम्बुना ॥ ५३ ॥
अम्लैश्च मद्यैर्यूषैश्च घृतेन पयसाऽथवा । एषा काङ्कायनेनोक्ता गुडिका गुल्मनाशिनी ॥ ५४ ॥
अर्शोहृद्रोगशमनी क्रिमीणाञ्च विनाशिनी । गोमूत्रयुक्ता शमयेत् कफगुल्मं चिरोत्थितम् ॥ ५५ ॥
क्षीरेण पित्तगुल्मञ्च मद्यैरम्लैश्च वातिकम् । त्रिफलारसमूत्रैश्च नियच्छेत् सान्निपातिकम् ।
रक्तगुल्मे च नारीणामुष्ट्रीक्षीरेण पाययेत् ॥ ५६ ॥

Kāṅkāyana guḍikā

Śaṭī, puṣkaramūla, dantī, citraka, āḍhakī, śuṇṭhī and vacā each 40 gm, trivṛt 40 gm, hiṅgu 120 gm, yavakṣāra 80 gm, amlavetasa 80 gm, yavānī, jīraka, marica and dhāyaka each 10 gm, upakuncikā and ajamodā each 20 gm- all this powdered together with mātuluṅga juice is made into pills. The dose is 1-3 pills with warm water, sours, wine, vegetable-soup, ghee or milk. This guḍikā formulated by Kāṅkāyana (hence name as Kāṅkāyana guḍikā) destroys gulma, piles, heart disease and worms. (With different vehicles it acts in different types such as) taken with cow's urine it pacifies chronic kaphagulma, with milk in pittagulma, with wines and sours in vātika gulma, with triphalā decoction and cow's urine it controls gulma caused by tridoṣa and in raktagulma it is given with camel's milk. [50-56]

हवुषाद्यं घृतम्

हवुषाव्योषपृथ्वीकचव्यचित्रकसैन्धवै: । साजाजीपिप्पलीमूलदीप्यकैर्विपचेद् घृतम् ॥ ५७ ॥
सकोलमूलकरसं सक्षीरं दधि दाडिमम् । तत् परं वातगुल्मघ्नं शूलानाहविबन्धनुत् ॥ ५८ ॥

योन्यर्शोग्रहणीदोषश्वासकासारुचिज्वरान्। पार्श्वहृद्बस्तिशूलञ्च घृतमेतद्व्यपोहति॥ ५९॥

Havuṣādya ghṛta

Hapuṣā, trikaṭu, pṛthvīkā, cavya, citraka, saindhava, jīraka, pippalīmūla and yavānī- with this paste ghee should be cooked along with decoction of badara, radish, milk, curd and pomegranate juice (each equal to ghee).

This ghee is an excellent remedy for vātagulma and also efficacious in colic, ānāha, constipation, disorders of female genital tract, piles, grahaṇīroga, bronchial asthma, cough, anorexia, fever, pain in sides, heart and pelvis. [57-59]

पञ्चपलकं घृतम्

पिप्पल्याः पिचुरध्यर्द्धो दाडिमाद् द्विपलं पलम्। धान्यात् पञ्च घृताच्छुण्ठ्याः कर्षं क्षीरं चतुर्गुणम्॥ ६०॥
सिद्धमेतैर्घृतं सद्यो वातगुल्मं चिकित्सति। योनिशूलं शिरःशूलमर्शांसि विषमज्वरान्॥ ६१॥

Pañcapalaka ghṛta

Pippalī 15 gm, dāḍima (fruit) 80 gm, dhānyaka 40 gm, ghee 200 gm, śuṇṭhī 10 gm- with this (paste) along with four times milk ghee is cooked. It alleviates vātagulma, pain in female genital tract, headache, piles and irregular fevers. [60-61]

त्र्यूषणाद्यं घृतम्

त्र्यूषणत्रिफलाधान्यविडङ्गचव्यचित्रकैः। कल्कीकृतैर्घृतं सिद्धं सक्षीरं वातगुल्मनुत्॥ ६२॥

Tryūṣaṇa (trikaṭu), triphalā, dhānyaka, viḍaṅga, cavya and citraka- with this paste ghee cooked along with (four times) milk destroys vātagulma. [62]

त्रायमाणाद्यं घृतम्

जले दशगुणे साध्यं त्रायमाणाचतुःपलम्। पञ्चभागस्थितं पूतं कल्कैः संयोज्य कार्षिकैः॥ ६३॥
रोहिणीकटुकामुस्तत्रायमाणादुरालभा-। कल्कास्त्वामलकीवीराजीवन्तीचन्दनोत्पलैः॥ ६४॥
रसस्यामलकीनाञ्च क्षीरस्य च घृतस्य च। पलानि पृथगष्टाष्टौ दत्त्वा सम्यग्विपाचयेत्॥ ६५॥
पित्तगुल्मं रक्तपित्तं वीसर्पं पैत्तिकं ज्वरम्। हृद्रोगं कामलां कुष्ठं हन्यादेतद् घृतोत्तमम्॥ ६६॥
पलोल्लेखागते माने न द्वैगुण्यमिहेष्यते। चत्वारिंशत्पलं तेन तोयं दशगुणं भवेत्॥ ६७॥

Trāyamāṇādya ghṛta

Trāyamānā 160 gm is decocted in ten times water reduced to one-fifth and strained through a cloth-piece. With this decoction ghee 320 gm is cooked with the paste of kaṭurohiṇī, musta, trāyamāṇa, durālabhā, āmalakī juice and milk each 320 ml.

This excellent ghṛta destroys pittagulma, raktapitta, erysipelas, paittika fever, heart disease, jaundice and leprosy. When there is mention in terms of ' pala ' there is no doubling and as such (in trāyamāṇā decoction) ' ten times ' comes to 40 palas. (1.6 kg) [63]

द्राक्षाद्यं घृतम्

द्राक्षामधुकखर्जूरं विदारीं सशतावरीम्। परूषकाणि त्रिफलां साधयेत् पलसम्मिताम्॥ ६८॥
जलाढके पादशेषे रसमामलकस्य च। घृतमिक्षुरसं क्षीरमभयाकल्कपादिकम्॥ ६९॥
साधयेत् तद् घृतं सिद्धं शर्कराक्षौद्रपादिकम्। प्रयोगात् पित्तगुल्मघ्नं सर्वपित्तविकारनुत्॥
साहचर्य्यादिह पृथग् घृतादेः क्वाथतुल्यता॥ ७०॥

Drākṣādya ghṛta

Drákaṣa, madhuka, kharjūra, vidārī, śatāvarī, paruṣaka and triphalā each 40 gm are boiled in water 2.56 litre reduced to one-fourth. With this decoction, āmalaka juice, sugarcane juice and milk ghee is cooked along with the one-fourth paste of harītakī. This ghee is used after being added with sugar and honey (mixed one-fourth). It alleviates pittagulma as well as all diseases of pitta.

By association , the quantity of ghee etc should be equal to the decoction (e.g. 640 gm). [68-70]

क्षीरषट्पलकं घृतम्

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः। पलिकैः सयवक्षारैः सर्पिःप्रस्थं विपाचयेत्॥ ७१॥
क्षीरप्रस्थेन तत् सर्पिर्हन्ति गुल्मं कफात्मकम्। ग्रहणीपाण्डुरोगघ्नं प्लीहकासज्वरापहम्॥ ७२॥

Kṣīraṣatpalaka ghṛta

Ghee 640 gm is cooked with (the paste of) pippalī, pippalīmūla, cavya, citraka, śuṇṭhī and yavakṣāra along with milk 640 ml.

This ghṛta alleviates kaphaja gulma, grahaṇīroga, anaemia, splenomegaly, cough and fever. [71-72]

धात्रीषट्पलकं घृतम्

धात्रीफलानां स्वरसैः षडङ्गं विपचेद् घृतम्। शर्करासैन्धवोपेतं तद्धितं सर्वगुल्मिनाम्॥ ७३॥

Dhātrīṣaṭpalaka ghṛta

Ghee is cooked with the paste of above six ingredients along with āmalakī juice. At the end, sugar and rocksalt (mixed) are added in one-fourth quantity. It is efficacious in all types of gulma. [73]

भार्गीषट्पलकं घृतम्

षड्भिः पलैर्मगधजाफलमूलचव्यविश्वौषधज्वलनयावककल्कपक्वम्।
प्रस्थं घृतस्य दशमूल्युरुवूकभार्गीक्वाथेऽप्यथो पयसि दध्नि च षट्पलाख्यम्॥ ७४॥
गुल्मोदरारुचिभगन्दरवह्निसादकासज्वरक्षयशिरोग्रहणीविकारान्।
सद्यः शमं नयति ये च कफानिलोत्था भार्ग्याख्यषट्पलमिदं प्रवदन्ति वैद्याः॥ ७५॥

Bhārgīṣatpalaka ghṛta

Ghee 640 gm is cooked with (the paste of) 6 palas (240 gm) of the above six ingredients (combined) along with decoction of daśamūla, eraṇḍa and bhārgī, milk and curd.

This bhārgīṣaṭpala ghṛta is useful in gulma, udararoga, anorexia, fistula-in-ano, sluggish digestion, cough, fever, wasting, head diseases and grahaṇī disorders and other diseases caused by kapha and vāta. [74-75]

भल्लातकघृतम्

भल्लातकानां द्विपलं पञ्चमूलं पलोन्मितम्। साध्यं विदारिगन्धाद्यमापोथ्य सलिलाढके॥ ७६॥
पादावशेषे पूते च पिप्पलीं नागरं वचाम्। विडङ्गं सैन्धवं हिङ्गु यावशूकं विडं शटीम्॥ ७७॥
चित्रकं मधुकं रास्नां पिष्ट्वा कर्षसमान् भिषक्। प्रस्थञ्च पयसो दत्त्वा घृतप्रस्थं विपाचयेत्॥ ७८॥
एतद्भल्लातकं नाम कफगुल्महरं परम्। प्लीहापाण्डवरुचिश्वासग्रहणीकासगुल्मनुत्॥ ७९॥

Bhallātaka-ghṛta I

Bhallātaka 80 gm, pañcamūla (laghu) each 40 gm are crushed and boiled in water 2.56 kg reduced to one-fourth. With this decoction ghee 640 gm is cooked along with the paste of pippalī, śuṇṭhī, vacā, viḍaṅga, saindhava, hiṅgu, yavakṣāra, viḍa, śaṭī, citraka, madhuka and rāsnā each 10 gm and milk 640 ml.

This Bhallātaka-ghṛta is an excellent remedy for kaphagulma. Besides, it alleviates splenomegaly, anaemia, anorexia, bronchial asthma, grahaṇīroga, cough and gulma. [76-79]

रसोनाद्यं घृतम्

रसोनस्वरसे सर्पिः पञ्चमूलरसान्वितम्। सुराऽऽरनालदध्यम्लमूलकस्वरसैः सह॥ ८०॥
व्योषदाडिमवृक्षाम्लयमानीचव्यसैन्धवैः। हिङ्ग्वम्लवेतसाजाजीदीप्यकैश्च पलांशिकैः॥ ८१॥
सिद्धं गुल्मग्रहण्यर्शःश्वासोन्मादक्षयज्वरान्। कासापस्मारमन्दाग्निप्लीहशूलानिलाञ्जयेत्॥ ८२॥

Rasonādya ghṛta

Ghee is cooked with rasona (garlic) juice, decoction of pañcamūla (bṛhat) and mūlaka, wine, sour gruel and sour curd along with the paste of trikaṭu, dādima, vṛkṣāmla, yavānī, cavya, saindhava, hiṅgu, amlavetasa, jīraka and ajamodā each 40 gm.

This ghee alleviates gulma, grahaṇīroga, piles, bronchial asthma, insanity, wasting, fever, cough, epilepsy, sluggish digestion, splenomegaly, colic and other vātika disorders. [80-82]

दन्तीहरीतकी

जलद्रोणे विपक्तव्या विंशतिः पञ्च चाभयाः। दन्त्याःपलानि तावन्ति चित्रकस्य तथैव च॥ ८३॥
तेनाष्टभागशेषेण पचेद्दन्तीसमं गुडम्। ताश्चाभयास्त्रिवृच्चूर्णात् तैलाच्चापि चतुःपलम्॥ ८४॥
पलमेकं कणाशुण्ठ्योः सिद्धे लेहे च शीतले। क्षौद्रं तैलसमं दत्त्वा चातुर्जातपलं तथा॥ ८५॥

ततो लेहपलं लीढ्वा जग्ध्वा चैकां हरीतकीम्। सुखं विरिच्यते स्निग्धो दोषप्रस्थमनामयः ॥ ८६ ॥
प्लीहश्वयथुगुल्मार्शोहृत्पाण्डुग्रहणीगदाः। शाम्यन्त्युत्क्लेशविषमज्वरकुष्ठान्यरोचकाः ॥ ८७ ॥

Dantīharītakī

Harītakī 25 (in number), dantī and citraka each 1 kg are boiled in water 10.24 litre reduced to one-eighth. With jaggery 1 kg, the (above) harītakī fruits, trivṛt powder and oil each 160 gm, pippalī and śuṇṭhī (combined) 40 gm are cooked. When it is completed as linctus honey 160 gm and caturjāta 40 gm are added thereto.

By taking this linctus in the dose of 40 gm after taking one harītakī fruit the uncted patient is purgated in the measure of 540 gm without any complication. Thus splenomegaly, oedema, gulma, piles, cardiac disease, anaemia, grahaṇī disorder, nausea, irregular fever, kuṣṭha and anorexia are pacified. [83-87]

वृश्चीराद्यरिष्टः

वृश्चीरमुरुबूकञ्च वर्षाभ्वं बृहतीद्वयम्। चित्रकञ्च जलद्रोणे पचेत् पादावशेषितम्॥ ८८ ॥
मागधीचित्रकक्षौद्रलिप्तकुम्भे निधापयेत्। मधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतम्॥ ८९ ॥
बुसोषितं दशाहञ्च जीर्णभक्तः पिबेन्नरः। अरिष्टोऽयं जयेद् गुल्ममविपाकं सुदुस्तरम्॥ ९० ॥

Vṛścīrādyāriṣṭa

Vṛścīra (śveta punarnavā), eraṇḍa, punarnavā, bṛhatī, kaṇṭakārī and citraka- these are cooked in water 10.24 litre reduced to one-fourth. This decoction is kept in vessel pasted with pippalī, citraka and honey. Now honey 640 gm and harītakī powder 320 gm are added thereto. This is kept within the heap of grains for ten days.

One should take this ariṣṭa after food is digested. Thus it overcomes gulma as well as severe indigestion. [88-90]

रक्तगुल्म-चिकित्सा

चिकित्साक्रमः

रौधिरस्य च गुल्मस्य गर्भकालव्यतिक्रमे। स्निग्धस्विन्नशरीरायै दद्यात् स्निग्धं विरेचनम्॥ ९१ ॥

Raktagulma

In case of raktagulma, after expiry of the pregnancy period, unctuous purgative should be given to the patient properly prepared with unction and sudation. [91]

शताह्वादिकल्कः

शताह्वाचिरबिल्वत्वग्दारुभार्गीकणोद्भवः। कल्कः पीतो हरेद् गुल्मं तिलक्काथेन रक्तजम्॥ ९२ ॥

Śatāhvādi kalka

Śatāhvā, cirabilva (bark), devadāru, bhārgī and pippalī- the paste of these taken with sesamum decoction destroys raktagulma. [92]

तिलक्वाथः

तिलक्वाथो गुडव्योषहिङ्गुभार्गीयुतो भवेत्। पानं रक्तभवे गुल्मे नष्टे पुष्पे च योषिताम्॥ ९३॥

The decoction of sesamum added with jaggery, trikaṭu, hiṅgu and bhārgī is a good remedy for raktagulma and amenorrhoea. [93]

क्षारादिचूर्णं क्षारघृतञ्च

सक्षारत्र्यूषणं मद्यं प्रपिबेदस्रगुल्मिनी। पलाशक्षारतोयेन सिद्धं सर्पिः पिबेच्च सा॥ ९४॥

One suffering from raktagulma should take wine mixed with yavakṣāra and trikaṭu or ghee cooked with alkaline water of palāśa. [94]

भेदनशोधनाद्युपचारः

उष्णैर्वा भेदयेद्भिन्ने विधिरासृग्दरो हितः। न प्रभिद्येत यद्येवं दद्याद् योनिविशोधनम्॥ ९५॥
क्षारेण युक्तं पललं सुधाक्षीरेण वा पुनः। रुधिरेऽतिप्रवृत्ते तु रक्तपित्तहरी क्रिया॥ ९६॥

Or the hot remedies should be applied for breaking (the gulma) and when it is broken the measures as prescribed in menorrhagia should be adopted. In case it is not broken cleaning measures for vagina are applied such as sesamum powder mixed with palāśakṣāra or snuhī latex (and made into a suppository). If there is excessive bleeding (because of this), measures to check intrinsic haemorrhage are applied. [95-96]

अपरं भल्लातकघृतम्

भल्लातकात् कल्ककषायपक्वं सर्पिः पिबेच्छर्करया विमिश्रम्।
तद्रक्तगुल्मं विनिहन्ति पीतं बलासगुल्मं मधुना समेतम्॥ ९७॥

Bhallātakaghṛta II

Ghee cooked with paste and decoction of bhallātaka should be taken after mixing sugar. It destroys raktagulma and if taken with honey it alleviates kaphagulma. [97]

अपथ्यानि

वल्लूरं मूलकं मत्स्यान् शुष्कशाकानि वैदलम्। न खादेच्चालुकं गुल्मी मधुराणि फलानि च॥ ९८॥

Unwholesome items

Dried meat and vegetable, radish, fish, pulses, tubers and sweet fruits (of ficus trees) should not be taken. [98]

॥ इति गुल्मचिकित्सा॥ ३०॥

Thus ends treatment of gulma. [30]

(Gulma is characterised by a lump in abdomen caused by accumulation of wind or menstrual blood.]

३१. एकत्रिंशोऽध्यायः

CHAPTER XXXI

हृद्रोग-चिकित्सा

Treatment of Hṛdroga (Heart-disease)

वातजहृद्रोगे चिकित्साक्रमः

वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम्। द्विपञ्चमूलीक्वाथेन सस्नेहलवणेन च॥ १॥

In case of heart affected by vāta the patient should be uncted and then vomited with the decoction of daśamūla added with fatty substance and salt. [1]

पिप्पल्यादिचूर्णम्

पिप्पल्येलावचाहिङ्गु यवक्षारोऽथ सैन्धवम्। सौवर्च्चलमथो शुण्ठी अजमोदा च चूर्णितम्॥ २॥
फलधान्याम्लकौलत्थदधिमद्यासवादिभिः। पाययेच्छुद्धदेहञ्च स्नेहेनान्यतमेन वा॥ ३॥

Pippalyādi cūrṇa

Pippalī, elā, vacā, hiṅgu, yavakṣāra, saindhava, sauvarcala, śuṇṭhī and ajamodā- this powder should be given to the patient after proper evacuation with sour fruit juice, sour gruel, kulattha soup, curd, wine, āsava etc or one of the ghṛtas. [2-3]

नागरक्वाथः

नागरं वा पिबेदुष्णं कषायञ्चाग्निवर्द्धनम्। कासश्वासानिलहरं शूलहृद्रोगनाशनम्॥ ४॥

Nāgara-kvātha

Or the warm decoction of nāgara (śuṇṭhī) should be taken which stimulates digestive fire, removes cough, dyspnoea and wind and alleviates colic and heart- disease. [4]

पित्तजहृद्रोगे श्रीपर्ण्यादिक्वाथः

श्रीपर्णीमधुकक्षौद्रसितागुडजलैर्वमेत्। पित्तोपसृष्टे हृदये सेवेत मधुरैः शृतम्।
घृतं कषायांश्चोद्दिष्टान् पित्तज्वरविनाशनान्॥ ५-६॥

Śrīparṇyādi kvātha

If heart is affected by pitta, the patient should be given emesis with the decoction of śrīparṇī (gambhārī) and madhuka added with honey, sugar and jaggery followed by ghṛta processed with sweet drugs and decoction indicated in paittika fever. [5-6]

सामान्योपचारः

शीताः प्रदेहाः परिषेचनानि तथा विरेको हृदि पित्तदुष्टे।
द्राक्षासिताक्षौद्रपरूषकैः स्यात् शुद्धे च पित्तापहमन्नपानम्॥ ७॥

Cold application, bath and purgation with drākṣā, sugar, honey and paruṣaka and after evacuation, pitta-alleviating diet should be served. [7]

यष्ट्याह्वयादिचूर्णम्

पिष्ट्वा पिबेद्वाऽपि सिताजलेन यष्ट्याह्वयं तिक्तकरोहिणीञ्च ॥ ८ ॥

Yaṣṭyāhvayādi cūrṇa

Or the powder of yaṣṭvahvaya (madhuyaṣṭī) and kaṭukā should be taken with water added with sugar. [8]

अर्जुनादिक्षीरयोगा:

अर्जुनस्य त्वचा सिद्धं क्षीरं योज्यं हृदामये। सितया पञ्चमूल्या वा बलया मधुकेन वा ॥ ९ ॥

Milk processed with arjuna bark or pañcamūla (laghu) or balā or madhuka and added with sugar should be given in heart disease. [9]

अर्जुनचूर्णम्

घृतेन दुग्धेन गुडाम्भसा वा पिबन्ति चूर्णं ककुभत्वचो ये।
हृद्रोगजीर्णज्वररक्तपित्तं हत्वा भवेयुश्चिरजीविनस्ते ॥ १० ॥

Arjuna-cūrṇa

Those who use powder of arjuna bark with ghee, milk or jaggery water overcome heart-disease, chronic fever and innate haemorrhage and attain longevity. [10]

कफजहृद्रोगस्य चिकित्साक्रम:

वचानिम्बकषायाभ्यां वान्तं हृदि कफोत्थिते। वातहृद्रोगहृच्चूर्णं पिप्पल्यादि च योजयेत् ॥ ११ ॥

Vacādi kvātha

In heart-disease caused by kapha, one should be vomited with the decoction of vacā or nimba and then advised to take pippalyādi cūrṇa indicated in vātika hṛdroga. [11]

त्रिदोषजहृद्रोगस्य चिकित्साविधि:

त्रिदोषजे लङ्घनमादित: स्यादन्नञ्च सर्वेषु हितं विधेयम्।
हीनाधिमध्यत्वमवेक्ष्य चैव कार्य्यं त्रयाणामपि कर्म शस्तम् ॥ १२ ॥

In heart disease caused by three doṣas, at first, lightening is prescribed followed by the diet wholesome in all the doṣas. The remedial measures should be applied according to the relative predominance of doṣas. [12]

पुष्करमूलचूर्णम्

चूर्णं पुष्करजं लिह्यान्माक्षिकेण समायुतम्। हृच्छूलश्वासकासघ्नं क्षयहिक्कानिवारणम् ॥ १३ ॥

One should take the powder of puṣkaramūla with honey. It alleviates cardiac pai dyspnoea, cough, wasting and hiccough. [13]

गोधूमाद्युत्कारिका

तैलाज्यगुडविपक्वं चूर्णं गोधूमपार्थजं वाऽपि।
पिबति पयोऽनु च योऽसौ भवेज्जितसकलहृदामयः पुरुषः॥ १४॥

One who uses the powder of wheat and arjuna cooked with oil, ghee and jaggery followed by intake of milk overcomes all the disorders of heart. [14]

अपरा गोधूमाद्युत्कारिका

गोधूमककुभचूर्णं छागपयो गव्यसर्पिषा पक्वम्।
मधुशर्करासमेतं शमयति हृद्रोगमुद्धतं पुंसाम्॥ १५॥

Powder of wheat and arjuna cooked with goat's milk and cow's ghee and mixed with honey and sugar pacifies even the severe heart-disease. [15]

हृद्रोगे नागबलार्जुनप्रयोगौ

मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत्। हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम्॥ १६॥
रसायनं परं बल्यं वातजिन्मासयोजितम्। संवत्सरप्रयोगेण जीवेद्वर्षशतं ध्रुवम्॥ १७॥

One should take the powder of nāgabalā root or arjuna bark with milk. It alleviates heart-disease, dyspnoea and cough. If used for a month it acts as rasāyana, promotes strength and pacifies vāta and, on its use for a year, one lives upto hundred years. [16-17]

हिङ्ग्वादिचूर्णम्

हिङ्गूग्रगन्धाविडविश्वकृष्णाकुष्ठाभयाचित्रकयावशूकम्।
पिबेच्च सौवर्च्चलपुष्कराढ्यं यवाम्भसा शूलहृदामयघ्नम्॥ १८॥

Hingvādi cūrṇa

Hiṅgu, vacā, viḍa, śuṇṭhī, pippalī, kuṣṭha, harītakī, citraka, yavakṣāra, sauvarcala and puṣkaramūla should be taken with barley decoction. It alleviates colic and heart-disease. [18]

दशमूलीक्वाथः

दशमूलीकषायन्तु लवणक्षारसंयुतम्। श्वासं कासञ्च हृद्रोगं गुल्मं शूलञ्च नाशयेत्॥ १९॥

The decoction of daśamūla added with salt and yavakṣāra alleviates dyspnoea, cough, heart-disease, gulma and colic. [19]

पाठादिचूर्णम्

पाठां वचां यवक्षारमभयां साम्लवेतसाम्। दुरालभां चित्रकञ्च त्र्यूषणञ्च फलत्रयम्॥ २०॥
शटीं पुष्करमूलञ्च तिन्तिडीकं सदाडिमम्। मातुलुङ्गस्य मूलानि श्लक्ष्णचूर्णानि कारयेत्॥ २१॥
सुखोदकेन मद्यैर्वा चूर्णान्येतानि पाययेत्। अर्शः शूलञ्च हृद्रोगं गुल्मञ्चाशु व्यपोहति॥ २२॥

Pāṭhādi cūrṇa

Pāṭhā, vacā, yavakṣāra, harītakī, amlavetasa, durālabhā, citraka, trikaṭu, triphalā, śaṭī, puṣkaramūla, tintiḍīka, dāḍima, and mātuluṅga (root)- These should be powdered together. It should be taken with warm water or wine. It alleviates piles, colic, heart-disease and gulma. [20-22]

मृगशृङ्गभस्मप्रयोग:

पुटदग्धमश्मपिष्टं हरिणविषाणन्तु सर्पिषा पिबतः।
हृत्पृष्टशूलमुपशममुपयात्यचिरेण कष्टमपि॥ २३॥

One who takes (the bhasma) of stag-horn burnt in puṭa and rubbed in a mortar with ghee overcomes even severe pain of heart and back quickly. [23]

क्रिमिजहृद्रोगस्य चिकित्सा

क्रिमिहृद्रोगिणं स्निग्धं भोजयेत् पिशितौदनम्। दध्ना च पललोपेतं त्र्यहं पश्चाद्विरेचयेत्॥ २४॥
सुगन्धिभिः सलवणैर्योगैः साजाजिशर्करैः। विडङ्गगाढं धान्याम्लं पाययेद्धितमुत्तमम्॥ २५॥
क्रिमिजे च पिबेन्मूत्रं विडङ्गामयसंयुतम्। हृदि स्थिताः पतन्त्येवमधस्तात् क्रिमयो नृणाम्॥
यवान्नं वितरेच्चास्मै सविडङ्गमतः परम्॥ २६॥

Krimija hṛdroga

The patient of heart disease caused by krimi should be uncted and served the diet of meat-rice, curd and sesamum powder for three days. Then purgative should be administered with aromatic and salty formulations added with jīraka and sugar. Sour gruel mixed with profuse quantity of viḍaṅga or cow's urine added with viḍaṅga and kuṣṭha is a good remedy. Thus krimis situated in heart are eliminated from the lower route. Thereafter the diet of barley mixed with viḍaṅga should be used. [24-26]

वल्लभघृतम्

मुख्यं शतार्द्धञ्च हरतकीनां सौवर्च्चलस्यापि पलद्वयञ्च।
पक्वं घृतं वल्लभकेति नाम्ना हृच्छ्वासशूलोदरमारुतघ्नम्॥ २७॥

Vallabha ghṛta

Harītakī fruits 50 (in number) and sauvarcala 80 gm- ghee cooked with these is known as vallabha. It is useful in heart-disease, dyspnoea, colic, udararoga and vātavyādhi. [27]

श्वदंष्ट्राद्यं घृतम्

श्वदंष्ट्रोशीरमञ्जिष्ठाबलाकाश्मर्य्यकत्तृणम्। दर्भमूलं पृथक्पर्णी पलाशर्षभकौ स्थिरा॥ २८॥
पलिकान् साधयेत्तेषां रसे क्षीरे चतुर्गुणे। कल्कैः स्वगुप्तर्षभकमेदाजीवन्तिजीवकैः॥ २९॥
शतावर्य्यृद्धिमृद्वीकाशर्कराश्रावणीबिसैः। प्रस्थः सिद्धो घृताद्वातपित्तहृद्रोगशूलनुत्॥ ३०॥
मूत्रकृच्छ्रप्रमेहार्शःश्वासकासक्षयापहः। धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांसदः॥ ३१॥

Śvadamṣṭrādya ghṛta

Ghee 640 gm is cooked with the decoction of śvadaṃṣṭrā (gokṣura), uśīra, mañjiṣṭhā, balā, gambhārī, kattṛṇa, darbha root, pṛśniparṇi, palāśa, ṛṣabhaka, śālaparṇī– each 40 gm and milk four times along with the paste of kapikacchū, ṛṣabhaka, medā, jīvantī, jīvaka, śatāvarī, ṛddhi, drākṣā, śarkarā, muṇḍī and bisa.

This ghṛta alleviates heart disease caused by vāta-pitta, colic, dysuria, prameha, piles, dyspnoea, cough and wasting. It promotes strength and musculature and is particularly beneficial for those afflicted by excessive physical exercise, sex, alcoholic drinks, weightlifting and wayfaring. [28-31]

बलाद्यं घृतम्

घृतं बलानागबलाऽर्जुनाम्बुसिद्धं सयष्टीमधुपादकल्कम्।
हृद्रोगशूलक्षतरक्तपित्तं कासानिलास्रं शमयत्युदीर्णम्॥ ३२॥

Balādya ghṛta

Ghee cooked with decoction of balā, nāgabalá and arjuna along with one-fourth paste of yaṣṭīmadhu is efficacious in heart diseases, pain, wound, intrinsic haemorrhage, cough and vātarakta. [32]

अर्जुनघृतम्

पार्थस्य कल्कस्वरसेन पक्वं शस्तं घृतं सर्वहृदामयेषु॥ ३३॥

Arjuna-ghṛta

Ghṛta cooked with paste and juice of arjuna is useful in all types of heart-disease. [33]

॥ इति हृद्रोगचिकित्सा॥ ३१॥

Thus ends treatment of hṛdroga. [31]

३२. द्वात्रिंशोऽध्याय:

CHAPTER XXXII

मूत्रकृच्छ्र-चिकित्सा

Treatment of Mūtrakṛcchra (Dysuria)

वातजमूत्रकृच्छ्रे चिकित्साक्रम:

अभ्यञ्जनस्नेहनिरूहवस्तिस्वेदोपनाहोत्तरवस्तिसेकान्।
स्थिराऽऽदिभिर्वातहरैश्च सिद्धान् दद्याद्रसांश्चानिलमूत्रकृच्छ्रे ।। १ ।।

Vātika mūtrakṛcchra

Principle of treatment

In vātika mūtrakṛcchra one should apply anointment, unctuous and non-unctuous enema, fomentation, poultice, urethral douche, sprinkling with water and (in diet) meat-soup processed with laghu pañcamūla and vāta-alleviating drugs. [1]

अमृतादिक्वाथ:

अमृता नागरं धात्रीवाजिगन्धात्रिकण्टकान्। प्रपिबेद्वातरोगार्त्त: सशूलो मूत्रकृच्छ्रवान्।। २ ।।

Amṛtādi (kvātha)

Amṛtā (guḍūcī), śuṇṭhī, āmalaka, āragvadha and gokṣura- this decoction should be used in vātika disorders, pain and difficulty in micturition. [2]

पित्तजमूत्रकृच्छ्रे चिकित्साक्रम:

सेकावगाहा: शिशिरा: प्रदेहा ग्रैष्मो विधिर्वस्तिपयोविकारा: ।
द्राक्षाविदारीक्षुरसैर्घृतैश्च कृच्छ्रेषु पित्तप्रभवेषु कार्य्या: ।। ३ ।।

Paittika mūtrakṛcchra

Principle of treatment

In this type, cold bath, dipping in cold water, cold pastes, other measures prescribed for summer, enema, product of milk, drākṣā, vidārī, sugarcane juice and ghee are useful. [3]

तृणपञ्चमूलम्

कुश: काश: शरो दर्भ इक्षुश्चेति तृणोद्भवम्। पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनम्।। ४ ।।

Tṛṇapañcamūla

Kuśa, kāśa, śara, darbha and ikṣu - this group is known as tṛṇapañcamūla. It is efficacious in dysuria caused by pitta and is diuretic. [4]

UNIVERSITÄT HAMBURG
Institut für Kultur und Geschichte Indiens und Tibets
Neue Rabenstraße 3, 20354 Hamburg

तृणपञ्चमूलसिद्धं क्षीरम्

एतत्सिद्धं पयः पीतं मेढ्रगं हन्ति शोणितम् ॥ ५ ॥

Milk processed with the above alleviates haematuria. [5]

शतावर्यादिः

शतावरीकाशकुशश्वदंष्ट्राविदारिशालीक्षुकशेरुकाणाम् ।
क्वाथं सुसिद्धं मधुशर्करात्तं पिबञ्जयेत् पैत्तिकमूत्रकृच्छ्रम् ॥ ६ ॥

Śatāvaryādi

Śatāvarī, kāśa, kuśa, gokṣura, vidārī, śāli, ikṣu and kaśerauka- this decoction mixed with honey and sugar removes dysuria caused by pitta. [6]

हरीतक्यादिः

हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानाम् ।
क्वाथं पिबेन्माक्षिकसम्प्रयुक्तं कृच्छ्रे सदाहे सरुजे विबन्धे ॥ ७ ॥

Harītakyādi

One should take decoction of harītakī, gokṣura, āragvadha, pāṣāṇabheda and dhanvayāsa mixed with honey in case of dysuria associated with burning pain and obstruction. [7]

गुडामलकप्रयोगः

गुडेनामलकं वृष्यं श्रमघ्नं तर्पणं परम् । पित्तासृग्दाहशूलघ्नं मूत्रकृच्छ्रविनाशनम् ॥ ८ ॥

Intake of jaggery and āmalakī fruits (in equal quantity) is aphrodisiac, refreshing and saturating and alleviates innate haemorrhage, burning sensation, pain and dysuria. [8]

एर्वारुबीजादिचूर्णम्

एर्वारुबीजं मधुकञ्च दार्वीं पैत्ते पिबेत् तण्डुलधावनेन ।
दार्वीं तथैवामलकीरसेन समाक्षिकां पैत्तिकमूत्रकृच्छ्रे ॥ ९ ॥

Ervārubījādi cūrṇa

Ervāru seeds, madhuka and dāruharidrā- This powder should be taken with rice-water in paittika dysuria. Similarly useful is dāruharidrā with āmalakī juice added with honey. [9]

कफजमूत्रकृच्छ्रे चिकित्साक्रमः

क्षारोष्णतीक्ष्णोषणमन्नपानं स्वेदो यवान्नं वमनं निरूहाः ।
तक्रञ्च तिक्तौषधसिद्धतैलान्यभ्यङ्गपानं कफमूत्रकृच्छ्रे ॥ १० ॥

Kaphaja mūtrakṛcchra

Principle of treatment

Food and drink containing alkali, hot, irritant and pungent items, fomentation, barley

preparation, emesis, non-unctuous enema, butter-milk,massage with and intake of the oils processed with bitter drugs are useful. [10]

सूक्ष्मैला-प्रयोग:

मूत्रेण सुरया वाऽपि कदलीस्वरसेन वा। कफकृच्छ्रविनाशाय श्लक्ष्णं पिष्ट्वा त्रुटिं पिबेत्॥ ११॥

One should take fine powder of elā with cow's urine, wine or kadalī juice for alleviating dusyria. [11]

शितिमारक-प्रवालप्रयोगौ

तक्रेण युक्तं शितिमारकस्य बीजं पिबेत् कृच्छ्रविनाशहेतोः।
पिबेत् तथा तण्डुलधावनेन प्रवालचूर्णं कफमूत्रकृच्छ्रे॥ १२॥

For removing dysuria one should take the seeds of śitivāraka with buttermilk or pravāla (coral) cūrṇa (piṣṭi) with rice-water in dysuria caused by kapha. [12]

श्वदंष्ट्रादि:

श्वदंष्ट्राविश्वतोयं वा कफकृच्छ्रविनाशनम्॥ १३॥

Or decoction of gokṣura and śuṇṭhī destroys dysuria caused by kapha. [13]

त्रिदोषजमूत्रकृच्छ्रे चिकित्साक्रम:

सर्वं त्रिदोषप्रभवे तु वायोः स्थानानुपूर्व्या प्रसमीक्ष्य कार्य्यम्।
त्रिभ्योऽधिके प्राग्वमनं कफे स्यात् पित्ते विरेकः पवने तु वस्तिः॥ १४॥

Tridoṣaja mūtrakṛcchra

Principle of treatment

In dysuria caused by the three doṣas, all measures should be applied according to the situation of vāyu. However, in case of the predominance of kapha, pitta and vāta emesis, purgation and enema should be applied respectively. [14]

बृहत्यादि:

बृहतीधावनीपाठायष्टीमधुकलिङ्गकाः। पाचनीयो बृहत्यादिः कृच्छ्रदोषत्रयापहः॥ १५॥

Bṛhatyādi

Bṛhatī, kaṇṭakārī, pāṭhā, yaṣṭīmadhu, and indrayava - this bṛhatyādi is digestive and useful in dysuria and tridoṣa. [15]

अभिघातजमूत्रकृच्छ्रे चिकित्साविधि:

तथाऽभिघातजे कुर्य्यात् सद्योव्रणचिकित्सतम्। मूत्रकृच्छ्रे सदा चास्य कार्य्या वातहरी क्रिया॥ १६॥

In dysuria caused by injury one should treat it like accidental wound. Nevertheless, in dysuria vāta- alleviating measures should always be applied. [16]

पुरीषजमूत्रकृच्छ्रचिकित्सा

स्वेदचूर्णक्रियाऽभ्यङ्गवस्तयः स्युः पुरीषजे ।। १७ ।।

क्राथं गोक्षुरबीजस्य यवक्षारयुतं पिबेत्। मूत्रकृच्छ्रं शकृज्जञ्च पीतं शीघ्रं विनाशयेत् ।। १८ ।।

In dysuria caused by faeces, fomentation, powders anointments and enema should be applied. [17]

One should take decoction of gokṣura seeds added with yavakṣāra. It quickly relieves dysuria caused by faeces. [18]

अश्मरीशर्कराजमूत्रकृच्छ्रचिकित्सा

क्रिया हिता त्वश्मरिशर्करायां या मूत्रकृच्छ्रे कफमारुतोत्थे ।। १९ ।।

In calculus and gravels the measures as prescribed in dysuria caused by kapha and vāta should be adopted. [19]

शुक्रविबन्धजमूत्रकृच्छ्रचिकित्सा

लेह्यं शुक्रविबन्धोत्थे शिलाजतु समाक्षिकम्। वृष्यैर्बृंहितधातोश्च विधेयाः प्रमदोत्तमाः ।। २० ।।

In dysuria caused by retention of semen, śilājatu should be taken with honey followed by the use of aphrodisiacs and later sexual intercourse. [20]

क्षीरप्रयोगः

एलाहिङ्गुयुतं क्षीरं सर्पिर्मिश्रं पिबेन्नरः। मूत्रदोषविशुद्ध्यर्थं शुक्रदोषहरञ्च तत् ।। २१ ।।

One should take milk mixed with elā, hiṅgu and added with ghee for removing the defects of urine and semen. [21]

शोणितमूत्रकृच्छ्रचिकित्सा

यन्मूत्रकृच्छ्रे विहितन्तु पैत्ते तत् कारयेच्छोणितमूत्रकृच्छ्रे ।। २२ ।।

Whatever is prescribed in paittika dysuria should be used in raktaja one. [22]

त्रिकण्टकादिः

त्रिकण्टकारग्वधदर्भकाशदुरालभापर्वतभेदपथ्याः ।

निघ्नन्ति पीता मधुनाऽश्मरीञ्च सम्प्राप्तमृत्योरपि मूत्रकृच्छ्रम् ।। २३ ।।

Triakaṇṭakādi

Trikaṇṭaka (gokṣura), āragvadha, darbha, kāśa, durālabhā, pāṣāṇabheda and harītakī- this decoction added with honey destroys calculus and dysuria even in last stage. [23]

अतिबलाक्वाथः

कषायोऽतिबलामूलसाधितोऽशेषकृच्छ्रजित् ।। २४ ।।

The decoction of atibalā root removes all sorts of dysuria. [24]

एलादिचूर्णं लेहश्च

एलाऽश्मभेदकशिलाजतुपिप्पलीनां चूर्णानि तण्डुलजलैर्लुलितानि पीत्वा।
यद्वा गुडेन सहितान्यवलिह्य सम्यगासन्नमृत्युरपि जीवति मूत्रकृच्छ्री॥२५॥

Elādi cūrṇa and leha

Elā, pāṣāṇabheda, śilājatu and pippalī- this powder should be taken with rice-water or may be taken as linctus with jaggery. It is efficacious even in severe cases of dysuria. [25]

लौहप्रयोग:

अयोरजः श्लक्ष्णपिष्टं मधुना सह योजितम्। मूत्रकृच्छ्रं निहन्त्याशु त्रिभिर्लेहैर्न संशयः॥२६॥

Use of lauhabhasma finely rubbed and mixed with honey destroys dysuria in three doses. [26]

प्रयोगद्वयम्

सितातुल्यो यवक्षारः सर्वकृच्छ्रविनाशनः। निदिग्धिकारसो वाऽपि सक्षौद्रः कृच्छ्रनाशनः॥२७॥

Yavakṣāra with sugar destroys all types of dysuria. Similarly acts the decoction of kaṇṭakārī mixed with honey. [27]

शतावरीघृतं क्षीरञ्च

शतावरीकाशकुशश्वदंष्ट्राविदारिकेक्ष्वामलकेषु सिद्धम्।
सर्पिः पयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यम्॥२८॥

Śatāvaryādi ghṛta

Ghee or milk cooked with śatāvarī, kāśa, kuśa, gokṣura, vidārī, ikṣu and āmalaka and added with sugar is useful in paittika dysuria. [28]

त्रिकण्टकाद्यं घृतम्

त्रिकण्टकैरण्डकुशाद्यभीरुकर्कारुकेक्षुस्वरसेन सिद्धम्।
सर्पिर्गुडार्द्धांशयुतं प्रपेयं कृच्छ्राश्मरीमूत्रविघातहेतोः॥२९॥

Trikaṇṭakādya ghṛta

Ghee is cooked with the decoction of trikaṇṭaka (gokṣura), eraṇḍa, tṛṇapañcamūla, śatāvarī, karkāru and sugarcane juice. This ghee should be added with half (quantity of) jaggery and taken in case of dysuria, calculus and retention of urine. [29]

सुकुमारकुमारकं घृतम्

पुनर्नवामूलतुला दशमूलं शतावरी। बला तुरगगन्धा च तृणमूलं त्रिकण्टकम्॥३०॥
विदारिगन्धा नागाह्वा गुडूच्यतिबला तथा। पृथग्दशपलान् भागाञ्जलद्रोणे विपाचयेत्॥३१॥
तेन पादावशेषेण घृतस्यार्द्धाढकं पचेत्। मधुकं शृङ्गवेरञ्च द्राक्षासैन्धवपिप्पली: ३२॥
द्विपलिकाः पृथग्दद्याद् यमान्याः कुडवं तथा। त्रिंशद् गुडपलान्यत्र तैलस्यैरण्डजस्य च॥३३॥

प्रस्थं दत्त्वा समालोड्य सम्यङ् मृद्वग्निना पचेत्। एतदीश्वरपुत्राणां प्राग्भोजनमनिन्दितम्॥ ३४॥
राज्ञां राजसमानाञ्च बहुस्त्रीपतयश्च ये। मूत्रकृच्छ्रे कटीस्तम्भे तथा गाढपुरीषिणाम्॥ ३५॥
मेढ्रवंक्षणशूले च योनिशूले प्रशस्यते। यथोक्तानाञ्च गुल्मानां वातशोणितिकाश्च ये॥ ३६॥
बल्यं रसायनं शीतं सुकुमारकुमारकम्। पुनर्नवाशते द्रोणो देयोऽन्येषु तथाऽपरः॥ ३७॥

Sukumārakumāraka ghṛta

Punarnavā root 4 kg, daśamūla, śatāvarī, balā, aśvaganghā, tṛṇapañcamūla, gokṣura, śālaparṇī. nāgabalā, guḍūcī and atibalā– each 400 gm are boiled in water 10.24 litre reduced to one-fourth. With this decoction ghee 1.28 kg is cooked on mild fire along with the following drugs and substances- madhuka, śuṇṭhī, drākąā, saindhava and pippalī each 80 gm, yavānī 160 gm, jaggery 1.2 kg and castor oil 640 ml.

This is useful as pre-meal item for the rich people and is indicated in dysuria, lumbago, constipation, pain in genitals or inguinal region, uterine pain, gulma and vātarakta. It is cold, rasāyana and general tonic.

Water 10.24 litre should be given for punarnavā and again for the other drugs. [30-37]

॥ इति मूत्रकृच्छ्र-चिकित्सा॥ ३२॥

Thus ends treatment of mūtrakṛcchra. [32]

३३. त्रयस्त्रिंशोऽध्यायः

CHAPTER XXXIII

मूत्राघात-चिकित्सा

Treatment of Mūtrāghāta (retention and suppression of urine)

क्रियासूत्रम्

मूत्राघातान् यथादोषं मूत्रकृच्छ्रहरैर्जयेत्। वस्तिमुत्तरवस्तिश्च दद्यात् स्निग्धं विरेचनम्॥ १॥

Principle of treatment

Mūtrāghāta should be managed with the remedies as prescribed for mūtrakṛcchra according to doṣa particularly enema,urethral douce and unctuous purgation. [1]

एर्वारुबीजादिकल्कः

कल्कमेर्वारुबीजानामक्षमात्रं ससैन्धवम्। धान्याम्लयुक्तं पीत्वैव मूत्राघाताद्विमुच्यते॥ २॥

One is relieved from mūtrāghāta by taking the paste of ervāru seeds 10 gm mixed with rocksalt along with sour gruel. [2]

क्षारोदकयोगाः लेहाश्च

पाटल्या यावशूकाच्च पारिभद्रात् तिलादपि। क्षारोदकेन मदिरां त्वगेलोषणसंयुताम्।
पिबेद् गुडोपदंशान् वा लिह्यादेतान् पृथक् पृथक्॥ ३॥

Wine added with alkaline water of pāṭali, yavasūka (awn of barley), pāribhadra and tila and mixed with tvak, elā and marica should be taken or they should be taken separately mixed with jaggery as linctus. [3]

योगद्वयम्

त्रिफलाकल्कसयुक्तं लवणञ्चाऽपि पाययेत्। निदिग्धिकायाः स्वरसं पिबेद्वा तान्तवस्रुतम्॥ ४॥

The paste of triphalā mixed with rocksalt should be taken or juice or kaṇṭakārī strained through cloth. [4]

कुङ्कुमकल्कः पाटलाक्षारश्च

जले कुङ्कुमकल्कं वा सक्षौद्रमुषितं निशि। सतैलं पाटलाभस्म क्षारवद्वा परिस्रुतम्॥ ५॥

Or the paste of kuṅkuma kept overnight in water mixed with honey or pāṭalā ash, decanted like alkali, mixed with oil (should be taken). [5]

मूत्राघाते सुराप्रयोगः

सुरां सौवर्च्चलवतीं मूत्राघाती पिबेन्नरः॥ ६॥

One suffering from mūtrāghāta should take wine mixed with sauvarcala. [6]

एलादिचूर्णम्

दाडिमाम्बुयुतं मुख्यमेलाबीजं सनागरम्। पीत्वा सुरां सलवणां मूत्राघाताद्विमुच्यते ॥ ७ ॥

(powder of) elā seeds and śuṇṭhī taken with pomegranate fruit juice or intake of wine added with salt alleviates mūtrāghāta. [7]

योगत्रयम्

पिबेच्छिलाजतु क्राथे गणे वीरतरादिके। रसं दुरालभाया वा कषायं वासकस्य वा ॥ ८ ॥

One should take śilājatu added to decoction of vīratarādi gaṇa or durālabhā or vāsaka. [8]

क्षीरयोगौ

त्रिकण्टकैरण्डशतावरीभिः सिद्धं पयो वा तृणपञ्चमूलैः।
गुडप्रगाढं सघृतं पयो वा रोगेषु कृच्छ्रादिषु शस्यते तत् ॥ ९ ॥

Milk processed with gokṣura, eraṇḍa and śatāvarī or tṛṇapañcamūla added profusly with jaggery and ghee is efficacious in dysuria etc. [9]

नलमूलादिः

नलकुशकाशेक्षुशिफां क्वथितां प्रातः सुशीतलां ससिताम्। पिबतः प्रयाति नियतं मूत्रग्रह इत्युवाच कचः ॥

If one takes decoction of the roots of nala, kuśa, kāśa and ikṣu self-cooled and added with sugar relieves retention of urine thus said Kaca. [10]

गोधावतीमूलक्वाथः

गोधावत्या मूलं क्वथितं घृततैलगोरसैर्मिश्रम्। पीतं निरुद्धमचिराद् भिनत्ति मूत्रस्य सङ्घातम् ॥ ११ ॥

By taking decocted root of godhāpadī mixed with ghee, oil and gorasa (buttermilk), retention of urine is relieved instantaneously. [11]

योगद्वयम्

जलेन खदिरीबीजं मूत्राघाताश्मरीहरम्। मूलं रुद्रजटायाश्च तक्रपीतं तदर्थकृत् ॥ १२ ॥

Intake of khadirī seeds with water or of rudrajaṭā root with buttermilk destroys mūtrāghāta and calculus. [12]

कर्पूरप्रयोगः

मूत्रे विबद्धे कर्पूरचूर्णं लिङ्गे प्रवेशयेत् ॥ १३ ॥

In case of retention of urine, powdered camphor should be introduced into the penis. [13]

चन्दनप्रयोगः

श्रृतशीतपयोऽन्नाशी चन्दनं तण्डुलाम्बुना। पिबेत् सशर्करं श्रेष्ठमुष्णवाते सशोणिते॥ १४॥

In uṣṇavāta with haemorrhage one should take sandal with rice-water mixed with sugar keeping on diet with boiled and cooled milk. [14]

उष्णवातहरौ योगौ

शीतोऽवगाह आवस्तेरुष्णवातनिवारणः। कूष्माण्डकरसश्चापि पीतः सक्षारशर्करः॥ १५॥

Cold tub-bath upto pelvis (urinary bladder) removes uṣṇavāta. Similarly acts the intake of kūṣmāṇḍa juice mixed with yavakṣāra and sugar. [15]

रक्तमूत्रचिकित्सा

स्त्रीणामतिप्रसङ्गेन शोणितं यस्य सिच्यते। मैथुनोपरमश्चास्य बृंहणीयो हितो विधिः॥ १६॥

He who passes blood per urethra due to excessive sexual intercourse is advised complete abstenance from sex and use of promotive therapy. [16]

स्वगुप्तादिलेहः

स्वगुप्ताफलमृद्वीकाकृष्णेक्षुरसितारजः। समांशमर्द्धभागानि क्षीरक्षौद्रघृतानि च॥ १७॥
सर्वं सम्यग्विमथ्याक्षमानं लीढ्वा पयः पिबेत्।
हन्ति शुक्राशयोत्थांश्च दोषान् वन्ध्यासुतप्रदम्॥ १८॥

Svaguptādi leha

Svaguptā (kapikacchū) seeds, drākṣā, pippalī, ikṣuraka and sugar in equal parts powdered, milk, honey and ghee in half parts- all are mixed and churned together. It should be taken in the dose of 10 gm with milk. It removes defects of śukrāsāya (the seat of semen) and promotes virility. [17-18]

चित्रकाद्यं घृतम्

चित्रकं शारिवा चैव बला कालानुशारिवा। द्राक्षाविशालापिप्पल्यस्तथा चित्रफला भवेत्॥ १९॥
तथैव मधुकं दद्याद् दद्यादामलकानि च। घृताढकं पचेदेभिः कल्कैरक्षसमन्वितैः॥ २०॥
क्षीरद्रोणे जलद्रोणे तत् सिद्धमवतारयेत्। शीतं परिस्रुतञ्चैव शर्कराप्रस्थसंयुतम्॥ २१॥
तुगाक्षीर्य्याश्च तत् सर्वं मतिमान् प्रतिमिश्रयेत्। ततो मितं पिबेत् काले यथादोषं यथाबलम्॥ २२॥
वातरेताः पित्तरेताः श्लेष्मरेताश्च यो भवेत्। रक्तरेता ग्रन्थिरेताः पिबेदिच्छन्नरोगिताम्॥ २३॥
जीवनीयञ्च वृष्यञ्च सर्पिरेतन्महागुणम्। प्रजाहितञ्च धन्यञ्च सर्वरोगापहं शिवम्॥ २४॥
सर्पिरेतत् प्रयुञ्जाना स्त्री गर्भं लभतेऽचिरात्। असृग्दोषाञ्जयेच्चापि योनिदोषांश्च संहतान्॥
मूत्रदोषेषु सर्वेषु कुर्य्यादेतच्चिकिसितम्॥ २५॥

Citrakādya ghṛta

Citraka, sārivā, balā, kālānusārivā, drākṣā, viśālā, pippalī, indravāruṇī, madhuka and

āmalaka each 10 gm- with the paste of these ghee 2.56 kg is cooked along with milk and water each 10.24 litre. When cooked sugar and vaṃśalocana each 640 gm are added thereto. It should be taken in proper dose according to time and strength.

It removes all defects of semen and promotes vitality, sexual power, virility and is a panacea. It also removes infertility in woman by destroying the defects of female genital tract and ārtava. It is also useful in urinary disorders. [19-25]

॥ इति मूत्राघातचिकित्सा ॥ ३३ ॥

Thus ends treatment of mūtrāghāta. [33]

३४. चतुस्त्रिंशोऽध्यायः

CHAPTER XXXIV

अश्मरी-चिकित्सा

Treatment of Aśmarī (calculus)

वरुणादिः

वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम्। यवक्षारगुडं दत्त्वा क्वाथयित्वा पिबेद्धिताम्॥
अश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम्॥ १॥

Varuṇādi

One should take the bark of varuṇa decocted alongwith śuṇṭhī and gokṣura and added with yavakṣāra and jaggery. It destroys chronic calculus caused by vāta. [1]

वीरतरादिगणः

वीरतरः सहचरौ दर्भो वृक्षादनी नलः। गुन्द्राकाशकुशावश्मभेदमोरटटुण्टुकाः॥ २॥
कुरुण्टिका च वशिरो वसुकः साग्निमन्थकः। इन्दीवरी श्वदंष्ट्रा च तथा कपोतवक्त्रकः॥ ३॥
वीरतरादिरित्येष गणो वातविकारनुत्। अश्मरीशर्करामूत्रकृच्छ्राघातरुजाऽपहः॥ ४॥

Vīratarādi gaṇa

Vīratara, two (yellow and blue) types of saireyaka, darbha, vṛkṣādanī, balā, gundrā, kuśa, kāsā, pāṣāṇabheda, śyonāka, kuruṇṭikā, vaśira, vasuka, agnimantha, indīvara, gokṣura and kapotavaktraka- this group known as vīratarādi alleviates vātika disorders and destroys calculus, gravels, dysuria and retention of urine. [2-4]

शुण्ठ्यादिः

शुण्ठ्यग्निमन्थपाषाणशिग्रुवरुणगोक्षुरैः। अभयाऽरग्वधफलैः क्वाथं कुर्य्याद्विचक्षणः॥ ५॥
रामठक्षारलवणचूर्णं दत्त्वा पिबेन्नरः। अश्मरीमूत्रकृच्छ्रघ्नं पाचनं दीपनं परम्॥
हन्यात् कोष्ठाश्रितं वातं कट्यूरुगुदमेढ्रगम्॥ ६॥

Śuṇṭhyādi

The wise should prepare decoction of śuṇṭhī, agnimantha, pāṣāṇabheda, śigru, varuṇa, gokṣura, harītakī and āragvadha (fruits) and take it after adding powdered hiṅgu, yavakṣāra and salt. It is an excellent appetiser and digestive and alleviates calculus, dysuria and vāta located in bowels, waist, thighs, rectum and genitals. [5-6]

पाषाणभेदाद्यं घृतम्

पाषाणभेदो वसुको वशिरोऽश्मन्तकस्तथा। शतावरी श्वदंष्ट्रा च बृहती कण्टकारिका॥ ७॥

कपोतवक्त्राऽऽर्त्तगलकाञ्चनोशीरगुल्मकाः। वृक्षादनी भल्लूकश्च वरुणः शाकजं फलम्॥ ८॥
यवाः कुलत्थाः कोलानि कतकस्य फलानि च। ऊषकादिप्रतीवापमेषां क्वाथे शृतं घृतम्।
भिनत्ति वातसम्भूतामश्मरीं क्षिप्रमेव तु॥ ९॥

Pāṣāṇabhedādya ghṛta

Pāṣāṇabheda, vasuka, vaśira, aśmantaka, śatāvarī, gokṣura, bṛhatī, kaṇṭakārī, kapotavaktra, ārtagala, kāñcana, uśīra, gulmaka, vṛksādanī, śyonāka, varuṇa, śāka (fruits), yava, kulattha, kola, kataka (seeds)- with the decoction of these ghee is cooked along with the paste of ūṣakādi gaṇa. It breaks the calculus caused by vāta instantaneously. [7-9]

क्षारादिनिर्देशः

क्षारान् यवागूः पेयानि कषायाणि पयांसि च। भोजनानि च कुर्वीत वर्गेऽस्मिन् वातनाशने॥ १०॥

With this vāta- alleviating group one should make and process alkali, gruels, soups, decoctions, milks and food preparations. [10]

ऊषकादिगणः

ऊषकं सैन्धवं हिङ्गु काशीशद्वयगुग्गुलू। शिलाजतु तुत्थकञ्च ऊषकादिरुदाहृतः॥ ११॥
ऊषकादिः कफं हन्ति गणो मेदोविशोधनः। अश्मरीशर्करामूत्रशूलघ्नः कफगुल्मनुत्॥ १२॥

Ūṣakādi gaṇa

Ūṣaka, saindhava, hiṅgu, two types of kāsīsa, guggulu, śilājatu, tuttha- this group is known as ūṣakādi. It destroys kapha, absorbs medas (fat) and alleviates calculus, gravels, dysuria and gulma caused by kapha. [11-12]

कुशाद्यं घृतम्

कुशःकाशः शरो गुल्म उत्करो मोरटोऽश्मभित्। दर्भो विदारी वाराही शालिमूलं त्रिकण्टकः॥ १३॥
भल्लूकः पाटली पाठा पत्तूरोऽथ कुरुण्टकः। पुनर्नवे शिरीषश्च क्वथितास्तेषु साधितम्॥ १४॥
घृतं शिलाह्वमधुकबीजैरिन्दीवरस्य च। त्रपुषैर्वारुकादीनां बीजैश्चावापितं शृतम्॥
भिनत्ति पित्तसम्भूतामश्मरीं क्षिप्रमेव च॥ १५॥
क्षारान् यवागूः पेयाश्च कषायाणि पयांसि च। भोजनानि प्रकुर्वीत वर्गेऽस्मिन् पित्तनाशने॥ १६॥

Kuśādya ghṛta

Kuśa, kāsā, śara, gulma, itkaṭa, moraṭa, pāṣāṇabheda, darbha, vidārī, vārāhi, paddy (root), gokṣura, śyāmāka, pāṭali, pāṭhā, pattūra, kuraṇṭaka, two types of punarnavā and śirīṣa- with the decoction of these ghee is cooked along with the paste of śilāhva, madhuka and seeds of indīvira, trapuṣa and ervāruka. It breaks quickly the calculus caused by pitta. [13-15]

One should make and process alkali, gruels, soups, decoctions, milk and food preparations with this pitta-alleviating group. [16]

वरुणाद्यं घृतम्

गणे वरुणकादौ च गुग्गुल्वेलाहरेणुभिः। कुष्ठमुस्ताह्वमरिचचित्रकैः ससुराह्वयैः॥ १७॥
एतैः सिद्धमजासर्पिरूषकादिगणेन च। भिनत्ति कफसम्भूतामश्मरीं क्षिप्रमेव तु॥ १८॥
क्षारान् यवागूः पेयाश्च कषायाणि पयांसि च। भोजनानि प्रकुर्वीत वर्गेऽस्मिन् कफनाशने॥ १९॥

Varuṇādya ghṛta

The goat's ghee is processed with the decoction of varuṇādi gaṇa along with the paste of guggulu, elā, hareṇu, kuṣṭha, musta, marica, citraka and devadāru as well as (the drugs of) ūṣakādi gaṇa. It breaks calculus caused by kapha quickly. [17-18]

One should make and process alkali, gruel, liquid gruel, decoction, milk and other food preparations with this kapha- alleviating group. [19]

वरुणादिगणः

वरुणार्त्तगलौ शिग्रुतर्कारीमधुशिग्रुकाः। मेषशृङ्गी करञ्जौ च बिम्ब्यग्निमन्थमोरटाः॥ २०॥
शैरीयौ वशिरो दर्भौ वरी वसुकचित्रकौ। बिल्वश्चैवाजशृङ्गी च बृहतीद्वयमेव च॥ २१॥
वरुणादिगणो ह्येष कफमेदोनिवारणः। विनिहन्ति शिरःशूलं गुल्माभ्यन्तरविद्रधीन्॥ २२॥

Varuṇādi gaṇa

Varuṇa, ārtagala, śigru, madhuyaṣṭī, tarkārī, agnimantha, meṣaśṛṅgī, two types of karañja, bimbī, moraṭa, two types of saireyaka, vaśira, darbha, śatāvarī, vasuka, citraka, bilva, ajaśṛṅgī, bṛhatī and kaṇṭakārī- this varuṇādi gaṇa eliminates kapha and medas and is useful in headache, gulma and internal abscess. [20-22]

वरुणक्वाथः

वरुणत्वक्कषायस्तु पीतस्तु गुडसंयुतः। अश्मरीं पातयत्याशु वस्तिशूलविनाशनः॥ २३॥

Intake of the decoction of varuṇa bark mixed with jaggery eliminates the calculus and pacifies pain in pelvic region. [23]

कूष्माण्डस्वरसप्रयोगः

यवक्षारगुडोपेतं पिबेत् पुष्पफलोद्भवम्। रसं मूत्रविबन्धघ्नं शर्कराऽश्मरिनाशनम्॥ २४॥

One should take the juice of kūṣmāṇḍa mixed with yavakṣāra and jaggery. It removes obstruction in urine and destroys gravels and calculus. [24]

वरुणशिग्रुक्वाथौ

पिबेद्वरुणमूलत्वक्क्वाथं तत्कल्कसंयुतम्। क्वाथश्च शिग्रुमूलोत्थः कदुष्णोऽश्मरिनाशनः॥ २५॥

One (suffering from aśmarī) should take decoction of varuṇa (root and barks) added with its paste. Similarly tepid decoction of śigru (root) destroys calculus. [25]

नागरादि:

नागरवरुणकगोक्षुरपाषाणभेदकपोतवक्त्रजः क्राथः।
गुडयावशूकमिश्रः पीतो हन्त्यश्मरीमुग्राम्॥ २६॥

Nāgarādi

Decoction of nāgara (śuṇṭhī), varuṇa, gokṣura, pāṣāṇabheda and kapotavaktra added with jaggery and yavakṣāra destroys even severe calculus. [26]

वरुणादि:

वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकैः कृतः। कषायः क्षारसंयुक्तः शर्कराश्च भिनत्त्यपि॥ २७॥

Varuṇādi

Varuṇa (bark), pāṣāṇabheda, śuṇṭhī and gokṣura- this decoction added with yavakṣāra breaks even gravels. [27]

श्वदंष्ट्रादि:

श्वदंष्ट्रैरण्डपत्राणि नागरं वरुणत्वचम्। एतत् क्राथवरं प्रातः पिबेदश्मरिभेदनम्॥ २८॥

Śvadaṃṣṭrādi (kvātha)

Śvadaṃṣṭrā (gokṣura), eraṇḍa (leaves), śuṇṭhi, varuṇa (bark)- this decoction should be taken in the morning for destroying calculus. [28]

श्वदंष्ट्रादिकल्क:

मूलं श्वदंष्ट्रेक्षुरकोरुबूकात् क्षीरेण पिष्टं बृहतीद्वयाच्च।
आलोड्य दध्ना मधुरेण पेयं दिनानि सप्ताश्मरिभेदनार्थम्॥ २९॥

Śvadaṃṣṭrādi kalka

The roots of śvadaṃṣṭrā (gokṣura), kokilākṣa, eraṇḍa, and two types of bṛhatī should be pounded with milk and mixed well in sweet curd. This should be taken for a week in order to disintegrate calculus. [29]

त्रयो योगा:

पक्वेक्ष्वाकुरसः क्षारसितायुक्तोऽश्मरीहरः॥ ३०॥
पाषाणरोगपीडां सौवर्च्चलयुता सुरा जयति। तद्वन्मधुदुग्धयुता त्रिरात्रं तिलनालभूतिश्च॥ ३१॥

The juice of mature ikṣvāku mixed with yavakṣāra and sugar destroys calculus. [30]

Wine added with sauvarcala overcomes the pain caused by calculus. Similarly acts the ash of sesamum stalk mixed with honey and milk taken for three days. [31]

एलादिक्वाथ:

एलोपकुल्यामधुकाश्मभेदकौन्तीश्वदंष्ट्रावृषकोरुबूकैः।
क्राथं पिबेदश्मजतुप्रगाढं सशर्करे चाश्मरिमूत्रकृच्छ्रे॥ ३२॥

Elādi

The decoction of elā, pippalī, madhuka, pāṣāṇabheda, hareṇukā, gokṣura, vāsā and eraṇḍa mixed with profuse quantity of śilājatu should be used in calculus, dysuria and gravels. [32]

त्रिकण्टकबीजचूर्णम्

त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतम्। अविक्षीरेण सप्ताहं पिबेदश्मरिनाशनम्॥ ३३॥

The powder of gokṣura seeds mixed with honey and taken with sheep milk for a week destroys calculus. [33]

शुक्राश्मरीचिकित्सा

शुक्राश्मर्य्यान्तु सामान्यो विधिरश्मरिनाशनः॥ ३४॥

In calculus caused by (obstruction of) semen general antilithic measures are adopted. [34]

पाषाणभेदाद्यं चूर्णं घृतञ्च

पाषाणभेदो वृषकः श्वदंष्ट्रा पाठाऽभयाव्योषशटीनिकुम्भाः।
हिंस्राखराश्वासितिमारकाणामेर्वारुकाच्च त्रपुषाच्च बीजम्॥ ३५॥
उपकुञ्चिका हिङ्गु सवेतसाम्लं स्याद् द्वे बृहत्यौ हवुषा वचा च।
चूर्णं पिबेदश्मरिभेदि पक्वं सर्पिश्च गोमूत्रचतुर्गुणं तैः॥ ३६॥

Pāṣāṇabhedādya cūrṇa, ghṛta

Pāṣāṇabheda, vāsā, gokṣura, pāṭhā, harītakī, trikaṭu, śāṭī, dantī, hiṃsrā, ajamodā, seeds of śitivāraka, ervāruka and trapuṣa, upakuñcikā, hiṅgu, amlavetasa, two types of bṛhatī, hapuṣā and vacā- this powder should be taken as lithontriptic. Ghee may also be prepared with these along with four times cow's urine. [35-36]

कुलत्थाद्यं घृतम्

कुलत्थसिन्धूत्थविडङ्गसारं सशर्करं शीतलियावशूकम्।
बीजानि कूष्माण्डकगोक्षुराभ्यां घृतं पचेन्ना वरुणस्य तोये॥ ३७॥
दुःसाध्यसर्वाश्मरिमूत्रकृच्छ्रं मूत्राभिघातञ्च समूत्रबन्धम्।
एतानि सर्वाणि निहन्ति शीघ्रं प्ररूढवृक्षानिव वज्रपातः॥ ३८॥

Kulatthādya ghṛta

Kulattha, saindhava, viḍaṅgasāra, śitalī, yavakṣāra and seeds of kūṣmāṇḍī and gokṣura- with these ghee is cooked along with decoction of varuṇa.

It alleviates all types of calculus, dysuria, retention of urine, obstructed urine as thunderbold fells even the firmly rooted trees. [37-38]

शरादिपञ्चमूल्यादिघृतम्

शरादिपञ्चमूल्या वा कषायेण पचेद् घृतम्। प्रस्थं गोक्षुरकल्केन सिद्धमद्यात् सशर्करम्।।
अश्मरीमूत्रकृच्छ्रघ्नं रेतोमार्गरुजाऽपहम्।। ३९।।

Śarādipañcamulyādi ghṛta

Ghee 540 gm is cooked with decoction of śarādi (tṛṇa) pañcamūla and paste of gokṣura. It is taken after mixing sugar.

It destroys calculus, dysuria and pain in seminal passage. [39]

वरुणघृतम्

वरुणस्य तुलां क्षुण्णां जलद्रोणे विपाचयेत्। पादशेषं परिस्राव्य घृतप्रस्थं विपाचयेत्।। ४०।।
वरुणं कदली बिल्वं तृणजं पञ्चमूलकम्। अमृता चाश्मजं देयं बीजञ्च त्रपुषोद्भवम्।। ४१।।
शतपर्वा तिलक्षारं पलाशक्षारमेव च। यूथिकायाश्च मूलानि कार्षिकाणि समावपेत्।। ४२।।
अस्य मात्रां पिबेज्जन्तुर्देशकालाद्यपेक्षया। जीर्णे तस्मिन् पिबेत् पूर्वं गुडं जीर्णन्तु मस्तुना।।
अश्मरीं शर्कराञ्चैव मूत्रकृच्छ्रञ्च नाशयेत्।। ४३।।

Varuṇaghṛta

Varuṇa (bark) 4 kg is boiled in water 10.24 litre reduced to one quarter. With this decoction ghee 640 gm is cooked along with (the paste of) Varuṇa, kadalī, bilva, tṛṇapañcamūla, guḍūcī, śilājatu, trapuṣa seeds, vaṃśa, tilakṣāra, palāśakṣāra, and ÿuthika roots each 10 gm. It should be taken in proper dose in relation to place, time etc. After it is digested old jaggery should be taken with curd-water before meal. It destroys calculus, gravels and dysuria. [40-43]

वीरतराद्यं तैलम्

ब्रध्नाधिकारे यत् तैलं सैन्धवाद्यं प्रकीर्त्तितम्। तत् तैलं द्विगुणक्षीरं पचेद् वीरतरादिना।। ४४।।
क्वाथेन पूर्वकल्केन साधितन्तु भिषग्वरैः। एतत् तैलवरं श्रेष्ठमश्मरीणां विनाशनम्।। ४५।।
मूत्राघाते मूत्रकृच्छ्रे पिच्चिते मथितेऽपि वा। भग्ने श्रमाभिपन्ने च सर्वथैव प्रशस्यते।। ४६।।

Vīratarādya taila

The saindhavādya taila which is described in the context of bradhna is cooked with double quantity of milk along with the decoction of vīratarādi group and the previous paste (as in saindhavadya taila). This oil is excellent for destroying calculus. Besides, it is also efficacious in retention of urine dysuria, wounds, fractures and exhaustion. [44-46]

वरुणाद्यं तैलम्

त्वक्पत्रपुष्पमूलस्य वरुणात् सत्रिकण्टकात्। कषायेण पचेत् तैलं वस्तिनाऽऽस्थापनेन च।।
शर्कराऽश्मरिशूलघ्नं मूत्रकृच्छ्रविनाशनम्।। ४७।।

Varuṇādya taila

Oil is cooked with the decoction of varuṇa (bark, leaves, flowers and root) and gokṣura and is used as enema. It destroys pain due to gravels and calculus as well as dysuria. [47]

शस्त्रचिकित्सा

शल्यवित् तामशाम्यन्तीं प्रत्याख्याय समुद्धरेत्। पायुक्षिप्ताङ्गुलिभ्यान्तु गुदमेढ्रान्तरे कृताम्॥ ४८॥
सेवन्याः सव्यपार्श्वे च यवमात्रं विमुच्य तु। व्रणं कृत्वाऽश्मरीमात्रं कर्षेत् तां शस्त्रकर्मवित्॥ ४९॥
भिन्ने च वस्तौ त्वज्ञानान्मृत्युः स्यादश्मरीं विना। निःशेषामश्मरीं कुर्य्याद् वस्तौ रक्तश्च निर्हरेत्॥ ५०॥
हृताश्मरीकमुणाम्बु गाहयेद्भोजयेच्च तम्। गुडं मूत्रविशुद्ध्यर्थं मध्वाज्याक्तं व्रणं ततः॥ ५१॥
दद्यात् साज्यां त्र्यहं पेयां साधितां मूत्रशोधिभिः। आदशाहं ततो दद्यात् पयसा मृदुमोदनम्॥ ५२॥
स्वेदयेत् यवमध्वाढ्यं कषायैः क्षालयेद् व्रणम्। प्रपौण्डरीकमजिष्ठायष्टीलोध्रैश्च लेपयेत्॥ ५३॥
एतैश्च सनिशैः सिद्धं घृतमभ्यञ्जने हितम्। अप्रशान्ते तु सप्ताहाद् व्रणे दाहोऽपि चेष्यते॥
दैवान्नाडे तु या लग्ना तां विपाट्यापकर्षयेत्॥ ५४॥

Surgical Operation

The surgeon, in the event of failure of medical measures, should extract it after declaring the seriousness of the situation. (For this) he should insert two fingers in anus and manipulate the calculus between rectum and penis. Then he should make barley-shaped incision on the left side of the suture and extract the calculus completely. In case of rupture of the urinary bladder by ignorance death may ensure. No portion of the calculus should remain in the bladder and blood should not collect therein for that it should be irrigated out.

After the operation, the patient should be given bath with hot water and jaggery to eat for diuresis. Besides, the combination of honey and ghee should be applied to the wound. For three days, he should be given liquid gruel processed with diuretics after adding ghee and thereafter for ten days he should eat soft rice, mixed with barley and honey along with milk. During the peroid, the patient should also be fomented. Then the wound should be washed with decoction and the paste of prapauṇḍarīka, mañjiṣṭhā, madhuyaṣṭī and lodhra is applied thereto. Moreover, ghee cooked with these drugs and haridrā is used for anointment. If the wound does not heal by a week cauterization is recommended. By chance if calculus is still in the bladder, it should be extracted after opening it. [48-54]

॥ इत्यश्मरीचिकित्सा ॥ ३४ ॥

Thus ends treatment of aśmarī. [34]

३५. पञ्चत्रिंशोऽध्यायः

CHAPTER XXXV

प्रमेह-चिकित्सा

Treatment of Prameha

पथ्यम्

श्यामाककोद्रवोद्दालगोधूमचणकाढकी- । कुलत्थाश्च हिता भोज्ये पुराणा मेहिनां सदा ।।
जाङ्गलं तिक्तशाकानि यवान्नञ्च श्रमो मधु ।। १ ।।

Wholesome items

Śyāmāka, kodrava, uddālaka, wheat, bengal gram, ādhakī and kulattha and these too old are wholesome edibles for those suffering from prameha. Besides, meat of wild animals, bitter vegetables, barley products, physical exercise and honey are useful. [1]

अष्टौ क्राथयोगाः

पारिजातजयानिम्बवह्निगायत्रीणां पृथक्। पाठायाः सागुरोः पीताद्वयस्य शारदस्य च ।। २ ।।
जलेक्षुमद्यसिकताशनैर्लवणपिष्टकान् । सान्द्रमेहान् क्रमाद् घ्नन्ति चाष्टौ क्राथाः समाक्षिकाः ।। ३ ।।

Pārijāta, jayā, nimba, citraka, khadira, pāṭhā, aguru, haridrā, dāruharidrā and saptaparna- decoction of these eight drugs singly added with honey alleviates the eight types of prameha e.g. udaka, ikṣu, surā, sikatā, śanaiḥ, lavaṇa, piṣta and sāndra respectively. [2-3]

दूर्वादिः

दूर्वाकशेरुपूतीककुम्भीकप्लवशैवलम् । जलेन क्रथितं पीतं शुक्रमेहहरं परम् ।। ४ ।।

Dūrvādi

Dūrvā, kaśeru, pūtīka, kumbhīka, plava (jalakumbhi) and śaivala- this decoction is an excellent remedy for śukrameha. [4]

त्रिफलादिः

त्रिफलाऽऽरग्वधद्राक्षाकषायो मधुसंयुतः । पीतो निहन्ति फेनाख्यं प्रमेहं नियतं नृणाम् ।। ५ ।।

Triphalādi

Decoction of triphalā, āragvadha and drākṣā added with honey alleviates phenameha. [5]

कफमेहहरा: क्वाथा:

लोध्राभयाकट्फलमुस्तकानां विडङ्गपाठाऽर्जुनधन्वनानाम्।
कदम्बशालार्जुनदीप्यकानां विडङ्गदार्वीधिवशल्यकानाम्॥ ६॥
चत्वार एते मधुना कषाया: कफप्रमेहेषु निषेवणीया:॥ ७॥

(i) Lodhra, harītakī, kaṭphala and mustaka (2) viḍaṅga, pāṭhā, arjuna and dhanvana (3) kadamba, śāla, arjuna and yavānī (4) viḍaṅga, dāruharidrā, dhava and khadira- these four decoctions mixed with honey are useful in prameha caused by kapha. [6-7]

क्वाथपञ्चकम्

अश्वत्थाच्चतुरङ्गुलान्यग्रोधादे: फलत्रयात्। सजिङ्गीरक्तसाराच्च क्राथा: पञ्च समाक्षिका:॥ ८॥
नीलहारिद्रशुक्ताख्यक्षारमाञ्जिष्ठकाह्वयान्। मेहान् हन्यु: क्रमादेते, सक्षौद्रो रक्तमेहजित्॥
क्राथ: खर्जूरकाश्मर्य्यतिन्दुकास्थ्यमृताकृत:॥ ९-१०॥

(Five) decoctions of (1) aśvattha (2) āragvadha (3) nyagradhādi group (4) triphalā and (5) mañjiṣṭhā and raktacandana mixed with honey alleviate nīla, hāridra, śukta, kṣāra and māñjiṣṭha mehas respectively. [8-9]

Kharjūrādi

Decoction of kharjūra, kāśmarya, tinduka (seed) and guḍūcī mixed with honey alleviates raktameha. [10]

चत्वार: कषाया:

लोध्रार्जुनोशीरकुचन्दनानामरिष्टसेव्यामलकाभयानाम्।
धात्र्यर्जुनारिष्टकवत्सकानां नीलोत्पलानां तिनिशार्जुनानाम्॥ ११॥
चत्वार एते विहिता: कषाया: पित्तप्रमेहे मधुसम्प्रयुक्ता:॥ १२॥

Four decoctions e.g. (1) lodhra, arjuna, uśīra and raktacandana (2) nimba, uśīra, āmalaka and harītakī (3) āmalakī, arjuna, nimba and kuṭaja (4) nīlotpala, elā, tiniśa and arjuna mixed with honey are useful in prameha caused by pitta. [11-12]

पाठादिचूर्णम्

छिन्नावह्निकषायेण पाठाकुटजरामठम्। तिक्तां कुष्ठञ्च सञ्चूर्ण्य सर्पिर्मेहे पिबेन्नर:॥ १३॥

Pāṭhādi cūrṇa

Pāṭhā, kuṭaja, hiṅgu, kaṭukā and kuṣṭha- this powder should be suspended in decoction of guḍūcī and citraka and then taken in case of sarpirmeha. [13]

क्षौद्रवसामेहयोश्चिकित्सा

कदरखदिरपूगक्राथं क्षौद्राह्वये पिबेत्। अग्निमन्थकषायन्तु वसामेहे प्रयोजयेत्॥ १४॥

Decoction of kadara, khadira and pūga should be used in madhumeha while that of agnimantha in vasā (meha). [14]

पाठादि:

पाठाशिरीषदु:स्पर्शमूर्वाकिंशुकतिन्दुक- । कपित्थानां भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥ १५ ॥

Pāṭhādi

Decoction of pāṭhā, śirīṣa, dhanvayāsa, mūrvā, palāśa, tinduka and kapittha should be used in hastimeha. [15]

कम्पिल्लपुष्पादय: सप्त योगा:

कम्पिल्लसप्तच्छदशालजानि वैभीतरौहीतककौटजानि ।
कपित्थपुष्पाणि च चूर्णितानि क्षौद्रेण लिह्यात् कफपित्तमेही ॥ १६ ॥

The patient of kapha-pittaja prameha should take powdered flowers of kampilla, saptaparṇa, śāla, bibhītaka, rohitaka, kuṭaja, and kapittha singly mixed with honey. [16]

धात्रीस्वरसस्त्रिफलादिश्च

सर्वमेहहरो धात्र्या रस: क्षौद्रनिशायुत: । कषायस्त्रिफलादारुमुस्तकैरथवा कृत: ॥ १७ ॥

The juice of āmalaka mixed with honey and haridrā destroys all types of prameha. Similarly acts the decoction of triphalā, devadāru and mustaka. [17]

फलत्रिकादिक्वाथ:

फलत्रिकं दारुनिशां विशालां मुस्तञ्च नि:क्वाथ्य निशांशकल्कम् ।
पिबेत् कषायं मधुसम्प्रयुक्तं सर्वप्रमेहेषु समुत्थितेषु ॥ १८ ॥

Phalatrikādi

Phalatrika (triphalā), dāruharidrā, viśālā and musta- this decoction mixed with haridrā powder and honey should be used in all types of prameha. [18]

कटङ्कटेर्यादि:

कटङ्कटेरीमधुकत्रिफलाचित्रकै: समै: । सिद्ध: कषाय: पातव्य: प्रमेहाणां विनाशन: ॥ १९ ॥

Kaṭaṅkaṭeryādi

Decoction of kaṭaṅkaṭerī (dāruharidrā), madhuka, triphalā and citraka, all in equal quantity, alleviates all types of prameha. [19]

त्रिफलादि: कुटजादिश्च

त्रिफलादारुदार्व्यब्दक्वाथ: क्षौद्रेण मेहहा । कुटजासनदार्व्यब्दफलत्रयकृतोऽथवा ॥ २० ॥

Triphalādi and kuṭajādi

Triphalā, devadāru, dāruharidrā and musta- this decoction mixed with honey alleviates prameha. Siimilarly does that of kuṭaja, asana, dāruharidrā, musta and triphalā. [20]

पञ्च योगाः

त्रिफलालौहशिलाजतुपथ्याचूर्णश्च लीढमेकैकम्।
मधुनाऽमरास्वरस इव सर्वान् मेहान् निवारयति॥ २१॥

Triphalā (powder), lohabhasma, śilājatu and harītakī (powder) taken singly with honey alleviates all types of prameha as the juice of guḍūcī. [21]

शालादिचूर्णम्

शालमुष्ककम्पिल्लकल्कमक्षसमं पिबेत्। धात्रीरसेन सक्षौद्रं सर्वमेहहरं परम्॥ २२॥

Śālādi cūrṇa

The paste of śāla, muṣkaka and kampilla 10 gm should be taken with honey and āmalaka juice. It is an excellent remedy for all types of prameha. [22]

न्यग्रोधाद्यं चूर्णम्

न्यग्रोधोदुम्बराश्वत्थश्योनाकारग्वधासनम्। आम्रजम्बूकपित्थश्च पियालः ककुभोः धवः॥ २३॥
मधूको मधुकं लोध्रं वरुणः पारिभद्रकम्। पटोलं मेषशृङ्गी च दन्ती चित्रकमाढकी॥ २४॥
करञ्जत्रिफलाशक्रभल्लातकफलानि च। एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्॥ २५॥
न्यग्रोधाद्यमिदं चूर्णं मधुना सह लेहयेत्। फलत्रयरसश्चानुपिबेन्मूत्रं विशुध्यति॥ २६॥
एतेन विंशतिर्मेहा मूत्रकृच्छ्राणि यानि च। प्रशमं यान्ति योगेन पिडका न च जायते॥
न्यग्रोधाद्यमिदन्त्वत्र चाम्रजम्ब्वस्थि गृह्यते॥ २७॥

Nyagrodhādya cūrṇa

Nyagrodha, udumbara, aśvattha, śyonāka, āragvadha, asana, āmra, jambū, kapittha, priyāla, arjuna, dhava, madhūka, madhuka, lodhra, varuna, pāribhadra, paṭola, meṣaśṛṅgī, dantī, citraka, āḍhakī, karañja, triphalā, kuṭaja (phala) and bhallātaka all in equal parts- this nyagrodhādya cūrna should be taken with honey followed by the decoction of triphalā. By this urine is purified, twenty types of prameha and dysuria are alleviated and diabetic boils are prevented. In this formulation by 'āmra and jambū' their seeds are taken. [23-27]

त्रिकण्टकाद्यं तैलं घृतं यमकञ्च

त्रिकण्टकाश्मन्तकसोमवल्कैर्भल्लातकैः सातिविषैः सलोध्रैः।
वचापटोलार्जुननिम्बमुस्तैर्हरिद्रया दीप्यकपद्मकैश्च॥ २८॥
मञ्जिष्ठपाठाऽगुरुचन्दनैश्च सर्वैः समस्तैः कफवातजेषु।
मेहेषु तैलं विपचेद् घृतन्तु पित्तेषु मिश्रं त्रिषु लक्षणेषु॥ २९॥

Trikaṇṭakādya taila and ghṛta

Trikaṇṭaka (gokṣura), aśmataka, somavalka (śveta khadira), bhallātaka, ativiṣā, lodhra, vacā, paṭola, arjuna, nimba, musta, haridrā, yavānī, padmaka, mañjiṣṭhā, pāṭhā, aguru and candana- with all these oil is cooked for kapha-vātaja mehas, ghee for pittaja and both mixed for trodoṣaja. [28-29]

घृतप्रयोगः

कफमेहहरक्वाथसिद्धं सर्पिः कफे हितम्। पित्तमेहघ्ननिर्य्यूहसिद्धं पित्ते हितं घृतम्॥ ३०॥

Ghee cooked with decoction of drugs alleviating kaphaja meha is useful in kapha while that cooked with pitta– alleviating drugs is wholesome in pitta. [30]

धान्वन्तरं घृतम्

दशमूलं करञ्जौ द्वौ देवदारु हरीतकी। वर्षाभूर्वरुणो दन्ती चित्रकं सपुनर्नवम्॥ ३१॥
सुधानीपकदम्बाश्च बिल्वभल्लातकानि च। शटी पुष्करमूलञ्च पिप्पलीमूलमेव च॥ ३२॥
पृथग्दशपलान् भागांस्ततस्तोयार्मणे पचेत्। यवकोलकुलत्थानां प्रस्थं प्रस्थञ्च दापयेत्॥ ३३॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत्। निचुलं त्रिफला भार्गी रोहिषं गजपिप्पली॥ ३४॥
शृङ्गबेरं विडङ्गानि वचा कम्पिल्लकं तथा। गर्भेणानेन तत्सिद्धं पाययेत्तु यथाबलम्॥ ३५॥
एतद्धान्वन्तरं नाम विख्यातं सर्पिरुत्तमम्। कुष्ठगुल्मप्रमेहांश्च श्वयथुं वातशोणितम्॥ ३६॥
प्लीहोदरं तथाऽर्शांसि विद्रधिं पिडकाश्च याः। अपस्मारं तथोन्मादं सर्पिरेतन्नियच्छति॥ ३७॥
पृथक् तोयार्मणे तत्र पचेद् द्रव्याच्छतं शतम्। शतत्रयाधिके तोयमुत्सर्गक्रमतो मतम्॥ ३८॥

Dhānvantara ghṛta

Daśamūla, two types of karañja, devadāru, harītakī, śveta punarnavā, varuṇa, dantī, citraka, rakta punarnavā, snuhī, nīpa, kadamba, bilva, bhallātaka, śaṭī, puṣkaramūla and pippalīmūla each 400 gm; yava, kola and kulattha each 640 gm- these are boiled in water 10.24 litre reduced to one-fourth. With this decoction ghee 640 gm is cooked along with the paste of nicula, triphalā, bhārgī, rohiṣa, gajapippalī, śuṇṭhī, viḍaṅga, vacā and kampillaka. This dhānvantara ghṛta, an excellent ghṛta formulation, is taken according to strength in kuṣṭha, gulma, prameha, oedema, vātarakta, splenomegaly, piles, abscess, boils, epilepsy and insanity.

The drugs in total quantity of 4 kg should be boiled separately in water 10.24 litre. If the quantity is more than 12 kg water is taken according to general rule e.g. eight times. [31-38]

महादाडिमाद्यं घृतम्

दाडिमस्य फलप्रस्थं यवप्रस्थौ तथैव च। कुलत्थकुडवश्चापि क्वाथयित्वा यथाविधि॥ ३९॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत्। चतुःषष्टिपलं क्षीरं क्षीरतुल्यं वरीरसम्॥ ४०॥
दत्त्वा मृद्वग्निना कल्कैरक्षमात्रायुतैः सह। द्राक्षाखर्जूरकाकोलीदन्तीदाडिमजीरकैः॥ ४१॥
तथा मेदामहामेदात्रिफलादारुरेणुकैः। विशालारजनीदारुहरिद्राविकसाऽऽमयैः॥ ४२॥
क्रिमिघ्नभूमिकूष्माण्डश्यामैलाभिर्भिषग्वरः। पाने भोज्ये प्रदातव्यं सर्वर्त्तुषु च मात्रया॥ ४३॥
प्रमेहान् विंशतिञ्चैव मूत्राघातांस्तथाऽश्मरीम्। कृच्छ्रं सुदारुणञ्चैव हन्यादेतद्रसायनम्॥ ४४॥
शूलमष्टविधं हन्ति ज्वरमष्टविधं तथा। कामलां पाण्डुरोगांश्च हलीमकमथारुचिम्॥ ४५॥
श्लीपदञ्च विशेषेण घृतेनानेन नश्यति। इदमायुष्यमोजस्यं सर्वरोगहरं परम्॥
दाडिमाद्यमिदं नाम अश्विभ्यां निर्मितं महत्॥ ४६॥

Mahādāḍimādya ghṛta

Dāḍima fruit 640 gm, yava 1.28 kg and kulattha 160 gm are decocted reduced to one-quarter. With this decoction ghee 640 gm is cooked along with milk and śatāvarī juice each 2.56 litre adding paste of drākṣā, kharjūra, kākolī, dantī, dāḍima, jīraka, medā, mahāmedā, triphalā, devadāru, reṇukā, viśāla, haridrā, dāruharidrā, mañjiṣṭhā, kuṣṭha, viḍaṅga, vidārī, śyāmā and elā. It should be used in food and drinks in all seasons in proper dose. It is rasāyana and alleviates twenty types of prameha, retention of urine, aśmarī, dysuria, eight types of colic and fever, jaundice, anaemia, halīmaka, anorexia and filaria. This mahādādimādya ghṛta, formulated by Aśvins, promotes vitality and immunity and is a panacea. [39-46]

त्र्यूषणादिगुडिका

त्रिकटुत्रिफलाचूर्णं तुल्यगुग्गुलुना युतम्। गोक्षुरक्वाथसंयुक्तं गुडिकां कारयेद्भिषक् ॥ ४७ ॥
दोषकालबलापेक्षी भक्षयेच्चानुलोमिकीम्। न चात्र परिहारोऽस्ति कर्म कुर्य्याद् यथेप्सितम् ॥
प्रमेहान् मूत्रघातांश्च वातरोगोदराञ्जयेत् ॥ ४८ ॥

Tryūṣaṇādi guḍikā

Powdered tryūṣaṇa (trikaṭu) and triphalā combined with equal guggulu and impregnated with gokṣura decoction are made into pills. It is carminative and alleviates prameha, retention of urine, vātika disorders and udararoga. The dose should be fixed according to disease and strength. There is no restriction of (diet and) movement during its use. [47-48]

शिलाजतुप्रयोग:

शालसारादितोयेन भावितं यच्छिलाजतु। पिबेत् तेनैव संशुद्धदेहः पिष्टं यथाबलम् ॥ ४९ ॥
जाङ्गलानां रसैः सार्द्धं तस्मिञ्जीर्णे च भोजनम्। कुर्यादेवं तुलां यावदुपयुञ्जीत मानवः ॥ ५० ॥
मधुमेहं विहायासौ शर्करामश्मरीं तथा। वपुर्वर्णबलोपेतः शतं जीवत्यनामयः ॥ ५१ ॥

Śilājatu impregnated with the decoction of śālasārādi drugs should be taken with the same after purification of the body according to strength. When it is digested diet with the soup of wild animals should be taken. In this way the total quantity of 4 kg (of śilājatu) should be taken. By this one is freed from diabetes, gravels and calculus and attains healthy and strong life of hundred years. [49-51]

माक्षिकप्रयोग:

माक्षिकं धातुमप्येवं युञ्ज्यादस्याप्ययं गुणः ॥ ५२ ॥

Svarṇamākṣika may also be used in the same way. It has the same effect. [52]

शालसारादिलेह:

शालसारादिवर्गस्य क्वाथे तु घनतां गते। दन्तीलोध्रशिवाकान्तलौहताम्ररजः क्षिपेत् ॥
घनीभूतमदग्धश्च प्राश्य मेहान् व्यपोहति ॥ ५३ ॥

Śālasārādi leha

The decoction of śālasāradi group (of drugs) is heated and when thickened is added with powder of dantī, lodhra, harītakī, kāntalauha-bhasma and tāmrabhasma. On using this thickened and uncharred, one eliminates pramehas. [53]

व्यायामादिप्रयोग:

व्यायामजातमखिलं भजन् मेहान् व्यपोहति। पादत्रच्छत्ररहितो भिक्षाशी मुनिवद् यतः ।। ५४ ।।
योजनानां शतं गच्छेदधिकं वा निरन्तरम्। मेहाञ्जेतुं वने वाऽपि नीवारामलकाशनः ।। ५५ ।।

Diet and movements

One eliminates pramehas by undergoing various physical exercises. In order to overcome pramehas one should live as a mendicant, roam about continuously upto one hundred yojana (1 yojana = 8 miles) or more without shoes and umbrella and keeping on alms or should move about in a forest keeping on the diet of wild rice and āmalaka. [54-55]

प्रमेहपिडकाचिकित्सा

शराविकाद्याः पिडकाः साधयेच्छोथवद्भिषक्। पक्वाश्चिकित्सेद् व्रणवत् तासां पाने प्रशस्यते ।। ५६ ।।
क्वाथं वनस्पतेर्बास्तं मूत्रञ्च व्रणशोधनम्। एलादिकेन कुर्वीत तैलञ्च व्रणरोपणम् ।। ५७ ।।
आरग्वधादिना कुर्य्यात् क्वाथमुद्वर्त्तनानि च। शालसारादिसेकञ्च भोज्यादिञ्च कणादिना ।। ५८ ।।

Prameha-piḍakā (diabetic boils)

The boils śarāvikā etc should be treated like inflammation and when ripened like wounds. Internally decoction of nyagrodhādi drugs or goat's urine which are wound-cleansing should be taken, oil processed with elādi drugs acts as wound-healing. Decoction of āragvadha group should be used internally and externally. The wound should be washed with the decoction of śālasārādi group. Food and drinks should be processed with pippalyādi drugs. [56-58]

अपथ्यम्

सौवीरकं सुरां शुक्तं तैलं क्षीरं घृतं गुडम्। अम्लेक्षुरसपिष्टान्नानूपमांसानि वर्जयेत् ।। ५९ ।।

One should avoid sauvīraka, wine, vinegar, oil, milk, ghee, jaggery, sours, sugarcane juice, preparations of rice-flour and meat of aquatic animals. [59]

प्रमेहमुक्तलक्षणम्

प्रमेहिणां यदा मूत्रमनाविमलपिच्छिलम्। विशदं कटु तिक्तञ्च तदाऽऽरोग्यं प्रचक्षते ।। ६० ।।

When the patient passes urine non-turbid, non-slimy, clear, pungent and bitter (free from sugar), he should be taken as recovered. [60]

कुशावलेह:

वीरणश्च कुशः काशः कृष्णेक्षुः खागडस्तथा। एषां दशपलान् भागाञ्जलद्रोणे विपाचयेत् ।। ६१ ।।

अष्टभागावशेषन्तु कषायमवतारयेत्। खण्डप्रस्थं समालोड्य लेहवत् साधु साधयेत्॥ ६२॥
अवतार्य्य ततः पश्चाच्चूर्णानीमानि दापयेत्। मधुकं कर्कटीबीजं कर्कारुं त्रपुषं तथा॥ ६३॥
शुभाऽऽमलकपत्राणि एलात्वङ्नागकेशरम्। वरुणामृतप्रियङ्गूणां प्रत्येकञ्चाक्षसम्मितम्॥ ६४॥
प्रमेहान् विंशतिञ्चैव मूत्राघातं तथाऽश्मरीम्। वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्॥
हन्त्यरोचकमेवोग्रं तुष्टिपुष्टिकरन्तथा॥ ६५॥

Kuśāvaleha

Vīrana, kuśa, kāśa, kṛṣṇekṣu, khāgaḍa each 400 gm are boiled in water 10.24 litre reduced to one-eighth. Now sugar 640 gm is added to it and cooked till it becomes linctus. When it is cooled powder of madhuka, seeds of karkaṭī, karkāru and trapuṣa, vaṃśalocana, āmalaka, patra, elā, tvak, nāgakeśara, varuṇa, guḍūcī and priyaṅgu each 10 gm are added.

It alleviates twenty types of prameha, retention of urine, calculus, all types of severe anorexia and promotes relish and strength. [61-65]

॥ इति प्रमेहचिकित्सा॥ ३५॥

Thus ends treatment of Prameha. [35]

(Prameha is a group of urinary disorders characterized by polyuria and turbidity of urine including diabetes mellitus.]

३६. षट्त्रिंशोऽध्यायः

CHAPTER XXXVI

स्थौल्य-चिकित्सा

Treatment of Sthaulya (obesity)

पथ्यम्

श्रमचिन्ताव्यवायाध्वक्षौद्रजागरणप्रियः। हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनः॥ १॥
अस्वप्नश्च व्यवायश्च व्यायामं चिन्तनानि च। स्थौल्यमिच्छन् परित्यक्तुं क्रमेणातिप्रवर्द्धयेत्॥ २॥

One interested in physical and mental exercises, sexual intercourse, wayfaring, use of honey and vigil and keeping on diet of barley and śyāmāka destroys even the advanced obesity. One desirous of being freed from obesity should gradually increase the use of non-sleeping, sexual intercourse, physical exercise and mental work. [1-2]

मधूदक-मण्डप्रयोगौ

प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम्। उष्णमन्नस्य मण्डञ्च पिबन् कृशतनुर्भवेत्॥ ३॥

Water added with honey and taken in the morning destroys obesity. One taking hot rice-scum becomes physically thin. [3]

शक्तुप्रयोगः

सचव्यजीरकव्योषहिङ्गुसौवर्चलानलाः। मस्तुना शक्तवः पीता मेदोघ्ना वह्निदीपनाः॥ ४॥

The use of parched grain flour mixed with cavya, jīraka, trikaṭu, hingu, sauvarcala and citraka promotes digestion and alleviates (excess of) fat. [4]

विडङ्गाद्यं चूर्णम्

विडङ्गनागरक्षारकाललोहरजो मधु। यवामलकचूर्णन्तु प्रयोगः स्थौल्यनाशनः॥ ५॥

Viḍaṅgādya cūrṇa

Viḍaṅga, śuṇṭhī, yavakṣāra, lauhabhasma, barley and āmalaka- this powder taken with honey alleviates obesity. [5]

विडङ्गाद्यं लौहम्

विडङ्गत्रिफलामुस्तैः कणानागरकेण च। बिल्वचन्दनह्रीबेरपाठोशीरं तथा बला॥ ६॥
एषां सर्वसमं लौहं जलेन वटिकां कुरु। घृतयोगेन कर्त्तव्या माषैका वटिका शुभा॥ ७॥
अनुपानं प्रयोक्तव्यं लौहस्याष्टगुणं पयः। सर्वमेहहरं बल्यं कान्त्यायुर्बलबर्द्धनम्॥ ८॥
अग्निसन्दीपनकरं वाजीकरणमुत्तमम्। सोमरोगं निहन्त्याशु भास्करस्तिमिरं यथा॥
विडङ्गाद्यमिदं लौहं सर्वरोगनिषूदनम्॥ ९॥

Viḍaṅgādya lauha

Viḍaṅga, triphalā, musta, pippalī, śuṇṭhī, bilva, candana, haridrā, pāṭhā, uśīra- all in equal quantity are powdered. Lauhabhasma equal to the total quantity of the above is mixed with it and pills each one gm are made with water smearing with ghee. After its intake milk eight times of lauhabhasma is taken.

It alleviates all types of prameha, promotes strength, lustre, longevity, digestive power and sexual potency. It also destroys somaroga. This viḍaṅgādya lauha destroys all diseases as the sun destroys darkness. [6-9]

व्योषाद्यशक्तुप्रयोग:

व्योषं विडङ्गशिग्रूणि त्रिफलां कटुरोहिणीम्। बृहत्यौ द्वे हरिद्रे द्वे पाठामतिविषां स्थिराम्॥ १०॥
हिङ्गु केबुकमूलानि यमानीधान्यचित्रकम्। सौवर्च्चलमजाजीञ्च हवुषाञ्चेति चूर्णयेत्॥ ११॥
चूर्णतैलघृतक्षौद्रभागाः स्युर्मानतः समाः। शक्तूनां षोडशगुणो भागः सन्तर्पणं पिबेत्॥ १२॥
प्रयोगात् तस्य शाम्यन्ति रोगाः सन्तर्पणोत्थिताः। प्रमेहा मूढवाताश्च कुष्ठान्यर्शांसि कामलाः॥ १३॥
प्लीहपाण्ड्वामयः शोथो मूत्रकृच्छ्रमरोचकः। हृद्रोगो राजयक्ष्मा च कासश्वासौ गलग्रहः॥ १४॥
क्रिमयो ग्रहणीदोषाः श्वैत्र्यं स्थौल्यमतीव च। नराणां दीप्यते चाग्निः स्मृतिर्बुद्धिश्च वर्द्धते॥ १५॥

Vyoṣādya saktu

Vyoṣa (trikaṭu), viḍaṅga, śigru (seeds), triphalā, kaṭukā, bṛhatī, kaṇṭakārī, haridrā, dāruharidrā, pāṭhā, ativiṣā, śālaparṇī, hiṅgu, kevuka (roots), yavānī, dhānyaka, citraka, sauvarcala, jīraka and hapuṣā- all these are powdered. This powder along with equal quantity of oil, ghee and honey is mixed with parched grain flour sixteen times of the above. This santarpaṇa (saturating drink) should be taken. By its use the diseases caused by over-saturation are pacified. Moreover, it alleviates prameha, confounded vāta, kuṣṭha, piles, jaundice, splenomegaly, aneamia, oedema, dysuria, anorexia, heart disease, consumption, cough, dyspnoea, obstruction in throat, worms, grahaṇī disorders, vitiligo and severe obesity and promotes digestion, memory and intellect. [10-15]

पेयाशिलाजतुप्रयोगौ

बदरीपत्रकल्केन पेया काञ्जिकसाधिता। स्थौल्यनुत् स्यात् साग्निमन्थरसं वाऽपि शिलाजतु॥ १६॥

Liquid gruel processed with the paste of badarī leaves and sour gruel destroys obesity and so does śilājatu taken with agnimantha juice (decoction). [16]

अमृताद्यगुग्गुलुः

अमृतात्रुटिवेल्लवत्सकं कलिपथ्याऽऽमलकानि गुग्गुलुः।
क्रमवृद्धमिदं मधुप्लुतं पिडकास्थौल्यभगन्दरं जयेत्॥ १७॥

Amṛtādya guggulu

Amṛtā (guḍūcī), elā, viḍaṅga, kuṭaja, bibhītaka, harītakī, āmalaka and guggulu- successi-

vely in increasing quantity are mixed with honey. It alleviates boils, obesity and fistula-in-ano. [17]

नवकगुग्गुलु:

व्योषाग्नित्रिफलामुस्तविडङ्गैर्गुग्गुलुं समम्। खादन् सर्वाञ्जयेद्व्याधीन् मेदःश्लेष्मामवातजान्॥ १८॥

Navaka guggulu

Guggulu is mixed with equal quantity of the total of trikaṭu, citraka, triphalā, musta and viḍaṅga. By its use one overcomes all the diseases caused by medas, kapha, āma and vāta. [18]

लौहरसायनम्

गुग्गुलुस्तालमूली च त्रिफला खदिरं वृषम्। त्रिवृताऽलम्बुषा स्नुक् च निर्गुण्डी चित्रकं शटी॥ १९॥
एषां दशपलान् भागांस्तोये पञ्चाढके पचेत्। पादशेषं ततः कृत्वा कषायमवतारयेत्॥ २०॥
पलद्वादशकं देयं तीक्ष्णलोहं सुचूर्णितम्। पुराणसर्पिषः प्रस्थं शर्कराऽष्टपलोन्मितम्॥ २१॥
पचेत् ताम्रमये पात्रे सुशीते चावतारिते। प्रस्थार्द्धं माक्षिकं देयं शिलाजतुपलद्वयम्॥ २२॥
एलात्वचोः पलार्द्धञ्च विडङ्गानि पलत्रयम्। मरिचञ्चाञ्जनं कृष्णा द्विपलं त्रिफलाऽन्वितम्॥ २३॥
पलद्वयन्तु काशीशं श्लक्ष्णचूर्णीकृतं बुधैः। चूर्णं दत्त्वा सुमथितं स्निग्धे भाण्डे निधापयेत्॥ २४॥
ततः संशुद्धदेहस्तु भक्षयेदक्षमात्रकम्। अनुपानं पिबेत् क्षीरं जाङ्गलानां रसं तथा॥ २५॥
वातश्लेष्महरं श्रेष्ठं कुष्ठमेहोदरापहम्। कामलां पाण्डुरोगञ्च श्वयथुं सभगन्दरम्॥ २६॥
मूर्च्छामोहविषोन्मादगराणि विविधानि च। स्थूलानां कर्शनं श्रेष्ठं मेदुरे परमौषधम्॥ २७॥
कर्शयेच्चातिमात्रेण कुक्षिं पातालसन्निभम्। बल्यं रसायनं मेध्यं वाजीकरणमुत्तमम्॥ २८॥
श्रीकरं पुत्रजननं वलीपलितनाशनम्। नाश्नीयात् कदलीं कन्दं काञ्जिकं करमर्दकम्॥
करीरं कारवेल्लञ्च षट् ककाराणि वर्जयेत्॥ २९॥

Lauharasāyana

Guggulu, tālamūlī, triphalā, khadira, vāsā, trivṛt, alambuṣā, snuhī, nirguṇḍī, citraka and śaṭī- each 400 gm are boiled in water 12.8 litre reduced to one-fourth. To this decoction lauha bhasma 480 gm, old ghee 640 gm and sugar 320 gm are added and cooked in a copper vessel. When it is completed and cooled honey 320 gm, śilājatu 80 gm, elā and tvak 20 gm, viḍaṅga 120 gm, marica, añjana, pippalī and triphalā each 80 gm and kāsīsa 80 gm are added, mixed well and kept in an uncted container. The patient, after purification of the body, should take it in the dose of 10 gm followed by intake of milk or meat-soup of wild animals.

It is a good remedy for vāta and kapha and alleviates kuṣṭha, prameha, udararoga, jaundice, anaemia, oedema, fistula-in-ano, fainting, confusion, poison, insanity and various artificial poisons. It is a an excellent remedy for obesity and reduces the abdominal plump to the minimum. It is rasāyana and aphrodisiac and promotes strength, intellect virility and lustre removing wrinkles and greying of hairs. During its use intake of six items

beginning with 'ka' should be avoided such as kadalī (banana), kanda (tubers), kāñjika (sour gruel), karamarda, karīra and kāravella. [19-29]

त्रिफलाद्यं तैलम्

त्रिफलाऽतिविषामूर्वात्रिवृच्चित्रकवासकैः। निम्बारग्वधषड्ग्रन्थासप्तपर्णनिशाद्वयैः ॥ ३० ॥
गुडूचीन्द्रसुराकृष्णाकुष्ठसर्षपनागरैः। तैलमेभिः समं पक्वं सुरसादिरसाप्लुतम् ॥ ३१ ॥
पानाभ्यञ्जनगण्डूषनस्यवस्तिषु योजितम्। स्थूलतालस्यकण्ड्वादीञ्जयेत् कफकृतान् गदान् ॥ ३२ ॥

Triphalādya taila

Triphalā, ativiṣā, mūrvā, trivṛt, citraka, vāsā, nimba, āragvadha, vacā, saptaparṇa, haridrā, dāruharidrā, guḍūcī, indravāruṇī, pippalī, kuṣṭha, sarṣapa and śuṇṭhī- with these oil is cooked along with the juice of surasādi drugs.

It is used in the form of intake, anointment, gargle, snuff and enema in cases of obesity, lassitude, itching etc and other diseases caused by kapha. [30-32]

प्रघर्षप्रदेहौ

शिरीषलामज्जकहेमलोध्रैस्त्वग्दोषसंस्वेदहरः प्रघर्षः। पत्राम्बुलौहाभयचन्दनानि शरीरदौर्गन्ध्यहरः प्रमेहः ॥

Rubbing with the (powder of) śiriṣa, lāmajja, nāgakeśara and lodhra removes skin affection and excessive perspiration. The anointment with patra, bālaka, aguru, uśīra and candana alleviates foul odour of the body. [33]

लेपद्वयम्

वासादलरसो लेपाच्छङ्खचूर्णेन संयुतः। बिल्वपत्ररसो वाऽपि गात्रदौर्गन्ध्यनाशनः ॥ ३४ ॥

Juice of vāsā or bilva leaves mixed with śaṅkhabhasma destroys foul odour of body parts. [34]

हरीतकीलोध्रमरिष्टपत्रं चूतत्वचो दाडिमवल्कलञ्च।
एषोऽङ्गरागः कथितोऽङ्गनानां जङ्घाकषायश्च नराधिपाणाम् ॥ ३५ ॥

Harītakī, lodhra, nimba leaves, āmra (bark) and dāḍima (fruit-rind)- this formulation is a good cosmetic for ladies and thigh-anointment for kings. [35]

हरितालप्रयोगः

गोमूत्रपिष्टं विनिहन्ति कुष्ठं वर्णोज्ज्वलं गोपयसा च युक्तम्।
कक्षादिदौर्गन्ध्यहरं पयोभिः शस्तं वशीकृद्रजनीद्वयेन ॥ ३६ ॥

Orpiment rubbed with cow's urine or milk eliminates foul odour of axilla etc. Moreover, it makes charming on mixing with both types of haridrā and rubbed with cow milk. [36]

देहदौर्गन्ध्यहरयोगाः

चिञ्चापत्रस्वरसम्रक्षितकक्षादियोजितं जयति। दग्धहरिद्रोद्वर्त्तनमचिराद्देहस्य दौर्गन्ध्यम् ॥ ३७ ॥

दलजललघुमलयाभयविलेपनं हरति देहदौर्गन्ध्यम्। विमलारनालसहितं पीतमिवालम्बुषाचूर्णम्।।३८।।

Application of haridrā burnt in puṭa with the juice of tamarind leaves removes foul odour of axilla etc washed priorly. [37]

The paste of patra, bālaka, aguru, candana and uśīra applied to body parts removes foul odour. Similarly acts the intake of alambuṣā powder with sour gruel. [38]

हस्तादिस्रुतौ चिकित्सा

हस्तपादस्रुतौ योज्यो गुग्गुलुः पञ्चतिक्तकः। अथवा पञ्चतिक्ताख्यं घृतं खादेदतन्द्रितः ।। ३९ ।।

If there is discharge from head and feet pañcatikta guggulu or pañcatikta ghṛta should be used carefully. [39]

।। इति स्थौल्यचिकित्सा ।। ३६ ।।

Thus ends treatment of sthaulya. [36]

३७. सप्तत्रिंशोऽध्यायः

CHAPTER XXXVII

उदर-चिकित्सा

Treatment of Udara (abdominal enlargement)

पथ्याहारः

उदरे दोषसम्पूर्णे कुक्षौ मन्दो यतोऽनलः। तस्माद्भोज्यानि योज्यानि दीपनानि लघूनि च॥ १॥
रक्तशालीन् यवान् मुद्गान् जाङ्गलांश्च मृगान् द्विजान्। पयोमूत्रासवारिष्टमधुशीधूंस्तथा पिबेत्॥ २॥

Dietary regimen

As in udararoga, due to filling up of belly by doṣas, digestive fire becomes sluggish the diet prescribed should be appetising and light such as red śāli rice, barley, green gram, (meat of) wild animals and birds, milk, urine, āṣava-ariṣṭa, honey and sīdhu. [1-2]

वातोदरे चिकित्साक्रमः

वातोदरं बलवतः पूर्वं स्नेहैरुपाचरेत्। स्निग्धाय स्वेदिताङ्गाय दद्यात् स्नेहविरेचनम्॥ ३॥
हृते दोषे परिम्लानं वेष्टयेद्वाससोदरम्। तथाऽस्यानवकाशत्वाद् वायुनाध्मापयेत् पुनः॥ ४॥

In vātodara, if the patient is strong, at first, unction should be applied followed by fomentation and then oily purgative should be administered. When the impurity is eliminated and abdomen is reduced, it (abdomen) should be bandaged so that it could not find space and be bloated again. [3-4]

नित्यविरेचनप्रयोगः

दोषातिमात्रोपचयात् स्रोतोमार्गनिरोधनात्। सम्भवत्युदरं तस्मान्नित्यमेनं विरेचयेत्॥ ५॥
विरिक्ते च यथादोषहरैः पेया शृता हिता॥ ६॥

As udararoga arises due to excessive accumulation of doṣa (impurities) and obstruction in channels, the patient should be subjected to purgation daily. [5]

And after purgation liquid gruel processed with grugs alleviating respective doṣa is useful. [6]

तक्रप्रयोगः

वातोदरी पिबेत् तक्रं पिप्पलीलवणान्वितम्। शर्करामरिचोपेतं स्वादु पित्तोदरी पिबेत्॥ ७॥
यमानीसैन्धवाजाजीव्योषयुक्तं कफोदरी। पिबेन्मधुयुतं तक्रं व्यक्ताम्लं नातिपेलवम्॥ ८॥
मधुतैलवचाशुण्ठीशताह्वाकुष्ठसैन्धवैः। युक्तं प्लीहोदरी जातं सव्योषन्तु दकोदरी॥ ९॥
बद्धोदरी तु हवुषा दीप्यकाजाजिसैन्धवैः। पिबेच्छिद्रोदरी तक्रं पिप्पलीक्षौद्रसंयुतम्॥
त्र्यूषणक्षारलवणैर्युक्तन्तु निचयोदरी॥ १०॥

गौरवारोचकार्त्तानां समन्दाग्न्यतिसारिणाम्। तक्रं वातकफार्त्तानाममृतत्वाय कल्पते ॥ ११ ॥

Use of buttermilk

One suffering from vātodara should take buttermilk added with pippalī and salt. The patient of pittodara should take sweet one added with sugar and marica. While that of kaphodara should take the same sour and not too dilute added with yavānī, saindhava, jīraka, trikaṭu and honey. In plīhodara one should take buttermilk added with honey, oil, vacā, śuṇṭhī, śatapuṣpā, kuṣṭha and saindhava while one suffering from jalodara should take the same added with trikaṭu. The patient of baddhodara should take buttermilk added with hapuṣā, yavānī, jīraka, and saindhava; that of chidrodara should take the same added with pippalī and honey and in the udararoga caused by sannipāta buttermilk added with trikaṭu, yavakṣāra and saindhava should be taken. [7-10]

Buttermilk is particularly beneficial in conditions of heaviness, anorexia, loss of digestive fire and diarrhoea and in predominance of vāta and kapha. [11]

वातोदरे क्षीरप्रयोगादि:

वातोदरे पयोऽभ्यासो निरूहो दाशमूलिकः। सोदावर्त्ते वातघ्नाम्लशृतैरण्डानुवासनः ॥ १२ ॥

In vātodara, regular use of milk and non-unctuous enema with daśamūla is useful while in condition of udāvartta unctuous enema with castor oil processed with vāta- alleviating drugs and sours is prescribed. [12]

सामुद्राद्यं चूर्णम्

सामुद्रसौवर्च्चलसैन्धवानि क्षारं यमानीमजमोदकञ्च।
सपिप्पलीचित्रकशृङ्गबेरं हिङ्गुर्विडञ्चेति समानि कुर्य्यात् ॥ १३ ॥
एतानि चूर्णानि घृतप्लुतानि भुञ्जीत पूर्वं कवलं प्रशस्तम्।
वातोदरं गुल्ममजीर्णभुक्तं वायुप्रकोपं ग्रहणीञ्च दुष्टाम् ॥ १४ ॥
अर्शांसि दुष्टानि च पाण्डुरोगं भगन्दरञ्चेति निहन्ति सद्यः ॥ १५ ॥

Sāmudradya cūrṇa

Sāmudra, sauvarcala, saindhava, yavakṣāra, ajamodā, pippalī, citraka, śuṇṭhī, hiṅgu and viḍa- all in equal quantity (should be powdered). This powder mixed with profuse ghee should be taken with the first morsel (of meal).

It is efficacious in vātodara, gulma, indigestion, excessive wind, grahaṇīdoṣa, piles, anaemia and fistula-in-ano. [13-15]

पित्तोदरे चिकित्साक्रम:

पित्तोदरेषु बलिनं पूर्वमेव विरेचयेत्। अनुवास्याबलं क्षीरबस्तिशुद्धं विरेचयेत् ॥ १६ ॥
पयसा सत्रिवृत्कल्केनोरुबूकशृतेन वा। सातलात्रायमाणाभ्यां शृतेनारग्वधेन वा ॥ १७ ॥

In pittodara, if the patient is strong, purgative should be given at the first instance. In weak patient, however, unctuous enema should be given first, followed by milk-enema and lastly purgation. [16]

(The patient should be purgated with) milk (1) mixed with trivṛt paste or (2) cooked with eraṇḍa seeds or (3) sātalā, trāyamāṇā and āragvadha. [17]

कफोदरे चिकित्साक्रमः

कफादुदरिणं शुद्धं कटुक्षारान्नभोजितम्। मूत्रारिष्टायस्कृतिभिर्योजयेच्च कफापहैः॥ १८॥

In kaphodara, the patient should be evacuated first and given the diet mixed with pungents and alkali. Besides, urine, ariṣṭa, ayaskṛti and other kapha- alleviating measures should be applied. [18]

सन्निपातप्लीहोदरयोः क्रियाक्रमः

सन्निपातोदरे सर्वा यथोक्ताः कारयेत् क्रियाः। प्लीहोदरे प्लीहहरं कर्मोदरहरं तथा॥ १९॥

In sannipātodara, all the above measures should be applied. In plīhodara, the measures prescribed for spleen and udararoga are efficacious. [19]

बद्धोदरे चिकित्साक्रमः

स्विन्नाय बद्धोदरिणे मूत्रं तीक्ष्णौषधान्वितम्। सतैललवणं दद्यान्निरूहं सानुवासनम्॥
परिस्रंसीनि चान्नानि तीक्ष्णञ्चैव विरेचनम्॥ २०॥

In baddhodara, the patient is subjected to sudation and then non-unctuous and unctuous enema are given with urine, drastic drugs, oil and salt. The diet should also be carminative and strong purgatives too should be used. [20]

छिद्रोदरस्य चिकित्सा

छिद्रोदरमृते स्वेदाच्छ्लेष्मोदरवदाचरेत्॥ २१॥

Chidrodara should be treated like kaphodara except sudation. [21]

जलोदरे चिकित्साक्रमः

जातं जातं जलं स्राव्यं शास्त्रोक्तं शस्त्रकर्म च। जलोदरे विशेषेण द्रवसेवां विवर्जयेत्॥ २२॥

Jalodara (ascites)

The liquid collected should be drained out by (medical and) prescribed surgical method. The patient should also abstain from taking liquids. [22]

देवदार्वादिलेपः

देवदारुपलाशार्कहस्तिपिप्पलिशिग्रुकैः। साश्वगन्धैः सगोमूत्रैः प्रदिह्यादुदरं शनैः॥ २३॥
मूत्राण्यष्टावुदरिणां सेके पाने च योजयेत्॥ २४॥

Devadārvādi lepa

The paste of devadāru, palāśa (seeds), arka, gajapippalī, śigru and aśvagandhā pounded with cow's urine should be applied to abdomen. [23]

In udararoga, all eight urines should be used for washing and intake. [24]

सहस्रपिप्पलीयोग:

स्नुहीपयोभावितानां पिप्पलीनां पयोऽशनः। सहस्रञ्च प्रयुञ्जीत शक्तितो जठरामयी॥ २५॥

The patient of udararoga should use, according to strength, one thousand pippalī fruits inpregnated with latex of snuhī keeping on milk-diet. [25]

शिलाजत्वादिप्रयोगा:

शिलाजतूनां मूत्राणां गुग्गुलोस्त्रैफलस्य च। स्नुहीक्षीरप्रयोगश्च शमयत्युदरामयम्॥ २६॥

The regular use of śilājatu, urines, triphalā, guggulu and snuhī latex alleviates udararoga. [26]

तण्डुलचूर्णपूप:

स्नुक्पयसा परिभाविततण्डुलचूर्णैर्विनिर्मितः पूपः। उदरमुदारं हिंस्याद् योगोऽयं सप्तरात्रेण॥ २७॥

Cake prepared of rice-flour impregnated with snuhī latex destroys udararoga within a week. [27]

पिप्पलीवर्द्धमानयोग:

पिप्पलीवर्द्धमानं वा कल्पदृष्टं प्रयोजयेत्। जठराणां विनाशाय नास्ति तेन समं भुवि॥ २८॥

Or one should use the pippalī-vardhamāna formulation as described in the chapter on Rasāyana. There is no drug equal to this for alleviation or udararoga. [28]

पटोलाद्यं चूर्णम्

पटोलमूलं रजनीं विडङ्गं त्रिफलात्वचम्। कम्पिल्लकं नीलिनीञ्च त्रिवृताञ्चेति चूर्णयेत्॥ २९॥
षडाद्यान् कार्षिकानन्त्यांस्त्रींश्च द्वित्रिचतुर्गुणान्। कृत्वा चूर्णं ततो मुष्टिं गवां मूत्रेण वै पिबेत्॥ ३०॥
विरिक्तो जाङ्गलरसैर्भुञ्जीत मृदुमोदनम्। मण्डं पेयाञ्च पीत्वा तु सव्योषं षडहं पयः॥ ३१॥
शृतं पिबेत्तु तच्चूर्णं पिबेदेवं पुनः पुनः। हरन्ति सर्वोदराण्येतच्चूर्णं जातोदकान्यपि॥
कामलां पाण्डुरोगञ्च श्वयथुञ्चापकर्षति॥ ३२॥

Paṭolādya cūrṇa

Paṭola (root), haridrā, viḍaṅga, triphalā (pulp), kampillaka, nīlinī and trivṛt- the former six 10 gm each and the latter three successively double, triple and four-fold- should be powdered together. It should be taken in the dose of 40 gm. After purgation, soft rice should be taken with meat-soup of wild animals or rice-scum or liquid gruel followed by diet of milk boiled with trikaṭu for six days and on the seventh day again the above powder should be taken. In this way the therapy should be repeated.

This powder alleviates all the types of udararoga, even with fluid, jaundice, anaemia and oedema. [29-32]

नारायणं चूर्णम्

यमानी हवुषा धान्यं त्रिफला सोपकुञ्चिका। कारवी पिप्पलीमूलमजगन्धा शटी वचा॥ ३३॥
शताह्वा जीरकं व्योषं स्वर्णक्षीरी सचित्रका। द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम्॥ ३४॥
विडङ्गञ्च समांशानि दन्त्या भागत्रयं तथा। त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा॥ ३५॥
एष नारायणो नाम चूर्णो रोगगणापहः। नैनं प्राप्याभिवर्द्धन्ते रोगा विष्णुमिवासुराः॥ ३६॥
तक्रेणोदरिभिः पेयो गुल्मिभिर्बदराम्बुना। आनद्धवाते सुरया वातरोगे प्रसन्नया॥ ३७॥
दधिमण्डेन विट्सङ्गे दाडिमाम्बुभिरर्शसि। परिकर्त्ते च वृक्षाम्लैरुष्णाम्बुभिरजीर्णके॥ ३८॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे। हृद्रोगे ग्रहणीदोषे कुष्ठे मन्दानले ज्वरे॥ ३९॥
दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे। यथाऽर्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम्॥ ४०॥

Nārāyaṇa cūrṇa

Yavānī, hapuṣā, dhānyaka, triphalā, upakuñcikā, kāravī (kṛṣṇajīraka), pippalīmūla, ajamodā, śaṭī, vacā, śatapuṣpā, jīraka, trikaṭu, svarṇakṣīrī, citraka, yavakṣāra, sarjikṣāra, puṣkaramūla, kuṣṭha, five salts and viḍaṅga- all in equal quantity, dantī three parts, trivṛt and viśālā each two parts and sātalā four parts.

This Nārāyaṇa cūrṇa is destroyer of group of diseases, in its presence diseases do not grow as demons before Lord Viṣṇu. It should be taken in udararoga with buttermilk, in gulma with badarakvātha. In ānāha with wine, in vātika diseases with clear wine, in constipation with curd-water, in piles with pomegranate juice, in rectal pain with vṛkṣāmla and in indigestion with hot water. Besides, this purgative should be taken after unction with suitable vehicles in fistula-in-ano, anaemia, cough, dysuria, dyspnoea, obstruction in throat, heart disease, grahaṇī disorders, kuṣṭha, slow digestion, fever and different types of poisoning. [33-40]

दन्त्यादिकल्कः

दन्ती वचा गवाक्षी च शङ्खिनी तिल्वकं त्रिवृत्। गोमूत्रेण पिबेत् कल्कं जठरामयनाशनम्॥ ४१॥

Dantyādi kalka

Dantī, vacā, indravāruṇī, śaṅkhinī, tilvaka and trivṛt- the paste of these drugs should be taken with cow-urine. It destroys udararoga. [41]

माहिषमूत्रपानम्

सक्षीरं माहिषं मूत्रं निराहारः पिबेन्नरः। शाम्यत्यनेन जठरं सप्ताहादिति निश्चयः॥ ४२॥

One should take, in empty stomach, bufallo's urine (40-80 ml) and should keep on diet of milk. By this udararoga is alleviated within a week. [42]

गवाक्ष्यादिकल्कः

गवाक्षीशङ्खिनीदन्तीनीलिनीकल्कसंयुतम्। सर्वोदरविनाशाय गोमूत्रं पातुमाचरेत्॥ ४३॥

Gavākṣyādi kalka

Gavākṣī (indravāruṇī), śaṅkhinī, dantī and nīlinī- the paste of these should be taken with cow-urine in order to destroy all types of udararoga. [43]

अर्कलवणम्

अर्कपत्रं सलवणमन्तर्धूमं दहेत् ततः। मस्तुना तत् पिबेत् क्षारं गुल्मप्लीहोदरापहम्॥ ४४॥

Arka-lavaṇa

Arka leaves mixed with rocksalt are burnt in closed heating. The ash should be taken with curd-water in cases of gulma, splenomegaly and udararoga. [44]

शिग्रुक्वाथः

पीतः प्लीहोदरं हन्यात् पिप्पलीमरिचान्वितः। अम्लवेतससंयुक्तः शिग्रुक्वाथः ससैन्धवः॥ ४५॥

Decoction of śigru added with pippalī, marica, amlavetasa and rocksalt, regularly used, alleviates splenomegaly. [45]

मूलिकोत्पाटनम्

यस्य गृहीत्वा संज्ञां पाटयित्वेन्द्रवारुणीमूलम्। प्रक्षिप्यते सुदूरे शाम्येत् प्लीहोदरं तस्य॥ ४६॥

The root of indravāruṇī is taken out and is thrown to a distance while pronouncing the patient's name. By this the splenomegaly subsides. [46]

रोहितकादिचूर्णम्

रोहितकाभयाक्षोदभावितं मूत्रमम्बु वा। पीतं सर्वोदरप्लीहमेहार्शःक्रिमिगुल्मनुत्॥ ४७॥

Cow-urine or water added with the powder of rohitaka and harītakī should be used. It alleviates all types of udararoga, splenomegaly, prameha, piles, worms and gulma. [47]

देवद्रुमादि-अश्वगन्धाचूर्णद्वयम्

देवद्रुमं शिग्रु मयूरकञ्च गोमूत्रपिष्टामथवाऽश्वगन्धाम्।
पीत्वाऽऽशु हन्यादुदरं प्रवृद्धं क्रिमीन् सशोथानुदरञ्च दूष्यम्॥ ४८॥

(1) Devadāru, śigru and apāmārga or (2) aśvagandhā alone pounded with cow's urine and also taken with the same alleviates advanced udararoga, worms and oedema. [48]

दशमूलादिक्वाथः

दशमूलदारुनागरछिन्नरुहापुनर्नवाऽभयाक्काथः। जयति जलोदरशोथश्लीपदगलगण्डवातरोगाँश्च॥ ४९॥

Daśamūlādi kvātha

Daśamūla, devadāru, śuṇṭhī, guḍūcī, punarnavā and harītakī – this decoction alleviates ascites, oedema, filaria, goitre and vātavyādhi. [49]

हरीतक्यादिक्वाथ:

हरीतकीनागरदेवदारुपुनर्नवाच्छिन्नरुहाकषाय: । सगुग्गुलुर्मूत्रयुतस्तु पेय: शोथोदराणां प्रवर: प्रयोग: ॥

Harītakyādi kvātha

Decoction of harītakī, śuṇṭhī, devadāru, punarnavā and guḍūcī added with guggulu and cow's urine alleviates udararoga with oedema. [50]

योगत्रयम्

एरण्डतैलं दशमूलमिश्रं गोमूत्रयुक्तस्त्रिफलारसो वा।
निहन्ति वातोदरशोथशूलं क्राथ: समूत्रो दशमूलजश्च ॥ ५१ ॥

(1) Castor oil mixed with daśamūla-kvātha (2) triphalā decoction mixed with cow's urine or (3) daśamūla-kvātha added with cow's urine alleviates vātodara, oedema and pain. [51]

पुनर्नवाष्टकक्वाथ:

पुनर्नवानिम्बपटोलशुण्ठीतिक्ताऽमृतादार्वभयाकषाय: ।
सर्वाङ्गशोथोदरकासशूलश्वासान्वितं पाण्डुगदं निहन्ति ॥ ५२ ॥

Punarnavāṣṭaka Kvātha

Punarnavā, nimba, paṭola, śuṇṭhī, kaṭukā, guḍūcī, devadāru and harītakī – this decoction alleviates anaemia associated with general anasarca, udararoga, cough, pain and dyspnoea. [52]

पुनर्नवादि:

पुनर्नवां दार्वभयां गुडूचीं पिबेत् समूत्रां महिषाक्षयुक्ताम्।
त्वग्दोषशोथोदरपाण्डुरोगस्थौल्यप्रसेकोर्ध्वकफामयेषु ॥ ५३ ॥

Punarnavādi

Decoction of punarnava, devadāru, harītakī and guḍūcī added with urine and guggulu is efficacious in skin disease, oedema, udararoga, anaemia, obesity, salivation and kaphaja diseases of the upper part. [53]

त्रयो योगा:

गोमूत्रयुक्तं महिषीपयो वा क्षीरं गवां वा त्रिफलाविमिश्रम्।
क्षीरान्नभुक् केवलमेव गव्यं मूत्रं पिबेद्वा श्वयथूदरेषु ॥ ५४ ॥

In case of udararoga associated with oedema one should use (1) buffalo's milk mixed with cow's urine or (2) cow's milk mixed with triphalā or (3) simply cow's urine keeping on milk-cereal diet. [54]

पुनर्नवादिचूर्णम्

पुनर्नवा दार्वमृता पाठा बिल्वं श्वदंष्ट्रिका। बृहत्यौ द्वे रजन्यौ द्वे पिप्पल्यश्चित्रकं वृषम्॥ ५५॥
समभागानि चूर्णानि गवां मूत्रेण वा पिबेत्। बहुप्रकारं श्वयथुं सर्वगात्रविसारिणम्॥
हन्ति शोथोदराण्यष्टौ व्रणांश्चैवोद्धतानपि॥ ५६॥

Punarnavādi cūrṇa

Punarnavā, devadāru, guḍūcī, pāṭhā, bilva, gokṣura, bṛhatī, kaṇṭakārī, haridrā, dāruharidrā, pippalī, citraka, and vāsā – all in equal parts. This powder should be taken with cow's urine.

It alleviates various types of general anasarca, udararoga, associated with oedema and severe wounds. [55-56]

माणकपायस:

पुराणं माणकं पिष्ट्वा द्विगुणीकृततण्डुलम्। साधितं क्षीरतोयाभ्यामभ्यसेत् पायसन्तु तत्॥ ५७॥
हन्ति वातोदरं शोथं ग्रहणीं पाण्डुतामपि। सिद्धो भिषग्भिराख्यात: प्रयोगोऽयं निरत्यय:॥ ५८॥

Māṇaka-pāyasa

Mature root of māṇaka is pounded and mixed with double quantity of rice which is cooked with milk and water to make pāyasa (milk-rice).

It alleviates vātodara, oedema, grahaṇīroga and anaemia. [57-58]

दशमूलषट्पलकं घृतम्

दशमूलतुलाऽर्द्धरसे सक्षारै: पञ्चकोलकै: पलिकै:। सिद्धं घृतार्द्धपात्रं द्विर्मस्तुकमुदरगुल्मघ्नम्॥ ५९॥

Daśamūlaṣaṭpalaka ghṛta

With decoction of daśamūla 2 kg and yavakṣāra and pañcakola each 40 gm. ghee 320 gm is cooked along with double quantity of curd-water. It destroys udara and gulma. [59]

चित्रकघृतम्

चतुर्गुणे जले मूत्रे द्विगुणे चित्रकात् पले। कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत्॥ ६०॥

Citrakaghṛta

Ghee 640 gm is cooked with four times water and double urine along with the paste of citraka and yavakṣāra each 40 gm. It is efficacious in udararoga. [60]

बिन्दुघृतम्

अर्कक्षीरपले द्वे च स्नुहीक्षीरपलानि षट्। पथ्या कम्पिल्लकं श्यामा सम्पाकं गिरिकर्णिका॥ ६१॥
नीलिनी त्रिवृता दन्ती शङ्खिनी चित्रकन्तथा। एतेषां पलिकैर्भागैर्घृतप्रस्थं विपाचयेत्॥ ६२॥
अथास्य मलिने कोष्ठे बिन्दुमात्रं प्रदापयेत्। यावतोऽस्य पिबेद्बिन्दूंस्तावद्वारान् विरिच्यते॥ ६३॥

कुष्ठं गुल्ममुदावर्त्तं श्वयथुं सभगन्दरम्। शमयत्युदराण्यष्टौ वृक्षमिन्द्राशनिर्यथा॥
एतद्बिन्दुघृतं नाम येनाभ्यक्तो विरिच्यते॥ ६४॥

Bindughṛta

Arka latex 80 gm, snuhī latex 240 gm, harītakī, kampillaka, śyāmā, āragvadha, aparājitā, nīlinī, trivṛt, dantī, śaṅkhinī and citraka each 40 gm – with these ghee 640 gm should be cooked. It should be given one drop to the patient having plenty of faeces in the bowels, the frequency of motions follow the number of drops.

It alleviates kuṣṭha, gulma, udāvartta, oedema, fistula-in-ano and eight types of udararoga as thunderbold destroys tree. This bindughṛta also causes purgation on external anointment. [61-64]

दधिमण्डाद्यं घृतम्

दधिमण्डाढके सिद्धात् स्नुक्क्षीरपलकल्कितात्। घृतप्रस्थात् पिबेन्मात्रां तद्वज्जठरशान्तये॥ ६५॥

Dadhimaṇḍādya ghṛta I

Ghee 640 gm is cooked with curd-water 2.56 kg. alongwith snuhī latex 40 gm. It should be taken in adequate dose in case of udararoga. [65]

अपरं दधिमण्डाद्यं घृतम्

तथासिद्धं घृतप्रस्थं पयस्यष्टगुणे पचेत्। स्नुक्क्षीरपलकल्केन त्रिवृताषट्पलेन च॥ ६६॥

Dadhimaṇḍādya ghṛta II

The above ghṛta 640 gm is cooked with eight times milk and the paste of snuhī latex 40 gm and trivṛt 240 gm. [66]

नाराचघृतम्

स्नुक्क्षीरदन्तीत्रिफलाविडङ्गसिंहीत्रिवृच्चित्रककल्कयुक्तम्।
घृतं विपक्वं कुडवप्रमाणं तोयेन तस्याक्षमथार्द्धकर्षम्॥ ६७॥
पीत्वोष्णमम्भोऽनुपिबेद्विरिक्ते पेयां सुखोष्णां वितरेद्विधिज्ञः।
नाराचमेतज्जठरामयानां युक्त्योपयुक्तं शमनं प्रदिष्टम्॥ ६८॥

Nārāca ghṛta

Ghee 160 gm is cooked with water and the paste of snuhī latex, dantī, triphalā, viḍaṅga, kaṇṭakārī, trivṛt and citraka. It is taken in the dose of 5-10 gm with warm water. After purgation warm liquid gruel should be taken. This nārācaghṛta pacifies all udararogas. [67-68]

॥ इत्युदरचिकित्सा॥ ३७॥

Thus ends treatment of udararoga. [37]

(Udararoga is of eight types including ascites, intestinal obstruction and perforation.)

३८. अष्टात्रिंशोऽध्यायः

CHAPTER XXXVIII

प्लीह-यकृच्चिकित्सा

Treatment of Plīha-yakṛt (spleen and liver)

यमानिकादिचूर्णम्

यमानिकाचित्रकयावशूकषड्ग्रन्थिदन्तीमगधोद्भवानाम् ।
प्लीहानमेतद्विनिहन्ति चूर्णमुष्णाम्बुना मस्तुसुराऽऽसवैर्वा ॥ १ ॥

Yamānikādi cūrṇa

Yavānikā, citraka, yavakṣāra, pippalīmūla, dantī and pippalī – this powder taken with hot water, curd-water, wine or āsava alleviates spleen (enlargement). [1]

पिप्पलीप्रयोगः

पिप्पलीं किंशुकक्षारभावितां सम्प्रयोजयेत् । गुल्मप्लीहापहां वह्निदीपनीञ्च रसायनीम् ॥ २ ॥

Pippalī impregnated with alkali of palāśa destroys gulma and plīha and promotes digestion and strength. [2]

विडङ्गादिक्षारः

विडङ्गाऽऽज्याग्निसिन्धूत्थशक्तून् दग्ध्वा वचाऽन्वितान् ।
पिबेत् क्षीरेण सञ्चूर्ण्य गुल्मप्लीहोदरापहान् ॥ ३ ॥

Viḍaṅgādi kṣāra

Viḍaṅga, citraka, saindhava, parched grain flour and vacā are mixed together with ghee and burnt in closed heating. The kṣāra (ash) so prepared should be taken with milk. It destroys gulma, plīha and udararoga. [3]

योगद्वयम्

तालपुष्पभवः क्षारः सगुडः प्लीहनाशनः । रोहीतकाभयाक्वाथः कणाक्षारसमन्वितः ॥ ४ ॥

(Similarly) the kṣāra made of tāla flower and mixed with jaggery destroys splenomegaly. So does the decoction of rohitaka and harītakī mixed with the kṣāra of pippalī. [4]

पूतीकक्षारः

क्षारं वा विडकृष्णाभ्यां पूतीकस्याम्लनिस्रुतम् । प्लीहयकृत्प्रशान्त्यर्थं पिबेत् प्रातर्यथाबलम् ॥ ५ ॥

The kṣāra of pūtīka mixed with that of viḍa and pippalī and decocted in sour gruel should be taken in morning to overcome (the enlargement of) spleen and liver. [5]

शुक्तिक्षार: क्षीरपिप्पली च

पातव्यो युक्तित: क्षार: क्षीरेणोदधिशुक्तिज: । पयसा वा प्रयोक्तव्या: पिप्पल्य: प्लीहशान्तये ॥ ६ ॥

In order to overcome plīha the alkali of the pearl-oyster should be taken with milk or pippalī is taken in the same way. [6]

भल्लातकादिमोदक:

भल्लातकाभयाऽजाजीगुडेन सह मोदक: । सप्तरात्रान्निहन्त्याशु प्लीहानमतिदारुणम् ॥ ७ ॥

Bhallātakādi modaka

Modaka prepared with bhallātaka, harītakī, jīraka and jaggery alleviates splenomegaly, even if severe, by a week. [7]

शोभाञ्जनक्वाथ: यवक्षारप्रयोगश्च

शोभाञ्जनकनिर्य्यूहं सैन्धवाग्निकणाऽन्वितम् । पलाशक्षारयुक्तं वा यवक्षारं प्रयोजयेत् ॥ ८ ॥

Decoction of śobhāñjana mixed with saindhava, citraka and pippalī should be used or one may use yavakṣāra mixed with palāśakṣāra. [8]

यकृति चिकित्साक्रम:

तिक्तान् सलवणांश्चैव घृतं षट्पलकं तथा । प्लीहोद्दिष्टां क्रियां सर्वां यकृत: सम्प्रयोजयेत् ॥ ९ ॥

Sesamum with rocksalt or ṣaṭpalaka ghṛta should be used.

Generally all the measures prescribed for plīha should be used for yakṛt as well. [9]

लशुनादियोग:

लशुनं पिप्पलीमूलमभयाश्चैव भक्षयेत् । पिबेद्गोमूत्रगण्डूषं प्लीहरोगविमुक्तये ॥ १० ॥

Laśunādi yoga

Laśuna, pippalīmūla and harītakī, mixed together, should be taken with cow's urine to alleviate splenomegaly. [10]

शरपुङ्खाकल्क:

प्लीहजिच्छरपुङ्खाया: कल्कस्तक्रेण सेवित: । शरपुङ्खैव सञ्चर्व्य जग्धा पेयाभुजाऽथवा ॥ ११ ॥

The paste of śarapuṅkhā (root) taken with buttermilk or chewing the (root of) the same followed by intake of liquid gruel alleviates splenomegaly. [11]

शार्ङ्गेष्ठाक्वाथ: पक्वाम्ररसश्च

शार्ङ्गेष्ठानिर्य्यूह: ससैन्धवस्तिन्तिडीकसम्मिश्र: । प्लीहव्युपरमयोग: पक्वाम्ररसोऽथवा समधु: ॥ १२ ॥

The decoction of śārṅgeṣṭā mixed with saindahva and tintiḍīka is the formulation for alleviation of splenomegaly. Similarly is the juice of ripe mango mixed with honey. [12]

रोहीतकादिचूर्णम्

रोहीतकाभयाक्षोदभावितं मूत्रमम्बु वा। पीतं सर्वोदरप्लीहमेहार्शःक्रिमिगुल्मनुत्॥ १३॥

Rohītakādi cūrṇa

Powder of rohitaka and harītakī mixed with cow's urine or water should be taken to alleviate all types of udararoga, plīha, prameha, piles, worms and gulma. [13]

शिराव्यधनम्

दध्ना भुक्तवतो वामबाहुमध्ये शिरां भिषक्। विध्येत् प्लीहविनाशाय यकृन्नाशाय दक्षिणे॥
प्लीहानं मर्दयेद्गाढं दुष्टरक्तप्रवृत्तये॥ १४॥

Venesection

After feeding curd to the patient vein in the mid-arm should be punctured of the left side in spleen and of the right one in liver. At the same time, the spleen should be pressed well to remove the impure blood. [14]

माणाद्यगुडिका

माणमार्गामृतावासास्थिराचित्रकसैन्धवम्। नागरं तालरण्डश्च प्रत्यग्रन्तु त्रिकार्षिकम्॥ १५॥
विडसौवर्चलक्षारपिप्पल्यश्चापि कार्षिकाः। एतच्चूर्णीकृतं सर्वं गोमूत्रस्याढके पचेत्॥ १६॥
सान्द्रीभूते गुडीं कुर्य्याद्दत्त्वा त्रिपलमाक्षिकम्। यकृत्प्लीहोदरहरो गुल्मार्शोग्रहणीहरः॥
योगः परिकरो नाम्ना अग्निसन्दीपनः परः॥ १७॥

Māṇādya guḍikā

Māṇa, apāmārga, guḍūcī, vāsā, śālaparṇī, citraka, saindhava, śuṇṭhī, viḍa, sauvarcala, yavakṣāra and pippalī each 10 gm– all these powdered should be cooked with cow's urine 2.56 litre till it becomes thick. Then, after adding honey 120 gm, pills should be made.

This formulation known as 'parikara' is an excellent promoter of digestive fire. [15-17]

पिप्पल्यादिचूर्णम्

पिप्पली नागरं दन्ती समांशं द्विगुणाभयम्। चूर्णं पीतं विडार्द्धांशं प्लीहघ्नमुष्णवारिणा॥ १८॥

Pippalyādi cūrṇa

Pippalī, śuṇṭhī, dantī equal parts, harītakī two parts and viḍa 1/2 part– this powder taken with hot water destroys splenomegaly. [18]

पिप्पलीवर्द्धमानम्

क्रमवृद्ध्या दशाहानि दशपैप्पलिकं दिनम्। वर्द्धयेत् पयसा सार्द्धं तथैवापनयेत् पुनः॥ १९॥
जीर्णे जीर्णे च भुञ्जीत षष्टिकं क्षीरसर्पिषा। पिप्पलीनां सहस्रस्य प्रयोगोऽयं रसायनः॥ २०॥
दशपैप्पलिकः श्रेष्ठो मध्यमः षट् प्रकीर्त्तितः। यस्त्रिपिप्पलिपर्य्यन्तः प्रयोगः सोऽवरः स्मृतः॥ २१॥

बृंहणं वृष्यमायुष्यं प्लीहोदरविनाशनम्। वयसः स्थापनं मेध्यं पिप्पलीनां रसायनम्॥
पञ्चपिप्पलिकश्चापि दृश्यते वर्द्धमानकः॥ २२॥
पिष्टास्ता बलिभिः पेयाः शृता मध्यबलैर्नरैः। चूर्णीकृता ह्रस्वबलैर्देहदोषामयान् प्रति॥ २३॥

Pippalī-vardhamāna

Ten pippalī fruits are taken on the first day with milk everyday successively increasing the dose by ten fruits upto ten days and then gradually reducing it in the same way. After digestion of drug, ṣaṣtika rice should be taken with milk and ghee. In this way, the complete course consists of one thousand pippalī fruits which acts as Rasāyana. The use of ten, six and three pippalī fruits is regarded as superior, medium and inferior respectively.

This is Rasāyana, promotes intellect, body-growth, sexual potency and vitality, prevents senility and alleviates splenomegaly.

There is also a tradition of the use of five pippalī fruits.

The strong persons should take the pippalī fruits in paste form while average and weak ones should take in forms of decoction and powder taking into account the condition of physique, doṣas and disease. [23]

पिप्पलीचित्रकघृतम्

पिप्पलीं चित्रकान्मूलं पिष्ट्वा सम्यग्विपाचयेत्। घृतं चतुर्गुणक्षीरं यकृत्प्लीहोदरापहम्॥ २४॥

Pippalī-citrakaghṛta

Ghee should be cooked with the paste of pippalī and citraka (root) along with four times milk. It destroys enlargement of liver and spleen. [24]

पिप्पलीघृतम्

पिप्पलीकल्कसंयुक्तं घृतं क्षीरचतुर्गुणम्। पचेत् प्लीहाग्निसादादियकृद्रोगहरं परम्॥ २५॥

Pippalīghṛta

Ghee is cooked with the paste of pippalī along with four times milk. It should be taken in cases of splenomegaly, sluggishness of digestion and liver disorders. [25]

चित्रकघृतम्

चित्रकस्य तुलाक्काथे घृतप्रस्थं विपाचयेत्। आरनालं तद्द्विगुणं दधिमण्डं चतुर्गुणम्॥ २६॥
पञ्चकोलकतालीशक्षारैर्लवणसंयुतैः। द्विजीरकनिशायुग्मैर्मरिचं तत्र दापयेत्॥ २७॥
प्लीहगुल्मोदराध्मानपाण्डुरोगारुचिज्वरान्। वस्तिहृत्पार्श्वकट्यूरुशूलोदावर्त्तपीनसान्॥ २८॥
हन्यात् पीतं तदर्शोघ्नं शोथघ्नं वह्निदीपनम्। बलवर्णकरश्चापि भस्मकञ्च नियच्छति॥ २९॥

Citrakaghṛta

In the decoction of citraka 4 kg ghee 640 gm is cooked with double sour gruel and four times curd-water along with (the paste of) pañcakola, tālīśa, yavakṣāra, rocksalt, jīraka, kṛṣṇa jīraka, haridrā, dāruharidrā and marica.

It alleviates splenomegaly, gulma, udararoga, flatulence, anaemia, anorexia, fever; pain in pelvis, heart, sides, waist and thighs; udāvartta, chronic coryza, piles and oedema. Besides, it improves strength and lustre and controls bhasmaka. [26-29]

रोहीतकघृतम्

रोहीतकत्वचः श्रेष्ठाः पलानां पञ्चविंशतिः। कोलद्विप्रस्थसंयुक्तं कषायमुपकल्पयेत्॥ ३०॥
पलिकैः पञ्चकोलैश्च तैः सर्वैश्चापि तुल्यया। रोहीतकत्वचा पिष्टैर्घृतप्रस्थं विपाचयेत्॥ ३१॥
प्लीहाभिवृद्धिं शमयेदेतदाशु प्रयोजितम्। तथा गुल्मज्वरश्वासक्रिमिपाण्डुत्वकामलाः॥ ३२॥

Rohitakaghṛta

Rohitaka bark 1 kg and kola 1.28 kg are decocted, with this decoction ghee 640 gm is cooked along with the paste of pañcakola each 40 gm. and rohitaka bark in the same quantity.

It alleviates splenomegaly quickly and is also efficacious in gulma, fever, dyspnoea, worms, anaemia and jaundice. [30-32]

महारोहीतकघृतम्

रोहीतकात् पलशतं क्षोदयेद् बदराढकम्। साधयित्वा जलद्रोणे चतुर्भागावशेषिते॥ ३३॥
घृतप्रस्थं समावाप्य छागक्षीरं चतुर्गुणम्। तस्मिन् दद्यादिमान् कल्कान् सर्वांस्तानक्षसम्मितान्॥ ३४॥
व्योषं फलत्रिकं हिङ्गु यमानीं तुम्बुरुं विडम्। अजाजीं कृष्णलवणं दाडिमं देवदारु च॥ ३५॥
पुनर्नवां विशालाञ्च यवक्षारं सपौष्करम्। विडङ्गं चित्रकञ्चैव हवुषां चविकां वचाम्॥ ३६॥
एतैर्घृतं विपक्वन्तु स्थापयेद्भाजने शुभे। पाचयेत् त्रिफलां मात्रां व्याधिं बलमवेक्ष्य च॥ ३७॥
रसकेनाथ यूषेण पयसा वाऽपि भोजयेत्। उपयुक्ते घृते तस्मिन् व्याधीन् हन्यादिमान् बहून्॥ ३८॥
यकृत्प्लीहोदरञ्चैव प्लीहशूलं यकृत्तथा। कुक्षिशूलञ्च हृच्छूलं पार्श्वशूलमरोचकम्॥ ३९॥
विबन्धशूलं शमयेत् पाण्डुरोगं सकामलम्। छर्द्यतीसारशमनं तन्द्राज्वरविनाशनम्॥
महारोहीतकं नाम्ना प्लीहघ्नन्तु विशेषतः॥ ४०॥

Mahārohitaka-ghṛta

Rohitaka 4 kg, badara 2.56 kg are boiled in water 10.24 litre reduced to one-fourth. Now with this decoction and four times goat's milk ghee 640 gm is cooked along with the paste of trikaṭu, triphalā, hiṅgu, yavānī, tumburu, viḍa, jīraka, black salt, dāḍima, devadāru, punarnavā, viśāla, yavakṣāra, puṣkaramūla, viḍaṅga, citraka, hapuṣā, cavikā and vacā each 10 gm. It should be kept in a good container and administered in the dose of 120 gm, considering strength and disorder, with meat soup, liquid gruel or milk.

This mahārohitaka ghṛta alleviates yakṛdudara, plīhodara; pain in spleen, liver, abdomen, heart and chest; anorexia, constipation and pain in defaecaton, anaemia, jaundice, vomiting, diarrhoea, drowsiness, fever and particularly splenomegaly. [33-40]

बृहल्लोकनाथरस:

शुद्धसूतं द्विधा गन्धं खल्वे कुर्य्याच्च कज्जलीम्। सूततुल्यं जारिताभ्रं सम्मर्द्य कन्यकाऽम्बुना ॥ ४१ ॥
गोलं कुर्य्यात् ततो लौहं ताम्रञ्च द्विगुणीकृतम्। काकमाचीरसैः पिष्ट्वा गोलं ताभ्याञ्च वेष्टयेत् ॥ ४२ ॥
वराटिकाया भस्माथ रसतस्त्रिगुणं क्षिपेत्। ततश्च सम्पुटं कृत्वा मूषामध्ये प्रकल्पयेत् ॥ ४३ ॥
तन्मध्ये गोलकं कृत्वा शरावेण पिधापयेत्। पुटेद्गजपुटे विद्वान् स्वाङ्गशीतं समुद्धरेत् ॥ ४४ ॥
शिवं सम्पूज्य यत्नेन द्विजांश्च परितोषयेत्। खादेद्रक्तिद्वयं चूर्णं मूत्रञ्चापि पिबेदनु ॥ ४५ ॥
मधुना पिप्पलीचूर्णं सगुडां वा हरीतकीम्। अजाजीं वा गुडेनैव भक्षयेदनुपानतः ॥ ४६ ॥
यकृद्गुल्मोदरप्लीहश्वयथुज्वरनाशनः। वह्निमान्द्यप्रशमनः सर्वान् व्याधीन् नियच्छति ॥ ४७ ॥

Bṛhat lokanātha rasa

Pure mercury and double sulphur are rubbed in a mortar and made into kajjalī, Now burnt abhraka equal to mercury is rubbed with kumārī juice and made into a round mass. Again Lauha (bhasma) and tāmra (bhasma) in double quantity are rubbed with kākamācī juice and is pasted around the above mass. Varāṭikā-bhasma in quality triple of mercury is added and the whole thing is kept within a crucible. It is again kept within earthen saucers and heated in gajapuṭa and is taken out when self-cooled.

It should be taken, after workshiping Lord Śiva and offering respect to brāhmaṇas, in the dose of 250 mg with cow's urine. Pippalī powder with honey or harītakī with jaggery or jīraka with jaggery may also be taken as anupāna.

It destroys all diseases particularly, liver, spleen, gulma, udararoga, oedema, fever and sluggish digestion. [41-47]

॥ इति प्लीह-यकृच्चिकित्सा ॥ ३८ ॥

Thus ends treatment of Plīha-yakṛt. [38]

३९. एकोनचत्वारिंशोऽध्यायः

CHAPTER XXXIX

शोथ-चिकित्सा

Treatment of Śotha (oedema)

शुण्ठ्यादिः

शुण्ठीपुनर्नवैरण्डपञ्चमूलशृतं जलम्। वातिके श्वयथौ शस्तं पानाहारपरिग्रहे ॥ १ ॥

In vātika sotha, water processed with śuṇṭhī, punarnavā, eraṇḍa and pañcamūla (bṛhat) is useful as intake with food and drink. [1]

दशमूलप्रयोगः

दशमूलं सर्वथा च वातशोथे विशेषतः ॥ २ ॥

Daśamūla is efficacious in all ways particularly in śotha caused by vāta. [2]

त्रिवृदादिः

क्षीराशनः पित्तकृतेऽथ शोथे त्रिवृद्गुडूचीत्रिफलाकषायम्।
पिबेद्गवां मूत्रविमिश्रितं वा फलत्रिकाच्चूर्णमथाक्षमात्रम् ॥ ३ ॥

Trivṛdādi

In paittika śotha one should take decoction of trivṛt, guḍūcī and triphalā keeping on milk – diet or triphalā powder 10 gm mixed with cow's urine. [3]

पृश्निपर्ण्यादिः

पृश्निपर्णीघनोदीच्यशुण्ठीसिद्धन्तु पैत्तिके ॥ ४ ॥

Pṛśniparṇyādi

The decoction of pṛśniparṇī, musta, bālaka and śuṇṭhī is useful in paittika type. [4]

अभयादिः

अभया दारु मधुकं तिक्ता दन्ती सपिप्पली। पटोलं चन्दनं दार्वी त्रायमाणेन्द्रवारुणी ॥ ५ ॥
एषां क्वाथः ससर्पिष्कः श्वयथुज्वरदाहहा। वीसर्पतृष्णासन्तापसन्निपातविषापहा ॥ ६ ॥

Abhayādi

Abhayā (harītakī), devadāru, madhuka, kaṭukā, dantī, pippalī, paṭola, candana, dāruharidrā, trāyamāṇā and indravāruṇī – this decoction mixed with ghee alleviates śotha, fever, burning susation, erysipelas, thirst, hyperpyrexia, sannipāta and poisoning. [5-6]

पैत्तिकशोथेऽभ्यङ्गादिप्रयोगः

शीतवीर्य्यैर्हिमजलैरभ्यङ्गादींश्च कारयेत् ॥ ७ ॥

Besides, externally ice packs, anointment with śītavīrya drugs etc should be applied. [7]

पुनर्नवादिकल्कक्काथौ

पुनर्नवाविश्वत्रिवृद्गुडूचीसम्पाकपथ्याऽमरदारुकल्कम् ।
शोथे कफोत्थे महिषाक्षयुक्तं मूत्रं पिबेद्वा सलिलं तथैषाम् ॥ ८ ॥

Punarnavādi

In kaphaja śotha, the paste or decoction of punarnavā, śuṇṭhī, trivṛt, guḍūcī, āragvadha, harītakī and devadāru mixed with guggulu should be taken with cow's urine. [8]

कफशोथे विविधोपचारः

कफे तु कृष्णासिकतापुराणपिण्याकशिग्रुत्वगुमाप्रलेपः ।
कुलत्थशुण्ठीजलमूत्रसेकश्चण्डागुरुभ्यामनुलेपनञ्च ॥ ९ ॥

(As external appiication) in kaphaja śotha, the paste of pippalī, sand, old oilcake, śigru bark and linseed should be applied on the affected part. Besides, the part should be washed with decoction of kulattha and śuṇṭhī with cow's urine or should be anointed with caṇḍā and aguru. [9]

अजाज्यादिभूनिम्बादिद्वयम्

अजाजिपाठाघनपञ्चकोलव्याघ्रीरजन्यः सुखतोयपीताः ।
शोथं त्रिदोषं चिरजं प्रवृद्धं निघ्नन्ति भूनिम्बमहौषधे च ॥ १० ॥

Ajājyādi and Bhūnimbādi

Ajājī (jīraka), pāṭhā, musta, pañcakola, kaṇṭakārī and haridrā – this powder or the powder of kirātatikta and śuṇṭhī taken with warm water alleviates oedema caused by tridoṣa even if chronic and advanced. [10]

पुनर्नवाष्टकक्वाथः

पुनर्नवानिम्बपटोलशुण्ठीतिक्तामृतादार्वभयाकषायः ।
सर्वाङ्गशोथोदरकासशूलं श्वासान्वितं पाण्डुगदं निहन्ति ॥ ११ ॥

Punarnavāṣṭaka kvātha

Punarnavā, nimba, paṭola, śuṇṭhī, kaṭukā, guḍūcī, devadāru and harītakī – this decoction (of eight drugs) alleviates anaemia associated with general anasarca, udararoga, cough, pain and dyspnoea. [11]

गुडार्द्रकम्

आर्द्रकस्य रसः पीतः पुराणगुडमिश्रितः । अजाक्षीराशिनां शीघ्रं सर्वशोथहरो भवेत् ॥ १२ ॥

Guḍārdraka

Intake of the juice of fresh ginger mixed with old jaggery with diet of goat's milk alleviates all types of śotha. [12]

गुग्गुलुप्रयोगा:

पुनर्नवादारुशुण्ठीक्वाथे मूत्रे च केवले। दशमूलरसे वाऽपि गुग्गुलुः शोथनाशनः॥ १३॥

Guggulu mixed with the decoction of (1) punarnavā, devadāru and śuṇṭhī or (2) cow's urine or (3) decoction of daśamūla alleviates śotha. [13]

बिल्वपत्ररस:

बिल्वपत्ररसं पूतं सोषणं श्वयथौ त्रिजे। विट्सङ्गे चैव दुर्नाम्नि विदध्यात् कामलास्वपि॥ १४॥

The juice of bilva leaves mixed with marica is useful in tridoṣaja śotha, constipation, piles and jaundice. [14]

गुडादिचूर्णम्

गुडपिप्पलिशुण्ठीनां चूर्णं श्वयथुनाशनम्। आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनम्॥ १५॥

Guḍādi cūrṇa

The powder of guḍa (jaggery), pippalī and śuṇṭhī – corrects āmājīrṇa, destroys pain and acts as diuretic. [15]

शोथघ्ना योगा:

पुरो मूत्रेण सेव्येत पिप्पली वा पयोऽन्विता। गुडेन वाऽभया तुल्या विश्वं वा शोथरोगिणाम्॥ १६॥

The patient of śotha should use one of the following drugs – (1) guggulu with urine (2) pippalī with milk (3) harītakī with equal jaggery (4) śuṇṭhī with equal jaggery. [16]

गुडार्द्रकादिप्रयोगा:

गुडार्द्रकं वा गुडनागरं वा गुडाभयां वा गुडपिप्पलीं वा।
कर्षाभिवृद्ध्या त्रिपलप्रमाणं खादेन्नरः पक्षमथापि मासम्॥ १७॥
शेथप्रतिश्यायगलास्यरोगान् सश्वासकासारुचिपीनसादीन्।
हन्यात् तथाऽन्यान् कफवातरोगान्॥ १८॥

Jaggery with ārdraka or śuṇṭhī or harītakī or pippalī should be taken increasing the dose by 10 gm daily upto 120 gm for a fortnight or a month.

It alleviates śotha, coryza, diseases of throat and mouth, bronchial asthma, cough, anorexia, chronic coryza, chronic fever, piles, grahaṇī disorder and other diseases caused by kapha and vāta. [17-18]

स्थलपद्मप्रयोग:

स्थलपद्ममयं कल्कं पयसाऽऽलोड्य पाययेत्। प्लीहामयहरश्चैव सर्वाङ्गैकाङ्गशोथजित्॥ १९॥

The paste of sthalapadma mixed with milk should be taken. It alleviates splenomegaly and oedema, localised as well as general. [19]

दार्वादिवर्षाभ्वादिकल्कौ

दारुगुग्गुलुशुण्ठीनां कल्को मूत्रेण शोथजित्। वर्षाभूशृङ्गबेराभ्यां कल्को वा सर्वशोथजित्॥ २०॥

Dārvādi-varṣābhvādi

The paste of devadāru, guggulu and śuṇṭhī or of varṣābhū (punarnavā) and śuṇṭhī taken with cow's urine alleviates all types of śotha. [20]

सिंहास्यादि:

सिंहास्यामृतभण्टाकीक्वाथं कृत्वा समाक्षिकम्। पीत्वा शोथं जयेज्जन्तु: कासं श्वासं ज्वरं वमिम्॥ २१॥

Siṃhāsyādi

Decoction of siṃhāsya (vāsā), guḍūcī and kaṇṭakārī added with honey alleviates śotha, cough, dyspnoea, fever and vomiting. [21]

भूनिम्बादिकल्क:

भूनिम्बविश्वकल्कं जग्ध्वा पेय: पुनर्नवाक्वाथ:। अपहरति नियतमाशु शोथं सर्वाङ्गगं नृणाम्॥ २२॥

Bhūnimbādi

Intake of the paste of bhūnimba (kirātātikta) and śuṇṭhī followed by the decoction of punarnavā destroys general anasarca. [22]

शोथघ्नास्त्रयो योगा:

शोथनुत् कोकिलाक्षस्य भस्म मूत्रेण वाऽम्भसा॥ २३॥

क्षीरं शोथहरं दारुवर्षाभूनागरै: शृतम्। पेयं वां चित्रकव्योषत्रिवृद्दारुप्रसाधितम्॥ २४॥

The ash of kokilākṣa taken with cow's urine or water destroys śotha. [23]

Milk processed with (1) devadāru, punarnavā and śuṇṭhī or (2) citraka, trkaṭu, trivṛt and devadāru should be taken to alleviate śotha. [24]

पुनर्नवादि:

पुनर्नवामूलकपित्थिदारुच्छिन्नोद्भवाचित्रकमूलसिद्धा:।
रसा यवाग्वश्च पयांसि यूषा: शोथे प्रदेया दशमूलगर्भा:॥ २५॥

Punarnavādi

Punarnavā (root), kapittha, devadāru, guḍūcī and citraka (root)— with these along with the paste of daśamūla, meat-soup, gruels, milk and vegetable soups should be prepared and given in śotha. [25]

क्षारादिगुडिका

क्षारद्वयं स्याल्लवणानि चत्वार्य्ययोरजो व्योषफलत्रिके च।
सपिप्पलीमूलविडङ्गसारं मुस्ताजमोदामरदारुबिल्वम्॥ २६॥

कलिङ्गकश्चित्रकमूलपाठे यष्ट्याह्वयं सातिविषं पलांशम्।
सहिङ्गुकर्षं त्वणुशुष्कचूर्णं द्रोणं तथा मूलकशुण्ठकानाम्॥ २७॥
स्याद्भस्मनस्तत्सलिलेन साध्यमालोड्य यावद्घनमप्यदग्धम्।
स्त्यानं ततः कोलसमाश्च मात्रां कृत्वा सुशुष्कां विधिना प्रयुञ्ज्यात्॥ २८॥
प्लीहोदरश्वित्रहलीमकार्शःपाण्ड्वामयारोचकशोथशोषान्।
विसूचिकागुल्मगराश्मरीश्च सश्वासकासान् प्रणुदेत् सकुष्ठान्॥ २९॥
सौवर्च्चलं सैन्धवञ्च विडमौद्भिदमेव च। चतुर्लवणमत्र स्याज्जलमष्टगुणं भवेत्॥ ३०॥

Kṣārādi guḍikā

Yavakṣāra, sarjikṣāra, four salts (except sāmudra), lauhabhasma, trikaṭu, triphalā, pippalīmūla, viḍaṅga, musta, ajamodā, devadāru, bilva, kuṭaja, citraka (root), pāṭhā, madhuyaṣṭī and ativiṣā each 40 gm, hiṅgu 10 gm – all are powdered together. Now alkaline water is prepared of dried radish 10.24 kg with which the above powder is cooked till it becomes thick but un-charred. Pills are made 5 gm each and dried.

Used regularly it alleviates splenomegaly, vitiligo, halīmaka, piles, aneamia, anorexia, oedema, wasting, visūcikā, gulma, poisoning, calculus, dyspnoea, cough and kuṣṭha.

'Caturlavaṇa' consists of sauvarcala, saindhava, viḍa and audbhida. Here water should be given eight times (in preparation of alkaline water). [26-30]

पुनर्नवाद्यं घृतम्

पुनर्नवाचित्रकदेवदारुपञ्चोषणक्षारहरीतकीनाम्। कल्केन पक्वं दशमूलतोये घृतोत्तमं शोथनिषूदनञ्च॥३१॥

Punarnavādya ghṛta

Ghee cooked with the paste of punarnavā, citraka, devadāru, pañcakola, yavakṣāra and harītakī along with daśamūla decoction alleviates śotha. [31]

स्वल्पपुनर्नवाघृतम्

पुनर्नवाक्वाथकल्कसिद्धं शोथहरं घृतम्॥ ३२॥

Svalpapunarnavā-ghṛta

Ghṛta cooked with decoction and paste of punarnavā destroys śotha. [32]

पञ्चकोलाद्यं घृतम्

रसे विपाचयेत् सर्पिः पञ्चकोलकुलत्थयोः। पुनर्नवायाः कल्केन घृतं शोथविनाशनम्॥ ३३॥

Pañcakolādya ghṛta

Ghee should be cooked with decoction of pañcakola and kulattha along with the paste of punarnavā. It alleviates śotha. [33]

शुण्ठीघृतम्

विश्वौषधस्य कल्केन दशमूलजले शृतम्। घृतं निहन्याच्छ्वयथुं ग्रहणीं पाण्डुतामयम्॥ ३४॥

Śuṇṭhī-ghṛta

Ghee cooked with the paste of śuṇṭhī in decoction of daśamūla alleviates śotha, grahaṇī and anaemia. [34]

चित्रकाद्यं घृतम्

सचित्रका धान्ययमानिपाठाः सदीप्यकत्र्यूषणवेतसाम्लाः।
बिल्वात् फलं दाडिमयावशूकं सपिप्पलीमूलमथापि चव्यम्॥ ३५॥
पिष्ट्वाऽक्षमात्राणि जलाढकेन पक्त्वा घृतप्रस्थमथोपयुञ्ज्यात्।
अर्शांसि गुल्मं श्वयथुञ्च कृच्छ्रं निहन्ति वह्निञ्च करोति दीप्तम्॥ ३६॥

Citrakādya ghṛta

Citraka, dhānyaka, yavānī, pāṭhā, ajamodā, trikaṭu, amlavetasa, bilva (fruit), dāḍima, yavakṣāra, pippalīmūla and cavya each 10 gm – with the paste of these drugs ghee 640 gm should be cooked along with water 2.56 litre.

It alleviates piles, gulma, śotha and dysuria and stimulates digestive fire. [35-36]

चित्रकघृतम्

क्षीरं घटे चित्रककल्कलिप्ते दध्यागतं साधु विमथ्य तेन।
तज्जं घृतं चित्रकमूलकल्कं तक्रेण सिद्धं श्वयथुघ्नमग्र्यम्॥ ३७॥
अर्शोऽतिसारानिलगुल्ममेहांस्तद्धन्ति संवर्द्धयते च वह्निम्॥ ३८॥

Citraka-ghṛta

An earthen vessel is pasted with citraka root and milk is curdled in this. Ghee extracted from this curd is cooked with the paste of citraka root and buttermilk. This is an excellent remedy for śotha. Besides, it alleviates piles, diarrhoea, vātagulma and prameha and stimulates digestive fire. [37-38]

माणकघृतम्

माणकक्काथकल्काभ्यां घृतप्रस्थं विपाचयेत्। एकजं द्वन्द्वजं शोथं त्रिदोषञ्च व्यपोहति॥ ३९॥

Māṇakaghṛta

Ghee 640 gm cooked with decoction and paste of māṇaka alleviates all types of śotha. [39]

स्थलपद्मघृतम्

स्थलपद्मपलान्यष्टौ त्र्यूषणस्य चतुःपलम्। घृतप्रस्थं पचेदेभिः क्षीरं दत्त्वा चतुर्गुणम्॥
पञ्च कासान् हरेच्छीघ्रं शोथञ्चैव सुदुस्तरम्॥ ४०॥

Sthalapadma-ghṛta

Sthalpadma 320 gm and trikaṭu 160 gm– with this ghee 640 gm is cooked along with four times milk.

It destroys five types of cough and severe śotha. [40]

शैलेयाद्यं तैलं प्रलेपश्च

शैलेयकुष्ठागुरुदारुकौन्तीत्वक्पद्मकैलाम्बुपलाशमुस्तैः।
प्रियङ्गुथौणेयकहेममांसीतालीशपत्रप्लवपत्रधान्यैः॥ ४१॥
श्रीवेष्टकध्यामकपिप्पलीभिः पृक्कानखैर्वाऽपि यथोपलाभम्।
वातान्वितेऽभ्यङ्गमुशन्ति तैलं सिद्धं सुपिष्टैरपि च प्रदेहम्॥ ४२॥

Śaileyādya taila, pralepa

In vātika śotha, oil cooked with the following drugs or their paste is anointed – śaileya, kuṣṭha, aguru, devadāru, hareṇukā, tvak, padmaka, elā, bālaka, śaṭī, musta, priyaṅgu, sthauṇeyaka, nāgakeśara, jaṭāmāṃsī, tālīśapatra, kaivarta musta, patra, dhānyaka, śrīveṣṭaka, dhyāmaka, pippalī, spṛkkā and nakha (as available). [41-42]

शुष्कमूलकाद्यं तैलम्

शुष्कमूलकवर्षाभूदारुरास्नामहौषधैः। पक्वमभ्यञ्जनात् तैलं सशूलं श्वयथुं जयेत्॥ ४३॥

Śuskamūlakādya taila

Oil cooked with śuṣka mūlaka (dried radish), punarnavā, devadāru, rāsnā and śuṇṭhī is used for anointment in oedema associated with pain. [43]

पुनर्नवावलेहः

पुनर्नवाऽमृतादारुदशमूलरसाढके। आर्द्रकस्वरसप्रस्थे गुडस्य तु तुलां पचेत्॥ ४४॥
तत् सिद्धं व्योषपत्रैलात्वक्चव्यैः कार्षिकैः पृथक्। चूर्णीकृतैः क्षिपेच्छीते मधुनः कुडवं लिहेत्॥
लेहः पौनर्नवो नाम शोथशूलनिषूदनः। श्वासकासारुचिहरो बलवर्णाग्निवर्द्धनः॥ ४६॥

Punarnavādyavaleha

Jaggery 4 kg is cooked in decoction of punarnavā, guḍūcī, devadāru and daśamūla 2.56 litre added with ārdraka juice 640 ml. When it is completed powders of trikaṭu, patra, elā, tvak and cavya each 10 gm be added and when cooled honey 160 gm be mixed.

This punarnavā-leha alleviates śotha and pain, dyspnoea, cough and anorexia and promotes strength, lustre and digestive fire. [44-46]

दशमूलहरीतकीलेहः

दशमूलकषायस्य कंसे पथ्याशतं पचेत्। तुलां गुडाद् घने दद्याद् व्योषक्षारं चतुःपलम्॥ ४७॥
त्रिसुगन्धं सुवर्णांशं प्रस्थार्द्धं मधुनो हिमे। दशमूलहरीतक्यः शोथान् हन्युः सुदारुणान्॥ ४८॥

ज्वरारोचकगुल्मार्शोमेहपाण्डूदरामयान्। प्रत्येकमेव कर्षांशं त्रिसुगन्धमितो भवेत्॥ ४९॥
कंसहरीतकी चैषा चरके पठ्यतेऽन्यथा। एतन्मानेन तुल्यत्वं तेन तत्रापि वर्ण्यते॥ ५०॥

Daśamūlaharītakī

In decoction of daśamūla 2.56 litre one hundred fruits of harītakī are cooked along with jaggery 4 kg, when it is thickened trikatu and yavakṣāra 160 gm, trijāta, 10 gm each are added and when it is self-cooled, honey 80 gm is added.

The daśamūlaharītakī (harītakī processed in daśamūla decoction) alleviates all types of oedema, even if severe, fever, anorexia, gulma, piles, prameha, anaemia and udararoga. (The dose is one fruit with 20 gm of the linctus). Trijāta should be taken 10 gm each. This very formulation is read as 'Kaṃsaharītakī' in the Caraka-saṃhitā with only different words while the ingredients and their quantity are the same. The latter also is mentioned here as below. [47-50]

कंसहरीतकी

द्विपञ्चमूलस्य पचेत् कषाये कंसेऽभयानाञ्च शतं गुडाच्च।
लेहे सुसिद्धे च विनीय चूर्णं व्योषं त्रिसौगन्ध्यमुषास्थिते च॥ ५१॥
प्रस्थार्द्धमात्रं मधुनः सुशीते किञ्चिच्च चूर्णादपि यावशूकात्।
एकाभयां प्राश्य ततश्च लेहाच्छुक्तिं निहन्ति श्वयथुं प्रवृद्धम्॥ ५२॥
कासज्वरारोचकमेहगुल्मान् प्लीहत्रिदोषोदरपाण्डुरोगान्।
कार्श्यामवातावसृगम्लपित्तवैवर्ण्यमूत्रानिलशुक्रदोषान्॥ ५३॥
अत्र व्याख्यान्तरं नोक्तं व्याख्या पूर्वैव यच्छुभा॥ ५४॥

Kaṃsaharītakī

It is not explained here as it is already explained above. [51-54]

भल्लातकशोथहरा लेपाः

लेपोऽरुष्करशोथं निहन्ति तिलदुग्धमधुकनवनीतैः। तत्तरुतलमृद्भिर्वा शालदलैर्वाऽपि न चिरेण॥ ५५॥

The swelling caused by bhallātaka is removed by the paste of (1) tila, milk, madhuka and butter or (2) soil under the bhallātaka tree or (3) śāla leaves. [55]

विषजशोथचिकित्सा

शोथे विषनिमित्ते तु विषोक्ता सम्मता क्रिया॥ ५६॥

In the swelling caused by poisons, the treatment prescribed under poisoning should be applied. [56]

अपथ्यानि

ग्राम्याब्जानूपं पिशितलवणं शुष्कशाकं नवान्नं गौडं पिष्टान्नं दधि सकृशरं विज्जलं मद्यमम्लम्।
धाना वल्लूरं समशनमथो गुर्वसात्म्यं विदाहि स्वप्नञ्चारात्रौ श्वयथुगदवान् वर्जयेन्मैथुनञ्च॥ ५७॥

Unwholesome items for oedema

One suffering from oedema should avoid the following unwholesome items– meat of domestic, aquatic and marshy animals, salt, dried vegetables, new cereals, products of jaggery, edibles made of rice-flour, curd, kṣāra, concentrated wine, sours, parched grains, dried meat, eating wholesome and unwholesome mixed together, heavy, unsuitable and irritant food items and day-sleep. [57]

॥ इति शोथचिकित्सा ॥ ३९ ॥

Thus ends treatment of śotha. [39]

४०. चत्वारिंशोऽध्यायः

CHAPTER XXXX

वृद्धिब्रध्न-चिकित्सा

Treatment of Vṛddhi and Bradhna (scrotal enlargement)

वातजवृद्धिचिकित्सा

गुग्गुलुं रुबुतैलं वा गोमूत्रेण पिबन् नरः। वातवृद्धिं निहन्त्याशु चिरकालानुबन्धिनीम्॥ १॥

One taking guggulu or castor oil with cow's urine eliminates vātika vṛddhi, even if chronic. [1]

विविधा योगाः

सक्षीरं वा पिबेत् तैलं मासमेरण्डसम्भवम्॥ २॥

पुनर्नवायास्तैलं वा तैलं नारायणं तथा। पाने वस्तौ रुबोस्तैलं पेयं वा दशकाम्भसा॥ ३॥

Or one should use regularly for a month the oil of castor seeds with milk. [2]

Punarnavā-taila or nārāyaṇa taila or castor oil mixed with daśamūla decoction should be used for intake and enema. [3]

चन्दनादिलेपः

चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलम्। क्षीरपिष्टः प्रदेहः स्याद् दाहशोथरुजाऽपहः॥ ४॥

पञ्चवल्कलकल्केन सघृतेन प्रलेपनम्। सर्वं पित्तहरं कार्य्यं रक्तजे रक्तमोक्षणम्॥ ५॥

(In paittika vṛddhi) the paste of candana, madhuka, padma, uśīra and nīlotpala pounded with milk should be applied in conditions of burning sensation, swelling and pain. [4]

Similarly, the paste of pañcavalkala mixed with ghee should be applied.

In raktaja type, the pitta-alleviating measures are adopted particularly blood-letting. [5]

कफजवृद्धिचिकित्सा

श्लेष्मवृद्धिन्तूष्णवीर्य्यैर्मूत्रपिष्टैः प्रलेपयेत्। पीतदारुकषायञ्च पिबेद्वा मूत्रसंयुतम्॥ ६॥

In case of kaphaja vṛddhi the paste of uṣṇavīrya drugs pounded with urine should be applied and decoction of dāruharidrā mixed with urine should be taken. [6]

मेदोजवृद्धिचिकित्सा

स्विन्नं मेदःसमुत्थन्तु लेपयेत् सुरसादिना। शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः॥ ७॥

In vṛddhi caused by medas the part should be fomented and the warm paste of surasādi or śirovirecana drugs pounded with urine should be applied thereto. [7]

मूत्रजवृद्धिचिकित्सा

संस्वेद्य मूत्रप्रभवां वस्त्रपट्टेन वेष्टयेत्। सेवन्याः पार्श्वतोऽधस्ताद् विध्येद् व्रीहिमुखेन वै॥ ८॥

In vṛddhi caused by urine (fluid) the part should be fomented and then bandaged. Eventually fluid should be drained out by puncturing with trocar and canula in lower portion in the side of the suture. [8]

अन्त्रवृद्धौ सिरावेधो दाहश्च

शङ्खोपरि च कर्णान्ते त्यक्त्वा सेवनिमादरात्। व्यत्यासाद्वा शिरां विध्येदन्त्रवृद्धिनिवृत्तये॥ ९॥
अङ्गुष्ठमध्ये त्वक् छित्त्वा दहेदङ्गविपर्य्यये॥ १०॥

To alleviate antravṛddhi (scrotal hernia), vein should be punctured above temporal region at the end of ear, leaving the suture of the opposite side. [9]

Similarly, cauterization should be applied in middle of the thumb (of the foot) of the opposite side after removing the skin. [10]

रास्नादिः

रास्नायष्ट्यमृतैरण्डबलागोक्षुरसाधितः। क्वाथोऽन्त्रवृद्धिं हन्त्याशु रुबुतैलेन मिश्रितः॥ ११॥

Rāsnādi

Decoction of rāsnā, madhuyaṣṭī, guḍūcī, eraṇḍa, balā and gokṣura mixed with castor oil alleviates antravṛddhi quickly. [11]

एरण्डतैलप्रयोगः

तैलमेरण्डजं पीत्वा बलासिद्धपयोऽन्वितम्। आध्मानशूलोपचितामन्त्रवृद्धिं जयेन्नरः॥ १२॥

Intake of milk processed with balā and mixed with castor oil overcomes antravṛddhi associated with flatulence and pain. [12]

हरीतकीप्रयोगः

हरीतकीं मूत्रसिद्धां सतैलां लवणान्विताम्। प्रातः प्रातश्च सेवेत कफवातामयापहाम्॥ १३॥

Harītakī boiled in urine and mixed with oil and salt should be taken in morning to alleviate disorders caused by kapha and vāta. [13]

रुबुतैलभृष्टहरीतकी

गोमूत्रसिद्धां रुबतैलभृष्टां हरीतकीं सैन्धवचूर्णयुक्ताम्।
खादेन्नरः कोष्णजलानुपानां निहन्ति वृद्धिं चिरजां प्रवृद्धाम्॥ १४॥

One should take harītakī boiled in cow urine fried with castor oil and mixed with powdered rocksalt followed by intake of warm water. It destroys vṛddhi even if advanced and chronic. [14]

त्रिफलाक्वाथ:

त्रिफलाक्काथगोमूत्रं पिबेत् प्रातरतन्द्रितः। कफवातोद्भवं हन्ति श्वयथुं वृषणोत्थितम्॥ १५॥

One should use decoction of triphalā mixed with cow's urine in morning. It alleviates scrotal swelling caused by kapha and vāta. [15]

सरलादिप्रदेह:

सरलागुरुकुष्ठानि देवदारुमहौषधम्। मूत्रारनालसम्पिष्टं शोथघ्नं कफवातनुत्॥ १६॥

Sarala, aguru, kuṣṭha, devadāru and śuṇṭhī – this formulation pounded with urine and sour gruel alleviates swelling and kapha-vāta (by external application). [16]

पथ्यादिकल्क:

भृष्टो रुबुकतैलेन कल्कः पथ्यासमुद्भवः। कृष्णासैन्धवसंयुक्तो वृद्धिरोगहरः परः॥ १७॥

Pathyādi kalka

Paste of harītakī fried with castor oil and added with pippalī and saindhava is an excellent remedy for vṛddhiroga. [17]

आदित्यपक्वघृतम्

गव्यं घृतं सैन्धवसम्प्रयुक्तं शम्बूकभाण्डे निहितं प्रयत्नात्।
सप्ताहमादित्यकरैर्विपक्वं हन्यात् कुरण्डं चिरजं प्रवृद्धम्॥ १८॥

Cow's ghee mixed with saindhava is kept within snail- shell and heated in the sun for a week. It destroys the scrotal enlargement even if advanced and chronic. [18]

ऐन्द्रीमूलचूर्णम्

ऐन्द्रीमूलभवं चूर्णं रुबुतैलेन मर्दितम्। त्र्यहाद्गोपयसा पीतं सर्ववृद्धिनिवारणम्॥ १९॥

The powder of indravāruṇī root rubbed with castor oil is taken with cow's milk for three days. It removes all types of vṛddhi. [19]

रुद्रजटाप्रयोग:

रुद्रजटामूललिप्ता करटव्यङ्कचर्मणा। बद्धा वृद्धिः शमं याति चिरजाऽपि न संशयः॥ २०॥

External application of the paste of rudrajaṭā (root) and then bandaging with squirrel's skin subsides the scrotal enlargement even if chronic. [20]

रूपिकाप्रलेप:

निष्पिष्टमारनालेन रूपिकामूलवल्कलम्। लेपो वृद्ध्यामयं हन्ति बद्धमूलमपि दृढम्॥ २१॥

The paste of rūpikā (root-bark) pounded with sour gruel eradicates vṛddhiroga. [21]

लेपद्वयम्

वचासर्षपकल्केन प्रलेपो वृद्धिनाशनः। लज्जागृध्रमलाभ्याञ्च लेपो वृद्धिहरः परः॥ २२॥

External application of the paste of vacā ans sarṣapa destroys vṛddhiroga. Similarly does the paste of lajjālu and vulture's excreta. [22]

अथ ब्रध्न-चिकित्सा

बिल्वमूलादिचूर्णम्

मूलं बिल्वकपित्थयोररलुकस्याग्नेर्बृहत्योर्द्वयो: श्यामापूतिकरञ्जशिग्रुकतरोर्विश्वौषधारुष्करम्।
कृष्णाग्रन्थिकचव्यपञ्चलवणक्षाराजमोदान्वितं पीतं काञ्जिककोष्णतोयमथितं चूर्णीकृतं ब्रध्नजित्।।

Bilvamūlādi cūrṇa

Root of bilva, kapittha, aralu, citraka, bṛhatī, kaṇṭakārī, śyāmā, pūtīka, śigru, śuṇṭhī, bhallātaka, pippalī, pippalīmūla, cavya, five salts, yavakṣāra and ajamoda – this powder dissolved in sour gruel and warm water alleviates bradhna. [23]

विविधप्रयोग:

अवीक्षीरेण गोधूमकल्कं कुन्दुरुकस्य वा। प्रलेपनं सुखोष्णं स्याद् ब्रध्नशूलहरं परम्।। २४।।
मृतमात्रे तु वै काके विशस्ते सम्प्रवेशयेत्। ब्रध्नं मुहूर्त्तं मेधावी तत्क्षणादरुजं भवेत्।। २५।।

Application of the warm paste of wheat or kunduru with sheep-milk relieves pain of bradhna. [24]

After sacrificing when the crow dies, the affected part should be pressed up. By this one is relieved instantaneously. [25]

अजाज्यादिप्रलेप:

अजाजी हवुषा कुष्ठं गोधूमं बदराणि च। काञ्जिकेन समं पिष्ट्वा कुर्य्याद् ब्रध्नप्रलेपनम्।। २६।।

Ajājī (jīraka), hapuṣā, kuṣṭha, wheat and badara – these should be pounded with sour gruel and applied on bradhna. [26]

बृहत्सैन्धवाद्यं तैलम्

सैन्धवं मदनं कुष्ठं शताह्वां निचुलं वचाम्। ह्रीबेरं मधुकं भार्गीं देवदारु सनागरम्।। २७।।
कट्फलं पौष्करं मेदां चविकां चित्रकं शटीम्। विडङ्गातिविषे श्यामां रेणुकां नीलिनीं स्थिराम्।।
बिल्वाजमोदे कृष्णाश्च दन्तीरास्ने प्रपिष्य च। साध्यमेरण्डजं तैलं तैलं वा कफवातनुत्।। २९।।
ब्रध्नोदावर्त्तगुल्मार्श:प्लीहमेहाढ्यमारुतान्। आनाहमश्मरीञ्चैव हन्यात् तदनुवासनात्।। ३०।।

Bṛhat saindhavādya taila

Saindhava, madana, kuṣṭha, śatapuṣpā, nicula, vacā, bālaka, madhuka, bhārgī, devadaru, śuṇṭhī, kaṭphala, puṣkaramūla, medā, cavikā, citraka, śaṭī, viḍaṅga, ativiṣā, śyāmā, reṇukā, nīlinī, śālaparṇī, bilva, ajamodā, pippalī, dantī and rāsnā-with the paste of these castor or sesamum oil is prepared.

It alleviates kapha and vāta and is useful as unctuous enema in bradhna, udāvartta, ...'ma, arsa, plīha, prameha, āḍhyavāta, ānāha and aśmarī. [27-30]

शतपुष्पाद्यं घृतम्

शतपुष्पाऽमृतादारुचन्दनं रजनीद्वयम्। जीरके द्वे वचानागत्रिफलागुग्गुलुत्वचः॥ ३१॥
मांसी कुष्ठं पत्रकैलारास्नाश्रृङ्गीः सचित्रकाः। क्रिमिघ्नमश्वगन्धाश्च शैलेयं कटुरोहिणीम्॥ ३२॥
सैन्धवं तगरं पिष्ट्वा कुटजातिविषे समे। एतैश्च कार्षिकैः कल्कैर्घृतप्रस्थं विपाचयेत्॥ ३३॥
वृषमुण्डितिकैरण्डनिम्बपत्रभवं रसम्। कण्टकार्य्यास्तथा क्षीरं प्रस्थं प्रस्थं विनिक्षिपेत्॥ ३४॥
सिद्धमेतद् घृतं पीतमन्त्रवृद्धिमपोहति। वातवृद्धिं पित्तवृद्धिं मेदोवृद्धिश्च दारुणाम्॥ ३५॥
मूत्रवृद्धिं श्लीपदं वा यकृत्प्लीहानमेव च। शतपुष्पाघृतं रोगान् हन्यादेव न संशयः॥ ३६॥

Śatapuṣpādya ghṛta

Śatapuṣpā, guḍūcī, devadāru, candana, haridrā, dāruhardrā, jīraka, kṛṣṇa jīraka, vacā, nāgakeśara, triphalā, guggulu, tvak, māṃsī, kuṣṭha, patra, elā, rāsnā, śṛngi, citraka, viḍaṅga, āragvadha, śaileya, kaṭukā, saindhava, tagara, kuṭaja and ativiṣā each 10 gm – with the paste of these ghee 640 gm is cooked along with the juice of vāsā, muṇḍī, eraṇḍa, nimba leaves, kaṇṭakārī and milk each 640 ml.

By regular use of this ghṛta all types of vṛddhi, filaria, enlargement of liver and spleen are alleviates. [31-36]

सौरेश्वरघृतस्य प्रयोगः

घृतं सौरेश्वरं योज्यं ब्रध्नवृद्धिनिवृत्तये॥ ३७॥

Saureśvara ghṛta is useful in treatment of bradhna and vṛddhi. [37]

॥ इतिवृद्धिब्रध्नचिकित्सा॥ ४०॥

Thus ends treatment of vṛddhi and bradhna. [40]

४१. एकचत्वारिंशोऽध्यायः

CHAPTER XLI

गलगण्डगण्डमालाऽपचीग्रन्थ्यर्बुद-चिकित्सा

Treatment of Galagaṇḍa (goitre), Gaṇḍamālā (cervical adenitis) Apacī (scrofla), Granthi (cyst) and Arbuda (tumour)

गलगण्डे क्रियासूत्रम्

यवमुद्गपटोलानि कटु रूक्षञ्च भोजनम्। छर्दिं सरक्तमुक्तिञ्च गलगण्डे प्रयोजयेत्॥ १॥

In galagaṇḍa one should use barley, green gram, paṭola, pungent and rough food, emesis and blood-letting. [1]

लेपः

तण्डुलोदकपिष्टेन मूलेन परिलेपितः। हस्तिकर्णपलाशस्य गलगण्डः प्रशाम्यति॥ २॥

Galagaṇḍa subsides by external application of the paste of hastikarṇapalāśa (root) pounded with rice-water. [2]

सर्षपादिप्रलेपः

सर्षपान् शिग्रुबीजानि शणबीजातसीयवान्। मूलकस्य च बीजानि तक्रेणाम्लेन पेषयेत्॥ ३॥
गण्डानि ग्रन्थयश्चापि गलगण्डाः सुदारुणाः। प्रलेपात् तेन शाम्यन्ति विलयं यान्ति चाचिरात्॥ ४॥

Sarṣapādi pralepa

Sarṣapa, śigru seeds, śaṇa seeds, linseed, barley and radish seeds– These together are pounded with sour buttermilk. By its external application glands, cysts and goitre are alleviated. [3-4]

कर्कारुकरसनस्यम्

जीर्णकर्कारुकरसो विडसैन्धवसंयुतः। नस्येन हन्ति तरुणं गलगण्डं न संशयः॥ ५॥

Nasal administration of the juice of old karkāru mixed with viḍa and saindhava alleviates acute goitre. [5]

जलकुम्भीक्षारप्रयोगः

जलकुम्भीकजं भस्म पक्वं गोमूत्रगालितम्। पिबेत् कोद्रवभक्ताशी गलगण्डप्रशान्तये॥ ६॥

In order to alleviate galagaṇḍa, one should take ash of jalakumbhī followed by intake of the same keeping on the diet of boiled kodo. [6]

सूर्यावर्त्ताद्युपनाहः

सूर्य्यावर्त्तरसोनाभ्यां गलगण्डोपनाहने। स्फोटास्रावैः शमं याति गलगण्डो न संशयः ॥ ७ ॥

Poultice of sūryāvarta and rasona is applied on goitre. By this blisters arise and burst after which the goitre subsides. [7]

विविधप्रयोगाः

तिक्तालाबुफले पक्वे सप्ताहमुषितं जलम्। मद्यं वा गलगण्डघ्नं पानात् पथ्यानुसेविनः ॥ ८ ॥
कट्फलचूर्णान्तर्गलघर्षो गलगण्डमपहरति। घृतमिश्रं पीतमिव श्वेतगिरिकर्णिकामूलम् ॥ ९ ॥
महिषीमूत्रविमिश्रं लौहमलं संस्थितं घटे मासम्। अन्तर्धूमविदग्धं लिह्यान्मधुनाऽथ गलगण्डे ॥ १० ॥

Water or wine is kept into the mature fruit of bitter gourd for a week. By intake of this, while keeping on wholesome diet, galagaṇḍa is alleviated. [8]

Rubbing of kaṭphala powder in throat eliminates galagaṇḍa as does the intake of white girikarṇikā (root) mixed with ghee. [9]

Maṇḍūra is kept in a vessel with buffalo's urine for a month and then burnt by closed heating. It should be used with honey in galagaṇḍa. [10]

गलगण्डे सिरावेधः

जिह्वायाः पार्श्वतोऽधस्ताच्छिरा द्वादश कीर्त्तिताः। तासां स्थूलशिरे कृष्णे छिन्द्याद् द्वे च शनैः शनैः ॥ ११ ॥
बडिशेनैव संगृह्य कुशपत्रेण बुद्धिमान्। स्रुते रक्ते व्रणे तस्मिन् दद्यात् सगुडमार्द्रकम् ॥
भोजनश्चानभिष्यन्दि यूषः कौलत्थ इष्यते ॥ १२ ॥
कर्णयुग्मबहिःसन्धिमध्याभ्याशे स्थितश्च यत्। उपर्य्युपरि तच्छिन्द्याद् गलगण्डे शिरात्रयम् ॥ १३ ॥

Surgical operation (venesection)

On the lower surface of the tongue, by the sides, there are twelve veins out of which two prominent and black ones should be incised slowly with kuṣapatra (knife) while holding with forceps. After the blood is drained out the wound should be pasted with fresh ginger and jaggery. The diet, during the treatment, should consist of soup of horse gram and other non-blocking items. [11-12]

In galagaṇḍa, one should also incise superficially the three veins situated near the outer joint of both the ears. [13]

तुम्बीतैलम्

विडङ्गक्षारसिन्धूग्रारास्नाऽग्निव्योषदारुभिः। कटुतुम्बीफलरसे कटुतैलं विपाचितम् ॥
चिरोत्थमपि नस्येन गलगण्डं विनाशयेत् ॥ १४ ॥

Tumbītaila

Mustard oil cooked with (the paste of) viḍaṅga, yavakṣāra, saindhava, vacā, rāsnā, citraka, trikaṭu and devadāru alongwith the juice of kaṭutumbī fruits alleviates galagaṇḍa, even if chronic, by snuffing. [14]

अमृताद्यं तैलम्

तैलं पिबेच्चामृतवल्लिनिम्बहंसाह्वयावृक्षकपिप्पलीभिः।
सिद्धं बलाभ्याञ्च सदेवदारु हिताय नित्यं गलगण्डरोगी॥ १५॥

Amṛtādya taila

Intake of oil processed with amṛtā (guḍūcī), nimba, haṃsapadī, kuṭaja, pippalī, balā, atibalā and devadāru is efficacious in galagaṇḍa. [15]

गण्डमालायां वरुणक्वाथः

माक्षिकाढ्यः सकृत् पीतः क्काथो वरुणमूलजः। गण्डमालां हरत्याशु चिरकालानुबन्धिनीम्॥ १६॥

Intake of the decoction of varuṇa root mixed with honey alleviates gaṇḍamālā even if chronic. [16]

काञ्चनारक्वाथः

पिष्ट्वा ज्येष्ठाम्बुना पेयाः काञ्चनारत्वचः शुभाः। विश्वभेषजसंयुक्ता गण्डमालाहराः पराः॥ १७॥

The bark of kāñcanāra pounded with rice-water and mixed with śuṇṭhī should be taken. It is excellent remedy for gaṇḍamālā. [17]

आरग्वधशिफाप्रयोगः

आरग्वधशिफां क्षिप्रं पिष्ट्वा तण्डुलवारिणा। सम्यङ्नस्यप्रलेपाभ्यां गण्डमालां समुंद्धरेत्॥ १८॥

The root of āragvadha pounded with rice-water and used by snuff and paste alleviates gaṇḍamālā. [18]

गण्डमालायां नस्यार्थं योगाः

गण्डमालाऽऽमयार्त्तानां नस्यकर्मणि योजयेत्। निर्गुण्ड्याश्च शिफां सम्यग् वारिणा परिपेषिताम्॥
कोशातकीनां स्वरसेन नस्यं तुम्ब्यास्तु वा पिप्पलिसंयुतेन।
तैलेन वाऽरिष्टभवेन कुर्य्याद् वचोपकुल्ये सह माक्षिकेण॥ २०॥

The root of nirguṇḍī pounded with water should be used as snuff in gaṇḍamālā. [19]

Similar snuff is used with (1) kośātakī or kaṭutumbī juice mixed with pippalī or (2) nimba oil or (3) vacā and pippalī with honey. [20]

ऐन्द्रीगिरिकर्णिकयोः प्रयोगः

ऐन्द्र्या वा गिरिकर्ण्या वा मूलं गोमूत्रयोगतः। गण्डमालां हरेत् पीतं चिरकालोत्थितामपि॥ २१॥

Root of indravāruṇī or aparājitā taken with cow's urine alleviates gaṇḍamālā, even if chronic. [21]

अलम्बुषास्वरसः

अलम्बुषादलोद्भूतात् स्वरसाद् द्वे पले पिबेत्। अपच्या गण्डमालायाः कामलायाश्च नाशनः॥ २२॥

One should take 80 ml. of the juice of alambuṣā leaves. It destroys apacī, gaṇḍamālā and kāmalā. [22]

भार्गीमूलप्रलेपः

गलगण्डं गण्डमालां कुरण्डांश्च विनाशयेत्। पिष्टं ज्येष्ठाम्बुना लेपान् मूलं ब्राह्मणयष्टिजम्॥ २३॥

External application of the paste of bhārgī root pounded with rice-water alleviates galagaṇḍa, gaṇḍamālā and scrotal anlargement. [23]

छुच्छुन्दरीतैलम्

अभ्यङ्गान्नाशयेन्नृणां गण्डमालां सुदारुणाम्। छुच्छुन्दर्य्या विपक्वन्तु क्षणात् तैलवरं ध्रुवम्॥ २४॥

Oil cooked with chuchunadarī, by anointment, alleviates severe galagaṇḍa. [24]

शाखोटकबिम्ब्याद्ये तैले

गण्डमालाऽपहं तैलं सिद्धं शाखोटकत्वचा। बिम्ब्यश्वमारनिर्गुण्डीसाधितञ्चापि नावनम्॥ २५॥

Oil processed with śākhoṭaka bark, by snuff, alleviates gaṇḍamālā. Similarly acts the same processed with bimbī, karavīra and nirguṇḍī. [25]

निर्गुण्डीतैलम्

निर्गुण्डीस्वरसेनाथ लाङ्गलीमूलकल्कितम्। तैलं नस्यान्निहन्त्याशु गण्डमालां सुदारुणाम्॥ २६॥

Nirguṇḍdī-taila

Oil cooked with nirguṇḍī juice and the paste of lāṅgalī root destroys by snuff, severe gaṇḍamālā. [26]

पूपिकाप्रयोगः

वनकार्पासिकामूलं तण्डुलैः सह योजितम्। पक्त्वा तु पूपिकां खादेदपचीनाशनाय च॥ २७॥

One should eat cake prepared of vanakārpāsī root mixed with rice. It destroys apacī. [27]

शोभाञ्जनादिलेपः

शोभाञ्जनं देवदारु काञ्जिकेन तु पेषितम्। कोष्णं प्रलेपतो हन्यादपचीमतिदुस्तराम्॥ २८॥

Hot paste of śobhāñjana and devadāru pounded with sour gruel alleviates severe apacī. [28]

सर्षपादिप्रलेपः

सर्षपारिष्टपत्राणि दग्ध्वा भल्लातकैः सह। छागमूत्रेण सम्पिष्टमपचीघ्नं प्रलेपनम्॥ २९॥

Sarṣapa and nimba leaves are burnt with bhallātaka and then pounded with goat's urine. It makes a good paste for apacī. [29]

अश्वत्थादिप्रलेपः

अश्वत्थकाष्ठं निचुलं गवां दन्तञ्च दाहयेत्। वराहमज्जसंयुक्तं भस्म हन्त्यपचीव्रणान्॥ ३०॥

अमृताद्यं तैलम्

तैलं पिबेच्चामृतवल्लिनिम्बहंसाह्वयावृक्षकपिप्पलीभिः।
सिद्धं बलाभ्याञ्च सदेवदारु हिताय नित्यं गलगण्डरोगी॥ १५॥

Amṛtādya taila

Intake of oil processed with amṛtā (guḍūcī), nimba, haṃsapadī, kuṭaja, pippalī, balā, atibalā and devadāru is efficacious in galagaṇḍa. [15]

गण्डमालायां वरुणक्वाथः

माक्षिकाढ्यः सकृत् पीतः क्वाथो वरुणमूलजः। गण्डमालां हरत्याशु चिरकालानुबन्धिनीम्॥ १६॥

Intake of the decoction of varuṇa root mixed with honey alleviates gaṇḍamālā even if chronic. [16]

काञ्चनारक्वाथः

पिष्ट्वा ज्येष्ठाम्बुना पेयाः काञ्चनारत्वचः शुभाः। विश्वभेषजसंयुक्ता गण्डमालाहराः पराः॥ १७॥

The bark of kāñcanāra pounded with rice-water and mixed with śuṇṭhī should be taken. It is excellent remedy for gaṇḍamālā. [17]

आरग्वधशिफाप्रयोगः

आरग्वधशिफां क्षिप्रं पिष्ट्वा तण्डुलवारिणा। सम्यङ्नस्यप्रलेपाभ्यां गण्डमालां समुद्धरेत्॥ १८॥

The root of āragvadha pounded with rice-water and used by snuff and paste alleviates gaṇḍamālā. [18]

गण्डमालायां नस्यार्थं योगाः

गण्डमालाऽऽमयार्त्तानां नस्यकर्मणि योजयेत्। निर्गुण्ड्याश्च शिफां सम्यग् वारिणा परिपेषिताम्॥
कोशातकीनां स्वरसेन नस्यं तुम्ब्यास्तु वा पिप्पलिसंयुतेन।
तैलेन वाऽरिष्टभवेन कुर्य्याद् वचोपकुल्ये सह माक्षिकेण॥ २०॥

The root of nirguṇḍī pounded with water should be used as snuff in gaṇḍamālā. [19]

Similar snuff is used with (1) kośātakī or kaṭutumbī juice mixed with pippalī or (2) nimba oil or (3) vacā and pippalī with honey. [20]

ऐन्द्रीगिरिकर्णिकयोः प्रयोगः

ऐन्द्र्या वा गिरिकर्ण्या वा मूलं गोमूत्रयोगतः। गण्डमालां हरेत् पीतं चिरकालोत्थितामपि॥ २१॥

Root of indravāruṇī or aparājitā taken with cow's urine alleviates gaṇḍamālā, even if chronic. [21]

अलम्बुषास्वरसः

अलम्बुषादलोद्भूतात् स्वरसाद् द्वे पले पिबेत्। अपच्या गण्डमालायाः कामलायाश्च नाशनः॥ २२॥

One should take 80 ml. of the juice of alambuṣā leaves. It destroys apacī, gaṇḍamālā and kāmalā. [22]

भार्गीमूलप्रलेपः

गलगण्डं गण्डमालां कुरण्डांश्च विनाशयेत्। पिष्टं ज्येष्ठाम्बुना लेपान् मूलं ब्राह्मणयष्टिजम्॥ २३॥

External application of the paste of bhārgī root pounded with rice-water alleviates galagaṇḍa, gaṇḍamālā and scrotal anlargement. [23]

छुच्छुन्दरीतैलम्

अभ्यङ्गान्नाशयेन्नृणां गण्डमालां सुदारुणाम्। छुच्छुन्दर्य्या विपक्वन्तु क्षणात् तैलवरं ध्रुवम्॥ २४॥

Oil cooked with chuchunadarī, by anointment, alleviates severe galagaṇḍa. [24]

शाखोटकबिम्ब्याद्ये तैले

गण्डमालाऽपहं तैलं सिद्धं शाखोटकत्वचा। बिम्ब्यश्वमारनिर्गुण्डीसाधितञ्चापि नावनम्॥ २५॥

Oil processed with śākhoṭaka bark, by snuff, alleviates gaṇḍamālā. Similarly acts the same processed with bimbī, karavīra and nirguṇḍī. [25]

निर्गुण्डीतैलम्

निर्गुण्डीस्वरसेनाथ लाङ्गलीमूलकल्कितम्। तैलं नस्यान्निहन्त्याशु गण्डमालां सुदारुणाम्॥ २६॥

Nirguṇḍdī-taila

Oil cooked with nirguṇḍī juice and the paste of lāṅgalī root destroys by snuff, severe gaṇḍamālā. [26]

पूपिकाप्रयोगः

वनकार्पासिकामूलं तण्डुलैः सह योजितम्। पक्त्वा तु पूपिकां खादेदपचीनाशनाय च॥ २७॥

One should eat cake prepared of vanakārpāsī root mixed with rice. It destroys apacī. [27]

शोभाञ्जनादिलेपः

शोभाञ्जनं देवदारु काञ्जिकेन तु पेषितम्। कोष्णं प्रलेपतो हन्यादपचीमतिदुस्तराम्॥ २८॥

Hot paste of śobhāñjana and devadāru pounded with sour gruel alleviates severe apacī. [28]

सर्षपादिप्रलेपः

सर्षपारिष्टपत्राणि दग्ध्वा भल्लातकैः सह। छागमूत्रेण सम्पिष्टमपचीघ्नं प्रलेपनम्॥ २९॥

Sarṣapa and nimba leaves are burnt with bhallātaka and then pounded with goat's urine. It makes a good paste for apacī. [29]

अश्वत्थादिप्रलेपः

अश्वत्थकाष्ठं निचुलं गवां दन्तञ्च दाहयेत्। वराहमज्जसंयुक्तं भस्म हन्त्यपचीव्रणान्॥ ३०॥

Aśvattha wood, nicula and cow's teeth are burnt. This ash mixed with pig's marrow should be used as paste on apacī wounds. [30]

दाहविधि:

पार्ष्णि प्रति द्वादश चाङ्गुलानि भित्त्वेन्द्रवस्तिं परिवर्ज्य सम्यक्।
विदार्य्य मत्स्याण्डनिभानि वैद्यो निष्कृष्य जालान्यनलं विदध्यात्॥ ३१॥
मणिबन्धोपरिष्टाद्वा कुर्य्याद्रेखात्रयं भिषक्। अङ्गुल्यन्तरितं सम्यगपचीनां प्रशान्तये॥ ३२॥

Moreover, the site twelve fingers above the heel is incised, avoiding the vital point indravasti (calf) carefully. After opening, the membranous structure like fish - eggs should be removed and then cauterized. [31]

For alleviation of apacī, the physician should make three linear marks at the interval of one finger (by cautery). [32]

मूलधारणं सिरावेधश्च

दण्डोत्पलाभवं मूलं बद्धं पुष्येऽपचीं जयेत्। अपामार्गस्य वा च्छिन्द्याज्जिह्वातलगते शिरे॥ ३३॥

One should wear in puṣya constellation, the root of daṇḍotpalā or apāmārga or incise the veins on the inferior surface of tongue. [33]

व्योषाद्यं तैलम्

व्योषं विडङ्गं मधुकं सैन्धवं देवदारु च। तैलमेभिः शृतं नस्यात् कृच्छ्रामप्यपचीं जयेत्॥ ३४॥

Vyoṣādya taila

Vyoṣa (trikaṭu), viḍaṅga, madhuka, saindhava and devadāru– oil cooked with these alleviates apacī, even severe, by snuffing. [34]

चन्दनाद्यं तैलम्

चन्दनं साभया लाक्षा वचा च कटुरोहिणी। एभिस्तैलं शृतं पीतं सशूलामपचीं जयेत्॥ ३५॥

Candanādya taila

Candana, harītakī, lākṣā, vacā and kaṭukā– oil cooked with these and taken internally eradicates apacī. [35]

गुञ्जाद्यं तैलं

गुञ्जाहयारिश्यामाऽर्कसर्षपैर्मूत्रसाधितम्। तैलन्तु दशधा पश्चात् कणालवणपञ्चक-॥ ३६॥
मरिचैश्चूर्णितैर्युक्तं सर्वावस्थागतां जयेत्। अभ्यङ्गादपचीं नाडीं वल्मीकार्शोऽर्बुदव्रणान्॥ ३७॥

Guñjādya taila

Oil cooked ten times with (the paste of) guñjā, karavīra, śyāmā, arka and sarṣapa along with urine and added with powder of pippalī, five salts and marica alleviates, by anointment, apacī, nāḍī, valmika, arśa, arbuda and vraṇa in all stages. [36-37]

ग्रन्थिषु चिकित्साक्रम:

ग्रन्थिष्वामेषु कुर्वीत भिषक् शोथप्रतिक्रियाम्। पक्वानापाट्य संशोध्य रोपयेद् व्रणभेषजै: ।। ३८ ।।

Treatment of granthi

In unripe granthi, anti-inflammatory measure should be adopted while the ripe ones should be opened, cleaned and healed with drugs useful in wounds. [38]

हिंस्रादिप्रलेप:

हिंस्रा सरोहिण्यमृता च भार्गी श्योनाकबिल्वागुरुकृष्णगन्धा: ।
गोपित्तपिष्टा: सह तालपर्ण्या ग्रन्थौ विधेयोऽनिलजे प्रलेप: ।। ३९ ।।

In vātika granthi, the local application of the following paste is prescribed- hiṃsrā, rohiṇī, guḍūcī, bhārgī, śyonāka, bilva, aguru, śigru and tālaparṇī (kṛṣṇa muśalī) pounded with ox-bile. [39]

पैत्तिकग्रन्थिचिकित्सा

जलायुका: पित्तकृते हितास्तु क्षीरोदकाभ्यां परिषेचनञ्च।
काकोलिवर्गस्य तु शीतलानि पिबेत् कषायाणि सशर्कराणि ।। ४० ।।

In paittika granthi leeches should be applied, the part should be washed with milk and water and cold decoction of kākolyādi drugs mixed with sugar should be taken internally. [40]

हरीतकीचूर्णम्, मधूकादिप्रलेपश्च

द्राक्षारसेनेक्षुरसेन वाऽपि चूर्णं पिबेद्वाऽपि हरीतकीनाम्।
मधूकजम्ब्वर्जुनवेतसानां त्वग्भि: प्रदेहानवतारयेच्च ।। ४१ ।।

Besides, the harītakī powder should be taken with grape juice or sugarcane juice. The part should also be pasted with pounded bark of madhūka, jambū, arjuna and vetasa. [41]

श्लैष्मिकग्रन्थिचिकित्सा

हृतेषु दोषेषु यथानुपूर्व्या ग्रन्थौ भिषक् श्लेष्मसमुत्थिते च।
स्विन्ने च विम्लापनमेव कुर्यादङ्गुष्ठवेणुदृषदीसुतैश्च ।। ४२ ।।

In case of kaphaja granthi, the impurities should be ediminated first by emesis etc followed by fomentation. Then the granthi should be pressed with thumb, bamboo-stick or stone-slab. [42]

विकङ्कतादिप्रलेप:

विकङ्कतारग्वधकाकणन्तीकाकादनीतापसवृक्षमूलै: ।
आलेपयेदेनमलाबुभार्गीकरञ्जकालामदनैश्च विद्वान् ।। ४३ ।।

Vikaṅkatādi lepa

The paste of vikaṅkata, āragvadha, guñjā, kākādanī, iṅgudī (all roots), alābū, bhārgī, karañja, mañjiṣṭhā and madana should be applied on the part. [43]

दन्त्यादिलेपः

दन्ती चित्रकमूलत्वक् स्नुह्यर्कपयसी गुडः। भल्लातकास्थि काशीशं लेपो भिन्द्याच्छिलामपि॥ ४४॥

Dantyādi lepa

Dantī, citraka (root bark), latex of snuhī and arka, jaggery, bhallātaka and kāsīsa—this paste disintegrates even stone (let alone the granthi). [44]

ग्रन्थ्यर्बुदादिजिल्लेपः

ग्रन्थ्यर्बुदादिजिल्लेपो मातृवाहककीटजः॥ ४५॥

Application of mātṛvāhaka insect also alleviates granthi, arbuda etc. [45]

स्वर्जिकादिप्रलेपः

स्वर्जिकामूलकक्षारः शङ्खचूर्णसमन्वितः। प्रलेपो विहितस्तीक्ष्णो हन्ति ग्रन्थ्यर्बुदादिकान्॥ ४६॥

Svarjikādi pralepa

Svarjikā and alkali of radish are mixed with śaṅkha-bhasma and this caustic paste is applied to the part. It destroys granthi, arbuda etc. [46]

अग्निक्षारप्रयोगौ

ग्रन्थीनमर्मप्रभवानपक्वानुद्धृत्य वाऽग्निं विदधीत वैद्यः।
क्षारेण वैतान् प्रतिसारयेत्तु संलिख्य संलिख्य यथोपदेशम्॥ ४७॥

Or the unripe granthi, not located in vital parts, should be excised and cauterized thereafter. Or caustic alkali should be applied to them after scraping once and again. [47]

अर्बुदचिकित्सा

ग्रन्थ्यर्बुदानाञ्च यतोऽविशेषः प्रदेशहेत्वाकृतिदोषदूष्यैः।
ततश्चिकित्सेद्भिषगर्बुदानि विधानविद् ग्रन्थिचिकित्सितेन॥ ४८॥

Arbuda

As there is no much difference between granthi and arbuda in respect of location, etilogy, signs, doṣa and dūṣya, the physician should treat arbuda like granthi. [48]

वातार्बुदचिकित्सा

वातार्बुदे चाप्युपनाहनानि स्निग्धैश्च मांसैरथ वेशवारैः।
स्वेदं विदध्यात् कुशलस्तु नाड्या शृङ्गेण रक्तं बहुशो हरेच्च॥ ४९॥

In vātika arbuda, poultices should be applied with fatty meat and spicy preparations

followed by tube fomentation. Besides, blood-letting should be done adequetely with horn. [49]

पित्तार्बुदचिकित्सा

स्वेदोपनाहा मृदवस्तु पथ्याः पित्तार्बुदे कायविरेचनञ्च॥५०॥
विघृष्य चोदुम्बरशाकगोजीपत्रैर्भृशं क्षौद्रयुतैः प्रलिम्पेत्।
श्लक्ष्णीकृतैः सर्जरसप्रियङ्गुपत्तङ्गलोध्रार्जुनयष्टिकाऽऽह्वैः॥५१॥

In paittika arbuda moderate fomentation and poultices should be applied apart from administration of purgatives. Moreover, the part should be rubbed with the (rough) leaves of udumbara, śāka and gojī and then paste of sarjarsa, priyaṅgu, pattaṅga, lodhra, arjuna and madhuyaṣṭī mixed with honey is applied thereto. [50-51]

कफार्बुदचिकित्सा

लेपनं शंखचूर्णेन सह मूलकभस्मना। कफार्बुदापहं कुर्य्याद् ग्रन्थ्यादिषु विशेषतः॥५२॥

In kaphaja arbuda, paste of śaṅkhabhasma mixed with ash of radish should be applied. This is also useful in granthi etc. [52]

निष्पावादिलेपः

निष्पावपिण्याककुलत्थकल्कैर्मांसैः प्रगाढैर्दधिमर्दितैश्च।
लेपं विदध्यात् क्रिमयो यथाऽत्र मुञ्चन्त्यपत्यान्यथ मक्षिका वा॥५३॥

अर्बुदे शस्त्रादिक्रियाक्रमः

अल्पावशिष्टं क्रिमिभिः प्रजग्धं लिखेत् ततोऽग्निं विदधीत पश्चात्।
यदल्पमूलं त्रपुताम्रसीसैः संवेष्ट्य पत्रैरथवाऽऽयसैर्वा॥५४॥
क्षाराग्निशस्त्राण्यवतारयेच्च मुहुर्मुहुः प्राणमवेक्षमाणः।
यदृच्छया चोपगतानि पाकं पाकक्रमेणोपचरेद् यथोक्तम्॥५५॥
सशेषदोषाणि हि योऽर्बुदानि करोति तस्याशु पुनर्भवन्ति।
तस्मादशेषाणि समुद्धरेत्तु हन्युः सशेषाणि यथा विषाग्नी॥५६॥

The paste of nispāva, oil cake and kulattha, profuse meat and curd is applied so that flies and insects grow there and eat the part. After this whatever portion is left should be scraped and cauterized on covering it with the folds of tin, copper lead or iron. Keeping in view the strength of the patient, alkali, cauterization and surgical operation should be adopted frequently. By chance if it suppurates, it should be treated accordingly. The Physician should be particularly cautious in eradicating the arbuda completely as even a small portion left regenerates like poison and fire. [53-56]

उपोदिकाप्रयोगः

उपोदिकारसाभ्यक्तास्तत्पत्रपरिवेष्टिताः। प्रणश्यन्त्यचिरान्नृणां पिडकाऽर्बुदजातयः॥५७॥

Granthis like arbuda are readily destroyed by washing with the juice of upodikā and wrapping with the leaves of the same. [57]

उपोदिकोपनाहः

उपोदिका काञ्जिकतक्रपिष्टा तयोपनाहो लवणेन मिश्रः।
दृष्टोऽर्बुदानां प्रशमाय कैश्चिद् दिने दिने रात्रिषु मर्मजानाम्॥ ५८॥

Application of poultice of upodikā pounded with sour gruel and buttermilk mixed with salt in night destroys arbudas located in vital parts. [58]

अर्बुदहरौ लेपौ

लेपोऽर्बुदजिद्रम्भामोचकभस्मतुषशङ्खचूर्णकृतः। शरटरुधिरार्द्रगन्धकयवजविडङ्गनागरैर्वाऽथ॥ ५९॥

Paste of the ash of kadalī and mocaka (śālmali), husk and śankhabhasma or sulphur, yavakṣāra, viḍaṅga and śuṇṭhī mixed with blood of chameleon destroys arbuda. [59]

स्वेदप्रयोगाः

स्नुहीगण्डीरिकास्वेदो नाशयेदर्बुदानि च। सीसकेनाथ लवणैः पिण्डारकफलेन वा॥ ६०॥

Fomentation with stem pieces of snuhī, lead-piece, salt or piṇḍāraka fruit destroys arbuda. [60]

हरिद्रादिलेपः

हरिद्रालोध्रपत्तङ्गगृहधूममनःशिलाः। मधुप्रगाढो लेपोऽयं मेदोऽर्बुदहरः परः॥ ६१॥

Application of the paste of haridrā, lodhra, pattaṅga, soot and realgar profusely mixed with honey is excellent remedy for medorbuda. [61]

शर्करार्बुदचिकित्सा

एतामेव क्रियां कुर्य्यादशेषां शर्करार्बुदे॥ ६२॥

The same procedure should be adopted in śarkarārubda. [62]

॥ इति गलगण्डगण्डमालाऽपचीग्रन्थ्यर्बुदचिकित्सा॥ ४१॥

Thus ends treatment of galagaṇḍa, gaṇḍamālā, apacī, granthi and arbuda. [41]

४२. द्विचत्वारिंशोऽध्यायः

CHAPTER XLII

श्लीपद-चिकित्सा

Treatment of Ślīpada (filaria)

क्रियाक्रमः

लङ्घनालेपनस्वेदरेचनै रक्तमोक्षणैः। प्रायः श्लेष्महरैरुष्णैः श्लीपदं समुपाचरेत्॥ १॥

Principle of treatment

Ślīpada should be treated with lightening, pastes, fomentation, purgation, blood-letting and generally by administering kapha-alleviating and hot drugs. [1]

धुस्तूरादिप्रलेपः

धुस्तूरैरण्डनिर्गुण्डीवर्षाभूशिग्रुसर्षपैः। प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम्॥ २॥

Dhustūrādi pralepa

The external application of the paste of dhattūra, eraṇḍa, nirguṇḍī, punarnavā, śigru and sarṣapa alleviates ślīpada, even if chronic and severe. [2]

रूपिकामूलप्रलेपः

निष्पिष्टमारनालेन रूपिकामूलवल्कलम्। प्रलेपाच्छ्लीपदं हन्ति बद्धमूलमपि दृढम्॥ ३॥

Root-bark of rūpikā (arka) pounded with sour gruel, by plastering, alleviates filaria even if deep-rooted. [3]

वन्दाकशिफायाः पानं धारणञ्च

पिण्डारकतरुसम्भववन्दाकशिफा जयति सर्पिषा पीता। श्लीपदमुग्रं नियतं बद्धा सूत्रेण जङ्घायाम्॥

Root of vandāka arisen from the piṇḍāraka plant should be taken with ghee or the same is worn with thread in thigh. It positively overcomes ślīpada. [4]

लेपत्रयम्

हितश्चालेपने नित्यं चित्रको देवदारु वा। सिद्धार्थशिग्रुकल्को वा सुखोष्णो मूत्रपेषितः॥ ५॥

External application of the lukewarm paste of citraka or devadāru or mustard and śigru pounded with urine is erficacious in ślīpada. [5]

वातजश्लीपदे शिराव्यधः

स्नेहस्वेदोपनाहांश्च श्लीपदेऽनिलजे भिषक्। कृत्वा गुल्फोपरि शिरां विध्येत्तु चतुरङ्गुले॥ ६॥

In vātika ślīpada, unction, fomentation and poultice should be applied, thereafter venesection be performed in the vein four fingers above the ankle (on back). [6]

पैत्तिकश्लीपदे शिराव्यध:

गुल्फस्याध: शिरां विध्येच्छ्लीपदे पित्तसम्भवे। पित्तघ्नीश्च क्रियां कुर्यात् पित्तार्बुदविसर्पवत्॥ ७॥

In ślīpada caused by pitta, vein should be incised below the ankle. Besides, pitta-alleviating measures should be adopted as in paittika arbuda and visarpa. [7]

मञ्जिष्ठादिप्रलेप:

मञ्जिष्ठां मधुकं रास्नां सहिंस्रां सपुनर्नवाम्। पिष्ट्वाऽऽरनालैर्लेपोऽयं पित्तश्लीपदशान्तये॥ ८॥

Mañjiṣṭhādi pralepa

Mañjiṣṭhā, madhuka, rāsnā, hiṃsrā and punarnavā– these should be pounded with sour gruel and the paste should be applied as plaster in paittika ślīpada. [8]

श्लेष्मजश्लीपदे शिराव्यध:

शिरां सुविदितां विध्येदङ्गुष्ठे श्लेष्मश्लीपदे। मधुयुक्तानि चाभीक्ष्णं कषायाणि पिबेन्नर:॥ ९॥

In kaphaja ślīpada, one should puncture the well known vein in thumb. Besides, decoctions mixed with honey should be used. [9]

पूतीकरञ्जपत्ररसप्रयोग:

पिबेत् सर्षपतैलेन श्लीपदानां निवृत्तये। पूतीकरञ्जच्छदजं रसं वाऽपि यथाबलम्॥ १०॥

Or the juice of pūtikarañja leaves should be taken with mustard oil, according to strength, in order to alleviate ślīpada. [10]

पुत्रञ्जीवकरस: वृद्धदारकचूर्णञ्च

अनेनैव विधानेन पुत्रञ्जीवकजं रसम्। काञ्जिकेन पिबेच्चूर्णं मूत्रैर्वा वृद्धदारजम्॥ ११॥

By the same method, one should take the juice of putrajīvaka, or the powder of vṛddhadāraka may be taken with sour gruel or urine. [11]

गुडहरिद्राप्रयोग:

रजनीं गुडसंयुक्तां गोमूत्रेण पिबेन्नर:। वर्षोत्थं श्लीपदं हन्ति दद्रुकुष्ठं विशेषत:॥ १२॥

Haridrā mixed with jaggery should be taken with cow's urine. It alleviates ślīpada of a year's duration in addition to ring worm and other skin affections. [12]

भृष्टहरीतकीप्रयोग:

गन्धर्वतैलभृष्टां हरीतकीं गोजलेन य: पिबति। श्लीपदबन्धनमुक्तो भवत्यसौ सप्तरात्रेण॥ १३॥

One who takes, with cow's urine, harītakī fried with castor oil is relieved of ślīpada by a week. [13]

तैलधान्याम्लप्रयोग:

धान्याम्लं तैलसंयुक्तं कफवातविनाशनम्। दीपनश्चामदोषघ्नमेतच्छ्लीपदनाशनम्॥ १४॥

Sour gruel mixed with oil pacifies kapha and vāta, stimulates digestion and alleviates āmadoṣa and ślīpada. [14]

श्लीपदज्वरहरो योग:

गोधावतीमूलयुक्तां खादेन्माषेण्डरीं नर:। जयेच्छ्लीपदकोपोत्थं ज्वरं सद्यो न संशय:॥ १५॥

The patient should take baḍā (black gram cake) mixed with godhāvati root. By this he is relieved of the filarial fever. [15]

गुडूचीस्वरसप्रयोग:

श्लीपदघ्नो रसोऽभ्यासाद् गुडूच्यास्तैलसंयुत:॥ १६॥

Regular use of the juice of guḍūcī mixed with oil alleviates ślīpada. [16]

समवृद्धदारकचूर्णम्

त्रिकटुत्रिफलाचव्यं दार्वीवरुणगोक्षुरम्। अलम्बुषां गुडूचीश्च समभागानि चूर्णयेत्॥ १७॥
सर्वेषां चूर्णमाहृत्य वृद्धदारस्य तत्समम्। काञ्जिकेन च तत् पेयमक्षमात्रं प्रमाणत:॥ १८॥
जीर्णे चापरिहारं स्याद् भोजनं सार्वकामिकम्। नाशयेच्छ्लीपदं स्थौल्यमामवातश्च दारुणम्॥
कुष्ठगुल्मानिलहरं वातश्लेष्मज्वरापहम्॥ १९॥

Samavṛddhadāraka-cūrṇa I

Trikaṭu, triphalā, cavya, dāruharidrā, varuṇa, gokṣura, alumbuṣā and guḍūcī– all in equal quantity and Vṛddhadāraka equal to the above total. This powder in the dose of 10 gm should be taken with sour gruel. There is no restriction of diet during this regimen. It destroys ślīpada, obesity, āmavāta, kuṣṭha, gulma, and fever caused by vāta and kapha. [17-19]

अपरं समवृद्धदारकचूर्णम् (पिप्पल्याद्यं चूर्णम्)

पिप्पलीत्रिफलादारुनागरं सपुनर्नवम्। भागैर्द्विपलिकैरेषां तत्समं वृद्धदारकम्॥ २०॥
काञ्जिकेन पिबेच्चूर्णं कर्षमात्रं प्रमाणत:। जीर्णे चापरिहारं स्याद् भोजनं सार्वकामिकम्॥ २१॥
श्लीपद वातरोगांश्च हन्यात् प्लीहानमेव च। अग्निश्च कुरुते घोरं भस्मकञ्च नियच्छति॥ २२॥

Samavṛddhadāraka-cūrṇa II

Pippalī, triphalā, devadāru, śuṇṭhī and punarnavā each 80 gm, vṛddhadāraka equal to the above total– This powder in the dose of 10 gm should be taken with sour gruel. There is no restriction of diet. It alleviates ślīpada, vātavyādhi and plīha, stimulates digestive fire and controls bhasmaka. [20-22]

कृष्णाद्यो मोदक:

कृष्णाचित्रकदन्तीनां कर्षमर्द्धपलं पलम्। विंशतिश्च हरीतक्यो गुडस्य तु पलद्वयम्॥
मधुना मोदकं खादेच्छ्लीपदं हन्ति दुस्तरम्॥ २३॥

Kṛṣṇādya modaka

Kṛṣṇā (pippalī), citraka, and dantī 10, 20 and 40 gm respectively, harītakī fruits 20 (in number) and jaggery 80 gm– all pounded together should be mixed with honey and made into modaka. It destroys ślīpada, even if severe. [23]

सौरेश्वरघृतम्

सुरसा देवकाष्ठञ्च त्रिकटुत्रिफले तथा। लवणान्यथ सर्वाणि विडङ्गान्यथ चित्रकम्॥ २४॥
चविका पिप्पलीमूलं गुग्गुलुर्हवुषा वचा। यवाग्रजश्च पाठा च शटयेला वृद्धदारकम्॥ २५॥
कल्कैश्च कार्षिकैरेभिर्घृतप्रस्थं विपाचयेत्। दशमूलीकषायेण धान्ययूषद्रवेण च॥ २६॥
दधिमण्डसमायुक्तं प्रस्थं प्रस्थं पृथक् पृथक्। पक्वं स्यादुद्धृतं कल्कात् पिबेत् कर्षद्वयं हविः॥ २७॥
श्लीपदं कफवातोत्थं मांसरक्ताश्रितश्च यत्। मेदःश्रितञ्च पित्तोत्थं हन्यादेव न संशयः॥ २८॥
अपचीं गण्डमालाश्च अन्त्रवृद्धिं तथाऽर्बुदम्। नाशयेद् ग्रहणीदोषं श्वयथुं गुदजानि च॥ २९॥
परमग्निकरं हृद्यं कोष्ठक्रिमिविनाशनम्। घृतं सौरेश्वरं नाम श्लीपदं हन्ति सेवितम्॥
जीवकेन कृतं ह्येतद् रोगानीकविनाशनम्॥ ३०॥

Saureśvara ghṛta

Surasā, devadāru, trikaṭu, triphalā, all salts, viḍaṅga, citraka, cavikā, pippalīmūla, guggulu, hapuṣā, vacā, yavakṣāra, pāṭhā, śaṭī, elā and vṛddhadāraka each 10 gm– with the paste of these ghee 640 gm is cooked along with decoction of daśamūla, sour gruel and curd-water each 640 gm. The dose of ghee is 20 gm.

It destroys all types of ślīpada. Besides, it alleviates apacī, gaṇḍamālā, antravṛddhi, arbuda, grahaṇīdoṣa, oedema and piles. It stimulates digestive fire, is cardiac tonic and anthelmintic.

This saureśvara ghṛta formulated by Jīvaka destroys groups of disorders particularly ślīpada. [24-30]

विडङ्गाद्यं तैलम्

विडङ्गमरिचार्केषु नागरे चित्रके तथा। भद्रदार्वेलकाख्येषु सर्वेषु लवणेषु च॥
तैलं पक्वं पिबेद्वाऽपि श्लीपदानां निवृत्तये॥ ३१॥

Viḍaṅgādya taila

Viḍaṅga, marica, arka, śuṇṭhī, citraka, devadāru, elaka, all salts– with these oil is cooked By intake it alleviates ślīpada. [31]

॥ इति श्लीपदचिकित्सा॥ ४२॥

Thus ends treatment of ślīpada. [42]

४३. त्रिचत्वारिंशोऽध्यायः

CHAPTER XLIII

विद्रधि-चिकित्सा

Treatment of Vidradhi (abscess)

क्रियासूत्रम्

जलौकापातनं शस्तं सर्वस्मिन्नेव विद्रधौ। मृदुर्विरेको लघ्वन्नं स्वेदः पित्तोद्भवं विना॥ १॥

Principle of treatment

In all types of vidradhi, application of leeches, mild purgative, light diet and fomentation (except in paittika type) are prescribed. [1]

वातविद्रधौ लेपः

वातघ्नमूलकल्कैस्तु वसातैलघृताप्लुतैः। सुखोष्णो बहलो लेपः प्रयोज्यो वातविद्रधौ॥ २॥

In vātavidradhi, thick and lukewarm paste added with profuse fat, oil and ghee should be applied. [2]

विद्रधिशोथहरो लेपः

स्वेदोपनाहाः कर्त्तव्या शिग्रुमूलसमन्विताः॥ ३॥

यवादिप्रलेपः

यवगोधूममुद्गैश्च सिद्धपिष्टैः प्रलेपयेत्। विलीयते क्षणेनैवमपक्वश्चैव विद्रधिः॥ ४॥

Moreover, fomentation and poultices should be used in combination with śigru root. [3]

Paste of boiled and pounded barley, wheat and green gram should be applied. By this immature abscess is dissolved quickly. [4]

गुग्गुलु-एरण्डतैलप्रयोगः

पुनर्नवादारुविश्वदशमूलाभयाऽम्भसा। गुग्गुलुं रुबुतैलं च पिबेन्मारुतविद्रधौ॥ ५॥

In vātika vidradhi, one should take guggulu or castor oil with the decoction of punarnavā, devadāru, śuṇṭhī, daśamūla and harītakī. [5]

पैत्तिकविद्रधिचिकित्सा

पैत्तिकं शर्करालाजामधुकैः शारिवायुतैः। प्रदिह्यात् क्षीरपिष्टैर्वा पयस्योशीरचन्दनैः॥ ६॥
पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्काक्षसंयुतम्। पञ्चवल्कलकल्केन घृतमिश्रेण लेपनम्॥ ७॥

In paittika type, the abscess should be pasted with (1) śarkarā, parched paddy, madhuka and sārivā or (2) payasyā, uśīra and candana pounded with milk. [6]

Or one should take decoction of triphalā mixed with paste of trivṛt 10 gm. Moreover, the spot should be covered with the paste of pañcavalkala mixed with ghee. [7]

यष्ट्याह्वादिलेपः

यष्ट्याह्वशारिवादूर्वानलमूलैः सचन्दनैः। क्षीरपिष्टैः प्रलेपस्तु पित्तविद्रधिशान्तये॥ ८॥

Yaṣṭyāhvādi lepa

Yaṣṭyāhva (madhuyaṣṭī), sārivā, dūrvā, nala (root) and candana– these are pounded together with milk and applied externally for alleviation of paittika vidradhi. [8]

श्लैष्मिकविद्रधौ स्वेदः

इष्टकासिकतालौहगोशकृत्तुषपांशुभिः। मूत्रपिष्टैश्च सततं स्वेदयेच्छ्लेष्मविद्रधिम्॥ ९॥

Kaphaja vidradhi should be fomented with hot brick, sand, iron, cowdung, husk and dust and also pastes with hot urine. [9]

दशमूलीक्वाथपरिषेकः

दशमूलीकषायेण सस्नेहेन रसेन वा। शोथं व्रणं वा कोष्णेन सशूलं परिषेचयेत्॥ १०॥

The painful inflammation or wound should be sprinkled with unctuous decoction of daśamūla or meat-soup. [10]

गुग्गुलुप्रयोगः

त्रिफलाशिग्रुवरुणदशमूलाम्भसा पिबेत्। गुग्गुलुं मूत्रयुक्तं वा विद्रधौ कफसम्भवे॥ ११॥

In case of kaphaja vidradhi, one should take guggulu with the decoction of triphalā, śigru, varuṇa and daśamūla or with urine. [11]

रक्तजागन्तुजविद्रधिचिकित्सा

पित्तविद्रधिवत् सर्वां क्रियां निरवशेषतः। विद्रध्योः कुशलः कुर्याद् रक्तागन्तुनिमित्तयोः॥ १२॥

In raktaja and exogenus types, all measures prescribed for paittika vidradhi should be adopted. [12]

शोभाञ्जनक्वाथः

शोभाञ्जनकनिर्यूहो हिङ्गुसैन्धवसंयुतः। अचिराद्विद्रधीन् हन्ति प्रातः प्रातर्निषेवितः॥ १३॥

Decoction of śobhāñjana mixed with hiṅgu and saindhava, and used in morning alleviates vidradhi quickly. [13]

शिग्रुरसप्रयोगः

शिग्रुमूलं जले धौतं दरपिष्टं प्रगालयेत्। तद्रसं मधुना पीत्वा हन्त्यन्तर्विद्रधिं नरः॥ १४॥

The root of śigru washed with water is pounded on stone-slab and the juice so extracted is taken with honey. It destroys internal abscess. [14]

श्वेतवर्षाभ्वादिक्वाथः

श्वेतवर्षाभुवो मूलं मूलं वरुणकस्य च। जलेन क्वथितं पीतमपक्वं विद्रधिं जयेत्॥ १५॥

Śveta Varṣābhvādi kvātha

The root of śveta varṣābhū (punarnavā) and varuṇa are decocted in water. Intake of this decoction overcomes the unripe abscess. [15]

वरुणादिक्वाथ:

वरुणादिगणक्वाथमपक्वेऽभ्यन्तरोत्थिते। ऊषकादिप्रतीवापं पिबेत् संशमनाय वै॥ १६॥

For treatment of unripe internal abscess one should take decoction of varuṇādi gaṇa (drugs) added with ūṣakādi gaṇa (drugs). [16]

पाठाप्रयोग:

शमयति पाठामूलं क्षौद्रयुतं तण्डुलाम्बुना पीतम्। अन्तर्भूतं विद्रधिमुद्धतमाश्वेव मनुजस्य॥ १७॥

Pāṭhā root (pounded) mixed with honey and taken with rice-water subsides internal abscess quickly. [17]

पक्वापक्वान्तर्विद्रधिचिकित्साविधि:

अपक्वे त्वेतदुद्दिष्टं पक्वे तु व्रणवत् क्रिया॥ १८॥

स्रुतेऽप्यूर्ध्वमधश्चैव मैरेयाम्लसुरासवै:। पेयो वरुणकादिस्तु मधुशिग्रुद्रुमोऽथ वा॥ १९॥

The management of the unripe vidradhi is prescribed above. However, the ripe one should be managed like wound. [18]

If the internal abscess is (burst and) drained by upper and lower routes, varuṇādi gaṇa (drugs) or madhuśigru (root) should be taken with maireya, sour gruel, wine and āsava. [19]

प्रियङ्ग्वादितैलम्

प्रियङ्गुधातकीलोध्रं कट्फलं तिनिशत्वचम्। एतैस्तैलं विपक्तव्यं विद्रधौ रोपणं परम्॥ २०॥

Priyaṅgvādi taila

Oil is cooked with priyaṅgu, dhātakī, lodhra, kaṭphala and tiniśa bark. It acts as efficacious healing in vidradhi. [20]

॥ इति विद्रधिचिकित्सा॥ ४३॥

Thus ends treatment of vidradhi. [43]

४४. चतुश्चत्वारिंशोऽध्यायः

CHAPTER XLIV

व्रणशोथ-चिकित्सा

Treatment of Vraṇaśotha (inflammation)

सप्त क्रियाक्रमाः

आदौ विम्लापनं कुर्याद् द्वितीयमवसेचनम्। तृतीयमुपनाहश्च चतुर्थीं पाटनक्रियाम्॥ १॥
पञ्चमं शोधनश्चैव षष्ठं रोपणमिष्यते। एते क्रमा व्रणस्योक्ताः सप्तमो वैकृतापहः॥ २॥

Seven measures

(1) Enfeebling (2) evacuation (3) poultice (4) incision (5) cleaning (6) healing and (7) alleviation of abnormality– these are the seven measures in the treatment of vraṇa (wound). [1-2]

मातुलुङ्गादिलेपः

मातुलुङ्गाग्निमन्थौ च भद्रदारु महौषधम्। अहिंस्रा चैव रास्ना च प्रलेपो वातशोथहा॥ ३॥

Mātuluṅgādi lepa

Mātuluṅga, agnimantha, devadāru, śuṇṭhī, ahiṃsrā and rāsnā-- this paste alleviates vātika śotha. [3]

शाखोटकत्वक्कल्कः

कल्कः काञ्जिकसम्पिष्टः स्निग्धः शाखोटकत्वचः। सुपर्ण इव नागानां वातशोथविनाशनः॥ ४॥

Application of the paste of śakhotaka bark pounded with sour gruel and mixed with ghee destroys vātika śotha as garuḍa kills serpents. [4]

दूर्वादिप्रलेपः

दूर्वा च नलमूलश्च मधुकं चन्दनं तथा। शीतलाश्च गणाः सर्वे प्रलेपः पित्तशोथहा॥ ५॥

Dūrvādi pralepa

Dūrvā, nala (root), madhuka, candana and other groups of śītavīrya drugs (such as kākolyādi, utpalādi and lodhrādi)– the paste of these alleviate paittika śotha. [5]

न्यग्रोधादिप्रलेपः

न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः। ससर्पिष्कैः प्रलेपः स्याच्छोथनिर्वापणः स्मृतः॥ ६॥

Nyagrodhādi pralepa

The paste of nyagrodha, udumbara, aśvattha, plakṣa, and vetasa (pañcavalkala or pañca ksīrī) mixed with ghee applied externally alleviates (paittika) śotha. [6].

रक्तजागन्तुजव्रणशोथयोश्चिकित्सा

आगन्तौ शोणितोत्थे च एष एव क्रियाक्रमः ॥ ७ ॥

The same measures be adopted in śotha exogenous and caused by rakta. [7]

अजगन्धादिप्रलेपः

अजगन्धाऽश्वगन्धा च काला सरलया सह। एकेशिकाऽजश्रृङ्गी च प्रलेपः श्लेष्मशोथहा ॥ ८ ॥

Ajagandhādi pralepa

Ajagandhā, aśvagandhā, kālā (ahiṃsrā), trivṛt, pāṭhā, and ajaśṛṅgī– this paste alleviates kaphaja śotha. [8]

पुनर्नवादिप्रलेपः

पुनर्नवादारुशिग्रुदशमूलमहौषधैः। कफवातकृते शोथे लेपः कोष्णो विधीयते ॥ ९ ॥

Punarnavādi Pralepa

The warm paste of punarnavā, devadāru, śigru, daśamūla and śuṇṭhī is applied in śotha caused by kapha and vāta. [9]

प्रलेपविधिः

न रात्रौ लेपनं दद्याद् दत्तश्च पतितं तथा। न च पर्य्युषितं शुष्यमाणं नैवावधीरयेत् ॥ १० ॥
शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति। न चापि मुखमालिम्पेत् तेन दोषः प्रसिच्यते ॥ ११ ॥

Paste should not be applied in night, the applied and fallen one should not be put again, the stale paste should not be used and the dried one should be removed except when it is intended for pressure. The opening should not be covered as impurity (pus) is discharged therefrom. [10-11]

कठिनव्रणशोथे विम्लापनविधिः

स्थिरान् मन्दरुजः शोथान् स्नेहैर्वातकफापहैः। अभ्यज्य स्वेदयित्वा च वेणुनाड्या ततः शनैः।
विम्लापनार्थं मृद्नीयात् तलेनाङ्गुष्ठकेन वा ॥ १२ ॥

The hard and painless śothas should be anoinated with unctuous substances alleviating vāta and kapha, fomented and then slowly pressed with bamboo stick, palm or thumb for enfeebling. [12]

रक्तमोक्षणम्

रक्तावसेचनं कुर्यादादावेव विचक्षणः। शोथे महति संरब्धे वेदनावति च व्रणे ॥ १३ ॥
निवारणाय पाकस्य वेदनोपशमाय च। अचिरोत्पतिते शोथे कार्य्यं शोणितमोक्षणम् ॥ १४ ॥

In severe inflammation with congestion and pain, blood-letting should be done in the beginning. [13]

In order to prevent suppuration and to alleviate pain, blood-letting should be done in acute inflammation. [14]

रक्तमोक्षणस्योपादेयता

यो न याति शमं लेपस्वेदसेकावतर्पणैः। सोऽपि नाशं व्रजत्याशु शोथः शोणितमोक्षणात्॥ १५॥

Even the inflammation which does not respond to paste, fomentation, sprinkling and desaturation subsides by blood-letting. [15]

रक्तमोक्षणस्य महत्त्वम्

एकतश्च क्रियाः सर्वा रक्तमोक्षणमेकतः। रक्तं हि व्यम्लतां याति तच्च नास्ति न चास्ति रुक्॥ १६॥

On one side are all the measures together while on the other stands blood-letting alone. The main cause is the excessive sourness of blood and when it is eliminated the pain disappears. [16]

पक्वस्य पाटनम्

स चेदेवमुपक्रान्तः शोथो न प्रशमं व्रजेत्। तस्योपनाहैः पक्वस्य पाटनं हितमुच्यते॥ १७॥

If the inflammation does not subside with these measure, poultices should be applied and when ripened it should be incised. [17]

पाकार्थमुपनाहः

तैलेन सर्पिषा वाऽपि ताभ्यां वा शक्तुपिण्डिका। सुखोष्णः शोथपाकार्थमुपनाहः प्रशस्यते॥ १८॥

The mass of parched grain flour mixed with oil or ghee or both and slightly heated should be applied as poultices for ripening of inflammation. [18]

तिलाद्युपनाहः

सतिला सातसीबीजा दध्यम्ला शक्तुपिण्डिका। सकिण्वकुष्ठलवणा शस्ता स्यादुपनाहने॥ १९॥

Tilādyupanāha

The mass of parched grain flour mixed with sesamum, linseed, yeast, kuṣṭha and salt and moistened with sour curd should be used as poultice. [19]

बालवृद्धादीनां शोथे पाचनदारणार्थं प्रलेपः

बालवृद्धासहक्षीणभीरूणां योषितामपि। मर्मोपरि च जाते तु पक्वे शोथे च दारुणे॥ २०॥
गवां दन्तं जले घृष्टं बिन्दुमात्रं प्रलेपनात्। अत्यर्थकठिने वाऽपि शोथे पाचनभेदनम्॥ २१॥

In cases of children, old persons, intolerants, debililated, timid and women and when severe inflammation in some vital part ripens cow's tooth rubbed in water should be applied a drop, by this even the hard inflammation is ripened and bursts. [20-21]

सर्पनिर्मोकलेपः

कटुतैलान्वितैर्लेपात् सर्पनिर्म्मोकभस्मभिः। चयः शाम्यति गण्डस्य प्रकोपः स्फुटति द्रुतम्॥ २२॥

By pasting the ash of snake's slough mixed with mustard oil the wound bursts and subsides. [22]

चिरबिल्वादिः

चिरबिल्वाग्निकौ दन्ती चित्रको हयमारकः। कपोतकङ्कगृध्राणां पुरीषाणि च दारणम्॥ २३॥

Cirabilvādi

Cirabilva, agnika (lāṅgalī) dantī, citraka, karavīra, and excrete of pigeon, heron and vulture– these pounded together act as tearing agent. [23]

दारणः क्षारः

क्षारद्रव्याणि वा यानि क्षारो वा दारणः परः॥ २४॥

All the alkaline substances or yavakṣāra (alone) is excellent tearing agent. [24]

निपीडनम्

द्रव्याणां पिच्छिलानान्तु त्वङ्मूलानि निपीडनम्। यवगोधूममाषाणां चूर्णानि च समासतः॥ २५॥

Bark and root of slimy substances and also flours of barley, wheat and black gram act as pressing agents. [25]

पटोलपत्रादि-न्यग्रोधादिक्वाथौ

ततः प्रक्षालनं क्वाथः पटोलीनिम्बपत्रजः। अविशुद्धे विशुद्धे च न्यग्रोधादित्वगुद्भवः॥ २६॥

Paṭolpatrādi-nyagrodhādi kvātha

For washing the wounds, unclean or clean, decoction of (1) Paṭola and nimba or (2) bark of nyagradhādi group is used. [26]

वातादिजेषु प्रयोगाः

पञ्चमूलद्वयं वाते न्यग्रोधादिश्च पैत्तिके। आरग्वधादिको योज्यः कफजे सर्वकर्मसु॥ २७॥

For all purposes, the two pañcamulas (daśamūla), nyagrodhādi and āragvadhādi groups are used in those caused by vāta, pitta and kapha respectively. [27]

तिलाष्टकः

तिलकल्कः सलवणो द्वे हरिद्रे त्रिवृद् घृतम्। मधुकं निम्बपत्राणि लेपः स्याद् व्रणशोधनः॥ २८॥

Tilāṣṭaka

Pounded tila (sesamum), haridrā, dāruharidrā, trivṛt, madhuka and nimba leaves– this paste mixed with salt and ghee is wound-cleanising. [28]

निम्बपत्रादिलेपः

निम्बपत्रं तिला दन्ती त्रिवृत्सैन्धवमाक्षिकम्। दुष्टव्रणप्रशमनो लेपः शोधनकेसरी॥ २९॥

Nimbapatrādi lepa I

Nimba leaves, sesamum, dantī, trivṛt-- this paste mixed with salt and honey is an excellent cleansing agent and useful in dirty wounds. [29]

व्रणशोधने शारिवालेप:

एकं वा शारिवामूलं सर्वव्रणविशोधनम्।। ३०।।

Or the śarivā root alone cleans all types of wound. [30]

पटोल्यादिलेप:

पटोलीतिलयष्ट्याह्वत्रिवृद्दन्तीनिशाद्वयम्। निम्बपत्राणि चालेपः सपटुर्व्रणशोधनः ।। ३१ ।।

Paṭolyādi lepa

Paṭolī, tila, madhuyaṣṭī, trivṛt, dantī, haridrā, dāruharidrā and nimba leaves– this paste mixed with salt is wound-cleansing. [31]

त्रिफलादिक्वाथ:

त्रिफला खदिरो दार्वी न्यग्रोधादिबलाकुशाः। निम्बकोलकपत्राणि कषायः शोधने हितः ।। ३२ ।।

Triphalādi kvātha

Triphalā, khadira, dāruharidrā, (drugs of) nyagrodhādi group, balā, kuśa, leaves of nimba and badra– this decoction is useful for cleansing. [32]

तिलादिलेप:

अपेतपूतिमांसानां मांसस्थानामरोहताम्। कल्कः संरोपणः कार्यस्तिलानां मधुकान्वितः ।। ३३ ।।

Tilādi lepa

The paste of tila mixed with yaṣṭīmadhu should be applied for healing to the wounds situated in muscle which are not healing even after removal of pus and slough. [33]

तिलादिलेपद्वयम्

निम्बपत्रमधुभ्यान्तु युक्तः संशोधनः स्मृतः। पूर्वाभ्यां सर्पिषा वाऽपि युक्तश्चाप्युपरोपणः ।। ३४ ।।

The above paste acts as cleansing agent if added with nimba leaves and honey and as healing one if mixed with ghee. [34]

व्रणशोधनरोपणो निम्बपत्रादिलेप:

निम्बपत्रतिलैः कल्को मधुना क्षतशोधनः। रोपणः सर्पिषा युक्तो यवकल्केऽप्ययं विधिः ।। ३५ ।।

Nimbapatradi lepa II

The paste of nimba leaves and sesamum mixed with honey cleans the wound while that mixed with ghee promotes healing. Ths same procedure is followed in respect of barley paste. [35]

निम्बपत्रादिवर्त्ति:

निम्बपत्रघृतक्षौद्रदार्वीमधुकसंयुता। वर्त्तिस्तिलानां कल्को वा शोधयेद्रोपयेद् व्रणम्।। ३६ ।।

Nimbapatrādi vartti

The wick made of nimba leaves, dāruharidrā, madhuyaṣṭī, honey and ghee cleanses and heals the wound and so does the sesamum paste. [36]

लेपौ

समदलदुग्धकल्कः शमयति दुष्टव्रणं प्रलेपेन। मधुयुक्ता शरपुङ्खा सर्वव्रणरोपणी कथिता॥ ३७॥

Pasting of the latex of saptaparṇa pacifies the dirty wound while śarapuṅkhā mixed with honey heals all types of wound. [37]

नरशिरःकपाललेपः

मानुषशिरःकपालं तदस्थि वा लेपनं मूत्रेण। रोपणमिदं क्षतानां योगशतैरप्यसाध्यानाम्॥ ३८॥

The human skull or its bone is rubbed with urine– this paste heals wounds even not responding to other remedies. [38]

अभयादिवर्त्तिः

व्रणान् विशोधयेद् वर्त्या सूक्ष्मास्यान् सन्धिमर्मगान्। अभयात्रिवृतादन्तीलाङ्गलीमधुसैन्धवैः॥ ३९॥

Abhayādi vartti

Abhayā (harītakī), trivṛt, dantī, kalihārī, honey and rocksalt– wick made of these cleans wounds with small opening and situated in joints and vital parts. [39]

सुषव्यादिलेपः

सुषवीदलपत्तूरकर्णमोटकुठारिकाः। पृथगेते प्रलेपेन गम्भीरव्रणरोपणाः॥ ४०॥

Suṣavī leaves, pattūra, karṇamoṭa and kuṭhārikā– paste of any of these heals deep wounds. [40]

पञ्चवल्कलादि-धातक्यादिचूर्णे

पञ्चवल्कलचूर्णैर्वा शुक्तिचूर्णसमायुतैः। धातकीचूर्णलोध्रैर्वा तथा रोहन्ति ते व्रणाः॥ ४१॥

Pañcavalkalādi cūrṇa-dhātakyādi cūrṇa

(1) Pañcavalkala powder mixed with the powdered bark of badarī or (2) Powder of dhātakī and lodhra promotes wound-healing. [41]

तिलादिप्रलेपः

सदाहा वेदनावन्तो ये व्रणा मारुतोत्तराः। तेषां तिलानुमाश्चैव भृष्टान् पयसि निर्वृतान्॥
तेनैव पयसा पिष्ट्वा दद्यादालेपनं भिषक्॥ ४२॥

In case of vātika wounds having burning sensation and pain the paste of sesamum and linseed fried, dipped in milk and pounded with the same should be applied. [42]

यवादिधूपः

वाताभिभूतान् सास्रावान् धूपयेदुग्रवेदनान्। यवाज्यभूर्जमदनश्रीवेष्टकसुराह्वयैः॥ ४३॥

Yavādi dhūpa

Wounds having predominant vāta, discharge and severe pain should be fumigated with yava (barley), bhūrja, madana, śrīveṣṭaka and devadāru mixed with ghee. [43]

श्रीवासादिधूपः

श्रीवासगुग्गुल्वगुरुशालनिर्यासधूपिताः। कठिनत्वं व्रणा यान्ति नश्यन्त्यास्राववेदनाः ॥ ४४ ॥

Śrīvāsādi dhūpa

On fumigation with śrīvāsa, guggulu, aguru and śālaniryāsa the wounds become free from discharge and pain and attain firmness. [44]

तिलादिलेपः

तिलाः पयः सिता क्षौद्रं तैलं मधुकचन्दनम्। लेपेन शोथरुग्दाहरक्तं निर्वापयेद् व्रणान् ॥ ४५ ॥

Tilādi lepa

Tila, madhuka, candana, milk, śarkarā, honey and oil– this paste alleviates swelling, pain, burning sensation and (congestion of) blood and exerts cooling effect on wounds. [45]

अग्निदग्धव्रणचिकित्सा

पित्तविद्रधिवीसर्पशमनं लेपनादिकम्। अग्निदग्धे व्रणे सम्यक् प्रयुञ्जीत चिकित्सकः ॥ ४६ ॥

Treatment of burns

The physician should use paste etc in burn as prescribed for paittika vidradhi and visarpa. [46]

लेपः

महाराष्ट्रीजटालेपो दग्धपिष्टावचूर्णनम्। जीर्णगेहतृणाच्चूर्णं दग्धव्रणहरं परम् ॥ ४७ ॥

(1) paste of mahārāṣṭrī root (2) dusting with burnt flour and (3) powder of the grass of old house are efficacious in burns. [47]

जीरकाद्यं घृतम्

जीरकपक्वं पश्चात् सिक्थकसर्जरसमिश्रितं हरति। घृतमभ्यङ्गात् पावकदग्धजदुःखं क्षणार्द्धेन ॥ ४८ ॥

Jīrakādya ghṛta

Ghee cooked with jīraka and mixed with bee-wax and sarjarasa relieves the affliction in moments by anointment. [48]

विविधा योगाः

अन्तर्दग्धकुठारको दहनजं लेपान्निहन्ति व्रणम्। अश्वत्थस्य विशुष्कवल्कलकृतं चूर्णं तथा गुण्डनात् ॥ ४९ ॥
अभ्यङ्गाद्विनिहन्ति तैलमखिलं गण्डूपदैः साधितम्। पिष्ट्वा शाल्मलितूलकैर्जलगता लेपात् तथा बालुका ॥५०॥

Application of (the ash) of kuṭhāraka burnt in closed heating alleviates wound. Similarly does the dusting with the powder of dried bark of aśvattha. [49]

Anointment of oil cooked with earth worms alleviates all wounds. So does the paste of śālmali cotton and water-sand. [50]

सद्योव्रण-चिकित्सा

यष्टीमधुकघृतम्

सद्यःक्षतव्रणं वैद्यः सशूलं परिषेचयेत्। यष्टीमधुकयुक्तेन नातिशीतेन सर्पिषा॥५१॥

Sadyovraṇa (accidental wounds)

The physician should sprinkle the accidental wounds with ghee not too cold and mixed with madhuyaṣṭī. [51]

शीतक्रिया

बुद्ध्वाऽऽगन्तुव्रणं वैद्यो घृतक्षौद्रसमायुतम्। शीतां क्रियां प्रयुञ्जीत पित्तरक्तोष्मनाशिनीम्॥५२॥

In cases of exogenous wound, one should paste it with ghee and honey and use other cold measures alleviating heat of pitta and rakta. [52]

कान्तक्रामकलेपः

कान्तक्रामकमेकं सुश्लक्ष्णं गव्यसर्पिषा पिष्टम्। शमयति लेपान्नियतं व्रणमागन्तुजं न सन्देहः॥५३॥

Kāntakrāmaka (mustaka) alone pounded finely with cow's ghee pacifies positively the exogenous wound by pasting. [53]

अपामार्गस्वरसप्रयोगः

अपामार्गस्य संसिक्तं पत्रोत्थेन रसेन वा। सद्योव्रणेषु रक्तन्तु प्रवृत्तं परितिष्ठति॥५४॥

Sprinkling with the juice of apāmārga leaves haemorrhage in accidental wounds is checked. [54]

कर्पूरप्रयोगः

कर्पूरपूरितं बद्धं सघृतं सम्प्ररोहति। सद्यःशस्त्रक्षतं पुंसां व्यथापाकविवर्जितम्॥५५॥

Camphor mixed with ghee is applied to wound and bandaged. By this the accidental wound heals without pain and sepsis. [55]

सद्योव्रणहरा लेपाः

शरपुङ्खा काकजङ्घा प्रथमं महिषीसुत-। मलं लज्जा च सद्यस्कव्रणघ्नं पृथगेव तु॥५६॥

Śarapuṅkhā, kākajaṅghā, first excrete of the bufallo's calf and lajjālu– any of these alleviates accidental wound. [56]

प्रयोगद्वयम्

शुनो जिह्वाकृतश्चूर्णः सद्यःक्षतविरोहणः। चक्रतैलं क्षते विद्धे रोपणं परमं मतम्॥५७॥

Powder of dog's tongue heals the accidental wound. So the fresh mustard oil is excellent healer of wounds caused by injury and puncturing. [57]

नष्टशल्ये प्रलेपा:

यवक्षारं भक्षयित्वा पिण्डं दद्याद् व्रणोपरि। शृगालकोलिमूलेन नष्टशल्यं विनि:सरेत्॥५८॥
लाङ्गलीमूललेपाद्वा गवाक्षीमूलतस्तथा॥५९॥

After taking yavakṣāra one should apply the paste of śṛgālakolī (root) to the wound. By this the hidden foreign body would come out. [58]

The paste of lāṅgalī root or indravāruṇī root is also used for the above purpose. [59]

कषायादिलेपा:

क्षतोष्मणो निग्रहार्थं तत्कालं नि:सृतस्य च। कषायशीतमधुरस्निग्धा लेपादयो हिता:॥६०॥

To check the heat spread after injury, pasting etc. with astringent, unctuous, cold and sweet drugs should be used as emergency measure. [60]

क्षतजामपक्वाशयस्थरुधिरे चिकित्सा

आमाशयस्थे रुधिरे वमनं पथ्यमुच्यते। पक्वाशयस्थे देयश्च विरेचनमसंशयम्॥६१॥

In case of (haemorrhagic) blood being collected in stomach and intestines emesis and purgation are used respectively. [61]

कोष्ठस्थरक्ते वंशत्वगादिक्वाथ:

क्वाथो वंशत्वगेरण्डश्वदंष्ट्राऽश्मभिदा कृत:। सहिङ्गुसैन्धव: पीत: कोष्ठस्थं स्रावयेदसृक्॥६२॥
यवकोलकुलत्थानां नि:स्नेहेन रसेन च। भुञ्जीतान्नं यवागूं वा पिबेत्सैन्धवसंयुताम्॥६३॥

Vaṃśatvagādi Kvātha

Intake of decoction of vaṃśa (bark), eraṇḍa, gokṣura and pāṣāṇabheda added with hiṅgu and saindhava eliminates the blood from the gastro-intestinal tract. [62]

The diet should consist of rice or gruel added with rock-salt and fatless juice of barley, kola and kulattha. [63]

अतिरक्तस्रावे चिकित्सा

अत्यर्थमस्रं स्रवति प्रायशो यत्र विक्षते। ततो रक्तक्षयाद्वायौ कुपितेऽतिरुजाकरे॥६४॥
स्नेहपानं परीषेकं स्नेहलेपोपनाहनम्। स्नेहवस्तिश्च कुर्वीत वातघ्नौषधसाधितम्॥६५॥

In case of excessive haemorrhage from injury vāyu aggravates due to loss of blood causing severe pain. This should be managed with intake of sneha, sprinkling, fatty pastes and poultices and unctuous enema prepared with vāta- alleviating drugs. [64-65]

सप्ताहानन्तरं क्रियाक्रम:

इति साप्ताहिक: प्रोक्त: सद्योव्रणहितो विधि:। सप्ताहात्परत: कुर्याच्छारीरव्रणवत् क्रियाम्॥६६॥

In accidental injury, the above therapy be continued for a week, thereafter it should be treated like wound. [66]

व्रणे क्रिमिनाशका योगा:

करञ्जारिष्टनिर्गुण्डीरसो हन्याद् व्रणक्रिमीन्। कलायविदलीपत्रं कोशाम्रास्थि च पूरणात्॥ ६७॥
सुरसादिरसैः सेको लेपनं स्वरसेन वा॥ ६८॥
निम्बसम्पाकजात्यर्कसप्तपर्णाश्वमारकाः। क्रिमिघ्ना मूत्रसंयुक्ताः सेकालेपनधावनैः॥ ६९॥
प्रच्छाद्य मांसपेश्या वा क्रिमीनपहरेद् व्रणात्। लशुनेनाथवा दद्याल्लेपनं क्रिमिनाशनम्॥ ७०॥

(1) Juice of karañja, nimba and nirguṇḍī (bark) (2) kalāyavidalī (leaves) and (3) kośāmra (seed-kernel) by external application destroy organisms infecting the wound. [67]

Or one should sprinkle and paste the wound with the juice of surasādi group of drugs or surasā (tulasī) alone. [68]

Nimba, āragvadha, jātī, arka, saptaparṇa and karavīra– these mixed with urine should be used as sprinkling, paste and wash to destroy organisms. [69]

The wound should be covered with a piece of muscle and thus should extract the maggots from the wound or the paste of garlic should be applied which destroys organisms. [70]

व्रणे त्रिफलागुग्गुलुः

ये क्लेदपाकस्रुतिगन्धवन्तो व्रणा महान्तः सरुजः सशोथाः।
प्रयान्ति ते गुग्गुलुमिश्रितेन पीतेन शान्तिं त्रिफलारसेन॥ ७१॥

Triphalā-guggulu

The wounds which are large, painful, oedematous and have moisture, suppuration, discharge and foul odour subside after intake of triphalā decoction mixed with guggulu. [71]

वटिकागुग्गुलुः

त्रिफलाचूर्णसंयुक्तो गुग्गुलुर्वटकीकृतः। निर्यन्त्रणो विबन्धघ्नो व्रणशोधनरोपणः॥ ७२॥

Vaṭikāguggulu

Guggulu mixed with (equal) triphalā powder is (pounded with ghee and) made into pills. It removes constipation, cleans and heals wound. There is no restriction in diet etc. during this regimen. [72]

अपरः प्रयोगातिदेशः

अमृतागुग्गुलुः शस्तो हितं तैलश्च वज्रकम्॥ ७३॥

Amṛtāguggulu and vajraka-taila are also efficacious. [73]

विडङ्गादिवटिकागुग्गुलुः

विडङ्गत्रिफलाव्योषचूर्णं गुग्गुलुना समम्। सर्पिषा वटिकां कृत्वा खादेद्वा हितभोजनः॥
दुष्टव्रणापचीमेहकुष्ठनाडीव्रणापहः॥ ७४॥

Viḍaṅgādi vaṭikaguggulu

Guggulu is mixed with equal quantity of viḍaṅga, triphalā and trikaṭu and after pounding with ghee made into pills. It should be used keeping on wholesome diet. It alleviates dirty ulcers, scrofula, prameha, kuṣṭha and sinus. [74]

अमृतादिवटिकागुग्गुलुः

अमृतापटोलमूलत्रिफलात्रिकटुक्रिमिघ्नानाम्। समभागानां चूर्णं सर्वसमो गुग्गुलोर्भागः ॥ ७५ ॥
प्रतिवासरमेकैकां गुडिकां खादेदक्षपरिमाणाञ्च। जेतुं व्रणवातासृग्गुल्मोदरश्वयथुपाण्डुरोगांश्च ॥ ७६ ॥

Amṛtādi vaṭikāguggulu

Amṛtā (guḍūcī), paṭola (root), triphalā, trikaṭu and viḍaṅga all in equal quantity and guggulu equal to the above total. Pills are made as described above. The dose is one pill (of 10 gm) per day.

It alleviates wound, vātarakta, gulma, udararoga, oedema and anaemia. [75-76]

जात्याद्यं घृतम्

जातीनिम्बपटोलपत्रकटुकादार्वीनिशासारिवा मञ्जिष्ठाऽभयसिक्थतुत्थमधुकैर्नक्ताह्वबीजैः समैः।
सर्पिः सिद्धमनेन सूक्ष्मवदना मर्माश्रिताः स्राविणो गम्भीराः सरुजो व्रणाः सगतिकाः शुष्यन्ति रोहन्ति च ॥७७॥

Jātyādya ghṛta

Leaves of jātī, nimba and paṭola, kaṭukā, dāruharidrā, haridrā, sārivā, mañjiṣṭhā, uśīra, madhuka, karañja (seed), bee-wax and copper sulphate– ghee cooked with these is useful in wounds with small opening, located in vital parts, discharging, deep, painful and with sinus which dry up and heal. [77]

गौराद्यं घृतम्

गौरा हरिद्रा मञ्जिष्ठा मांसी मधुकमेव च। प्रपौण्डरीकं ह्रीबेरं भद्रमुस्तं सचन्दनम् ॥ ७८ ॥
जातीनिम्बपटोलञ्च करञ्जं कटुरोहिणी। मधूच्छिष्टं मधूकञ्च महामेदा तथैव च ॥ ७९ ॥
पञ्चवल्कलतोयेन घृतप्रस्थं विपाचयेत्। एष गौरो महावीर्यः सर्वव्रणविशोधनः ॥ ८० ॥
आगन्तुः सहजश्चैव सुचिरोत्थाश्च ये व्रणाः। विषामामपि नाडीञ्च शोधयेच्छीघ्रमेव च ॥ ८१ ॥

Gaurādya ghṛta

Gaurā (priyaṅgu), haridrā, māṁsī, madhuka, prapauṇḍarīka, bālaka, bhadramusta, candana, jātī, nimba, paṭola, karañja, kaṭukā, bee-wax, madhūka and mahāmedā– with these ghee 640 gm should be cooked along with decoction of pañcavalkala.

This gaurādya ghṛta is very potent and cleanses all types of wounds such as exogenous, congenital and chronic including sinuses. [78-81]

गौराद्यं जात्याद्यञ्च तैलम्

गौराद्यञ्चाथ जात्याद्यं तैलमेवं प्रसाध्यते। तैलं सूक्ष्मानने दुष्टे व्रणे गम्भीर एव च ॥ ८२ ॥

By the above method, gaurādya and jātikādya tailas are also prepared which are used in wounds dirty, deep and with small opening. [82]

करञ्जाद्यं घृतम्

नक्तमालस्य पत्राणि तरुणानि फलानि च। सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा॥ ८३॥
द्वे हरिद्रे मधूच्छिष्टं मधुकं तिक्तरोहिणी। मञ्जिष्ठा चन्दनोशीरमुत्पलं शारिवे त्रिवृत्॥ ८४॥
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत्। दुष्टव्रणप्रशमनं तथा नाडीविशोधनम्॥
सद्यश्छिन्नव्रणानाञ्च करञ्जाद्यमिदं शुभम्॥ ८५॥

Karañjādya ghṛta

Tender leaves and fruits of karañja, leaves of jātī, paṭola and nimba, haridrā, dāruharidrā, bee-wax, madhuka, kaṭukā, mañjiṣṭhā, candana, uśīra, utpala, both types of sārivā and trivṛt each 10 gm– with these ghee 640 gm is cooked.

This karañjādya ghṛta cleanses dirty wound, sinuses and accidental wounds. [83-85]

प्रपौण्डरीकाद्यं घृतम्

प्रपौण्डरीकमञ्जिष्ठामधुकोशीरपद्मकैः। सहरिद्रैः कृतं सर्पिः सक्षीरं व्रणरोपणम्॥ ८६॥

Prapauṇḍarīkādya ghṛta

Ghee cooked with (the paste of) prapauṇḍarīka, mañjiṣṭhā, madhuka, uśīra, padmaka and haridrā along with milk promotes wound-heaaling. [86]

तिक्ताद्यं घृतम्

तिक्तासिक्थनिशायष्टीनक्ताह्वफलपल्लवैः। पटोलमालतीनिम्बपत्रैर्व्रण्यं घृतं स्मृतम्॥ ८७॥

Tiktādya ghṛta

Ghee processed with tiktā (kaṭukā), bee-wax, haridrā, madhuyaṣṭī, karañja (fruit and leaves) and leaves of paṭola, jātī and nimba is beneficial for wound. [87]

विपरीतमल्लतैलम्

सिन्दूरहिङ्गुविषकुष्ठरसोनचित्रबाणाङ्घ्रिलाङ्गलिककल्कविपक्वतैलम्।
प्रासादमन्त्रयुतफूत्कृतनुन्नफेनो दुष्टव्रणप्रशमनो विपरीतमल्लः॥ ८८॥
खड्गाभिघातगुरुगण्डमहोपदंशनाडीव्रणव्रणविचर्चिककुष्ठपामाः।
एतान् निहन्ति विपरीतकमल्लनाम तैलं यथेष्टशयनासनभोजनस्य॥ ८९॥

Viparītamallataila

Oil cooked with the paste of sindūra, hiṅgu, viṣa (vatsanābha), kuṣṭha, rāsnā, citraka, śarapuṅkhā (root) and lāṅgalī and incanted with 'prāsāda' hymn is known as viparītamalla. It cures dirty wounds. It is also efficacious in accidental injury, glandular enlargements, venereal diseases, sinus, itching, oedema and leprosy without any restriction in diet and movements. [88-89]

अङ्गारकं तैलम्

कुठारकात् पलशतं क्वाथयेन्नल्वणेऽम्भसि। तेन पादावशेषेण तैलप्रस्थं विपाचयेत्॥ ९०॥

**कल्कैः कुठारापामार्गप्रोष्ठिकामक्षिकायुतैः। एतदङ्गारकं तैलं व्रणशोधनरोपणम्॥
नाडीषु परमाभ्यङ्गो निजास्वागन्तुकीषु च॥ ९१॥**

Aṅgāraka taila

Kuṭhāraka 4 kg is boiled in water 10.24 litre reduced to one-fourth. With this decoction oil 640 ml is cooked along with the paste of kuṭhāraka, apāmārga, proṣṭhikā and makṣikā (fly).

This aṅgāraka taila cleanses wounds and promotes healing. It is excellent for sinuses— innate and exogenous. [90-91]

प्रपौण्डरीकाद्यं तैलम्

प्रपौण्डरीकं मधुकं काकोल्यौ द्वे सचन्दने। सिद्धमेतैः समैस्तैलं तत्परं व्रणरोपणम्॥ ९२॥

Prapauṇḍarīkādya taila

Oil processed with prapauṇḍarīka, madhuka, kākolī, kṣīrakākolī and candana— all in equal parts is good for wound-healing. [92]

दूर्वाद्यं तैलं घृतञ्च

**दूर्वास्वरससिद्धं वा तैलं कम्पिल्लकेन च। दार्वीत्वचश्च कल्केन प्रधानं व्रणरोपणम्॥ ९३॥
येनैव विधिना तैलं घृतं तेनैव साधयेत्। रक्तपित्तोत्तरं ज्ञात्वा सर्पिरेवावचारयेत्॥ ९४॥**

Dūrvādya taila-ghṛta

Oil is cooked with dūrvā juice along with the paste of kampillaka and dāruharidrā (bark). It is chief formulation for wound-healing. Ghee also may be prepared by the above method and should be used in predominance of rakta and pitta. [93-94]

मञ्जिष्ठाद्यं घृतम्

मञ्जिष्ठां चन्दनं मूर्वां पिष्ट्वा सर्पिर्विपाचयेत्। सर्वेषामग्निदग्धानामेतद्रोपणमिष्यते॥ ९५॥

Mañjiṣṭhādya ghṛta

Mañjiṣṭhā, candana and mūrva— with the paste of these ghee is cooked which is useful as healing in burns. [95]

पाटलीतैलम्

सिद्धं कल्ककषायाभ्यां पाटल्याः कटुतैलकम्। दग्धव्रणरुजास्रावदाहविस्फोटनाशनम्॥ ९६॥

Pāṭalī-taila

Mustard oil cooked with paste and decoction of pāṭalī alleviates burns, wound with pain, discharges, burning sensation and boils. [96]

चन्दनाद्यं यमकम्

चन्दनं वटशुङ्गञ्च मञ्जिष्ठा मधुकं तथा। प्रपौण्डरीकं दूर्वा च पत्तङ्गं धातकी तथा॥ ९७॥

एभिस्तैलं विपक्तव्यं सर्पिः क्षीरसमायुतम्। अग्निदाहव्रणे श्रेष्ठं म्रक्षणाद्रोपणं परम्॥ ९८॥

Candanādya yamaka

Candana, vaṭa (leaf-bud), mañjiṣṭhā, madhuka, prapauṇḍarīka, dūrvā, pattaṅga and dhātakī– with these yamaka (oil and ghee mixed together in equal quantity) is cooked along with milk. It is excellent for healing of burns. [97-98]

मनःशिलादिलेपः

मनःशिलाऽऽले मञ्जिष्ठा सलाक्षा रजनीद्वयम्। प्रलेपः सघृतक्षौद्रस्त्वग्विशुद्धिकरः परः॥ ९९॥

Manaḥśilādi lepa

Manaḥśilā (realgar), orpiment, mañjiṣṭhā, lākṣā, haridrā, dāruharidrā– this paste mixed with ghee and honey normalises the skin. [99]

लौहचूर्णादिप्रलेपः

अयोरजः सकाशीशं त्रिफलाकुसुमानि च। प्रलेपः कुरुते कार्ष्ण्यं सद्य एव नवत्वचि॥ १००॥

Lauhacūrṇādi pralepa

Lauhabhasma, kāsīsa, triphalā (flowers or fruits)– this paste restores the normal darkness in skin. [100]

कालीयकादिप्रलेपः

कालीयकलताऽऽम्रास्थिहेमकालारसोत्तमैः। लेपः सगोमयरसः सवर्णकरणः परः॥ १०१॥

Kālīyakādi pralepa

Kālīyaka, latā (priyaṅgu) āmra (seed-kernel), nāgakeśara, mañjiṣṭhā and ghṛta are mixed with cow-dung juice. This is excellent normalizer of skin-colour. [101]

त्वग्रोमादिमसीप्रयोगः

चतुष्पदां हि त्वग्रोमखुरशृङ्गास्थिभस्मना। तैलाक्ता चूर्णिता भूमिर्भवेद्रोमवती पुनः॥ १०२॥

The ash of skin, hairs, hoof, horn and bone of quadrupeds is dusted on the affected part anointed with oil. By this hairs re-appear. [102]

व्रणग्रन्थिचिकित्सा

व्रणग्रन्थिं ग्रन्थिवच्च जयेत् क्षारेण वा भिषक्॥ १०३॥

The knotty scars should be treated like granthi or with application of alkali. [103]

॥ इति व्रणशोथचिकित्सा॥ ४४॥

Thus ends treatment of vraṇaśotha. [44]

४५. पञ्चचत्वारिंशोऽध्यायः

CHAPTER XLV

नाडीव्रण-चिकित्सा

Treatment of Nāḏīvraṇa (sinus)

क्रियासूत्रम्

नाडीनां गतिमन्विष्य शस्त्रेणोपाटय कर्मवित्। सर्वव्रणक्रमं कुर्याच्छोधनं रोपणादिकम्।। १ ।।

After probing the course of sinus the surgeon should open it and then apply all the measures for wound such as cleansing, healing etc. [1]

तिलादिलेपः

नाडीं वातकृतां साधु पाटितां लेखयेद्भिषक्। प्रत्यक्पुष्पीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत्।। २ ।।

Tilādi lepa

The sinus caused by vāta should be well-incised and scraped followed by application of the paste of tila and apāmārga seeds. [2]

अपरे तिलादिलेपाः

पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशाद्वयैः। श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः।। ३ ।।
शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम्।। ४ ।।

Other Tilādi lepas

Paittika and kaphaja sinuses should be pasted with (1) tila, mañjiṣṭhā, nāgadantī, haridrā and dāruharidrā and (2) tila, madhuyaṣṭī, dantī, nimba and rocksalt respectively. [3]

The accidental one should be pasted with tila, honey and ghee after cleansing. [4]

आरग्वधादिवर्त्तिः

आरग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुता। मूत्रवर्तिव्रणे योज्या शोधनी गतिनाशिनी।। ५ ।।

Āragvadhādi vartti

The wick made of the powder of āragavadha, haridrā, and mañjiṣṭhā rubbed with cow's urine and mixed with ghee and honey is useful for cleansing and alleviating sinus. [5]

घोण्टाफलादिवर्त्तिः

घोण्टाफलत्वग् लवणं सलाक्षं पूगात् फलञ्चालवणञ्च पत्रम्।
स्नुह्यर्कदुग्धान्वित एष कल्को वर्त्तीकृतो हन्त्यचिरेण नाडीम्।। ६ ।।

Ghoṇṭāphalādi vartti

Ghoṇṭā (fruit and bark), rock salt, lākṣā, betel nut and jyotiṣmatī (leaves)– these are pounded with the latex of snuhī and arka and made into wick. It destroys sinus quickly. [6]

सैन्धववर्त्तिः

वर्त्तीकृतं माक्षिकसम्प्रयुक्तं नाडीघ्नमुक्तं लवणोत्तमं वा।
दुष्टव्रणे यद्विहितश्च तैलं तत् सेव्यमानं गतिमाशु हन्ति॥ ७॥

Saindhava vartti

The wick made of rocksalt mixed with honey destroys sinus. Besides, the oils prescribed for dirty wounds are efficacious for sinus. [7]

जात्यादिवर्त्तिः

जात्यर्कसम्पाककरञ्जदन्तीसिन्धूत्थसौवर्चलयावशूकैः।
वर्त्तिः कृता हन्त्यचिरेण नाडीं स्नुक्क्षीरपिष्टा सह चित्रकेण॥ ८॥

Jātyādi Vartti

Jātī (leaves), arka (root), āragvadha (leaves), karañja (seeds), dantī (root), citraka, saindhava, sauvarcala, and yavakṣāra– these are pounded with snuhī latex and made into wick. It destroys sinus instantaneously. [8]

कङ्गुनिकामूलचूर्णम्

माहिषदधिकोद्रवान्नमिश्रं हरति चिरविरूढाञ्च। भुक्तं कङ्गुनिकामूलचूर्णमतिदारुणां नाडीम्॥ ९॥

The powder of jyotiṣmatī root is mixed with kodo rice and bufallo's curd and eaten. It destroys even severe and chronic sinus. [9]

क्षारसूत्रस्य प्रयोगविधिः

कृशदुर्बलभीरूणां गतिर्मर्माश्रिता च या। क्षारसूत्रेण तां छिन्द्यान्न शस्त्रेण कदाचन॥ १०॥

Kṣārasūtra

In case of emaciated, weak and timid persons particularly if sinus is located in vital part, it should be treated with kṣārasūtra (alkali-thread) and never with knife. [10]

एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम्। सूचीं निदध्याद् गत्यन्ते चोन्नाम्य चाशु निर्हरेत्॥ ११॥
सूत्रस्यान्तं समानीय गाढं बन्धनमाचरेत्। ततः क्षीणबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत्॥
क्षाराक्तं मतिमान् वैद्यो यावन्न च्छिद्यते गतिः॥ १२॥
भगन्दरेऽप्येष विधिः कार्यो वैद्येन जानता॥ १३॥
अर्बुदादिषु चोत्क्षिप्य मूले सूत्रं निधापयेत्। सूचीभिर्यववक्त्राभिराचितं वा समन्ततः।
मूले सूत्रेण बध्नीयाच्छिन्ने चोपचरेद् व्रणम्॥ १४॥

Method of applying kṣārasūtra

After detecting the track with probe the alkali– thread is introduced in the sinus with the help of a needle which goes upto the end and slightly rising comes out with an end of the thread which is tied with the other one firmly. When its potency is decreased, the thread is changed. This process continues till the sinus is completely opened. [11-12]

The same treatment should be followed in fistula-in-ano by an expert physician. [13]

In arbuda etc. the thread should be applied to the root after raising the mass up or, along with it, needles with barley-shaped openings be put around. When the root is cut, it should be treated as wound. [14]

सप्ताङ्गगुग्गुलुः

गुग्गुलुस्त्रिफलाव्योषैः समांशैराज्ययोजितः। नाडीदुष्टव्रणशूलभगन्दरविनाशनः ॥ १५ ॥

Saptāṅgaguggulu

Guggulu, triphalā and trikaṭu in equal parts are mixed with ghee and made into pills. It destroys sinus, dirty wound, pain and fistula-in-ano. [15]

स्वर्जिकाद्यं तैलम्

स्वर्जिकासिन्धुदन्त्यग्निरूपिकानलनीलिका-।
खरमञ्जरिबीजेषु तैलं गोमूत्रपाचितम्। दुष्टव्रणप्रशमनं कफनाडीव्रणापहम् ॥ १६ ॥

Svarjikādya taila

Svarjikā (svarjikṣāra), saindhava, dantī, citraka, rūpikā (śveta arka), nala, nīlinī and apāmārga seeds– oil is cooked with these along with cow's urine. It alleviates dirty wounds and kaphaja sinus. [16]

कुम्भीकाद्यं तैलम्

कुम्भीकखर्जूरकपित्थबिल्ववनस्पतीनान्तु शलाटुकल्कैः।
कृत्वा कषायं विपचेत्तु तैलमावाप्य मुस्तासरलप्रियङ्गूः ॥ १७ ॥
सौगन्धिकामोचरसाहिपुष्पलोध्राणि दत्त्वा खलु धातकीञ्च।
एतेन शल्यप्रभवा हि नाडी रोहेद् व्रणो वै सुखमाशु चैव ॥ १८ ॥

Kumbhīkādya taila

Kumbhīka, kharjūrà, kapittha, bilva and nyagrodhādi group– with the pounded tender fruits of these decoction is prepared. With this decoction oil is cooked along with (the paste of) musta, sarala, priyaṅgu, saugadhikā (sārivā), mocarasa, nāgakeśara, lodhra and dhātakī. By this accidental sinus as well as wound heal up easily. [17-18]

भल्लातकाद्यं तैलम्

भल्लातकार्कमरिचैर्लवणोत्तमेन सिद्धं विडङ्गरजनीद्वयचित्रकैश्च।
स्यान्मार्कवस्य च रसेन निहन्ति तैलं नाडीं कफानिलकृतामपचीं व्रणांश्च ॥ १९ ॥

Bhallātakādya taila

Oil cooked with (the paste of) bhallātaka, arka, marica, saindhava, viḍaṅga, haridrā, dāruharidrā and citraka along with the juice of bhṛṅgarāja. It alleviates sinus caused by kapha and vāta, scrofula and wounds. [19]

निर्गुण्डीतैलम्

समूलपत्रां निर्गुण्डीं पीडयित्वा रसेन तु। तेन सिद्धं समं तैलं नाडीदुष्टव्रणापहम्॥ २०॥
हितं पामाऽपचीनान्तु पानाभ्यञ्जननावनैः। विविधेषु च स्फोटेषु तथा सर्वव्रणेषु च॥ २१॥

Nirguṇḍī taila

Oil is cooked with the juice expressed of the whole plant of nirguṇḍī. It is useful in sinus, dirty wounds, eczema, scrofula, eruption and all types of wound applied as intake, anointment and snuffing. [20-21]

हंसपादीतैलम्

हंसपाद्यरिष्टपत्रं जातीपत्रं ततो रसैः। तत्कल्कैश्च पचेत् तैलं नाडीव्रणविशोधनम्॥ २२॥

Haṃsapādī-taila

Oil is cooked with the paste and the juice of haṃsapādī, nimba leaves and jātī leaves. It cleanses sinus. [22]

॥ इति नाडीव्रणचिकित्सा॥ ४५ ॥

Thus ends treatment of nāḍīvraṇa. [45]

४६. षट्चत्वारिंशोऽध्यायः

CHAPTER XLVI

भगन्दर-चिकित्सा

Treatment of Bhagandara (fistula-in-ano)

क्रियासूत्रम्

गुदस्य श्वयथुं दृष्ट्वा विशोष्य शोधयेत्ततः। रक्तावसेचनं कुर्य्याद् यथा पाकं न गच्छति॥ १॥

Principle of treatment

As soon as the swelling of anal region is detected, it should be dried and cleansed the patient should be kept on light diet and purgated and blood– letting is performed so that it does not suppurate. [1]

वटपत्रादिलेपः

वटपत्रेष्टकाशुण्ठीगुडूच्यः सपुनर्नवाः। सुपिष्टाः पिडकाऽऽरम्भे लेपः शस्तो भगन्दरे॥ २॥

Vaṭapatrādi lepa

Vaṭa (leaves), brick, dry ginger, guḍūcī and punarnavā– all these pounded together are applied as paste to boil of bhagandara in the initial state. [2]

अपक्वे चिकित्सा

पिडकानामपक्वानामपतर्पणपूर्वकम्। कर्म कुर्य्याद्विरेकान्तं भिन्नानां वक्ष्यते क्रिया॥ ३॥

When the boils are not ripened the measure from apatarpaṇa (desaturation) to purgation (as said in dvivraṇīya ch.) are adopted. For the ripened ones the treatment is described hereafter. [3]

पक्वे चिकित्सा

एषणीपाटनक्षारवह्निदाहादिकं क्रमम्। विधाय व्रणवत् कार्य्यं यथादोषं यथाक्रमम्॥ ४॥

In case of ripened bhagandara, probing, incision, application of alkali, cauterization etc. are performed. Then it is treated like wound according to doṣa and disorder. [4]

त्रिवृदाद्युत्सादनम्

त्रिवृत्तिला नागदन्ती मञ्जिष्ठा सह सर्पिषा। उत्सादनं भवेदेतत् सैन्धवक्षौद्रसंयुतम्॥ ५॥

Trivṛt, tila, nāgadantī and mañjiṣṭhā mixed with ghee, rocksalt and honey– this acts as cleansing agent. [5]

रसाञ्जनादिप्रलेपः

रसाञ्जनं हरिद्रे द्वे मञ्जिष्ठानिम्बपल्लवाः। त्रिवृत्तेजोवतीदन्तीकल्को नाडीव्रणापहः॥ ६॥

Rasāñjana, haridrā, dāruharidra, mañjiṣṭhā, nimba leaves, trivṛt, tejovatī and dantī– the paste of these destroys sinus. [6]

कुष्ठादिप्रलेप:

कुष्ठं त्रिवृत्तिला दन्ती मागध्यः सैन्धवं मधु। रजनी त्रिफला तुत्थं हितं व्रणविशोधनम्॥ ७॥

Kuṣṭhādi pralepa

Kuṣṭha, trivṛt, tila, dantī, pippalī, haridrā, triphalā and tuttha mixed with rocksalt and honey cleanses wound. [7]

स्नुहीदुग्धादिवर्त्ति:

स्नुह्यर्कदुग्धदार्वीभिर्वर्त्तिं कृत्वा विचक्षणः। भगन्दरगतिं ज्ञात्वा पूरयेत्तां प्रयत्नतः।
एषा सर्वशरीरस्थां नाडीं हन्यादसंशयम्॥ ८॥

Snuhīdugdhādi vartti

Wick made of the latex of snuhī and arka with dāruharidrā should be filled up in the track of fistula carefully. This destroys sinus in other parts as well. [8]

तिलादिप्रलेप:

तिलाभयाकुष्ठमरिष्टपत्रं निशे वचा कुष्ठमगारधूमः। भगन्दरे नाड्युपदंशयोश्च दुष्टव्रणे शोधनरोपणोऽयम्॥

Tilādi pralepa

Tila, haridrā, kuṣṭha, nimba leaves, haridrā, dāruharidrā, vacā, lodhra and soot– this paste acts as cleansing and healing agent in bhagandara, sinus, usadaṃśa and dirty wounds. [9]

लेपा:

खरास्रपक्वभूनागचूर्णलेपो भगन्दरम्। हन्ति दन्त्यग्न्यतिविषालेपस्तद्वच्छुनोऽस्थि वा॥ १०॥
त्रिफलारसयुक्तं विडालास्थिप्रलेपनम्। भगन्दरं निहन्त्याशु दुष्टव्रणहरं परम्॥ ११॥

(1) Powdered earth worm cooked with ass's blood or (2) paste of dantī, citraka and ativiṣā or (3) dog's bone– application of these alleviate bhagandara. [10]

Pasting of cat's bone mixed with triphalā decoction destroys bhagandara and is useful in dirty wounds. [11]

नवकार्षिकगुग्गुलु:

त्रिफलापुरकृष्णानां त्रिपञ्चैकांशयोजिता। गुडिका शोथगुल्मार्शोभगन्दरवतां हिता॥ १२॥

Navakārṣika guggulu

Triphalā, guggulu and pippalī– three, five and one part respectively are mixed together and made into pills.

It is efficacious in swelling, gulma, piles and bhagandara. [12]

सप्तविंशतिकगुग्गुलुः

त्रिकटुत्रिफलामुस्तविडङ्गामृतचित्रकम्। शटचेला पिप्पलीमूलं हवुषा सुरदारु च॥ १३॥
तुम्बुरु पुष्करं चव्यं विशाला रजनीद्वयम्। विडं सौवर्च्चलं क्षारौ सैन्धवं गजपिप्पली॥ १४॥
यावन्त्येतानि चूर्णानि तावद् द्विगुणगुग्गुलुः। कोलप्रमाणां गुडिकां भक्षयेन्मधुना सह॥ १५॥
कासं श्वासं तथा शोथमर्शांसि च भगन्दरम्। हृच्छूलं पार्श्वशूलञ्च कुक्षिवस्तिगुदे रुजम्॥ १६॥
अश्मरीं मूत्रकृच्छ्रञ्च अन्त्रवृद्धिं तथा क्रिमीन्। चिरज्वरोपसृष्टानां क्षयोपहतचेतसाम्॥ १७॥
आनाहञ्च तथोन्मादं कुष्ठानि चोदराणि च। नाडीदुष्टव्रणान् सर्वान् प्रमेहं श्लीपदं तथा॥
सप्तविंशतिको ह्येष सर्वरोगनिषूदनः॥ १८॥

Saptaviṃśatika guggulu

Trikaṭu, triphalā, musta, viḍaṅga, guḍūcī, citraka, śaṭī, elā, pippalīmūla, hapuṣā, devadaru, tumburu, puṣkaramūla, cavya, viśālā, haridrā, dāruharidrā, vida, sauvarcala, yavakṣāra, sarjikṣāra, saindhava and gajapippalī– all in equal parts and guggulu double of the above total– These are pounded together and made into pills each 5 gm. It should be taken with honey.

It alleviates cough, dyspnoea, oedema, piles, bhagandara, cardiac pain, chest-pain, pain in abdomen and pelvis, calculus, dysuria, hernia, worms, chronic fever, wasting, ānāha, unmāda, kuṣṭha, udararoga, sinus, dirty wounds, prameha and filaria. In fact, it is a panacea. [13-18]

अपरे योगाः

जम्बूकस्य च मांसानि भक्षयेत् व्यञ्जनादिभिः। अजीर्णवर्जी मासेन मुच्यते ना भगन्दरात्॥ १९॥
पञ्चतिक्तं घृतं शस्तं पञ्चतिक्तश्च गुग्गुलुः॥ २०॥
न्यग्रोधादिगणो यस्तु हितः शोधनरोपणः। तैलं घृतं वा तत् पक्वं भगन्दरविनाशनम्॥ २१॥

The patient should eat jackal's meat mixed with other items in food for a month avoiding indigestion. By this he is freed from bhagandara. [19]

Pañcatikta ghṛta and pañcatikta ghṛta-guggulu are also useful. [20]

Oil or ghee cooked with nyagrodhādi gaṇa, which is cleansing as well as healing, destroys bhagandara. [21]

विष्यन्दनतैलम्

चित्रकार्कौ त्रिवृत्पाठे मलयूहयमारकौ। सुधां वचां लाङ्गलिकीं हरितालं सुवर्चिकाम्॥ २२॥
ज्योतिष्मतीञ्च संहृत्य तैलं धीरो विपाचयेत्। एतद्विष्यन्दनं नाम तैलं दद्याद्भगन्दरे॥
शोधनं रोपणञ्चैव सवर्णकरणं तथा॥ २३॥

Viṣyandana taila

Citraka, arka, trivṛt, pāṭhā, kākodumbara, karavīra, snuhī, vacā, lāṅgalī, orpiment,

svarjikā and jyotiṣmatī– with the paste of these oil is cooked (along with four times water). It is used in bhagandara as cleansing, healing and re-pigmenting agent. [22-23]

करवीराद्यं तैलम्

करवीरनिशादन्तीलाङ्गलीलवणाग्निभिः। मातुलुङ्गार्कवत्साह्वैः पचेत्तैलं भगन्दरे॥ २४॥

Karavīrādya taila

Karavīra, haridrā, dantī, laṅgalī, salt, citraka, mātuluṅga, arka and kuṭaja– with these oil should be cooked for bhagandara. [24]

निशाद्यं तैलम्

निशाऽर्कक्षीरसिन्ध्वग्निपुराश्वहनवत्सकैः। सिद्धमभ्यञ्जने तैलं भगन्दरविनाशनम्॥ २५॥

Niśādya taila

Oil is cooked with niśā (haridrā), arka (latex), rocksalt, citraka, guggulu, karavīra and kuṭaja for anointment in bhagandara. [25]

अपथ्यानि

व्यायामो मैथुनं युद्धं पृष्ठयानं गुरूणि च। संवत्सरं परिहरेदुपरूढव्रणो नरः॥ २६॥

Unwholesome items

Physical exertion, sexual intercourse, fighting, riding, and heavy items in food should be avoided for a year after the wound is healed up. [26]

॥ इति भगन्दरचिकित्सा॥ ४६॥

Thus ends treatment of bhagandara. [46]

४७. सप्तचत्वारिंशोऽध्यायः

CHAPTER XLVII

उपदंश-चिकित्सा

Treatment of Upadaṃśa (soft chancre)

क्रियाक्रमः

स्निग्धस्विन्नशरीरस्य ध्वजमध्ये शिराव्यधः। जलौकापातनं वा स्यादूर्ध्वाधःशोधनं तथा॥ १॥
सद्योनिर्हृतदोषस्य रुक्शोथावुपशाम्यतः। पाको रक्ष्यः प्रयत्नेन शिश्नक्षयकरो हि सः॥ २॥

At first, the patient should be given unction and sudation followed by emesis, purgation and vensection or leeching in the middle of penis. By early elimination of doṣa (impurity) pain and swelling subside. By all efforts, suppuration should be prevented as it destroys the male organ. [1-2]

पटोलादि-खदिरादिक्वाथौ

पटोलनिम्बत्रिफलागुडूचीक्वाथं पिबेद्वा खदिराशनाभ्याम्।
सगुग्गुलुं वा त्रिफलायुतं वा सर्वोपदंशापहरः प्रयोगः॥ ३॥

Paṭolādi-khadirādi kvātha

Decoction of (1) Paṭola, nimba and guḍūcī or (2) khadira and asana mixed with guggulu or triphalā alleviates all types of upadaṃśa. [3]

प्रपौण्डरीकादिलेपसेकौ

प्रपौण्डरीकं मधुकं रास्ना कुष्ठं पुनर्नवा। सरलागुरुभद्राह्वैर्वातिके लेपसेचने॥ ४॥

Prapauṇḍarīkādi

Prapauṇḍarīka, madhuka, rāsnā, kuṣṭha, punarnavā, sarala, aguru and bhadradāru— this formulation is efficacious as paste and sprinkling in the vātika type. [4]

गैरिकादिलेपः

गैरिकाञ्जनमञ्जिष्ठामधुकोशीरपद्मकैः। सचन्दनोत्पलैः स्निग्धैः पैत्तिकं सम्प्रलेपयेत्॥ ५॥

Gairikādi lepa

Gairika (red ochre), añjana, mañjiṣṭhā, madhuka, uśīra, padmaka, candana and utpala— this paste mixed with ghee is applied in the paittika type. [5]

निम्बादियोगाः

निम्बार्जुनाश्वत्थकदम्बशालजम्बूवटोदुम्बरवेतसेषु।
प्रक्षालनालेपघृतानि कुर्य्याच्चूर्णानि पित्तास्रभवोपदंशे॥ ६॥

Nimbādi

Nimba, arjuna, aśvattha, kadamba, śāla, jambū, vaṭa, udumbara and vetasa– this formulation should be used in forms of wash, paste, ghṛta and powder in upadaṃśa caused by raktapitta. [6]

व्रणप्रक्षालनम्

त्रिफलायाः कषायेण भृङ्गराजरसेन वा। व्रणप्रक्षालनं कुर्य्यादुपदंशप्रशान्तये॥ ७॥

For pacification of upadaṃśa, wound should be washed with decoction of triphalā or juice of bhṛṅgarāja. [7]

त्रिफलामसीप्रयोगः

दहेत् कटाहे त्रिफलां सा मसी मधुसंयुता। उपदंशे प्रलेपोऽयं सद्यो रोपयति व्रणम्॥ ८॥

The ash of triphalā mixed with honey is pasted in upadaṃśa. It heals the wound quickly. [8]

रसाञ्जनप्रलेपः

रसाञ्जनं शिरीषेण पथ्यया वा समन्वितम्। सक्षौद्रं वा प्रलेपेन सर्वलिङ्गगदापहम्॥ ९॥

The paste of rasāñjana mixed with śirīṣa or harītakī or honey destroys all diseases of penis. [9]

त्रयोऽवचूर्णनयोगाः

बब्बूलदलचूर्णेन दाडिमत्वग्भवेन वा। गुण्डनं नृस्थिचूर्णेन उपदंशहरं परम्॥ १०॥

Dusting with powder of babbūla leaves or dāḍima bark or human bone is excellent remedy for upadaṃśa. [10]

पूगादिलेपौ

लेपः पूगफलेनाश्वमारमूलेन वा तथा। सेवेन्नित्यं यवान्नञ्च पानीयं कौपमेव च॥ ११॥

Paste of betel nut or karavīra root should be applied and the patient should keep on the diet of barley and well-water. [11]

जयादिपत्रक्वाथः

जयाजात्यश्वमारार्कसम्पाकानां दलैः पृथक्। कृतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत्॥ १२॥

Jayā, jātī, karavīra, arka and āragvadha– decoction of the leaves of any of these is used for washing the suppurated penis. [12]

भूनिम्बाद्यं घृतम्

भूनिम्बनिम्बत्रिफलापटोलकरञ्जजातीखदिराशनानाम्।
सतोयकल्कैर्घृतमाशु पक्वं सर्वोपदंशापहरं प्रदिष्टम्॥ १३॥

Bhūnimbādya ghṛta

Bhūnimba (kirātatikta), nimba, triphalā, paṭola, karañja, jātī, khadira and asana– with decoction and paste of these ghee is cooked which destroys all types of upadaṃśa. [13]

करञ्जाद्यं घृतम्

करञ्जनिम्बार्जुनशालजम्बूवटादिभिः कल्ककषायसिद्धम्।
सर्पिर्निहन्यादुपदंशदोषं सदाहपाकं स्रुतिरागयुक्तम्॥ १४॥

Karañjādya ghṛta

Ghṛta cooked with decoction and paste of karañja, nimba, arjuna, śāla, jambū, and vaṭādi (pañcavalkala) drugs alleviates upadaṃśa associated with burning, suppuration, discharge and induration. [14]

आगारधूमाद्यं तैलम्

आगारधूमरजनीसुराकिण्वैश्च तैस्त्रिभिः। भागोत्तरैः पचेत्तैलं कण्डूशोथरुजाऽपहम्।
शोधनं रोपणञ्चैव सवर्णकरणं परम्॥ १५॥

Āgāradhūmādya taila

Āgāradhūma (soot), haridrā and yeast– with these three successively increased in quantity oil is cooked. It removes itching, swelling and pain, cleanses, heals and normalises the colour of skin. [15]

लिङ्गार्शसश्चिकित्सा

अर्शसां छिन्नदग्धानां क्रिया कार्योपदंशवत्॥ १६॥

Penile warts should be excised and cauterized followed by measures as prescribed for upadaṃśa. [16]

॥ इत्युपदंशचिकित्सा॥ ४७॥

Thus ends treatment of upadaṃśa. [47]

४८. अष्टचत्वारिंशोऽध्याय:

CHAPTER XLVIII

शूकदोष-चिकित्सा

Treatment of Śūkadoṣa

क्रियासूत्रम्

हितश्च सर्पिषः पानं पथ्यञ्चापि विरेचनम्। हितः शोणितमोक्षश्च यच्चापि लघु भोजनम्॥ १॥

Principle of treatment

(In śūkadoṣa) intake of ghee, purgation, blood-letting and light diet are wholesome. [1]

सर्षपीचिकित्सा

सर्षपीं लिखितां सूक्ष्मैः कषायैरवचूर्णयेत्। तैरेवाभ्यञ्जनं तैलं साधयेद् व्रणरोपणम्॥ २॥

Sarṣapī

Sarṣapī should be scraped and dusted with fine powder of kaṣāya drugs. Oil cooked with these, by anointment, heals the wound. [2]

अधिमन्थाष्ठीलयोश्चिकित्सा

क्रियेयमधिमन्थेऽपि रक्तं स्राव्यं तथोभयोः। अष्ठीलायां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत्॥ ३॥

Adhimantha and aṣṭhīlā

The same measure be adopted in adhimantha and in both blood-letting should be performed. Aṣṭhīlā, however, be treated like kaphaja granthi after blood-letting. [3]

कुम्भीकाचिकित्सा

कुम्भीकायां हरेद्रक्तं पक्वायां शोधिते व्रणे। तिन्दुकत्रिफलालोध्रैर्लेपस्तैलञ्च रोपणम्॥ ४॥

Kumbhīkā

In kumbhīkā blood-letting should be done and if it suppurates the wound should be cleansed and covered with paste of tinduka, triphalā and lodhra or the healing oil cooked with the same. [4]

अलजीचिकित्सा

अलज्यां हतरक्तायामयमेव क्रियाक्रमः॥ ५॥

Alajī

In alajī the same method is followed after blood-letting. [5]

ग्रथितचिकित्सा

स्वेदयेद् ग्रथितं स्निग्धं नाडीस्वेदेन बुद्धिमान्। सुखोष्णैरुपनाहैश्च सुस्निग्धैरुपनाहयेत्॥ ६॥

Grathita

Grathita should be uncted and fomented with nāḍīsveda (tubular instrument). Moreover, warm and unctuous poultices should be applied to it. [6]

उत्तमाचिकित्सा

उत्तमाख्यान्तु पिडकां सञ्छिद्य वडिशोद्धृताम् । कल्कैश्चूर्णैः कषायाणां क्षौद्रयुक्तेरुपाचरेत् ॥ ७ ॥

Uttamā

This boil should be excised after pulling it up with forceps and covered with paste or powder of kaṣāya drugs mixed with honey. [7]

पुष्कर्यादीनां चिकित्सा

क्रमः पित्तविसर्पोक्तः पुष्करीमूढयोर्हितः । त्वक्पाके स्पर्शहान्याश्च सेचयेन्मृदितं पुनः ।
बलातैलेन कोष्णेन मधुरैश्चोपनाहयेत् ॥ ८-९ ॥

Puṣkarī etc.

In puṣkarī, mūḍhā, tvakpāka and sparśahāni regimen prescribed for paittika visarpa should be followed. [8]

Mṛdita

Mṛdita should be sprinkled with warm balā-taila and poultice with madhura drugs should be applied thereto. [9]

लिखित-शतपोनकयोश्चिकित्सा

रसक्रिया विधातव्या लिखिते शतपोनके। पृथक्पर्ण्यादिसिद्धश्च तैलं देयमनन्तरम् ॥ १० ॥

Likhita and śataponaka

Rasakriyā should be applied in likhita and śataponaka. Thereafter oil processed with pṛthakparṇyādi drugs (SS.SU.36) should be anointed. [10]

शोणितार्बुदचिकित्सा

रक्तविद्रधिवच्चापि क्रिया शोणितजेऽर्बुदे। कषायतैलसर्पीषि कल्कं चूर्णं रसक्रियाम् ॥
शोधने रोपणे चैव वीक्ष्य वीक्ष्यावचारयेत् ॥ ११ ॥

Śoṇitārbuda

Śoṇitārbuda should be treated like rakta-vidradhi. Decoction, oil, ghṛta, paste, powder and rasakriyā should be applied for cleansing or healing according to condition. [11]

अर्बुदं मांसपाकञ्च विद्रधिं तिलकालकम्। प्रत्याख्याय प्रकुर्वीत भिषक् तेषां प्रतिक्रियाम् ॥ १२ ॥

Arbuda etc.

Arbuda, māṃsapāka, vidradhi and tilakālaka should be treated after declaring their incurability. [12]

॥ इति शूकदोषचिकित्सा ॥ ४८ ॥

Thus ends treatment of śūkadoṣa. [48]

(Śūkadoṣa is a group of manifestations in penis caused by local application of irritant substances.)

४९. एकोनपञ्चाशोऽध्यायः

CHAPTER XLIX

भग्न-चिकित्सा

Treatment of Bhagna (fracture)

क्रियाक्रमः

आदौ भग्नं विदित्वा तु सेचयेच्छीतलाम्बुना। पङ्केनालेपनं कार्यं बन्धनञ्च कुशाऽन्वितम्।
सुश्रुतोक्तञ्च भग्नेषु वीक्ष्य बन्धादिमाचरेत्॥ १॥
अवनामितमुन्नह्येदुन्नतञ्चावनामयेत्। आञ्छेदतिक्षिप्तमधोगतञ्चोपरि वर्त्तयेत्॥ २॥

After diagnosing fracture, the part should be sprinkled with cold water and covered with mud plaster. It should also be stabilised by applying splints. Moreover, other measures, bandage etc as prescribed by Suśruta should be adopted. [1]

The bone should be set in normal position by manipulating with upward, downward, extending and raising movements. [2]

मञ्जिष्ठादिशालिपिष्टलेपौ

आलेपनार्थं मञ्जिष्ठा मधुकञ्चाम्लपेषितम्। शतधौतघृतोन्मिश्रं शालिपिष्टञ्च लेपनम्॥ ३॥

The part should be covered with the paste of mañjiṣṭhā and madhuka pounded with sour gruel or the rice-flour mixed with ghee washed hundred times. [3]

बन्धमोक्षणस्य कालः

सप्तरात्रात् सप्तरात्रात् सौम्येष्वृतुषु मोक्षणम्। कर्त्तव्यं स्यात् त्रिरात्राच्च तथाऽऽग्नेयेषु जानता॥
काले च समशीतोष्णे पञ्चरात्राद्विमोक्षयेत्॥ ४॥

The bandage should be changed in a week, five days and three days in cold, hot and moderate seasons respectively. [4]

परिषेकप्रयोगः

न्यग्रोधादिकषायञ्च सुशीतं परिषेचने। पञ्चमूलीविपक्वन्तु क्षीरं दद्यात् सवेदने॥
सुखोष्णमवतार्य्यं वा चक्रतैलं विजानता॥ ५॥

Cold nyagrodhādi decoction or milk processed with pañcamūla (laghu) or freshly pressed warm oil should be used for sprinkling in fracture associated with pain. [5]

पथ्यम्

मांसं मांसरसः सर्पिः क्षीरं यूषः सतीनजः। बृंहणञ्चान्नपानञ्च देयं भग्नं विजानता॥ ६॥

The diet should consist of meat, meat-soup, ghee, milk, pea-soup and other growth-promoting items. [6]

काकोल्यादिक्षीरम्

गृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितम्। शीतलं लाक्षया युक्तं प्रातर्भग्नः पिबेन्नरः॥७॥

Kākolyādi kṣīra

Milk of primipara cow processed with sweet drugs (kākolyādi group), cooled and mixed with lākṣā should be taken in fracture. [7]

अस्थिसंहारादिचूर्णम्

सघृतेनास्थिसंहारं लाक्षां गोधूममर्जुनम्। सन्धियुक्तेऽस्थिभग्ने च पिबेत् क्षीरेण मानवः॥८॥

Asthisaṃhārādi cūrṇa

Powder of asthisaṃhāra, lākṣā, wheat and arjuna should be taken with milk added with ghee in cases of dislocation and fracture. [8]

रसोनादिकल्कः

रसोनमधुलाक्षाऽऽज्यसिताकल्कं समश्नताम्। छिन्नभिन्नच्युतास्थीनां सन्धानमचिराद्भवेत्॥९॥

The paste of garlic, honey, lākṣā, ghee and sugar as intake is an effective union–promoting drug in fracture and dislocation. [9]

वराटिकाचूर्णम्

पीतवराटिकाचूर्णं द्विगुञ्जं वा त्रिगुञ्जकम्। अपक्वक्षीरपीतं स्यादस्थिभग्नप्ररोहणम्॥१०॥

Intake of yellow cowrie powder (bhasma) in the dose 250-400 mg. with raw milk promotes union of fractured bone. [10]

लाक्षादिचूर्णं गोधूमचूर्णञ्च

क्षीरं सलाक्षामधुकं ससर्पिः स्याज्जीवनीयञ्च सुखावहञ्च।
भग्नः पिबेत् त्वक्पयसाऽर्जुनस्य गोधूमचूर्णं सघृतेन वाऽथ॥११॥

Lākṣādi cūrṇa

Milk processed with lākṣā, madhuka and jīvanīya drugs and added with ghee provides relief. Besides, one should take arjuna bark (powder) with milk or wheat-flour with milk added with ghee. [11]

लाक्षागुग्गुलुः

लाक्षाऽस्थिसंहृत्ककुभाश्वगन्धाश्चूर्णीकृता नागबला पुरश्च।
सम्भग्नयुक्तास्थिरुजं निहन्यादङ्गानि कुर्य्यात् कुलिशोपमानि॥१२॥
अत्रान्यतोऽपि दृष्टत्वात् तुल्यश्चूर्णेन गुग्गुलु॥१३॥

Lākṣāguggulu

Lākṣā, asthisaṃhāra, arjuna, aśvagandhā and nāgabalā– in equal quantity and guggulu equal to the above total– all pounded together are made into pills. It alleviates disorders

caused by fracture and makes the body– parts firm like thunderbolt. As in other cases, here too guggulu is taken equal to the (total) powder. [12-13]

आभागुग्गुलुः

आभाफलत्रिकव्योषैः सर्वैरेभिः समीकृतैः। तुल्यो गुग्गुलुरायोज्यो भग्नसन्धिप्रसाधकः॥ १४॥

Ābhā-guggulu

Ābhā, triphalā and trikaṭū– all in equal quantity and guggulu equal to the above total. It is union-promoting in fracture. [14]

सव्रणभग्नचिकित्सा

सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः। प्रतिसार्य्य कषायैश्च शेषं भग्नवदाचरेत्॥ १५॥
भग्नं नैति यथा पाकं प्रयतेत तथा भिषक्। वातव्याधिविनिर्द्दिष्टान् स्नेहानत्र प्रयोजयेत्॥ १६॥

If there is also wound it should be treated with the application of the paste of nyagrodhādi group added profusely with ghee and honey. Other measures should be as in fracture. [15]

Physician should be cautious to prevent sepsis in fracture. The oils prescribed in vātavyādhi should also be used. [16]

गन्धतैलम्

रात्रौ रात्रौ तिलान् कृष्णान् वासयेदस्थिरे जले। दिवा दिवैव संशोष्य क्षीरेण परिभावयेत्॥ १७॥
तृतीयं सप्तरात्रञ्च भावयेन्मधुकाम्बुना। ततः क्षीरं पुनः पीतान् सुशुष्कांश्चूर्णयेद्भिषक्॥ १८॥
काकोल्यादिं श्वदंष्ट्राऽऽह्वं मञ्जिष्ठां शारिवां तथा। कुष्ठं सर्जरसं मांसीं सुरदारु सचन्दनम्॥ १९॥
शतपुष्पाञ्च सञ्चूर्ण्य तिलचूर्णेन योजयेत्। पीडनार्थञ्च कर्त्तव्यं सर्वगन्धैः शृतं पयः॥ २०॥
चतुर्गुणेन पयसा तत्तैलं विपचेत् पुनः। एलामंशुमतीं पत्रं जीरकं तगरं तथा॥ २१॥
लोध्रं प्रपौण्डरीकञ्च तथा कालानुशारिवाम्। शैलेयकं क्षीरशुक्लामनन्तां समधूलिकाम्॥ २२॥
पिष्ट्वा शृङ्गाटकञ्चैव प्रागुक्तान्यौषधानि च। एभिस्तद्विपचेत्तैलं शास्त्रविन्मृदुनाऽग्निना॥ २३॥
एतत्तैलं सदा पथ्यं भग्नानां सर्वकर्मसु। आक्षेपके पक्षघाते चाङ्गशोषे तथाऽर्दिते॥ २४॥
मन्यास्तम्भे शिरोरोगे कर्णशूले हनुग्रहे। बाधिर्य्ये तिमिरे चैव ये च स्त्रीषु क्षयं गताः॥ २५॥
पथ्यं पाने तथाऽभ्यङ्गे नस्ये वस्तिषु योजयेत्। ग्रीवास्कन्धोरसां वृद्धिरनेनैवोपजायते॥ २६॥
मुखञ्च पद्मप्रतिभं स्यात् सुगन्धसमीरणम्। गन्धतैलमिदं नाम्ना सर्ववातविकारनुत्॥ २७॥
राजार्हमेतत् कर्त्तव्यं राज्ञामेव विचक्षणैः। तिलचूर्णाच्चतुर्थांशं मिलितं चूर्णमिष्यते॥ २८॥

Gandhataila

Black sesamum put in a cloth-pouch is kept in flowing water overnight and dried in the sun during the day. This is continued for a week. In the second and third weeks the same process is repeated with milk and madhuka decoction. Lastly it is again inpregnated with milk, dried and powdered.

Now the powder of kākolayādi drugs, gokṣura, mañjiṣṭhā, sārivā, kuṣṭha, sarjarasa,

māṃsī, devadāru, candana and śatapuṣpā are mixed with the sesamum powder. It should be moistened with milk processed with sarvagandha (elādi gaṇa) and oil is extracted by pressing.

This oil is cooked with four times milk along with (the paste of) elā, śālaparṇī, patra, jīraka, tagara, lodhra, prapauṇḍarīka, kālānusārivā, śaileyaka, ksīraśuklā, anantā, madhūlikā, śṛngāṭaka and other above mentioned drugs (kākolyadi etc) on mild fire.

It is efficacious in fracture. Besides, it is useful in convulsions, paralysis, wasting, facial paralysis, torticollis, head diseases, earache, lock-jaw, deafness, defects of vision and debility due to indulgence in sex. It is used as intake, anointment, snuffing and enema. It promotes development of neck, shoulders and chest, improves lustre of face and alleviates all disorders of vāta. It is particularly suitable for kings. The powder of kākolyādi etc. should be, in total, one fourth of the sesamum powder. [17-28]

अपथ्यम्

लवणं कटुकं क्षारमम्लं मैथुनमातपम्। व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च।। २९ ।।

Unwholesome items

The patient of fracture should abstain from salt, pungent, alkali and sours, sexual intercourse, sun, physical exertion and rough diet. [29]

।। इति भग्नचिकित्सा ।। ४९ ।।

Thus ends treatment of bhagna. [49]

५०. पञ्चाशोऽध्याय:

CHAPTER L

कुष्ठ-चिकित्सा

Treatment of Kuṣṭha (leprosy and skin diseases)

क्रियाक्रम:

वात्तोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु। पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनञ्चाग्रम्॥ १॥
प्रच्छनमल्पे कुष्ठे महति च शस्तं शिराव्यधनम्। बहुदोष: संशोध्य: कुष्ठी बहुशोऽनुरक्षता प्राणान्॥

Principle of treatment

Kuṣṭha having predominance of vāta, pitta and kapha should be treated with ghee, blood-letting with purgation and emesis respectively. [1]

The patient having profuse impurity should undergo evacuative therepy, scarification and venesection in less and more disorder respectively, always taking care of his strength. [2]

पञ्चकषाय:

वचावासापटोलानां निम्बस्य फलिनीत्वच:। कषायो मधुना पीतो वान्तिकृन्मदनान्वित:॥ ३॥

Pañcakaṣāya

Root of vacā, vāsā and paṭola, bark of nimba and priyaṅgu– this decoction mixed with madana and added with honey induces emesis. [3]

विरेचनप्रयोग:

विरेचनन्तु कर्त्तव्यं त्रिवृद्दन्तीफलत्रिकै:॥ ४॥

Purgation should be induced by trivṛt, dantī and triphalā. [4]

शोधनस्य गुणा:

ये लेपा: कुष्ठानां युज्यन्ते निर्गतास्रदोषाणाम्। संशोधिताशयानां सद्य: सिद्धिर्भवति तेषाम्॥ ५॥

External medications in kuṣṭha exert their effect instantaneously if applied after blood-letting and evacuative therapy. [5]

मन:शिलादि-करञ्जबीजादिलेपौ

मन:शिलाऽऽले मरिचानि तैलमार्कं पय: कुष्ठहर: प्रदेह:।
करञ्जबीजैडगज: सकुष्ठो गोमूत्रपिष्टश्च वर: प्रदेह:॥ ६॥

Manaḥśilādi-karañjabījādi lepa

Manaḥśilā (realgar), orpiment, marica, arka (latex)– all mixed with (mustard) oil is a good application in kuṣṭha. Similar is that of karañja seeds, cakramarda and kuṣṭha pounded with cow's urine. [6]

चतुरङ्गुलादिप्रलेप:

पर्णानि पिष्ट्वा चतुरङ्गुलस्य तक्रेण पर्णान्यथ काकमाच्या:।
तैलाक्तगात्रस्य नरस्य कुष्ठान्युद्वर्त्तयेदश्वहनच्छदैश्च ॥ ७ ॥

Caturaṅgulādi pralepa

Leaves of caturaṅgula (āragvadha), kākamācī, and karavīra pounded with buttermilk are anointed on the affected part after smearing it with oil. [7]

आरग्वधादय: षट् चूर्णप्रदेहा:

आरग्वध: सैडगज: करञ्जो वासा गुडूची मदनं हरिद्रे।
श्र्याह्व: सुराह्व: खदिरो धवश्च निम्बो विडङ्गं करवीरकश्च ॥ ८ ॥
ग्रन्थिश्च भौर्जो लशुन: शिरीष: सलोमशो गुग्गुलुकृष्णगन्धे।
फणिज्झको वत्सकसप्तपर्णौ पीलूनि कुष्ठं सुमन:प्रवाला: ॥ ९ ॥
वचा हरेणुस्त्रिवृता निकुम्भो भल्लातकं गैरिकमञ्जनञ्च।
मन:शिलाऽऽले गृहधूम एला काशीशलोध्रार्जुनमुस्तसर्जा: ॥ १० ॥
इत्यर्द्धरूपैर्विहिता: षडेते गोपित्तपीता: पुनरेव पिष्टा:।
सिद्धा: परं सर्षपतैलयुक्ताश्चूर्णप्रदेहा भिषजा प्रयोज्या: ॥ ११ ॥
कुष्ठानि कृच्छ्राणि नवं किलासं सुरेन्द्रलुप्तं किटिभं सदद्रुम्।
भगन्दरार्शांस्यपचीं सपामां हन्यु: प्रयुक्तास्त्वचिरान्नराणाम् ॥ १२ ॥

Āragvadhadi etc. six pastes

(1) Āragvadha, cakramarda, karañja, vāsā, guḍūcī, madana, haridrā and dāruharidrā (2) śrīveṣṭaka, devadāru, khadira, dhava, nimba, viḍaṅga and karavīra (3) node of bhūrja (birch plant), garlic, śirīṣa, kāsīsa, guggulu and śobhāñjana (4) phaṇijjhaka, kuṭaja, saptaparṇa, pīlu, kuṣṭha and jātī leaves (5) vacā, trivṛt, dantī, bhallātaka, red ochre and añjana (6) realgar, orpiment, soot, elā, kāsīsa, lodhra, arjuna, musta and sarja— These six formulations mentioned in half-verses are impregnated with ox-bile (for a week) and again pounded with it. They are mixed with mustard oil and used as 'powder-anointment'. They destroy kuṣṭha, vitiligo, alopecia, kiṭibha, ring worm, fistula-in-ano, piles, scrofula and eczma. [8-12]

मन:शिलाद्यष्टाङ्गलेप:

मन:शिला त्वक् कुटजात् सकुष्ठा सलोमश: सैडगज: करञ्ज:।
ग्रन्थिश्च भौर्ज: करवीरमूलं चूर्णानि साध्यानि तुषोदकेन ॥ १३ ॥
पलाशनिर्दाहरसेन वाऽपि कर्षोद्धृतान्याढकसम्मितेन।
दर्वीप्रलेपं प्रवदन्ति लेपमेतत् परं कुष्ठविनाशनाय ॥ १४ ॥

Manaḥśilādyaṣṭāṅga lepa

Manaḥśilā, kuṭaja bark, kuṣṭha, kāsīsa, cakramarda, karañja, birch node and karavīra root– these are powdered in quantity of 10 gm and cooked with sour gruel or the juice extracted from burning (the root of) palāśa till it becomes semisolid and sticks to laddle. This paste is excellent for alleviating kuṣṭha. [13-14]

कुष्ठाद्यमुद्वर्त्तनम्

कुष्ठं हरिद्रे सुरसं पटोलं निम्बाश्वगन्धे सुरदारुशिग्रू।
ससर्षपं तुम्बुरुधान्यवन्यं चण्डाश्च दूर्वाश्च समानि कुर्य्यात्॥ १५॥
तैस्तक्रपिष्टैः प्रथमं शरीरं तैलाक्तमुद्वर्त्तयितुं यतेत।
तथाऽस्य कण्डूः पिडकाः सकोठाः कुष्ठानि शोथाश्च शमं प्रयान्ति॥ १६॥

Kuṣṭhādyudvarttana

Kuṣṭha, haridrā, dāruharidrā, tulasī, paṭola, nimba, aśvagandhā, devadāru, śigru, sarṣapa, tumburu, dhānyaka, kaivartamustaka, caṇḍā and dūrvā– all in equal quantity are pounded with buttermilk. It is applied as paste after smearing the part with oil. By this itching, eruptions, urticaria, kuṣṭha and swelling are alleviated. [15-16]

भागोत्तरधात्र्यादिलेपः

धात्र्यक्षपथ्याक्रिमिशत्रुवह्निभल्लातकावल्गुजलौहभृङ्गैः।
भागाभिवृद्धैस्तिलतैलमिश्रैः सर्वाणि कुष्ठानि निहन्ति लेहः॥ १७॥

Bhāgottara Dhātryādi lepa

Dhātrī (āmalakī), bibhītaka, harītakī, viḍaṅga, citraka, bhallātaka, bākucī, lauhabhasma and bhṛṅgarāja– the powder of these, successively increased in quantity, are mixed with sesamum oil and used as linctus. It destroys all types of kuṣṭha. [17]

विडङ्गादिलेपः

विडङ्गसैन्धवशिवाशशिरेखासर्षपकरञ्जरजनीभिः।
गोजलपिष्टो लेपः कुष्ठहरो दिवसनाथसमः॥ १८॥

Viḍaṅgādi lepa

Viḍaṅga, rocksalt, harītakī, bākucī, sarṣapa, karañja, and haridrā– these are pounded together with cow's urine. This paste alleviates kuṣṭha like the sun. [18]

विडङ्गैडगजादिलेपः

विडङ्गैडगजाकुष्ठनिशासिन्धूत्थसर्षपैः। धान्याम्लपिष्टैर्लेपोऽयं दद्रुकुष्ठरुजाऽपहः॥ १९॥

Viḍaṅgaiḍagajādi lepa

Viḍaṅga, eḍagaja (cakramarda), kuṣṭha, haridrā, saindhava, sarṣapa– these pounded together with sour gruel make a paste for alleviating ring worm and kuṣṭha. [19]

दूर्वादिप्रलेप:

दूर्वाऽभयासैन्धवचक्रमर्दकुठेरका: काञ्जिकतक्रपिष्टा:।
त्रिभि: प्रलेपैरपि बद्धमूलं दद्रुश्च कण्डूश्च रुजाश्च हन्यात्॥ २०॥

Dūrvādi pralepa

Dūrvā, paddy husk, harītakī, saindhava, cakramarda and kuṭheraka– these are pounded with sour gruel and buttermilk. Only three applications of this paste eradicate ring worm, itching and distress. [20]

सर्जादिप्रलेप:

तुल्यो रस: शालतरोस्तुषेण सचक्रमर्दोऽप्यभयाविमिश्र:।
पानीयभक्तेन तदम्बुपिष्टो लेप: कृतो दद्रूगजेन्द्रसिंह:॥ २१॥

Sarjādi pralepa

Sarjarsa, cakramarda, harītakī and boiled rice immersed in water– all the drugs in equal quantity are pounded with the (above) rice water. This paste destroys ringworm. [21]

प्रपुन्नाडबीजाद्युद्वर्तनम्

प्रपुन्नाडस्य बीजानि धात्री सर्जरस: स्नुहा। सौवीरपिष्टं दद्रूणामेतदुद्वर्त्तनं परम्॥ २२॥

Prapunnāḍabījādyudvarttana

Prapunnāḍa (cakramarda) seed, āmalakī, sarjarasa, snuhī– these pounded together with sour gruel make an efficacious application for ring worm. [22]

चक्रमर्दबीजादिप्रलेप:

चक्रमर्दकबीजानि जीरकञ्च समांशिकम्। स्तोकं सुदर्शनामूलं दद्रुकुष्ठविनाशनम्॥ २३॥

Cakramardabījādi lepa

Cakramarda seeds and jīraka in equal parts are mixed with a small quantity sudarśanā root. This paste alleviates ring worm and kuṣṭha. [23]

अपरे प्रलेपा:

लेपनाद्भक्षणाच्चैव तृणकं दद्रुनाशनम्। यूथीपुन्नागमूलञ्च लेपात् काञ्जिकपेषितम्॥ २४॥
कासमर्दकमूलञ्च सौवीरेण च पेषितम्। दद्रुकिटिभकुष्ठानि जयेदेतत् प्रलेपनात्॥ २५॥
शिखरिरसेन सुपिष्टं मूलकबीजं प्रलेपत: सिध्म। क्षारेण वा कदल्या रजनीमिश्रेण नाशयति॥ २६॥
गन्धपाषाचूर्णेन यवक्षारेण लेपितम्। सिध्म नाशं व्रजत्याशु कटुतैलयुतेन वा॥ २७॥
कासमर्दकबीजानि मूलकानां तथैव च। गन्धपाषाणमिश्राणि सिध्मानां परमौषधम्॥ २८॥

Tṛṇaka destroys ring worm by pasting and intake. Root of yūthikā and punnāga pounded with sour gruel is used as paste. [24]

The root of kāsamarda pounded with sour gruel is also used as paste in ring worm, kiṭibha and kuṣṭha. [25]

Radish seeds pounded with apāmārga juice used as paste destroys sidhma. Similarly acts the alkali of kadalī mixed with haridrā. [26]

Sidhma is also alleviated by applying sulphur and yavakṣāra mixed with mustard oil. [27]

Seeds of kāsamarda and radish mixed with sulphur is an effective remedy for sidhma. [28]

धात्रीरसाद्युद्वर्त्तनम्

धात्रीरसः सर्जरसः सपाक्यः सौवीरपिष्टश्च तदायुतश्च।
भवन्ति सिध्मानि यथा न भूयस्तथैवमुद्वर्त्तनकं करोति॥ २९॥

Dhātrīrasādyudvarttana

Dhātrī (āmalakī) juice, sarjarasa and yavakṣāra– these are pounded with sour gruel and impregnated with the same (for three days). Its pasting eradicates sidhma and prevents its recurrence. [29]

कुष्ठादिलेपः

कुष्ठं मूलकबीजं प्रियङ्ग्वः सर्षपास्तथा रजनी। एतत् केशरषष्ठं निहन्ति बहुवार्षिकं सिध्म॥ ३०॥

Kuṣṭhādi lepa

Kuṣṭha, radish seeds, priyaṅgu, sarṣapa, haridrā and nāgakeśara– this paste destroys chronic sidhma. [30]

लेपयोगाः

नीलकुरुण्टकपत्रं स्वरसेनालिप्य गात्रमतिबहुशः। लिम्पेन्मूलकबीजैः पिष्टैस्तक्रेण सिध्मनाशाय॥३१॥
चक्राह्वयं स्नुहीक्षीरभावितं मूत्रसंयुतम्। रवितप्तं हि किञ्चित्तु लेपनात् किटिभापहम्॥ ३२॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत्। दद्रुकिटिभकुष्ठानि हन्ति सिध्मानमेव च॥ ३३॥

One should apply the juice of blue saireyaka leaves profusely followed by the paste of radish seeds pounded with buttermilk in order to destroy sidhma. [31]

Cakramarda (seeds) impregnated with snuhī latex then mixed with urine and heated in the sun destroys kiṭibha by pasting. [32]

Āragvadha leaves pounded with sour gruel destroy ring worm, kiṭibha, kuṣṭha and sidhma (by pasting). [33]

मूलकबीजादिलेपः

बीजानि वा मूलकसर्षपाणां लाक्षारजन्यौ प्रपुनाडबीजम्।
श्रीवेष्टकव्योषविडङ्गकुष्ठं पिष्ट्वा च मूत्रेण तु लेपनं स्यात्॥ ३४॥
दद्रूणि सिध्मं किटिभानि पामां कपालकुष्ठं विषमञ्च हन्यात्॥ ३५॥

Mūlakabījādi lepa

Seeds of radish and mustard, lākṣā, haridrā, cakramarda seeds, śrīveṣṭaka, trikaṭu, viḍaṅga and kuṣṭha– these are pounded with urine and used as paste. It destroys ring worm, sidhma, kiṭibha, eczema and severe kapālakuṣṭha. [34-35]

एडगजादिलेप:

एडगजकुष्ठसौवीरसैन्धवसर्षपैः क्रिमिघ्नैश्च। क्रिमिसिध्मदद्रुमण्डलकुष्ठानां नाशनो लेपः ॥ ३६ ॥

Eḍagajādi lepa I

Eḍagaja, kuṣṭha, saindhava, sarṣapa and viḍaṅga– these pounded with sour gruel make a paste for alleviating worms, sidhma, ring worm and maṇḍala kuṣṭha. [36]

सर्षपकल्कप्रयोग:

स्नुक्काण्डे सर्षपात् कल्कः कुकूलानलपाचितः। लेपाद्विचर्च्चिकां हन्ति रागवेग इव त्रपाम् ॥ ३७ ॥

Pulp of mustard seeds is put within the (incised) stem of snuhī and heated in chaff-fire. This paste destroys vicarcikā. [37]

गृहधूमादिलेप:

स्नुक्काण्डशुषिरे दग्ध्वा गृहधूमं ससैन्धवम्। अन्तर्धूमं तैलयुक्तं लेपाद्धन्ति विचर्च्चिकाम् ॥ ३८ ॥

Similarly soot and saindhava are cooked by closed heating within the cavity of snuhī stem. This mixed with oil and applied as paste destroys vicarcikā. [38]

द्वितीय एडगजादिलेप:

एडगजातिलसर्षपकुष्ठं मागधिकालवणत्रयमस्तु। पूतिकृतं दिवसत्रयमेतद्धन्ति विचर्चिकदद्रु सकुष्ठम् ॥

Eḍagajādi lepa II

Eḍagaja (cakramarda), tila, sarṣapa, kuṣṭha, pippalī and three salts– these are kept together in curd-water for three days. Application of this destroys vicarcikā, ring worm and kuṣṭha. [39]

धुस्तूरतैलम्

उन्मत्तकस्य बीजेन माणकक्षारवारिणा। कटुतैलं विपक्तव्यं शीघ्रं हन्याद्विपादिकाम् ॥ ४० ॥

Dhustūra taila

Mustard oil is cooked with (the paste of) dhattūra seeds along with alkaline water of māṇaka. This destroys vipādikā (cracks in feet). [40]

तण्डुलप्रलेप:

नारिकेलोदके न्यस्तस्तण्डुलः पूतितां गतः। लेपाद्विपादिकां हन्ति चिरकालानुबन्धिनीम् ॥ ४१ ॥

Rice kept in coconut water till decomposition alleviates vipādikā, even chronic, by pasting. [41]

सर्जरसादिलेपः

सर्जरससिन्धुसम्भवगुडमधुमहिषाक्षगैरिकं सघृतम्। सिक्थकमेतत् पक्वं पादस्फुटनापहं सिद्धम्॥ ४२॥

Sarjarasādi lepa

Sarjarasa, saindhava, jaggery, honey, guggulu, red ochre, ghee and bee-wax– all are cooked together. It destroys cracks in feet (by pasting). [42]

अवल्गुजादिलेपः

अवल्गुजं कासमर्दं चक्रमर्दं निशायुतम्। माणिमन्थेन तुल्यांशं मस्तुकाञ्जिकपेषितम्॥
कच्छूं कण्डूं जयत्युग्रां सिद्ध एष प्रयोगराट्॥ ४३॥

Avalgujādi lepa

Avalguja (bākucī), kāsamarda, cakramarda, haridrā and rock salt– all in equal parts are pounded with curd-water or sour gruel. It is a tried remedy for scabies and itching, even if severe. [43]

सिंहास्यदलादिलेपः

कोमलसिंहास्यदलं सनिशं सुरभीजलेन सम्पिष्टम्। दिवसत्रयेण नियतं क्षपयति कच्छूं विलेपनतः॥

Tender leaves of siṃhāsya (vāsā) along with haridrā is pounded with cow's urine. The application of its paste for three days alleviates scabies. [44]

हरिद्राकल्कः

हरिद्राकल्कसंयुक्तं गोमूत्रस्य पलद्वयम्। पिबेन्नरः कामचारी कच्छूपामाविनाशनम्॥ ४५॥

Cow's urine 80 ml mixed with haridrā paste (10 gm) should be taken to destroy scabies and eczema. [45]

पथ्याचूर्णम्

शोथपाण्ड्वामहरी गुल्ममेहकफापहा। कच्छूपामाहरी चैव पथ्या गोमूत्रसाधिता॥ ४६॥

Harītakī boiled in cow's urine alleviates oedema, anaemia, gulma, prameha and kapha in addition to scabies and eczema. [46]

गन्धकचूर्णम्

पिबति सकटुतैलं गन्धपाषाणचूर्णं रविकिरणसुतप्तं पामनो यः पलार्द्धम्।
त्रिदिनतदनुसिक्तः क्षीरभोजी च शीघ्रं भवति कनकदीप्त्या कामयुक्तो मनुष्यः॥ ४७॥

The patient of pāmā who takes sulphur powder mixed with mustard oil after heating in the sun in the (total) dose of 20 gm for three days and applies it externally keeping on milk-diet attains handsome appearance (having been free from the skin disease). [47]

निशाद्युद्वर्त्तनम्

निशासुधाऽऽरग्वधकाकमाचीपत्रैः सदार्वीप्रपुनाडबीजैः ।
तक्रेण पिष्टैः कटुतैलमिश्रैः पामादिषूद्वर्त्तनमेतदिष्टम् ॥ ४८ ॥

Niśādyudvarttana

Leaves of niśā (haridrā), snuhī, āragvadha and kākamācī, dāruharidrā and cakramarda seeds– these are pounded with buttermilk and mixed with mustard oil. It is useful as anointment in pāmā etc. [48]

सिन्दूरादिलेपः करवीरतैलञ्च

सिन्दूरमरिचचूर्णं महिषीनवनीतसंयुतं बहुशः । लेपाद्विनिहन्ति पामां तैलं करवीरसिद्धं वा ॥ ४९ ॥

Powder of sindūra and marica mixed with buffalo's butter destroys pāmā by pasting or (mustard) oil cooked with karavīra should be used. [49]

मांस्यादिगणः

मांसीचन्दनसम्पाककरञ्जारिष्टसर्षपम् । यष्टीकुटजदार्व्यब्दं हन्ति कण्डूमयं गणः ॥ ५० ॥

Māṃsyādi gaṇa

Māṃsī, candana, āragvadha, karañja, nimba, sarṣapa, madhuyaṣṭī, kuṭaja, dāruharidrā and musta– this group alleviates itching. [50]

भल्लातकादिलेपः

भल्लातकं द्वीपिसुधाऽर्कमूलं गुञ्जाफलं त्र्यूषणशङ्खचूर्णम् ।
तुत्थं सकुष्ठं लवणानि पञ्च क्षारद्वयं लाङ्गलिकाञ्च पक्त्वा ॥ ५१ ॥
स्नुह्यर्कदुग्धे घनमायसस्थं शलाकया तं विदधीत लेपम् ।
कुष्ठे किलासे तिलकालके तु अशेषदुर्नामसु चर्मकीले ॥ ५२ ॥

Bhallātakādi lepa

Bhallātaka, citraka, snuhī, arka (root), guñjā (seed), trikaṭu, śaṅkha-bhasma, tuttha, kuṣṭha, five salts, two alkalis (yavakṣāra and sarjikṣāra) and Lāṅgali-- powder of these is mixed with latex of snuhī and arka (four times) and cooked in iron vessel till it is thickened. It is applied with a rod to the affected part in kuṣṭha, kilāsa, tilakālaka, piles and warts. [51-52]

विषादिलेपः

विषवरुणहरिद्राचित्रकागारधूममनलमरिचदूर्वाः क्षीरमर्कस्नुहीभ्याम् ।
दहति पतितमात्रात् कुष्ठजातीरशेषाः कुलिशमिव सरोषाच्छक्रहस्ताद्विमुक्तम् ॥ ५३ ॥

Viṣādi lepa

Viṣa (vatsanābha), varuṇa, haridrā, citraka, soot, bhallātaka, marica and dūrvā are mixed with latex of arka and snuhī. It destroys all types of kuṣṭha instantaneously by application as paste. [53]

शशाङ्कलेखादिलेह:

शशाङ्कलेखा सविडङ्गसारा सपिप्पलीका सहुताशमूला।
सायोमला सामलका सतैला सर्वाणि कुष्ठानि निहन्ति लीढा ॥ ५४ ॥

Śaśāṅkalekhādi leha

Śaśāṅkalekhā (bākucī), viḍaṅga, pippalī, citraka root, maṇḍūra-bhasma, and āmalaka– these should be mixed with (sesamum) oil and taken as linctus. It destroys all types of kuṣṭha. [54]

सोमराज्यादिचूर्णम्

तीव्रेण कुष्ठेन परीतदेहो यः सोमराजीं नियमेन खादेत्।
संवत्सरं कृष्णतिलद्वितीयां स सोमराजीं वपुषाऽतिशेते ॥ ५५ ॥

One who takes regularly bākucī mixed with black sesamum for a year is freed from kuṣṭha, even if severe, and attains moon-like handsome body. [55]

वागुजीचूर्णम्

घर्मसेवी कदुष्णेन वारिणा वागुजीं पिबेत्। क्षीरभोजी त्रिसप्ताहात् कुष्ठरोगाद्विमुच्यते ॥ ५६ ॥

One should take bākucī with warm water and then sit in the sun keeping on milk-diet for three days. By this he is freed from kuṣṭha. [56]

तिलादिचूर्णम्

एकस्तिलस्य भागौ द्वौ सोमराज्यास्तथैव च। भक्ष्यमाणमिदं प्रातर्गुह्यदद्रुविनाशनम् ॥ ५७ ॥

Tila one part and bākucī two parts– this combination is taken in the morning in case of ring worm in private parts. [57]

अवल्गुजबीजचूर्णम्

अवल्गुजाद् बीजकर्षं पीत्वा कोष्णेन वारिणा। भोजनं सर्पिषा कार्य्यं सर्वकुष्ठप्रणाशनम् ॥ ५८ ॥

(Powder of) bākucī seeds 10 gm is taken with warm water using profuse ghee in diet. It destroys all types of kuṣṭha. [58]

नवकषाय:

त्रिफलापटोलरजनीमञ्जिष्ठारोहिणीवचानिम्बैः। एष कषायोऽभ्यस्तो निहन्ति कफपित्तजं कुष्ठम् ॥५९॥

Navakaṣāya

Triphalā, paṭola, haridrā, mañjisthā, kaṭukā, vacā and nimba– this decoction (of nine drugs) taken regularly destroys kuṣṭha caused by kapha and pitta. [59]

छिन्नास्वरस:

छिन्नायाः स्वरसो वाऽपि सेव्यमानो यथाबलम्। जीर्णे घृतेन भुञ्जीत मुद्गयूषोदकेन वा ॥
अतिपूतिशरीरोऽपि दिव्यरूपी भवेन्नरः ॥ ६० ॥

The juice of guḍūcī should be used according to strength with diet consisting of green gram soup and rice added with ghee. By this one even with decomposed body attains brilliant appearance. [60]

पटोलादिक्वाथ:

पटोलखदिरारिष्टत्रिफलाकृष्णवेत्रजम्। तिक्ताशन: पिबन् क्वाथं कुष्ठी कुष्ठं व्यपोहति।। ६१।।

Paṭolādi Kvātha

One suffering from kuṣṭha should take decoction of paṭola, khadira, nimba, triphalā and kṛṣṇa vetra using bitters in diet. Thus he becomes free from the disease. [61]

सप्तसमो योग:

तिलाज्यत्रिफलाक्षौद्रव्योषभल्लातशर्करा:। वृष्य: सप्तसमो मेध्य: कुष्ठहा कामचारिण:।। ६२।।

Saptasama yoga

Tila, triphalā, trikaṭu, bhallātaka, sugar, ghee and honey– this saptasama (seven ingredients in equal parts) formulation is aphordisiac, promotes intellect and destroys kuṣṭha. There is no restriction of diet etc during this regimen. [62]

विडङ्गादिचूर्णम्

विडङ्गत्रिफलाकृष्णाचूर्णं लीढं समाक्षिकम्। हन्ति कुष्ठं क्रिमीन् मेहान् नाडीव्रणभगन्दरान्।। ६३।।

Viḍaṅgādi cūrṇa

Powder of viḍaṅga, triphalā and pippalī taken with honey destroys kuṣṭha, worms, prameha, sinus and fistula-in-ano. [63]

इन्द्राशनचूर्णम्

इन्द्राशनं समादाय प्रशस्तेऽहनि चोद्धृतम्। तच्चूर्णं मधुसर्पिर्भ्यां लिहेत् क्षीरघृताशन:।।
हत्वा च सर्वकुष्ठानि जीवेद्वर्षशतद्वयम्।। ६४।।

Indrāśana is uprooted on anspicious day and its powder is taken with honey and ghee using profusely milk and ghee in diet. By this all types of kuṣṭha are destroyed and the person attains long life. [64]

अभयादि-निम्बादिचूर्णद्वयम्

य: खादेदभयारिष्टमरिष्टामलकानि वा। स जयेत् सर्वकुष्ठानि मासादूर्ध्वं न संशय:।। ६५।।

One who takes regularly harītakī and nimba or nimba and āmalaka overcomes all types of kuṣṭha after a month. [65]

खदिरनिर्दाहरस:

दह्यमानाच्च्युत: कुम्भे मूलगे खदिराद् रस:। साज्यधात्रीरसक्षौद्रो हन्यात् कुष्ठं रसायनम्।। ६६।।

The sap coming out of the Khadira root being burnt is mixed with āmalakī juice, ghee and honey. Its use destroys kuṣṭha and is rasāyana. [66]

वायस्यादिलेपः

वायस्येडगजाकुष्ठकृष्णाभिर्गुडिका कृता। बस्तमूत्रेण सम्पिष्टा लेपाच्छिवत्रविनाशिनी॥ ६७॥

Vāyasyādi lepa

Vāyasī (kākamācī), cakramarda, kuṣṭha and pippalī– these are pounded with goat's urine and made into pills. The pill is rubbed and the paste is applied to the affected part. It destroys vitiligo. [67]

पूतीकादिलेपः

पूतीकार्कस्नुङ्नरेन्द्रद्रुमाणां मूत्रैः पिष्टाः पल्लवाः सौमनाश्च।
लेपाच्छिवत्रं घ्नन्ति दद्रुव्रणांश्च कुष्ठान्यर्शांस्युग्रनाडीव्रणांश्च॥ ६८॥

Pūtīkādi lepa

Leaves of pūtīka, arka, snuhī, āragvadha and jātī are pounded with urine and pasted on the part. It destroys vitiligo, ring worm, wounds, kuṣṭha, piles and sinus. [68]

लेपद्वयम्

गजचित्रव्याघ्रचर्ममसीतैलविलेपनात्। श्वित्रं नाशं व्रजेत् किं वा पूतिकीटविलेपनात्॥ ६९॥

By pasting of the ash of the hide of elephant and leopard mixed with oil vitiligo disappears. The paste of pūtikīta also acts similarly. [69]

अवल्गुजबीजादिलेपः

कुडवोऽवल्गुजबीजाद्धरितालचतुर्थभागसंमिश्रः। मूत्रेण गवां पिष्टः सवर्णकरणः परः श्वित्रे॥

Avalgujabījādi lepa

Bākūcī seeds 160 gm and orpiment 40 gm are pounded with cow's urine– It normalises the pigmentation in vitiligo. [70]

धात्र्यादिक्वाथः

धात्रीखदिरयोः क्वाथं पीत्वाऽवल्गुजसंयुतम्। शङ्खेन्दुधवलं श्वित्रं तूर्णं हन्ति न संशयः॥ ७१॥

Dhātryādi kvātha

The decoction of dhātrī (āmalakī) and khadira added with bākucī destroys vitiligo in no time. [71]

गजपुरीषक्षारपक्वावल्गुजप्रलेपः

क्षारे सुदग्धे गजलिण्डजे च गजस्य मूत्रेण बहुस्रुते च।
द्रोणप्रमाणं दशभागयुक्तं दत्त्वा पचेद्बीजमवल्गुजस्य॥ ७२॥
एतद् यदा चिक्कणतामुपैति तदा सुसिद्धां गुडिकां प्रयुञ्ज्यात्।
श्वित्रं विलिम्पेदथ तेन घृष्टं तदा व्रजत्याशु सवर्णभावम्॥ ७३॥

Elephant's faeces are burnt and the ash is decanted several times with elephant's urine. This liquid 10.24 litre should be added with the bākucī seeds in 1/10 quantity and cooked till it becomes smooth and glistening. Then it is made into pills. By rubbing this pill, the paste is applied to the affected part. This alleviates vitiligo and normalises the colour of skin. [72-73]

श्वेतजयन्तीमूलकल्कः

श्वेतजयन्तीमूलं पिष्टं पीतश्च गव्यपयसैव। श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा॥ ७४॥

The root of white jayantī pounded and taken with cow's milk on sunday destroys vitiligo positively. [74]

पञ्चनिम्बम्

पुष्पकाले च पुष्पाणि फलकाले फलानि च। सञ्चूर्ण्य पिचुमर्दस्य त्वङ्मूलानि दलानि च॥ ७५॥
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत्। त्रिफलात्र्यूषणब्राह्मीश्वदंष्ट्राऽरुष्कराग्निकाः॥ ७६॥
विडङ्गसारवाराहीलौहचूर्णामृताः समाः। हरिद्राद्वयवागुजीव्याधिघाताः सशर्कराः॥ ७७॥
कुष्ठेन्द्रयवपाठाश्च कृत्वा चूर्णं सुसंयुतम्। खदिराशननिम्बानां घनक्वाथेन भावयेत्॥ ७८॥
सप्तधा पञ्चनिम्बन्तु मार्कवस्वरसेन तु। स्निग्धशुद्धतनुर्धीमान् योजयेच्च शुभे दिने॥ ७९॥
मधुना तिक्तहविषा खदिराशनवारिणा। लेह्यमुष्णाम्बुना वाऽपि कोलवृद्ध्या पलं पिबेत्॥
जीर्णे च भोजनं कार्य्यं स्निग्धं लघु हितञ्च यत्॥ ८०॥
विचर्च्चिकौदुम्बरपुण्डरीककपालदद्रूकिटिभालसादि।
शतारुविस्फोटविसर्पपामाः कफप्रकोपं त्रिविधं किलासम्॥ ८१॥
भगन्दरश्लीपदवातरक्तं जातान्ध्यनाडीव्रणशीर्षरोगान्।
सर्वान् प्रमेहान् प्रदरांश्च सर्वान् दंष्ट्राविषं मूलविषं निहन्ति॥ ८२॥
स्थूलोदरः सिंहकृशोदरश्च सुश्लिष्टसन्धिर्मधुनोपयोगात्।
समोपयोगादपि ये दशन्ति सर्पादयो यान्ति विनाशमाशु॥ ८३॥
जीवेच्चिरं व्याधिजराविमुक्तः शुभे रतश्चन्द्रसमानकान्तिः॥ ८४॥

Pañcanimba

Powder of flowers and fruits along with bark, root and leaves of nimba collected in proper time each two parts is mixed with the powders of triphalā, trikaṭu, brāhmī, gokṣura, bhallātaka, citraka, viḍaṅga, vārāhī, lauhabhasma, guḍūcī, haridrā, dāruharidrā, bākucī, āragvadha, śarkarā, kuṣṭha, indrayava and pāṭhā each one part. This should be impregnated seven times with concentrated decoction of khadira, bījaka and mūrvā and also with bhṛṅgarāja juice. This pañcanimba (cūrṇa) should be taken after proper unction and evacuation of the body with honey, trivṛt, tikta ghṛta (ghee processed with bitters), decoction of khadira and bījaka or warm water in the dose of 5 gm increasing upto 40 gm. The diet during the regimen should consist of unctuous, light and wholesome items.

It alleviates vicarcikā, all types of kuṣṭha, vitiligo, skin diseases, fistula-in-ano, filaria, vātarakta, baldness, sinus, head diseases, prameha, pradara, poisoning, obesity and promotes lustre, health and longevity. [75-84]

एकविंशतिको गुग्गुलुः

चित्रकत्रिफलाव्योषमजाजीं कारवीं वचाम्। सैन्धवातिविषे कुष्ठं चव्यैलायावशूकजम्।। ८५ ।।
विडङ्गान्यजमोदांश्च मुस्तान्यमरदारु च। यावन्त्येतानि सर्वाणि तावन्मात्रन्तु गुग्गुलुम्।। ८६ ।।
सङ्क्षुद्य सर्पिषा सार्द्धं गुडिकां कारयेद्भिषक्। प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम्।। ८७ ।।
हन्त्यष्टादश कुष्ठानि क्रिमीन् दुष्टव्रणानपि। ग्रहण्यर्शोविकारांश्च मुखामयगलग्रहान्।। ८८ ।।
गृध्रसीमथ भग्नञ्च गुल्मञ्चापि नियच्छति। व्याधीन् कोष्ठगतांश्चान्याञ्जयेद्विष्णुरिवासुरान्।। ८९ ।।

Ekaviṃśatika guggulu

Citraka, triphalā, trikaṭu, jīraka, kṛṣṇa jīraka, vacā, saindhava, ativiṣā, kuṣṭha, cavya, elā, yavakṣāra, viḍaṅga, ajamodā, musta, devadāru in equal parts and guggulu equal to the above total. This is pounded with ghee and made into pills. It should be taken in the morning or at the time of meal according to strength.

It alleviates eighteen types of kuṣṭha, worms, dirty ulcers, grahaṇīroga, piles, diseases of mouth, obstruction in throat, sciatica, fracture, gulma and other abdominal diseases. [85-89]

भल्लातकवर्धमानम्

पञ्च भल्लातकांश्छित्त्वा साधयेद्विधिवज्जले। कषायं तं पिबेच्छीतं घृतेनाक्तौष्ठतालुकः ।। ९० ।।
पञ्चवृद्ध्या पिबेद् यावत् सप्ततिं ह्रासयेत्ततः। जीर्णेऽद्यादोदनं शीतं घृतक्षीरोपसंहितम्।। ९१ ।।
एतद्रसायनं मेध्यं वलीपलितनाशनम्। कुष्ठार्शःक्रिमिदोषघ्नं दुष्टशुक्रविशोधनम्।। ९२ ।।

Bhallātakavardhamāna

Five bhallātaka nuts, after cutting, should be boiled in water. This decoction when cooled should be taken after smearing lips and palate with ghee. The dose should be increased at the rate of five nuts daily upto seventy and then reduced gradually in the same way. After the drug is digested, cool rice added with ghee and milk should be taken.

It is rasāyana, intellect-promoting, purifies defective semen and alleviates wrinkles, greying of hairs, kuṣṭha, piles and worms. [90-92]

भल्लातकतैलम्

तैलं भल्लातकानाञ्च पिबेन्मासं यथाबलम्। सर्वोपतापनिर्मुक्तो जीवेद्वर्षशतं दृढः ।। ९३ ।।

Bhallātaka-taila

The oil extracted of the bhallātaka nuts should be taken for a month (in the dose) according to strength. By this one lives long with firmness and free from all distresses. [93]

खदिरक्वाथः

प्रलेपोद्वर्त्तनस्नानपानभोजनकर्मणि। शीलितं खादिरं वारि सर्वत्वग्दोषनाशनम्॥ ९४॥

The decoction of khadira used as paste, anointment, bath, food and drink destroys all skin diseases. [94]

तिक्तषट्पलकं घृतम्

निम्बपटोलं दार्वीं दुरालभां तिक्तरोहिणीं त्रिफलाम्। कुर्य्यादर्द्धपलांशान् पर्पटकं त्रायमाणाञ्च॥
सलिलाढकसिद्धानां रसेऽष्टभागस्थिते क्षिपेत् पूते। चन्दनकिराततिक्तकमागधिकात्रायमाणाश्च॥ ९६॥
मुस्तकवत्सकबीजं कल्कीकृतमर्द्धकार्षिकान् भागान्। नवसर्पिषश्च षट्पलमेतत् सिद्धं घृतं पेयम्॥ ९७॥
कुष्ठज्वरगुल्मार्शोग्रहणीपाण्ड्वामयश्वयथून् हन्ति। पामाविसर्पपिडकाकण्डूगलगण्डनुत् सिद्धम्॥ ९८॥

Tiktaṣaṭpalaka ghṛta

Nimba, paṭola, dāruharidrā, durālabhā, kaṭukā, triphalā, parpaṭa and trāyamāṇā each 20 gm are boiled in water 2.56 litre reduced to 1/8. With this decoction fresh ghee 240 gm is cooked along with the paste of candana, kirātatikta, pippalī, trāyamāṇā, mustaka, indrayava each 5 gm. This ghṛta alleviates kuṣṭha, fever, grahaṇīroga, anaemia and oedema in addition to pama, erysipelas, boils, itching and goitre. [95-98]

पञ्चतिक्तघृतम्

निम्बं पटोलं व्याघ्रीञ्च गुडूचीं वासकं तथा। कुर्य्याद्दशपलान् भागानेकैकस्य सुकुट्टितान्॥ ९९॥
जलद्रोणे विपक्तव्यं यावत् पादावशेषितम्। घृतप्रस्थं पचेत्तेन त्रिफलागर्भसंयुतम्॥१००॥
पञ्चतिक्तमिदं ख्यातं सर्पिः कुष्ठविनाशनम्। अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान्॥१०१॥
विंशतिं श्लैष्मिकांश्चैव पानादेवापकर्षति। दुष्टव्रणक्रिमीनर्शः पञ्च कासांश्च नाशयेत्॥१०२॥

Pañcatikta ghṛta

Nimba, paṭola, kaṇṭakārī, guḍūcī and vāsā each 400 gm– are disintegrated and boiled in water 10.24 litre reduced to one-fourth. With this decoction ghee 640 gm is cooked along with the paste of triphalā. This pañcatikta ghṛta destroys kuṣṭha in addition to eighty vātika, forty paittika and twenty kaphaja diseases, dirty wounds, worms, piles and five types of cough. [99-102]

तिक्तकघृतम्

त्रिफलाद्विनिशावासायासपर्पटकूलकान्। त्रायन्तीकटुकानिम्बान् प्रत्येकं द्विपलोन्मितान्॥१०३॥
क्वाथयित्वा जलद्रोणे पादशेषेण तेन तु। घृतप्रस्थं पचेत् कल्कैः पिप्पलीघनचन्दनैः॥१०४॥
त्रायन्तीशक्रभूनिम्बैस्तत् पीतं तिक्तकं घृतम्। हन्ति कुष्ठज्वरार्शांसि श्वयथुं ग्रहणीगदम्।
पाण्डुरोगं विसर्पञ्च क्लीबानामपि शस्यते॥१०५॥

Tiktaka ghṛta

Triphalā, haridrā, dāruharidrā, vāsā, yavāsa, parpaṭa, paṭola (leaves), trāyamāṇā, kaṭukā

and nimba each 80 gm are boiled in water 10.24 litre reduced to one-fourth. With this decoction ghee 640 gm is cooked along with the paste of pippalī, musta, candana, trāyamāṇā, indrayava and kirātatikta.

Regular intake of this tiktaka ghṛta alleviates kuṣṭha, fever, piles, oedema, grahaṇīroga, anaemia, erysipelas and impotency. [103-105]

महातिक्तकघृतम्

सप्तच्छदं प्रतिविषां सम्पाकं तिक्तरोहिणीं पाठाम्। मुस्तमुशीरं त्रिफलां पटोलपिचुमर्दपर्पटकम्॥१०६॥
धन्वयवासं चन्दनमुपकुल्ये पद्मकं रजन्यौ च। षड्ग्रन्थां सविशालां शतावरीं शारिवे चोभे॥१०७॥
वत्सकबीजं वासां मूर्वाममृतां किराततिक्तञ्च। कल्कान् कुर्यान्मतिमान् यष्ट्याह्वं त्रायमाणाञ्च॥१०८॥
कल्कस्तु चतुर्भागो जलमष्टगुणं रसोऽमृतफलानाम्। द्विगुणो घृतात् प्रदेयस्तत्सर्पिः पाययेत्सिद्धम्॥१०९॥
कुष्ठानि रक्तपित्तं प्रबलान्यर्शांसि रक्तवाहीनि। वीसर्पमम्लपित्तं वातासृक्पाण्डुरोगञ्च॥११०॥
विस्फोटकान् सपामानुन्मादान् कामलां ज्वरं कण्डूम्। हृद्रोगगुल्मपिडकामसृग्दरं गण्डमालाञ्च॥१११॥
हन्यादेतत् सद्यः पीतं काले यथाबलं सर्पिः। योगशतैरप्यजितान् महाविकारान् महातिक्तम्॥११२॥

Mahātiktaka ghṛta

Saptaparṇa, prativiṣā, āragvadha, kaṭukā, pāṭhā. musta, uśīra, triphalā, paṭola, nimba, parpaṭa, dhanvayāsa, candana, pippalī, gajapippalī, padmaka, haridrā, dāruharidrā, vacā, viśālā, śatāvarī, sārivā, kṛṣṇa sārivā, indrayava, vāsā, mūrvā, guḍūcī, kirātatikta, madhuyaṣṭī and trāyamāṇā– with the paste of these one-fourth, water eight times and āmalaka juice in double quantity ghee is cooked.

It alleviates kuṣṭha, raktapitta, bleeding piles, erysipelas, amlapitta, vātarakta, anaemia, eruption, pāmā, unmāda, kāmalā, fever, itching, cardiac disease, gulma, boils, raktapradara, gaṇḍamālā and other severe diseases which do not respond to various therapies. [106-112]

महाखदिरकं घृतम्

खदिरस्य तुलाः पञ्च शिंशपासनयोस्तुले। तुलाऽर्द्धाः सर्व एवैते करञ्जारिष्टवेतसाः॥११३॥
पर्पटः कुटजश्चैव वृषः क्रिमिहरस्तथा। हरिद्रे कृतमालश्च गुडूची त्रिफला त्रिवृत्॥११४॥
सप्तपर्णस्तु संक्षुण्णो दशद्रोणे च वारिणः। अष्टभागावशेषस्तु कषायमवतारयेत्॥११५॥
धात्रीरसञ्च तुल्यांशं सर्पिषश्चाढकं पचेत्। महातिक्तककल्कैश्च यथोक्तैः पलसम्मितैः॥११६॥
निहन्ति सर्वकुष्ठानि पानाभ्यङ्गनिषेवणात्। महाखदिरमित्येतत् परं कुष्ठविनाशनम्॥११७॥

Mahākhadira-ghṛta

Khadira 20 kg, śiṃśapā and bījaka each 4 kg, karañja, nimba, vetasa, parpaṭa, kuṭaja, vāsā, viḍaṅga, haridrā, dāruharidrā, āragvadha, guḍūcī. triphalā, trivṛt and saptaparṇa each 2 kg– they are ground and boiled in water 102.4 litre reduced to one-eighth. Now ghee 2.56 kg is cooked with this decoction alongwith āmalaka juice 2.56 litre and paste of the drugs mentioned under mahātiktaka ghṛta each 40 gm.

Mahākhadira-ghrta alleviates, by intake and anointment, all types of kuṣṭha. [113-117]

पञ्चतिक्तघृतगुग्गुलुः

निम्बामृतावृषपटोलनिदिग्धिकानां भागान् पृथग्दशपलान् विपचेद् घटेऽपाम्।
अष्टांशशेषितजलेन सुनिःसृतेन प्रस्थं घृतस्य विपचेत् पिचुभागकल्कैः ॥११८॥
पाठाविडङ्गसुरदारुगजोपकुल्याद्विक्षारनागरनिशामिशिचव्यकुष्ठैः।
तेजोवतीमरिचवत्सकदीप्यकाग्निरोहिण्यरुष्करवचाकणमूलयुक्तैः ॥११९॥
मञ्जिष्ठयाऽतिविषया वरया यमान्या संशुद्धगुग्गुलुपलैरपि पञ्चसंख्यैः।
तत् सेवितं विषमतिप्रबलं समीरं सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥१२०॥
नाडीव्रणार्बुदभगन्दरगण्डमालाः जत्रूर्ध्वसर्वगदगुल्मगुदोत्थमेहान्।
यक्ष्मारुचिश्वसनपीनसकासशोषहृत्पाण्डुरोगगलविद्रधिवातरक्तम् ॥१२१॥

Pañcatiktaghṛta-guggulu

Nimba, guḍūcī, vāsā, paṭola and kaṇṭakārī, each 400 gm, are boiled in water 10.24 litre reduced to one-eighth. Ghee 640 gm is cooked with this decoction along with the paste of pāṭhā, viḍaṅga, devadāru, gajapippalī, yavakṣāra, svarjikṣāra, śuṇṭhī, haridrā, śatapuṣpā, cavya, kuṣṭha, tejovatī, marica, kuṭaja seeds, yavānī, citraka, kaṭukā, bhallātaka, vacā, pippalīmūla, mañjiṣṭhā, ativiṣā, triphalā and yavānī each 10 gm and purified guggulu 200 gm.

Its regular use alleviates poison, severe vāta, kuṣṭha, sinus, arbuda, fistula-in-ano, gaṇḍamālā, all supraclavicular diseases, gulma, piles, prameha, consumption, anorexia, dyspnoea, chronic coryza, cough, wasting, cardiac disease, anaemia, throat diseases, abscess and vātarakta. [118-121]

वज्रकं घृतम्

वासागुडूचीत्रिफलापटोलं करञ्जनिम्बासनकृष्णवेत्रम्।
तत्क्वाथकल्केन घृतं विपक्वं तद्वज्रवत् कुष्ठहरं प्रदिष्टम् ॥१२२॥
विशीर्णकर्णाङ्गुलिहस्तपादः क्रिम्यर्दितो भिन्नगलोऽपि मर्त्यः।
पौराणिकीं कान्तिमवाप्य जीवेदव्याहतो वर्षशतञ्च कुष्ठी ॥१२३॥

Vajraka ghṛta

Vāsā, guḍūcī, triphalā, paṭola, karañja, nimba, bījaka and kṛṣṇavetra– with decoction and paste of these ghee is cooked which is known as vajraka as it destroys kuṣṭha like thunderbolt. By this kuṣṭha even in severe condition, is alleviated and the person attains normal lustre and healthy long life. [122-123]

आरग्वधाद्यं तैलम्

आरग्वधं धवं कुष्ठं हरितालं मनःशिलाम्। रजनीद्वयसंयुक्तं पचेत्तैलं विधानवित्॥
एतेनाभ्यञ्जयेच्छ्वित्री क्षिप्रं श्वित्रं विनश्यति ॥१२४॥

Āragvadhādya taila

Āragvadha, dūrvā, kuṣṭha, orpiment, realgar, haridrā and dāruharidrā– with these oil is cooked. Anointment with this destroys vitiligo. [124]

तृणकतैलम्

मञ्जिष्ठारुङ्निशाचक्रमर्दारग्वधपल्लवैः। तृणकस्वरसे सिद्धं तैलं कुष्ठहरं कटु ॥१२५॥

Tṛṇaka taila

Mañjiṣṭhā, kuṣṭha, haridrā, cakramarda and āragvadha (leaves)– with these along with the juice of tṛṇaka oil is cooked. It is pungent and destroys kuṣṭha. [125]

महातृणकतैलम्

हरिद्रात्रिफलादारुहयमारकचित्रकम्। सप्तच्छदश्च निम्बत्वक्करञ्जौ बालकं नखी ॥१२६॥
कुष्ठमेडगजाबीजं लाङ्गली गणिकारिका। जातीपत्रञ्च दार्वी च हरितालं मनःशिला: ॥१२७॥
कलिङ्गं तिलपत्रञ्च अर्कक्षीरञ्च गुग्गुलुः। गुडत्वङ्मरिचश्चोरा कुङ्कुमं ग्रन्थिपर्णकम् ॥१२८॥
सर्जपर्णासखदिरं विडङ्गं पिप्पली वचा। घनरेण्वमृतायष्टिकेशरं ध्यामकं विषम् ॥१२९॥
विश्वकट्फलमञ्जिष्ठा बोलस्तुम्बीफलं तथा। स्नुहीसम्पाकयोः पत्रं वागुजीबीजमांसिके ॥१३०॥
एला ज्योतिष्मतीमूलं शिरीषो गोमयाद्रसः। चन्दने कुष्ठनिर्गुण्डीविशाला मल्लिकाद्वयम् ॥१३१॥
वासाश्वकर्णी ब्राह्मी च श्र्याह्वचम्पककुड्मलम्। एतैः कल्कैः पचेत्तैलं तृणकस्वरसद्रवम् ॥
सर्वत्वग्दोषहरणं महातृणकसंज्ञितम् ॥१३२॥

Mahātṛṇaka taila

Haridrā, triphalā, devadāru, karavīra, citraka, saptaparṇa, nimba (bark), karañja, bālaka, nakha, kuṣṭha, cakramarda (seeds), lāṅgalī, agnimantha, jātī (leaves), dāruharidrā, orpiment, realgar, indrayava, tila (leaves), arka (latex), guggulu, tvak, marica, coraka, kuṅkuma, granthiparṇa, sarja, parṇāsa, khadira, viḍaṅga, pippalī, vacā, musta, parpaṭa, guḍucī, madhuyaṣṭī, nāgakeśara, dnānyaka, vatsanābha, śuṇṭhī, kaṭphala, mañjiṣṭhā, balā, tiktālābū (fruit), snuhī (leaf), āragvadha (leaf), bākucī (seeds), māṃsī, elā, jyotiṣmatī (root), śirīṣa, cowdung juice, candana, rakta candana, kuṣṭha, nirguṇḍī, viśālā, mallikā, āpharamallikā, vāsā, aśvakarṇa, brāhmī, śrīveṣṭaka, campaka (bud)– with the paste of these drugs oil is cooked along with tṛṇaka juice. This is known as 'mahātṛṇaka' which destroys all skin diseases. [126-132]

वज्रकतैलम्

सप्तपर्णकरञ्जार्कमालतीकरवीरजम्। मूलं स्नुहाशिरीषाभ्यां चित्रकास्फोतयोरपि ॥१३३॥
विषलाङ्गलवज्राख्यकाशीशालमनःशिलाः। करञ्जबीजं त्रिफलां त्रिकटुं रजनीद्वयम् ॥१३४॥
सिद्धार्थकं विडङ्गञ्च प्रपुन्नाडञ्च संहरेत्। मूत्रपिष्टैः पचेत्तैलमेभिः कुष्ठविनाशनम् ॥
अभ्यङ्गाद्वज्रकं नाम नाडीदुष्टव्रणापहम् ॥१३५॥

Vajraka taila

Roots of saptaparṇa, karañja, arka, jātī, karavīra, snuhī, śirīsa, citraka, āsphotā, vatsanābha, lāṅgalī, vajrākhya, kāsīsa, harītala, manahsilā, karañja seeds, triphalā, trikaṭu, haridrā, dāruharidrā, sarṣapa, viḍaṅga and cakramarda– with (the paste of) these pounded with cow's urine oil is cooked (along with cow's urine). Vajraka taila, by anointment, destroys kuṣṭha, sinus and dirty wounds. [133-135]

स्वल्पमरिचाद्यं तैलम्

मरिचालशिलाऽब्दार्कपयोऽश्वारिजटात्रिवृत्- । शकृद्रसविशालारुङ्निशायुग्दारुचन्दनैः ॥१३६॥
कटुतैलात् पचेत् प्रस्थं द्व्यक्षैर्विषपलान्वितैः । सगोमूत्रं तदभ्यङ्गाद् दद्रुश्वित्रविनाशनम् ॥
सर्वेष्वपि च कुष्ठेषु तैलमेतत् प्रशस्यते ॥१३७॥

Svalpamaricādya taila

Marica, orpiment, realgar, arka (latex), karavīra (root), trivṛt, cow-dung juice, viśālā, kuṣṭha, haridrā, dāruharidrā, devadāru, candana each 20 gm, vatsanābha 40 gm– with these mustard oil 640 ml is cooked along with cow's urine. Its anointment is efficacious in ring worm, vitiligo and all types of kuṣṭha. [136-137]

बृहन्मरिचाद्यं तैलम्

मरिचं त्रिवृता दन्ती क्षीरमार्कं शकृद्रसः । देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥१३८॥
विशाला करवीरञ्च हरितालं मनःशिला । चित्रको लाङ्गलाख्या च विडङ्गं चक्रमर्दकम् ॥१३९॥
शिरीषं कुटजो निम्बः सप्तपर्णः स्नुहाऽमृता । सम्पाको नक्तमालोऽब्दःखदिरं पिप्पली वचा ॥१४०॥
ज्योतिष्मती च पलिका विषस्य द्विपलं भवेत् । आढकं कटुतैलस्य गोमूत्रन्तु चतुर्गुणम् ॥१४१॥
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत् । पक्त्वा तैलवरं ह्येतन्म्रक्षयेत् कौष्ठकान् व्रणान् ॥१४२॥
पामाविचर्चिकादद्रुकण्डूविस्फोटकानि च । वलयः पलितं छाया नीली व्यङ्गस्तथैव च ॥
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्यञ्च जायते ॥१४३॥
प्रथमे वयसि स्त्रीणां यासां नस्यन्तु दीयते । परामपि जरां प्राप्य न स्तना यान्ति नम्रताम् ॥१४४॥
वलीवर्दस्तुरङ्गो वा गजो वा वायुपीडितः । एभिरभ्यञ्जनैर्गाढं भवेन्मारुतविक्रमः ॥१४५॥

Bṛhat maricādya taila

Marica, trivṛt, dantī, arka (latex), cowdung juice, devadāru, haridrā, dāruharidrā, māṃsī, kuṣṭha, candana, viśālā, karavīra, orpiment, realgar, citraka, lāṅgalī, viḍaṅga, cakramarda, śirīṣa, kuṭaja, nimba, saptaparṇa, snuhī, guḍucī, āragvadha, karañja, musta, khadira, pippalī, vacā, jyotiṣmatī– each 40 gm, vatsanābha 80 gm– with the paste of these mustard oil 2.58 litre is cooked along with four times cow's urine in eartnen or iron vessel on mild fire. By anointment it alleviates leprotic ulcers, pāmā, vicarcikā, ring worm, itching, eruptions, wrinkles, greying of hairs, shade, blackishness and freckles. It smoothens skin and in women maintains hardness of breasts if it is used as snuff in early age. In animals too, it alleviates the disorders of vāta. [138-145]

विषतैलम्

नक्तमालं हरिद्रे द्वे अर्कं तगरमेव च। करवीरं वचा कुष्टमास्फोता रक्तचन्दनम् ॥१४६॥
मालती सप्तपर्णश्च मञ्जिष्ठा सिन्धुवारिका। एषामर्द्धपलान् भागान् विषस्यापि पलं भवेत् ॥१४७॥
चतुर्गुणे गवां मूत्रे तैलप्रस्थं विपाचयेत्। श्वित्रविस्फोटकिटिभकीटलूताविचर्चिकाः ॥१४८॥
कण्डूकच्छूविकाराश्च ये व्रणा विषदूषिताः। विषतैलमिदं नाम्ना सर्वव्रणविशोधनम् ॥१४९॥

Viṣataila

Karañja, haridrā, dāruharidrā, arka, tagara, karavīra, vacā, kuṣṭha, āsphotā, rakta candana, jātī, saptaparṇa, mañjiṣṭhā, saindhava each 20 gm and vatsanābha 40 gm– with these oil 640 ml is cooked along with four times cow's urine. It alleviates vitiligo, eruptions, kiṭibha, vicarcikā, insectbities, itching, scabies, poisoned ulcer and cleans all types of wound. [146-149]

चित्रकाद्यं तैलम्

श्वेतकरवीररसो गोमूत्रं चित्रकं विडङ्गश्च। कुष्ठेषु तैलयोगः सिद्धोऽयं सन्मतो भिषजाम् ॥१५०॥

Citrakādya taila

(With the paste of) citraka and viḍaṅga, oil is cooked along with juice of white karavīra and cow's urine. It is efficacious in all types of kuṣṭha. [150]

श्वेतकरवीराद्यं तैलम्

श्वेतकरवीरमूलं विषांशसाधितं गवां मूत्रे। चर्मदलसिध्मपामाविस्फोटक्रिमिकिटिभजित्तैलम् ॥१५१॥

Śveta karavīrādya taila

Oil cooked with (the paste of) white karavīra (root) and one-fourth vatsanābha along with cow's urine overcomes carmadala, sidhma, pāmā, visphoṭa, wounds and kiṭibha. [151]

स्वल्पसिन्दूराद्यं तैलम्

सिन्दूरार्द्धपलात् पिष्ट्वा जीरकस्य पलं तथा। कटुतैलं पचेन्मार्नी सद्यः पामाहरं परम् ॥१५२॥

Svalpasindūrādya taila

Mustard oil 320 ml is cooked with (the paste of) sindūra 20 gm and jīraka 40 gm. It destroys pāmā instantenaously. [152]

महासिन्दूराद्यं तैलम्

सिन्दूरं चन्दनं मांसीं विडङ्गं रजनीद्वयम्। प्रियङ्गुं पद्मकं कुष्ठं मञ्जिष्ठां खदिरं वचाम् ॥१५३॥
जात्यर्कत्रिवृतानिम्बकरञ्जं विषमेव च। कृष्णवेत्रकलोध्रश्च प्रपुन्नाडश्च संहरेत् ॥१५४॥
श्लक्ष्णपिष्टानि सर्वाणि योजयेत्तैलमात्रया। अभ्यङ्गेन प्रयुञ्जीत सर्वकुष्ठविनाशनम् ॥१५५॥
पामाविचर्चिकाकण्डूविसर्पादिविनाशनम्। रक्तपित्तोत्थितान् हन्ति रोगानेवंविधान् बहून् ॥१५६॥

Mahāsindūrādya taila

Sindūra, candana, māṃsī, viḍaṅga, haridrā, dāruharidrā, priyaṅgu, padmaka, kuṣṭha, mañjiṣṭha, khadira, vacā, jātī, arka, trivṛt, nimba, karañja, vatsanābha, kṛṣṇavetra, lodhra and cakramarda– with the fine paste of these oil is cooked. Its use as anointment alleviates all types of kuṣṭha, pāmā, vicarcikā, itching, erysipelas etc. and many other diseases particularly caused by rakta and pitta. [153-156]

आदित्यपाकं तैलम्

मञ्जिष्ठात्रिफलालाक्षानिशाशिलाऽऽलगन्धकैः। चूर्णितैस्तैलमादित्यपक्वं पामाहरं परम्॥१५७॥

Ādityapāka taila

Oil is mixed with the powders of mañjiṣṭhā, triphalā, lākṣā, haridrā, realgar, orpiment and sulphur and cooked in the sun. It destroys pāmā. [157]

दूर्वाद्यं तैलम्

स्वरसेन तु दूर्वायाः पचेत्तैलं चतुर्गुणम्। कच्छूविचर्च्चिकापामा अभ्यङ्गादेव नाशयेत्॥१५८॥

Dūrvādya taila

Oil is cooked with four times juice of dūrvā, Its anointment destroys scabies, pāmā, and vicarcikā. [158]

निशामनःशिलातैले

अर्कपत्ररसे पक्वं कटुतैलं निशायुतम्। मनःशिलायुतं वाऽपि पामाकण्ड्वादिनाशनम्॥१५९॥

Mustard oil cooked in juice of arka leaves with haridrā or realgar alleviates pāmā, itching etc. [159]

गण्डीरिकाद्यं तैलम्

गण्डीरिकाचित्रकमार्कवार्ककुष्ठद्रुमत्वग्लवणैः समूत्रैः।
तैलं पचेन्मण्डलकुष्ठदद्रुदुष्टव्रणारुःकिटिभापहारि॥१६०॥

Gaṇḍīrikādya taila

(Latex of) gaṇḍīrikā (snuhī), citraka, bhṛṅgarāja, arka, kuṣṭha, āragvadha (bark), salts and urine– with these oil is cooked. It is efficacious in maṇḍala kuṣṭha, ring worm, dirty wounds, boils and kiṭibha. [160]

पृथ्वीसारतैलम्

चित्रकस्याथ निर्गुण्ड्या हयमारस्य मूलतः। नाडीचबीजाद्विषतः काञ्जीपिष्टं पलं पलम्॥१६१॥
करञ्जतैलाष्टपलं काञ्जिकस्य पलं पुनः। मिश्रितं सूर्य्यसम्पक्वं तैलं कुष्ठव्रणास्रजित्॥१६२॥

Pṛthvīsāra taila

Roots of citraka, nirguṇḍī, karavīra and nāḍīca (seeds) each 40 gm. pounded with

sour gruel– with these karañja oil 320 ml. mixed with sour gruel 40 ml is cooked in the sun. It destroys kuṣṭha, wounds and diseases of blood. [161-162]

सोमराजीतैलम्

सोमराजी हरिद्रे द्वे सर्षपाः कुष्ठमेव च। करञ्जैडगजाबीजं पत्रमारग्वधस्य च।।१६३।।
चतुर्गुणं जलं दत्त्वा गोमूत्रप्रस्थसंयुतम्। विपचेत् सार्षपं तैलं नाडीदुष्टव्रणापहम्।।१६४।।
अनेनाशु प्रणश्यन्ति कुष्ठान्यष्टादशैव तु। नीलिका पिप्लवो व्यङ्गो गम्भीरं वातशोणितम्।।
कण्डून्यच्छप्रशमनं कच्छूपामाविनाशनम्।।१६५।।

Somarāji taila

Somarājī (bākucī), haridrā, dāruharidrā, sarṣapa, kuṣṭha, karañja, cakramarda seeds, āragvadha (leaves)– with the paste of these mustard oil is cooked along with four times water and cow's urine 540 ml. It alleviates sinus, dirty wounds, eighteen types of kuṣṭha in addition to freckles, vātarakta, itching, scabies, pāmā etc. [163-165]

कुष्ठे शोधनक्रमः

पक्षात् पक्षाच्छर्दनान्यभ्युपेयान् मासान्मासात् स्रंसनश्चाप्यधस्तात्।
त्र्यहात् त्र्यहान्नस्ततश्चावपीडान् मासेष्वसृङ्मोक्षयेत् षट्सु षट्सु।।१६६।।

In kuṣṭha emesis, purgation, snuffing and blood-letting should be performed every fornight, month, three days and six months respectively. [166]

पथ्यापथ्यम्

योषिन्मांससुरात्यागः शालिमुद्गयवादयः। पुराणास्तिक्तशाकश्च जाङ्गलं कुष्ठिनां हितम्।।१६७।।

Sexual intercourse and alcoholic drinks should be avoided and old rice, green gram, barley etc., bitter vegetables and meat of wild animals should be used. [167]

।। इति कुष्ठचिकित्सा।। ५०।।

Thus ends treatment of kuṣṭha. [50]

५१. एकपञ्चाशोऽध्यायः

CHAPTER LI

उदर्दकोठशीतपित्त-चिकित्सा

Treatment of Udarda, Koṭha and Śītapitta (urticaria and other allergic manifestations)

उदर्दे क्रियाक्रमः

अभ्यङ्गः कटुतैलेन सेकश्चोष्णाम्बुभिस्ततः। उदर्दे वमनं कार्य्यं पटोलारिष्टवारिणा॥ १॥

In udarda, anointment with mustard oil followed by hot bath is beneficial. Moreover, emesis should be induced with the decoction of paṭola and nimba. [1]

त्रिफलाक्वाथादिः

त्रिफलापुरकृष्णाभिर्विरेकश्चात्र शस्यते। त्रिफलां क्षौद्रसहितां पिबेद्वा नवकार्षिकम्॥ २॥

Purgation with triphalā, guggulu and pippalī is also advisable. Besides, triphalā with honey or navakārṣika (mentioned in vātarakta) should be used. [2]

उदर्दहरा योगाः

विसर्पोक्तममृतादिं भिषगत्रापि योजयेत्। सितां मधुकसंयुक्तां गुडमामलकैः सह॥ ३॥

The physician should prescribe amṛtādi mentioned under erysipelas. Moreover, madhuka mixed with sugar or āmalaka mixed with jaggery should be taken. [3]

सगुडयमानीप्रयोगः

सगुडं दीप्यकं यस्तु खादेत् पथ्यान्नभुङ् नरः। तस्य नश्यति सप्ताहादुदर्दः सर्वदेहजः॥ ४॥

One who takes yavānī with jaggery keeping on wholesome diet becomes free from generalised udarda in a week. [4]

सिद्धार्थाद्युद्वर्तनम्

सिद्धार्थरजनीकल्कैः प्रपुन्नाडतिलैः सह। कटुतैलेन संमिश्रमेतदुद्वर्त्तनं परम्॥ ५॥

Siddhārthādyudvarttana

Siddhartha (yellow mustard, haridrā, cakramarda and sesamum pounded and mixed with mustard oil makes a good anointment (for udarda). [5]

दूर्वादिलेपः

दूर्वानिशायुतो लेपः कच्छूपामाविनाशनः। क्रिमिदद्रुहरश्चैव शीतपित्तापहः स्मृतः॥ ६॥

Application of the paste of dūrvā and haridrā alleviates scabies, pāmā, worms, ring worm and śītapitta. [6]

अग्निमन्थप्रयोगः

अग्निमन्थभवं मूलं पिष्टं पीतञ्च सर्पिषा। शीतपित्तोदर्दकोठान् सप्ताहादेव नाशयेत्॥ ७॥

The root of agnimantha pounded and taken with ghee destroys śītapitta, udard and koṭha in a week. [7]

कोठे क्रियाक्रम:

कुष्ठोक्तश्च क्रमं कुयादम्लपित्तघ्नमेव च। उदर्दोक्तां क्रियाश्चापि कोठरोगे समासत: ॥ ८ ॥
सर्पि: पीत्वा महातिक्तं कार्य्यं शोणितमोक्षणम् ॥ ९ ॥

Koṭha should be treated, in general, with the measures as prescribed for kuṣṭha, amlapitta and udarda. [8]

One (suffering from koṭha) should take mahātikta ghṛta and subjected to blood-letting. [9]

निम्बपत्रप्रयोग:

निम्बस्य पत्राणि सदा घृतेन धात्रीविमिश्राण्यथवोपयुञ्ज्यात् ।
विस्फोटकोठक्षतशीतपित्तं कण्डूवम्रपित्तं रकसां च हन्यात् ॥ १० ॥

The leaves of nimba should be used after mixing it with ghee or āmalakī. It destroys eruption, koṭha, injury, śītapitta, itching, amlapitta and rakasā. [10]

क्षाराद्यभ्यङ्ग:

क्षारसिन्धूत्थतैलैश्च गात्राभ्यङ्गं प्रयोजयेत् ॥ ११ ॥

(In koṭha) body should be anointed with yavakṣāra and saindhava mixed with (mustard) oil. [11]

शीतपित्ते गम्भारीप्रयोग:

गम्भारिकाफलं पक्वं शुष्कमुत्स्वेदितं पुन: । क्षीरेण शीतपित्तघ्नं खादितं पथ्यसेविना ॥ १२ ॥

The ripe fruit of gambhārī is dried and then steamed with cow's milk. It should be taken with milk keeping on wholesome diet in śītapitta. [12]

एलाद्युद्वर्त्तनम्

तैलोद्वर्त्तनयोगेन योज्य एलादिको गण: ॥ १३ ॥

Moreover, elādi group of drugs should be used as oil and anointment. [13]

पथ्यम्

शुष्कमूलकयूषेण कौलत्थेन रसेन वा। भोजनं सर्वदा कार्य्यं लावतित्तिरिजेन वा ॥ १४ ॥
शीतलान्यन्नपानानि बुद्ध्वा दोषगतिं भिषक् । उष्णानि वा यथाकालं शीतपित्ते प्रयोजयेत् ॥ १५ ॥

The diet should consist of soup of dried radish or horse gram or meat soup of quail and partridge. [14]

Keeping in view the condition of doṣas and time the diet, in śītapitta, should be prescribed either cold or hot. [15]

॥ इत्युदर्द-कोठ-शीतपित्त-चिकित्सा ॥ ५१ ॥

Thus ends treatment of udarda, koṭha and śītapitta. [51]

५२. द्विपञ्चाशोऽध्याय:

CHAPTER LII

अम्लपित्त-चिकित्सा

Treatment of Amlapitta (acid gastritis)

क्रियाक्रम:

वान्तिं कृत्वाऽम्लपित्ते तु विरेकं मृदु कारयेत्।
सम्यग्वान्तविरिक्तस्य सुस्निग्धस्यानुवासनम्।। आस्थापनं चिरोद्धूते देयं दोषाद्यपेक्षया।। १ ।।
क्रिया शुद्धस्य शमनी ह्यनुबन्धव्यपेक्षया। दोषसंसर्गजे कार्य्या भेषजाहारकल्पना।। २ ।।
ऊर्ध्वगं वमनैर्धीमानधोगं रेचनैर्हरेत्।। ३ ।।

The four measures

In amlapitta, emesis followed by mild purgation should be given. Thereafter proper unction, unctuous and nonunctuous enema should be applied in chronic cases according to (the condition of) doṣa. [1]

In combination of doṣas, after evacuation, pacificatory measure in terms of drugs and diet should be applied considering the association of doṣa. [2]

In upward and downward types doṣa should be eliminated with emesis and purgation respectively. [3]

पथ्यम्

तिक्तभूयिष्ठमाहारं पानं वाऽपि प्रकल्पयेत्। यवगोधूमविकृतीस्तीक्ष्णसंस्कारवर्जिता: ।।
यथास्वं लाजशक्तून् वा सितामधुयुतान् पिबेत्।। ४ ।।

The diet (food and drinks) should consist mainly of bitters. Particularly products of barley and wheat, without irritant processing, should be taken or parched paddy mixed with sugar and honey should be taken in liquid form. [4]

निस्तुषयवादिक्वाथ:

निस्तुषयववृषधात्रीक्वाथस्त्रिसुगन्धिमधुयुत: पीत:। अपनयति चाम्लपित्तं यदि भुङ्क्ते मुद्गयूषेण ।।५।।

Nistuṣayavādi kvātha

Decoction of dehusked barley, vāsā and āmalaka added with trijāta (tvak, elā and patra) and honey alleviates amlapitta if mudga soup is taken in diet. [5]

शृङ्गबेरादिक्वाथ:

कफपित्तवमीकण्डूज्वरविस्फोटदाहहा। पाचनो दीपन: क्वाथ: शृङ्गबेरपटोलयो: ।। ६ ।।

The decoction of śuṇṭhī and paṭola is digestive and appetiser, pacifies kapha and pitta and alleviates vomiting, itching, fever, eruptions and burning sensation. [6]

पटोलादिक्वाथ:

पटोलं नागरं धान्यं क्वाथयित्वा जलं पिबेत् । कण्डूपामाऽऽर्त्तिशूलघ्नं कफपित्ताग्निमान्द्यजित् ॥ ७ ॥

Paṭolādi kvātha

Paṭola, śuṇṭhī and dhānyaka– this decoction pacifies kapha and pitta and alleviates itching, pāmā, colic and loss of digestive fire. [7]

पटोलविश्वादिक्वाथ:

पटोलविश्वामृतरोहिणीकृतं जलं पिबेत् पित्तकफोच्छ्रये तु ।
शूलभ्रमारोचकवह्निमान्द्यदाहज्वरच्छर्दिनिवारणं तत् ॥ ८ ॥

Paṭolaviśvādi kvātha

The decoction of paṭola, viśva (śuṇṭhī), guḍūcī and kaṭukā should be taken in aggravation of pitta and kapha. It alleviates colic, giddiness, anorexia, loss of digestive fire, burning sensation, fever and vomiting. [8]

यवादिक्वाथ:

यवकृष्णापटोलानां क्वाथं क्षौद्रयुतं पिबेत् । नाशयेदम्लपित्तञ्च अरुचिञ्च वमिं तथा ॥ ९ ॥

Yavādi kvātha

Decoction of yava, pippalī and paṭola mixed with honey should be taken to alleviate amlapitta, anorexia and vomiting. [9]

दशाङ्ग:

वासाऽमृतापर्पटकनिम्बभूनिम्बमार्कवै: । त्रिफलाकुलकै: क्वाथ: सक्षौद्रश्चाम्लपित्तहा ॥ १० ॥

Daśāṅga

The decoction named daśāṅga (having ten ingredients) e.g. vāsā, guḍūcī, parpaṭa, nimba, kirātatikta, bhṛngarāja, triphalā and paṭola mixed with honey alleviates amlapitta. [10]

फलत्रिकादिक्वाथ:

फलत्रिकं पटोलञ्च तिक्ताक्वाथ: सितायुत: । पीत: क्षौद्रकमध्वाक्तो ज्वरच्छर्द्यम्लपित्तजित् ॥ ११ ॥

Phalatrikādi kvātha

Decoction of triphalā, paṭola and kaṭukā added with sugar, madhuyaṣṭī and honey alleviates fever, vomiting and amlapitta. [11]

पथ्यादिचूर्णम्

पथ्याभृङ्गरजश्चूर्णं युक्तं जीर्णगुडेन तु । जयेदम्लपित्तजन्यां छर्दिमन्नविदाहजाम् ॥ १२ ॥

Pathyādi cūrṇa

Powder ot harītakī and bhṛṅgarāja mixed with old jaggery controls vomiting caused by burning of food due to amlapitta. [12]

वासागुग्गुलु:

वासानिम्बपटोलत्रिफलाऽशनयासयोजितो जयति। अधिककफमम्लपित्तं प्रयोजितो गुग्गुलु: क्रमश: ॥

Vāsāguggulu

The regular use of guggulu mixed with vāsā, nimba, paṭola, triphalā, bījaka and yavāsa overcomes amlapitta with predominance of kapha. [13]

छिन्नादिक्वाथ: हरीतकीप्रयोगश्च

छिन्नाखदिरयष्ट्याह्वदार्वम्भो वा मधुद्रवम्। सद्राक्षामभयां खादेत् सक्षौद्रां सगुडाञ्च ताम्॥ १४॥

Chinnādi kvātha

(1) Decoction of chinnā (guḍūcī), khadira, madhuka and devadāru added with honey or (2) harītakī mixed with drākṣā or honey or jaggery should be used. [14]

अपरे योगा:

कटुका सिता च लेह्या पटोलविश्वश्च मधुसमायुक्तम्। रक्तस्रुतौ च युक्त्या खण्डं कूष्माण्डकं श्रेष्ठम्॥ १५॥

(1) Kaṭukā and sugar and (2) decoction of paṭola and śuṇṭhī added with honey are efficacious. In case of haemorrhage, khaṇḍakūṣmāṇḍaka is prescribed. [15]

पटोलधन्याकादिक्वाथ:

पटोलधन्याकमहौषधाब्दै: कृत: कषायो विनिहन्ति शीघ्रम्।
मन्दानलं पित्तबलासदाहच्छर्दिज्वरामानिलशूलरोगान्॥ १६॥

Paṭoladhanyākādi kvātha

Decoction made of paṭola, dhānyaka, śuṇṭhī and mustaka improves digestion, pacifies pitta and kapha and alleviates burning sensation, vomiting, fever, āmavata and śūla. [16]

छिन्नोद्भवादिषडङ्गक्वाथ:

छिन्नोद्भवानिम्बपटोलपत्रं फलत्रिकं सुक्वथितं सुशीतम्।
क्षौद्रान्वितं पीतमनेकरूपं सुदारुणं हन्ति तदम्लपित्तम्॥ १७॥

Chinnodbhavādi ṣaḍaṅga kvātha

Chinnodbhavā (guḍūcī), nimba, paṭola (leaves), triphalā– this decoction cooled and added with honey should be taken. It alleviates amlapitta, even if severe. [17]

पटोलादिपञ्चाङ्गक्वाथ:

पटोलत्रिफलानिम्बशृतं मधुयुतं पिबेत्। पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये॥ १८॥

Paṭolādi pañcāṅga kvātha

Paṭola, triphalā and nimba– this decoction added with honey should be taken in aggravation of kapha and pitta, fever, burning sensation and pain. [18]

सिंहास्यादिक्काथ:

सिंहास्यामृतभण्टाकीक्काथं पीत्वा समाक्षिकम्। अम्लपित्तं जयेज्जन्तु: कासं श्वासं ज्वरं वमिम्॥ १९॥

Siṃhāsyādi kvātha

Siṃhāsya (vāsā), guḍūcī, and bṛhatī– on taking this decoction added with honey one overcomes amlapitta, cough, dyspnoea, fever and vomiting. [19]

अम्लपित्तहरा योगा:

वासाघृतं तिक्तघृतं पिप्पलीघृतमेव च। अम्लपित्ते प्रयोक्तव्यं गुडकूष्माण्डकं तथा॥
पक्तिशूलापहा योगास्तथा खण्डामलक्यपि॥ २०॥
पिप्पली मधुसंयुक्ता चाम्लपित्तविनाशिनी। जम्बीरस्य रस: पीत: सायं हन्त्यम्लपित्तकम्॥ २१॥

In amlapitta, vāsāghṛta, tiktaghṛta, pippalīghṛta, guḍakūsmāṇḍaka, khaṇḍāmalakī and other formulations indicated in pariṇāmaśula should be used. [20]

Pippalī taken with honey destroys amlapitta. Similarly acts the juice of jambīra taken in the evening. [21]

गुडादिमोदक:

गुडपिप्पलिपथ्याभिस्तुल्याभिर्मोदक: कृत:। पित्तश्लेष्मापह: प्रोक्तो मन्दमग्निश्च दीपयेत्॥ २२॥

Guḍādi modaka

Modaka made of jaggery, pippalī and harītakī, each in equal quantity, pacifies pitta and kapha and stimulates digestion. [22]

हिङ्ग्वादिपुटपाक:

हिङ्गु च कतकफलानि चिञ्चात्वचो घृतञ्च पुटदग्धम्। शमयति तदम्लपित्तमम्लभुजो यदि यथोत्तरं द्विगुणम्॥२३॥

Hiṅgvādi puṭapāka

Hiṅgu, kataka (seeds), amlikā (bark) and ghṛta successively double in quantity– all burnt together in closed heating pacifies amlapitta caused by eating sours. [23]

त्रिफलाकल्क:

कान्तपात्रे वराकल्को व्युषितोऽभ्यासयोगत:। सिताक्षौद्रसमायुक्त: कफपित्तहर: स्मृत:॥ २४॥

Paste of triphalā kept in an iron vessel for some time and taken with sugar and honey pacifies kapha and pitta. [24]

पञ्चनिम्बादिचूर्णम्

एकोंऽश: पञ्चनिम्बानां द्विगुणो वृद्धदारक:। शक्तुर्दशगुणो देय: शर्करामधुरीकृत:॥ २५॥

शीतेन वारिणा पीत: शूलं पित्तकफोत्थितम्। निहन्ति चूर्णं सक्षौद्रमम्लपित्तं सुदारुणम्।। २६।।

Pañcanimbādi cūrṇa

Pañcāṅga (five parts) of nimba (total) one part, vṛddhadāraka two parts and parched grain flour ten parts– this added with sugar is taken with cold water in case of colic caused by pitta and kapha. The same powder taken with honey destroys amlapitta even if severe. [25-26]

अभ्रकशुद्धिः

आशुभक्तोदकैः पिष्टमभ्रकं तत्र संस्थितम्। कन्दमाणास्थिसंहारखण्डकर्णरसैरथ।। २७।।
तण्डुलीयकशालिञ्चकालमारिषजेन च। वृश्चीरबृहतीभृङ्गलक्ष्मणाकेशराजजैः।। २८।।
पेषणं भावनं कुर्य्यात् पुटश्चानेकशो भिषक्। यावन्निश्चन्द्रकं तत् स्याच्छुद्धिरेवं विहायसः।। २९।।

Purification of abhraka (mica)

(Thin-layered) mica is kept in sour gruel of āśu rice for a day and night and rubbed with the same. Then it is impregnated and rubbed with the juice of kanda (śūraṇa), māṇaka, asthisaṃhāra khaṇḍakarṇa, taṇḍulīya, śāliñca, kālaśāka, mārisa, vṛścīra, bṛhatī, bhṛṅgarāja, lakṣmaṇā and keśarāja and is subjected to puṭapāka a number of times till it becomes lustreless. Thus abhraka is purified. [27-29]

लौहशुद्धिः

स्वर्णमाक्षिकशालिञ्चध्मातं निर्वापितं जले। त्रैफलेऽथ विचूर्ण्यैवं लौहं कान्तादिकं पुनः।। ३०।।
बृहत्पत्रकरीकर्णत्रिफलावृद्धदारजैः। माणकन्दास्थिसंहारशृङ्गवेरभवै रसैः।। ३१।।
दशमूलीमुण्डितिकातालमूलीसमुद्भवैः। पुटितं साधु यत्नेन शुद्धिमेवमयो व्रजेत्।। ३२।।

Purification of lauha (iron)

Iron piece is pasted with svarṇamākṣika and śāliñca, heated and dipped in triphalā decoction. This process is repeated several times. Then iron is powdered, impregnated with the juices of bṛhatpatra, hastikarṇa, triphalā, vṛddhadāraka, māṇaka, kanda (śūraṇa), asthisaṃhāra, ārdraka, daśamūlī, muṇḍī and tālamūlī and heated in puṭapāka. Thus iron is purified. [30-32]

मण्डूरशुद्धिः

वशिरं श्वेतवाटयालं मधुपर्णी मयूरकम्। तण्डुलीयञ्च वर्षाभ्वं दत्त्वाऽधश्चोर्ध्वमेव च।। ३३।।
पाक्यं सुजीर्णमण्डूरं गोमूत्रेण दिनत्रयम्। अन्तर्बाष्पमदग्धञ्च तथा स्थाप्यं दिनत्रयम्।
विचूर्णितं शुद्धिरियं लौहकिट्टस्य दर्शिता।। ३४।।

Purification of maṇḍūra (slag of iron)

Maṇḍūra put on the pulp of vaśira, white balā, guḍūcī, apāmārga, taṇḍulīya and punarnavā and cooked with the same is kept with cow's urine for three days and heated. Thereafter

it is kept covered with a saucer for three days and then powdered. Thus maṇḍūra is purified. [33-34]

रसशुद्धि:

जयन्त्या वर्द्धमानस्य आर्द्रकस्वरसेन च। वायस्याश्चानुपूर्व्यैवं मर्दनं रसशोधनम्॥ ३५॥

Purification of pārada (mercury)

Mercury is purified by rubbing it with the juice of jayantī, eraṇḍa, ārdraka and kākamācī one after the other. [35]

गन्धकशुद्धि:

गन्धकं नवनीताख्यं क्षुद्रितं लौहभाजने। त्रिधा चण्डातपे शुष्कं भृङ्गराजरसाप्लुतम्॥ ३६॥
ततो वह्नौ द्रवीभूतं त्वरितं वस्त्रगालितम्। यत्नाद् भृङ्गरसे क्षिप्तं पुनः शुष्कं विशुध्यति॥ ३७॥

Purification of gandhaka (sulphur)

Sulphur known as 'navanīta' (butter-like) is disintegrated, dipped in bhṛṅgarāta juice in an iron vessel and dried in the intense sun. This is repeated thrice. Then it is liquified on fire and is dipped in bhṛṅgarāja juice being strained through a piece of cloth. Then it is washed, dried and powdered. Thus sulphur is purified. [36-37]

क्षुधावती गुडिका

गगनाद् द्विपलं चूर्णं लौहस्य पलमात्रकम्। लौहकिट्टपलार्द्धञ्च सर्वमेकत्र संस्थितम्॥ ३८॥
मण्डूकपर्णीवशिरतालमूलीरसैः पुनः। वरीभृङ्गकेशराजकालमारिषजैरथ॥ ३९॥
त्रिफलाभद्रमुस्ताभिः स्थालीपाकाद्विचूर्णितम्। रसगन्धकयोः कर्षौ प्रत्येकं ग्राह्यमेकतः॥ ४०॥
तन्मर्दनाच्छिलाखल्ले यत्नतः कज्जलीकृतम्। वचा चव्यं यमानी च जीरके शतपुष्पिका॥ ४१॥
व्योषं मुस्तं विडङ्गञ्च ग्रन्थिकं खरमञ्जरी। त्रिवृता चित्रको दन्ती सूर्यावर्त्तः सितस्तथा॥ ४२॥
भृङ्गमाणककन्दौ च खण्डकर्णक एव च। दण्डोत्पला केशराजः कालावकडकोऽपि च॥ ४३॥
एषामर्द्धपलं ग्राह्यं पटघृष्टं सुचूर्णितम्। प्रत्येकं त्रिफलायाश्च पलार्धं पलमेव च॥ ४४॥
एतत् सर्वं समालोड्य लौहपात्रे तु भावयेत्। आतपे दण्डसंघृष्टमार्द्रकस्य रसैस्त्रिधा॥ ४५॥
तद्रसेन शिलापिष्टां गुडिकां कारयेद्भिषक्। बदरास्थिनिभां शुष्कां सुनिगुप्तां निधापयेत्॥ ४६॥
तत् प्रातर्भोजनादौ च सेवितं गुडिकात्रयम्। अम्लोदकानुपानञ्च हितं मधुरवर्जितम्॥ ४७॥
दुग्धञ्च नारिकेलञ्च वर्जनीयं विशेषतः। भोज्यं यथेष्टमिष्टञ्च वारिभक्ताम्लकाञ्जिकम्॥ ४८॥
हन्त्यम्लपित्तं विविधं शूलञ्च परिणामजम्। पाण्डुरोगञ्च गुल्मञ्च शोथोदरगुदामयान्॥ ४९॥
यक्ष्माणं पञ्च कासांश्च मन्दाग्नित्वमरोचकम्। प्लीहानं श्वासमानाहमामवातं सुदारुणम्॥
गुडी क्षुधावती सेयं विख्याता रोगनाशिनी॥ ५०॥

Kṣudhāvatī guḍikā

Powdered abhraka 80 gm, lauha 40 gm, maṇḍūra 20 gm all mixed together, are cooked in an earthen vessel (sthālīpāka) thrice with the juices of (1) maṇḍūkaparṇī, vaśira and

tālamūlī (2) śatāvarī, bhṛṅgarāja, keśarāja, kālaśāka and māriṣa and (3) decoction of triphalā and bhadramusta successively and powdered. Now the kajjalī made of mercury and sulphur each 20 gm is mixed followed by the addition of the powder of the following drugs– vacā, cavya, yavānī, jīraka, kṛṣṇa jīraka, śatapuṣpā, trikaṭu, musta, viḍaṅga, pippalīmūla, apāmārga, trivṛt, citraka, dantī, white sūryāvarta, bhṛṅgarāja, māṇaka, khaṇḍakarṇa, daṇḍotpalā, keśarāja and kālāvakaḍaka– each 20 gm and triphalā 60 gm– all put together in an iron vessel and impregnated twice with the juice of fresh ginger are kept in the sun stirring with a rod. It is again pounded with the above juice in a stony mortar and made into pills of the size of badara seed and dried. The dose is three pills in the morning and in the beginning of meal with sour gruel. Sweets particularly milk and coconut are to be avoided and diet should be taken as desired including boiled rice soaked in water and sour gruel.

It alleviates amlapitta, pariṇāmaśūla, anaemia, gulma, oedema, udararoga, piles, consumption, cough, sluggishness of digestion, anorexia, splenomegaly, dyspnoea, ānāha and severe āmavāta. This kṣudhāvatī guḍikā is famous for destroying diseases. [38-50]

जीरकाद्यं घृतम्

पिष्ट्वाऽऽजाजीं सधन्याकं घृतप्रस्थं विपाचयेत्। कफपित्तारुचिहरं मन्दानलवमी जयेत्॥ ५१॥

Jīrakādya ghṛta

Ghee 640 gm is cooked with the paste of jīraka and dhānyaka. It pacifies kapha and pitta and diseases caused by them such as anorexia, slow digestion and vomiting. [51]

पटोलशुण्ठीघृत-पटोलघृते

पटोलशुण्ठ्योः कल्काभ्यां केवलं कुलकेन वा। घृतप्रस्थं विपक्तव्यं कफपित्तहरं परम्॥ ५२॥

Paṭolaśuṇṭhīghṛta-paṭolaghṛta

Ghee 640 gm cooked with the paste of paṭola and śuṇṭhī or only paṭola is excellent remedy for kapha and pitta. [52]

पिप्पलीघृतम्

पिप्पलीक्वाथकल्केन घृतं सिद्धं मधुप्लुतम्। पिबेत् तत्प्रातरुत्थाय अम्लपित्तनिवृत्तये॥ ५३॥

Pippalīghṛta

Ghee cooked with paste and decoction of pippalī and mixed with profuse honey should be taken in the morning to alleviate amlapitta. [53]

द्राक्षाद्यं घृतम्

द्राक्षाऽमृताशक्रपटोलपत्रैः सोशीरधात्रीघनचन्दनैश्च।
त्रायन्तिकापद्मकिरातधान्यैः कल्कैः पचेत् सर्पिरुपेतमेभिः॥ ५४॥
युञ्जीत मात्रां सह भोजनेन सर्वर्तुपानेऽपि भिषग्विदध्यात्।

बलासपित्तग्रहणीं प्रवृद्धां कासाग्निसादज्वरमम्लपित्तम्।। ५५।।
सर्वं निहन्याद् घृतमेतदाशु सम्यक् प्रयुक्तं ह्यमृतोपमञ्च।। ५६।।

Drākṣādya ghṛta

Ghee is cooked with the paste of drākṣā, guḍūcī, indrayava, paṭola (leaves), uśīra, āmalakī, musta, candana, trāyamāṇā, padmaka, kirātatikta and dhānyaka. It should be taken with meal in all the seasons. It is nectar-like and alleviates kapha and pitta, grahaṇīroga, cough, sluggish digestion, fever and amlapitta. [54-56]

शतावरीघृतम्

शतावरीमूलकल्कं घृतप्रस्थं पयः समम्। पचेन्मृद्वग्निना सम्यक् क्षीरं दत्त्वा चतुर्गुणम्।। ५७।।
नाशयेदम्लपित्तञ्च वातपित्तोद्भवान् गदान्। रक्तपित्तं तृषां मूर्च्छां श्वासं सन्तापमेव च।। ५८।।

Śatāvarī-ghṛta

Ghee 640 gm is cooked on mild fire with the paste of śatāvarī root along with equal (quantity) of śatāvarī juice and four times milk. It alleviates amlapitta, diseases caused by vāta and pitta, raktapitta, thirst, fainting, dyspnoea and pyrexia. [57-58]

।। इत्यम्लपित्तचिकित्सा।। ५२।।

Thus ends treatment of amlapitta. [52]

५३. त्रिपञ्चाशोऽध्याय:

CHAPTER LIII

वीसर्प-विस्फोट-चिकित्सा

Treatment of Vīsarpa (erysipelas) and Visphoṭa (eruptions)

क्रियासूत्रम्

विरेकवमनालेपसेचनासृग्विमोक्षणै: । उपाचरेद् यथादोषं वीसर्पानविदाहिभि: ।। १ ।।

Vīsarpa should be treated with purgation, emesis, pastes, washing and blood-letting according to doṣa in addition to non-irritant diet. [1]

पटोलादिक्वाथ:

पटोलपिचुमर्दाभ्यां पिप्पल्या मदनेन च । वीसर्पे वमनं शस्तं तथैवेन्द्रयवै: सह ।। २ ।।

Paṭolādi kvātha

Paṭola, nimba, pippalī, madana and indrayava– this decoction is useful for emesis in vīsarpa. [2]

त्रिफलाक्वाथ:

त्रिफलारसंयुक्तं सर्पिस्त्रिवृतया सह । प्रयोक्तव्यं विरेकार्थं वीसर्पज्वरशान्तये ।। ३ ।।

Triphalā decoction mixed with ghee and trivṛt should be administered for purgation to alleviate vīsarpa and jvara. [3]

आमलकप्रयोग:

रसमामलकानां वा घृतमिश्रं प्रदापयेत् ।। ४ ।।

Or āmalaka juice mixed with ghee should be given. [4]

पञ्चमूलचतुष्टयप्रयोग:

तृणवर्जं प्रयोक्तव्यं पञ्चमूलचतुष्टयम् । प्रदेहसेकसर्पिर्भिर्वीसर्पे वातसम्भवे ।। ५ ।।

In vātika visarpa, four pañcamūlas (except tṛṇapañcamūla) should be used as paste, sprinkling and ghee. [5]

कुष्ठादिप्रयोग:

कुष्ठं शताह्वा सुरदारुमुस्तावाराहिकुस्तुम्बुरुकृष्णगन्धा: ।
वातेऽर्कवंशार्त्तगलाश्च योज्या: सेकेषु लेपेषु तथा घृतेषु ।। ६ ।।

Kuṣṭha, śatapuṣpā, devadāru, musta, vārāhī, dhānyaka, śobhāñjana, arka, vaṃśa and ārtagala– these should be used for sprinkling, paste and ghee in vātika visarpa. [6]

प्रपौण्डरीकादिप्रलेपः

प्रपौण्डरीकमञ्जिष्ठापद्मकोशीरचन्दनैः। सयष्टीन्दीवरैः पित्ते क्षीरपिष्टैः प्रलेपनम्॥ ७॥

Prapauṇḍarīkādi pralepa

Prapauṇḍarīka, mañjiṣṭhā, padmaka, uśīra, candana, madhuyaṣṭī and nīlotpala– these pounded with milk should be used as paste in (predominance of) pitta. [7]

कशेर्वादिप्रलेपः

कशेरुशृङ्गाटकपद्मगुन्द्राः सशैवलाः सोत्पलकर्दमाश्च।
वस्त्रान्तराः पित्तकृते विसर्पे लेपा विधेया सघृताः सुशीताः॥ ८॥

Kaśervadi pralepa

Kaśeru, śṛṅgāṭaka, kamala, gundrā, śaivāla, utpala and mud– these mixed with ghee are spread on a piece of cloth and used as cool plaster in paittika visarpa. [8]

पञ्चवल्कल-पद्मकादी

प्रदेहाः परिषेकाश्च शस्यन्ते पञ्चवल्कलैः। पद्मकोशीरमधुकचन्दनैर्वा प्रशस्यते॥ ९॥

Pañcavalkala-padmakādi

Or pastes and sprinkling are used with (1) pañcavalkala or (2) padmaka, uśīra, madhuka and candana. [9]

अपरे लेपाः

पित्ते तु पद्मिनीपङ्कं पिष्टं वा शङ्खशैवलम्। गुन्द्रामूलन्तु शुक्तिर्वा गैरिकं वा घृतान्वितम्॥ १०॥

In paittika type, paste should be used with (1) mud at the (root of the) lotus plant or (2) śaṅkha and śaivāla or (3) gundrā root and śukti or (4) red ochre– all mixed with profuse ghee. [10]

न्यग्रोधादिलेपः

न्यग्रोधपादास्तरुणाः कदलीगर्भ एव च। बिसग्रन्थिश्च लेपः स्याच्छतधौतघृताप्लुतः॥ ११॥

Nyagradhādi lepa

Tender hanging roots of vaṭa, kadalī (root), lotus-stem (node)– these mixed with profuse ghee washed hundred times are used as paste. [11]

विसर्पघ्ना प्रदेहाः

हरेणवो मसूराश्च मुद्गाश्चैव सशालयः। पृथक् पृथक् प्रदेहाः स्युः सर्वैर्वा सर्पिषा सह॥ १२॥

Hareṇvādi lepa

Hareṇu (peas), lentils, green gram and śāli rice– these, separately or combined, mixed with ghee are used as paste. [12]

द्राक्षादि:-त्रिवृदादि:

द्राक्षाऽऽरग्वधकाश्मर्य्यत्रिफलाऽमण्डपीलुभिः। त्रिवृद्धरीतकीभिश्च वीसर्पे शोधनं हितम्॥ १३॥

Drākṣādi-trivṛdādi

(1) Drākṣā, āragvadha, kāśmarya, triphalā, eraṇḍa and pīlu or (2) trivṛt with harītakī– these are useful for evacuation in visarpa. [13]

गायत्र्यादिलेप:

गायत्रीसप्तपर्णाब्दवासाऽऽरग्वधदारुभिः। कुटन्नटैर्भवेल्लेपो वीसर्पे श्लेष्मसम्भवे॥ १४॥

Gāyatryādi lepa

Gāyatrī (khadira), saptaparṇa, musta, vāsā, āragvadha (leaves), devadāru and kaivarta-musta– these should be used as paste in visarpa caused by kapha. [14]

अजगन्धादिलेप:

अजाऽश्वगन्धा सरलाऽथ काला सैकैशिका वाऽप्यथवाऽजशृङ्गी।
गोमूत्रपिष्टो विहिमः प्रदेहो हन्याद्विसर्पं कफजं सुशीघ्रम्॥ १५॥

Ajagandhādi lepa

Ajagandhā, aśvagandhā, trivṛt, kālā, pāṭhā and ajaśṛṅgī– these pounded with cow's urine are applied warm as paste in kaphaja visarpa. [15]

मदनादिक्वाथ:

मदनं मधुकं निम्बं वत्सकस्य फलानि च। वमनश्च विधातव्यं वीसर्पे कफसम्भवे॥ १६॥

Madanādi kvātha

In kaphaja visarpa, emesis should be induced with the decoction of madana, madhuka, nimba and indrayava. [16]

त्रिफलादिलेप:

त्रिफलापद्मकोशीरसमङ्गाकरवीरकम्। नलमूलमनन्ता च लेपः श्लेष्मविसर्पहा॥ १७॥

Triphalādi lepa

Triphalā, padmaka, uśīra, lajjālu, karavīra, nala root and anantā (sārivā)– this paste alleviates kaphaja visarpa. [17]

आरग्वधादिलेप:

आरग्वधस्य पत्राणि त्वचः श्लेष्मातकोद्भवाः। शिरीषपुष्पं कामाची हिता लेपावचूर्णनैः॥ १८॥

Āragvadhādi lepa

Āragvadha (leaves), śleṣmātaka (bark), śirīṣa (flowers) and kākamācī– these together are useful as paste and dusting powder. [18]

मुस्तादि-धात्र्यादिक्वाथौ

मुस्तारिष्टपटोलानां क्वाथ: सर्वविसर्पनुत्। धात्रीपटोलमुद्गानामथवा घृतसंप्लुत: ॥ १९ ॥

Mustādi-dhātryādi kvātha

Decoction of (1) musta, nimba and paṭola or (2) dhātrī (āmalaka), paṭola and mudga added with profuse ghee destroys all types of visarpa. [19]

नवकषायगुग्गुलुः

अमृतवृषपटोलं निम्बकल्कैरुपेतं त्रिफलखदिरसारव्याधिघातश्च तुल्यम्।
क्वथितमिदमशेषं गुग्गुलोर्भागयुक्तं जयति विषविसर्पान् कुष्ठमष्टादशाख्यम्॥ २० ॥

Navakaṣāya guggulu

Guḍūcī, vāsā, paṭola, nimba, triphalā, khadira and āragvadha each in equal quantity– this decoction added with guggulu overcomes poisoning, visarpa and eighteen types of kuṣṭha. [20]

अमृतादिः

अमृतवृषपटोलं मुस्तकं सप्तपर्णं खदिरमसितवेत्रं निम्बपत्रं हरिद्रे।
त्रिविधविषविसर्पान् कुष्ठविस्फोटकण्डूरपनयति मसूरीं शीतपित्तं ज्वरञ्च॥ २१ ॥

Amṛtādi

Amṛtā (guḍūcī), vāsā, paṭola, mustaka, saptaparṇa, khadira, kṛṣṇa vetra, nimba (leaves), haridrā and dāruharidrā– this decoction alleviates various poisonings, erysipelas, kuṣṭha, visphoṭa, itching, pox, śītapitta and fever. [21]

पटोलामृतादिक्वाथः

पटोलामृतभूनिम्बवासकारिष्टपर्पटैः। खदिराब्दयुतैः क्वाथो विस्फोटार्त्तिज्वरापहः॥ २२ ॥

Paṭolāmṛtādi kvātha

Decoction of paṭola, guḍūcī, kirātatikta, vāsaka, nimba, parpaṭa, khadira and musta alleviates visphoṭa and jvara. [22]

पटोलत्रिफलादिक्वाथः

पटोलत्रिफलाऽरिष्टगुडूचीमुस्तचन्दनम्। समूर्वा रोहिणी पाठा रजनी सदुरालभा॥ २३ ॥
कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम्। कण्डूत्वग्दोषविस्फोटविषवीसर्पनाशनम्॥ २४ ॥

Paṭolatriphalādi kvātha

Paṭola, triphalā, nimba, guḍūcī, musta, candana, mūrvā, kaṭukā, pāṭhā, haridrā and durālabhā– this decoction should be administered in cases of pitta, kapha, jvara, itching, skin diseases, visphoṭa, poisoning and visarpa. [23-24]

भूनिम्बादिक्वाथ:

भूनिम्बवासाकटुकापटोलफलत्रिकाचन्दननिम्बसिद्धः।
विसर्पदाहज्वरवक्त्रशोषविस्फोटतृष्णावमिनुत् कषाय: ॥ २५ ॥

Bhūnimbādi kvātha

Decoction made of bhūnimba (kirātatikta), vāsā, kaṭukā, paṭola, triphalā, candana and nimba alleviates visarpa, burning sensation, fever, dryness of mouth, visphoṭa, thirst and vomiting. [25]

त्रिफलाक्वाथ:

सकफे पित्तयुक्ते तु त्रिफलां योजयेत् पुरैः ॥ २६ ॥

In case of predominance of kapha and pitta triphalā mixed with guggulu should be used. [26]

दुरालभादिक्वाथ: खदिराष्टकञ्च

दुरालभां पर्पटकं पटोलं कटुकां तथा। सोष्णं गुग्गुलुसंयुक्तं पिबेद्वा खदिराष्टकम् ॥ २७ ॥

Durālabhādi-khadirāṣṭaka

Decoction of (1) durālabhā, parpaṭa, paṭola and kaṭukā warm and added with guggulu or khadirāṣṭaka (mentioned under masūrikā) should be used. [27]

विस्फोट-चिकित्सा

कुण्डल्यादिखदिरादिक्वाथौ

कुण्डलीपिचुमर्दाम्बु खदिरेन्द्रयवाम्बु वा। विस्फोटान् नाशयत्याशु वायुर्जलधरानिव ॥ २८ ॥

Kuṇḍalyādi-khadirādi kvātha

Decoction of (1) kuṇḍalī (guḍūcī) and nimba or (2) khadira and indrayava destroys visphoṭa as wind throws away the clouds. [28]

चन्दनादिलेप:

चन्दनं नागपुष्पञ्च तण्डुलीयकशारिवे। शिरीषवल्कलं जाती लेपः स्याद्दाहनाशनः ॥ २९ ॥

Candanādi lepa

Candana, nāgakeśara, taṇḍulīyka, sārivā, śirīṣa (bark) and jātī (leaves)– this paste alleviates burning sensation. [29]

शुकतर्वादिलेप:

शुकतरुनते च माची रजनी पद्मा च तुल्यानि। पिष्टानि शीततोये लेपः स्यात् सर्वविस्फोटे ॥ ३० ॥

Śukatarvādi lepa

Śukataru (śirīṣa), tagara, kākamācī, haridrā, bhārgī, each in equal quantity, are pounded with cold water and used as paste in all types of visphoṭa. [30]

शिरीषमूलादिकवला:

शिरीषमूलमञ्जिष्ठाचव्यामलकयष्टिका:। सजातीपल्लवक्षौद्रा विस्फोटे कवलग्रहा: ।। ३१ ।।

Śirīṣamūlādi kavala

Śirīṣa root, mañjiṣṭhā, cavya, āmalaka, madhuyaṣṭī, jātī leaves and honey– these are mixed together and used as gargle in visphoṭa (within mouth). [31]

शिरीषादि:

शिरीषोदुम्बरौ जम्बू: सेकालेपनयोर्हिता: । श्लेष्मातकत्वचो वाऽपि प्रलेपाश्च्योतने हिता: ।। ३२ ।।

Śirīṣādi

Śirīṣa, udumbara and jambū– these are useful for sprinkling and paste. Śleṣmātaka bark is also used as paste and eye-drop. [32]

दशाङ्गलेप:

शिरीषयष्टीनतचन्दनैलामांसीहरिद्राद्वयकुष्ठबालै: ।
लेपो दशांग: सघृत: प्रदिष्टो विसर्पकण्डूज्वरशोथहारी ।। ३३ ।।

Daśāṅga lepa

Daśāṅga lepa (paste) consisting of śirīṣa, madhuyaṣṭī, tagara, candana, elā, māṃsī, haridrā, dāruharidrā, kuṣṭha and bālaka (total ten drugs) and mixed with ghee alleviates erysipelas, itching, fever and swelling. [33]

चतु:समम्

शिरीषोशीरनागाह्वहिंस्राभिर्लेपनाद् द्रुतम्। विसर्पविषविस्फोटा: प्रशाम्यन्ति न संशय: ।। ३४ ।।

Catuḥsama

Śirīṣa, uśīra, nāgakeśara, and hiṃsrā each in equal parts– by pasting with these visarpa, poisoning and visphoṭa are pacified. [34]

वृषाद्यं घृतम्

वृषखदिरपटोलपत्रनिम्बत्वचममृतामलकीकषायकल्कै: ।
घृतमभिनवमेतदाशु पक्वं जयति विसर्पगदान् सकुष्ठगुल्मान् ।। ३५ ।।

Vṛṣādya ghṛta

Ghee cooked with decoction and paste of vṛṣa (vāsā), khadira, paṭola leaves, nimba bark, guḍūcī and āmalakī alleviates visarpa, kuṣṭha and gulma. [35]

पञ्चतिक्तकघृतम्

पटोलसप्तच्छदनिम्बवासाफलत्रिकच्छिन्नरुहाविपक्वम् ।
तत् पञ्चतिक्तं घृतमाशु हन्ति त्रिदोषविस्फोटविसर्पकण्डू: ।। ३६ ।।

Pañcatikta ghṛta

Paṭola, saptaparṇa, nimba, vāsā, triphalā and guḍūcī– with these ghee is cooked which is known as pañcatikta ghṛta. It alleviates visphoṭa, visarpa and kaṇḍū caused by three doṣas. [36]

महापद्मकघृतम्

पद्मकं मधुकं लोध्रं नागपुष्पस्य केशरम्। द्वे हरिद्रे विडङ्गानि सूक्ष्मैला तगरं तथा॥ ३७॥
कुष्ठं लाक्षा पत्रकञ्च सिक्थकं तुत्थमेव च। बहुवारः शिरीषश्च कपित्थफलमेव च॥ ३८॥
तोयेनालोड्य तत् सर्वं घृतप्रस्थं विपाचयेत्। यांश्च रोगान् निहन्त्याशु तान्निबोध महामुने!॥ ३९॥
सर्पकीटाखुदष्टेषु लूतामूत्रकृतेषु च। विविधेषु स्फोटकेषु तथा दुष्टविसर्पिषु॥ ४०॥
नाडीषु गण्डमालासु प्रभिन्नासु विशेषतः। अगस्त्यविहितं धन्यं पद्मकन्तु महाघृतम्॥ ४१॥

Mahāpadmaka ghṛta

Padmaka, madhuka, lodhra, nāgakeśara, haridrā, dāruharidrā, viḍaṅga, elā, tagara, kuṣṭha, lākṣā, patra, bee-wax, tuttha, śleṣmātaka, śirīṣa and kapittha (fruits)– with the paste of these ghee 640 gm is cooked. It is useful in all sorts of poisoning, eruptions, kuṣṭha, visarpa, sinus, gaṇḍamālā, particularly discharging. This is formulated by Agastya and is prominent among the ghṛtas. [37-41]

स्नायुक-चिकित्सा

रोगस्तु स्नायुकाख्यो यः क्रिया तत्र विसर्पवत्॥ ४२॥
गव्यं सर्पिस्त्र्यहं पीत्वा निर्गुण्डिस्वरसं त्र्यहम्। पिबन् स्नायुकमत्युग्रं हन्त्यवश्यं न संशयः॥ ४३॥

Snāyuka (guinea worm)

The snāyuka roga should be treated like visarpa. [42]

If one takes nirguṇḍī juice after taking cow's ghee for three days it destroys snāyuka, even if severe, positively. [43]

शोभाञ्जनादिलेपः

शोभाञ्जनमूलदलैः काञ्जिकपिष्टैः ससैन्धवैर्लेपः। हन्ति स्नायुकरोगं यद्वा मोचत्वचो लेपः॥ ४४॥

Paste of śobhāñjana (root and leaves) pounded with sour gruel and added with rock salt applied (to the spot) destroys snāyuka roga. The paste of the bark of moca (śālmali) also acts similarly. [44]

॥ इति विसर्प-विस्फोटचिकित्सा॥ ५३॥

Thus ends treatment of vīsarpa and visphoṭa. [53]

५४. चतुःपञ्चाशोऽध्यायः

CHAPTER LIV

मसूरिका-चिकित्सा

Treatment of Masūrikā (chicken pox)

क्रियाक्रमः

सर्वासां वमनं पथ्यं पटोलारिष्टवासकैः। कषायैश्च वचावत्सयष्ट्याह्वफलकल्कितैः॥ १॥
सक्षौद्रं पाययेद् ब्राह्म्या रसं वा हैलमोचिकम्। वान्तस्य रेचनं देयं शमनश्चाबले नरे॥ २॥
सुषवीपत्रनिर्यासं हरिद्राचूर्णसंयुतम्। रोमान्तीज्वरविस्फोटमसूरीशान्तये पिबेत्॥ ३॥
उभाभ्यां हृतदोषस्य विशुद्ध्यन्ति मसूरिकाः। निर्विकाराश्चाल्पपूयाः पच्यन्ते चाल्पवेदनाः॥ ४॥

In all cases, emesis is induced with the decoction of paṭola, nimba and vāsā added with the paste of vacā, indrayava, madhuyaṣṭī and madanaphala. [1]

Or the juice of brāhmī or hilamocikā should be administered. After emesis, purgative should be given but in weak patients pacifying measures are advisable. [2]

In case of romāntikā (measles), fever, visphoṭa and masūrikā, one should take the juice of suṣavī (kāravellaka) leaves added with haridrā powder. [3]

By evacuation from both ends, the eruptions of masūrikā get purified, free from complications with less suppuration and pain. [4]

मुष्टियोगाः

कण्टाकुम्भाडुमूलं क्वथनविधिकृतं हिङ्गुमाषैकयुक्तं
पीतं बीजं जयायाः सघृतमुषितवाः पीतमङ्घ्रिः शिकट्याः।
मघ्या मूलं शिफा वा मदनकुसुमजा सोषणा वाऽथ पूति-
र्योगा वास्यम्बुनैते प्रथममघगदे दृश्यमाने प्रयोज्याः॥ ५॥

(1) decoction of kaṇṭākumbhāḍu (root) added with hiṅgu one gm (2) seeds of jayantī mixed with ghee and taken with stale water (3) śikaṭī (root) taken with stale water (4) maghī (root) (5) madanakusuma (root) (6) pūti mixed with marica– these drugs taken with stale water should be used as soon as masūrikā appears. [5]

मुष्टियोगपरिभाषा

उद्धृत्य मुष्टिनाऽऽच्छाद्य भेषजं यत् प्रयुज्यते। तन्मुष्टियोगमित्याहुर्मुष्टियोगपरायणाः॥ ६॥

Muṣṭiyoga

The formulation which is taken by and within fist is known as 'muṣṭiyoga' (fistful formulation). [6]

अन्ये प्रयोगाः

उष्ट्रकण्टकमूलं वाऽप्यनन्तामूलमेव वा। विधिगृहीतं ज्येष्ठाम्बु पीतं हन्ति मसूरिकाम्॥ ७॥
तद्वच्छृगालकण्टकमूलञ्च व्युषिताम्भसा॥ ८॥
मसूरीं मूर्च्छितो हन्ति गन्धकार्द्धस्तु पारदः। निशाचिञ्चाच्छदे शीतवारिपीते तथैव तु॥ ९॥
यावत्संख्या मसूर्य्यङ्गे तावद्भिः शेलुजैर्दलैः। छिन्नैरातुरनाम्ना तु गुणी व्येति न वर्धते॥ १०॥
व्युषितं वारि सक्षौद्रं पीतं दाहगुणीहरम्। शेलुत्वक्कृतशीताम्भः सेकं वा कायशोषणे॥ ११॥

The root of uṣṭrakaṇṭaka or anantā (anantamūla) taken with rice-water destroys masūrikā. [7]

Similarly acts the root of śṛgālakaṇṭaka taken with stale water. [8]

Kajjalī made of mercury 1/2 part and sulphur one part destroys masūrikā; haridrā and amlikā leaves taken with cold water acts similarly. [9]

The leaves of śleṣmātaka in the number as the spots of masūrikā in the body are cut while taking the patient's name. By this masūrikā recedes and does not aggravate. [10]

Intake of stale water added with honey alleviates burning sensation and masūrika. Similarly sprinkling with the cold infusion of śleṣmātaka (bark) absorbs the eruptions. [11]

उग्रादिधूपः

उग्राज्यवंशनीलीयववृषकार्पासकीकसब्राह्मी। सुरसमयूरकलाक्षाधूपो रोमान्तिकादिहरः॥ १२॥

Ugrādi dhūpa

Ugrā (vacā), ghee, vaṃśa, nīlī, barley, vāsā, kārpāsa (seeds), brāhmī, tulasī, apāmārga and lākṣā– fumigation with these drugs destroys romāntikā etc. [12]

तर्पणादिप्रयोगः

तर्पणं वातजायां प्राग् लाजचूर्णैः सशर्करैः। भोजनं तिक्तयूषैश्च प्रतुदानां रसेन वा॥ १३॥

In vātika type, at first, saturation with parched paddy and sugar should be provided. The diet should also consist of bitter soups and meat-soups of wild animals. [13]

द्विपञ्चमूलादिक्वाथः

द्विपञ्चमूलं रास्ना च दार्व्युशीरं दुरालभा। सामृतं धान्यकं मुस्तं जयेद्वातसमुत्थिताम्॥ १४॥

Dvipañcamūlādi kvātha

Both pañcamūlis (daśamula), rāsnā, dāruharidrā, uśīra, durālabhā, guḍūcī, dhānyaka and musta– this decoction overcomes the vātika type. [14]

गुडूच्यादिक्वाथः

गुडूचीं मधुकं रास्नां पञ्चमूलं कनिष्ठकम्। चन्दनं काश्मर्य्यफलं बलामूलं विकङ्कतम्॥
पाककाले मसूर्यान्तु वातजायां प्रयोजयेत्॥ १५॥

Guḍūcyādi kvātha

Guḍūcī, madhuka, rāsnā, laghu pañcamūla, candana, kāśmarya (fruit), balā (root) and vikaṅkata– this decoction should be used in suppurative stage of vātika masūrikā. [15]

द्राक्षादिक्वाथ:

द्राक्षाकाश्मर्य्यखर्जूरपटोलारिष्टवासकैः। लाजामलकदुःस्पर्शैः सितायुक्तैश्च पैत्तिके॥ १६॥

Drākṣādi kvātha

In paittika type, the decoction of drākṣā, kāśmarya, kharjūra, paṭola, nimba, vāsā, parched paddy, āmalaka and durālabhā added with sugar is useful. [16]

शिरीषादिप्रलेप:

शिरीषोदुम्बराश्वत्थशेलुन्यग्रोधवल्कलैः। प्रलेपः सघृतः शीघ्रं व्रणविस्फोटदाहहा॥ १७॥

Śirīṣādi pralepa

The paste of śirīṣa, udumbara, aśvattha, śleṣmātaka and nyagrodha (all barks) mixed with ghee alleviates wound, visphoṭa and burning sensation instantaneously. [17]

दुरालभादिक्वाथ:

दुरालभां पर्पटकं भूनिम्बं कटुरोहिणीम्। श्लैष्मिक्यां पित्तजायां वा पाने निःक्वाथ्य दापयेत्॥ १८॥

Durālabhādi kvātha

Durālabhā, parpaṭa, kirātatikta and kaṭukā– this decoction should be given in paittika and kaphaja types. [18]

निम्बादिक्वाथ:

निम्बं पर्पटकं पाठां पटोलं कटुरोहिणीम्। वासां दुरालभां धात्रीमुशीरं चन्दनद्वयम्॥ १९॥
एष निम्बादिकः ख्यातः पीतः शर्करया युतः। हन्ति त्रिदोषमसूरीं ज्वरवीसर्पसम्भवाम्॥
उत्थिता प्रविशेत् या तु पुनस्तां बाह्यतो नयेत्॥ २०॥

Nimbādi kvātha

Nimba, parpaṭa, pāṭhā, paṭola, kaṭukā, vāsā, durālabhā, āmalakī, uśīra, candana and rakta candana– this nimbādi kvātha mixed with sugar and taken regularly cures masūrikā caused by tridoṣa in fever and visarpa. It also manifests the eruptions which disappear after coming out. [19-20]

पटोलादिक्वाथ:

पटोलकुण्डलीमुस्तवृषधन्वयवासकैः। भूनिम्बनिम्बकटुकापर्पटैश्च शृतं जलम्॥ २१॥
मसूरीं शमयेदामां पक्वाश्चैव विशोधयेत्। नातः परतरं किञ्चिद् विस्फोटज्वरशान्तये॥ २२॥

Paṭolādi kvātha

Paṭola, guḍūcī, musta, vāsā, dhanvayāsa, kirātatikta, nimba, kaṭukā and parpaṭa– this

decoction pacifies the immature masūrikā and cleanses the mature ones. There is no remedy for visphoṭa and jvara better than this. [21-22]

पटोलमूलादिक्वाथ:

पटोलमूलारुणतण्डुलीयकं पिबेद्धरिद्राऽऽमलककल्कसंयुतम्।
मसूरिविस्फोटविदाहशान्तये तदेव रोमान्तिवमिज्वरापहम्॥ २३॥

Paṭolamūlādi kvātha

Decoction of paṭola (root) and red taṇḍulīyaka combined with the powder (or paste) of haridrā and āmalaka should be taken. It pacifies masūrikā, visphoṭa, burning sensation, romāntikā, vomiting and fever. [23]

पटोलमूलादिचतुरङ्गक्वाथ:

पटोलमूलारुणतण्डुलीयकं तथैव धात्रीखदिरेण संुतम्।
पिबेज्जलं सुक्रथितं सुशीतं मसूरिकारोगविनाशनं परम्॥ २४॥

Paṭolamūlādi Caturaṅga kvātha

Paṭola (root), red taṇḍulīyaka, āmalakī and khadira– this decoction cooled should be taken. It is an excellent remedy for masūrikā. [24]

खदिराष्टकम्

खदिरत्रिफलाऽरिष्टपटोलामृतवासकैः। क्राथोऽष्टकाख्यो जयति रोमान्तिकमसूरिकाः॥
कुष्ठवीसर्पविस्फोटकण्ड्वादीनपि पानतः॥ २५॥

Khadirāṣṭaka

Khadira, triphalā, nimba, paṭola, guḍūcī and vāsā– this khadirāṣṭaka kvātha, by intake, overcomes romāntikā, masūrikā, kuṣṭha, visarpa, visphoṭa, itching etc. [25]

अमृतादिक्वाथप्रयोग:

अमृतादिकषायस्तु जयेत् पित्तकफात्मिकाम्॥ २६॥

Amṛtādi kvātha (mentioned in visarpa) alleviates the diseases caused by pitta and kapha. [26]

मातुलुङ्गकेशरप्रयोग:

सौवीरेण तु सम्पिष्टं मातुलुङ्गस्य केशरम्। प्रलेपात् पातयत्याशु दाहश्चाशु नियच्छति॥ २७॥

Stamens of mātuluṅga pounded with sour gruel, by external application, fells the concretions and pacifies the burning sensation. [27]

तण्डुलाम्बुसेक:

पाददाहं प्रकुरुते पिडका पादसम्भवा। तत्र सेकं प्रशंसन्ति बहुशस्तण्डुलाम्बुना॥ २८॥

If the eruption located in feet causes burning sensation frequent sprinkling with rice-water is recommended. [28]

बृंहणव्यवस्था

पाककाले तु सर्वास्ता विशोषयति मारुतः। तस्मात् संबृंहणं कार्य्यं न तु पथ्यं विशोषणम्॥ २९॥

In the state of suppuration vāyu dries up all the pustules and as such the patient should be provided with nourishing, not desaturating, diet. [29]

गुडूच्यादिक्वाथः

गुडूची मधुकं द्राक्षा मोरटं दाडिमैः सह। पाककाले तु दातव्यं भेषजं गुडसंयुतम्॥
तेन पाकं व्रजत्याशु न च वायुः प्रकुप्यति॥ ३०॥

Guḍūcyādi kvātha

Guḍūcī, madhuka, drākṣā, moraṭa and dāḍima—this decoction added with jaggery should be given which hastens suppuration and checks aggravation of vāta. [30]

बदरचूर्णलेहः

लिहेद्वा बादरं चूर्णं पाचनार्थं गुडेन तु। अनेनाशु विपच्यन्ते वातपित्तकफात्मिकाः॥ ३१॥

Or one should take powder of badara mixed with jaggery for maturation. It helps maturation of the disorder caused by vāta, pitta and kapha. [31]

धन्वमांसरसप्रयोगः

शूलाध्मानपरीतस्य कम्पमानस्य वायुना। धन्वमांसरसाः शस्ता ईषत्सैन्धवसंयुताः॥ ३२॥

In case of abdominal pain and flatulence as well as trembling due to vāyu, meat-soup of wild animals added with rock salt is wholesome. [32]

अरोचक-चिकित्सा

दाडिमाम्लरसैर्युक्ता यूषा स्युररुचौ हिताः॥ ३३॥

In anorexia, vegetable soups added with sour pomegranate juice are wholesome. [33]

खदिरादिपानीयं गायत्र्यादिजलञ्च

पिबेदम्भस्तप्तशीतं भावितं खदिरासनैः। शौचे वारि प्रयुञ्जीत गायत्रीबहुवारजम्॥ ३४॥

One should use boiled and cooled water processed with khadira and bījaka for drinking. For external uses, the same processed with khadira and śleṣmātaka should be used. [34]

जातीपत्रादिगण्डूषः

जातीपत्रं समञ्जिष्ठं दार्वी पूगफलं शमी। धात्रीफलं समधुकं क्वथितं मधुसंयुतम्॥
मुखरोगे कण्ठरोगे गण्डूषार्थं प्रशस्यते॥ ३५॥

Jātīpatrādi gaṇḍuṣa

Jātīpatra (leaves), mañjiṣṭhā, dāruharidrā, pūgaphala, śamī, āmalakī and madhuka— this decoction added with honey should be used for gargle in diseases of mouth and throat. [35]

नेत्रसेक:

अक्ष्णोः सेकं प्रशसन्ति गवेधुमधुकाम्बुना ।। ३६ ।।

Eyes should be washed with the decoction of gavedhuka and madhuka. [36]

मधुकादि:

मधुकं त्रिफला मूर्वा दार्वीत्वङ्नीलमुत्पलम् । उशीरलोध्रमञ्जिष्ठाः प्रलेपाश्च्योतने हिताः ।।
नश्यन्त्यनेन दृग्जाता मसूर्य्यो न द्रवन्ति च ।। ३७ ।।

Madhukādi

Madhuka, triphalā, mūrvā, dāruharidrā (bark), nīlotpala, uśīra, lodhra and mañjiṣṭhā— this formulation is used as paste and eye drop. This cures masūrikā located in eyes and prevents its further spread. [37]

अवचूर्णनयोगाः

पञ्चवल्कलचूर्णेन क्लेदिनीमवचूर्णयेत् । भस्मना केचिदिच्छन्ति केचिद् गोमयरेणुना ।। ३८ ।।

Masūrikā with discharges is dusted with powder of pañcavalkala, (cow-dung) ash or dried cow-dung. [38]

सरलादिधूप:

क्रिमिपातभयाच्चापि धूपयेत् सरलादिना ।। ३९ ।।

It should also be fumigated with sarala etc. to prevent infection of pathogenic agents. [39]

वेदनादौ प्रयोगौ

वेदनादाहशान्त्यर्थं स्रुतानाञ्च विशुद्धये । सगुग्गुलुं वराक्वाथं युञ्ज्याद्वा खदिराष्टकम् ।। ४० ।।

In order to pacify pain and burning sensation and cleaning of discharging one decoction of triphalā or khadirāṣṭaka added with guggulu should be used. [40]

कण्ठशोधनानि

कृष्णाऽभयारजो लिह्यान्मधुना कण्ठशुद्धये । अथाष्टाङ्गवलेहो वा कवलश्चार्द्रकादिभिः ।। ४१ ।।

For cleaning of throat, powder of pippalī and harītakī mixed with honey or aṣṭāṅgāvaleha[1] should be taken. Gargle with ārdraka etc.[2] should also be used. [41]

1-2 Mentioned under jvara-cikitsā.

रक्तशोधनोपाया:

पञ्चतिक्तं प्रयुञ्जीत पानाभ्यञ्जनभोजनै:। कुर्याद् व्रणविधानञ्च तैलादीन् वर्जयेच्चिरम्॥ ४२॥
विषघ्नै: सिद्धमन्त्रेण प्रमृज्यात्तु पुन: पुन:। तथा शोणितसंसृष्टा: काश्चिच्छोणितमोक्षणै: ॥ ४३॥

In case of impurity of blood, pañcatikta ghṛta (mentioned under kuṣṭha) should be used with food and drinks and as anointment; measures prescribed for wound should be applied and oil etc. should be avoided for long. Anti-poison hymns should be recited frequently while touching the body and, in certain cases, blood-letting may also be resorted to. [42-43]

निशाद्वयादिलेप:

निशाद्वयोशीरशिरीषमुस्तकै: सलोध्रभद्रश्रियनागकेशरै:।
सस्वेदविस्फोटविसर्पकुष्ठदौर्गन्ध्यरोमान्तिहर: प्रदेह: ॥ ४४॥

Niśādvayādi lepa

Application of the paste of niśādvaya (haridrā and dāruharidrā), uśīra, śirīṣa, mustaka, lodhra, candana and nāgakeśara alleviates perspitation, visphoṭa, visarpa, kuṣṭha, foul odour and romāntikā. [44]

बिम्ब्यादिक्वाथ:

बिम्ब्यतिमुक्तकाशोकप्लक्षवेतसपल्लवै:। निशि पर्य्युषित: क्वाथो मसूरीभयनाशन: ॥ ४५॥

Bimbyādi kvātha

Bimbī, atimuktaka, aśoka, plakṣa and vetasa (tender leaves)– this decoction kept overnight is taken to prevent masūrikā. [45]

कूर्परादिशोथोपचार:

मसूरीस्फोटयोरन्ते कूर्परे मणिबन्धके। मुखांसफलके शोथो जायते य: सुदारुण: ॥ ४६॥
व्रणशोथहरैर्योगैर्वातघ्नैश्च जलौकसा। हर्तव्यस्तैलभृष्टस्य वृश्चिकस्य विलेपनै: ॥ ४७॥

At the end of masūrikā and visphoṭa, severe inflammation arises in elbow, wrist, mouth and shoulders. In such condition, vāta-alleviating and anti-inflammatory drugs should be administered in addition to application of leeches. Scorpion fried with oil may also be pasted. [46-47]

अनागतप्रतिषेध:

चैत्रासितभूतदिने रक्तपताकाऽन्विता स्नुही भवने। धवलितकलसन्यस्ता पापरुजो दूरतो धत्ते॥ ४८॥

On the fourteenth day of the dark fortnight of caitra the plant of snuhī studded with red flag should be established in a whitened earthen vessel in the house. It averts the attack of masūrikā. [48]

॥ इति मसूरी-चिकित्सा ॥ ५४॥

Thus ends treatment of masūrikā. [54]

५५. पञ्चपञ्चाशोऽध्याय:

CHAPTER LV

क्षुद्ररोग-चिकित्सा

Treatment of Kṣudraroga (minor diseases)

अजगल्लिका-चिकित्सा

तत्राजगल्लिकामामां जलौकाभिरुपाचरेत्। शुक्तिसौराष्ट्रिकाक्षारकल्कैश्चालेपयेन्मुहुः ॥ १ ॥
नवीनकण्टकार्य्यास्तु कण्टकैर्वेधमात्रतः। किमाश्चार्यं विपच्याशु प्रशाम्यत्यजगल्लिका ॥ २ ॥
कठिनां क्षारयोगैश्च द्रावयेदजगल्लिकाम् ॥ ३ ॥

The unripe ajagallikā should be treated with leeching. Moreover, the paste of śukti, saurāṣṭrikā and yavakṣāra should be applied thereto.

Only by puncturing with the spines of fresh kaṇṭakārī ajagallikā subsides after maturation instantaneously.

If ajagallikā is hard, it should be liquified by applying alkali. [1-3]

अनुशयी-चिकित्सा

श्लेष्मविद्रधिकल्पेन जयेदनुशयीं भिषक् ॥ ४ ॥

The Physician should treat anuṣayī like kaphaja vidradhi. [4]

विवृतादीनां चिकित्सा

विवृतामिन्द्रवृद्धाञ्च गर्दभीं जालगर्दभम्। इरिवेल्लिं गन्धमालां जयेत् पित्तविसर्पवत् ॥
मधुरौषधसिद्धेन सर्पिषा शमयेद् व्रणान् ॥ ५ ॥

Vivṛtā, indravṛddhā, gardabhī, jālagardabha, irivelli and gandhamālā– these should be treated like paittika visarpa. The wounds should be managed with ghee processed with sweet drugs. [5]

विदारिका-चिकित्सा

रक्तावसेकैर्बहुभिः स्वेदनैरपतर्पणैः। जयेद्विदारिकां लेपः शिग्रुदेवद्रुमोद्भवैः ॥ ६ ॥

By frequent blood-letting, fomentation and desaturation and also the paste of śigru and devadāru, vidārikā should be treated. [6]

पनसिकादीनां चिकित्सा

पनसिकां कच्छपिकामनेन विधिना भिषक्। अन्त्रालजीं यवप्रख्यां तथा पाषाणगर्दभम् ॥ ७ ॥
साधयेत् कठिनानन्याञ्छोथान् दोषसमुद्भवान्। सुरदारुशिलाकुष्ठैः स्वेदयित्वा प्रलेपयेत् ॥ ८ ॥
कफमारुतशोथघ्नो लेपः पाषाणगर्द्दभे ॥ ९ ॥

Panasikā, kacchapikā, antrālajī, yavaprakhyā and pāṣāṇagardabha– these should also be treated by the above method. The other hard swellings caused by doṣas (kapha and vāta) should be managed with the paste of devadāru, realgar and kuṣṭha preceded by fomentation. [7-8]

In pāṣāṇagardabha, the paste alleviating swelling caused by kapha and vāta should be applied. [9]

वल्मीक-चिकित्सा

शस्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत्। मनःशिलाऽऽलभल्लातसूक्ष्मैलाऽगुरुचन्दनैः ॥ १० ॥
जातीपल्लवकल्कैश्च निम्बतैलं विपाचयेत्। वल्मीकं नाशयेत् तद्धि बहुच्छिद्रं बहुस्रवम्॥ ११ ॥

Valmīka

Valmīka should be cut with knife and then subjected to alkali and cauterization.

Oil of nimba (seeds) cooked with the paste of realgar, orpiment, bhallātaka, elā, aguru, candana and jātī (leaves) destroys valmīka having many openings and profuse discharge. [10-11]

पाददारी-चिकित्सा

पाददारीषु च शिरां व्यधयेत्तलशोधनीम्। स्नेहस्वेदोपपन्नौ तु पादौ चालेपयेन्मुहुः ॥
मधूच्छिष्टवसामज्जघृतक्षारैर्विमिश्रितैः ॥ १२ ॥

पादप्रमार्जनम्

सर्जाख्यसिंधूद्भवयोश्चूर्णं मधुघृताप्लुतम्। निर्मथ्य कटुतैलाक्तं हितं पादप्रमार्जनम्॥ १३ ॥

Pādadārī

In pādadārī (cracks in foot) the vein traversing the sole of foot should be punctured. Moreover, the feet should be uncted and fomented and then covered frequently with the paste of bee-wax, fat, marrow, ghee and yavakṣāra mixed together.

Powders of sarjarasa and rock salt mixed with honey and ghee are put in mustard oil and churned. This should be applied in pādadārī. [12-13]

उपोदिकाक्षारतैलम्

उपोदिकासर्षपनिम्बमोचककर्कारुकैर्वारुकभस्मतोये।
तैलं विपक्वं लवणांशयुक्तं तत् पाददारीं विनिहन्ति लेपात्॥ १४ ॥

Upodikākṣāra-taila

Oil cooked in water of the alkali of upodikā, sarṣapa, nimba, kadalī, karkāruka and ervāruka along with rocksalt, by external application, destroys pādadārī. [14]

अलसक-चिकित्सा

पटोलादिलेपः

अलसेऽम्लैश्चिरं सिक्तौ चरणौ परिलेपयेत्। पटोलारिष्टकाशीशत्रिफलाभिर्मुहुर्मुहुः॥ १५॥
करञ्जबीजं रजनी काशीशं मधुकं मधु। रोचना हरितालश्च लेपोऽयमलसे हितः॥ १६॥
लाक्षाऽभयारसालेपः कार्य्यो वा रक्तमोक्षणम्। जातीपत्रञ्च सम्मर्द्य दद्यादलसके भिषक्॥ १७॥
बृहतीरससिद्धेन तैलेनाभ्यज्य बुद्धिमान्। शिलारोचनकाशीशचूर्णैर्वा प्रतिसारयेत्॥ १८॥

Alasa (lichen)

In alasa, feet should be bathed for considerable time with sour gruel and then pasted frequently with paṭola, nimba, kāsīsa and triphalā.

Karañja (seeds), haridrā, kāsīsa, madhuka, gorocana, orpiment and honey– this paste is useful in above.

In alasa, paste of lākṣā, harītakī and balā should be applied or blood-letting should be done. Jātī leaves pounded should also be applied.

After anointing with the oil processed with the juice of bṛhatī the affected part should be dusted with the powder of realgar, gorocana and kāsīsa. [15-18]

कदर-चिकित्सा

दहेत् कदरमुद्धृत्य तैलेन दहनेन वा॥ १९॥

Kadara (corn)

Kadara should be excised and then the part should be cauterized with (hot) oil or fire. [19]

चिप्प-चिकित्सा

चिप्पमुष्णाम्बुना स्विन्नमुद्धृत्याभ्यज्य तं व्रणम्। दत्त्वा सर्जरसं चूर्णं बद्ध्वा व्रणवदाचरेत्॥ २०॥
स्वरसेन हरिद्राया पात्रे कृष्णायसेऽभयाम्। घृष्ट्वा तज्जेन कल्केन लिम्पेच्चिप्पं पुनः पुनः॥ २१॥
चिप्पे सटङ्कणास्फोतामूललेपो नखप्रदः॥ २२॥

Cippa (whitlow)

After fomenting with hot water the affected part should be incised. Then the wound should be anointed, covered with sarjarasa powder and bandaged. It should be managed like wound.

Harītakī fruit should be rubbed with the juice of haridrā in an iron vessel and the paste should be applied to the part frequently.

The paste of āsphotā (root) mixed with borax helps re-appearance of nail in cippa. [20-22]

पद्मिनीकण्टक-चिकित्सा

निम्बोदकेन वमनं पद्मिनीकण्टके हितम्। निम्बोदककृतं सर्पिः सक्षौद्रं पानमिष्यते॥ २३॥
पद्मनालकृतः क्षारः पद्मिनीं हन्ति लेपतः। निम्बारग्वधकल्कैर्वा मुहुरुद्वर्त्तनं हितम्॥ २४॥

Padminīkaṇṭaka

In padminīkaṇṭaka, emesis with nimba decoction is useful. Moreover, intake of ghee cooked with nimba decoction and mixed with honey is prescribed.

The alkali made of lotus stalk destroys padminī by pasting. Frequent anointment with the paste of nimba and āragvadha is also efficacious. [23-24]

जालगर्दभ-चिकित्सा

नीलीपटोलमूलाभ्यां साज्याभ्यां लेपनं हितम्। जालगर्दभरोगे तु सद्यो हन्ति च वेदनाम्॥ २५॥

Jālagardabha

The paste of nīlī and paṭola (root) mixed with ghee and applied in jālagardabha alleviates pain instantaneously. [25]

अहिपूतनक-चिकित्सा

अहिपूतनके धात्र्याः पूर्वं स्तन्यं विशोधयेत्। त्रिफलाखदिरक्राथैर्व्रणानां धावनं सदा॥ २६॥
करञ्जत्रिफलातिक्तैः सर्पिः सिद्धं शिशोर्हितम्। रसाञ्जनं विशेषेण पानालेपनयोर्हितम्॥ २७॥

Ahipūtanaka (Pruritus anii)

In ahipūtanaka, at first, the breast-milk of the wet-nurse should be purified and the wound should be washed constantly with decoction of triphalā and khadira.

Ghee cooked with karañja, triphalā and bitters is wholesome for the child. Particular Rasāñjana is useful for internal use as well as external application. [26-27]

गुदभ्रंश-चिकित्सा

गुदभ्रंशे गुदं स्नेहैरभ्यज्याशु प्रवेशयेत्। प्रविष्टे स्वेदयेच्चापि बद्धं गोष्फणया दृढम्॥ २८॥
कोमलं पद्मिनीपत्रं यः खादेच्छर्कराऽन्वितम्। एतन्निश्चित्य निर्दिष्टं न तस्य गुदनिर्गमः॥ २९॥
वृक्षाम्लानलचाङ्गेरीविश्वपाठायवाग्रजम्। तक्रेण शीलयेत् पायुभ्रंशार्त्तोऽनलदीपनम्॥ ३०॥
गुदञ्च गव्यवसया म्रक्षयेदविशङ्कितः। दुष्प्रवेशो विशत्याशु गुदभ्रंशो न संशयः॥ ३१॥
मूषिकाणां वसाभिर्वा गुदे सम्यक प्रलेपनम्। स्विन्नमूषिकमांसेन चाथवा स्वेदयेद् गुदम्॥ ३२॥

Gudabhraṃśa (prolapse of rectum)

In gudabhraṃśa, the anus should be anointed with (four) fats and then the rectum should be pushed within and after fomentation should be bandaged firmly with goṣphaṇā type of bandage.

One who eats tender leaves of lotus plant mixed with sugar does not suffer from the rectal prolapse.

The patient of gudabhraṃśa should take the formulation consisting of vṛkṣāmla, citraka, cāṅgerī, bilva, pāṭhā and yavakṣāra with buttermilk. It stimulates digestive fire.

The rectum should be anointed with ox-fat. By this it returns, even if difficult.

The anus should be pasted with fat of rats or fomented with boiled flesh of the same. [28-32]

चाङ्गेरीघृतम्

चाङ्गेरीकोलदध्यम्लनागरक्षारसंयुतम्। घृतमुत्क्वथितं पेयं गुदभ्रंशरुजाऽपहम्॥
शुण्ठीक्षारावत्र कल्कौ शिष्टन्तु द्रवमिष्यते॥ ३३॥

Cāṅgerī-ghṛta

Ghee should be cooked with cāṅgerī juice, badara– decoction and sour curd along with śuṇṭhī and yavakṣara. It alleviates gudabhraṃśa. Here śuṇṭhī and yavakṣāra are given as paste and other items as liquid. [33]

मूषिकाद्यं तैलम्

क्षीरे महत् पञ्चमूलं मूषिकामन्त्रवर्जिताम्। पक्त्वा तस्मिन् पचेत्तैलं वातघ्नौषधसाधितम्॥
गुदभ्रंशमिमदं तैलं पानाभ्यङ्गात् प्रसाधयेत्॥ ३४॥

Mūṣikādya taila

Milk is cooked with bṛhat pañcamūla and rat devoid of intestines and with this oil is cooked along with vāta-alleviating drugs. This oil, by intake and anointment, cures gudabhraṃśa. [34]

परिवर्त्तिका-चिकित्सा

स्वेदोपनाहौ परिवर्त्तिकायां कृत्वा समभ्यज्य घृतेन पश्चात्।
प्रवेशयेच्चर्म शनैः प्रविष्टे मासैः सुखोष्णैरुपनाहयेच्च॥ ३५॥

Parivarttikā (paraphimosis)

In parivarttikā, after fomentation, poultice and anointment with ghee the prepuce should be restored to its normal position slowly. Then poultice of warm flesh should be applied. [35]

अवपाटिका-चिकित्सा

स्नेहस्वेदैस्तथैवैनां चिकित्सेदवपाटिकाम्॥ ३६॥

Avapāṭikā (tear in prepuce)

Similarly, avapāṭikā should be treated with unction and fomentation. [36]

निरुद्धप्रकश-चिकित्सा

निरुद्धप्रकशे नाडीं द्विमुखीं कनकादिजाम्। क्षिप्त्वाऽभ्यक्त्वा चुल्लक्यादिस्नेहेन परिषेचयेत्॥ ३७॥

तैलेन वा वचादारुकल्कैः सिद्धेन च त्र्यहात्। पुनः स्थूलतरा नाडी देया स्रोतोविशुद्धये॥ ३८॥
शस्त्रेण सेवनीं त्यक्त्वा भित्त्वा व्रणवदाचरेत्। स्निग्धश्च भोजनं बद्धगुदेऽप्येष क्रियाक्रमः॥ ३९-४०॥

Niruddhaprakaśa (Phimosis)

In niruddhaprakaśa, a tube made of gold etc. and having double opening should be introduced after lubricating weil with ghee. Through this the part should be irrigated with fat of porpoise or the oii processed with the paste of vacā and devadāru. After three days, again a thicker tube is introduced to open the passage. If not cured by this method, the overlapping skin should be removed surgically avoiding the suture, followed by the management as in wound and also unctous food. [37-39]

Sanniruddhaguda (stricture of rectum)

The same course is followed in sanniruddhaguda. [40]

चर्मकीलादि-चिकित्सा

चर्मकीलं जतुमणिं मशकांस्तिकालकान्। उद्धृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः॥ ४१॥
रुबुनालस्य चूर्णेन घर्षो मषकनाशनः। निर्मोकभस्मघर्षाद्वा मषः शान्तिं व्रजेत् सदा॥ ४२॥

Carmakīla etc

Carmakīla, jatumaṇi, maṣaka and tilakālaka– these should be excised with knife and then cauterized with alkali and fire. [41]

Maṣaka (mole)

Lime taken on leaf-stalk of eraṇḍa is rubbed on the mole which destroys it. Similarly rubbing is done with snake-slough. [42]

युवानपिडकादीनां चिकित्सा

युवानपिडकान्यच्छनीलिकाव्यङ्गशर्कराः। शिराव्यधैः प्रलेपैश्च जयेदभ्यञ्जनैस्तथा॥ ४३॥
लोध्रधान्यवचालेपस्तारुण्यपिडकाऽपहः। तद्वद् गोरोचनायुक्तं मरिचं मुखलेपनात्॥ ४४॥
सिद्धार्थकवचालोध्रसैन्धवैश्च प्रलेपनम्। वमनञ्च निहन्त्याशु पिडकां यौवनोद्भवाम्॥ ४५॥
व्यङ्गेषु चार्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका। लेपः सनवनीतो वा श्वेताश्वखुरजा मसी॥ ४६॥
रक्तचन्दनमञ्जिष्ठाकुष्ठलोध्रप्रियङ्गवः। वटाङ्कुरमसूराश्च व्यङ्गघ्ना मुखकान्तिदाः॥ ४७॥
व्यङ्गिनां लेपनं शस्तं रुधिरेण शशस्य च॥ ४८॥
केवलान् पयसा पिष्ट्वा तीक्ष्णाञ्छाल्मलिकण्टकान्। आलिप्तं त्र्यहमेतेन भवेत् पद्मोपमं मुखम्॥ ४९॥
मसूरैः सर्पिषा पिष्टैर्लिप्तमास्यं पयोऽन्वितैः। सप्तरात्राद्भवेद्वक्त्रं पुण्डरीकदलोपमम्॥ ५०॥
मातुलुङ्गजटा सर्पिः शिला गोशकृतो रसः। मुखकान्तिकरो लेपः पिडकातिलकालजित्॥ ५१॥
नवनीतगुडक्षौद्रकोलमज्जप्रलेपनम्। व्यङ्गजिद्वरुणत्वग्वा छागीक्षीरप्रपेषिता॥ ५२॥

Yuvānapiḍakā etc

Yuvānapiḍakā, nyaccha, nīlikā, vyaṅga (freckles) and śarkarā should be treated with venesection, pastes and anointment. [42-43]

Paste of lodhra, dhānyaka and vacā destroys yuvānapiḍakā. Similarly acts the paste of marica mixed with gorocana. Paste of Sarṣapa, vacā, lodhra and saindhava is also applied. Emesis also destroys yuvānapiḍakā. [44-45]

In vyaṅga (1) Arjuna bark or mañjiṣṭhā mixed with honey or (2) śvetā and ash of horse's hoof mixed with butter are applied as paste.

Rakta candana, mañjiṣṭhā, kuṣṭha, lodhra, priyaṅgu, vaṭa (leaf-bud) and lentils– these destroy vyaṅga and increase lustre of face.

Hare's blood is efficacious as paste in vyaṅga.

The sharp spines of śālmali pounded with milk are pasted on face for three days which improves lustre.

The paste of lentils pounded with milk and mixed with ghee is applied on face for a week which makes it like lotus. [46-50]

Mātuluṅga (root), realgar, cow-dung juice mixed with ghee make a good face-cream which also alleviates piḍakā and tilakālaka. [51]

Seed-kernel of kola and jaggery pounded and mixed with butter and honey alleviates vyaṅga. Similarly acts varuṇa bark pounded with goat's milk. [52]

लेपाभ्यङ्गौ

जातीफलकल्कलेपो नीलीव्यङ्गादिनाशनः । सायञ्च कटुतैलेनाभ्यङ्गो वक्त्रप्रसादनः ॥ ५३ ॥

Applying the paste of jātīphala destroys nīlī, vyaṅga etc. Anointment with mustard oil in the evening cleans the face. [53]

कालीयकादिलेपः

कालीयकोत्पलामयदधिसरबदरास्थिमध्यफलिनीभिः । लिप्तं भवति च वदनं शशिप्रभं सप्तरात्रेण ॥ ५४ ॥
तुषरहितमसृणयवचूर्णसयष्टीमधुकलोध्रलेपेन । भवति मुखं परिनिर्जितचामीकरचारुसौभाग्यम् ॥ ५५ ॥
रक्षोघ्नशर्वरीद्वयमञ्जिष्ठागैरिकाज्यबस्तपयः- । सिद्धेन लिप्तमाननमुद्यद्विधुबिम्बवद्भाति ॥ ५६ ॥
परिणतदधिशरपुङ्खैः कुवलयदलकुष्ठचन्दनोशीरैः । मुखकमलकान्तिकारी भ्रुकुटीतिलकालकाञ्जयति ॥

Kālīyaka, nīlotpala, kuṣṭha, suparnatant layer of curd, badara (seed-kernel), priyaṅgu– this formulation used as paste on face for a week makes it like moon.

By applying the paste of fine powder of dehusked barley, yaṣṭīmadhu and lodhra on the face it attains golden hue.

Mustard, haridrā, dāruharidrā, mañjiṣṭhā, red ochre, ghee and goat's milk– application of this paste on face makes it beautiful like rising moon.

Mature curd, śarapuṃkhā, nīlotpala (petals), kuṣṭha, candana and uśīra– this paste improves facial lustre and destroys wrinkles and tilakālaka. [54-57]

हरिद्राद्यं तैलम्

हरिद्राद्वययष्ट्याह्वकालीयककुचन्दनैः । प्रपौण्डरीकमञ्जिष्ठापद्मपद्मककुङ्कुमैः ॥ ५८ ॥

कपित्थतिन्दुकप्लक्षवटपत्रैः पयोऽन्वितैः। लेपयेत् कल्कितैरेभिस्तैलं वाऽभ्यञ्जनं चरेत्॥ ५९॥
पिप्लुकान् नीलिका व्यङ्गांस्तिलकान् मुखदूषिकाः। नित्यसेवी जयेत् क्षिप्रं मुखं कुर्यान्मनोरमम्॥ ६०॥

Haridrādya taila

Haridrā, dāruharidrā, madhuka, kālīyaka, kucandana, prapauṇḍarīka, mañjiṣṭhā, kamala, padmaka, kuṅkuma, leaves of kapittha, tinduka, plakṣa and vaṭa– these are pounded with milk and made into paste. This paste itself is applied on face or used for cooking of oil which is anointed. By its regular use face becomes charming and piplu, nīlikā, vyaṅga, tilakālaka and mukhadūṣikā are alleviated. [58-60]

कनकतैलम्

मधुकस्य कषायेण तैलस्य कुडवं पचेत्। कल्कैः प्रियङ्गुमञ्जिष्ठाचन्दनोत्पलकेशरैः॥ ६१॥
कनकं नाम तत्तैलं मुखकान्तिकरं परम्। अभीरुनीलिकाव्यङ्गशोधनं परमर्चितम्॥ ६२॥

Kanaka taila

Oil 160 ml is cooked with decoction of madhuka and paste of priyaṅgu, mañjiṣṭhā, candana, nīlotpala and lotus-stamens. This is known as kanaka-taila which is excellent for improving facial lustre and alleviating abhīru, nīlikā and vyaṅga. [61-62]

मञ्जिष्ठाद्यं तैलम्

मञ्जिष्ठा मधुकं लाक्षा मातुलुङ्गं सयष्टिकम्। कर्षप्रमाणैरेतैस्तु तैलस्य कुडवं तथा॥ ६३॥
आजं पयस्तद्द्विगुणं शनैर्मृद्वग्निना पचेत्। नीलिकापिडकाव्यङ्गानभ्यङ्गादेव नाशयेत्॥ ६४॥
मुखं प्रसन्नोपचितं वलीपलितवर्जितम्। सप्तरात्रप्रयोगेण भवेत् कनकसन्निभम्॥ ६५॥

Mañjiṣṭhādya taila

Oil 160 ml is cooked with (the paste of) mañjiṣṭhā, madhuka, lākṣā, mātuluṅga and madhuyaṣṭī each 10 gm along with double (quantity of) goat's milk on mild fire. It removes wrinkles and greying of hairs, improves facial lustre by a week's use. [63-65]

कुङ्कुमाद्यं तैलम्

कुङ्कुमं चन्दनं लाक्षा मञ्जिष्ठा मधुयष्टिका। कालीयकमुशीरञ्च पद्मकं नीलमुत्पलम्॥ ६६॥
न्यग्रोधपादाः प्लक्षस्य शुङ्गाः पद्मस्य केशरम्। द्विपञ्चमूलसहितैः कषायैः पलिकैः पृथक्॥ ६७॥
जलाढकं विपक्तव्यं पादशेषमथोद्धरेत्। मञ्जिष्ठा मधुकं लाक्षा पत्तङ्गं मधुयष्टिका॥ ६८॥
कर्षप्रमाणैरेतैस्तु तैलस्य कुडवं पचेत्। अजाक्षीरं तद्द्विगुणं शनैर्मृद्वग्निना पचेत्॥ ६९॥
सम्यक् पक्वं परं ह्येतन्मुखवर्णप्रसादनम्। नीलिकापिडकाव्यङ्गानभ्यङ्गादेव नाशयेत्॥ ७०॥
सप्तरात्रप्रयोगेण भवेत् काञ्चनसन्निभम्। कुङ्कुमाद्यमिदं तैलमश्विभ्यां निर्मितं पुरा॥ ७१॥

Kuṅkumādya taila

Kuṅkuma, candana, lākṣā, mañjiṣṭhā, madhuyaṣṭī, kālīyaka, uśīra, padmaka, nīlotpala, nyagrodha (hanging roots), plakṣa (leaf-bud), lotus-stamens and daśamula– each 40

gm are decocted in water 2.56 litre reduced to one-fourth. With this decoction oil 160 ml is cooked on mild fire along with (the paste of) mañjiṣṭhā, madhuka, lākṣā, pattaṅga, madhuyaṣṭī each 10 gm and goat's milk double in quantity. It promotes facial lustre and alleviates nīlikā, piḍakā and vyaṅga by anointment by using for a week. This kuṅkumādya taila was formulated in early days by Aśvins. [66-71]

पञ्चाङ्गं कुङ्कुमाद्यं तैलम्

कुङ्कुमं चन्दनं लाक्षा मञ्जिष्ठा मधुयष्टिका। कर्षप्रमाणैरेतैस्तु तैलस्य कुडवं पचेत्॥ ७२॥
अजाक्षीरं तद्द्विगुणं शनैर्मृद्वग्निना पचेत्। सम्यक् पक्वं परं ह्येतन्मुखकान्तिप्रसादनम्॥ ७३॥
नीलिकापिडकाव्यङ्गानभ्यङ्गादेव नाशनम्। सप्तरात्रप्रयोगेण भवेत् काञ्चनसन्निभम्॥
कुङ्कुमाद्यमिदं तैलमश्विभ्यां निर्मितं पुरा॥ ७४॥

Pañcaṅga kuṅkumādya taila

Kuṅkuma, candana, lākṣā, mañjiṣṭhā and madhuyaṣṭikā each 10 gm– with these oil 160 ml is cooked on mild fire with double quantity of goat's milk. It improves facial lustre and removes nīlikā, piḍakā and vyaṅga by anointment in a week. This kuṅkumādya taila is formulated by Aśvins in early days. [72-74]

सप्तत्रिंशाङ्गं कुङ्कुमाद्यं तैलम्

कुङ्कुमं किंशुकं लाक्षा मञ्जिष्ठा रक्तचन्दनम्। कालीयकं पद्मकञ्च मातुलुङ्गं सकेशरम्॥ ७५॥
कुसुम्भं मधुयष्टीकं फलिनी मदयन्तिका। निशे द्वे रोचना पद्ममुत्पलञ्च मनःशिला॥ ७६॥
काकोल्यादिसमायुक्तैरेतैरक्षसमैर्भिषक्। लाक्षारसपयोभ्याञ्च तैलप्रस्थं विपाचयेत्॥ ७७॥
कुङ्कुमाद्यमिदं तैलञ्चाभ्यङ्गात् काञ्चनोपमम्। करोति वदनं सम्यक् पुष्टिलावण्यकातिदम्॥
सौभाग्यलक्ष्मीजननं वशीकरणमुत्तमम्॥ ७८॥

Saptatriṃśāṅga kuṅkumādya taila

Oil 640 ml is cooked with (the paste of) kuṅkuma, kiṃśuka, lākṣā, mañjiṣṭhā, rakta candana, kālīyaka, padmaka, mātuluṅga (root and fruit pieces), kusumbha, madhuyaṣṭī, priyaṅgu, madayantī, haridrā, dāruharidrā, gorocana, lotus, nītopala, realgar and drugs of kākolyādi gaṇa each 10 gm along with lac-juice and milk. This kuṅkumādya taila, by anointment, promotes beauty, lustre and development of face and makes it charming. [75-78]

वर्णकं घृतम्

मधुकं चन्दनं कङ्गुः सर्षपं पद्मकं तथा। कालीयकं हरिद्रा च लोध्रमेभिश्च कल्कितः॥ ७९॥
विपचेद्धि घृतं वैद्यस्तत्पक्वं वस्त्रगालितम्। पादांशं कुङ्कुमं सिक्थं क्षिप्त्वा मन्दानले पचेत्॥ ८०॥
तत् सिद्धं शिशिरे नीरे प्रक्षिप्याकर्षयेत्ततः। तदेतद्वर्णकं नाम घृतं वर्णप्रसादनम्॥ ८१॥
अनेनाभ्यासलिप्तं हि वलीपलितनाशनम्। निष्कलङ्केन्दुबिम्बाभं स्याद्विलासवतीमुखम्॥ ८२॥

Varṇaka ghṛta

Madhuka, candana, priyaṅgu, sarṣapa, padmaka, kāleyaka, haridrā and lodhra– with (the paste of) these ghee is cooked and strained though cloth-piece. Now kuṅkuma and bee-wax are added thereto and again cooked on mild fire. After completion, the vessel is kept in (cold) water till it is cooled and then taken out. This varṇaka ghṛta improves lustre and alleviates wrinkles and greying of hair by regular use. [79-82]

अरुंषिका-चिकित्सा

अरुंषिकायां रुधिरेऽवसिक्ते शिराव्यधेनाथ जलौकसा वा।
निम्बाम्बुसिक्ते शिरसि प्रलेपो देयोऽश्ववर्चोरससैन्धवाभ्याम् ॥ ८३ ॥
पुराणमपि पिण्याकं पुरीषं कुक्कुटस्य वा। मूत्रपिष्टं प्रलेपोऽयं शीघ्रं हन्यादरुंषिकाम् ॥ ८४ ॥
अरुंषिघ्नं भृष्टकुष्ठचूर्णं तैलेन संयुतम् ॥ ८५ ॥

Arumṣikā (vesicles on scalp)

In arumsikā blood-letting should be done by venesection or leeching and the part should be irrigated with nimba decoction followed by covering with the paste of horse's liquid faeces and rocksalt.

Old oil-cake or cock's faeces pounded with urine is pasted over the part. It destroys arūmṣikā quickly.

Powder of fried kuṣṭha mixed with oil destroys arūmṣikā. [83-85]

हरिद्राद्वयाद्यं तैलम्

हरिद्राद्वयभूनिम्बत्रिफलाऽरिष्टचन्दनैः। एतत् तैलमरुंषीणां सिद्धमभ्यञ्जने हितम् ॥ ८६ ॥

Haridrādvayādya taila

Haridrādvaya (haridrā and dāruharidrā), kirātatikta, triphalā, nimba and candana– oil cooked with these is useful as anointment in arūmṣikā. [86]

दारुणक-चिकित्सा

दारुणे तु शिरां विध्येत् स्निग्धां स्विन्नां ललाटजाम्। अवपीडाञ्छिरोवस्तीनभ्यङ्गांश्चावचारयेत् ॥ ८७ ॥
कोद्रवाणां तृणक्षारपानीयं परिधावने ॥ ८८ ॥
कार्य्यो दारुणके मूर्ध्नि प्रलेपो मधुसंयुतः। पियालबीजमधुककुष्ठमिश्रैः ससैन्धवैः ॥ ८९ ॥
काञ्जिकस्थाः त्रिसप्ताहं माषा दारुणकापहाः ॥ ९० ॥
सह नीलोत्पलकेशरयष्टीमधुक तिलैः सदृशमामलकम्। चिरजातमपि च शीर्षे दारुणरोगं शमं नयति ॥ ९१ ॥

Daruṇaka (dandruff)

In dāruṇa, vein of the forehead should be punctured after proper unction and fomentation. Moreover, avapīḍa (snuffing of expressed juice), śirovasti and oily massage should be applied. The part should be washed with alkali of kodo stalks. Besides, piyāla (seed

madhuka, kuṣṭha and saindhava mixed with honey should be applied as paste on the scalp.

Grains of black gram dipped in sour gruel for three weeks destroy dāruṇaka.

Nīlotpala, nāgakeśara, madhuyaṣṭī and tila each 1 part and āmalaka 4 parts– this paste destroys dāruṇaka in head even if severe. [87-91]

त्रिफलाद्यं तैलम्

त्रिफलाया रजो मांसी मार्कवोत्पलशारिवैः। ससैन्धवैः पचेत्तैलमभ्यङ्गादुक्थिकां जयेत्॥ ९२॥

Triphalādya taila

Triphalā, māṃsī, bhṛṅgarāja, sārivā and rocksalt– with the paste of these oil is cooked. Anointment with this destroys ukthikā (dāruṇaka). [92]

चित्रकाद्यं तैलम्

चित्रकं दन्तिमूलञ्च कोशातकीसमन्वितम्। कल्कं पिष्ट्वा पचेत्तैलं केशदद्रुविनाशनम्॥ ९३॥

Citrakādya taila

Oil is cooked with the paste of citraka, dantī (root) and kośātakī. It destroys keśa-dadru. [93]

गुञ्जाद्यं तैलम्

गुञ्जाफलैः शृतं तैलं भृङ्गराजरसेन तु। कण्डूदारुणहृत् कुष्ठकपालव्याधिनाशनम्॥ ९४॥

Guñjādya taila

Oil cooked with (the paste of) guñjā seeds along with bhṛṅgarāja juice destroys itching, dāruṇaka, kuṣṭha and diseases of scalp. [94]

भृङ्गराजाद्यं तैलम्

भृङ्गरजस्त्रिफलोत्पलशारि लौहपुरीषसमन्वितकारि। तैलमिदं पच दारुणहारि कुञ्चितकेशघनस्थिरकारि॥

Bhṛṅgarāja-taila

Oil cooked with bhṛṅgarāja juice and (the paste of) triphalā, nīlotpala, sārivā and slag of iron destroys dāruṇaka and makes the hairs curled, dense and firm. [95]

प्रपौण्डरीकाद्यं तैलम्

प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः। कार्षिकैस्तैलकुडवं तैर्द्विरामलकीरसः॥
साध्यः सप्रतिमर्षः स्यात् सर्वशीर्षगदापहः॥ ९६॥

Prapauṇḍarīkādya taila

Prapauṇḍarīka, madhuka, pippalī, candana and nīlotpala each 10 gm– with (the paste of) these oil 160 ml. is cooked along with the double quantity of āmalakī juice. This should be used as snuff which destroys all diseases of head. [96]

इन्द्रलुप्तचिकित्सा

मालत्याद्यं तैलम्

मालतीकरवीराग्निनक्तमालविपाचितम्। तैलमभ्यञ्जने शस्तमिन्द्रलुप्तापहं परम्॥
इदं हि त्वरितं हन्ति दारुणं नियतं नृणाम्॥ ९७॥

Alopecia

Mālatyādya taila

Mālatī (jātī), karavīra, citraka and karañja– oil cooked with these and used as anointment is an excellent remedy for indralupta quick and positive. [97]

धात्र्याम्रमज्जलेपात् स्यात् स्थिरता स्निग्धकेशता॥ ९८॥
इन्द्रलुप्ते शिरां विद्ध्वा शिलाकाशीशतुत्थकैः। लेपयेत् परितः कल्कैस्तैलञ्चाभ्यञ्जने हितम्॥
कुटन्नटशिखीजातीकरञ्जकरवीरजैः॥ ९९॥
अवगाढपदञ्चैव प्रच्छयित्वा पुनः पुनः। गुञ्जाफलैश्चिरं लिम्पेत् केशभूमिं समन्ततः॥१००॥
हस्तिदन्तमसीं कृत्वा मुख्यञ्चैव रसाञ्जनम्। लोमान्यनेन जायन्ते नृणां पाणितलेष्वपि॥१०१॥
भल्लातकबृहतीफलगुञ्जामूलफलेभ्य एकेन। मधुसहितेन विलिप्तं सुरपतिलुप्तं शमं याति॥१०२॥
बृहतीफलरसपिष्टं गुञ्जाफलमूलञ्चेन्द्रलुप्तस्य। कनकनिघृष्टस्य सतो दातव्यं प्रच्छितस्य सदा॥१०३॥
घृष्टस्य कर्कशैः पत्रैरिन्द्रलुप्तस्य गुण्डनम्। चूर्णितैर्मरिचैः कार्य्यमिन्द्रलुप्तविनाशनम्॥१०४॥
छागक्षीररसाञ्जनपुटदग्धगजेन्द्रदन्तमसीलिप्ताः। जायन्ते सप्तरात्रात् खल्ल्यामपि कुञ्चिताश्चिकुराः॥१०५॥
मधुकेन्दीवरमूर्वातिलाज्यगोक्षीरभृङ्गलेपेन। अचिराद्भवन्ति केशा घनदृढमूलायतानृजवः॥१०६॥

By applying the paste of āmalakī and seed-kernel of mango hairs become fine and glossy.

In indralupta, after venesection the paste of realgar, kāsīsa and tuttha should be applied and the oil cooked with the paste of kaivartamustaka, citraka, jātī, karañja and karavīra should be anointed.

The scalp should be scarified deeply and pasted frequently with the (pulp of guñjā seeds).

The ash of elephant tusk and natural raśañjana are applied to the part. By this hairs appear even on palm.

Bhallātaka, bṛhatī (fruit) and guñjā (root and seeds)– any of these mixed with honey is applied by which indralupta is removed.

The part is scarified and rubbed with (the root of) dhattūra followed by the application of guñjā (root and seed) pounded with the juice of bṛhatī fruit.

After rubbing the part with rough leaves, the powder of marica should be dusted thereon. It destroys indralupta.

Rasāñjana and ash of elephant tusk prepared by closed heating and mixed with goat's milk are pasted over the part for a week. It restores the hair to normal condition.

Madhuka, nīlotpalal, mūrvā, tila and bhṛṅgarāja mixed with ghee and cow's milk are applied. By this hairs appear dense, fine and curled. [98-106]

स्नुह्याद्यं तैलम्

स्नुहीपय: पयोऽर्कस्य मार्कवो लाङ्गलीविषम्। मूत्रमाजं सगोमूत्रं रक्तिका सेन्द्रवारुणी ॥१०७॥
सिद्धार्थं तीक्ष्णतैलञ्च गर्भं दत्त्वा विपाचितम्। वह्निना मृदुना पक्वं तैलं खालित्यनाशनम् ॥१०८॥
कूर्मपृष्ठसमानापि रूक्षा या रोमतस्करी। दिग्धा साऽनेन जायेत ऋक्षशारीव लोमशी ॥१०९॥

Snuhyādya taila

Latex of snuhī and arka, bhṛṅgarāja, kalihārī, urine of goat and cow, guñjā, indravāruṇī, yellow mustard and red mustard– with the paste of these oil is cooked on mild fire. It destroys alopecia and regenerates hairs. [107-109]

आदित्यपाकगुडूचीतैलम्

वटावरोहकेशिन्योश्चूर्णेनादित्यपाचितम्। गुडूचीस्वरसे तैलञ्चाभ्यङ्गात् केशरोपणम् ॥११०॥

Ādityapāka guḍūcītaila

Oil added with the powder of vaṭa (hanging root), bhūtakeśī and the juice of guḍūcī in the sun regenerates hairs by anointment. [110]

चन्दनाद्यं तैलम्

चन्दनं मधुकं मूर्वा त्रिफला नीलमुत्पलम्। कान्ता वटावरोहश्च गुडूची बिसमेव च ॥१११॥
लौहचूर्णं तथा केशी शारिवे द्वे तथैव च। मार्कवस्वरसेनैव तैलं मृद्वग्निना पचेत् ॥११२॥
शिरस्युत्पतिता केशा जायन्ते घनकुञ्चिता:। दृढमूलाश्च स्निग्धाश्च तथा भ्रमरसंन्निभा: ॥
नस्येनाकालपलितं निहन्यात्तैलमुत्तमम् ॥११३॥

Candanādya taila

Candana, madhuka, mūrvā, triphalā, nīlotpala, priyaṅgu, vaṭa (hanging root), guḍūcī, lotus-stem, iron-powder, bhūtakeśī, sārivā and kṛṣṇa sārivā– with the paste of these oil is cooked along with bhṛṅgarāja juice on mild fire. It regenerates hairs and make them dense, firm, glossy, black and curled. By snuffing it alleviates premature greying of hairs. [111-113]

यष्टीमधुकाद्यं तैलम्

तैलं सयष्टिमधुकै: क्षीरे धात्रीफलै: शृतम्। नस्ये दत्तं जनयति केशाञ्श्मश्रूणि चाप्यथ ॥११४॥

Yaṣṭimadhukādya taila

Oil cooked with yaṣṭimadhu and āmalaka along with milk and used as snuff regenerates hairs, beards and moustaches. [114]

पलित-चिकित्सा

त्रिफला नीलिनीपत्रं लौहभृङ्गरज: समम्। अविमूत्रेण संयुक्तं कृष्णीकरणमुत्तमम् ॥११५॥

त्रिफलाचूर्णसंयुक्तं लौहचूर्णं विनिक्षिपेत्। ईषत्पक्वे नारिकेले भृङ्गराजरसान्विते॥११६॥
मासमेकन्तु निक्षिप्य सम्यग्गर्भात् समुद्धरेत्। ततः शिरो मुण्डयित्वा लेपं दद्याद्भिषग्वरः॥११७॥
संवेष्ट्य कदलीपत्रैर्मोचयेत् सप्तमे दिने। क्षालयेत् त्रिफलाक्वाथैः क्षीरमांसरसाशिनः॥
कपालरञ्जनञ्चैतत् कृष्णीकरणमुत्तमम्॥११८॥
उत्पलं पयसा सार्द्धं मासं भूमौ निधापयेत्। केशानां कृष्णीकरणं स्नेहनञ्च विधीयते॥११९॥
भृङ्गपुष्पं जवापुष्पं मेषीदुग्धप्रपेषितम्। तेनैवालोडितं लौहपात्रस्थं भूम्यधःकृतम्॥१२०॥
सप्ताहादुद्धृतं पश्चाद् भृङ्गराजरसेन तु। आलोड्याभ्यज्य च शिरो वेष्टयित्वा वसेन्निशाम्॥
प्रातस्तु क्षालनं कार्य्यमेवं स्यान्मूर्द्धरञ्जनम्॥१२१॥
एवं सिन्दूरबालाम्रशङ्खभृङ्गरसैः क्रिया॥१२२॥
नरदुग्धशङ्खचूर्णं काञ्जिकसिक्तं हि सीसकं घृष्ट्वा। लेपात् कचमर्कदलानद्धं शुभ्रं करोति नीलतरम्॥१२३॥

लौहमलाद्युद्वर्त्तनम्

लौहमलामलकल्कैः सजवाकुसुमैर्नरः सदा स्नायी। पलितानीह न पश्यति गङ्गास्नायीव नरकानि॥१२४॥

Palita (greying of hairs)

Triphalā, nīlinī (leaves), iron powder and bhṛṁgarāja– all together mixed with sheep urine make a good blackening agent.

Lauha powder mixed with triphalā powder and bhṛngarāja juice is put within a slightly ripe coconut and kept for a month. Then it is taken out, pasted on the scalp after removing the hairs completely and covered with banana leaves. After a week it is removed and the part is washed with triphalā decoction.

During the period, the patient should keep on the diet of milk or meat soup. It is a good blackening measure.

Nīlotpala along with milk should be kept (in an iron vessel) under the ground for a month. By this hairs are blackened and glistened.

Flowers of bhṛṁgarāja and japā pounded with sheep milk and dipped in the same are kept in an iron vessel under the ground for a week. Thereafter it is taken out and mixed with bhṛṅgarāja juice which is also put on the scalp. Now after applying the paste on the head it should be bandaged for the whole night. In the morning, it should be washed. By this scalp is blackened.

The same procedure is adopted in cases of sindūra, tender mango (seed) and śaṅkhanābhi mixed with bhṛṅgarāja juice.

Lead sprinkled with sour gruel is rubbed and mixed with śaṅkhabhasma. This is pasted on scalp and covered with arka leaves. It blackens the white hairs.

One who takes bath after applying the paste of iron-slag, āmalakī and japā flowers becomes free from greying of hairs like one bathing in ganga from hell. [115-124]

भावितनिम्बतैलम्

निम्बस्य बीजानि हि भावितानि भृङ्गस्य तोयेन तथाऽशनस्य।
तैलन्तु तेषां विनिहन्ति नस्याद्दुग्धान्नभोक्तुः पलितं समूलम्॥१२५॥

Bhāvita nimbataila

Oil expressed of the nimba seeds and impregnated with decoction of bhṛṅgarāja and bījaka eradicates palita by snuffing while keeping on the diet of milk and cereals. [125]

अभावितनिम्बतैलम्

निम्बस्य तैलं प्रकृतिस्थमेव नस्ये निषिक्तं विधिना यथावत्।
मासेन गोक्षीरभुजो नरस्य जराऽग्रदूतं पलितं निहन्ति॥१२६॥

Abhāvita nimbataila

Even the simple nimba-taila taken by snuff regularly for a month keeping on diet of cow's milk destroys palita, the messenger of old age. [126]

मधुकतैलम्

क्षीरात् समार्कवरसाद् द्विप्रस्थे मधुकात् पले। तैलस्य कुडवं पक्वं तन्नस्यं पलितापहम्॥१२७॥

Madhuka-taila

Oil 160 ml cooked with milk and bhṛṅgarāja juice 1.28 litre along with (the paste of) madhuka 40 gm destroys palita by snuffing. [127]

महानीलतैलम्

आदित्यवल्ल्या मूलानि कृष्णशैरीयकस्य च। सुरसस्य च पत्राणि फलं कृष्णशणस्य च॥१२८॥
मार्कवं काकमाची च मधुकं देवदारु च। पृथग्दशपलांशानि पिप्पल्यस्त्रिफलाऽञ्जनम्॥१२९॥
प्रपौण्डरीकं मञ्जिष्ठा लोध्रं कृष्णागुरूत्पलम्। आम्रास्थि कर्दमः कृष्णो मृणाली रक्तचन्दनम्॥१३०॥
नीली भल्लातकास्थीनि काशीशं मदयन्तिका। सोमराज्यशनः शस्त्रं कृष्णौ पिण्डीतचित्रकौ॥१३१॥
पुष्पाण्यर्जुनकाश्मर्य्योश्चाम्रजम्बूफलानि च। पृथक् पञ्चपलैर्भागैः सुपिष्टैराढकं पचेत्॥१३२॥
वैभीतकस्य तैलस्य धात्रीरसचतुर्गुणम्। कुर्य्यादादित्यपाकं वा यावच्छुष्को भवेद्रसः॥१३३॥
लौहपात्रे ततः पूतं संशुद्धमुपयोजयेत्। पाने नस्तक्रियायाञ्च शिरोऽभ्यङ्गे तथैव च॥१३४॥
एतच्चक्षुष्यमायुष्यं शिरसः सर्वरोगनुत्। महानीलमिति ख्यातं पलितघ्नमनुत्तमम्॥१३५॥

Mahānīla taila

Root of Ādityavallī (sūryāvarta) and black saireyaka, surasā (leaves), black śaṇa, bhṛṅgarāja, kākamācī, madhuka and devadāru each 400 gm, pippalī, triphalā, añjana, prapauṇḍarīka, mañjiṣṭhā, lodhra, kṛṣṇāguru, nīlotpala, mango (seed), black mud, lotus stalk, rakta candana, nīlī, bhallātaka (nuts), kāsīsa, madhuyaṣṭī, somarājī, bījaka, lauha powder, black variety of madana and citraka, flowers of arjuna and gambhārī, fruits of āmra and jambū each 200 gm– with the paste of these bibhītaka oil 2.56 litre is cooked

in the sun along with four times juice of āmalakī in an iron vessel till the liquid is dried up. Then it is strained and used as intake, snuff and head-anointment. This mahānīla taila is excellent remedy for palita. Besides, it promotes eye-sight, longevity and alleviates all diseases of head. [128-135]

भृङ्गराजघृतम्

भृङ्गराजरसे पक्वं शिखिपित्तेन कल्कितम्। घृतं नस्येन पलितं हन्यात् सप्ताहयोगतः ॥१३६॥

Bhṛṅgarāja-ghṛta

Ghee cooked with bhṛṅgarāja juice along with peacock's bile destroys, by snuffing, palita in a week. [136]

शेलुतैलम्

काञ्जीपिष्टशेलुफलमज्जि सच्छिद्रलौहगे। यदर्कतापात् पतति तैलं तन्नस्यम्रक्षणात् ॥१३७॥
केशा नीलालिसङ्काशाः सद्यः स्निग्धा भवन्ति च। नयनश्रवणग्रीवादन्तरोगांश्च हन्त्यदः ॥१३८॥

Śelutaila

The seed-marrow of śelu (śleṣmātaka) pounded with sour gruel is put in an iron vessel having numerous holes and heated in the sun. The oil coming out of the holes is collected in a container and used as snuff and anointment. By this hairs become black and strong. Moreover, it destroys diseases of eyes, ears, neck and teeth. [137-138]

काशीशादिलेपः

काशीशं रोचना तुत्थं हरितालं रसाञ्जनम्। अम्लपिष्टैः प्रलेपोऽयं वृषकच्छ्वहिपूतयोः ॥१३९॥

Vṛṣaṇakacchū and ahipūtanā

Kāsīsa, gorocana, tuttha, orpiment and rasāñjana– these pounded with sour gruel are used as paste in scabies of scrotum and ahipūtanā. [139]

पटोलाद्यं घृतम्

पटोलपत्रत्रिफलारसाञ्जनविपाचितम्। पीतं घृतं निहन्त्याशु कृच्छ्रामप्यहिपूतनाम् ॥१४०॥

Paṭolādya ghṛta

Paṭola (leaves), triphalā and rasāñjana– ghee cooked with these and used as intake destroys ahipūtanā, even if severe. [140]

वराहदंष्ट्रा-चिकित्सा

रजनीमार्कवमूलं पिष्टं शीतेन वारिणा तुल्यम्। हन्ति विसर्पं लेपाद् वराहदशनाह्वयं घोरम् ॥१४१॥

Varāhadaṃṣṭrā

Haridrā and bhṛṅgarāja (root) in equal quantity, pounded together with cold water destroy visarpa and varāhadaṃṣṭrā by using as paste. [141]

पाददाहादौ योग:

नागकेशरचूर्णं वा शतधौतेन सर्पिषा। पिष्ट्वा लेपो विधातव्यो दाहे हर्षे च पादयो: ॥१४२॥

Pādadāha-Pādaharṣa

In burning sensation and tingling in feet, nāgakeśara powder mixed with ghee washed hundred times is used as paste. [142]

॥ इति क्षुद्ररोगचिकित्सा ॥ ५५ ॥

Thus ends treatment of kṣudraroga. [55]

५६. षट्पञ्चाशोऽध्याय:

CHAPTER LVI

मुखरोग-चिकित्सा

Treatment of Mukharoga (diseases of mouth)

१. ओष्ठरोग-चिकित्सा

वातजे क्रियासूत्रम्

ओष्ठप्रकोपे वातोत्थे शाल्वणेनोपनाहनम्। मस्तिष्के चैव नस्ये च तैलं वातहरैः शृतम्॥
स्वेदोऽभ्यङ्गः स्नेहपानं रसायनमिहेष्यते॥ १॥

1. Oṣṭha-roga (diseases of lips)

In diseases of lips caused by vāta, poultice with śālvaṇa, śirovasti and snuffing with oil cooked with vāta-alleviating drugs, fomentation, anointment, intake of sneha (fatty material) and rasāñjana are prescribed. [1]

श्रीवेष्टकादिप्रतिसारणम्

श्रीवेष्टकं सर्जरसं गुग्गुलुं सुरदारु च। यष्टीमधुकचूर्णञ्च विदध्यात् प्रतिसारणम्॥ २॥

Śrīveṣṭakādi pratisāraṇa

Śrīveṣṭaka, sarjarasa, guggulu, devadāru and yaṣṭimadhu—this powder should be applied locally. [2]

पित्तजे चिकित्साक्रमः

वेधं शिराणां वमनं विरेकं तिक्तस्य पानं रसभोजनञ्च।
शीतान् प्रलेपान् परिषेचनञ्च पित्तोपसृष्टेष्वधरेषु कुर्य्यात्॥ ३॥

In the lips affected by pitta, venesection, emesis, purgation, intake of bitter (ghṛtas), diet of meat-soup, cold paste and sprinkling are recommended. [3]

जलौकाप्रयोगः

पित्तरक्ताभिघातोत्थाञ्जलौकाभिरुपाचरेत्। पित्तविद्रधिवच्चापि क्रियां कुर्यादशेषतः॥ ४॥

In disorders caused by pitta, rakta and injury leeches should be applied and all measures as prescribed for paittika vidradhi should be adopted. [4]

कफजे चिकित्साक्रमः

शिरोविरेचनं धूमः स्वेदः कवलधारणम्। हते रक्ते प्रयोक्तव्यमोष्ठकोपे कफात्मके॥ ५॥

त्रिकट्वादिप्रतिसारणम्

त्रिकटु स्वर्जिकाक्षारः क्षारश्च यवशूकजः। क्षौद्रयुक्तं विधातव्यमेतच्च प्रतिसारणम्॥ ६॥

In diseases of lips caused by kapha, after blood-letting head-evacuaation, smoking, fomentation and gargles are prescribed. Moreover, trikaṭu, svarjikṣāra, and yavakṣāra mixed with honey should be applied locally. [5-6]

मेदोजे चिकित्साक्रम:

मेदोजे स्वेदिते भिन्ने शोधिते ज्वलनो हित: ॥ ७ ॥

प्रियङ्ग्वादिप्रतिसारणं त्रिफलालेपश्च

प्रियंगुत्रिफलालोध्रं सक्षौद्रं प्रतिसारणम्। हितश्च त्रिफलाचूर्णं मधुयुक्तं प्रलेपनम्॥ ८॥

In that caused by medas, fomentation is done then it is incised and cleaned followed by cauterization. Besides, (1) Priyaṅgu, triphalā and lodhra mixed with honey or (2) triphalā powder with honey should be applied as paste. [7-8]

सर्जरसादिलेप:

सर्जरसकनकगैरिकधन्याकतैलघृतसिन्धुसंयुक्तम्। सिद्धं सिक्थकमधरे स्फुटितोच्चटिते व्रणं हरति॥ ९॥

Sarjarasādi lepa

Sarjarasa, svarṇagairika, dhānyaka, oil, ghee, rocksalt and bee-wax– all these together are slightly heated and made into ointment. It is applied in cracking of lips. [9]

। इत्योष्ठरोगचिकित्सा।

Thus ends treatment of oṣṭharoga.

२. दन्तमूलरोग-चिकित्सा

2. Dantamūla-roga (diseases of gums)

नागरादिगण्डूष:

शीतादे हृतरक्ते तु तोये नागरसर्षपान्। नि:क्वाथ्य त्रिफलाश्चापि कुर्याद्गण्डूषधारणम्॥ १०॥

Nāgarādi gaṇḍūṣa

In śītāda after blood-letting gargle should be done with the decoction of nāgara (śuṇṭhī), sarṣapa and triphalā. [10]

प्रियङ्ग्वादिलेप:

प्रियङ्गवश्च मुस्ता च त्रिफला च प्रलेपनम्॥ ११॥

Besides, paste of priyaṅgu, musta and triphalā should be applied. [11]

कुष्ठादिचूर्णम्

कुष्ठं धात्री लोध्रमब्दं समङ्गा पाठा तिक्ता तेजनी पीतिका च।
चूर्णं शस्तं घर्षणं तद् द्विजानां रक्तस्रावं हन्ति कण्डूं रुजाश्च॥ १२॥

Kuṣṭhādi cūrṇa

Kuṣṭha, āmalaki, lodhra, musta, samaṅgā, pāṭhā, kaṭukā, tejovatī and haridrā– this powder should be rubbed on teeth (and gums). It allays bleeding, itching and pain. [12]

दन्तचाल-चिकित्सा

चलदन्तस्थिरकरं कार्यं बकुलचर्वणम्। आर्त्तगलदलक्वाथगण्डूषो दन्तचालनुत्॥ १३॥
दन्तचाले हितं श्रेष्ठं तिलोग्राचर्वणं सदा॥ १४॥

Chewing of bakula makes moving (and loose) teeth firm. Similarly acts gargle with the decoction of ārtagala leaves. [13]

In moving teeth, regular chewing of sesamum and vacā is beneficial. [14]

दन्तपुप्पुटक-चिकित्सा

दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम्। सपञ्चलवणक्षारः सक्षौद्रः प्रतिसारणम्॥ १५॥

In acute dantapuppuṭaka (gum-boil), blood-letting should be done followed by paste of five salts and yavakṣāra mixed with honey. [15]

कवलगण्डूषौ

दन्तानां तोदहर्षे च वातघ्नाः कवला हिताः। दन्तचाले तु गण्डूषो बकुलत्वक्कृतो हितः॥ १६॥

In case of piercing pain and tingling sensation in teeth, gargles with vāta-alleviating drugs are useful. In dantacāla, gargle with bakula bark is beneficial. [16]

माक्षिकादिः

माक्षिकं पिप्पलीसर्पिर्मिश्रितं धारयेन्मुखे। दन्तशूलहरं प्रोक्तं प्रधानमिदमौषधम्॥ १७॥

Mākṣikādi

Mākṣika (honey) mixed with pippalī powder and ghee is kept in mouth. It is the chief remedy for toothache. [17]

लोध्रादिप्रतिसारणम्

विस्राविते दन्तवेष्टे व्रणन्तु प्रतिसारयेत्। लोध्रपत्तङ्गमधुकलाक्षाचूर्णैर्मधूत्तरैः॥ १८॥

Lodhrādi

In dantaveṣṭa, after removal of blood, paste of lodhra, pattaṅga, madhuka and lākṣā mixed with honey should be applied to the wound. [18]

क्षीरिगण्डूषः

गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः॥ १९॥

For gargle (decoction of) kṣīrī vṛkṣa mixed with honey, ghee and sugar should be used. [19]

लोध्रादिलेपः

शौषिरे हृतरक्ते तु लोध्रमुस्तारसाञ्जनैः। सक्षौद्रैः शस्यते लेपो, गण्डूषे क्षीरिणो हिताः॥ २०॥

Lodhrādi lepa

In śauṣira, after blood-letting, paste of lodhra, musta and rasāñjana mixed with honey should be applied in addition to the gargle with kṣīrī vṛkṣa. [20]

परिदर-उपकुश-चिकित्सा

क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षणः। संशोध्योभयतः कायं शिरश्चोपकुशे ततः॥ २१॥
काकोदुम्बरिकागोजीपत्रैर्विस्रावयेद्भिषक्। क्षौद्रयुक्तैश्च लवणैः सव्योषैः प्रतिसारयेत्॥ २२॥

In paridara, after purifying the body from both ends (emesis and purgation) and also the head, measures as prescribed in śītāda should be adopted. [21]

In upakuśa (gingivitis) thereafter (after emesis, purgation and head-evacuation) bleeding should be induced (by rubbing) with the leaves of kākodumbara and gojī (śākhoṭaka) and then paste of trikaṭu and five salts mixed with honey should be applied. [22]

पिप्पल्यादिकवलः

पिप्पल्यः सर्षपाः श्वेताः नागरं नैचुलं फलम्। सुखोदकेन संगृह्य कवलं तस्य योजयेत्॥ २३॥

Pippalyādi kavala

Pippalī, white mustard, śuṇṭhī and nicula fruits– these mixed with warm water should be used as gargle. [23]

दन्तवैदर्भ-चिकित्सा

शस्त्रेण दन्तवैदर्भे दन्तमूलानि शोधयेत्। ततः क्षारं प्रयुञ्जीत क्रियाः सर्वाश्च शीतलाः॥ २४॥

In dantavaidarbha, the root of the teeth should be cleaned (by excising the sloughened tissue) with knife. Then alkali should be applied along with other cold measures. [24]

अधिदन्त-चिकित्सा

उद्धृत्याधिकदन्तन्तु ततोऽग्निमवचारयेत्। क्रिमिदन्तकवच्चात्र विधिः कार्यो विजानता॥ २५॥

Adhidanta (extra tooth) should be extracted and then cauterized. Moreover, the measures as prescribed in krimidanta should be adopted. [25]

पाठादिचूर्णम्

छित्त्वाऽधिमांसं सक्षौद्रैरेतैश्चूर्णैरुपाचरेत्। पाठावचातेजोवतीस्वर्जिकायावशूकजैः॥ २६॥

Pāṭhādi cūrṇa

In adhimāmsa, after excising it, the powder of pāṭhā, vacā, tejovatī, sarjikā and yavakṣāra mixed with honey should be applied. [26]

कवलादियोगा:

क्षौद्रद्वितीयाः पिप्पल्यः कवलश्चात्र कीर्त्तितः। पटोलनिम्बत्रिफलाकषायश्चात्र धावने।
शिरोविरेकश्च हितो धूमो वैरेचनश्च यः ॥ २७॥

Besides, gargle with pippalī mixed with honey, washing with decoction of paṭola, nimba and triphalā, head– evacuation and evacucative smoking are useful in adhimāṃsa. [27]

दन्तनाडी-चिकित्सा

नाडीव्रणहरं कर्म दन्तनाडीषु कारयेत्। यं दन्तमधिजायेत नाडी तं दन्तमुद्धरेत्॥ २८॥
छित्त्वाऽधिमांसं शस्त्रेण यदि नोपरिजो भवेत्। शोधयित्वा दहेच्चापि क्षारेण ज्वलनेन वा॥ २९॥
गतिर्हिनस्ति हन्वस्थि दशने समुपेक्षिते। तस्मात् समूलं दशनमुद्धरेद् भग्नमस्थि च॥ ३०॥

In dantanāḍī (dental sinus) measures applicable in nāḍivraṇa (sinus) should be followed. Moreover, the teeth affected with sinus should be extracted. [28]

The growth should be excised, except in upper part, with knife and after cleaning should be cauterized with alkali or fire. [29]

The sinus, if ignored, affects jaw-bone. Hence the tooth along with root as well as the affected bone should be removed. [30]

उत्तरदन्तोद्धरणे दोष:

उद्धृते तूत्तरे दन्ते शोणितं सम्प्रसिच्यते। रक्ताभियोगात् पूर्वोक्ता घोरा रोगा भवन्ति च॥
चलमप्युत्तरं दन्तमतो नापहरेद्भिषक्॥ ३१॥

On extraction of the upper tooth haemorrhage occurs and due to execessive loss of blood the aforersaid severe diseases arise. Moreover, the upper tooth is also unstable. Hence one should not extract it. [31]

जात्यादिक्वाथ:-लोध्रादितैलम्

कषायं जातीमदनकटुकास्वादुकण्टकैः। लोध्रखदिरमञ्जिष्ठायष्ट्याह्वैश्चापि यत् कृतम्॥
तैलं संशोधनं तद्धि हन्याद्दन्तगतां गतिम्॥ ३२॥
कषायं परतः कृत्वा पिष्ट्वा लोध्रादिकल्कितम्। कण्टकी मदनो योज्यः स्वादुकण्टो विकङ्कतः॥ ३३॥

Jatyādi kvātha-Lodhrādi taila

The decoction of jāti, madana, kaṭukā and svādukaṇṭaka (vikankata) should be used as mouth-wash. Besides, with this decoction purificatory oil is cooked along with the paste of lodhra, khadira, mañjiṣṭhā and madhuyaṣṭī which destroys dental sinus. In the above decoction the paste of lodhra etc is mixed. Here madana is taken spiny and svadukantaka is vikaṅkata. [32-33]

। इति दन्तमूलरोग-चिकित्सा।

Thus ends treatment of the diseases of dantamūla.

२ (क) दन्तरोग-चिकित्सा

2 (a). Danta-roga (diseases of teeth)

दन्तहर्ष-चिकित्सा

सुखोष्णाः स्नेहकवलाः सर्पिषस्त्रैवृतस्य वा। निर्य्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः॥
स्नैहिकश्च हितो धूमो नस्यं स्नैहिकमेव च॥ ३४॥

Tepid gargles of fats or trivṛt-ghṛta or decoction of vāta-alleviating drugs allay danta-harṣa (tingling sensation in teeth). Besides, unctuous smoking and snuffing are also useful. [34]

दन्तशर्करा-चिकित्सा

अहिंसन् दन्तमूलानि शर्करामुद्धरेद्भिषक्। लाक्षाचूर्णैर्मधुयुतैस्ततस्तां प्रतिसारयेत्॥
दन्तहर्षक्रियाश्चापि कुर्य्यान्निरवशेषतः॥ ३५॥
कपालिका कृच्छ्रसाध्या तत्राप्येषा क्रिया हिता॥ ३६॥

Danta-śarkarā (tartar of teeth) should be scraped out avoiding injury to the root of teeth (including gums) followed by application of the paste of lākṣā powder mixed with honey. Moreover, the measures prescribed for dantaharṣa should be adopted fully. [35]

Kapālikā is curable with difficulty, there too this therapy is useful. [36]

क्रिमिदन्त-चिकित्सा

जयेद्विस्रावणैः स्विन्नमचलं क्रिमिदन्तकम्। तथाऽवपीडैर्वातघ्नैः स्नेहगण्डूषधारणैः॥
भद्रदार्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः॥ ३७॥
हिङ्गु सोष्णन्तु मतिमान् क्रिमिदन्तेषु दापयेत्॥ ३८॥

Krimidanta (pyorrhoea or caries) which is incurable should be treated with blood-letting preceded by fomentation. Moreover, snuffing with expressed juice of vāta-alleviating drugs and punarnavā and unctuous die⁺ are wholesome. [37]

Slightly heated asafoetida should also be applied iin such cases. [38]

बृहत्यादिगण्डूषः

बृहतीभूमिकदम्बकपञ्चाङ्गुलकण्टकारिकाक्काथः। गण्डूषस्तैलयुतः क्रिमिदन्तकवेदनाशमनः॥ ३९॥

Bṛhatyādi gaṇḍūṣa

Decoction of bṛhatī, muṇḍī, eraṇḍa and kaṇṭakārī mixed with oil should be used as gargle. It relieves pain of caries. [39]

दन्तक्रिमिहरा योगाः

नीलीवायसजङ्घास्नुगुदुग्धीनान्तु मूलमेकैकम्। सञ्चर्व्य दशनविधृतं दशनक्रिमिपातनं प्राहुः॥ ४०॥

Nīlī, kākajaṅghā, snuhī and dugdhikā– root of each of these chewed and kept on tooth fells the organisms therefrom. [40]

विदार्यादितैलम्

चलमुद्धृत्य वा स्थानं दहेत्तु शुषिरस्य वा। ततो विदारीयष्ट्याह्वशृङ्गाटककशेरुभिः।
तैलं दशगुणे क्षीरे सिद्धं नस्ये तु योजयेत्॥ ४१॥

Vidāryādi taila

If the tooth is moving it should be extracted followed by cauterization of the spot. Then oil cooked with vidārī, madhuyaṣṭī, śṛṅgāṭaka and kaśeru along with ten times milk should be used as snuff. [41]

हनुमोक्षे क्रिया

हनुमोक्षे समुद्दिष्टा कार्य्या चार्दितवत् क्रिया॥ ४२॥

In haemorrhage, measures prescribed for ardita should be adopted. [42]

अपथ्यम्

फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम्। तथाऽतिकठिनान् भक्ष्यान् दन्तरोगी विवर्जयेत्॥ ४३॥

One suffering from diseases of teeth should abstain from sour fruits, cold water, rough diet, tooth-brushing and hard edibles. [43]

क्रिमिदन्तहरा योगाः

सप्तच्छदार्कदुग्धाभ्यां पूरणं क्रिमिदन्तनुत्। जीवनीयेन दुग्धेन क्रिमिरन्ध्रप्रपूरणम्॥
अर्कक्षीरेणैवमेकयोगः सद्भिः प्रशस्यते॥ ४४॥
द्रोणपुष्पद्रवः फेनमधुतैलसमायुतः। क्रिमिदन्तविनाशाय कार्य्यं कर्णस्य पूरणम्॥ ४५॥

Filling up of the cavity with latex of saptaparṇa or arka allays krimidanta. Likewise, the latex of (laticiferous) jīvanīya drugs is used for filling the cavity. Even the same with latex of arka alone is sufficient. [44]

Ears should be filled with juice of droṇapuṣpa mixed with samudraphena, honey and oil in order to destroy krimidanta. [45]

पटोलादिलेपः-कवलधारणञ्च

पटोलकटुकाव्योषपाठासैन्धवभार्गिकैः। चूर्णैर्मधुयुतो लेपः कवलो मधुतैलकैः॥ ४६॥

Paṭolādi lepa

Paṭola, kaṭukā, trikaṭu, pāṭhā, saindhava and bhārgī– powder of these mixed with honey should be used as paste and also gargle with honey and oil mixed together. [46]

मुस्तादितैलम्

मुस्तामधुकनिर्गुण्डीखदिरोशीरदारुभिः। समञ्जिष्ठाविडङ्गैश्च सिद्धं तैलं हरेत् क्रिमीन्॥ ४७॥

Mustādi taila

Oil cooked with musta, madhuka, nirguṇḍī, khadira, uśīra, devadāru, mañjiṣṭhā and viḍaṅga destroys krimis (of teeth). [47]

कर्कटघृतम्

कर्कटांघ्रिक्षीरपक्वघृताभ्यङ्गेन नश्यति। दन्तशब्दः कर्कटाङ्घ्रिलेपाद् वा दन्तयोजितात्॥ ४८॥

Cracking sound of teeth is alleviated by anointing with ghee cooked with crab's feet and milk or simply by applying the paste of crab's feet on teeth. [48]

। इति दन्तरोगचिकित्सा।

Thus ends treatment of Danta-roga.

३. जिह्वारोग-चिकित्सा

3. Jihvā-roga (diseases of tongue)

वातजकण्टके चिकित्सा

जिह्वारोगेषु कर्तव्यं विधानमिदमौषधम्। ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक् चिकित्सितम्॥
कण्टकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा खलु॥ ४९॥

Now in diseases of tongue the following measures be adopted. In kaṇṭaka roga (thorny tongue) caused by vāta the measures as prescribed for vātika diseases of lips should be followed. [49]

पित्तजकण्टके चिकित्सा

पित्तजेषु निघृष्टेषु निःस्रुते दुष्टशोणिते। प्रतिसारणगण्डूषनस्यञ्च मधुरं हितम्॥ ५०॥

In kaṇṭaka caused by pitta, it should be rubbed till impure blood is eliminated and then paste, gargle and snuff with sweet drugs are used. [50]

कफजकण्टके चिकित्सा

कण्टकेषु कफेत्थेषु लिखितेष्वसृजः क्षये। पिप्पल्यादिर्मधुयुतः कार्यन्तु प्रतिसारणम्॥ ५१॥
गृह्णीयात् कवलान् वाऽपि गौरसर्षपसैन्धवैः। पटोलनिम्बवार्त्ताकुक्षारयूषैश्च भोजयेत्॥ ५२॥

In kaṇṭaka caused by kapha, it should be scraped till blood is eliminated. Then paste of pippalyādi drugs mixed with honey is applied. [51]

In such condition, one should also use gargles with yellow mustard and rocksalt and take diet with soup of paṭola, nimba, vārtāka and yavakṣāra. [52]

जिह्वाजाड्य-चिकित्सा

जिह्वाजाडयं चिरजं माणकभस्मलवणतैलघर्षणं हन्ति। ईषत् स्नुक्क्षीराक्तं जम्बीराद्यम्लचर्वणं वाऽपि॥

In chronic jihvājāḍya (numbness of tongue), the tongue should be rubbed with māṇaka ash mixed with salt and oil or one should chew sour fruits like jambīra etc. slightly mixed with the latex of snuhī. [53]

उपजिह्वा-चिकित्सा

उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्। शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत्॥ ५४॥

In upajihvā (growth in sides of tongue), it should be scraped and then pasted with yavakṣāra. Besides, head-evacuation, gargle and smoking should be applied. [54]

व्योषादिचूर्णं तैलञ्च

व्योषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम्। उपजिह्वाप्रशान्त्यर्थमेतैस्तैलं विपाचयेत्॥ ५५॥

Vyoṣādi cūrna, taila

Vyoṣa (trikaṭu), yavakṣāra, harītakī and citraka– this powder is used for rubbing. Moreover, oil is cooked with the above drugs for treatment of upajihvā. [55]

। इति जिह्वारोगचिकित्सा।

Thus ends treatment of the diseases of tongue.

४. तालुरोग-चिकित्सा

4. Tālu-roga (diseases of palate)

व्योषादि

छित्वा घर्षेद्गले शुण्डीं व्योषोग्राक्षौद्रसिन्धुजैः॥ ५६॥

Vyoṣādi

(Gala) śuṇḍī (elongated uvula) should be excised and then rubbed with vyoṣa (trikaṭu), vacā and rocksalt mixed with honey. [56]

कुष्ठादि

कुष्ठोषणवचासिन्धुकणापाठाप्लवैरपि। सक्षौद्रैर्भिषजा कार्यं गलशुण्ड्या विघर्षणम्॥ ५७॥

Kuṣṭhādi

For rubbing in galaśuṇḍī, the powder of kuṣṭha, marica, vacā, saindhava, pippalī, pāthā and kaivarta mustaka mixed with honey should also be used. [57]

गलशुण्डीहरो योग:

उपनासाव्यधो हन्ति गलशुण्डीमशेषतः। गलशुण्डीहरं तद्वच्छेफालीमूलचर्वणम्॥ ५८॥

Puncturing of veins in the vicinity of nose destroys galaśuṇḍī wholly. Similarly acts the chewing of śephālī root. [58]

वचादिकवल:

वचामतिविषां पाठां रास्नां कटुकरोहिणीम्। निःक्वाथ्य पिचुमर्दञ्च कवलं तत्र योजयेत्॥ ५९॥

Vacādi kavala

Moreover, gargle of the decoction of vacā, ativiṣā, pāṭhā, rāsnā, kaṭukā and nimba should also be used. [59]

पथ्यानि

क्षारसिद्धेषु मुद्गेषु यूषाश्चाप्यशने हिताः ॥ ६० ॥

In diet, one should use soup of green gram cooked in alkaline water. [60]

तुण्डिकेर्यादि-चिकित्सा

तुण्डिकेर्य्यध्रुषे कूर्मे सङ्घाते तालुपुप्पुटे। एष एव विधिः कार्य्यो विशेषः शस्त्रकर्मणि ॥ ६१ ॥
तालुपाके तु कर्त्तव्यं विधानं पित्तनाशनम्। स्नेहस्वेदौ तालुशोषे विधिश्चानिलनाशनः ॥ ६२ ॥

The same measures are adopted in tuṇḍikerī (enlarged tonsils), adhruṣa, kūrma, saṅghāta and tālupupputa (boil in palate) the only difference being in nature of surgical operation. [61]

In tālupāka (inflammation of palate), pitta– alleviating measures are prescribed in tāluśoṣa (dryness of palate), unction, fomentation and other vāta– alleviating measures are followed. [62]

। इति तालुरोग-चिकित्सा।

Thus ends treatment of diseases of palate.

५. कण्ठरोग-चिकित्सा

5. Kaṇṭha-roga (diseases of throat)

रोहिण्यां चिकित्साक्रमः

साध्यानां रोहिणीनान्तु हितं शोणितमोक्षणम्। छर्द्दनं धूमपानञ्च गण्डूषो नस्तकर्म च ॥ ६३ ॥

Galarohiṇī (Diphtheria)

Principle of treatment

In curable types of rohiṇī, blood-letting, emesis, smoking, gargle and snuffing are beneficial. [63]

वातजरोहिणी-चिकित्सा

वातिकीन्तु हृते रक्ते लवणैः प्रतिसारयेत्। सुखोष्णान् स्नेहकवलान् धारयेच्चाप्यभीक्ष्णशः ॥ ६४ ॥

In vātika rohiṇī, after blood-letting powder of five salts should be applied locally. Besides, warm liquified fats should be kept in mouth frequently. [64]

पत्तङ्गादि-द्राक्षादि

पत्तङ्गशर्कराक्षौद्रैः पैत्तिकीं प्रतिसारयेत्। द्राक्षापरूषकक्काथो हितश्च कवलग्रहे ॥ ६५ ॥

Pattaṅgādi and drākṣādi

In paittika type, pattaṅga (paste) mixed with sugar and honey should be used for local application while decoction of drākṣā and paruṣaka should be used as gargle. [65]

कफजरोहिणी-चिकित्सा

आगारधूमकटुकैः कफजां प्रतिसारयेत्॥ ६६॥

Soot and pungents should be applied locally in kaphaja type. [66]

श्वेतादितैलम्

श्वेताविडङ्गदन्तीषु सिद्धं तैलं ससैन्धवम्। नस्तःकर्मणि दातव्यं कवलश्च कफोच्छ्रये॥ ६७॥

Śvetādi taila

Oil cooked with śvetā, viḍaṅga, dantī and saindhava is used as snuff and gargle in that caused by predominance of kapha. [67]

रक्तजरोहिणी-कण्ठशालूकचिकित्सा

पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम्। विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत्।
एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः॥ ६८-६९॥

Rohiṇī caused by rakta should be treated, after blood-letting, like paittika type. [68]

Kaṇṭhaśālūka (Tonsillitis) should be treated like tuṇḍikerī. Moreover, the patient should take diet of barley in small quantity and added with little fat only once a day. [69]

अधिजिह्वादि-चिकित्सा

उपजिह्विकवच्चापि साधयेदधिजिह्विकाम्॥ ७०॥
उन्नाम्य जिह्वामाकृष्य वडिशेनाधिजिह्विकाम्। छेदयेन्मण्डलाग्रेण तीक्ष्णोष्णैर्घर्षणादिभिः॥ ७१॥
एकवृन्दन्तु विस्राव्य विधिः शोधनमाचरेत्॥ ७२॥
शिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत्॥ ७३॥
अमर्मस्थं सुपक्वञ्च भेदयेद्गलविद्रधिम्॥ ७४॥

Adhijihvikā (sub-lingual growth) should be treated like upajihvikā. [70]

After raising the tongue, the adhijihvā is pulled out with hook and excised with scalpel. The part is also treated with rubbing etc. with irritant and hot drugs. [71]

In ekavṛnda, blood-letting is done followed by evacucaive therapy. [72]

The diseases named Śilāyu should be treated with surgical operation. [73]

Galavidradhi (abscess in throat), well-ripened and not situated in vital spot, should be incised. [74]

कण्ठरोगे चिकित्सासूत्रम्

कण्ठरोगेष्वसृङ्मोक्षस्तीक्ष्णं नस्यादिकर्म च॥ ७५॥

Generally in all diseases of throat blood-letting and irritant snuffing etc are applied. [75]

दार्व्यादिक्वाथ:

क्काथपानन्तु दार्वीत्वङ्निम्बतार्क्ष्यकलिङ्गजम्। हरीतकीकषायो वा पेयो माक्षिकसंयुत: ।। ७६ ।।

Dārvyādi kvātha

Decoction of (1) dāruharidrā (bark), nimba, rasāñjana, and indrayava or (2) harītakī alone mixed with honey should be taken. [76]

कटुकादिक्वाथ:

कटुकातिविषादारुपाठामुस्तकलिङ्गका: । गोमूत्रक्वथिता: पेया: कण्ठरोगविनाशना: ।। ७७ ।।

Kaṭukādi kvātha

Kaṭukā, ativiṣā, devadāru, pāṭhā, musta and indrayava boiled in cow's urine alleviate diseases of throat. [77]

कालकचूर्णम्

गृहधूमो यवक्षार: पाठा व्योषं रसाञ्जनम्। तेजोह्वा त्रिफला लौहं चित्रकञ्चेति चूर्णितम्।। ७८ ।।
सक्षौद्रं धारयेदेतद् गलरोगविनाशनम्। कालकं नाम तच्चूर्णं दन्तजिह्वाऽऽस्यरोगनुत्।। ७९ ।।

Kālaka cūrṇa

Soot, yavakṣāra, pāṭhā, trikaṭu, rasāñjana, tejovatī, triphalā, aguru and citraka– these powdered together should be mixed with honey and applied locally. This kalāka cūrṇa destroys diseases of throat and also of teeth, tongue and mouth. [78-79]

पिपल्यादिचूर्णम्

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरै: । स्वर्जिकाक्षारतुल्यांशैश्चूर्णोऽयं गलरोगनुत्।। ८० ।।

Pippalyādi cūrṇa

Powder of pippalī, pippalīmūla, cavya, citraka and śuṇṭhī mixed with equal parts of sarjikā and yavakṣāra alleviates diseases of throat. [80]

पीतकचूर्णम्

मन:शिला यवक्षारो हरितालं ससैन्धवम्। दार्वीत्वक् चेति तच्चूर्णं माक्षिकेण समायुतम्।। ८१ ।।
मूर्च्छितं घृतमण्डेन कण्ठरोगेषु धारयेत्। मुखरोगेषु च श्रेष्ठं पीतकं नाम कीर्त्तितम्।। ८२ ।।

Pītaka cūrṇa

Realgar, yavakṣāra, orpiment, rocksalt, and dāruharidrā (bark)– this powder mixed with honey and ghee-scum should be applied in diseases of throat and mouth. [81-82]

क्षारादिगुडिका

यवाग्रजं तेजोवतीं सपाठां रसाञ्जनं दारुनिशां सकृष्णाम्।
क्षौद्रेण कुर्याद् गुडिकां मुखेन तां धारयेत् सर्वगलामयेषु।। ८३ ।।

Kṣārādi guḍikā

Yavakṣāra, tejovatī, pāṭhā, rasāñjana, dāruharidrā and pippalī– these are powdered together, mixed with honey and made into pills which should be kept in mouth in all diseases of throat. [83]

दशमूलक्वाथादय:

दशमूलं पिबेदुष्णं यूषं मूलकुलत्थयो: ॥ ८४ ॥
क्षीरेक्षुरसगोमूत्रदधिमस्त्वम्लकाञ्जिकै:। विदध्यात् कवलान् वीक्ष्य दोषं तैलघृतैरपि ॥ ८५ ॥

Besides, warm decoction of daśamūla and soup of radish and horse gram should be taken. [84]

Gargles should be used, according to doṣa, with milk, sugarcane juice, cow's urine, curd, curd-water, sour gruel, oil and ghee. [85]

क्षारगुडिका

पञ्चकोलकतालीशपत्रैलामरिचत्वच:। पलाशमुष्ककक्षारयवक्षाराश्च चूर्णिता: ॥ ८६ ॥
गुडे पुराणे क्वथिते द्विगुणे गुडिका: कृता:। कर्कन्धुमात्रा: सप्ताहं स्थिता मुष्ककभस्मनि ॥
कण्ठरोगेषु सर्वेषु धार्य्या: स्युरमृतोपमा: ॥ ८७ ॥

Kṣāraguḍikā

Pañcakola, tālīsa, patra, elā, marica, tvak, alkali of palāśa and muskaka and yavakṣāra– these powdered together are put in double quantity of boiled old jaggery and made into pills of the size of karkadhu (small badara fruit) which are kept within muṣkaka ash for a week. These act like nectar and should be kept in (mouth) in all diseases of throat. [86-87]

। इति कण्ठरोग-चिकित्सा ।

Thus ends treatment of diseases of throat.

६. मुखगतरोग-चिकित्सा

6. Mukha-roga (Diseases of mouth proper)

शिवादिचूर्णम्

मूत्रस्विन्नां शिवां तुल्यां मधुरीकुष्ठबालकै:। अभ्यस्य मुखरोगांस्तु जयेद्विरसतामपि ॥ ८८ ॥

Śivādi cūrṇa

Śivā (harītakī) boiled in urine, madhurikā, kuṣṭha and bālaka– all in equal parts are powdered together. Regular intake of this alleviates diseases of mouth as well as tastelessness. [88]

सर्वसर-चिकित्सा

वातात् सर्वसरं चूर्णैर्लावणै: प्रतिसारयेत्। तैलं वातहरै: सिद्धं हितं कवलनस्ययो: ॥ ८९ ॥

पित्तात्मके सर्वसरे शुद्धकायस्य देहिनः। सर्वः पित्तहरः कार्यो विधिर्मधुरशीतलः॥ ९०॥
प्रतिसारणगण्डूषान् धूमं संशोधनानि च। कफात्मकं सर्वसरे क्रमं कुर्यात् कफापहम्॥ ९१॥

In sarvasara caused by vāta, local application of rocksalt powder is useful. Oil cooked with vāta-alleviating drugs should also be used as gargle and snuff. [89]

In paittika sarvasara, after evacuating the patient (with purgation and emesis), all pitta-alleviating measures particularly sweet and cold should be adopted. [90]

In kaphaja sarvasara, kapha-alleviating measures such as local application, gargle, smoking and evacuation should be followed. [91]

मुखपाक-चिकित्सा

मुखपाके शिराभेदः शिरःकायविरेचनम्। कार्यन्तु बहुधा नित्यं जातीपत्रस्य चर्वणम्॥ ९२॥

In mukhapāka (stomatitis) vensection, head– evacuation and purgation should be used frequently. The leaves of jātī should also be chewed regularly. [92]

जातीपत्रादिगण्डूषः

जातीपत्रामृताद्राक्षायासदार्वीफलत्रिकैः। क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत्॥ ९३॥

Jātīpatrādi gaṇḍūsa

The cooled decoction of jātī leaves, guḍūcī, drākṣā, yavāsa, dāruharidrā and triphalā mixed with honey and used as gargle alleviates mikhapāka. [93]

कृष्णजीरकादिचूर्णम्

कृष्णजीरककुष्ठेन्द्रयवानां चूर्णतस्त्र्यहात्। मुखपाकव्रणक्लेददौर्गन्ध्यमुपशाम्यति॥ ९४॥

Kṛṣṇajīrakādi cūrṇa

Kṛṣṇa jīraka, kuṣṭha and indrayava– application of this powder for three days removes stomatitis, ulcer, salivation and foul odour. [94]

रसाञ्जनादिचूर्णम्

रसाञ्जनं लोध्रमथामयञ्च मनःशिला नागरगैरिकञ्च।
पाठा हरिद्रा गजपिप्पली च स्याद्धारणं क्षौद्रयुतं मुखस्य॥ ९५॥

Rasāñjanādi cūrṇa

Rasāñjana, lodhra, kuṣṭha, realgar, śuṇṭhī, red ochre, pāṭhā, haridrā and gajapippalī– this powder mixed with honey is kept in mouth (in case of mukhapāka). [95]

मुखधावने पञ्चपल्लवक्वाथः

पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवाः। पञ्चपल्लवजः श्रेष्ठः कषायो मुखधावने॥ ९६॥

Decoction of the tender leaves of five plants (pañcapallava)– paṭola, nimba, jambū, āmra and jātī is excellent for mouth-wash. [96]

पञ्चवल्कलक्वाथ:-त्रिफलाक्वाथ:

पञ्चवल्ककषायो वा त्रिफलाक्वाथ एव वा। मुखपाकेषु सक्षौद्र: प्रयोज्यो मुखधावने।। ९७।।

Decoction of pañcavalkala or triphalā mixed with honey is used as mouth-wash in mukhapāka. [97]

दार्वीरसक्रिया

स्वरस: कथितो दार्व्या घनीभूतो रसक्रिया। सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा।। ९८।।

The decoction of dāruharidrā further solidified is known as rasakriyā. Mixed with honey it alleviates diseases of mouth, blood disorders and sinus. [98]

सप्तच्छदादिक्वाथ:

सप्तच्छदोशीरपटोलमुस्तहरीतकीतिक्तकरोहणीभि:।
यष्ट्याह्वराजद्रुमचन्दनैश्च क्वाथं पिबेत् पाकहरं मुखस्य।। ९९।।

Saptacchadādi kvātha

One should take decoction of saptacchada, uśīra, paṭola, musta, harītakī, kaṭukā, madhuyaṣṭī, āragvadha and candana to alleviate mukhapāka. [99]

पटोलादिक्वाथ:

पटोलशुण्ठीत्रिफलाविशालात्रायन्तितिक्ताद्विनिशानतानाम्।
पीत: कषायो मधुना निहन्ति मुखे स्थितश्चास्यगदानशेषान्।।१००।।

Paṭolādi kvātha

Paṭola, śuṇṭhī, triphalā, viśālā, trāyamāṇā, kaṭukā, haridrā, dāruharidrā and guḍūcī– this decoction mixed with honey destroys all diseases of mouth by intake of keeping in mouth. [100]

त्रिफलादिक्वाथ:

क्वथितास्त्रिफलापाठामृद्वीकाजातिपल्लवा:। निषेव्या भक्षणीया या त्रिफला मुखपाकहा।।१०१।।

Triphalādi kvātha

The decoction of triphalā, pāṭhā, drākṣā and jātī leaves should be taken to alleviate mukhapāka. [101]

तिलादिगण्डूषा:

तिला नीलोत्पलं सर्पि: शर्करा क्षीरमेव च। सक्षौद्रो दग्धवक्त्रस्य गण्डूषो दाहपाकनुत्।।१०२।।
तैलेन काञ्जिकेनाथ गण्डूषश्चूर्णदाहहा।।१०३।।

In case of burning of mouth (by lime etc) gargle with any of the five– tila, nīlotpala, ghee, sugar and milk– mixed with honey relieves burning and inflammation. [102]

Gargle with oil or sour gruel removes burning caused by lime. [103]

महासहचरतैलम्

तुलां धृतां नीलसहाचरस्य द्रोणेऽम्भसः संश्रपयेद् यथावत्।
पूत्वा चतुर्भागरसे तु तैलं पचेच्छनैरर्द्धपलप्रयुक्तैः ॥१०४॥
कल्कैरनन्ताखदिरेरिमेदजम्ब्वाम्रयष्टीमधुकोत्पलानाम्।
तत् तैलमाश्वेव धृतं मुखेन स्थैर्य्यं द्विजानां विदधाति सद्यः ॥१०५॥

Mahāsahacara taila

Blue variety of sahacara 4 kg should be boiled in water 10.24 litre reduced to one-fourth. With this decoction oil should be cooked along with the paste of anantamūla, khadira, irimeda, jambū, āmra, madhuyaṣṭī, utpala each 20 gm. This oil kept in mouth makes teeth firm. [104-105]

इरिमेदाद्यं तैलम्

इरिमेदत्वक्पलशतमभिनवमापोथ्य खण्डशः कृत्वा। तोयाढकैश्चतुर्भिर्निःक्वाथ्य चतुर्थशेषेण ॥१०६॥
क्वाथेन तेन मतिमांस्तैलस्यार्द्धाढकं शनैर्विपचेत्। कल्कैरक्षसमांशैर्मञ्जिष्ठालोध्रमधुकानाम् ॥१०७॥
इरिमेदखदिरकट्फललाक्षान्यग्रोधमुस्तसूक्ष्मैला-कर्पूरागुरुपद्मकलवङ्गकक्कोलजातीफलानाम् ॥१०८॥
पत्तङ्गगैरिकवराङ्गगजकुसुमधातकीनाञ्च। सिद्धं भिषग्विदध्यादिदं मुखोत्थेषु रोगेषु ॥१०९॥
परिशीर्णदन्तविद्रधिशौषिरशीताददन्तहर्षेषु। क्रिमिदन्तदालनचलितप्रहृष्टमांसावशीर्णेषु ॥११०॥
मुखदौर्गन्ध्ये कार्यं प्रागुक्तेष्वामयेषु तैलमिदम् ॥१११॥

Irimedādya taila

Fresh bark of irimeda 4 kg is boiled in water 10.24 litre reduced to one-fourth with this decoction oil 1.28 litre is cooked along with the paste of the following drugs each 20 gm– mañjiṣṭhā, lodhra, madhuka, irimeda, khadira, kaṭphala, lākṣā, nyagrodha, musta, elā, karpūra, aguru, padmaka, lavaṅga, kakkola, jātīphala, pattaṅga, gairika, tvak, nāgakeśara and dhātaki. This oil is useful in diseases of mouth and various disorders of teeth particularly in foul smell of mouth. [106-111]

लाक्षाद्यं तैलम्

तैलं लाक्षारसं क्षीरं पृथक् प्रस्थं समं पचेत्। चतुर्गुणेरिमक्वाथे द्रव्यैश्च पलसम्मितैः ॥११२॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः। चन्दनोत्पलयष्ट्याह्वैस्तैलं गण्डूषधारणम् ॥११३॥
दालनं दन्तचालञ्च हनुमोक्षं कपालिकाम्। शीतादं पूतिवक्त्रञ्च अरुचिं विरसास्यताम् ॥
हन्यादास्यगदानेतान् कुर्य्याद्दन्तानपि स्थिरान् ॥११४॥

Lākṣādya taila

Oil 640 ml should be cooked with equal quantity of lac-juice and milk and four times decoction of irimeda along with (the paste of) lodhra, kaṭphala, mañjiṣṭhā, kamalakeśara, padmaka, candana, utpala and mañjiṣṭhā each 40 gm. This oil kept in mouth as gargle alleviates disease of teeth, anorexia, tastelessness and other diseases of mouth and makes the teeth firm. [112-114]

बकुलाद्यं तैलम्

बकुलस्य फलं लोध्रं वज्रवल्ली कुरुण्टकम्। चतुरङ्गुलबब्बोलवाजिकर्णेरिमाशनम्॥११५॥
एषां कषायकल्काभ्यां तैलं पक्वं मुखे धृतम्। स्थैर्य्यं करोति चलतां दन्तानां धावनेन च॥११६॥

Bakulādya taila

Bakula (fruit), lodhra, asthisaṃhāra, saireyaka, āragvadha, babbūla, aśvakarṇa, irimeda and bījaka– oil cooked with decoction and paste of these is kept in mouth or used as wash.
It provides firmness to teeth. [115-116]

सहकारगुडिका

एलालतालवलिकाफलशीतकोषकोलद्विकानि खदिरस्य कृते कषाये।
तुल्यांशकानि दशभागमिते निधाय प्रोद्भिन्नकैतकपुटे पुटवद्विपाच्य॥११७॥
प्रागंशतुल्यशशिनाऽथ तदेकसंस्थं पिष्ट्वा नवेन सहकाररसेन हस्तौ।
लिप्त्वा यथाऽभिलषितां गुडिकां विदध्यात् स्त्रीपुंसयोर्वदनसौरभबन्धुभूताम्॥११८॥

Sahakāra guḍikā

Elā, latā (latākastūrī), Lavalikā (lavaṅgavallī), jātīphala, karpūra, jātīpatri, kakkola and aguru– each in equal parts are impregnated with one– tenth quantity of khadira decoction and after putting within flaps of blossomed ketaka are subjected to closed heating. Then after taking out camphor is mixed in the above quantity and pounded well. Now hands are smeared with the fresh exudation of the petiole of mango and pills are made as desired. It provides fragrance to the mouth of the couple. [117-118]

स्वल्पखदिर-वटिका

खदिरस्य तुलां सम्यग् जलद्रोणे विपाचयेत्। शेषेऽष्टभागे तत्रैव प्रतिवापं प्रदापयेत्॥११९॥
जातीकर्पूरपूगानि कक्कोलकफलानि च। इत्येषा गुडिका कार्य्या मुखसौभाग्यवर्द्धिनी॥
दन्तौष्ठमुखरोगेषु जिह्वाताल्वामयेषु च॥१२०॥

Svalpa khadira-vaṭikā

Khadira 4 kg is boiled in water 10.24 litre reduced to one-eighth. This decoction is then added with jātīpatrī, karpūra, pūga and kakkola fruits and made into pills. It is useful in diseases of teeth, lips, mouth, tongue and palate and promotes lustre of face. [119-120]

बृहत्खदिर-वटिका

गायत्रिसारतुलयेरिमवल्कलानां सार्द्धं तुलायुगलमम्बुघटैश्चतुर्भिः।
निःक्वाथ्य पादमवशिष्टसुवस्त्रपूतं भूयः पचेदथ शनैर्मृदुपावकेन॥१२१॥
तस्मिन् घनत्वमुपगच्छति चूर्णमेषां श्लक्ष्णं क्षिपेच्च कवलग्रहभागिकानाम्।
एलामृणालसितचन्दनचन्दनाम्बुश्यामातमालविकषाघनलोहयष्टी–॥१२२॥

लज्जाफलत्रयरसाञ्जनधातकीभश्रीपुष्पगैरिककटङ्कटकट्फलानाम्।
पद्माह्वलोध्रवटरोहयवासकानां मांसीनिशासुरभिवल्कलसंयुतानाम्॥१२३॥
कक्कोलजातिफलकोषलवङ्गकानि चूर्णीकृतानि विदधीत पलांशिकानि।
शीतेऽवतार्य्य घनसारचतु:पलञ्च क्षिप्त्वा कलायसदृशीर्वटिका: प्रकुर्य्यात्॥१२४॥
शुष्का मुखे विनिहिता विनिवारयन्ति रोगान् गलौष्ठरसनाद्विजतालुजातान्।
कर्य्युर्मुखे सुरभितामरुचिश्च हन्यु: स्थैर्य्यं परं दशनगं रसनापटुत्वम्॥१२५॥

Brhat Khadira-vaṭikā

Khadira (heart-wood) 4 kg and irimeda (bark) 8 kg are boiled in water 40.96 litre reduced to one-fourth. This decoction is further heated on mild fire till it is solidified, Now elā, uśīra, candana, rakta candana, bālaka, priyangu, tamāla, mañjiṣṭhā, musta, aguru, madhuyaṣṭī, lajjālu, triphalā, rasāñjana, dhātaki, nāgakeśara, kamalapuṣpa, gairika, dāruharidrā, kaṭphala, padmaka, lodhra, vaṭa (praroha), yavāsa, jaṭāmāṃsī, haridrā, śallakī and śrīveṣṭaka each 10 gm and kakkola, jātīphala, jātīpatrī and lavanga (all powdered) each 40 gm are added thereto. After putting it down and cooling camphor 160 gm is added and pills of the size of pea are made. When dried, it is kept in mouth. It alleviates diseases of throat, lips, tongue, teeth and palate as well as anorexia and provides fragrance in mouth, firmness of teeth and function of gustatory organ. [121-125]

। इति मुखगत-रोगचिकित्सा।

॥ इति मुखरोग-चिकित्सा॥ ५६ ॥

Thus ends treatment of mukha-roga. [56]

५७. सप्तपञ्चाशोऽध्यायः

CHAPTER LVII

कर्णरोग-चिकित्सा

Treatment of Karṇa-roga (diseases of ear)

कर्णशूलचिकित्सा

कपित्थमातुलुङ्गाम्लशृङ्गबेररसैः शुभैः। सुखोष्णैः पूरयेत् कर्णं कर्णशूलोपशान्तये॥ १॥
शृङ्गबेरञ्च मधु च सैन्धवं तैलमेव च। कदुष्णं कर्णयोर्देयमेतद्वा वेदनाऽपहम्॥ २॥
लशुनार्द्रकशिग्रूणां मुरङ्ग्या मूलकस्य च। कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे॥ ३॥
समुद्रफेनचूर्णेन युक्त्या वाऽप्यवचूर्णयेत्॥ ४॥
आर्द्रकसूर्य्यावर्त्तकशोभाञ्जनमूलकस्वरसाः। मधुतैलसैन्धवयुताः पृथगुक्ताः कर्णशूलहराः॥ ५॥
शोभाञ्जनकनिर्य्यासस्तिलतैलेन संयुतः। व्यक्तोष्णः पूरणः कर्णे कर्णशूलोपशान्तये॥ ६॥
अष्टानामपि मूत्राणां मूत्रेणान्यतमेन च। कोष्णेन पूरयेत् कर्णौ कर्णशूलोपशान्तये॥ ७॥
अश्वत्थपत्रखल्वं वा विधाय बहुपत्रकम्। तैलाक्तमङ्गारपूर्णं विदध्याच्छ्रवणोपरि॥ ८॥
यत् तैलं च्यवते तस्मात् खल्वादङ्गारतापितात्। तत् प्राप्तं श्रवणस्रोतः सद्यो गृह्णाति वेदनाम्॥ ९॥
अर्कपत्रपुटे दग्धस्नुहीपत्रभवो रसः। कदुष्णः पूरणादेव कर्णशूलनिवारणः॥ १०॥

In order to relieve Karṇaśūla (ear-ache) one should fill the ear with tepid juices of kapittha, mātuluṅga and fresh ginger separately. [1]

Fresh ginger juice mixed with honey, rocksalt and oil and slightly heated should be filled in the ears in order to relieve pain. [2]

Juices of garlic, fresh ginger, śigru, muraṅgi (rakta śigru) are efficacious for karṇapūraṇa (filling in the ears). [3]

Or powder of samudraphena should be put (into the ears). [4]

Juices of fresh ginger, sūryāvarta, śobhāñjana and radish separately mixed with honey and rocksalt alleviates ear-ache. [5]

To relieve ear-ache, juice of śobhāñjana mixed with tila oil and sufficiently heated should be filled into the ear. [6]

All the eight urines or one of them slightly heated should be filled into the ears for allaying earache. [7]

Many leaves of aśvattha smeared with oil are put on the ear conically along with a burning charcoal thereon. The oil thus extracted and reaching the ear passage relieves pain instantaneously. [8-9]

The warm juice of snuhī leaves heated within the covering of arka leaves alleviates earache by filling the ears. [10]

दीपिकातैलम्

महत: पञ्चमूलस्य काण्डान्यष्टाङ्गुलानि च। क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्तत: ॥ ११ ॥
यत् तैलं च्यवते तेभ्य: सुखोष्णं सम्प्रयोजयेत्। ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम्॥ १२ ॥

Dīpikā taila

Stem-wood having eight fingers length of bṛhat pañcamūla trees well wrapped with cloth saturated with oil are burnt. The oil thus extracted therefrom, while warm, is used. This is known as dīpikā taila which relieves pain immediately. [11-12]

दीपिकातैलान्तराणि

एवं कुर्य्याद्भद्रकाष्ठे कुष्ठे काष्ठे च सारले। मतिमान् दीपिकातैलं कर्णशूलनिवारणम्॥ १३ ॥

In this way, dīpikā taila may be prepared from davadāru, kuṣṭha and sarala to relieve earache. [13]

अर्कपत्रस्वरस:

अर्कस्य पत्रं परिणामपीतमाज्येन लिप्तं शिखिनाऽवतप्तम्।
आपीड्य तोयं श्रवणे निषिक्तं निहन्ति शूलं वहुवेदनञ्च॥ १४॥

The leaf of arka turned yellow by maturity is smeared with ghee and after heating on fire pressed to extract juice which on filling relieves severe pain. [14]

बस्तमूत्रप्रयोग:

तीव्रशूलान्विते कर्णे सशब्दे क्लेदवाहिनि। बस्तमूत्रं क्षिपेत् कोष्णं सैन्धवेनावचूर्णितम्॥ १५ ॥

In condition of severe earache, tinnitus and discharge slightly warm goat's urine added with rocksalt powder should be dropped into ear. [15]

वंशनेलीतैलम्

वंशावलेखसंयुक्ते मूत्रे चाजाविके भिषक्। तैलं पचेत् तेन कर्णं पूरयेत् कर्णशूलिन: ॥ १६ ॥

Vaṃśanelī taila

Oil is cooked with the paste of the scraping of bamboo along with the urines of goat and sheep. It should be filled into the ear in case of earache. [16]

हिङ्ग्वादितैलम्

हिङ्गुतुम्बुरुशुण्ठीभि: साध्यं तैलन्तु सार्षपम्। कर्णशूले प्रणादे च पूरणं हितमुच्यते॥ १७॥

Hiṅgvādi taila

Mustard oil is cooked with hiṅgu, tumburu and śuṇṭhī. It is useful for filling in earache and tinnitus. [17]

क्षारतैलम्

बालूमलकशुण्ठीनां क्षारो हिङ्गु सनागरम्। शतपुष्पा वचा कुष्ठं दारु शिग्रु रसाञ्जनम्॥ १८॥
सौवर्चलं यवक्षारः स्वर्जिकौद्भिदसैन्धवम्। भूर्जग्रन्थिर्विडं मुस्तं मधुशुक्तं चतुर्गुणम्॥ १९॥
मातुलुङ्गरसश्चैव कदल्या रस एव च। तैलमेभिर्विपक्तव्यं कर्णशूलहरं परम्॥ २०॥
बाधिर्य्यं कर्णनादश्च पूयास्रावश्च दारुणः। पूरणादस्य तैलस्य क्रिमयः कर्णसंश्रिताः॥ २१॥
क्षिप्रं विनाशं गच्छन्ति कृष्णात्रेयस्य शासनात्। क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम्॥ २२॥

Kṣārataila

Alkali of dried tender radish, hiṅgu, suṇṭhī, śatapuṣpā, vacā, kuṣṭha, devadāru, śigru, rasāñjana, sauvarcala, yavakṣāra, sarjikā, audhida salt, rocksalt, bhūrja (node), viḍa and musta– with (the paste of) these oil is cooked along with four times madhuśukta (vinegar prepared from honey) and equal quantity of the juice of mātuluṅga and kadalī.

This kṣārataila is an excellent remedy for earache. Besides, it alleviates deafness, tinnitus, purulent discharge and the diseases of mouth and teeth as said by Kṛṣṇātreya. [18-22]

मधुशुक्तद्वयम्

मधुप्रधानं शुक्तन्तु मधुशुक्तं तथाऽपरम्। जम्बीरस्य फलरसं पिप्पलीमूलसंयुतम्॥ २३॥
मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत्। मासेन तज्जातरसं मधुशुक्तमुदाहृतम्॥ २४॥

Madhuśukta

Śukta (vinegar) prepared chiefly with honey is known as 'madhuśukta'. There is also another type in which juice of jambīra fruit mixed with pippalīmūla is put in a honey-vessel and kept for a month within heap of paddy till well prepared. [23-24]

कर्णनादादीनां चिकित्सा

कर्णनादे कर्णक्ष्वेडे कटुतैलेन पूरणम्। नादबाधिर्ययोः कुर्य्याद् वातशूलोक्तमौषधम्॥ २५॥

In karṇanāda and karṇakṣveḍa (tinnitus) mustard oil should be filled in ears. In tinnitus and deafness, the measures prescribed for vātika śūla should be adopted. [25]

अपामार्गक्षारतैलम्

मार्गक्षारजलेन च तत्कृतकल्केन साधितं तिलजम्। अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः॥ २६॥

Apāmārgakṣāra-taila

Sesamum oil cooked with alkaline water of apāmārga and the paste of the same alleviates tinnitus and deafness by filling. [26]

स्वर्जिकाक्षारतैलम्

स्वर्जिका मूलकं शुष्कं हिङ्गु कृष्णा महौषधम्। शतपुष्पा च तैस्तैलं पक्वं शुक्तचतुर्गुणम्।
प्रणादशूलबाधिर्यं स्रावश्चाशु व्यपोहति॥ २७॥

Svarjikākṣāra taila

Svarjikā, dried radish, hiṅgu, pippalī, śuṇṭhī and śatapuṣpā– with (the paste of) these

oil is cooked along with four times vinegar. It removes tinnitus, earache, deafness and discharge from the ear. [27]

दशमूलीतैलम्

दशमूलीकषायेण तैलप्रस्थं विपाचयेत्। एतत् कल्कं प्रदायैव बाधिर्य्ये परमौषधम्॥ २८॥

Daśamūli-taila

Oil 640 ml is cooked with decoction and paste of daśamūla. It is an efficacious remedy for deafness. [28]

बिल्वतैलम्

फलं बिल्वस्य मूत्रेण पिष्ट्वा तैलं विपाचयेत्। साजाक्षीरं तद्धि हरेद् बाधिर्य्यं कर्णपूरणे॥ २९॥

Bilva-taila

One should cook oil with bilva fruit pounded with urine along with urine and goat's milk. It alleviates deafness by filling the ear. [29]

कर्णनादचिकित्सा

एष एव विधिः कार्य्यः प्रणादे नस्यपूर्वकः। गुडनागरतोयेन नस्यं स्यादुभयोरपि॥ ३०॥

The same measures be adopted in tinnitus but prepared by snuffing. In both deafness and tinnitus snuffing with śuṇṭhī decoction mixed with jaggery is useful. [30]

कर्णस्रावचिकित्सा

चूर्णं पञ्चकषायाणां कपित्थरससंयुतम्। कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह॥ ३१॥

The powder of pañcavalkala mixed with kapittha juice and added with honey is applied locally in karṇasrāva (discharge from ear). [31]

पूतिकर्णे योगाः

मालतिदलरसमधुना पूरितमथवा गवां मूत्रैः। दूरात् परित्यज्यते च श्रवणयुगलं पूतिरोगेण॥ ३२॥
हरितालं सगोमूत्रं पूरणं पूतिकर्णजित्॥ ३३॥

In pūtikarṇa (foetid discharge from ear) the ears are filled with the juice of jātī leaves or cow's urine. [32]

Filling of orpiment with cow's urine also overcomes pūtikarṇa. [33]

कार्पासीफलरसः

सर्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः। मधुना संयुतः साधुः कर्णस्रावे प्रशस्यते॥ ३४॥

Juice of kārpāsī fruit mixed with powder of sarja bark and added with honey is recommended in otorrhoea. [34]

जम्ब्वादिरसपूरणम्

जम्ब्वाम्रपत्रं तरुणं समांशं कपित्थकार्पासफलञ्च सार्द्रम्।
क्षुत्त्वा रसं तम्मधुना विमिश्रं स्रावापहं सम्प्रवदन्ति तज्ज्ञाः॥ ३५॥

Jambvādi

Tender leaves of jambū and āmra with equal quantity of fresh kapittha and kārpāsa fruits are pressed and the juice extracted is added with honey. It checks discharge from ear. [35]

जम्ब्वाद्यं तैलम्

एतैः शृतं निम्बकरञ्जतैलं ससार्षपं स्रावहरं प्रदिष्टम्॥ ३६॥

With these (jambū etc) oil of nimba, karañja and sarṣapa mixed together is cooked. It alleviates discharge. [36]

गोण्डकरसप्रयोगः

पुटपाकविधिस्विन्नहस्तिविड्जातगोण्डकः। रसः सतैलसिन्धूत्थः कर्णस्रावहरः परः॥ ३७॥

The juice of mushroom grown from elephant's faeces extracted by closed heating and added with oil and rocksalt is excellent remedy for otorrhoea. [37]

शम्बूकाद्यं तैलम्

शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत्। तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति॥ ३८॥

Śambūkādya taila

Mustard oil cooked with meat of snail alleviates karṇanāḍī by filling. [38]

धुस्तूराद्यं तैलम्

निशागन्धपले पक्वं कटुतैलं पलाष्टकम्। धुस्तूरपत्रजरसे कर्णनाडीजिदुत्तमम्॥ ३९॥

Dhustūrādya taila

Mustard oil 320 ml cooked with haridrā and sulphur 40 gm along with the juice of dhattūra leaves is a good remedy for karṇanāḍi (sinus in ear). [39]

कर्णप्रतीनाहे चिकित्साक्रमः

अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत्। ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत्॥ ४०॥

In karṇapratīnāha (otitis) unction and fomentation and then head-evacuation should be done followed by treatment according to condition. [40]

कर्णपाकचिकित्सा

कर्णपाकस्य भैषज्यं कुर्य्यात् क्षतविसर्पवत्॥ ४१॥

Karṇapāka (suppurative otitis) should be treated like kṣata-visarpa. [41]

कर्णकण्डूचिकित्सा

नाडीस्वेदोऽथ वमनं धूमो मूर्द्धविरेचनम्। विधिश्च कफहा सर्वः कर्णकण्डूं व्यपोहति ।। ४२ ।।

In karṇakaṇḍū (itching in ear) tubular fomentation, emesis, smoking, head– evacuation and other kapha-alleviating measures are useful. [42]

कर्णगूथचिकित्सा

क्लेदयित्वा तु तैलेन स्वेदेन प्रविलाप्य च । शोधयेत् कर्णगूथन्तु भिषक् सम्यक् शलाकया ।। ४३ ।।

Karṇagūtha (ear-wax) should be moistened with oil and liquified by fomentation and then extracted with rod. [43]

पूतिकर्णे निर्गुण्ड्यादिपूरणम्

निर्गुण्डीस्वरसस्तैलं सिन्धुधूमरजो गुडः। पूरणात् पूतिकर्णस्य शमनो मधुसंयुतः ।। ४४ ।।

Nirguṇḍī juice, oil, rocksalt, soot, jaggery and honey– all mixed together should be filled into the ear. It alleviates putikarṇa. [44]

जातीतैलम्

जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ।। ४५ ।।

Oil cooked with the juice of jātī leaves overcomes pūtikarṇa. [45]

वरुणादितैलम्

वरुणार्ककपित्थाम्रजम्बूपल्लवसाधितम्। पूतिकर्णापहं तैलं जातीपत्ररसोऽथ वा ।। ४६ ।।

Varuṇādi taila

Oil cooked with (the paste of) leaves of varuṇa, arka, kapittha, āmra and jambū destroys pūtikarṇa, similarly does the juice of jātī leaves. [46]

क्रिमिकर्णापहा योगाः

सूर्य्यावर्त्तकस्वरसं सिन्धुवाररसं तथा। लाङ्गलीमूलजरसं त्र्यूषणेनावचूर्णितम्।
पूरयेत् क्रिमिकर्णन्तु जन्तूनां नाशनं परम् ।। ४७ ।।
क्रिमिकर्णकनाशार्थं क्रिमिघ्नं योजयेद्विधिम्। वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ।। ४८ ।।

Juice of sūryāvarta or sindhuvāra or lāṅgalī root added with the powder of trikaṭu should be filled into the ear affected with krimi (maggots) which are destroyed by it. [47]

In order to destroy krimikarṇa (maggots in ear) one should adopt the measures as prescribed for the treatment of krimis. Application of the smoke of vārttāku or mustard oil is also efficacious. [48]

योगद्वयम्

हलिसूर्यावर्त्तव्योषस्वरसेनाभिपूरिते। कर्णे पतन्ति सहसा सर्वास्तु क्रिमिजातयः ।। ४९ ।।
नीलबुह्लारसस्तैलसिन्धुकाञ्जिकसंयुतः । कदुष्णः पूरणात् कर्णे निःशेषक्रिमिपातनः ।। ५० ।।

By filling the ear with juices of lāṅgalī and sūryāvarta added with trikaṭu powder all krimis fall instanteneously. [49]

Juice of nīlabuhnā mixed with oil, rocksalt and sour gruel and slightly heated should be filled into the ear. It removes all krimis. [50]

पूतिकर्णे योगा:

धूपन: कर्णदौर्गन्ध्ये गुग्गुलु: श्रेष्ठ उच्यते।। ५१।।
राजवृक्षादितोयेन सुरसादिजलेन वा। कर्णप्रक्षालनं कुर्य्याच्चूर्णैरेतै: प्रपूरणम्।। ५२।।
घृष्टं रसाञ्जनं नार्या: क्षीरेण क्षौद्रसंयुतम्। प्रशस्यते चिरोत्थेऽपि सास्रावे पूतिकर्णके।। ५३।।

In foetid ear, incensing with guggulu is excellent. [51]

Moreover, ears should be washed with decoction of āragvadhādi or surasādi drugs and their powders be applied locally. [52]

Rasāñjana rubbed with woman's milk and mixed with honey is recommended in pūtikarṇa with discharge even if chronic. [53]

कुष्ठाद्यं तैलम्

कुष्ठहिङ्गुवचादारुशताह्वाविश्वसैन्धवै:। पूतिकर्णापहं तैलं बस्तमूत्रेण साधितम्।। ५४।।

Kuṣṭhādya taila

Oil cooked with kuṣṭha, hiṅgu, vacā, devadāru, śatapuṣpā, śuṇṭhī and rocksalt along with goat's milk destroys pūtikarṇa. [54]

कर्णविद्रधिचिकित्सा

विद्रधौ चापि कुर्वीत् विद्रध्युक्तं हि भेषजम्।। ५५।।

In case of karṇa-vidradhi (ear-abscess) it should be treated like abscess. [55]

शतावर्यादितैलम्

शतावरीवाजिगन्धापयस्यैरण्डबीजकै:। तैलं विपक्वं सक्षीरं पालीनां पुष्टिकृत् परम्।। ५६।।

Śatāvaryādi taila

Oil cooked with śatāvarī, aśvagandhā, payasyā and castor seeds along with milk promotes corpulence of the ear lobes. [56]

गुञ्जानवनीतयोग:

गुञ्जाचूर्णयुते जाते माहिषे क्षीर उद्गतम्। नवनीतं तदभ्यङ्गात् कर्णपालिविवर्द्धनम्।। ५७।।

Buffalo's milk is added with guñja powder and curdled. Butter extracted from this is massaged on the earlobes. It promotes their growth. [57]

विषगर्भतैलम्

विषगर्भं तिक्ततुम्बीतैलमष्टगुणे खरात्। मूत्रे पक्वं तदभ्यङ्गात् कर्णपालिविवर्द्धनम्।। ५८।।

Viṣagarbha taila

Oil of bitter gourd cooked with the paste of viṣa (vatsanābha) along with eight times ass's urine. Its massage promotes growth of ear lobes. [58]

जीवनीयाद्यं तैलम्

कल्केन जीवनीयेन तैलं पयसि साधितम्। आनूपमांसक्वाथेन पालीपोषणवर्द्धनम्॥ ५९॥

Jīvanīyādya taila

Oil cooked with the paste of jīvanīya drugs along with milk and decoction of sub-aquatic meat promotes corpulence and growth of ear lobes. [59]

मुशलीकन्दप्रयोगः

माहिषनवनीतयुतं सप्ताहं धान्यराशिपरिवासि। नवमुशलीकन्दचूर्णं वृद्धिकरं कर्णपालीनाम्॥

Powder of fresh muśalī tuber mixed with buffalo's butter is kept in heap of paddy for a week. It promotes growth of ear lobes. [60]

मधुकादिलेपः

कर्णस्य दुर्व्यधे भूते संरम्भो वेदना भवेत्। तत्र दुर्व्यधरोहार्थं लेपो मध्वाज्यसंयुतैः॥
मधुकयवमञ्जिष्ठारुबुमूलैः समन्ततः॥ ६१॥

Madhukādi lepa

If ear is not pierced properly congestion and pain take place. In such condition, paste of madhuka, yava, mañjiṣṭhā and eraṇḍa root mixed with honey and ghee should be applied. [61]

छिन्नकर्णे सन्धानविधिः

अनेकधा तु छिन्नस्य सन्धिः कर्णस्य वै भिषक्। यो यथा विनिविष्टः स्यात् तं तथा विनियोजयेत्॥
धान्याम्लोष्णोदकाभ्यान्तु सेको वातेन दूषिते। रक्तपित्तेन पयसा श्लेष्मणा तूष्णवारिणा॥ ६३॥
ततः सीव्य स्थिरं कुर्य्यात् सन्धिं बन्धेन वा पुनः। मध्वाज्येन ततोऽभ्यज्य पिचुना सन्धिवेष्टनम्।
कपालचूर्णेन ततश्चूर्णयेत् पथ्ययाऽथवा॥ ६४॥

If ear lobe is cut at many places it should be joined properly after proper setting. [62]

The cut ear should be sprinkled with sour gruel or hot water, milk and hot water in predominance of vāta, raktapitta, and kapha respectively. Then it should be sutured and stabilised with bandaging. The wound should be anointed with honey and ghee and should be united with the help of cotton swab. Thereafter it should be dusted with the powder of burnt earthen vessel or harītakī. [63-64]

॥ इति कर्णरोगचिकित्सा॥ ५७॥

Thus ends treatment of karṇa-roga. [57]

५८. अष्टपञ्चाशोऽध्यायः

CHAPTER LVIII

नासारोग-चिकित्सा

Treatment of Nāsā-roga (diseases of nose)

पीनसे पञ्चमूलीक्षीरादिप्रयोगः

पञ्चमूलीशृतं क्षीरं स्याच्चित्रकहरीतकी। सर्पिर्गुडः षडङ्गश्च यूषः पीनसशान्तये॥ १॥

Pīnasa (chronic coryza)

In order to alleviate pīnasa, one should use milk processed with pañcamūla, citraka-harītakī, sarpirguḍa and ṣaḍaṅga yūṣa. [1]

व्योषादिचूर्णम्

व्योषचित्रकतालीशं तिन्तिडी चाम्लवेतसम्। सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकम्॥ २॥
व्योषादिकं चूर्णमिदं पुराणगुडसंयुतम्। पीनसश्वासकासघ्नं रुचिस्वरकरं परम्॥ ३॥

Vyoṣādi cūrṇa

Vyoṣa (trikaṭu), citraka, tālīśa, tintiḍīka, amlavetasa, cavya, jīraka all in equal parts, elā, tvak and patra 1/4 part– This vyoṣādi cūrṇa mixed with old jaggery alleviates pīnasa, bronchial asthma and cough and promotes relish and voice. [2-3]

पाठादितैलम्

पाठाद्विरजनीमूर्वापिप्पलीजातिपल्लवैः। दन्त्या च तैलं संसिद्धं नस्यं सम्यगपीनसे॥ ४॥

Pāṭhādi taila

Oil cooked with pāṭhā, haridrā, dāruharidrā, mūrvā, pippalī, jātī leaves and dantī should be used as snuff in apīnasa. [4]

व्याघ्रीतैलम्

व्याघ्रीदन्तीवचाशिग्रुसुरसव्योषसैन्धवैः। पाचितं नावनं तैलं पूतिनासागदं जयेत्॥ ५॥

Pūti-nāsā (foetid smell of nose)

Vyāghrī-taila

Vyāghrī (kaṇṭakārī), dantī, vacā, śigru, tulasī, trikaṭu and saindhava– oil cooked with these and used as snuff overcomes pūtināsā. [5]

त्रिकट्वाद्यं तैलम्

त्रिकटुविडङ्गसैन्धवबृहतीफलशिग्रुसुरसदन्तीभिः। तैलं गोजलसिद्धं नस्यं स्यात् पूतिनस्यस्य॥ ६॥

Trikaṭvādya taila

Trikaṭu, viḍaṅga, saindhava, bṛhatī (fruit), śigru, tulasī and dantī– with these oil cooked along with cow's urine should be used as snuff in pūtinasya. [6]

कलिङ्गाद्यवपीडः

कलिङ्गहिङ्गुमरिचलाक्षासुरसकट्फलैः। कुष्ठोग्राशिग्रुजन्तुघ्नैरवपीडः प्रशस्यते॥ ७॥

Kaliṅgādyavapīḍa

Kaliṅga (Indrayava), hiṅgu, marica, lākṣā, tulasī, kaṭphala, kuṣṭha, vacā, śigru and viḍaṅga– these are pounded with cow's urine and juice is pressed into the nostrils. [7]

कलिङ्गादितैलम्

तैरेव मूत्रसंयुक्तैः कटुतैलं विपाचयेत्। अपीनसे पूतिनस्ये शमनं कीर्त्तितं परम्॥ ८॥

With the above drugs along with cow's urine mustard oil is cooked which is an excellent remedy for apīnasa and pūtinasya. [8]

नासापाकचिकित्सा

नासापाके पित्तहृत् संविधानं कार्यं सर्वं बाह्यमाभ्यन्तरञ्च।
हरेद्रक्तं क्षीरिवृक्षत्वचश्च योज्याः सेके सघृताश्च प्रदेहः॥ ९॥
पूयास्ररक्तपित्तघ्ना कषायाः नावनानि च॥ १०॥

Nāsāpāka (suppurative rhinitis)

In nāsāpāka, all external as well as internal pitta-alleviating measures should be adopted. Moreover, blood-letting should be done and barks of kṣīrī vṛkṣa should be used for sprinkling and, mixed with ghee, as anointment. [9]

Besides, decoctions and snuffs alleviating pus, blood and rakta-pitta should be used. [10]

शुण्ठ्यादितैलं घृतञ्च

शुण्ठीकुष्ठकणाबिल्वद्राक्षाकल्ककषायवत्। साधितं तैलमाज्यं वा नस्यं क्षवपुटप्रणुत्॥ ११॥

Kṣavathu (sneezing))

Śuṇṭhyādi taila-ghṛta

Śuṇṭhī, kuṣṭha, pippalī, bilva and drākṣā– oil or ghee cooked with paste and decoction of these and used as snuff alleviates kṣavathu. [11]

दीप्तनासानाहयोश्चिकित्सा

दीप्ते रोगे पैत्तिके पैत्तिकन्तु विधिं कुर्य्यात् मधुरं शीतलञ्च।
नासानाहे स्नेहपानं प्रधानं स्निग्धा धूमा मूर्धवस्तिश्च नित्यम्॥ १२॥

Dīpta and nāsānāha (Rhinitis)

In dīpta pitta– alleviating measures such as sweet and cold should be adopted. In nāsānāha, however, chief remedy is intake of sneha in addition to unctuous smoking and regular application of head-pouch. [12]

वातिकप्रतिश्यायचिकित्सा

वातिके तु प्रतिश्याये पिबेत् सर्पिर्यथाक्रमम्। पञ्चभिर्लवणैः सिद्धं प्रथमेन गणेन वा॥ १३॥
नस्यादिषु विधिं कृत्स्नमवेक्षेतार्दितेरितम्॥ १४॥

Pratiśyāya (coryza)

In vātika pratiśyāya one should take ghee cooked with five salts or vidārigandhādi drugs in proper way. [13]

Besides, for snuffing etc the methods prescribed for ardita should be followed. [14]

पित्तरक्तजप्रतिश्यायचिकित्सा

पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शृतम्। परिषेकान् प्रदेहांश्च कुर्य्यादपि च शीतलान्॥ १५॥

In that caused by pitta and rakta, ghee cooked with madhuraka (kākolyādi) drugs should be taken. Moreover, cold baths and pastes should be applied. [15]

कफजप्रतिश्यायचिकित्सा

कफजे सर्पिषा स्निग्धं तिलमाषविपक्वया। यवाग्वा वामयित्वा वा कफघ्नं क्रममाचरेत्॥ १६॥

In kaphaja type, the patient, properly uncted with ghee, should be subjected to emesis with gruel cooked with sesamum and blackgram (also madanaphala) and thereafter should follow the kapha-alleviating measures. [16]

दार्व्यादिधूमवर्त्तिः

दार्व्वीङ्गुदीनिकुम्भैश्च किणिह्या सुरसेन च। वर्त्तयोऽत्र कृता योज्या धूमपाने यथाविधि॥ १७॥

Dārvyādi dhūmavarti

Moreover, sticks made of dāruharidrā, ingudi, dantī, kiṇihī and tulasī should be used for smoking. [17]

धूमयोगः

अथवा सघृतान् शक्तून् कृत्वा मल्लकसम्पुटे। नवप्रतिश्यायवतां धूमं वैद्यः प्रयोजयेत्॥ १८॥

Or physician should apply smoke of saktu (parched grain glour) mixed with ghee and put within closed saucers to one affected by acute pratiśyāya. [18]

शीतोदकपानम्

यः पिबति शयनकाले शयनारूढः सुशीतलं भूरि। सलिलं पीनसयुक्तः स मुच्यते तेन रोगेण॥ १९॥

One who takes cold water profusely at bed-time while sitting on bed becomes free from pīnasa. [19]

जयापत्रपुटपाक:

पुटपक्वं जयापत्रं सिन्धुतैलसमन्वितम्। प्रतिश्यायेषु सर्वेषु शीलितं परमौषधम्॥ २०॥

Leaves of jayantī. rocksalt and oil are cooked by closed heating and the juice expressed is taken with rocksalt and oil. It is an excellent remedy for all types of pratiśyāya. [20]

गुडमरिचयोग:

सोषणं गुडसंयुक्तं स्निग्धदध्यम्लभोजनम्। नवप्रतिश्यायहरं विशेषात् कफपाचनम्॥ २१॥

Intake of fatty sour curd mixed with black pepper and jaggery is useful in acute pratiśyāya and is particularly digestive for kapha. [21]

चिञ्चायूष:

प्रतिश्याये नवे शस्तो यूषश्चिञ्चादलोद्भव:। तत: पक्वं कफं ज्ञात्वा हरेच्छीर्षविरेचनै: ॥ २२॥
शिरसोऽभ्यञ्जनस्वेदनस्यकट्वम्लभोजनै:। वमनैर्घृतपानैश्च तान् यथास्वमुपाचरेत्॥ २३॥

In acute pratiśyāya, soup made of tamarind leaves is used. Thereafter when kapha is matured, it should be eliminated by head-evacuation. [22]

The types of pratiśyāya should be treated with head-anointment, fomentation, snuff, pungent and sour food, emesis and intake of ghee according to condition. [23]

जीर्णप्रतिश्यायहरो योग:

भक्षयति भुक्तमात्रे सलवणमुत्स्विन्नमाषमत्युष्णम्। स जयति सर्वसमुत्थं चिरजातञ्च प्रतिश्यायम्॥ २४॥

One who takes boiled black gram, hot and added with salt, immediately after meal overcomes pratiśyāya even if chronic and caused by all doṣas. [24]

पिप्पल्याद्यवपीड:

पिप्पल्य: शिग्रुबीजानि विडङ्गं मरिचानि च। अवपीड: प्रशस्तोऽयं प्रतिश्यायनिवारण: ॥ २५॥

Pippalyādyavapīḍa

Pippalī, śigru seeds, viḍaṅga and marica– this avapīḍa (expressed juice used as snuff) alleviates pratiśyāya. [25]

नासाक्रिमिचिकित्सा

समूत्रपिष्टास्तूद्दिष्टा: क्रिया: क्रिमिषु योजयेत्। नावनार्थं क्रिमिघ्नानि भेषजानि च बुद्धिमान्॥ २६॥
शेषाणान्तु विकाराणां यथास्वं स्याच्चिकित्सतम्॥ २७॥

In nāsākrimi (maggots in nose), the prescribed drugs pounded with urine should be used. Moreover, the anthelmintic drugs should be used as snuff. [26]

The other disorders should be managed according to condition. [27]

करवीराद्यं तैलम्

रक्तकरवीरपुष्पं पुष्पं जात्यशनमल्लिकायाश्च। एतैः समन्तु तैलं नासाऽर्शोनाशनं श्रेष्ठम्॥ २८॥

Nāsārśa (Nasal polypus)

Karavīrādya taila

Flowers of red karavīra, jātī and aśanamallikā– oil cooked with these is excellent remedy for nāsārśa. [28]

गृहधूमादितैलम्

गृहधूमकणादारुक्षारनक्ताह्वसैन्धवैः। सिद्धं शिखरिबीजैश्च तैलं नासाऽर्शसां हितम्॥ २९॥

Gṛhadhūmādi taila

Gṛhadhūma (soot), pippalī, devadāru, yavakṣāra, haridrā, saindhava and apāmārga seeds– oil cooked with these is efficacious in nāsārśa. [29]

चित्रकतैलम्

चित्रकचविकादीप्यकनिदिग्धिकाकरञ्जलवणार्कैः। गोमूत्रयुक्तं सिद्धं तैलं नासार्शसां विहितम्॥ ३०॥

Citraka taila

Citraka, cavya, yavānī, kaṇṭakārī, karañja seeds, rocksalt and arka (latex)– oil cooked with these along with cow's urine is useful for nāsārśa. [30]

चित्रकहरीतकी

चित्रकस्यामलक्याश्च गुडूच्या दशमूलजम्। शतं शतं रसं दत्त्वा पथ्याचूर्णाढकं गुडात्॥ ३१॥
शतं पचेद्घनीभूते पलद्वादशकं क्षिपेत्। व्योषत्रिजातयोः क्षारात् पलार्द्धमपरेऽहनि॥ ३२॥
प्रस्थार्द्धं मधुनो दत्त्वा यथाग्न्यद्यादतन्द्रितः। वृद्धयेऽग्नेः क्षयं कासं पीनसं दुस्तरं क्रिमीन्।
गुल्मोदावर्त्तदुर्नामश्वासान् हन्ति रसायनम्॥ ३३॥

Citraka-harītakī

Decoction of citraka, guḍūcī, and daśamūla and juice of āmalaki each 4 litre, harītakī powder 2.56 kg and jaggery 4 kg– all these should be cooked together till thickened. Then trikaṭu and trijāta (combined) 480 gm and yavakṣāra 20 gm should be added. Next day honey 320 gm should be added. It should be taken according to appetite.

It is rasāyana, promotes digestion and alleviates wasting, cough, bronchial asthma, pīnasa, worms, gulma, udāvarta and piles. [31-33]

॥ इति नासारोग-चिकित्सा॥ ५८॥

Thus ends treatment of nāsā-roga. [58]

५९. एकोनषष्टितमोऽध्यायः

CHAPTER LIX

नेत्ररोग-चिकित्सा

Treatment of Netra-roga (diseases of eye)

अभिष्यन्दे चिकित्साक्रमः

लङ्घनालेपनस्वेदशिराव्यधविरेचनैः। उपाचरेदभिष्यन्दानञ्जनाश्च्योतनादिभिः ॥ १ ॥

Abhiṣyanda

Abhiṣyanda should be treated with fasting, pasting, fomentation, venesection, purgation collyrium, eye-drops etc. [1]

अव्यक्ताक्षिरोगचिकित्सा

श्रीवासातिविषालोध्रैश्चूर्णितैरल्पसैन्धवैः। अव्यक्तेऽक्षिगदे कार्य्यं प्रोतस्थैर्गुण्डनं बहिः ॥ २ ॥

In unmanifested eye-disease (in premonitary stage), eye should be dusted externally with the powder of śrīvāsa, ativiṣā and lodhra mixed with little rocksalt put in a cloth-piece. [2]

नेत्ररोगादौ लङ्घनस्य प्राशस्त्यम्

अक्षिकुक्षिभवा रोगाः प्रतिश्यायव्रणज्वराः। पञ्चैते पञ्चरात्रेण प्रशमं यान्ति लङ्घनात् ॥ ३ ॥

Eye diseases, gastro-intestinal disorders, coryza, wounds and fever– these five diseases are pacified by fasting for five days. [3]

नेत्ररोगे षडामपाचनानि

स्वेदः प्रलेपस्तिक्तान्नं सेको दिनचतुष्टयम्। लङ्घनश्चाक्षिरोगाणमामानां पाचनानि षट् ॥ ४ ॥

आमेऽञ्जनादिनिषेधः

अञ्जनं पूरणं क्वाथपानमामे न शस्यते ॥ ५ ॥

In eye diseases associated with āma the following six act as digestive– fomentation, pasting, bitter diet, sprinkling, fasting and (period of) four days. [4]

Collyrium, eye-drops and intake of decoction should not be used in āma stage. [5]

नवाभिष्यन्दचिकित्सा

धात्रीफलनिर्य्यासो नवदृक्कोपं निहन्ति पूरणतः। सक्षौद्रसैन्धवो वा शिग्रूद्भवपत्ररससेकः ॥ ६ ॥

Acute netrābhiṣyanda (conjunctivitis) is alleviated by the eye-drops of āmalaka juice or sprinkling with the juice of śigru leaves mixed with honey and rocksalt. [6]

दार्वीरसाञ्जनयोग:

दार्वीरसाञ्जनश्चापि स्तन्ययुक्तं प्रपूरणम्। निहन्ति शीघ्रं दाहाश्रुवेदना: स्यन्दसम्भवा: ॥ ७ ॥

Eye drops of rasāñjana made of dāruharidrā (decoction) mixed with (woman's) breast-milk remove burning sensation, lachrymation and pain in conjunctivitis. [7]

करवीररसाश्च्योतनम्

करवीरतरुणकिसलयछेदोद्भवबहुलसलिलसंपूर्णम्। नयनयुगं भवति दृढं सहसैव तत्क्षणात् कुपितम् ॥ ८ ॥

Eyes filled with the juice coming out by cutting the tender leaves of karavīra gets freed from inflammation. [8]

शिखरिमूलप्रयोग:

शिखरिमूलं ताम्रभाजने स्तोकसैन्धवोन्मिश्रम्। मस्तुनिघृष्टं भरणाद्धरति नवं लोचनोत्कोपम् ॥ ९ ॥

Acute conjunctivitis is alleviated by applying the paste of apāmārga root rubbed together with rocksalt and curd-water in a copper vessel. [9]

सैन्धवादिबिडालक:

सैन्धवदारुहरिद्रागैरिकपथ्यारसाञ्जनै: पिष्टै:। दत्तो बहि: प्रलेपो भवत्यशेषाक्षिरोगहर: ॥ १० ॥

External application of the paste of saindhava, dāruharidrā, red ochre, harītakī and rasāñjana alleviates all eye diseases. [10]

लोध्रादिबिडालकौ

तथा शाबरकं लोध्रं घृतभृष्टं बिडालक:। कार्यो हरीतकी तद्वद् घृतभृष्टा बिडालक: ॥ ११ ॥
शालाक्येऽक्ष्णोर्बहिर्लेपो बिडालक उदाहृत: ॥ १२ ॥

Likewise, biḍālaka (external paste of) śābara lodhra or harītakī fried with ghee is applied. [11]

The external application of paste on eyelids is (technically) known as 'biḍāl aka' in śālakya. [12]

गैरिकादिबिडालक:

गिरिमृच्चन्दननागरखटिकांशैर्योजितो बहिर्लेप:। कुरुते वचया मिश्रो लोचनमगदं न सन्देह: ॥ १३ ॥

Gairikādi biḍālaka

External paste of gairika, candana, śuṇṭhī and khaṭikā (chalk) mixed with vacā restores normalcy to eyes. [13]

भूम्यामलक्यादिबिडालक:

भूम्यामलकी घृष्टा सैन्धवगृहवारियोजिता ताम्रे। याता घनत्वमक्ष्णोर्जयति बहिर्लेपत: पीडाम् ॥ १४ ॥

The paste of bhūmyāmalakī rubbed with rocksalt and sour gruel in a copper vessel overcomes pain in eyes. [14]

बिल्वाद्याश्च्योतनम्

आश्च्योतनं मारुतजे क्वाथो बिल्वादिभिर्हितः। कोष्णः सैरण्डबृहतीतर्कारीमधुशिग्रुभिः॥ १५॥

Bilvādyāścyotana

In vātika type of conjunctivitis eye-drop prepared of bṛhat pañcamūla, eraṇḍa, bṛhatī, tarkarī and madhuśigru and slightly heated is useful. [15]

क्षीरसेकः

एरण्डपल्लवे मूले त्वचि चाजं पयः शृतम्। कण्टकार्य्याश्च मूलेषु सुखोष्णं सेचने हितम्॥ १६॥

Goat's milk processed with leaves, root and bark of eraṇḍa and root of kaṇṭakārī and slightly heated in useful for sprinkling (eye-wash). [16]

पक्वाक्षिरोगे चिकित्सा

सम्पक्वेऽक्षिगदे कार्य्यश्चाञ्जनादिकमिष्यते॥ १७॥

When abhiṣyanda is matured, collyrium etc. should be applied. [17]

पक्वाक्षिरोगलक्षणम्

प्रशस्तवर्त्मता चाक्ष्णोः संरम्भाश्रुप्रशान्तता। मन्दवेदनता कण्डूः पक्वाक्षिगदलक्षणम्॥ १८॥

Normal eyelids, disappearance of congestion and lachrymation, decrease in pain and itching– these are the signs of matured (post-inflammatory phase of) eye-diseases. [18]

अञ्जनादिविधिः

अञ्जनादिविधिश्चाग्रे निखिलेनाभिधास्यते॥ १९॥

Thereafter application of collyrium etc is prescribed. [19]

बृहत्यादिवर्त्तिः

बृहत्येरण्डमूलत्वक् शिग्रोर्मूलंससैन्धवम्। अजाक्षीरेण पिष्टं स्याद्वर्त्तिर्वाताक्षिरोगनुत्॥ २०॥

Bṛhatyādi vartti

Bṛhatī, eraṇḍa (root bark), śigru (root) and rocksalt– these are pounded with goat's milk and made into sticks. It alleviates vātika eye-disease (abhiṣyanda). [20]

हरिद्राद्यञ्जनम्

हरिद्रे मधुकं द्राक्षां देवदारु च पेषयेत्। आजेन पयसा श्रेष्ठमभिष्यन्दे तदञ्जनम्॥ २१॥

Haridrādyañjana

Haridrā, dāruharidrā, madhuka, drākṣā and devadāru– these together should be pounded with goat's milk. It is useful as collyrium in (vātika) abhiṣyanda. [21]

गैरिकादिगुडिकाञ्जनम्

गैरिकं सैन्धवं कृष्णा तगरञ्च यथोत्तरम्। पिष्टं द्विरंशतोऽद्भिर्वा गुडिकाञ्जनमिष्यते॥ २२॥

Gairikādyañjana

Gairika, saindhava, pippalī and tagara successively in double quantity are pounded with water and made into pills. Pill is rubbed and used as collyrium. [22]

प्रपौण्डरीकादिसेकः

प्रपौण्डरीकयष्ट्याह्वनिशामलकपद्मकैः। शीतैर्मधुसमायुक्तैः सेकः पित्ताक्षिरोगनुत्॥ २३॥

Prapauṇḍarīkādi

Prapauṇḍarīka, madhuyaṣṭī, haridrā, āmalaka and padmaka– the cold decoction of these mixed with honey is useful as sprinkling in paittika eye-disease (abhiṣyanda). [23]

द्राक्षादिसिद्धक्षीराश्च्योतनम्

द्राक्षामधुकमञ्जिष्ठाजीवनीयैः श्रृतं पयः। प्रातराश्च्योतनं पथ्यं शोथशूलाक्षिरोगिणाम्॥ २४॥

Drākṣādi kṣīra

Milk boiled with drākṣā, madhuka, mañjiṣṭhā and jīvanīya drugs is useful as eye-drop in morning in case of eye-disease (abhiṣyanda) associated with swelling and pain. [24]

लोध्राश्च्योतनम्

निम्बस्य पत्रैः परिलिप्य लोध्रं स्वेद्याग्निना चूर्णमथापि कल्कम्।
आश्च्योतनं मानुषदुग्धमिश्रं पित्तास्रवातापहमग्र्यमुक्तम्॥ २५॥

Paste or powder of lodhra is put within paste of nimba leaves and heated on fire. The juice extracted of it is mixed with woman's milk and used as eye-drop. It is a good remedy for pitta, rakta and vāta. [25]

कफजाभिष्यन्दे चिकित्साक्रमः

कफजे लङ्घनं स्वेदो नस्यं तिक्तान्नभोजनम्। तीक्ष्णैः प्रधमनं कुर्य्यात् तीक्ष्णैश्चैवोपनाहनम्॥ २६॥

In kaphaja abhiṣyanda, fasting, fomentation, snuffing, bitter diet, blowing snuff as well as poultice with irritant drugs are useful. [26]

फणिज्झकादिस्वेदः बर्हिष्ठादिलेपश्च

फणिज्झकास्फोतकपित्थबिल्वपत्तूरपीलूसुरसार्जभृङ्गैः।
स्वेदं विदध्यादथवा प्रलेपं बर्हिष्ठशुण्ठीसुरदारुकुष्ठैः॥ २७॥

Phaṇijjhakādi-Barhiṣṭhādi

Tender leaves of Phaṇijjahaka, āsphotā, kapittha, bilva, pattūra, pīlu, tulasī and arjaka should be used for fomentation or barhiṣṭha (bālaka), śuṇṭhī, devadāru and kuṣṭha as paste. [27]

शुण्ठ्यादिपिण्डः

शुण्ठीनिम्बदलैः पिण्डः सुखोष्णैः स्वल्पसैन्धवैः। धार्य्यश्चक्षुषि सक्षेपाच्छोथकण्डूव्यथापहः॥ २८॥

Warm pulp of śuṇṭhī and nimba leaves mixed with little rocksalt should be kept on the eyes. It alleviates swelling. itching and pain. [28]

पारिजातवल्कलाद्यञ्जनम्

वल्कलं पारिजातस्य तैलं काञ्जिकसैन्धवम्। कफोद्भूताक्षिशूलघ्नं तरुघ्नं कुलिशं यथा।। २९।।

(Juice of) pārijāta bark, oil, sour gruel and rocksalt– all rubbed together should be used as collyrium in kaphaja abhiṣyanda. It destroys the disease as thunderbold destroys a tree. [29]

लोध्राद्याश्च्योतनम्

ससैन्धवं लोध्रमथाज्यभृष्टं सौवीरपिष्टं सितवस्त्रबद्धम्।
आश्च्योतनं तन्नयनस्य कुर्यात् कण्डूश्च दाहश्च रुजश्च हन्यात्।। ३०।।

Lodhra mixed with rocksalt is pounded with sour gruel and fried with ghee. It is then put in a clean piece of cloth. The juice pressed is used as eye-drop. It alleviates itching, burning sensation and pain. [30]

वातजादिषु चिकित्साक्रमः

स्निग्धैरुष्णैश्च वातोत्थः पित्तजो मृदुशीतलैः। तीक्ष्णरूक्षोष्णविशदैः प्रशाम्यति कफात्मकः।।
तीक्ष्णोष्णमृदुशीतानां व्यत्यासात् सान्निपातिकः।। ३१।।

Abhiṣyanda caused by vāta should be treated with unctuous and hot measures, that caused by pitta with soft and cold and kaphaja with irritant, rough, hot and non-slimy measures. The sannipāta type, however, should be treated with alternating irritant-hot and soft-cold remedies. [31]

तिरीटादिसेकः

तिरीटत्रिफलायष्टीशर्कराभद्रमुस्तकैः। पिष्टैः शीताम्बुना सेको रक्ताभिष्यन्दनाशनः।। ३२।।

Tirīṭādi

Tirīṭa (lodhra), triphalā, madhuyaṣṭī, śarkarā and bhadramusta pounded together and mixed with cold water should be used as sprinkling which alleviates raktābhiṣyanda. [32]

कशेर्वाद्याश्च्योतनम्

कशेरुमधुकानाञ्च चूर्णमम्बरसंयुतम्। न्यस्तमप्स्वान्तरीक्षासु हितमाश्च्योतनं भवेत्।। ३३।।

Kaśervādi

Powder of kaśeru and madhuka kept in a cloth-pouch is kept in rain water. It should be used as eye-drop. [33]

दार्व्यादिरसक्रिया

दार्वीपटोलमधुकं सनिम्बं पद्मकोत्पलम्। प्रपौण्डरीकञ्चैतानि पचेत्तोये चतुर्गुणे ॥ ३४ ॥
विपाच्य पादशेषन्तु तत् पुनः कुडवं पचेत्। शीतीभूते तत्र मधु दद्यात् पादांशिकं ततः ॥
रसक्रियैषा दाहाश्रुरागरक्तरुजापहा ॥ ३५ ॥

Dārvyādi rasakriyā

Dāruharidrā, paṭola, madhuka, nimba, padmaka and utpala– these are decocted in four times water reduced to one-fourth (one kuḍava = 160 ml). It is again heated till it is solidified. When cooled, honey in one-fourth quantity is added. This is used as collyrium in case of burning sensation, lachrymation, redness, haemorrhage and pain. [34-35]

रक्ताभिष्यन्दे चिकित्साक्रमः

तिक्तस्य सर्पिषः पानं बहुशश्च विरेचनम्। अक्ष्णोरपि समन्ताच्च पातनन्तु जलौकसः ॥
पित्ताभिष्यन्दशमनो विधिश्चाप्युपपादितः ॥ ३६ ॥

Intake of bitter ghṛtas, purgations, application of leechs to eyes– these are the remedies prescribed for paittika abhiṣyanda. [36]

शिग्रुपल्लवधूपः

शिग्रुपल्लवनिर्यासः सुघृष्टस्ताम्रसम्पुटे। घृतेन धूपितो हन्ति शोथघर्षाश्रुवेदनाः ॥ ३७ ॥

Juice of the tender leaves of śigru mixed with ghee is rubbed in a copper vessel and then fumigated on (cow-dung) fire. It removes swelling, rubbing, lachrymation and pain. [37]

निम्बादिगुडिका

पिष्टैर्निम्बस्य पत्रैरतिविमलतरैर्जातिसिन्धूत्थमिश्रा अन्तर्गर्भं दधाना पटुतरगुडिका पिष्टलोध्रेन भृष्टा।
तूलैः सौवीरसार्द्रैरतिशयमृदुभिर्वेष्टिता सा समन्ताच्चक्षुःकोपप्रशान्तिं चिरमुपरि दृशोर्भ्राम्यमाणा करोति ॥३८॥

Nimbādi guḍikā

Pill made of pulp of lodhra and rocksalt put within the paste of nimba leaves is slightly fried and then wrapped with soft cotton moistened with sour gruel. It is put on the eyes which pacifies conjunctivitis. [38]

बिल्वरसपूरणम्

बिल्वपत्ररसः पूतः सैन्धवाज्येन चान्वितः। शुल्वे वराटिकाघृष्टो धूपितो गोमयाग्निना ॥ ३९ ॥
पयसालोडितश्चाक्ष्णोः पूरणाच्छोथशूलनुत्। अभिष्यन्देऽधिमन्थे च स्रावे रक्ते च शस्यते ॥ ४० ॥

Strained juice of bilva leaves mixed with rocksalt and ghee is rubbed with a cowrie in a copper vessel, fumigated with cowdung fire and mixed with (woman's breast) milk. This is useful as eye-filling in abhiṣyanda, adhimantha, discharges and haemorrhage and which removes swelling and pain. [39-40]

सैन्धवाद्यञ्जनम्

सलवणकटुतैलं काञ्जिकं कांस्यपात्रे घनितमुपलघृष्टं धूपितं गोमयाग्नौ।
सपवनकफकोपं छागदुग्धावसिक्तं जयति नयनशूलं स्रावशोथं सरागम्॥ ४१॥

Saindhavādyañjana

Saindhava and mustard oil mixed with sour gruel are rubbed together with a stone-piece till thickened. Then it is fumigated with cow-dung fire and sprinkled with goat's milk. (Used as collyrium) it pacifies aggravated vāta and kapha and alleviates pain, discharge, swelling and redness in eyes. [41]

नेत्ररोगापहं योगद्वयम्

तरुस्थविद्धामलकरसः सर्वाक्षिरोगनुत्। पुराणं सर्वथा सर्पिः सर्वनेत्रामयापहम्॥ ४२॥

The juice extracted by piercing āmalaka fruit hanging on tree allays all.diseases of eye. Likewise, old ghee used in all ways (intake, snuff and collyrium) destroys all eye diseases. [42]

अधिमन्थादिचिकित्सा

अयमेव विधिः सर्वो मन्थादिष्वपि शस्यते। अशान्तौ सर्वथा मन्थे भ्रुवोरुपरि दाहयेत्॥ ४३॥

All these measures are useful in adhimantha (glaucoma) etc too. In adhimantha, if all other measures fail, cauterization should be applied above the eye-brows. [43]

नेत्रपाकचिकित्सा

जलौकापातनं शस्तं नेत्रपाके विरेचनम्। शिराव्यधं वा कुर्वीत सेकालेपांश्च शुक्रवत्॥ ४४॥

In netrapāka (suppuration in eyes) application of leechs, purgatives or venesection should be done in addition to sprinkling and paste as in śukra. [44]

षडङ्गगुग्गुलुः षडङ्गघृतगुग्गुलुश्च

बिभीतकशिवाधात्रीपटोलारिष्टवासकैः। क्वाथो गुग्गुलुना पेयः शोथशूलाक्षिपाकहा॥ ४५॥
पिल्लञ्च सव्रणं शुक्रं रोगार्दीश्चापि नाशयेत्। एतैश्चापि घृतं पक्वं रोगांस्तांश्च व्यपोहति॥ ४६॥

Ṣaḍaṅga guggulu-ṣaḍanga ghṛta-guggulu

Bibhītaka, harītakī, āmalaki, paṭola, nimba and vāsā– this decoction should be taken along with guggulu. It destroys swelling, pain, netrapāka, pilla (blurred eyes), savraṇa śukra (corneal ulcer), redness etc. Ghṛta is also prepared with the above drugs which is useful in same disorders. [45-46]

वासकादिक्वाथः

आटरूषाभयानिम्बधात्रीमुस्ताक्षकूलकैः। रक्तस्रावं कफं हन्ति चक्षुष्यं वासकादिकम्॥ ४७॥

Vāsādi

āsā, harītakī, nimba, āmalakī, musta, bibhītaka and paṭola– this vāsakādi kvātha is olesome for eyes and alleviates haemorrhage and kapha. [47]

बृहद्वासादिः

वासाघनं निम्बपटोलपत्रं तिक्ताऽमृताचन्दनवत्सकत्वक्।
कलिङ्गदार्वीदहनश्च शुण्ठी भूनिम्बधात्र्यावभयाबिभीतम्॥ ४८॥
श्यामा यवः क्राथमथाष्टभागं पिबेदिमं पूर्वदिने कषायम्।
तैमिर्यकण्डूपटलार्बुदश्च शुक्रं जयेत् सव्रणमव्रणञ्च॥ ४९॥
काचञ्च पिल्लञ्च महारुजञ्च नक्तान्ध्यरोगं श्वयथुं सशूलम्।
वासादिरेष प्रथितप्रभावो निहन्ति सर्वान् नयनामयांश्च॥ ५०॥

Bṛhat vāsadi

Vāsā, mustaka, nimba, paṭola leaves, kaṭukā, guḍūcī, candana, kuṭaja (bark), indrayava, citraka, śuṇṭhī, kirātatikta, dāruharidrā, citraka, āmalakī, harītakī, bibhītaka, śyāmā (trivṛt) and barley– These together should be decocted reducing water to one-eighth. This decoction should be taken in early morning. This formulation is quite potent and alleviates almost all diseases of eye such as timira, itching, paṭala, tumour, cornel ulcer and opacity, kāca, pilla, night-blindness, pain and swelling. [48-50]

पथ्यादिः

पथ्यास्तिस्रो बिभीतक्यः षड् धात्र्यो द्वादशैव तु। प्रस्थार्द्धे सलिले क्राथमष्टभागावशेषितम्॥ ५१॥
पीत्वाऽभिष्यन्दमास्रावं रागञ्च तिमिरं जयेत्। संरम्भरागशूलाश्रुनाशनं दृक्प्रसादनम्॥ ५२॥

Pathyādi

Pathyā (harītakī) 3, bibhītaka 6 and āmalaka 12– these are boiled in water 320 ml. reduced to one-eighth. Intake of this decoction overcomes discharge, redness, congestion, pain, lachrymation and timira and clears vision. [51-52]

अभिघातजे चिकित्सा

नेत्रे त्वभिहते कुर्याच्छीतमाश्च्योतनादिकम्॥ ५३॥

In case of injury to eyes, one should apply cold eye drops etc. [53]

दृष्टयभिघातचिकित्सा

दृष्टिप्रसादजननं विधिमाशु कुर्य्यात् स्निग्धैर्हिमैश्च मधुरैश्च तथा प्रयोगैः।
स्वेदाग्निधूमभयशोकरुजाभितापैरभ्याहतामपि तथैव भिषक् चिकित्सेत्॥ ५४॥

Besides, remedy to clear the vision should be applied immediately with unctuous, cold and sweet measures. Eyes affected by sudation, fire, smoke, fear, anxiety, pain and distress should be treated similarly. [54]

आगन्तुनेत्ररोगे चिकित्सा

आगन्तुदोषं प्रसमीक्ष्य कार्य्यं वस्त्रोष्मणा स्वेदितमादितस्तु।
आश्च्योतनं स्त्रीपयसा च सद्यो यच्चापि पित्तक्षतजापहं स्यात्॥ ५५॥

सूर्य्योपरागानलविद्युदादिविलोकनेनोपहतेक्षणस्य।
सन्तर्पणं स्निग्धहिमादि कार्य्यं सायं निषेव्यास्त्रिफलाप्रयोगा:॥ ५६॥

According to accidental factor, the part should be fomented, at first, with warm cloth followed by instillation of eye drops of women's brest-milk. In addition to this, the emergent measures controlling pitta and rakta should be employed. [55]

In case of loss of vision by looking at sun-eclipse, bright fire, thunderbold etc. saturative measures such as unctuous, cold etc. should be applied and in the evening triphalā should be used. [56]

निशादि:

निशाऽब्दत्रिफलादार्वीसितामधुकसंयुतम्। अभिघाताक्षिशूलघ्नं नारीक्षीरेण पूरणम्॥ ५७॥
इत्कटाङ्कुरजस्तद्वत् स्वरसो नेत्रपूरणम्॥ ५८॥

Niśādi

Niśā (haridrā), mustaka, triphalā, dāruharidrā, śarkarā and madhuka- (powder of) these mixed with women's breast-milk is instilled in eye. It removes aksiśūla (pain in eye) caused by injury. [57]

Similarly acts instillation of the juice of itkaṭa sprouts. [58]

मधुकाद्यं घृतम्

आजं घृतं क्षीरपात्रं मधुकश्चोत्पलानि च। जीवकर्षभकौ चापि पिष्ट्वा सर्पिर्विपाचयेत्॥
सर्वनेत्राभिघातेषु सर्पिरेतत् प्रशस्यते॥ ५९॥

Madhukādi ghṛta

Goat's ghee is cooked with milk 2.56 litre along with the paste of madhuka, utpala, jīvaka and ṛṣabhaka. This ghee is useful in all types of injury to eyes. [59]

सैन्धवाद्यञ्जनम्

सैन्धवं दारु शुण्ठी च मातुलुङ्गरसो घृतम्। स्तन्योदकाभ्यां कर्त्तव्यं शुष्कपाके तदञ्जनम्॥ ६०॥

Saindhāvadyañjana

In śuṣkākṣipāka (dry inflammation of eye) (paste of) saindhava, devadāru and śuṇṭhī mixed with mātuluṅga juice, ghee, woman's breast-milk and water should be used as collyrium. [60]

अन्यतोवात-मारुतपर्ययोश्चिकित्सा

वाताभिष्यन्दवच्चान्यद्वाते मारुतपर्य्यये। पूर्वभक्तं हितं सर्पि: क्षीरञ्चाप्यथ भोजने॥ ६१॥

Anyatovāta and vātaparyaya should be treated like vātika abhiṣyanda, particularly pre-meal intake of ghee and milk in diet is wholesome. [61]

वृक्षादन्यादिघृतम्

वृक्षादन्यां कपित्थे च पञ्चमूले महत्यपि। सक्षीरं कर्कटरसे सिद्धञ्चापि पिबेद् घृतम्॥ ६२॥

Vṛkṣādanyādi ghṛta

With vṛkṣādanī, kapittha and bṛhapañcamūla ghee is cooked along with milk and crab's juice. It is useful in above conditions. [62]

अभिष्यन्दादौ शिराव्यधः

अभिष्यन्दमधीमन्थं रक्तोत्थमथवाऽर्जुनम्। शिरोत्पातं शिराहर्षमन्यांश्चाक्षिभवान् गदान्॥
स्निग्धस्याज्येन कौम्भेन शिराव्यधैः शमं नयेत्॥ ६३॥

In abhiṣyanda, adhimantha, arjuna (subcongnctival haemorrhage) caused by rakta, śirotpāta (pannus) sirāharsa and other such disorders of eye the patient should be uncted with ten years old ghee and subjected to venesection. [63]

अम्लाध्युषितचिकित्सा

अम्लाध्युषितशान्त्यर्थं कुर्य्याल्लेपान् सुशीतलान्। तैन्दुकं त्रैफलं सर्पिर्जीर्णं वा केवलं हितम्॥
शिराव्यधं विना कार्य्यः पित्तस्यन्दहरो विधिः॥ ६४॥

In order to pacify amlādhyuṣita cold paste should be applied and ghee processed with tinduka or triphalā or simply old ghee should be taken. Venesection is contra-indicated, only pitta- alleviating measures should be applied. [64]

शिरोत्पातचिकित्सा

सर्पिः क्षौद्राञ्जनञ्च स्याच्छिरोत्पातस्य भेषजम्। तद्वत् सैन्धवकाशीशं स्तन्यपिष्टञ्च पूजितम्॥ ६५॥

Sauvirāñjana mixed with ghee and honey and used as collyrium is remedy for śirotpāta. Similarly acts the collyrium of saindhava and kāśīśa rubbed with breast-milk. [65]

शिराहर्षचिकित्सा

शिराहर्षेऽञ्जनं कुर्य्यात् फाणितं मधुसंयुतम्। मधुना तार्क्ष्यशैलं वा काशीशं वा समाक्षिकम्॥ ६६॥

In śirāharṣa collyrium should be applied of (1) phāṇita with honey or (2) rasāñjana with honey or (3) kāśīśa with honey. [66]

सव्रणशुक्रचिकित्सा

व्रणशुक्रप्रशान्त्यर्थं षडङ्गं गुग्गुलुं पिबेत्॥ ६७॥

In case of vraṇaśukra (corneal ulcer), ṣaḍaṅga guggulu should be used. [67]

कतकाद्यञ्जनम्

कतकस्य फलं शङ्खं तिन्दुकं रूप्यमेव च। कांस्ये निघृष्टं स्तन्येन क्षतशुक्रार्त्तिरागजित्॥ ६८॥

Katakādyañjana

Kataka (seed), conch-shell, tinduka and rajatabhasma mixed with breast-milk are rubbed in a iron vessel. Its collyrium removes corneal ulcer, pain and redness. [68]

चन्दनादिवर्ति:

चन्दनं गैरिकं लाक्षा मालतीकलिका समा। व्रणशुक्रहरा वर्त्तिः शोणितस्य प्रसादनी॥ ६९॥

Candanādi vartti

Candana, red ochre, lac and jātī (bud)– all in equal quantity are pounded with water and made into stick. It cures corneal ulcer and purifies blood. [69]

अपरे प्रयोगा:

शिरया वा हरेद्रक्तं जलौकाभिश्च लोचनात्। अक्षमज्जाऽञ्जनं सायं स्तन्येन शुक्रनाशनम्॥ ७०॥

(In corneal ulcer) blood should be evacuated from eye by venesection or leeching and in the evening, bibhītaka kernel rubbed with breast-milk should be applied as collyrium. [70]

पुण्डरीकप्रयोग:

एकं वा पुण्डरीकञ्च छागीक्षीरावसेचितम्। रागाश्रुवेदनां हन्यात् क्षतपाकात्ययाजकाः॥ ७१॥
तुत्थकं वारिणा युक्तं शुक्रं हन्त्यक्षिपूरणात्॥ ७२॥

Puṇḍarīka (prapauṇḍarīka) alone dissolved in goat's milk destroys redness, lachrymation, pain, corneal ulcer, pākātyaya and ajakā. [71]

Tuttha dissolved in water and instilled in eye cures śukra (corneal opacity). [72]

समुद्रफेनादिवर्ति:

समुद्रफेनदक्षाण्डत्वक्सिन्धूत्थैः समाक्षिकैः। शिग्रुबीजयुतैर्वर्त्तिः शुक्रघ्नी शिग्रुवारिणा॥ ७३॥

Samudraphenādi vartti

Samudraphena, hen's egg-shell, rocksalt, honey and śigru seeds are pounded with śigru juice (or decoction) and made into stick. It cures corneal opacity. [73]

धात्र्यादिसेक:

धात्रीफलं निम्बकपित्थपत्रं यष्ट्याह्वलोध्रं खदिरं तिलाश्च।
क्वाथः सुशीतो नयने निषिक्तः सर्वप्रकारं विनिहन्ति शुक्रम्॥ ७४॥

Sprinkling of eyes with cold decoction of āmalaka, leaves of nimba and kapittha, madhuyaṣṭī, lodhra, khadira and tila alleviates all types of corneal diseases. [74]

अव्रणशुक्रे योगा:

क्षुण्णपुन्नागपत्रेण परिभावितवारिणा। श्यामाक्वाथाम्बुना वाऽथ सेचनं कुसुमापहम्॥ ७५॥
दक्षाण्डत्वक्शिलाशङ्खकाचचन्दनगैरिकैः। तुल्यैरञ्जनयोगोऽयं पुष्पार्मादिविलेखनः॥ ७६॥

शिरीषबीजमरिचपिप्पलीसैन्धवैरपि। शुक्रे प्रघर्षणं कार्य्यमथवा सैन्धवेन च॥ ७७॥
बहुशः पलाशकुसुमस्वरसैः परिभाविता जयत्यचिरात्। नक्ताह्वबीजवर्त्तिः कुसुमचयं दृक्षु चिरजमपि॥ ७८॥

Sprinkling of eyes with water processed with pounded punnāga leaves or decoction of śyāmā destroys kusuma (corneal opacity). [75]

Hen's egg-shell, realgar, śaṅkha, kāca, candana and red ochre– all in equal quantity are pounded together. This collyrium acts as scarifying in puṣpa (corneal opacity), arma (pterygium) etc. [76]

In corneal opacity, the spot should be rubbed with (the powder of) śirīṣa (seeds), marica, pippalī and saindhava or saindhava alone. [77]

Powder of karañja seeds is macerated profusely with juice of palāsā flowers and made into vartti. Its application as collyrium cures corneal opacity even if chronic. [78]

सैन्धवादिवर्तिः

सैन्धवत्रिफलाकृष्णाकटुकाशङ्खनाभयः। सताम्ररजसो वर्त्तिः पिष्टशुक्रविनाशिनी॥ ७९॥

Saindhavādi vartti

Vartti made of saindhava, triphalā, pippalī, kaṭukā, śaṅkhanābhi and tāmrabhasma destroys piṣṭa and śukra (corneal opacity). [79]

चन्दनादिचूर्णाञ्जनम्

चन्दनं सैन्धवं पथ्या पलाशतरुशोणितम्। क्रमबद्धमिदं चूर्णं शुक्रार्मादिविलेखनम्॥ ८०॥

Candanādi cūrṇāñjana

Powder of candana, saindhava, harītakī and mocarasa successively increased in quantity is scarifying for corneal opacity, pterygium etc. [80]

दन्तवर्तिः

दन्तैर्हस्तिवराहोष्ट्रगवाश्वाजखरोद्भवैः। सशङ्खमौक्तिकाम्भोधिफेनैर्मरिचपादकैः॥
क्षतशुक्रमपि व्याधिं दन्तवर्त्तिर्निवर्त्तयेत्॥ ८१॥

Dantavartti

Teeth of elephant, boar, camel, cow, horse, goat and ass, conch-shell, pearl and cuttle-fish all in equal parts and marica one-fourth of the total– all are powdered, pounded with water and made into small sticks. This dantavartti cures even corneal ulcer. [81]

शङ्खादिचूर्णाञ्जनम्

शङ्खस्य भागाश्चत्वारस्ततोऽर्द्धेन मनःशिला। मनःशिलार्द्धं मरिचं मरिचार्द्धेन सैन्धवम्॥ ८२॥
एतच्चूर्णाञ्जनं श्रेष्ठं शुक्रयोस्तिमिरेषु च। पिच्चिटे मधुना योज्यमर्बुदे मस्तुना तथा॥ ८३॥

Śaṅkhādi cūrṇāñjana

Śaṅkha 4 parts, realgar 2 parts, marica 1 part and saindhava 1/2 part– this powder is used as collyrium in corneal ulcer and opacity as well as timira. In piccaṭa and arbuda it is used with honey and curd-water respectively. [82-83]

शुक्रघ्ना योगा:

ताप्यं मधूकसारो वा बीजञ्चाक्षस्य सैन्धवम्। मधुनाऽञ्जनयोगाः स्युश्चत्वारः शुक्रशान्तये ॥ ८४ ॥
वटक्षीरेण संयुक्तं श्लक्ष्णं कर्पूरजं रजः। क्षिप्रमञ्जनतो हन्ति शुक्रञ्चापि घनोन्नतम् ॥ ८५ ॥

Svarṇamākṣika, madhūka (sāra), bibhītaka (kernel) and saindhava– these four singly mixed with honey are used as collyrium in corneal opacity. [84]

Fine camphor powder mixed with latex of vaṭa should be used as collyrium in corneal opacity. [85]

त्रिफलामज्जादि

त्रिफलामज्जमङ्गल्यामधुकं रक्तचन्दनम्। पूरणं मधुसंमिश्रं क्षतशुक्राजकाश्रुजित् ॥ ८६ ॥

Triphalāmajjādi

Triphalā-majjā (fruit-pulp), gorocana, madhuka and rakta candana– these are powdered together, mixed with honey and applied to the eyes. It controls corneal ulcer, ajakā and lachrymation. [86]

क्षाराञ्जनम्

तालस्य नारिकेलस्य तथैवारुष्करस्य च। करीरस्य च वंशानां कृत्वा क्षारं परिस्रुतम् ॥ ८७ ॥
करभास्थिकृतं चूर्णं क्षारेण परिभावितम्। सप्तकृत्वोऽष्टकृत्वो वा श्लक्ष्णं चूर्णन्तु कारयेत् ॥ ८८ ॥
एतच्छुक्लेष्वसाध्येषु कृष्णीकरणमुत्तमम्। यानि शुक्राणि साध्यानि तेषां परममञ्जनम् ॥ ८९ ॥

Kṣārāñjana

Alkali is decanted from tāla, nārikela, bhallātaka and bamboo sprouts and with this powdered camel-bone is impregnated seven or eight times and finely powdered. It blackens the incurable corneal opacity and removes those which are curable. [87-89]

पटोलाद्यं घृतम्

पटोलं कटुकां दार्वीं निम्बं वासां फलत्रिकम्। दुरालभां पर्पटकं त्रायन्तीञ्च पलोन्मिताम् ॥ ९० ॥
प्रस्थमामलकानाञ्च क्राथयेन्नल्वणेऽम्भसि। पादशेषे रसे तस्मिन् घृतप्रस्थं विपाचयेत् ॥ ९१ ॥
कल्कैर्भूनिम्बकुटजमुस्तयष्ट्याह्वचन्दनैः। सपिप्पलीकैस्तत् सिद्धं चक्षुष्यं शुक्रयोर्हितम् ॥ ९२ ॥
घ्राणकर्णाक्षिवर्त्मत्वङ्मुखरोगव्रणापहम्। कामलाज्वरवीसर्पगण्डमालाहरं परम् ॥ ९३ ॥

Paṭolādya ghṛta

Paṭola, kaṭukā, dāruharidrā, nimba, vāsā, triphalā, durālabhā, parpaṭa and trāyamāṇā each 40 gm and āmalaka 640 gm should be decocted in water 10.24 litre reduced to

one-fourth. With this decoction ghee 640 gm should be cooked along with the paste of kirātatikta, indrayava, musta, madhuyaṣṭī, candana and pippalī.

It is wholesome to eyes particularly useful in corneal ulcer and opacity. Besides, it alleviates diseases of nose, ear, eyelids, skin and mouth, wounds, jaundice, fever, erysipelas and cervical adenitis. [90-93]

कृष्णाद्यं तैलम्

कृष्णाविडङ्गमधुयष्टिकसिन्धुजन्मविश्वौषधैः पयसि सिद्धमिदं छगल्याः।
तैलं नृणां तिमिरशुक्रशिरोऽक्षिशूलपाकात्ययाञ्जयति नस्यविधौ प्रयुक्तम्॥ ९४॥

Kṛṣṇādya taila

Kṛṣṇā (pippalī), viḍaṅga, madhuyaṣṭī, saindhava and śuṇṭhī– with these oil cooked along with goat's milk alleviates timira, śukra, headache, pain in eye and akṣipākātyaya used as snuff. [94]

अजकाचिकित्सा

अजकां पार्श्वतो विद्ध्वा सूच्या विस्राव्य चोदकम्। व्रणं गोमांसचूर्णेन पूरयेत् सर्पिषा सह॥ ९५॥

Ajakā (staphyloma)

Ajakā should be pierced with needle from side and fluid evacuated followed by application of powdered bull's meat mixed with ghee to the wound. [95]

सैन्धवादि

सैन्धवं वाजिपादश्च गोरोचनसमन्वितम्। शेलुत्वग्रससंयुक्तं पूरणश्चाजकापहम्॥ ९६॥

Saindhavādi

Saindhava, aśvakhura and gorocana mixed with the juice of śleṣmātaka (bark) is applied to eyes. It destroys ajakā. [96]

शशकघृतम्

शशकस्य शिरःकल्के शेषाङ्गक्वथिते जले। घृतस्य कुडवं पक्वं पूरणश्चाजकापहम्॥ ९७॥

Śaśaka-ghṛta

Ghee 160 gm cooked with the paste of the head of hare along with the decoction of its remaining parts. By local application it destroys ajakā. [97]

शशकाद्यं घृतम्

शशकस्य कषायेण सर्पिषः कुडवं पचेत्। यष्टीप्रपौण्डरीकस्य कल्केन पयसा समम्॥ ९८॥
छगल्याः पूरणाच्छुक्रक्षतपाकात्ययाजकाः। हन्ति भ्रूशङ्खशूलञ्च दाहरोगानशेषतः॥ ९९॥

Śaśakādya ghṛta

Ghee 160 gm is cooked with decoction of hare-body with the paste of madhuyaṣṭī

and prapauṇḍarīka and goat's milk. By local application, it destroys corneal opacity, ulcer, pākātyaya, ajakā, pain in eyebrows and temples, burning sensation and redness. [98-99]

चक्षुष्यवर्गः

त्रिफला घृतं मधु यवाः पादाभ्यङ्गः शतावरी मुद्गाः। चक्षुष्यः संक्षेपाद् वर्गः कथितो भिषग्भिरयम् ॥१००॥

Triphalā, ghee, honey, barley, massage in feet, śatāvarī and madhuka– this group is generally wholesome to eyes. [100]

तिमिरे त्रिफलाप्रयोगाः

लिह्यात् सदा ना त्रिफलां सुचूर्णितां घृतप्रगाढां तिमिरेऽथ पित्तजे।
समीरजे तैलयुतां कफात्मके मधुप्रगाढां विदधीत युक्तितः ॥१०१॥
कल्कः क्वाथोऽथवा चूर्णं त्रिफलाया निषेवितम्। मधुना हविषा वाऽपि समस्ततिमिरान्तकृत् ॥१०२॥
यस्त्रैफलं चूर्णमपथ्यवर्जी सायं समश्नाति हविर्मधुभ्याम्।
स मुच्यते नेत्रगतैर्विकारैर्भृत्यैर्यथा क्षीणधनो मनुष्यः ॥१०३॥
सघृतं वा वराक्काथं शीलयेत् तिमिरामयी ॥१०४॥
जाता रोगा विनश्यन्ति न भवन्ति कदाचन। त्रिफलायाः कषायेण प्रातर्नयनधावनात् ॥१०५॥

Timira (Defects of vision)

One should use properly the finely powdered triphalā with ghee, oil and honey in paittika, vātika and kaphaja timira respectively. [101]

Triphalā, in the form of paste, decoction or powder regularly taken with honey or ghee alleviates all types of timira. [102]

One who, abstaining from unwholesome items, takes triphalā powder with ghee and honey in evening is abandoned by the disease of eye as a poor man by attendants. [103]

One suffering from timira should take regularly the decoction of triphalā mixed with ghee. [104]

The diseases of eyes are cured as well as prevented by washing the eyes with triphalā decoction in morning. [105]

प्रयोगद्वयम्

जलगण्डूषैः प्रातर्बहुशोऽम्भोभिः प्रपूर्य्य मुखरन्ध्रम्। निर्दयमुक्षन्नक्षि क्षपयति तिमिराणि ना सद्यः ॥१०६॥
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यत् प्रदीयते। अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥१०७॥

While having filled mouth with profuse water if one sprinkles eyes with water profusely, he is freed from timira in no time. [106]

After taking food if one puts moistened palms after rubbing it alleviates timira. [107]

सुखावती वर्त्तिः

कतकस्य फलं शङ्खं त्र्यूषणं सैन्धवं सिता। फेनो रसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला ॥१०८॥
कुक्कुटाण्डकपालानि वर्त्तिरेषा व्यपोहति। तिमिरं पटलं काचमर्मं शुक्रं तथैव च ॥
कण्डूक्लेदार्बुदं हन्ति मलञ्चाशु सुखावती ॥१०९॥

Kataka seeds, śaṅkha, trikaṭu, saindhava, śarkarā, samudraphena, rasāñjana, viḍaṅga, realgar and hen's egg-shell– these are pounded together, mixed with honey and made into sticks. It alleviates timira, paṭala, kāca (cataract), arma, śukra, itching, discharge, growth and dirt. [108-109]

चन्द्रोदया वर्तिः

हरीतकी वचा कुष्ठं पिप्पली मरिचानि च। बिभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला ॥११०॥
सर्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत्। नाशयेत् तिमिरं कण्डूं पटलान्यर्बुदानि च ॥१११॥
अधिकानि च मांसानि येन रात्रौ न दृश्यते। अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् ॥
वर्त्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसादनी ॥११२॥

Candrodayā vartti

Harītakī, vacā, kuṣṭha, pippalī, marica, bibhītaka (kernel), śaṅkhanābhi and manaḥśilā– all in equal parts, should be pounded with goat's milk and made into sticks. It destroys timira, itching, paṭala, arbuda, other growth, nightblindness and corneal opacity. It also clears vision. [110-112]

हरीतक्यादिवर्तिः

हरीतकी हरिद्रा च पिप्पल्यो लवणानि च। कण्डूतिमिरजिद्वर्त्तिर्न क्वचित् प्रतिहन्यते ॥११३॥

Harītakyādi vartti

Harītakī, haridrā, pippalī and rocksalt, this vartti controls itching as well as timira and never fails. [113]

कुमारिका वर्तिः

अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः। जातीकुसुमपञ्चाशन्मरिचानि च षोडश ॥
एषा कुमारिका वर्त्तिर्गतं चक्षुर्निवर्त्तयेत् ॥११४॥

Kumārikā vartti

Sesamum flowers 80, pippalī fruits 60, jātī flowers 50 and marica 16. This kumārikā vartti restores the lost vision. [114]

त्रिफलाद्या वर्तिः

त्रिफला कुक्कुटाण्डत्वक् काशीशमयसो रजः। नीलोत्पलं विडङ्गानि फेनश्च सरितां पतेः ॥११५॥
आजेन पयसा पिष्ट्वा भावयेत् ताम्रभाजने। सप्तरात्रं स्थितं भूयः पिष्ट्वा क्षीरेण वर्त्तयेत् ॥
एषा दृष्टिप्रदा वर्त्तिरन्धस्याभिन्नचक्षुषः ॥११६॥

Triphalādyā vartti

Triphalā, hen's egg-shell, kāsīsa, lauhabhasma, nīlotpala, viḍaṅga, samudraphena– these are pounded with goat's milk and placed in a copper vessel for a week. Again it is pounded with milk and made into vartti. It restores vision even in the blind. [115-116]

चन्दनाद्या वर्तिः

चन्दनत्रिफलापूगपलाशतरुशोणितैः। जलपिष्टैरियं वर्त्तिरशेषतिमिरापहा ॥११७॥

Candanādyā vartti

Candana, triphalā, pūga and mocarsa– these are pounded with water and made into vartti. It alleviates all types of timira. [117]

सौगताञ्जनम्

निशाद्वयाभयामांसीकुष्ठकृष्णा विचूर्णिताः। सर्वनेत्रामयान् हन्यादेतत् सौगतमञ्जनम् ॥११८॥

Saugata añjana

Haridrā, dāruharidrā, harītakī, māṃsī, kuṣṭha and pippalī– all are pounded together. This collyrium known as 'saugata' (delivered by Buddha) destroys all diseases of eye. [118]

व्योषाद्या वर्तिः

व्योषोत्पलाभयाकुष्ठताक्ष्यैर्वर्त्तिः कृता हरेत्। अर्बुदं पटलं काचं तिमिरार्माश्रुनिःस्रुतिम् ॥११९॥

Vyoṣādya vartti

Vartti made of vyoṣa (trikaṭu), utpala, harītakī, kuṣṭha and rasāñjana alleviates arbuda, paṭala, kāca, timira, arma and lachrymation. [119]

त्र्यूषणाद्या वर्तिः

त्र्यूषणं त्रिफला वक्रं सैन्धवालमनःशिलाः। क्लेदोपदेहकण्डूघ्नी वर्त्तिः शस्ता कफापहा ॥१२०॥

Tryūṣaṇādyā vartti

Tryūṣaṇa (trikaṭu), triphalā, tagara, saindhava, orpiment and realgar– this vartti alleviates kapha and removes discharge, dirt and itching. [120]

नयनसुखा वर्तिः

एकगुणा मागधिका द्विगुणा च हरीतकी सलिलपिष्टा। वर्त्तिरियं नयनसुखा तिमिरार्मपटलकाचाश्रुहरी ॥१२१॥

Nayanasukhā vartti

Pippalī 1 part and harītakī 2 parts are pounded with water and made into vartti. This nayanasukhā vartti destroys timira, arma, paṭala, kāca and lachrymation. [121]

चन्द्रप्रभा वर्ति:

**अञ्जनं श्वेतमरिचं पिप्पली मधुयष्टिका। बिभीतकस्य मध्यन्तु शङ्खनाभिर्मनःशिला ॥१२२॥
एतानि समभागानि अजाक्षीरेण पेषयेत्। छायाशुष्कां कृतां वर्त्तिं नेत्रेषु च प्रयोजयेत् ॥१२३॥
अर्बुदं पटलं काचं तिमिरं रक्तराजिकाम्। अधिमांसं मलश्चैव यश्च रात्रौ न पश्यति॥
वर्त्तिश्चन्द्रप्रभा नाम जातान्ध्यमपि शोधयेत् ॥१२४॥**

Candraprabhā vartti

Rasāñjana, white marica, pippalī, madhuyaṣṭī, bibhītaka (kernel), śaṅkhabhasma and manaḥśilā, all in equal parts, are pounded with goat's milk, dried in shade and made into sticks. One should apply it to eyes in cases of arbuda, paṭala, kāca, timira, raktarājikā, adhimāṃsa, dirt and night-blindness. It is also useful in congenital blindness. [122-124]

श्रीनागार्जुनवर्ति:

**त्रिफलाव्योषसिन्धूत्थयष्टीतुत्थरसाञ्जनम्। प्रपौण्डरीकं जन्तुघ्नं लोध्रं ताम्रं चतुर्दश ॥१२५॥
द्रव्याण्येतानि सञ्चूर्ण्य वर्त्तिः कार्या नभोऽम्बुना। नागार्जुनेन लिखिता स्तम्भे पाटलिपुत्रके॥१२६॥
नाशिनी तिमिराणाञ्च पटलानां तथैव च। सद्यः प्रकोपं स्तन्येन स्त्रिया विजयते ध्रुवम् ॥१२७॥
किंशुकस्वरसेनाथ पिल्लपुष्पकरक्तताः। अञ्जनाल्लोध्रतोयेन चासन्नतिमिरं जयेत् ॥१२८॥
चिरमाच्छादिते नेत्रे बस्तमूत्रेण संयुता। उन्मीलयत्यकृच्छ्रेण प्रसादञ्चाधिगच्छति ॥१२९॥**

ŚrīNāgārjuna-vartti

Triphalā, trikaṭu, saindhava, madhuyaṣṭī, tuttha, rasāñjana, prapauṇḍarīka, viḍaṅga, lodhra and copper (bhasma)– these fourteen ingredients are powdered together and made into sticks with rain-water. This formulation is inscribed by Nāgārjuna in a pillar at Pāṭaliputra.

By applying it with woman's breast-milk it destroys timira, paṭala and acute inflammation. Likewise, with the juice of palāśa flowers, it cures pilla, corneal opacity and redness (in eye), with decoction of lodhra it controls metropia and with goat's urine it alleviates timira, even if severe, and clears the vision. [125-129]

पिप्पल्याद्या वर्ति:

**पिप्पलीं सतगरोत्पलपत्रां वर्त्तयेत् समधुकां सहरिद्राम्।
एतया सततमञ्जयितव्यं यः सुपर्णसममिच्छति चक्षुः ॥१३०॥**

Pippalyādyā vartti

Pippalī, petals of utpala flower, madhuka and haridrā– these are made into vartti. It should be used regularly as collyrium by one who desires vision like that of garuḍa. [130]

कोकिला वर्त्ति:

व्योषायश्चूर्णसिन्धूत्थत्रिफलाऽञ्जनसंयुता। वर्त्तिका जलपिष्टेयं कोकिला तिमिरापहा ॥१३१॥

Kokilā vartti

Trikaṭu, lauhabhasma, saindhava, triphalā and sauvirāñjana– these are pounded with water and made into sticks. This kokilā vartti destroys timira. [131]

त्रिकट्वादिवर्त्तिः

त्रीणि कटूनि करञ्जफलानि द्वे रजनी सह सैन्धवकञ्च। बिल्वतरोर्वरुणस्य च मूलं वारिचरं दशमं प्रवदन्ति॥
हन्ति तमस्तिमिरं पटलञ्च पिच्चिटशुक्रमथार्जुनकञ्च। अञ्जनकं जनरञ्जनकञ्च दृक् च न नश्यति वर्षशतञ्च॥

Trikaṭvādi vartti

Trikaṭu, karañja (seeds), haridrā, dāruharidrā, saindhava, root of bilva and varuṇa and śaṅkhabhasma– these ten ingredients are pounded together and made into vartti.

It destroys severe timira, paṭala, picciṭa, śukra and arjuna by application to eyes and makes the eyes beautiful without loss of vision upto 100 yrs. [132-133]

नीलोत्पलादिवर्त्तिः

नीलोत्पलं विडङ्गानि पिप्पली रक्तचन्दनम्। अञ्जनं सैन्धवञ्चैव सद्यस्तिमिरनाशनम्॥१३४॥

Nīlotpalādi vartti

Nīlotpala, viḍaṅga, pippalī, raktacandana, rasāñjana and saindhava– this vartti destroys timira instantaneously. [134]

पत्रादिवर्त्तिः

पत्रगैरिककर्पूरयष्टीनीलोत्पलाञ्जनम्। नागकेशरसंयुक्तमशेषतिमिरापहम्॥१३५॥

Patrādi vartti

Patra, svarṇagairika, karpūra, madhuyaṣṭī, nīlotpala, rasāñjana and nāgakeśara– this (vartti) destroys all types of timira. [135]

शङ्खादिवर्त्तिः

शङ्खस्य चतुरो भागास्तदर्द्धेन मनःशिला। मनःशिलार्द्धं मरिचं मरिचार्द्धेन पिप्पली॥१३६॥
वारिणा तिमिरं हन्ति अर्बुदं हन्ति मस्तुना। पिच्चिटं मधुना हन्ति स्त्रीक्षीरेण तदुत्तमम्॥१३७॥

Śaṅkhādi vartti

Śaṅkha 4 parts, realgar 2 parts, marica 1 part and pippalī 1/2 part– these together are made into vartti. With water, curd-water and honey it destroys timira, arbuda and picciṭa respectively. Its combination with woman's breast-milk is the best one. [136-137]

हरिद्रादिवर्त्तिः

हरिद्रा निम्बपत्राणि पिप्पल्यो मरिचानि च। भद्रमुस्तं विडङ्गानि सप्तमं विश्वभेषजम्॥१३८॥
गोमूत्रेण गुडी कार्य्या छागमूत्रेण चाञ्जनम्। ज्वरांश्च निखिलान् हन्ति भूतावेशं तथैव च॥१३९॥
वारिणा तिमिरं हन्ति मधुना पटलं तथा। नक्तान्ध्यं भृङ्गराजेन नारीक्षीरेण पुष्पकम्॥
शिशिरेण परिस्रावमधुषं पिच्चिटं तथा॥१४०॥

Haridrādi vartti

Haridrā, nimba leaves, pippalī, marica, bhadramusta, viḍaṅga, and śuṇṭhī– these seven

ingredients should be pounded with cow's urine and made into pills. its application as collyrium with goat's urine alleviates all fevers and infestation of invisible agents. Applied with water, honey, bhṛṅgarāja (juice) and woman's breast-milk it alleviates timira, paṭala, naktāndhya (night-blindness) and conreal opacity respectively. It removes discharge adhruṣa and piccita applied with dew water. [138-140]

गण्डूपदाञ्जनम्

संगृह्योपरतानलक्तकरसेनामृज्य गण्डूपदांल्लाक्षारञ्जिततूलवर्त्तिनिहितान् यष्टीमधून्मिश्रितान्।
प्रज्वाल्योत्तमसर्पिषाऽनलशिखासन्तापजं कज्जलं दूरासन्ननिशाऽऽन्ध्यसर्वतिमिरप्रध्वंसकृच्चोदितम् ॥१४१॥

Gaṇḍūpadādyañjana

Dead earth worms are collected and cleaned with lac-juice and mixed with (the powder of) yaṣṭīmadhu. Then it is kept within a cotton-wick impregented with lac and ignited with ghee. The black soot so coming out is collected on a piece of glass etc. Application of this collyrium is useful in dūrāndhya (myopia), nikaṭāndhya (metropia), night-blindness and all other types of timira. [141]

अङ्गुल्यञ्जनम्

भूमौ निघृष्टयाऽङ्गुल्या अञ्जनं शमनं तयोः। तिमिरकाचार्महरं धूमिकायाश्च नाशनम् ॥१४२॥

After rubbing a finger on earth, it is applied as collyrium. It alleviates myopia, metropia, timira, kāca, arma and blurred (smoky) vision. [142]

नागशलाकाञ्जनम्

त्रिफलाभृङ्गमहौषधमध्वाज्यच्छागपयसि गोमूत्रे। नागं सप्तनिषिक्तं करोति गरुडोपमं चक्षुः ॥१४३॥

Nāgaśalākāñjana I

Lead (heated and) dipped seven times each into decoction of pippalī, bhṛṅgarāja and śuṇṭhī, honey, ghee, goat's milk and cow's urine makes the eye as that of garuḍa (by application as collyrium). [143]

अपरं नागशलाकाञ्जनम्

त्रिफलसलिलयोगे भृङ्गराजद्रवे च हविषि च विषकल्के क्षीर आजे मधूग्रे।
प्रतिदिनमथ तप्तं सप्तधा सीसमेकं प्रणिहितमथ पश्चात् कारयेत् तच्छलाकाम् ॥१४४॥
सवितुरुदयकाले साञ्जना व्यञ्जना वा करकरिकसमेतानर्मपैच्चिटचरोगान्।
असितसितसमुत्थान् सन्धिवर्त्माभिजातान् हरति नयनरोगान् सेव्यमाना शलाका ॥१४५॥

Nāgaśalākāñjana II

Lead is heated and dipped into triphalā decoction, bhṛṅgaraja juice, ghee processed with aconite, goat's milk and profuse honey daily seven times and then made into a rod. This is applied with or without collyrium at sunrise– It alleviates irritation, arma, piccita and diseases of black and white portions, joints and eyelids. [144-145]

गुञ्जामूलादिचूर्णाञ्जनम्

चिञ्चापत्ररसं निधाय विमले चौदुम्बरे भाजने मूलं तत्र निघृष्टसैन्धवयुतं गौञ्जं विशोष्यातपे।
तच्चूर्णं विमलाञ्जनेन सहितं नेत्राञ्जने शस्यते काचार्मार्जुनपिच्चिटे सतिमिरे स्रावश्च निर्वापयेत् ॥१४६॥

Guñjāmūlādi cūrṇāñjana

Juice of tamarind leaves is kept in a copper vessel along with rocksalt and guñjā root and dried in the sun and then powdered. This powder mixed with sauvirāñjana is useful as collyrium in eyes. It alleviates kāca, arma, arjuna, piccița, timira and discharge. [146]

सैन्धवचूर्णाञ्जनम्

चित्राषष्ठीयोगे सैन्धवममलं विचूर्ण्य तेनाक्षि। सममञ्जनेन तिमिरं गच्छति वर्षादसाध्यमपि ॥१४७॥

Fine powder of rocksalt should be applied as collyrium to eyes in confluence of citrā (nakṣatra) and ṣaṣṭhī (tithi). It cures timira even if chronic. [147]

कणादिरसक्रियाञ्जनम्

दद्यादुशीरनिर्य्यूहे चूर्णितं कणसैन्धवम्। तत् स्रुते सघृते भूयः पचेत् क्षौद्रं क्षिपेद् घने॥
शीते तस्मिन् हितमिदं सर्वजे तिमिरेऽञ्जनम् ॥१४८॥

Kaṇādi rasakriyāñjana

In decoction of uśīra kaṇā (pippalī), saindhava and ghee are mixed and heated till thickened. When cooled honey is added. This collyrium is useful in timira caused by all doṣas. [148]

धात्र्यादिरसक्रियाञ्जनम्

धात्रीरसाञ्जनक्षौद्रसर्पिर्भिस्तु रसक्रिया। पित्तानिलाक्षिरोगघ्नी तैमिर्य्यपटलापहा ॥१४९॥

Dhātryādi rasakriyāñjana

Rasakriyā (avaleha) is prepared of dhātrīkvātha mixed with rasāñjana and ghee. When cooled honey is added. It alleviates eye diseases caused by pitta and vāta particularly timira and paṭala. [149]

शृङ्गवेरादिनस्यम्

शृङ्गवेरं भृङ्गराजं यष्टीतैलेन मिश्रितम्। नस्यमेतेन दातव्यं महापटलनाशनम् ॥१५०॥

Śṛṅgaverādi nasya

Oil mixed with (powder of) śṛṅgavera (śuṇṭhī), bhṛṅgrāja and madhuyaṣṭī should be used as snuff. It destroys paṭala. [150]

कफजलिङ्गनाशे शस्त्रकर्म

लिङ्गनाशे कफोद्भूते यथावद्विधिपूर्वकम्। विद्ध्वा दैवकृते छिद्रे नेत्रं स्तन्येन पूरयेत् ॥१५१॥
ततो दृष्टेषु रूपेषु शलाकामाहरेच्छनैः। नयनं सर्पिषाऽभ्यज्य वस्त्रपट्टेन वेष्टयेत् ॥१५२॥

ततो गृहे निराबाधे शयीतोत्तान एव च। उद्गारकासक्षवथुष्ठीवनोत्कम्पनानि च ॥१५३॥
तत्कालं नाचरेदूर्ध्वं यन्त्रणा स्नेहपीतवत्। त्र्यहात् त्र्यहाच्च धावेत कषायैरनिलापहैः ॥१५४॥
वायोर्भयात् त्र्यहादूर्ध्वं स्नेहयेदक्षि पूर्ववत्। दशाहमेवं संयम्य हितं दृष्टिप्रसादनम् ॥
पश्चात्कर्म च सेवेत लघ्वन्नञ्चापि मात्रया ॥१५५॥

Surgical operation in kaphaja liṅganāśa
(advanced cataract)

In kaphaja liṅganāśa the natural aperture should be punctured as prescribed and eye is filled with breast-milk, when vision appears the rod should be removed slowly. Eye is anointed with ghee and bandaged. Then in a safe place the patient should lie down straight avoiding belching, coughing, sneezing, spitting and trembling during the period (a week). Other restrictions are as during intake of sneha. On every third day eye should be washed with vāta-alleviating decoction. After that eye should be fomented as usual. Following the restriction in this way for ten days post-operative measures promoting the vision should be adopted along with light diet in proper quantity. [151-155]

दुष्टवेधजा रोगा:

रागश्चोषोऽर्बुदं शोथो बुद्बुदं केकराक्षिता। अधिमन्थादयश्चान्ये रोगाः स्युर्दुष्टवेधजाः ॥१५६॥
अहिताचारतो वाऽपि यथास्वं तानुपाचरेत्। रुजायामक्षिरोगे वा भूयो योगान् निबोध मे ॥१५७॥

Redness, burning sensation, arbuda, swelling, budbuda, squint, adhimantha etc. are caused by defective puncturing. [156]

These may also be caused by unwholesome movements. These should be treated as prescribed for respective disorders. Further formulations useful in pain and redness of eye are described below. [157]

दूर्वादिलेप:

कल्किताः सघृता दूर्वायवगैरिकशारिवाः। मुखालेपे प्रयोक्तव्या रुजारागोपशान्तये ॥१५८॥

Dūrvādi lepa

Paste of dūrvā, yava, gairika and sārivā mixed with ghee is applied to face (around eyes). It removes pain and redness. [158]

पयस्यादिलेप:

पयस्याशारिवापत्रमञ्जिष्ठामधुकैरपि। अजाक्षीरान्वितैर्लेपः सुखोष्णः पथ्य उच्यते ॥१५९॥

Payasyādi lepa

Payasyā, sārivā, patra, mañjiṣṭhā and madhuka are pounded with goat's milk. It should be applied warm in the above disorders. [159]

काकोल्यादिघृतम्

वातघ्नसिद्धे पयसि सिद्धं सर्पिश्चतुर्गुणे। काकोल्यादिप्रतीवापं प्रयुञ्ज्यात् सर्वकर्मसु ।।१६०।।

Ghee cooked with four times milk processed with vāta– alleviating drugs (bhadradārvādi group) along with the paste of kākolyādi drugs is useful in all cases. [160]

रक्तमोक्षणं दाहश्च

शाम्यत्येवं न चेच्छूलं स्निग्धस्विन्नस्य मोक्षयेत्। ततः शिरां दहेच्चापि मतिमान् कीर्त्तिता यथा ।।१६१।।

If pain does not subside by the above remedies, venesection should be performed after proper unction and sudation followed by cauterization as prescribed. [161]

मेषशृङ्गादिवर्त्तिः (१)

दृष्टेरतः प्रसादार्थमञ्जने श्रृणु मे शुभे। मेषशृङ्गस्य पत्राणि शिरीषधवयोरपि ।।१६२।।
मालत्याश्चापि तुल्यानि मुक्ता वैदूर्य्यमेव च। अजाक्षीरेण सम्पिष्य ताम्रे सप्ताहमावपेत् ।।
प्रणिधाय तु तद्वर्त्तिं योजयेदञ्जने भिषक् ।।१६३।।

Meṣaśṛṅgādi vartti (1)

For clearing vision two collyriums are described here– leaves of meṣaśṛṅga, śirīṣa, dhava and jātī, muktā and vaidūrya– all in equal parts are pounded together with goat's milk and kept in a copper vessel for a week. Then it should be made into stick and applied as collyrium. [162-163]

स्रोतोजादिवर्त्तिः (२)

स्रोतोजं विद्रुमं फेनं सागरस्य मनःशिला। मरिचानि च तद्वर्त्तिं कारयेत् पूर्ववद्भिषक् ।।१६४।।

Srotojādi vartti (2)

In the same way, srotoja (srotoñjana), pravāla, samudraphena, realgar and marica are made into vartti. [164]

रसाञ्जनादिवर्त्तिः

रसाञ्जनं घृतं क्षौद्रं तालीशं स्वर्णगैरिकम्। गोशकृद्रससंयुक्तं पित्तोपहतदृष्टये ।।१६५।।

Rasāñjanādi vartti

Rasāñjana, ghee, honey, tālīśa, svarnagairika are mixed with cowdung juice and made into vartti which is useful in eye damaged by pitta. [165]

नलिनादिगुडिकाञ्जनम्

नलिनोत्पलकिञ्जल्कं गोशकृद्रससंयुतम्। गुडिकाञ्जनमेतत् स्याद्दिनरात्र्यन्धयोर्हितम् ।।१६६।।

Nalinādi guḍikāñjana

Stamens of lotus and water lily are pounded with cow-dung juice and made into pills which are rubbed and used as collyrium. It is efficacious in blindness during day and night. [166]

नदीजादिगुडिकाञ्जनम्

नदीजशङ्खत्रिकटून्यथाञ्जनं मनःशिला द्वे च निशे गवां यकृत्।
सचन्दनेयं गुडिकाऽथ चाञ्जने प्रशस्यते रात्रिदिनेष्वपश्यताम्॥१६७॥

Nadījādi guḍikāñjana

Likewise, guḍikāñjana of nadīja (saindhava), śaṅkha, trikaṭu, rasāñjana, realgar, haridrā, dāruharidrā, cow's urine and candana is useful in blindness during night and day. [167]

नक्तान्ध्ये कणाप्रयोगः

कणाच्छागयकृन्मध्ये पक्वा तद्रसपेषिता। अचिराद्धन्ति नक्तान्ध्यं तद्वत् सक्षौद्रमूषणम्॥१६८॥

Pippalī put within goat's liver is steamed, then pounded with its juice (and made into vartti). Similarly vartti is made of marica mixed with honey. They are useful in night blindness. [168]

गोधायकृदञ्जनम्

पचेत्तु गौधं हि यकृत् प्रकल्पितं प्रपूरितं मागधिकाभिरग्निना।
निषेवितं तद् यकृदञ्जनेन च निहन्ति नक्तान्ध्यमसंशयं खलु॥१६९॥

Iguana's liver should be filled with pippalī (powder) and cooked on fire. By intake and collyrium of this night-blindness is alleviated. [169]

नक्तान्ध्यहरा योगाः

दध्ना निघृष्टं मरिचं रात्र्यान्ध्याञ्जनमुत्तमम्। ताम्बूलयुक्तं खद्योतभक्षणञ्च तदर्थकृत्॥१७०॥
शफरीमत्स्यक्षारो नक्तान्ध्यमञ्जनतो विनिहन्ति। तद्वद्रामठटङ्कणकर्णमलञ्चैकशोऽञ्जनान्मधुना॥१७१॥
केशराजान्वितं सिद्धं मत्स्याण्डं हन्ति भक्षितम्। नक्तान्ध्यं नियतं नृणां सप्ताहात् पथ्यसेविनाम्॥१७२॥

The collyrium of marica rubbed with curd is good for night blindness. Similarly acts the intake of firefly mixed with betel leaf. [170]

The ash of śapharī fish mixed with honey is useful as collyrium. Similarly are used hiṅgu, bee-wax and ear-wax singly. [171]

Fish eggs mixed with keśarāja should be taken in night-blindness. It alleviates the disease in a week if the patient is kept on wholesome diet. [172]

त्रिफलाघृतम्

त्रिफलाक्काथकल्काभ्यां सपयस्कं शृतं घृतम्। तिमिराण्यचिराद्धन्यात् पीतमेतन्निशामुखे॥१७३॥

Triphalā-ghṛta

Ghee cooked with decoction and paste of triphalā along with milk and taken in evening destroys timira instantaneously. [173]

महात्रिफलाद्यं घृतम्

त्रिफलाया रसप्रस्थं प्रस्थं भृङ्गरसस्य च। वृषस्य च रसप्रस्थं शतावर्य्याश्च तत्समम्।।१७४।।
अजाक्षीरं गुडूच्याश्च आमलक्या रसं तथा। प्रस्थं प्रस्थं समाहृत्य सर्वैरेभिर्घृतं पचेत्।।१७५।।
कल्कः कणा सिता द्राक्षा त्रिफला नीलमुत्पलम्। मधुकं क्षीरकाकोली मधुपर्णी निदिग्धका।।१७६।।
तत् साधु सिद्धं विज्ञाय शुभे भाण्डे निधापयेत्। ऊर्ध्वपानमधःपानं मध्ये पानञ्च शस्यते।।१७७।।
यावन्तो नेत्ररोगास्तान् पानादेवापकर्षति। सरक्ते रक्तदुष्टे च रक्ते वाऽतिस्रुतेऽपि च।।१७८।।
नक्तान्ध्ये तिमिरे काचे नीलिकापटलार्बुदे। अभिष्यन्देऽधिमन्थे च पक्ष्मकोपे सुदारुणे।।१७९।।
नेत्ररोगेषु सर्वेषु वातपित्तकफेषु च। अदृष्टिं मन्ददृष्टिञ्च कफवातप्रदूषिताम्।।१८०।।
स्रवतो वातपित्ताभ्यां सकण्ड्वासन्नदूरदृक्। गृध्रदृष्टिकरं सद्यो बलवर्णाग्निवर्द्धनम्।।
सर्वनेत्रामयं हन्यात् त्रिफलाद्यं महद् घृतम्।।१८१।।

Mahātriphalādya ghṛta

Triphalā decoction, juice of bhṛṅgarāja, vāsā, śatāvarī, guḍūcī and āmalaka each 640 gm and goat's milk 640 ml– with these ghee is cooked along with the paste of pippalī, śarkarā, drākṣā, triphalā, nīlotpala, madhuka, kṣīrakākolī, guḍucī and kaṇṭakārī. After the process is completed, it should be kept in a good container.

It is taken before and after and also in the middle of meal by which it alleviates all the diseases of eye particularly blood-tinged, affected by blood or excessive haemorrhage, night-blindness, timira, kāca, nīlikā, paṭala, arbuda, abhiṣyanda, adhimantha, pakṣmakopa, eye-diseases caused by vāta, pitta and kapha, loss and decrease of sight caused by kapha and vāta, discharge due to vāta and pitta, itching, myopia and metropia. This mahātriphalā-ghṛta promotes eye-sight, strength, lustre and digestive fire and destroys all diseases of eye. [174-181]

त्रैफलं घृतम्

त्रिफला त्र्यूषणं द्राक्षा मधुकं कटुरोहिणी। प्रपौण्डरीकं सूक्ष्मैला विडङ्गं नागकेशरम्।।१८२।।
नीलोत्पलं शारिवे द्वे चन्दनं रजनीद्वयम्। कार्षिकैः पयसा तुल्यं त्रिगुणं त्रिफलारसम्।।१८३।।
घृतप्रस्थं पचेदेतत् सर्वनेत्ररुजापहम्। तिमिरं दोषमास्रावं कामलां काचमर्बुदम्।।१८४।।
वीसर्पं प्रदरं कण्डूं रक्तं श्वयथुमेव च। खालित्यं पलितञ्चैव केशानां पतनं तथा।।
विषमज्वरमर्माणि शुक्रञ्चाशु व्यपोहति।।१८५।।
अन्ये च बहवो रोगा नेत्रजा ये च वर्त्मजाः। तान् सर्वान् नाशयत्याशु भास्करस्तिमिरं यथा।।१८६।।
न चैवास्मात् परं किञ्चिदृषिभिः काश्यपादिभिः। दृष्टिप्रसादनं दृष्टं यथा स्यात् त्रैफलं घृतम्।।१८७।।

Traiphala ghṛta

Ghee 640 gm is cooked with (the paste of) triphalā, trikaṭu, drākṣā, madhuka, kaṭukā, prapauṇḍarīka, elā, viḍaṅga, nāgakeśara, nīlotpala, sārivā, kṛṣṇa sārivā, candana, haridrā, dāruharidrā, each 10 gm along with equal quantity of milk and three times triphalā decoction.

It destroys all diseases of eye such as timira, discharge, kāca, arbuda, kāmalā, erysipelas, pradara, itching, redness, swelling, blindness, greying and falling of hairs, viṣamajvara, arma and śukra. It also alleviates other diseases of eye and eye-lid as the sun destroys darkness. No remedy other than traiphala ghṛta is seen by the sages kāśyapa etc so vision-clearing. [182-187]

फलत्रिकादिघृतम्

फलत्रिकाभीरुकषायसिद्धं कल्केन यष्टीमधुकस्य युक्तम्।
सर्पि: समं क्षौद्रचतुर्थभागं हन्यात् त्रिदोषं तिमिरं प्रवृद्धम्॥१८८॥

Phalatrikādi ghṛta

Ghee cooked with decoction of triphalā and juice of śatāvarī along with the paste of madhuyaṣṭī is taken with one-fourth honey. It destroys timira caused by tridoṣa even if well advanced. [188]

भृङ्गराजाद्यं तैलम्

भृङ्गराजरसप्रस्थे यष्टीमधुपलेन च। तैलस्य कुडवं पक्वं सद्यो दृष्टिं प्रसादयेत्॥
नस्याद्वलीपलितघ्नं मासेनैतन्न संशय: ॥१८९॥

Bhṛṅgarājādya taila

Oil 160 ml cooked with bhṛṅgarāja juice 640 ml and (the paste of) madhuyaṣṭī 40 gm and used as snuff clears vision instantaneously and removes wrinkles and greying of hair within a month. [189]

गोमयतैलम्

गवां शकृत्क्वाथविपक्वमुत्तमं हितञ्च तैलं तिमिरेषु नस्यत:।
घृतं हितं केवलमेव पैत्तिके तथाऽणुतैलं पवनासृगुत्थयो: ॥१९०॥

Oil cooked with decoction of cow-dung is beneficial as snuff, in timira. In that caused by pitta ghee alone should be used (as snuff) while in predominance of vāta and rakta aṇutaila is useful (as snuff). [190]

नृपवल्लभं तैलं घृतञ्च

जीवकर्षभकौ मेदे द्राक्षांऽशुमती निदिग्धिका बृहती। मधुकं बला विडङ्गं मञ्जिष्ठा शर्करा रास्ना ॥१९१॥
नीलोत्पलं श्वदंष्ट्रा प्रपौण्डरीकं पुनर्नवा लवणम्। पिप्पल्य: सर्वेषां भागैरक्षांशिकै: पिष्टै: ॥१९२॥
तैलं यदि वा सर्पिर्दत्त्वा क्षीरं चतुर्गुणं पक्वम्। आत्रेयनिर्मितमिदं तैलं नृपवल्लभं सिद्धम्॥१९३॥
तिमिरं पटलं काचं नक्तान्ध्यमर्बुदं तथाऽन्ध्यञ्च। श्वेतञ्च लिङ्गनाशं नाशयति च नीलिकां व्यङ्गम्॥१९४॥
मुखनासादौर्गन्ध्यं पलितञ्चाकालजं हनुस्तम्भम्। कासं श्वासं शोषं हिक्कां स्तम्भं तथाऽत्ययं नेत्रे॥१९५॥
मुखजैह्म्यमर्द्धभेदं रोगं बाहुग्रहं शिर:स्तम्भम्। रोगानथोदर्ध्वजत्रो: सर्वानचिरेण नाशयति॥१९६॥
पक्तव्यं कुडवं तैलं नस्यार्थं नृपवल्लभे। अक्षांशै: शाणिकै: कल्कैरन्ये भृङ्गादितैलवत्॥१९७॥

Nṛpavallabha taila-ghṛta

Oil or ghee is cooked with the paste of jīvaka, ṛṣabhaka, medā, drākṣā, śālaparnī, kaṇṭakārī, bṛhatī, madhuka, balā, viḍaṅga, mañjiṣṭhā, śarkarā, rāsnā, nīlotpala, gokṣura, prapauṇḍarīka, punarnavā, saindhava and pippalī each 10 gm along with four times milk. This Nṛpavallabha taila is formulated by Ātreya and is useful in timira, paṭala, kāca, night blindness, arbuda, blindness, corneal opacity, liṅganāśa, nīlikā, vyaṅga, foul odour from mouth and nose, premature greying of hairs, lockjaw, cough, dyspnoea, consumption, hiccough, stiffening, pākātyaya, crookedness in face, hemicrania, stiffening of arms and head and other supra-clavicular diseases. If the oil is to be used as snuff, it should be taken 160 ml and the drugs for paste 2.5 gm each (total 10 gm). Others prescribe cooking of oil like bhṛṅgarāja-taila. [191-197]

अभिजितं तैलम्

तैलस्य पचेत् कुडवं मधुकस्य पलेन कल्कपिष्टेन। आमलकरसप्रस्थं क्षीरप्रस्थेन संयुक्तम् ॥१९८॥
कृत्वाभिजितं नाम्ना तैलं तिमिरं हरेत्तु मुनिप्रोक्तम्। विमलां कुरुते दृष्टिं नष्टामप्यानयेच्च तथा ॥१९९॥

Abhijita taila

Oil 160 ml is cooked with the paste of madhuka 40 gm along with āmalaka juice and milk each 640 ml. This abhijita taila, delivered by a sage, alleviates timira, makes the eye-sight clear and restores sight even to the blind. [198-199]

अर्मणि शस्त्रचिकित्सा

अर्म तु छेदनीयं स्यात् कृष्णप्राप्तं भवेद् यदा। वडिशविद्धमुन्नम्य त्रिभागश्चात्र वर्जयेत् ॥२००॥

Pterygium, if extended to black portion, should be excised after raising it (with needle) and piercing with a hook leaving one-third portion (so as to avoid pupil). [200]

पिप्पल्यादिगुडिकाञ्जनम्

पिप्पलीत्रिफलाद्राक्षालौहचूर्णं ससैन्धवम्। भृङ्गराजरसे पिष्टं गुडिकाञ्जनमिष्यते ॥२०१॥
अर्म सतिमिरं काचं कण्डूं शुक्रं तथाऽर्जुनम्। अजकां नेत्ररोगांश्च हन्यान्निरवशेषत: ॥२०२॥

Pippalyādi guḍikāñjana

Pippalī, triphalā, drākṣā, lauhabhasma and rocksalt– these pounded with bhṛṅgarāja juice are made into guḍikāñjana. It destroys arma, timira, kāca, itching, śukra, arjuna, ajakā and other eye diseases. [201-202]

काशीशादिरसक्रिया

पुष्पाख्यताक्ष्र्यजसितोदधिफेनशङ्खसिन्धूत्थगैरिकशिलामरिचै: समांशै:।
पिष्टैश्च माक्षिकरसेन रसक्रियेयं हन्त्यर्मकाचतिमिरार्जुनवर्त्मरोगान् ॥२०३॥

Kāśīśādi rasakriyā

Puṣpakāśīśa, rasāñjana, śarkarā, samudraphena, śaṅkha, saindhava red ochre, realgar and marica, all in equal parts, are pounded together and mixed with profuse honey to make it in the form of rasakriyā (avaleha). It destroys arma, kāca, timira, arjuna and diseases of eyelids. [203]

शुक्तिकाचिकित्सा

कौम्भस्य सर्पिषः पानैर्विरेकालेपसेचनैः। स्वादुशीतैः प्रशमयेच्छुक्तिकामञ्जनैस्ततः ॥२०४॥

Śuktikā should be treated with intake of kumbha (10 yrs old) ghṛta, purgation, sweet and cold pastes and washing followed by application of collyrium. [204]

प्रवालाद्यञ्जनम्

प्रवालमुक्तावैदूर्य्यशङ्खस्फटिकचन्दनम्। सुवर्णरजतं क्षौद्रमञ्जनं शुक्तिकापहम् ॥२०५॥

Pravālādyañjana

Pravāla, muktā, vaidūrya, śankha, sphaṭika, candana, gold, silver and honey– this collyrium destroys śuktikā. [205]

अर्जुनहरा योगाः

शङ्खः क्षौद्रेण संयुक्तः कतकः सैन्धवेन वा। सितयाऽर्णवफेनो वा पृथगञ्जनमर्जुने ॥२०६॥
पैत्तं विधिमशेषेण कुर्यादर्जुनशान्तये ॥२०७॥

In arjuna, collyrium is applied of (1) śankha mixed with honey or (2) nirmalī with saindhava or (3) samudraphena with sugar. [206]

In treatment of arjuna all the pitta-alleviating measures should be adopted. [207]

वैदेह्याद्यञ्जनम्

वैदेही सितमरिचं सैन्धवं नागरं समम्। मातुलुङ्गरसैः पिष्टमञ्जनं पिष्टकापहम् ॥२०८॥

Vaidehyādyañjana

Vaidehī (pippalī), white marica, saindhava and śuṇṭhī, each in equal part, are pounded with mātuluṅga juice. Application of this as collyrium alleviates piṣṭaka. [208]

उपनाहे शस्त्रचिकित्सा

भित्त्वोपनाहं कफजं पिप्पलीमधुसैन्धवैः। विलिखेन्मण्डलाग्रेण प्रच्छयेद्वा समन्ततः ॥२०९॥

Upanāha, caused by kapha, should be torn (punctured), then scraped and finally pasted with pippalī, honey and rocksalt or one should scarify it with knife all along. [209]

पथ्यादिवर्त्तिः

पथ्याऽक्षधात्रीफलमध्यबीजैस्त्रिद्व्येकभागैर्विदधीत वर्त्तिम्।
तयाञ्जयेदश्रुमतिप्रगाढमक्ष्णोर्हरेत् कष्टमपि प्रकोपम् ॥२१०॥

Pathyādi vartti

Vartti is made of seed-kernels of pathyā (harītakī), bibhītaka and āmalaka in 3,2 and 1 parts respectively. It is applied as collyrium in severe lachrymation and inflammation. [210]

नेत्रस्रावचिकित्सा

स्रावेषु त्रिफलाक्वाथं यथादोषं प्रयोजयेत्। क्षौद्रेणाज्येन पिप्पल्या मिश्रं विध्येच्छिरां तथा ॥२११॥

In discharges (from eye) triphalā decoction should be used after mixing with honey or ghee or pippalī according to doṣa. If it fails, venesection should be restored to. [211]

त्रिफलादिरसक्रिया

त्रिफलामूत्रकाशीशसैन्धवैः सरसाञ्जनैः। रसक्रिया क्रिमिग्रन्थौ भिन्ने स्यात् प्रतिसारणम् ॥२१२॥

Triphalādi rasakriyā

Triphalā, cow's urine, kāśīśa, saindhava and rasāñjana– with these rasakriyā should be prepared for krimigranthi. When it bursts open, paste (of rasāñjana and honey) should be applied thereto. [212]

अञ्जननामिकाचिकित्सा

स्विन्नां भित्त्वा विनिष्पीड्य भिन्नामञ्जननामिकाम्। शिलैलानतसिन्धूत्थैः सक्षौद्रैः प्रतिसारयेत् ॥२१३॥
रसाञ्जनमधुभ्याञ्च भिन्नां वा शस्त्रकर्मवित्। प्रतिसार्य्याञ्जनैर्युञ्ज्यादुष्णैर्दीपशिखोद्भवैः।
स्वेदयेद् घृष्टयाऽङ्गुल्या हरेद्रक्तं जलौकसा ॥२१४॥

Añjananāmikā (stye), after fomentation, should be incised and pressed and finally pasted with realgar, elā, tagara, and saindhava mixed with honey. [213]

After incising añjananāmikā, paste of rasāñjana and honey and then warm soot of lamp-wick should be applied as collyrium. Moreover, it should be fomented with rubbed fingers and blood is let out by leeching. [214]

नगणचिकित्सा

रोचनाक्षारतुत्थानि पिप्पल्यः क्षौद्रमेव च। प्रतिसारणमेकैकं भिन्ने नगण इष्यते ॥२१५॥

When nagaṇa is opened, one of the four-rocanā, yavakṣāra, tuttha and pippalī– mixed with honey should be applied. [215]

निमेषबिसग्रन्थ्योश्चिकित्सा

निमेषे नासया पेयं सर्पिस्तेन च पूरणम् ॥२१६॥
स्वेदयित्वा बिसग्रन्थिं छिद्राण्यस्य निराश्रयम्। पक्वं भित्त्वा तु शस्त्रेण सैन्धवेनावचूर्णयेत् ॥२१७॥

In nimeṣa (blepharospasm), ghee should be taken in through nostrils and eyes should be filled with the same. [216]

Bisagranthi, at first, should be fomented and when ripened and its holes are loosened should be incised with a sharp instrument and then dusted with rock salt (powder). [217]

पिल्लचिकित्सा

वर्त्मावलेखं बहुशस्तद्वच्छोणितमोक्षणम्। पुनः पुनर्विरेकश्च पिल्लरोगातुरो भजेत्॥२१८॥
पिल्ली स्निग्धो वमेत् पूर्वं शिराव्यधस्रुतेऽसृजि। शिलारसाञ्जनव्योषगोपित्तैश्चक्षुरञ्जयेत्॥२१९॥

One suffering from pilla should undergo scraping of eyelids, blood-letting and frequent purgation. [218]

At first instance, the patient of pilla, after unction (and sudation) should be vomited and after blood-letting from the vein, realgar, rasāñjana, trikaṭu and ox-bile should be used as collyrium. [219]

पिल्ले प्रतिसारणत्रयम्

हरितालवचादारुसुरसारसपेषितम्। अभयारसपिष्टं वा तगरं पिल्लनाशनम्॥२२०॥
भावितं बस्तमूत्रेण सस्नेहं देवदारु च॥२२१॥

(1) Harītāla, vacā and devadāru pounded with juice of tulasī or (2) tagara pounded with decoction of harītakī alleviates pilla. [220]

Devadāru impregnated with goat's urine and mixed with ghee should be applied. [221]

काकमाचीधूपः

काकमाचीफलैकेन घृतयुक्तेन बुद्धिमान्। धूपयेत् पिल्लरोगार्त्तं पतन्ति क्रिमयोऽचिरात्॥२२२॥

In pilla, fumigation is done with kākamācī fruit smeared with ghee. By this worms fall out immediately. [222]

रसाञ्जनाद्यञ्जनम्

रसाञ्जनं सर्जरसो जातीपुष्पं मनःशिला। समुद्रफेनो लवणं गैरिकं मरिचानि च॥२२३॥
एतत् समांशं मधुना पिष्टं प्रक्लिन्नवर्त्मनि। अञ्जनं क्लेदकण्डूघ्नं पक्ष्मणाञ्च प्ररोहणम्॥२२४॥

Rasāñjanādyañjana

Rasāñjana, sarjarasa, jātī flower, realgar, samudraphena, rocksalt, gairika and marica, all in equal parts are pounded with honey and used as collyrium in praklinnavartma. It removes discharge and itching and restores eyelashes. [223-224]

चुलुकीमस्तकास्थ्यञ्जनम्

मस्तकास्थि चुलुक्यास्तु तुषोदलवणान्वितम्। ताम्रपात्रेऽञ्जनं घृष्टं पिल्ले प्रक्लिन्नवर्त्मनि॥२२५॥

The skull-bone of culukī mixed with vinegar and salt is rubbed in a copper vessel. It is useful (as collyrium) in pilla and praklinnavartma. [225]

गुहाद्यञ्जनम्

ताम्रपात्रे गुहामूलं सिन्धूत्थमरिचान्वितम्। आरनालेन संघृष्टमञ्जनं पिल्लनाशनम्॥२२६॥

Guhādyañjana

The collyrium of guhā (pṛśniparṇī) root mixed with rocksalt and marica and rubbed with sour gruel in a copper vessel destroys pilla. [226]

हरिद्रादिवर्त्तिः

हरिद्रे त्रिफला लोध्रं मधुकं रक्तचन्दनम्। भृङ्गराजरसे पिष्ट्वा घर्षयेल्लौहभाजने॥२२७॥
तथा ताम्रे च सप्ताहं कृत्वा वर्त्तिं रजोऽथवा। पिच्चिटी धूमदर्शी च तिमिरोपहतेक्षणः॥
प्रातर्निश्यञ्जयेन्नित्यं सर्वनेत्रामयापहम्॥२२८॥

Haridrādi vartti

Haridrā, dāruharidrā, triphalā, lodhra, madhuka, rakta candana– these are pounded with bhṛṅgarāja juice and rubbed in a vessel of iron or copper for a week. Then it is made into vartti or powder. It should be applied as collyrium in morning and night regularly by which all diseases of eye are alleviated such as piccita, dhūmadarśī and timira. [227-228]

मञ्जिष्ठादिवर्त्तिः चूर्णाञ्जनं वा

मञ्जिष्ठामधुकोत्पलोदधिकफत्वक्सेव्यगोरोचनामांसीचन्दनशङ्खपत्रगिरिमृत्तालीशपुष्पाञ्जनैः।
सर्वैरेव समांशमञ्जनमिदं शस्तं सदा चक्षुषोः कण्डूक्लेदमलाश्रुशोणितरुजापिल्लार्मशुक्रापहम्॥२२९॥

Mañjiṣṭhādi vartti

Mañjiṣṭhā, madhuka, utpala, samudraphena, tvak, uśīra, gorocana, māṃsī, candana, śaṅkha, patra, gairika, tālīśa, puṣpāñjana and rasāñjana, all in equal parts, should be used as collyrium in cases in itching, discharge, dirt, lachrymation, haemorrhage, pain, pilla, arma and śukra. [229]

तुत्थकाद्यञ्जनम्

तुत्थकस्य पलं श्वेतमरिचानि च विंशतिः। त्रिंशता काञ्जिकपलैः पिष्ट्वा ताम्रे निधापयेत्॥२३०॥
पिल्लानपिल्लान् कुरुते बहुवर्षोत्थितानपि। तत्सेकेनोपदेहाश्रुकण्डूशोथांश्च नाशयेत्॥२३१॥

Tutthakādyañjana

Tuttha 40 gm and white marica 20 (in number) are pounded with sour gruel 1.2 litre and kept in a copper vessel. Its application alleviates pilla, even if chronic, and removes dirt, lachrymation, itching and swelling. [230-231]

पक्ष्मोपरोधे शस्त्रचिकित्सा

याप्यः पक्ष्मोपरोधश्च रोमोद्धरणलेखनैः। वर्त्मन्युपचितं लेख्यं स्राव्यमुत्क्लिष्टशोणितम्॥२३२॥
प्रवृद्धान्तर्मुखं रोम सहिष्णोरुद्धरेच्छनैः। सन्दंशेनोद्धरेद्दृष्ट्यां पक्ष्मरोमाणि बुद्धिमान्॥२३३॥
रक्षन्नक्षि दहेत् पक्ष्म तप्तहेमशलाकया। पक्ष्मरोगे पुनर्नैवं कदाचिद्रोमसम्भवः॥२३४॥

Pakṣmoparodha (Trichiasis) is palliable and treated with extraction of lashes and

scraping. That grown in lid should be scraped and blood-letting should be done in case of impurity of blood. Lashes grown inwardly should be extracted with forceps including those covering the pupil. Then lid should be cauterized with heated golden rod protecting the pupil. In this way, the chances of recurrence of lashes are eliminated. [232-234]

लेख्यरोगाः

उत्सङ्गिनी बहलकर्दमवर्त्मनी च श्यावश्च यच्च पठितन्त्विह बद्धवर्त्म।
क्लिन्नश्च पोथकियुतन्त्विह वर्त्म यच्च कुम्भीकिनी च सह शर्करयाऽवलेख्याः ।।२३५।।

Scraping is performed in the following diseases– utsaṅginī, bahalavartma, kardamavartma, śyāvavartma, baddhavartma, klinnavartma, pothakī, kumbhīkinī and śarkarā. [235]

भेद्यरोगाः

श्लेष्मोपनाहनगणौ च बिसश्च भेद्या ग्रन्थिश्च यः क्रिमिकृतोऽञ्जननामिका च ।।२३६।।

The following diseases are treated with incision– kaphopanāha, nagaṇa, bisa, krimigranthi and añjananāmikā. [236]

कफानाहचिकित्सा

घृतसैन्धवचूर्णेन कफानाहं पुनः पुनः। विलिखेन्मण्डलाग्रेण प्रच्छयेद्वा समन्ततः ।।२३७।।

Kaphānaha should be scraped with the powder of saindhava and ghee or scarified with scalpel all along. [237]

पोथकी-चिकित्सा

पटोलामलकक्वाथैराश्च्योतनविधिर्हितः। फणिज्झको रसोनस्य रसैः पोथकिनाशनः ।।२३८।।

Eye drops with (1) decoction of paṭola and āmalaka or (2) phaṇijjhaka pounded with garlic juice destroys pothakī. [238]

आनाहपिडकाचिकित्सा

आनाहपिडकां स्विन्नां तिर्य्यग्भित्त्वाऽग्निना दहेत् ।।२३९।।

Ānāhapiḍakā is fomented and then incised obliquely followed by cauterization. [239]

छेद्या रोगाः

अर्शस्तथा वर्त्मनाम्ना शुष्कार्शोऽर्बुदमेव च। मण्डलाग्रेण तीक्ष्णेन मूले छिन्द्याद्भिषक् शनैः ।।२४०।।

The following diseases are treated with excision-polypus in eyelids, śuṣkārśa and arbuda. They should be excised carefully at the root with a sharp knife. [240]

सिन्धूत्थादिवर्त्तिः

सिन्धूत्थपिप्पलीकुष्ठपर्णिनीत्रिफलारसैः। सुरामण्डेन वर्त्तिः स्यात् श्लेष्माभिष्यन्दनाशिनी ।।
पोथकीवर्त्मोपरोधक्रिमिग्रन्थिकुकूणके ।।२४१।।

Sindhūtthādi vartti

Sindhūttha (rock salt), pippalī, kuṣṭha and parṇinī (parṇīcatuṣṭaya) are pounded with triphalā decoction and vartti is made with clear wine. It alleviates kaphaja abhiṣyanda, pothakī, vartmoparodha, krimigranthi and kukūṇaka. [241]

॥ इति नेत्ररोगचिकित्सा ॥ ५९ ॥

Thus ends treatment of netra-roga. [59]

६०. षष्टितमोऽध्यायः

CHAPTER LX

शिरोरोग-चिकित्सा

Treatment of Śiroroga (head-disease)

वातिके चिकित्साक्रमः

वातिके शिरसो रोगे स्नेहस्वेदान् सनावनान्। पानान्नमुपनाहांश्च कुर्याद्वातामयापहान्॥ १॥
कुष्ठमेरण्डमूलञ्च लेपात् काञ्जिकपेषितम्। शिरोऽर्त्तिं नाशयत्याशु पुष्पं वा मुचुकुन्दजम्॥ २॥
पञ्चमूलीशृतं क्षीरं नस्यं दद्याच्छिरोगदे॥ ३॥

In vātika śiroroga, one should use unction, fomentation, snuff, food and drinks and poultices which are vāta-alleviating. [1]

Kuṣṭha and eraṇḍa (root) pounded with sour gruel and applied as paste removes headache or mucakunda flower alone. [2]

In head-disease, one should use milk processed with pañcamūla as snuff. [3]

शिरोवस्तिविधानम्

आशिरो व्यायतं चर्म कृत्वाऽष्टाङ्गुलमुच्छ्रितम्। तेनावेष्ट्य शिरोऽधस्तान्माषकल्केन लेपयेत्॥ ४॥
निश्चलस्योपविष्टस्य तैलैरुष्णैः प्रपूरयेत्। धारयेदारुजः शान्तेर्यामं यामार्द्धमेव वा॥ ५॥
शिरोवस्तिर्जयत्येषा शिरोरोगं मरुद्भवम्। हनुमन्याक्षिकर्णार्त्तिमर्दितं मस्तकम्पनम्॥ ६॥
तैलेनापूर्य्य मूर्द्धानं पञ्चमात्राशतानि च। तिष्ठेत् श्लेष्मणि पित्तेऽष्टौ दश वाते शिरोगदी॥ ७॥
एष एव विधिः कार्य्यस्तथा कर्णाक्षिपूरणे॥ ८॥

Śirobasti (Head-pouch)

A piece of leather eight fingers high is put on head covering around pasting the lower margin with the pulp of black gram. The pouch so formed is filled with warm oil, while the patient is sitting, without movement, and retained till pain subsides or for 1 1/2-3 hours. This Śirobasti controls vātika śiroroga in addition to disorders of jaw, neck-side, eyes and ears, facial paralysis and trembling of head.

After filling the pouch with oil one should wait 500, 800 and 1000 seconds in kaphaja, paittika and vātika śiroroga respectively. [4-7]

The same method should be applied in filling ear and eyes. [8]

पैत्तिके चिकित्साक्रमः

पैत्ते घृतं पयः सेकाः शीता लेपाः सनावनाः। जीवनीयानि सर्पींषि पानान्नञ्चापि पित्तनुत्॥ ९॥
पित्तात्मके शिरोरोगे स्निग्धं सम्यग् विरेचयेत्। मृद्वीकात्रिफलेक्षूणां रसैः क्षीरैर्घृतैरपि॥ १०॥

In paittika śiroroga, ghee, milk, cold baths and pastes, snuffs, jīvanīya ghṛta and pitta-alleviating food and drinks are wholesome. [9]

In case of paittika śiroroga the patient should be uncted well and purgated with juice of grapes and sugarcane, decoction of triphalā, milk and ghee. [10]

दाहार्तिहरा योगा:

शतधौतघृताभ्यङ्गः शीतवातादिसेवनम्। शीतस्पर्शाश्च संसेव्याः सदा दाहार्त्तिशान्तये॥ ११॥

In order to relieve burning and distress, anointment with ghee washed hundred times, cold breeze etc. and other cold contacts are useful. [11]

चन्दनादिलेप:

चन्दनोशीरयष्ट्याह्वबलाव्याघ्रनखोत्पलैः। क्षीरपिष्टैः प्रदेहः स्यात् शृतैर्वा परिषेचनम्॥ १२॥

Candanādi lepa

Candana, uśīra, madhuka, balā, vyāghranakha and nīlotpala pounded with milk should be used as paste or the part should be sprinkled with their decoction. [12]

मृणालादि-आमलकादिलेपौ

मृणालबिसशालूकचन्दनोत्पलकेशरैः। स्निग्धशीतैः शिरो दिह्यात् तद्वदामलकोत्पलैः॥ १३॥

Mṛṇālādi-āmalakādi lepa

One should apply cold and unctuous (mixed with ghee) paste of mṛṇāla (stalk), stem, root and stamens of lotus and candana or of āmalaka and nīlotpala. [13]

यष्ट्याह्वादि-शर्करादिघृते

यष्ट्याह्वचन्दनानन्ताक्षीरसिद्धं घृतं हितम्। नावनं शर्कराद्राक्षामधुकैर्वाऽपि पित्तजे॥ १४॥

Yaṣṭyāhvādi-śarkarādi ghṛta

Ghee cooked with (1) yaṣṭyāhva (madhuyaṣṭī), candana, and anantā (sārivā) or (2) śarkarā, drākṣā and madhuka along with milk should be used as snuff in paittika śiroroga. [14]

त्वक्पत्रादिनावनम्

त्वक्पत्रशर्करारास्ना नावनं तण्डुलाम्बुना। क्षीरसर्पिर्हितं नस्यं रसा वा जाङ्गलाः शुभाः॥ १५॥

Tvakpatrādi nāvana

Tvakpatra, śarkarā and rāsnā mixed with rice-water should be used as snuff. Similarly snuffing with ghee extracted from milk or meat-soup of wild animals is wholesome. [15]

रक्तजे क्रियाक्रम:

रक्तजे पित्तनुत् सर्वं भोजनालेपसेचनम्। शीतोष्णयोश्च व्यत्यासो विशेषो रक्तमोक्षणम्॥ १६॥

In śiroroga caused by rakta all regimens concerning diet, paste and sprinkling meant

for paittika one should be adopted particularly alternate application of heat and cold and blood-letting. [16]

कफजे चिकित्साक्रम:

कफजे लङ्घनं स्वेदो रूक्षोष्णैः पाचनात्मकैः। तीक्ष्णावपीडा धूमाश्च तीक्ष्णोष्णकवला हिताः॥ १७॥
स्वच्छञ्च पाययेत् सर्पिः पुराणं स्वेदयेत्ततः। मधूकसारेण शिरः स्विन्नश्चास्य विरेचयेत्॥ १८॥

In kaphaja type, lightening, fomentation with rough-hot and digestive materials, irritant pressed juice as snuff, smoking and irritant and hot gargles are wholesome. [17]

The patient should be given clean old ghee to drink followed by fomentation. Thereafter head should be evacuated with madhūka-sāra (heart-wood of madhūka). [18]

कृष्णादिलेप:

कृष्णाब्दशुण्ठीमधुकशताह्वोत्पलपाकलैः। जलपिष्टैः शिरोलेपः सद्यः शूलनिवारणः॥ १९॥

Kṛṣṇādi lepa

Kṛṣṇā (pippalī), mustaka, śuṇṭhī, madhuka, śatāhavā, nīlotpala and kuṣṭha– this paste pounded with water removes headache quickly. [19]

देवदार्वादिलेप:

देवदारु नतं कुष्ठं नलदं विश्वभेषजम्। लेपः काञ्जिकसम्पिष्टस्तैलयुक्तः शिरोऽर्त्तिनुत्॥ २०॥

Devadārvādi lepa

Devadāru, tagara, kuṣṭha, jaṭāmāṃsī and śuṇṭhī– this paste pounded with sour gruel and mixed with oil relieves headache. [20]

त्रिदोषजे चिकित्साक्रम:

सन्निपातभवे कार्य्या दोषत्रयहरी क्रिया। सर्पिः पानं विशेषेण पुराणन्त्वादिशन्ति हि॥ २१॥

In śiroroga caused by tridoṣa measures pacifying three doṣas should be adopted particularly intake of old ghee is useful. [21]

त्रिकटुकादिक्वाथ:

त्रिकटुकपुष्कररजनीजीवकतुरङ्गगन्धानाम्। क्वाथः शिरोऽर्त्तिजालं नासापीतो निवारयति॥ २२॥

Trikaṭukādi kvātha

Trikaṭuka, puṣkaramūla, haridrā, jīvaka and aśvagandhā– this decoction administered through nostrils alleviates the web of śiroroga. [22]

नागरक्षीरम्

नागरकल्कविमिश्रं क्षीरं नस्येन योजितं पुंसाम्। नानादोषोद्भूतां शिरोरुजां हन्ति तीव्रतराम्॥ २३॥

Milk mixed with paste of śuṇṭhī and used as snuff relieves severe śiroroga (headache) caused by many factors. [23]

नतादिलेप:

नतोत्पलं चन्दनकुष्ठयुक्तं शिरोरुजायां सघृत: प्रदेह: ॥ २४ ॥

Natādi lepa

Nata (tagara), nīlotpala, candana and kuṣṭha mixed with ghee is useful as paste in headache. [24]

प्रपौण्डरीकादिलेप:

प्रपौण्डरीकं सुरदारुकुष्ठं यष्ट्याह्वमेला कमलोत्पले च।
शिरोरुजायां सघृत: प्रदेहो लौहैरकापद्मकचोरकैश्च ॥ २५ ॥

Prapauṇḍarīkādi lepa

Prapauṇḍarīka, devadāru, kuṣṭha, madhuyaṣṭī, elā, kamala, nīlotpala, as well as aguru, erakā, padmaka and coraka— this paste mixed with ghee is efficacious in headache. [25]

शताह्वाद्यं तैलम्

शताह्वैरण्डमूलोग्रावक्रव्याघ्रीफलै: शृतम्। तैलं नस्यं मरुच्छ्लेष्मतिमिरोर्ध्वगदापहम् ॥ २६ ॥

Śatāhvādya taila

Śatāhvā, eraṇḍa (root), vacā, tagara and kaṇṭakārī (fruit)– oil cooked with these is useful as snuff in timira and upper diseases caused by vāta and kapha. [26]

जीवकाद्यं तैलम्

जीवकर्षभकौ द्राक्षासितायष्टीबलोत्पलै:। तैलं नस्यं पय:पक्वं वातपित्तशिरोगदे ॥ २७ ॥

Jīvakādya taila

Oil cooked with jīvaka, ṛṣabhaka, drākṣā, śarkarā, madhuyaṣṭī, balā and nīlotpala along with milk is useful as snuff in śiroroga caused by vāta and pitta. [27]

बृहज्जीवकाद्यं तैलम्

जीवकर्षभकौ द्राक्षा मधूकं मधुकं बला। नीलोत्पलं चन्दनञ्च विदारी शर्करा तथा ॥ २८ ॥
तैलप्रस्थं पचेदेभि: शनै: पयसि षड्गुणे। जाङ्गलस्य तु मांसस्य तुलार्द्धस्य रसेन तु ॥ २९ ॥
सिद्धमेतद्भवेन्नस्यं तैलमर्द्धावभेदकम्। बाधिर्यं कर्णशूलञ्च तिमिरं गलशुण्डिकाम् ॥ ३० ॥
वातिकं पैत्तिकञ्चैव शीर्षरोगं नियच्छति। दन्तचालं शिर:शूलमर्दितञ्चापकर्षति ॥ ३१ ॥

Bṛhajjīvakādya taila

Oil 640 ml is cooked with paste of jīvaka, ṛṣabhaka, drākṣā, madhuka, balā, nīlotpala, candana, vidārī and śarkarā along with six times milk and soup of wild animal's meat 2 kg. This oil is used as snuff in hemicrania, deafness, earache, timira, enlargement of uvula, vātika and paittika śiroroga, loose teeth, headache and facial paralysis. [28-31]

षड्बिन्दुतैलम्

एरण्डमूलं तगरं शताह्वा जीवन्ति रास्ना सहसैन्धवञ्च।
भृङ्गं विडङ्गं मधुयष्टिका च विश्वौषधं कृष्णतिलस्य तैलम्॥ ३२॥
आजं पयस्तैलविमिश्रितञ्च चतुर्गुणे भृङ्गरसे विपक्वम्।
षड्बिन्दवो नासिकया विधेयाः शीघ्रं निहन्युः शिरसो विकारान्॥ ३३॥
च्युतांश्च केशान् चलितांश्च दन्तान् दुर्बद्धमूलांश्च दृढीकरोति।
सुपर्णदृष्टिप्रतिमञ्च चक्षुर्बाह्वोर्बलञ्चाभ्यधिकं ददाति॥ ३४॥

Ṣaḍbindu taila

Eraṇḍa (root), tagara, śatapuṣpā, jīvantī, rāsnā, saindhava, tvak, viḍaṅga, madhuyaṣṭikā and śuṇṭhī– with these oil of black sesamum is cooked along with goat's milk and four times juice of bhṛṅgarāja. The dose is six drops instilled in nostrils. It alleviates diseases of head instantaneously and restores the fallen hairs, confirms the loose teeth, improves eye-sight and promotes arms' strength. [32-34]

क्षयजे चिकित्सा

क्षयजे क्षयमासाद्य कर्त्तव्यो बृंहणो विधिः। पाने नस्ये च सर्पिः स्याद्वातघ्नैर्मधुरैः शृतम्॥ ३५॥

In kṣayaja type, after diagnosing wasting of particular dhātu, promotive measures should be applied accordingly. Ghee cooked with vāta-alleviating (bhadradārvādi) and sweet (kākolyādi) drugs should be used as intake and snuff. [35]

व्योषादिनस्यम्

क्रिमिजे व्योषनक्ताह्वशिग्रुबीजैश्च नावनम्। अजामूत्रयुतं नस्यं क्रिमिजे क्रिमिजित् परम्॥ ३६॥

Vyoṣādi nasya

Vyoṣa (trikaṭu), seeds of karañja and śigru should be mixed with goat's urine and used as snuff. It is excellent remedy for krimis (organisms) and as such is useful in krimija śiroroga. [36]

अपामार्गादितैलम्

अपामार्गफलव्योषनिशाक्षवकरामठैः। सविडङ्गं शृतं मूत्रे तैलं नस्यं क्रिमीञ्जयेत्॥ ३७॥

Apāmārgādi taila

Apāmārga (seeds), trikaṭu, haridrā, kṣavaka, hiṅgu and viḍaṅga– with these oil is cooked along with urine. Its use as snuff destroys krimi. [37]

नस्यद्वयम्

नावनं सगुडं विश्वं पिप्पली वा ससैन्धवा। भुजस्तम्भादिरोगेषु सर्वेषूर्द्ध्वगदेषु च॥ ३८॥

Snuffing of (1) śuṇṭhī mixed with jaggery and (2) pippalī with rocksalt is useful in stiffening of arms etc and all upper diseases. [38]

सूर्यावर्तचिकित्सा

सूर्य्यावर्ते विधातव्यं नस्यकर्मादि भेषजम्। पाययेत् सगुडं सर्पिर्घृतपूरांश्च भक्षयेत्॥ ३९॥
सूर्य्यावर्त्ते शिरावेधो नावनं क्षीरसर्पिषा। हितः क्षीरघृताभ्यासस्ताभ्याञ्चैव विरेचनम्॥ ४०॥
क्षीरपिष्टैस्तिलैः स्वेदो जीवनीयैश्च शस्यते॥ ४१॥

Sūryāvartta should be treated with snuffing etc. Moreover, the patient should take ghee mixed with jaggery and edibles prepared with profuse ghee. [39]

(If these remedies fail) venesection should be performed. Besides, snuffing with ghee extracted of milk, regular use of milk and ghee and purgation with the same are wholesome. [40]

Fomentation with sesamum and jīvanīya drugs pounded with milk is also useful. [41]

कुङ्कुमादिनस्यम्

सशर्करं कुङ्कुममाज्यभृष्टं नस्यं विधेयं पवनासृगुत्थे।
भूशंखकर्णाक्षिशिरोऽर्धशूले दिनाभिवृद्धिप्रभवे च रोगे॥ ४२॥

Saffron mixed with sugar and fried with ghee is used as snuff in hemicrania, pain in eye-brow, temples, ears and eyes caused by vāta and rakta and also in sūryāvartta. [42]

अपामार्गनवनीतम्

कृतमालपल्लवरसे खरमञ्जरिकल्कसिद्धनवनीतम्। नस्येन जयति नियतं सूर्यावर्त्तं सुदुर्वारम्॥ ४३॥

Fresh butter is processed with paste of apāmārga seeds and juice of āragvadha leaves. Its snuff controls sūryavartta, even if severe. [43]

दशमूलीक्वाथनस्यम्

दशमूलीकषायन्तु सर्पिःसैन्धवसंयुतम्। नस्यमर्द्धावभेदघ्नं सूर्य्यावर्त्तशिरोऽर्त्तिनुत्॥ ४४॥

Snuffing with decoction of daśamūla mixed with ghee and rocksalt destroys ardhāvabhedaka (hemicrania) and sūryāvartta. [44]

अवपीडद्वयम्

शिरीषमूलकफलैरवपीडश्च योजयेत्। अवपीडो हितो वा स्याद् वचापिप्पलिभिः कृतः॥ ४५॥

Pressed snuff should be used of śirīṣa (bark) and radish (seeds) or vacā and pippalī. [45]

जाङ्गलमांसोपनाहः

जाङ्गलानि च मांसानि कारयेदुपनाहनम्। तेनास्य शाम्यति व्याधिः सूर्य्यावर्त्तः सुदारुणः॥ ४६॥
एष एव विधिः कृत्स्नः कार्य्यश्चार्द्धावभेदके॥ ४७॥

Proultices of meat of wild animals should be used by which even the severe sūryāvartta is alleviated. [46]

The above measure should be applied entirely in hemicrania. [47]

शारिवादिलेप:

शारिवोत्पलकुष्ठानि मधुकश्चाम्लपेषितम्। सर्पिस्तैलयुतो लेप: सूर्यावर्त्तार्द्धभेदयो: ॥ ४८ ॥

Sārivādi lepa

Sārivā, nīlotpala, kuṣṭha and madhuka– these pounded with sour gruel and mixed with ghee and oil are used as paste in sūryāvartta and hemicrania. [48]

योगचतुष्टयम्

पिबेत् सशर्करं क्षीरं नीरं वा नारिकेलजम्। सुशीतं वाऽपि पानीयं सर्पिर्वा नस्यतस्तयो: ॥ ४९ ॥

In these two disorders one should take milk or coconut water or cold water or ghee all mixed with sugar through nostrils. [49]

अनन्तवाते क्रियाक्रम:

अनन्तवाते कर्त्तव्य: सूर्यावर्त्तहितो विधि:। शिराव्यधश्च कर्त्तव्योऽनन्तवातप्रशान्तये ॥ ५० ॥
आहारश्च विधातव्यो वातपित्तविनाशन:। मधुमस्तकसंयावहवि:पूरैश्च य: क्रम: ॥ ५१ ॥

In anantavāta (migraine) the measures prescribed for sūryāvartta should be adopted particularly venesection should be performed. [50]

Diet alleviating vāta and pitta such as madhumastaka etc (edibles prepared with sugar and profuse ghee) is wholesome. [51]

शङ्खकचिकित्सा

सूर्य्यावर्ते हितं यत् तच्छङ्खके स्वेदवर्जितम्। क्षीरसर्पि: प्रशंसन्ति नस्त:पानञ्च शङ्खके ॥ ५२ ॥

The measures prescribed in sūryāvartta except fomentation should also be adopted in śaṅkhaka. Besides, ghee extracted of milk should be taken through nostrils. [52]

शतावर्यादिलेप:

शतावरीं कृष्णतिलान् मधुकं नीलमुत्पलम्। दूर्वां पुनर्नवाञ्चापि लेपं साध्ववचारयेत् ॥ ५३ ॥
शीततोयावसेकांश्च क्षीरसेकांश्च शीतलान्। कल्कैश्च क्षीरिवृक्षाणां शङ्खकस्य प्रलेपनम् ॥ ५४ ॥

Śatāvaryādi lepa

Śatāvarī, black sesamum, madhuka, nīlotpala, dūrvā and punarnavā– this paste should be applied. [53]

In śaṅkhaka (meningitis) sprinkling with cold water or cold milk and pasting with the pulp of kṣīrīvṛkṣa are useful. [54]

सिरावेधविधि:

क्रौंचकादम्बहंसानां शराय्यां: कच्छपस्य च। रसै: संबृंहितस्याथ तस्य शङ्खकसन्धिजा: ॥
ऊद्र्ध्वं तिस्र: शिरा: प्राज्ञो भिन्द्यादेव न ताडयेत् ॥ ५५ ॥

Venesection

The patient should first be prepared with promotive diet of the meat-soup of krauñca (heron), kādamba (a kind of goose), swan, śarāri (a bird) and tortoise and then the upper three veins at the temple joint should be punctured without any injury. [55]

शिर:कम्पे चिकित्साक्रम:

शिर:कम्पेऽमृतारास्नाबलास्नेहसुगन्धिभि:। स्नेहस्वेदादि वातघ्नं शिरोबस्तिश्च शस्यते।। ५६।।

in Śiraḥkampa (trembling of head), pasting with guḍūcī, rāsnā, balā, ghee and aromatic drugs, vāta– alleviating unction and fomentation and application of head-pouch are useful. [56]

यष्ट्याद्यं घृतम्

यष्टीमधुबलारास्नादशमूलाम्बुसाधितम्। मधुरैश्च घृतं सिद्धमूर्ध्वजत्रुगदापहम्।। ५७।।

Yaṣṭyādya ghṛta

Ghee cooked with the decoction of madhuyaṣṭī, balā, rāsnā and daśamūla along with (paste of) kākolyādi drugs alleviates supraclavicular diseases. [57]

मयूराद्यं घृतम्

दशमूलबलारास्नामधुकैस्त्रिपलै: सह। मयूरं पक्षपित्तान्त्रशकृत्पादास्यवर्जितम्।। ५८।।
जले पक्त्वा घृतप्रस्थं तस्मिन् क्षीरसमं पचेत्। मधुरै: कार्षिकै: कल्कै: शिरोरोगार्दितापहम्।। ५९।।
कर्णनासाक्षिजिह्वास्यगलरोगविनाशनम्। मयूराद्यमिदं ख्यातमूर्ध्वजत्रुगदापहम्।। ६०।।
दशमूलादिना तुल्यो मयूर इह गृह्यते। अन्ये त्वाकृतिमानेन मयूरग्रहणं विदु:।। ६१।।

Mayūrādya ghṛta

Daśamūla (each component), balā, rāsnā and madhuka each 120 gm and peacock devoid of feathers, bile, intenstines, faeces, feet and mouth equal to the above total are decocted in water. With this decoction ghee 640 gm is cooked along with equal (quantity) of milk and the paste of jīvanīya drugs each 10 gm. This mayūrādya ghṛta is well known remedy for supraclavicular diseases, head-diseases and facial paralysis.

Here peacock is taken as equal to daśamūla etc. others however, take, by number, one peacock. [58-61]

मूषिकादिघृतचतुष्टयम्

आखुभि: कुक्कुटैर्हंसै: शशैश्चापि हि बुद्धिमान्। कल्केनानेन विपचेत् सर्पिरूर्ध्वगदापहम्।। ६२।।

In the same way, ghee may be cooked with rats, cocks, swans, and hares which also is efficacious in upper diseases. [62]

प्रपौण्डरीकाद्यं तैलम्

प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः। सिद्धं धात्रीरसे तैलं नस्येनाभ्यञ्जनेन वा॥
सर्वानूर्ध्वगदान् हन्ति पलितानि च शीलितम्॥ ६३॥

Prapauṇḍarīkādya taila

Prapauṇḍarīka, madhuka, pippalī, candana and utpala-oil cooked with these along with the juice of āmalaka is useful as snuff and anointment, in all upper diseases including greying of hairs. [63]

बृहन्मयूराद्यं (महामायूरं) घृतम्

शतं मयूरमांसस्य दशमूलबलातुलाम्। द्रोणेऽम्भसः पचेत् क्षुत्वा तस्मिन् पादस्थिते ततः॥ ६४॥
निषिच्य पयसो द्रोणं पचेत्तत्र घृताढकम्। प्रपौण्डरीकवर्गोक्तैर्जीवनीयैश्च भेषजैः॥ ६५॥
मेधाबुद्धिस्मृतिकरमूर्ध्वजत्रुगदापहम्। मायूरमेतन्निर्दिष्टं सर्वानिलहरं परम्॥ ६६॥
मन्याकर्णशिरोनेत्ररुजापस्मारनाशनम्। विषवातामयश्वासविषमज्वरकासनुत्॥ ६७॥

Bṛhanmayurādya ghṛta

Peacock's flesh 4 kg, daśamūla and balā (combined) 4 kg are boiled in water 10.24 litre reduced to one-fourth. Now ghee 2.56 kg is cooked with this decoction along with milk 10.24 litre and the paste of prapauṇḍarīka etc (as in prapauṇḍarīkādya ghṛta) and jīvanīya drugs. This (bṛhat) maūrādya ghṛta is excellent remedy for all types of vātavyādhi and alleviates supraclavicular diseases, epilepsy, poisoning, bronchial asthma, irregular fever and cough. Moreover, it promotes intellect, understanding and memory. [64-67]

॥ इति शिरोरोगचिकित्सा॥ ६०॥

Thus ends treatment of śiroroga. [60]

६१. एकषष्टितमोऽध्यायः

CHAPTER LXI

असृग्दर-चिकित्सा

Treatment of Asrgdara (Menorrhagia-metrorrhagia)

वातजे सौवर्चलादिचूर्णम्

दध्ना सौवर्चलाजाजीमधुकं नीलमुत्पलम्। पिबेत् क्षौद्रयुतं नारी वातासृग्दरपीडिता॥ १॥

Sauvarcalādi cūrṇa

Woman suffering from vātika asrgdara should take (powder of) sauvarcala, jīraka, madhuka and nīlotpala mixed with honey followed by intake of curd. [1]

पित्तजप्रदरचिकित्सा

पिबेदैणेयकं रक्तं शर्करामधुसंयुतम्। वासकस्वरसं पैत्ते गुडूच्या रसमेव वा॥ २॥

In paittika type, deer's blood or juice of vāsā or guḍūcī mixed with sugar and honey should be taken. [2]

कफजप्रदरचिकित्सा

रोहीतकान्मूलकल्कं पाण्डुरेऽसृग्दरे पिबेत्। जलेनामलकाद्बीजकल्कं वा ससितामधु॥ ३॥
धातक्याश्चाक्षमात्रं वा आमलक्या मधुद्रवम्॥ ४॥
काकजानुकमूलं वा मूलं कार्पासमेव वा। पाण्डुप्रदरशान्त्यर्थं पिबेत्तण्डुलवारिणा॥ ५॥

In pale (kaphaja) type of asrgdara, paste of rohitaka root or āmalaka seeds mixed with sugar and honey should be taken with water. [3]

Besides, paste of dhātakī or āmalaka 10 gm liquified with honey should be taken. [4]

For alleviation of pale pradara (paste of the) root of kākajaṅghā or kārpāsa should be taken with rice-water. [5]

अशोकक्षीरम्

अशोकवल्कलक्काथशृतं दुग्धं सुशीतलम्। यथाबलं पिबेत् प्रातस्तीव्रासृग्दरनाशनम्॥ ६॥

Milk boiled with decoction of aśoka bark and cooled should be taken, according to strength, in morning to alleviate severe asrdara. [6]

दार्व्यादिक्वाथः

दार्वीरसाञ्जनवृषाब्दकिरातबिल्वभल्लातकैरवकृतो मधुना कषायः।
पीतो जयत्यतिबलं प्रदरं सशूलं पीतासितारुणविलोहितनीलशुक्लम्॥ ७॥

Dārvyādi kvātha

Dārvī (dāruharidrā), rasāñjana, vāsā, musta, kirātatikta, bilva, bhallātaka and kumuda— decoction of these mixed with honey should be taken. It alleviates all types of severe and painful pradara. [7]

रसाञ्जनयोग:

रसाञ्जनं तण्डुलीयस्य मूलं क्षौद्रान्वितं तण्डुलतोयपीतम्।
असृग्दरं सर्वभवं निहन्ति श्वासञ्च भार्गी सह नागरेण॥ ८॥

Rasāñjana and taṇḍulīya (root) mixed with honey and taken with rice-water destroys asṛgdara caused by all doṣas. Similarly bhārgī combined with śuṇṭhī destroys bronchial asthma. [8]

कुशमूलप्रयोग:

कुशमूलं समुद्धृत्य पेषयेत्तण्डुलामम्बुना। एतत् पीत्वा त्र्यहान्नारी प्रदरात् परिमुच्यते॥ ९॥

After taking out the root of kuśa one should pound it with rice-water. By taking it in morning for three days the woman is relieved of pradara. [9]

काष्ठोदुम्बरफलरस:

क्षौद्रयुक्तं फलरसं काष्ठोदुम्बरजं पिबेत्। असृग्दरविनाशाय सशर्करपयोऽन्नभुक्॥ १०॥

One should take fruit-juice of kāṣṭhodumbara mixed with honey keeping on diet of milk and sugar in order to alleviate asṛgdara. [10]

बलाप्रयोग:

प्रदरं हन्ति बलाया मूलं दुग्धेन मधुयुतं पीतम्॥ ११॥

(Pounded) root of balā mixed with honey and taken with milk alleviates pradara. [11]

कुशादिप्रयोग:

कुशवाट्यालकमूलं तण्डुलसलिलेन हरति रक्ताख्यम्।
शमयति मदिरापानं तदुभयमपि रक्तसंज्ञशुक्लाख्यौ॥ १२॥

Root of kuśa and balā taken with rice-water pacifies rakta pradara while the use of alcoholic drink relieves both red and white types of pradara. [12]

प्रदरहरा योगा:

गुडेन बदरीचूर्णं मोचमामं तथा पय:। पीता लाक्षा च सघृता पृथक् प्रदरनाशना:॥ १३॥

(1) badara powder mixed with jaggery (2) unripe banana (3) milk and (4) lākṣā with ghee— these singly alleviate pradara. [13]

प्रदरस्य सामान्योपक्रमः

रक्तपित्तविधानेन प्रदरांश्चाप्युपाचरेत्। असृग्दरे विशेषेण कुटजाष्टकमाचरेत्॥ १४॥

Pradara should be treated with the measures as prescribed for raktapitta. Particularly in asṛgdara kuṭajāṣṭaka is beneficial. [14]

पुष्यानुगचूर्णम्

पाठां जम्ब्वाम्रयोर्मध्यं शिलाभेदं रसाञ्जनम्। अम्बष्ठकीं मोचरससमङ्गापद्मकेशरान्॥ १५॥
बाह्लीकातिविषामुस्तं बिल्वं लोध्रं सगैरिकम्। त्रिफलां मरिचं शुण्ठीं मृद्वीकां रक्तचन्दनम्॥ १६॥
कट्वङ्गवत्सकानन्ताधातकीमधुकार्जुनम्। पुष्येणोद्धृत्य तुल्यानि सूक्ष्मचूर्णानि कारयेत्॥ १७॥
तानि क्षौद्रेण संयोज्य पाययेत् तण्डुलाम्बुना। असृग्दरातिसारेषु रक्तं यच्चोपवेश्यते॥ १८॥
दोषागन्तुकृता ये च बालानां तांश्च नाशयेत्। योनिदोषं रजोदोष श्वेतं नीलं सपीतकम्॥ १९॥
स्त्रीणां श्यावारुणं यच्च तत् प्रसह्य निवर्त्तयेत्। चूर्णं पुष्यानुगं नाम हितमात्रेयपूजितम्॥
अम्बष्ठां दक्षिणे ख्याता गृह्णन्त्यन्ये तु लक्ष्मणाम्॥ २०॥

Puṣyānuga cūrṇa

Pāṭhā, kernel of jambū and āmra, pāṣāṇabheda, rasāñjana, ambaṣṭhakī, mocarasa, lajjālu, lotus (stamens), kuṅkuma, ativiṣā, musta, bilva, lodhra, gairika, triphalā, marica, śuṇṭhī, drākṣā, raktacandana, aralu, kuṭaja, anantamūla, dhātakī, madhuka and arjuna—all these in equal quantity should be collected in puṣya nakṣatra and powdered finely. Then it is mixed with honey and taken with rice water.

It alleviates asṛgdara, diarrhoea, particularly bloody, pediatric diseases caused by doṣas and grahas, disorders of female genital tract and various types of menstrual disorders. This puṣyānuga cūrṇa is favoured by Ātreya. Ambuṣṭhā is popular in south, others take in its place, lakṣmaṇā. [15-20]

मुद्गाद्यं घृतम्

मुद्गमाषस्य निर्य्यूहे रास्नाचित्रकनागरैः। सिद्धं सपिप्पलीबिल्वैः सर्पिः श्रेष्ठमसृग्दरे॥ २१॥

Mudgādya ghṛta

Ghee cooked with the decoction of mudga and māṣa along with (the paste of) rāsnā, citraka, śuṇṭhī, pippalī and bilva is useful in asṛgdara. [21]

शीतकल्याणकं घृतम्

कुमुदं पद्मकोशीरं गोधूमो रक्तशालयः। मुद्गपर्णी पयस्या च काश्मरी मधुयष्टिका॥ २२॥
बलातिबलयोर्मूलमुत्पलं तालमस्तकम्। विदारी शतमूली च शालपर्णी सजीवका॥ २३॥
फलं त्रपुषबीजानि प्रत्यग्रं कदलीफलम्। एषामर्द्धपलान् भागान् गव्यं क्षीरं चतुर्गुणम्॥ २४॥
पानीयं द्विगुणं दत्त्वा घृतप्रस्थं विपाचयेत्। प्रदरे रक्तगुल्मे च रक्तपित्ते हलीमके॥ २५॥
बहुरूपश्च यत् पित्तं कामलावातशोणिते। अरोचके ज्वरे जीर्णे पाण्डुरोगे मदे भ्रमे॥ २६॥

तरुणी चाल्पपुष्पा च या च गर्भं न विन्दति। अहन्यहनि च स्त्रीणां भवति प्रीतिवर्द्धनम्॥
शीतकल्याणकं नाम परमुक्तं रसायनम्॥ २७॥

Śītakalyāṇaka ghṛta

Kumuda, padmaka, uśīra, godhūma, red śāli, mudgaparṇī, payasyā, kāśmarī, madhuyaṣṭī, balā and atibalā (root), nīlotpala, tāla (upper part), vidārī, śatāvarī, śālaparṇī, jīvaka, triphalā, trapuṣa (seeds), unripe banana (fruit) each 20 gm– with the paste of these ghee 640 gm should be cooked with cow's milk four times and water in double quantity.

Śītakalyāṇaka is an excellent rasāyana and is useful in pradara, raktagulma, raktapitta, halīmaka, various forms of abnormal pitta, jaundice, vātarakta, anorexia, chronic fever, pāṇḍuroga, narcosis, giddiness, menstrual disorders and female sterility. [22-27]

बृहच्छतावरीघृतम्

शतावरीरसप्रस्थं क्षोदयित्वावपीडयेत्। घृतप्रस्थसमायुक्तं क्षीरं द्विगुणितं भिषक्॥ २८॥
अत्र कल्कानिमान् दद्यात् स्थूलोदुम्बरसम्मितान्। जीवनीयानि यान्यष्टौ यष्टीचन्दनपद्मकैः॥ २९॥
श्वदंष्ट्रा चात्मगुप्ता च बला नागबला तथा। शालपर्णी पृश्निपर्णी विदारी शारिवाद्वयम्॥ ३०॥
शर्करा च समादेया काश्मर्य्याश्च फलानि च। सम्यक् सिद्धन्तु विज्ञाय तद् घृतञ्चावतारयेत्॥ ३१॥
रक्तपित्तविकारेषु वातपित्तकृतेषु च। वातरक्तं क्षयं श्वासं हिक्कां कासञ्च दुस्तरम्॥ ३२॥
अङ्गदाहं शिरोदाहं रक्तपित्तसमुद्भवम्। असृग्दरं सर्वभवं मूत्रकृच्छ्रं सुदारुणम्॥
एतान् रोगान् शमयति भास्करस्तिमिरं यथा॥ ३३॥

Bṛhacchatāvarī-ghṛta

Ghee 640 gm is cooked along with śatāvarī juice 640 ml and double quantity of milk along with the paste of aṣṭavarga, madhuyaṣṭī, candana, padmaka, gokṣura, kapikacchū, balā, nāgabalā, śālaparṇī, pṛśniparṇī, vidārī, sārivā, kṛṣṇa sārivā, śarkara and kāśmarya (fruit) each 10 gm when prepared well it is used in diseases caused by raktapitta and vātapitta, particularly it alleviates vātarakta, wasting, dyspnoea, hiccough, cough, burning sensation in body and head caused by raktapitta, all types of asṛgdara and severe dysuria. [28-33]

॥ इत्यसृग्दरचिकित्सा॥ ६१॥

Thus ends treatment of asṛgdara. [61]

UNIVERSITAT HAMBURG
Institut für Kultur und Geschichte Indiens und Tibets
Neue Rabenstraße 3, 20354 Hamburg

६२. द्विषष्टितमोऽध्यायः

CHAPTER LXII

योनिव्यापच्चिकित्सा

Treatment of Yonivyāpad (disorders of female genital tract)

वातलायां क्रियासूत्रम्

योनिव्यापत्सु भूयिष्ठं शस्यते कर्म वातजित्। बस्त्यभ्यङ्गपरीषेकप्रलेपाः पिचुधारणम्॥ १॥

In yonivyāpad mostly vāta-alleviating measures are applied such as enema, anointment, bath, pasting and keeping tampons. [1]

वचादिचूर्णम्

वचोपकुञ्चिकाऽजाजीकृष्णावृषकसैन्धवम्। अजमोदां यवक्षारं चित्रकं शर्करान्वितम्॥ २॥
पिष्ट्वा प्रसन्नयालोड्य खादेत् तद् घृतभर्जितम्। योनिपार्श्वार्त्तिहृद्रोगगुल्मार्शोविनिवृत्तये॥ ३॥
गुडूचीत्रिफलादन्तीक्काथैश्च परिषेचनम्॥ ४॥

Vacādi cūrṇa

Vacā, upakuñcikā, jīraka, pippalī, vāsā, saindhava, ajamodā, yavakṣāra, citraka and śarkarā– these are pounded together, mixed with clear wine and fried with ghee. It is useful in pain in female genital tract, chest-pain, heart-diseases, gulma and piles. [2-3]

Decoction of guḍūcī, triphalā and dantī is used for sprinkling (bath). [4]

नतादितैलम्

नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः। तैलात् प्रसाधिताद्धार्य्यः पिचुर्योनौ रुजापहः॥ ५॥

Natādi taila

Nata (tagara), kaṇṭakārī, kuṣṭha, saindhava and devadāru– oil cooked with these is applied through tampon which is kept in vagina. It relieves pain. [5]

पित्तजायां चिकित्साक्रमः

पित्तलानान्तु योनीनां सेकाभ्यङ्गपिचुक्रियाः। शीताः पित्तहराः कार्य्याः स्नेहनार्थं घृतानि च॥ ६॥

In paittika yonivyāpad cold and pitta-alleviating measures such as bath, anointment and tampon are applied and ghṛta for unction. [6]

कफजायां चिकित्साक्रमः

योन्यां बलासदुष्टायां सर्वं रूक्षोष्णमौषधम्॥ ७॥

In yoni (female genital tract) affected with kapha all remedies should be rough and hot. [7]

पिप्पल्यादिवर्त्तिः

पिप्पल्या मरिचैर्माषैः शताह्वाकुष्ठसैन्धवैः। वर्तिस्तुल्या प्रदेशिन्या धार्य्या योनिविशोधनी ॥ ८ ॥

Pippalyādi vartti

Stick prepared of pippalī, marica, māṣa, śatāhvā, kuṣṭha and saindhava of the size of index finger should be kept in vagina. It cleans the tract. [8]

वातलादिषु प्रयोगाः

हिंस्राकल्कन्तु वातार्त्ता कोष्णमभ्यज्य धारयेत्। पञ्चवल्कस्य पित्तार्त्तो श्यामादीनां कफोत्तरा ॥ ९ ॥

One suffering from vāta should, after anointing the part, keep warm paste of hiṃsrā. Similarly, in predominance of pitta and kapha pañcavalkala and śyāmādi drugs should be kept in vagina. [9]

मूषिकतैलम्

मूषिकमांससंयुक्तं तैलमातपभावितम्। अभ्यङ्गाद्धन्ति योन्यर्शः स्वेदस्तन्मांससैन्धवैः ॥ १० ॥

Mūṣikataila

Oil mixed with rat's meat is kept in the sun (for a week). By anointment, it destroys yonyarśa (vaginal polypus). Besides, fomentation with the above meat mixed with rocksalt is also useful. [10]

अचरणा-चिकित्सा

गोपित्ते मत्स्यपित्ते वा क्षौमं त्रिःसप्तभावितम्। मधुना किण्वचूर्णं वा दद्यादचरणापहम् ॥
स्रोतसां शोधनं कण्डूक्लेदशोथहरञ्च तत् ॥ ११ ॥

In acaraṇā type of yonivyāpad, a piece of linen soaked with ox-bile or fish-bile twenty one times or yeast powder mixed with honey should be applied. It cleans the tract and removes itching, discharge and swelling. [11]

वामिन्यादिषु चिकित्साक्रमः

वामिन्यां पूतियोन्याञ्च कर्तव्यः स्वेदनो विधिः। क्रमः कार्य्यस्ततः स्नेहपिचुभिस्तर्पणं भवेत् ॥ १२ ॥

In vāminī (effluvium seminis) and pūtiyoni (upaplutā and pariplutā) sudative measures are applied. Thereafter the part should be saturated with unctuous tampons. [12]

शल्लक्यादितैलम्

शल्लकीजिङ्गिनीजम्बूधवत्वक्पञ्चवल्कलैः। कषायैः साधितः स्नेहः पिचुः स्याद्विप्लुतापहः ॥ १३ ॥

Śallakyādi taila

Bark of śallakī, jiṅginī, jambū and dhava and pañcavalkala– with the decoction of these oil is cooked. Tamponing with this alleviates viplutā. [13]

कर्णिन्यां कुष्ठादिवर्त्तिः

कर्णिन्यां वर्त्तिका कुष्ठपिप्पल्यर्काग्रसैन्धवैः। बस्तमूत्रकृता धार्य्या सर्वञ्च श्लेष्मनुद्धितम् ॥ १४ ॥

Kuṣṭhādi vartti

Stick prepared of kuṣṭha, pippalī, tender leaves of arka and saindhava along with goat's urine should be retained (in vagina) in karṇinī type (cervical erosion). Besides, all kapha-alleviating measures are wholesome. [14]

उदावर्तादिषु त्रैवृतस्नेहः

त्रैवृतं स्नेहनं स्वेद उदावर्त्तानिलार्त्तिषु। तदेव च महायोन्यां स्रस्तायाश्च विधीयते॥ १५॥

Application of traivṛta sneha (ghee, oil and fat mixed together) and fomentation is useful in udāvartā (dysmenorrhoea) and other vātika types, The same (unction) is prescribed in mahāyoni and srastā (yoni). [15]

मूषिकादितैलम्

आखोर्मांसं सपदि बहुधा खण्डखण्डीकृतं यत् तैले पाच्यं द्रवति नियतं यावदेतन्न सम्यक्।
तत्तैलाक्तं वसनमनिशं योनिभागे दधाना हन्ति व्रीडाकरभगफलं नात्र सन्देहबुद्धिः॥ १६॥

Mūṣikādi taila

Pieces of rat's meat are fried in oil until it is liquified. Now a piece of cloth is soaked with this oil and kept constantly on the affected part. Thus it destroys yonikanda. [16]

भिन्नयोनिचिकित्सा

शतपुष्पातैललेपाद्बदरीदलजात्तथा। पेटिकामूललेपाच्च योनिर्भिन्ना प्रशाम्यति॥ १७॥

Vaginal tear is healed up by application of śatapuṣpā mixed with oil or paste of badarī leaves or peṭikā root. [17]

अंत:प्रविष्टबहिर्निर्गतयोश्चिकित्सा

सुषवीमूललेपेन प्रविष्टाऽन्तर्बहिर्भवेत्। योनिर्मूषवसाभ्यङ्गान्निःसृता प्रविशेदपि॥ १८॥

Vagina contracted within comes out by paste of suṣavī root and the same prolapsed is restored within by anointment with rat's fat. [18]

योनिदाढर्यकरा योगाः

लोध्रतुम्बीफलालेपो योनिदाढर्यं करोति च। वेतसमूलनिःक्वाथक्षालनेन तथैव च॥ १९॥
मूषिकावादुलिवसाम्रक्षणं योनिदाढर्यदम्॥ २०॥

Application of the paste of lodhra and alābū fruits makes the vagina firm. The same effect is obtained by washing vagina with decoction of vetasa root. [19]

Anointment with fat of rat and vādulī provides firmness to vagina. [20]

वचादिलेपः

वचा नीलोत्पलं कुष्ठं मरिचानि तथैव च। अश्वगन्धा हरिद्रा च गाढीकरणमुत्तमम्॥ २१॥

Vacādi lepa

Vacā, nīlotpala, kuṣṭha, marica, aśvagandhā and haridrā– this paste is excellent for providing firmness (to vagina). [21]

मदफलादिः

मदफलमधुकर्पूरपूरितं भवति कामिनीजनस्य। चिरविगलितयौवनस्य वराङ्गमतिगाढं सुकुमारम्॥ २२॥

Madaphalādi

Filling up of vaginal canal with madaphala, honey and camphor mixed together makes the part firm but soft even in the aged women. [22]

पञ्चपल्लवादिघृतम्

पञ्चपल्लवयष्ट्याह्वमालतीकुसुमैर्घृतम्। रविपक्वमन्यथा वा योनिगन्धविनाशनम्॥ २३॥

Pañcapallavādi ghṛta

Ghee cooked with pañcapallava, madhuyaṣṭī and jātī flowers in the sun or on fire destroys foul odour of vagina. [23]

इक्ष्वाकुबीजादिवर्त्तिः

इक्ष्वाकुबीजदन्तीचपलागुडमदनकिण्वयष्ट्याह्वैः। सस्नुक्क्षीरैर्वर्त्तिर्योनिगता कुसुमसञ्जननी॥ २४॥

Suppository made of ikṣvāku (seeds), dantī, pippalī, jaggery, madana, yeast, madhuyaṣṭī and snuhī latex and kept in vagina induces menstrution. [24]

नष्टार्तवे योगत्रयम्

सकाञ्जिकं जवापुष्पं भृष्टं ज्योतिष्मतीदलम्। दूर्वायाः पिष्टकं प्राश्य वनिता त्वार्तवं लभेत्॥ २५॥

Japā flower mixed with sour gruel or jyotiṣmatī leaves, both fried, and rice-cake of dūrvā– woman taking any of these gains menstruation. [25]

आर्तवहरणे योगद्वयम्

धात्र्यञ्जनाभयाचूर्णं तोयपीतं रजो हरेत्। शेलुच्छदमिश्रपिष्टभक्षणञ्च तदर्थकृत्॥ २६॥

Powder of dhātrī (āmalaka), rasāñjana and harītakī taken with water checks menstruation. Similar effect is obtained by taking rice-cake mixed with śleṣmātaka leaves. [26]

गर्भप्रदो योगः

पुष्योद्धृतं लक्ष्मणायाश्चक्राङ्कायास्तु कन्यया। पिष्टं मूलमृतौ दुग्धघृतपीतं तु पुत्रदम्॥ २७॥

The root of lakṣmaṇā, marked with circular rings, collected in puṣya constellation, pounded by a virgin girl and taken with milk or ghee in ṛtukāla (progenetic season) provides son. [27]

अश्वगन्धाक्षीरम्

क्वाथेन हयगन्धायाः साधितं सघृतं पयः। ऋतुस्नाताऽबला पीत्वा धत्ते गर्भं न संशयः॥ २८॥

Aśvagandhādi kṣīra

Milk processed with decoction of aśvagandhā and added with ghee should be taken

by woman after bath in ṛtukāla. By this she conceives. [28]

पिप्पल्यादि:

पिप्पल्य: शृङ्गबेरञ्च मरिचं केशरन्तथा। घृतेन सह पातव्यं वन्ध्याऽपि लभते सुतम्॥ २९॥

Pippalyādi

Pippalī, śuṇṭhī, marica and nāgakeśara– this combination should be taken with ghee. By this even a barren woman conceives. [29]

स्वर्णभस्मादियोग:

स्वर्णस्य रूप्यकस्य च चूर्णे ताम्रस्य चाज्यसंमिश्रे। पीते शुद्धे क्षेत्रे भेषजयोगाद्भवेद्गर्भ: ॥ ३० ॥

By use of the bhasma of gold, silver and copper mixed with ghee the (reproductive) system is purified which prepares ground for other drugs to provide conception. [30]

श्वेतबलाप्रयोग:

कृत्वा शुद्धौ स्नानं विलङ्घ्य दिवसान्तरे तत: प्रात:।
स्नात्वा द्विजाय दत्त्वा भक्त्या सम्पूज्य लोकनाथेशम्॥ ३१॥
श्वेतबलाङ्घ्रिकयष्टिं कर्षं कर्षं फलन्तु शर्करायाः। पिष्ट्वैकवर्णजीवद्वत्साया गोस्तु दुग्धेन॥ ३२॥
समधिकघृतेन पीतं नात्र दिने देयमन्नमन्यच्च। क्षुधिते सदुग्धमन्नं दद्यादापुरुषसन्निधेस्तस्या: ॥ ३३ ॥
समदिवसे शुभयोगे दक्षिणपार्श्वालम्बिनी धीरा। त्यक्तस्त्र्यन्तरसङ्गप्रहृष्टमनसोऽतिवृद्धधातोश्च।
पुरुषस्य सङ्गमात्राल्लभते पुत्रं ततो नियतम्॥ ३४॥

After purifying bath the woman should fast for the day. Next day in morning after bath, offerings are presented to brāhmaṇas and god Lokanātha is worshiped with devotion. Thereafter the root of white variety of balā and the fruits of śarkarā each 10 gm should be pounded and taken with milk of cow, having one colour and live calf, added with profuse ghee. The woman should not take any other diet on that day. Thereafter, on feeling of appetite, she should be given cereals with milk till contact with male partner on even day and auspicious time. If she, lying on right, contacts with man who has no association with other woman, is happy and with increased semen, she achieves son positively. [31-34]

पुंसवनकर्म

गोष्ठजातवटस्य प्रागुत्तरशाखजे शुभे। शुङ्गे माषौ तथा गौरसर्षपौ दधियोजितौ॥
पुष्यपीतौ द्रुतापन्नगर्भाया: पुत्रकारकौ॥ ३५॥
कानकान् राजतान् वाऽपि लौहान् पुरुषकानणून्। ध्मातान्निवर्णान् पयसो दध्नो वाऽप्युदकस्य वा॥
क्षिप्त्वाऽञ्जलौ पिबेत् पुष्ये गर्भे पुत्रत्वकारकान्॥ ३६॥

In the two leaf-buds appeared in eastern or northern branch of banyan tree growing in grazing ground two black grams and two white mustard seeds are joined with curd.

This taken by a recently pregnant woman provides son. [35]

Small male images made of gold, silver or iron are heated red and then dipped in milk, curd or water. Taking this handful in puṣya constellation provides male sex in foetus. [36]

चतुर्विंशत्यङ्गं फलघृतम्

मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला। मेदा पयस्या काकोली मूलञ्चैवाश्वगन्धजम्॥ ३७॥
अजमोदा हरिद्रे द्वे हिङ्गुकं कटुरोहिणी। उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयम्॥ ३८॥
एतेषां कार्षिकैर्भागैर्घृप्रस्थं विपाचयेत्। शतावरीरसक्षीरं घृताद्देयं चतुर्गुणम्॥ ३९॥
सर्पिरेतन्नर: पीत्वा नित्यं स्त्रीषु वृषायते। पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान्॥ ४०॥
या चैवास्थिरगर्भा स्याद् या वा जनयते मृतम्। अल्पायुषं वा जनयेद् या च कन्यां प्रसूयते॥ ४१॥
योनिदोषे रजोदोषे परिस्रावे च शस्यते। प्रजावर्द्धनमायुष्यं सर्वग्रहनिवारणम्॥ ४२॥
नाम्ना फलघृतं ह्येतदश्विभ्यां परिकीर्तितम्। अनुक्तं लक्ष्मणामूलं क्षिपन्त्यत्र चिकित्सका:॥ ४३॥
जीववत्सैकवर्णाया घृतमत्र प्रशस्यते। आरण्यगोमयेनापि वह्निज्वाला प्रदीयते॥ ४४॥

Phalaghṛta I

Mañjiṣṭhā, madhuka, kuṣtha, triphalā, śarkarā, balā, medā, payasyā, kākolī, aśvagandhā, ajamodā, haridrā, dāruharidrā, hiṅgu, kaṭurohiṇī, nīlotpala, kumuda, drākṣā, kākolī, kṣīrakākolī, candana, rakta candana each 10 gm– with (the paste of) these ghee 640 gm is cooked along with śatāvarī juice and milk four times in quantity.

This phalaghrta is formulated by Aśvins. It is aphrodisiac for men and for women it removes various defects of genital tract and provides handsome, intelligent and long-lived sons. It also averts miscarriage and abortion and destroys all grahas.

Physicians include lakṣmaṇā root here though not mentioned. Ghee should be of cow having one colour aand live calf and cooking should be done on wild cow duṅg fire. [37-44]

त्रयोदशाङ्गं फलघृतम्

सहचरे द्वे त्रिफलां गुडूचीं सपुनर्नवाम्। शुकनासां हरिद्रे द्वे रास्नां मेदां शतावरीम्॥ ४५॥
कल्कीकृत्य घृतप्रस्थं पचेत् क्षीरं चतुर्गुणम्। तत्सिद्धं प्रपिबेन्नारी योनिशूलनिपीडिता॥ ४६॥
पिण्डिता चलिता या च नि:सृता विवृता च या। पित्तयोनिश्च विस्रस्ता षण्ढयोनिश्च या स्मृता॥ ४७॥
प्रपद्यन्ते तु ता: स्थानं गर्भं गृह्णन्ति चासकृत्। एतत् फलघृतं नाम योनिदोषहरं परम्॥ ४८॥

Phalaghṛta II

Ghee 640 gm is cooked with the paste of two types of saireyaka, triphalā, guḍūcī, punarnavā, śukanāsā, haridrā, dāruharidrā, rāsnā, medā and śatāvarī along with four times milk. It alleviates pain in genital tract, prolapse and other disorders of uterus, sterility etc. [45-48]

नीलोत्पलाद्यं घृतम्

नीलोत्पलोशीरमधूकयष्टिद्राक्षाविदारीकुशपञ्चमूलैः।
स्याज्जीवनीयैश्च घृतं विपक्वं शतावरीकारसदुग्धमिश्रम्॥ ४९॥
तच्छर्करापादयुतं प्रशस्तमसृग्दरे मारुतरक्तपित्ते।
क्षीणे बले रेतसि सम्प्रदुष्टे कृच्छ्रे च पित्तप्रभवे च गुल्मे॥ ५०॥

Nīlotpala ghṛta

Ghee is cooked with nīlotpala, uśīra, madhūka, yaṣṭīmadhu, drākṣā, vidārī, tṛṇapañcamūla and jīvanīya gaṇa along with śatāvarī juice and milk. It should be mixed with one-fourth sugar and used in asṛgdara, vātika disorders, raktapitta, debility, defects of semen, paittika dysuria and gulma. [49-50]

बृहच्छतावरीघृतम्

शतावरीमूलतुलाश्चतस्रः सम्प्रपीडयेत्। रसेन क्षीरतुल्येन पचेत्तेन घृताढकम्॥ ५१॥
जीवनीयैः शतावर्य्या मृद्वीकाभिः परूषकैः। पिष्टैः प्रियालैश्चाक्षांशैर्द्वियष्टिमधुकैर्भिषक्॥ ५२॥
सिद्धशीते च मधुनः पिप्पल्याश्च पलाष्टकम्। दत्त्वा दशपलञ्चात्र सितायास्तद्विमिश्रितम्॥ ५३॥
ब्राह्मणान् प्राशयेत् पूर्वं लिह्यात् पाणितलन्ततः। योन्यसृक्शुक्रदोषघ्नं वृष्यं पुंसवनञ्च तत्॥ ५४॥
क्षतक्षयं रक्तपित्तं कासं श्वासं हलीमकम्। कामलां वातरक्तञ्च वीसर्पं हृच्छिरोग्रहम्॥
उन्मादादीनपस्मारान् वातपित्तात्मकान् जयेत्॥ ५५॥

Bṛhacchatāvarī ghṛta

Ghṛta 2.56 kg is cooked with śatāvarī juice 16 litre with equal milk along with the paste of jīvanīya drugs, śatāvarī, drākṣā, paruṣaka, piyāla and two types of yaṣṭīmadhu, when prepared and cooled honey and pippalī each 320 gm and sugar 400 gm are added thereto. First it should be offered to brāhmaṇas and then should be taken in dose of 10 gm.

It is aphrodisiac, puṃsavana (providing male progeny), alleviates defects of genital tract, menses and semen and is useful in wasting caused by (chest) wound, raktapitta, cough, dyspnoea, halīmaka, jaundice, vātarakta, erysipelas, pain in heart and head, mental disorders such as insanity, epilepsy etc. and other diseases caused by vāta and pitta. [51-55]

रोमशातनो योगः

दग्ध्वा शङ्खं क्षिपेद्रम्भास्वरसे तत्तु पेषितम्। तुल्यालं लेपतो हन्ति रोमं गुह्यादिसम्भवम्॥ ५६॥

Śaṅkha, after burning, is dipped in juice of kadalī. Then it is rubbed with equal orpiment and applied to private parts to remove hairs. [56]

लोमशातनयोगद्वयम्

रक्ताञ्जनापुच्छचूर्णयुक्तं तैलन्तु सार्षपम्। सप्ताहं व्युषितं हन्ति मूलाद्रोमाण्यसंशयम्॥ ५७॥
कुसुम्भतैलाभ्यङ्गो वा रोम्णामुत्पाटितेऽन्तकृत्॥ ५८॥

The powdered tail of raktāñjanā dipped in mustard oil for a week acts as depilatory agent. [57]

After removing hairs kusumbha oil is anointed on the part. It eradicates hairs. [58]

आरग्वधाद्यं तैलम्

आरग्वधमूलपलं कर्षद्वितयं तु शङ्खचूर्णस्य। हरितालस्य च खरजे मूत्रप्रस्थे तु कटुतैलम्॥ ५९॥
पक्वं तैलं तदर्थं शङ्खहरितालचूर्णितं लेपात्। निर्मूलयति च रोमाण्यन्येषां सम्भवो नैव॥ ६०॥

Āragvadhādya taila

Āragvadha root 40 gm, lime of conch-shell and orpiment each 20 gm– with these mustard oil is cooked along with ass's urine 640 ml. This oil mixed with powdered śankha and orpiment is pasted on the part. It removes and eradicates hairs. [59-60]

कर्पूरादितैलम्

कर्पूरभल्लातकशङ्खचूर्णं क्षारो यवानाञ्च मनःशिला च।
तैलं विपक्वं हरितालमिश्रं रोमाणि निर्मूलयति क्षणेन॥ ६१॥

Karpūrādi taila

Powdered camphor, bhallātaka, conch-shell, yavakṣāra and realgar– with these mustard oil is cooked and later added with orpiment. By local application it eradicates hairs in moments. [61]

क्षारतैलम्

शुक्तिशम्बूकशङ्खानां दीर्घवृन्तात् समुष्ककात्। दग्ध्वा क्षारं समादाय खरमूत्रेण गालयेत्॥ ६२॥
क्षाराष्टभागं विपचेत् तैलञ्च सार्षपं बुधः। इदमन्तःपुरे देयं तैलमात्रेयपूजितम्॥ ६३॥
बिन्दुरेकः पतेद् यत्र तत्र रोमापुनर्भवः। मदनादिव्रणे देयमश्विभ्यामेव निर्मितम्॥ ६४॥
अर्शसां कुष्ठरोगाणां पामादद्रुविचर्चिनाम्। क्षारतैलमिदं श्रेष्ठं सर्वक्लेदहरं परम्॥ ६५॥

Kṣārataila

Śukti, śambūka, śankha, aralu and muṣkaka are burnt and ash collected. It is decanted with ass's urine and kṣāra obtained. With this kṣāra 1/8 mustard oil is cooked. It is recognized by Ātreya and formulated by Aśvins. Even one drop of this oil eradicates hairs. Besides, it is also useful in venereal diseases, piles, kuṣṭha, skin diseases such as pāmā, ring worm and vicarcikā. This kṣārataila is excellent remedy for all discharges. [62-65]

॥ इति योनिव्यापच्चिकित्सा॥ ६२॥

Thus ends treatment of yonivyāpad. [62]

६३. त्रिषष्टितमोऽध्यायः

CHAPTER LXIII

स्त्रीरोग-चिकित्सा

Treatment of Strīroga (women's diseases during pregnancy and puerperium)

गर्भस्रावे सप्तसु मासेषु मधुकादिसप्तयोगाः

मधुकं शाकबीजञ्च पयस्या सुरदारु च। अश्मन्तकः कृष्णतिलास्ताम्रवल्ली शतावरी॥ १॥
वृक्षादनी पयस्या च तथैवोत्पलशारिवा। अनन्ता शारिवा रास्ना पद्मा मधुकमेव च॥ २॥
बृहतीद्वयकाश्मर्य्यक्षीरिशुङ्गास्त्वचो बिसम्। पृथक्पर्णी बला शिग्रुः श्वदंष्ट्रा मधुयष्टिका॥ ३॥
शृङ्गाटकं बिसं द्राक्षा कशेरु मधुकं सिता। मासेषु सप्त योगाः स्युरर्द्धश्लोकास्तु सप्तसु॥
यथाक्रमं प्रयोक्तव्या गर्भस्रावे पयोयुताः॥ ४॥

(1) Madhuka, śāka (seeds), payasyā and devadāru (2) aśmantaka, black sesamum, mañjiṣṭhā and śatāvarī (3) vṛkṣādanī, payasyā and utpalasārivā (4) anantā, sārivā, rāsnā, bhārgī and madhuka (5) bṛhatī, kaṇṭakārī, kāśmarya, buds and bark of kṣīrī vṛkṣa and bisa (6) pṛśniparṇī, balā, śigru, gokṣura, and madhuka and (7) śṛṅgātaka, bisa, drākṣā, kaseru, madhuka and śarkarā– these seven formulations should be mixed with milk and used in case of miscarriage or abortion in seven consecutive months. [1-4]

कपित्थादिक्षीरम्

कपित्थबिल्वबृहतीपटोलेक्षुनिदिग्धिकाः। मूलानि क्षीरसिद्धानि दापयेद्भिषगष्टमे॥ ५॥

Kapitthādi kṣīra

In the eighth month, milk processed with roots of kapittha, bṛhatī, bilva, paṭola, ikṣu and kaṇṭakārī should be given. [5]

मधुकादिक्षीरम्

नवमे मधुकाऽनन्तापयस्याशारिवाः पिबेत्॥ ६॥

Madhukādi kṣīra

In the ninth month, madhuka, anantā, payasyā and sārivā processed with milk should be taken. [6]

शुण्ठीक्षीरं शुण्ठ्यादिक्षीरञ्च

पयस्तु दशमे शुण्ठ्या शृतशीतं प्रशस्यते। सक्षीरा वा हिता शुण्ठी मधुकं देवदारु च॥
एवमाप्यायते गर्भस्तीव्रा रुक् चोपशाम्यति॥ ७॥

Suṇṭhīkṣira-Suṇṭhyādi kṣīra

In the tenth month, milk boiled with śuṇṭhī and cooled is useful or śuṇṭhī, madhuka and devadāru (processed) with milk are used. By this foetus is nourished and severe pain subsides. [7]

कुशादिक्षीरम्

कुशकाशोरुबूकाणां मूलैर्गोक्षुरकस्य च। शृतं दुग्धं सितायुक्तं गर्भिण्याः शूलनुत् परम्॥ ८॥

Kuśādi kṣīra

Milk processed with roots of kuśa, kāśa, eraṇḍa and gokṣura and taken with sugar alleviates pain during pregnancy. [8]

कशेर्वादिक्षीरम्

कशेरुशृङ्गाटकजीवनीयपद्मोत्पलैरण्डशतावरीभिः।
सिद्धं पयः शर्करया विमिश्रं संस्थापयेद् गर्भमुदीर्णशूलम्॥ ९॥

Kaśervādi kṣīra

Milk processed with kaśeru, śṛṅgāṭaka, jīvanīya drugs, kamala, nīlotpala, eraṇḍa and śātāvarī and mixed with sugar relieves pain and stabilises foetus. [9]

कशेर्वादिचूर्णम्

कशेरुशृङ्गाटकपद्मकोत्पलं समुद्गयष्टीमधुकं सशर्करम्।
सशूलगर्भस्रुतिपीडिताङ्गना पयोविमिश्रं पयसाऽन्नभुक् पिबेत्॥ १०॥

Kaśervādi cūrṇa

Kaśeru, śṛṅgātaka, padma, utpala, mudga, yaṣṭīmadhu and sugar– this powder should be taken with milk by the woman suffering from pain and abortion. She should also take in diet cereals with milk. [10]

मधुकादिक्षीरम्

गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम्। सितामधुककाश्मर्य्यैर्हितमुत्थापने पयः॥ ११॥
गर्भशोषे त्वामगर्भा प्रसहाश्च सदा हिताः॥ १२॥

Madhukādi kṣīra

In case of wasting of foetus and babies caused by vāta milk processed with śarkarā, madhuka and kāśmarya is useful for elevation. [11]

In wasting of foetus, immature foetuses (eggs) and (meat of) overpowering animals (cocks etc) should be used. [12]

सुखप्रसवे योगाः

पाठालाङ्गलिसिंहास्यमयूरकजटैः पृथक्। नाभिबस्तिभगालेपात् सुखं नारी प्रसूयते॥ १३॥

परूषकस्थिरामूललेपस्तद्वत् पृथक् पृथक्। वासामूले ध्रुवं सूते कटिबद्धे द्रुतन्तथा॥ १४॥
पाठायास्तु शिफां योनौ या नारी सम्प्रधारयेत्। सत्यं प्रसवकाले तु सा सुखेन प्रसूयते॥ १५॥
तुषाम्बुपरिपिष्टेन मूलेन परिलेपयेत्। लाङ्गल्याश्चरणौ सूते क्षिप्रमेतेन गर्भिणी॥ १६॥
नाभिबस्तिभगालेपः आटरूषकमूलतः। गृहाम्बुना गेहधूमपानं गर्भापकर्षणम्॥ १७॥

By applying paste of the root of pāṭhā, lāṅgalī, vāsā and apāmārga singly on navel, pelvis, and vulva, the woman delivers easily. [13]

Similar is the effect of the paste of the root of paruṣaka and śālaparṇī separately. Likewise, by tying the root of vāsā in waist the woman delivers quickly. [14]

The woman who keeps the root of pāthā in vagina delivers in time easily. [15]

One should apply the paste of the root of lāṅgalī pounded with sour gruel on feet. By this she delivers quickly. [16]

Pasting on navel, pelvis and vulva with vāsā root or intake of soot with sour gruel extracts the foetus. [17]

मातुलुङ्गादिः

मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम्। घृतेन सह पातव्यं सुखं नारी प्रसूयते॥ १८॥

Mātuluṅgādi

Mātuluṅga (root) and madhuka mixed with honey should be taken with ghee. Thus woman delivers easily. [18]

सर्पकञ्चुकमसीप्रयोगः

पुटदग्धसर्पकञ्चुकमसृणमसीकुसुमसारसहिताञ्जिताक्षी।
झटिति विशल्या जायेत् गर्भवती मूढगर्भाऽपि॥ १९॥

Snake-slough is converted to ash by closed heating and mixed with honey. By applying it as collyrium in eyes, the woman, in abnormal presentation, is relieved of it quickly. [19]

हिङ्ग्वादि

गृहाम्बुना हिङ्गुसिन्धुपानं गर्भापकर्षणम्॥ २०॥

Hiṅgvādi

Intake of hiṅgu and rocksalt with sour gruel expels foetus. [20]

गर्भच्यावनमन्त्रः

इहामृतञ्च सोमश्च चित्रभानुश्च भाविनि। उच्चैःश्रवाश्च तुरगो मन्दिरे निवसन्तु ते॥ २१॥
इदममृतमपां समुद्धृतं वै तव लघुगर्भमिमं विमुञ्चतु स्त्रि!।
तदनलपवनार्कवासवास्ते सह लवणाम्बुधरैर्दिशन्तु शान्तिम्॥ २२॥
मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्येण रश्मयः। मुक्तः सर्वभयाद्गर्भ एह्येहि मा चिर स्वाहा॥ २३॥

जलं च्यावनमन्त्रेण सप्तवाराभिमन्त्रितम्। पीत्वा प्रसूयते नारी दृष्ट्वा चोभयत्रिंशकम्॥ २४॥

"ihāmṛtañca somaśca citrabhānuśca bhāvini uccaiḥśravāśca turago mandire nivasantu te. Idamamṛtamapām samuddhṛtaṃ vai tava laghu garbhamimaṃ vimuñcatu strī. Tadanalapavanārkavāsavāste saha lavaṇāmbudharairdiśantu śāntim. Muktāḥ pāśā vipāśaśca muktāḥ sūryeṇa raśmayaḥ. Muktāḥ sarvabhayād garbha ehyehi mā cira svāhā"

Water incanted with the above mantra seven times is given to the woman to drink. By this she delivers quickly. [21-24]

उभयपञ्चदशकोभयत्रिंशकयन्त्रे

तथोभयपञ्चदशदर्शनं सुखसूतिकृत्॥ २५॥

उभयपञ्चदशयन्त्रम्

वसुगुणाब्ध्येकबाणनवषट्सप्तयुगैः क्रमात्। सर्वं पञ्चदश द्विस्तु त्रिंशकं नवकोष्ठके॥ २६॥
नारीऋतुऋतुवसुभिः सह पक्षदिगष्टादशभिरेव च।
अर्कभुवनाब्धिसहितैरुभयत्रिंशकमिदमाश्चर्य्यम्॥ २७॥

By gazing at both ways thirty or fifteen figure one delivers quickly.

A rectangular figure is divided into nine blocks and from above below, 8,3,4;1,5,9 and 6,7,2 numbers are inserted in each block. It makes 'both ways fifteen figure' (Fig.1) and by doubling the same numbers it becomes 'both ways thirty'. In other words, the 'Both ways thirty figure' is as follows– the numbers 16,6,8; 2,10,18 and 12,14,4 are inserted in each block from above below (Fig.2). [25-27]

8	1	6
3	5	7
4	9	2

Fig.1

16	2	12
6	10	14
8	18	4

Fig.2

अपरापातनोपचारः

कटुतुम्ब्यहिनिर्मोककृतवेधनसर्षपैः। कटुतैलान्वितो धूमो योनेः पातयतेऽपराम्॥ २८॥
कचवेष्टितयाऽङ्गुल्या घृष्टे कण्ठे सुखं पतत्यपरा॥ २९॥
"एरण्डस्य वने काको गङ्गातीरमुपागतः। इतः पिबति पानीयं विशल्या गर्भिणी भवेत्॥"
अनेन सप्तधाऽऽमन्त्र्य जलं देयं विशल्यकम्॥ ३०॥

मूलेन लाङ्गलिक्या: वै संलिप्ते पाणिपादके ॥ ३१ ॥
अपरापातनं मद्यैः पिप्पल्यादिरजः पिबेत्। शालिमूलाक्षमात्रं वा मूत्रेणाम्लेन वाऽन्वितम् ॥ ३२ ॥

Fumigation of vagina with kaṭutumbī, snake-slough, kṛta-vedhana and sarṣapa mixed with mustard oil fells the placenta. [28]

By rubbing the throat with finger wrapped with hairs fells the placenta easily. [29]

Water incanted seven times with the following mantra also acts similarly– 'eraṇḍasya vane kāko gaṅgātīramupāgatah. Itaḥ pibati pānīyaṃ viśalyā garbhinī bhavet'. [30]

Application of the paste of lāṅgalī root to palm and sole fells placenta. [31]

For expulsion of placenta, one should take powder of pippalyādi drugs with wine or śāli root 10 gm should be taken with urine or sour gruel. [32]

योनिशूलहरो योग:

उपकुञ्चीं पिप्पलीश्च मदिरां लाभतः पिबेत्। सौवर्च्चलेन संयुक्तां योनिशूलनिवारणीम् ॥ ३३ ॥

Intake of upkuñcikā and pippalī mixed with sauvarcala along with wine should be taken to alleviate pain in female genital tract. [33]

मक्कल्लशूलहरो योग:

सूताया हृच्छिरोबस्तिशूलं मक्कल्लसंज्ञितम् ॥ ३४ ॥
यवक्षारं पिबेत्तत्र सर्पिषोष्णोदकेन वा। पिप्पल्यादिगणक्वाथं पिबेद्वा लवणान्वितम् ॥ ३५ ॥

Pain in cardiac region, head and pelvis, during puerperium, is known as makkalla. [34]

In that case, one should take yavakṣāra with ghee or warm water or decoction of pippalyādi gaṇa mixed with rocksalt should be taken. [35]

गर्भपातजरक्तस्रावे योग:

पारावतशकृत् पीतं शालितण्डुलवारिणा। गर्भपातानन्तरोत्थरक्तस्रावनिवारणम् ॥ ३६ ॥

Faeces of pigeon taken with śāli rice-water checks haemorrhage after abortion. [36]

किक्किशरोगहरो योग:

जलपिष्टवरुणपत्रैः सघृतैरुद्वर्त्तनप्रलेपौ तु। किक्किशरोगं हरतो गोमयघर्षादथो विहितौ ॥ ३७ ॥

Anointment and paste with varuṇa leaves pounded with water and mixed with ghee, after rubbing the part with cow dung, removes kikkisa. [37]

ह्रीबेरादिक्वाथ:

ह्रीबेरारलुरक्तचन्दनबलाधन्याकवत्सादनीमुस्तोशीरयवासपर्पटविषाक्वाथं पिबेद्गुर्विणी।
नानादोषयुतातिसारकगदे रक्तस्रुतौ वा ज्वरे योगोऽयं मुनिभिः पुरा निगदितः सूत्यामयेषूत्तमः ॥ ३८ ॥

Hriberādi kvātha

Hrībera, aralu, rakta candana, balā, dhānyaka, guḍūcī, musta, uśīra, yavāsa, parpaṭa and ativiṣā– this decoction should be taken in various types of diarrhoea, haemorrhage and fever. It is an excellent remedy for puerperal diseases. [38]

अमृतादिक्वाथ:

अमृतानागरसहचरभद्रोत्कटपञ्चमूलजलदजलम्। मधुयुक्तं विनिवारयति सज्वरं सूतिकातङ्कम्॥ ३९॥

Amṛtādi kvātha

Amṛtā (guḍūcī), śuṇṭhī, sahacara, bhadra, itkaṭa, pañcamūla (laghu) and mustaka– this decoction mixed with honey alleviates puerperal disease including fever. [39]

सहचरादिक्वाथ:

सहचरपुष्करवेतसमूलं विकङ्कतदारुकुलत्थसमम्।
जलमत्र ससैन्धवहिङ्गुयुतं सद्योज्वरसूतिकरोगहरम्॥ ४०॥
दशमूलीकृत: क्वाथ: सद्य: सूतिरुजापह:॥ ४१॥

Sahacarādi kvātha

Sahacara (saireyaka), puṣkaramūla, vetasa (root), vikaṅkata, devadāru and kulattha each in equal part– decoction of these mixed with saindhava and hiṅgu alleviates fever and other puerperal disorders. [40]

Decoction of daśamūla destroys puerperal diseases instantaneously. [41]

वज्रकाञ्जिकम्

पिप्पली पिप्पलीमूलं चव्यं शुण्ठी यमानिका। जीरके द्वे हरिद्रे द्वे विडसौवर्च्चलन्तथा॥ ४२॥
एतैरेवौषधै: पिष्टैरारनालं विपाचितम्। आमवातहरं वृष्यं कफघ्नं वह्निदीपनम्॥ ४३॥
काञ्जिकं वज्रकं नाम स्त्रीणामग्निविवर्द्धनम्। मक्कल्लशूलशमनं परं क्षीराभिवर्द्धनम्॥
क्षीरपाकविधानेन काञ्जिकस्यापि साधनम्॥ ४४॥

Vajrakāñjika

Pippalī, pippalīmūla, cavya, śuṇṭhī, yavānī, jīraka, kṛṣṇa jīraka, haridrā, dāruharidrā, viḍa and sauvarcala– with the paste of these drugs sour gruel is cooked. This is known as vajrakāñjika. It promotes sexual vigour, digestion and lactation and allevites āmavāta, kapha and makkalla pain. Processing of sour gruel is done according to method of kṣīrapāka. [42-44]

पञ्चजीरकगुड:

जीरकं हवुषा धान्यं शताह्वा बदराणि च। यमानी त्र्यष्टको हिङ्गुपत्रिका कासमर्दकम्॥ ४५॥
पिप्पली पिप्पलीमूलमजमोदाऽथ बाष्पिका। चित्रकञ्च पलांशानि तथान्यच्च चतु:पलम्॥ ४६॥
कशेरुकं नागरञ्च कुष्ठं दीप्यकमेव च। गुडस्य च शतं दद्याद् घृतप्रस्थं तथैव च॥ ४७॥

क्षीरद्विप्रस्थसंयुक्तं शनैर्मृद्वग्निना पचेत्। पञ्चजीरक इत्येष सूतिकानां प्रशस्यते॥ ४८॥
गर्भार्थिनीनां नारीणां बृंहणीये समारुते। विंशतिं व्यापदो योनेः कासं श्वासं ज्वरं क्षयम्॥ ४९॥
हलीमकं पाण्डुरोगं दौर्गन्ध्यं मूत्रकृच्छ्रताम्। घ्नन्ति पीनोन्नतकुचाः पद्मपत्रायतेक्षणाः॥
उपयोगात् स्त्रियो नित्यमलक्ष्मीमलवर्जिताः॥ ५०॥

Pañcajīraka guḍa

Jīraka, hapuṣā, dhānyaka, śatāvarī, badara, yavānī, rājikā, hiṅgupatrikā, kāsamarda, pippalī, pippalīmūla, ajamodā, bāṣpikā and citraka each 40 gm, kaśeruka, śuṇṭhī, kuṣṭha, dīpyaka each 160 gm, Jaggery 4 kg, ghee 640 gm, milk 1.28 litre– this is cooked slowly on mild fire. This pañcajīraka formulation is useful for women during puerperium and also for those desirous of pregnancy. It promotes nourishment of foetus by controlling drying effect of vāta. It alleviates twenty yonivyāpad, cough, dyspnoea, fever, wasting, halīmaka, pāṇḍuroga, foul odour and dysuria and restores normal health and beauty to woman. [45-50]

स्तन्यवर्द्धनं योगद्वयम्

वनकार्पासिकेक्षूणां मूलं सौवीरकेण वा। विदारिकन्दं सुरया पिबेद्वा स्तन्यवर्द्धनम्॥ ५१॥

Root of vanakārpāsa and sugarcane taken with sour gruel or vidārīkanda with wine acts as galactogogue. [51]

शालितण्डुलचूर्णम्

दुग्धेन शालितण्डुलचूर्णपानं विवर्द्धयेत्। स्तन्यं सप्ताहतः क्षीरसेविन्यास्तु न संशयः॥ ५२॥

Intake of powdered śāil rice with milk for a week, keeping on milk diet, promotes lactation. [52]

स्तन्यशोधनम्

हरिद्रादि वचादिं वा पिबेत् स्तन्यविशुद्धये॥ ५३॥

For purification of breast-milk one should take haridrādi or vacādi drugs. [53]

वातदुष्टस्तन्ये दशमूलक्वाथः

तत्र वातात्मके स्तन्ये दशमूलीजलं पिबेत्॥ ५४॥

In predominance of vāta in breast-milk one should take decoction of daśamūla. [54]

अमृतादिक्वाथः

पित्तदुष्टेऽमृताभीरुपटोलं निम्बचन्दनम्। धात्री कुमारश्च पिबेत् क्वाथयित्वा सशारिवम्॥ ५५॥

Amṛtādi kvātha

In vitiation due to pitta, the wet-nurse and the child should take decoction of amṛtā (guḍūcī), śatāvarī, paṭola, nimba, candana and sārivā. [55]

त्रिफलादिक्वाथ:

कफे वा त्रिफलां मुस्तं भूनिम्बं कटुरोहिणीम् ॥ ५६ ॥

Triphalādi kvātha

In predominance of kapha, decoction of triphalā, musta, kirātatikta and kaṭukā should be used. [56]

भार्ग्यादिक्वाथ:

भार्गीदारुवचापाठा: पिबेत् सातिविषा: शृता: । धात्रीस्तन्यविशुद्ध्यर्थं मुद्गयूषरसाशिनी ॥ ५७ ॥

Bhārgyādi kvātha

The wetnurse should take the decoction of bhārgī, devadāru, vacā, pāṭhā and ativiṣa, keeping on diet of soup of mudga or meat. [57]

स्तनविद्रधि-चिकित्सा

कुक्कुरमेञ्चुकामूलं चर्वितमास्ये विधारितं जयति । सप्ताहात् स्तनकीलं स्तन्यञ्चैकान्तत: कुरुते ॥ ५८ ॥

शोथं स्तनोत्थितमवेक्ष्य भिषग्विदध्याद् यद्विद्रधावभिहितन्त्विह भेषजं तत् ।
आमे विदह्यति तथैव गते च पाकं तस्या: स्तनौ सततमेव च निर्दुहीत ॥ ५९ ॥

Root of kukkurameñcukā chewed and kept in mouth controls stanakīla (nail-like growth in breast) and promotes lactation. [58]

As soon as inflammation in breast is detected, it should be treated on the line of abscess. Moreover, breast-milk should be cupped out in unripe, ripening and ripe stages. [59]

स्तनपीडायां लेपद्वयम्

विशालामूललेपस्तु हन्ति पीडां स्तनोत्थिताम् । निशाकनकफलाभ्यां लेपश्चापि स्तनार्त्तिहा ॥ ६० ॥

The paste of viśālā root alleviates pain of breasts. Similarly does that of haridrā and dhattūra fruit. [60]

स्तनकठिनीकरणे योगौ

मूषिकवसया शूकरगजमहिषमांसचूर्णसंयुतया । अभ्यङ्गमर्दनाभ्यां कठिनपीनस्तनौ भवत: ॥ ६१ ॥
महिषीभवनवनीतं व्याधिबलोग्रा तथैव नागबला । पिष्ट्वा मर्दनयोगात् पीनं कठिनं स्तनं कुरुते ॥ ६२ ॥

The breasts anointed and massaged with rat's fat mixed with the powder of the meat of horse, elephant and bufallo regain firmness and corpulence. [61]

Similarly acts the massage with kuṣṭha, balā, vacā and nāgabalā mixed with bufallo's butter. [62]

श्रीपर्णीतैलम्

श्रीपर्णीरसकल्काभ्यां सिद्धं तैलं तिलोद्भवम् । तूलकेनैव तत्तैलं स्तनस्योपरि धारयेत् ॥
पतितावुत्थितौ स्त्रीणां भवेयातां पयोधरौ ॥ ६३ ॥

Śrīparṇī-taila

Tila oil cooked with juice and paste of gambhārī should be applied to breasts with cotton swab. It elevates the fallen breasts of women. [63]

काशीशाद्यं तैलम्

काशीशतुरगगन्धाशाबरगजपिप्पलीविपक्वेन। तैलेन यान्ति वृद्धिं स्तनकर्णवराङ्गलिङ्गानि॥ ६४॥

Kāśīśādya taila

Kāśīśa, aśvagandhā, lodhra and gajapippalī– oil cooked with these promotes enlargement of breasts, ears and female and male genitals. [64]

स्तनस्थिरकरो योगः

प्रथमर्त्तौ तण्डुलाम्भो नस्यं कुर्य्यात् स्तनौ स्थिरौ॥ ६५॥

Snuffing with rice-water during first menses (after delivery) make the breasts firm. [65]

श्यामादियमकस्नेहः

गोमहिषीघृतसहितं तैलं श्यामाकृताञ्जलिवचाभिः। सकटुकानिशाभिः सिद्धं नस्यं स्तनोत्थापनं परमम्॥

Śyāmādi yamaka

Oil mixed with ghee of cow and bufallo is cooked with śyāmā (priyaṅgu), lajjālu, vacā, kaṭukā and haridrā and should be used as snuff. It elevates breasts. [66]

अपरे प्रयोगाः

सुतनूकरोति मध्यं पीतं मथितेन माधवीमूलम्। स्याच्छिथिलापि च गाढा सुरगोपाज्याभ्यङ्गतो योनिः॥
शववहनस्थितबन्धनरज्ज्वा सन्ताडनाद्धि दयितेन। नश्यत्यबलाद्वेषः पत्यौ सहजः कृतोऽथवा योगैः॥ ६८॥

Mādhavī root taken with buttermilk makes the waist thin. The lax vagina becomes tight by massage of indragopa (an insect) and ghee. [67]

Disenchantment of woman, innate or caused by charms, is warded off if the man beats her with the cord binding the corpse. [68]

पतिविद्वेषहरो योगः

दत्त्वैव दुग्धभक्तं विप्रायोत्पाट्य सितबलामूलम्। पुष्ये कन्यापिष्टं दत्तमनिच्छाहरं भक्ष्ये॥ ६९॥

Rice-milk is offered to some brāhmaṇa and root of śveta balā is taken out in puṣya constellation pounded by a virgin woman and given to the woman mixed with food. It removes aversion. [69]

॥ इति स्त्रीरोग-चिकित्सा॥ ६३॥

Thus ends treatment of strī-roga. [63]

६४. चतु:षष्टितमोऽध्याय:

CHAPTER LXIV

बालरोग-चिकित्सा

Treatment of Bālaroga (diseases of children)

कुष्ठादिलेह:

कुष्ठं वचाऽभया ब्राह्मी कनकं क्षौद्रसर्पिषा। वर्णायु:कान्तिजननं लेहं बालस्य दापयेत्॥ १॥

Kuṣṭhādi leha

Kuṣṭha, vacā, harītakī, brāhmī and svarṇa (bhasma)– all pounded together and mixed with honey and ghee should be given to the child to lick. It promotes complexion, life-span and lustre. [1]

स्तन्याभावे दुग्धविधानम्

स्तन्याभावे पयश्छागं गव्यं वा तद्गुणं पिबेत्॥ २॥

In case of the absence of breast-milk goat's or cow's milk, having similar qualities, should be given. [2]

उल्वहरणे योग:

तर्क्वधो गुडिकां तप्तां निर्वाप्य कटुतैलके। तत्तैलं पानतो हन्ति बालानामुल्वमुद्धतम्॥ ३॥

The lower bolt of the spining rod is heated and dipped in mustard oil. This oil, by intake, eliminates the remnants of the intra-uterine life of the child. [3]

व्योषादिकल्क:

व्योषशिवोग्रारजनीकल्कं स्तन्येन पीतमथ पयसा। उल्वं नि:शेषं कुरुते पटुतां बालस्य चात्यन्तम्॥ ४॥

Paste of vyoṣa (trikaṭu), harītakī, vacā and haridrā taken with breast-milk removes completely the mucus of throat of the child and makes him alert. [4]

नाभिशोथे चिकित्सा

मृत्पिण्डेनाग्नितप्तेन क्षीरसिक्तेन सोष्मणा। स्वेदयेदुत्थितां नाभिं शोथस्तेनोपशाम्यति॥ ५॥

One should foment the swollen navel with heated earthen ball sprinkled with milk. By this swelling disappears. [5]

निशादितैलम्

नाभिपाके निशालोध्रप्रियङ्गुमधुकै: शृतम्। तैलमभ्यञ्जने शस्तमेभिर्वाऽप्यवचूर्णनम्॥ ६॥

Niśādi taila

In inflammation of umbilicus oil cooked with niśā (haridrā), lodhra, priyaṅgu and madhuka is applied to the part or dusted with the powder of the above drugs. [6]

आहिण्डिकाहरा: प्रयोगा:

सोमग्रहणे विधिवत् केकिशिखामूलमुद्धृतं बद्धम्। जघनेऽथ कन्धरायां क्षपयत्याहिण्डिकां नियतम्॥
सप्तदलपुष्पमरिचं पिष्टं गोरोचनासहितम्। पीतं तद्वत् तण्डुलभक्तकृतो दग्धपिष्टकप्राशः॥ ८॥
जम्बुकनासा वायसजिह्वा नाभिर्वराहसम्भूता। कांस्यं रसोऽथ गरलं प्रावृड्भेकस्य वामजङ्घास्थि॥
इत्येकशोऽथ मिलितं विधृतं ग्रीवादिकटिदेशे। आहिण्डिकाप्रशमनमभ्यङ्गो नातिपथ्यविधिः॥

Root of mayūraśikhā collected properly on lunar eclipse and tied in waist or neck alleviates āhiṇḍikā. [7]

Intake of saptaparṇa (flower) and marica pounded together and mixed with gorocana (alleviates āhiṇḍikā). Similarly acts the intake of burnt cake of rice. [8]

Jackal's nose, crow's tongue, boar's navel, bell-metal, mercury, aconite and left leg-bone of rainy frog– these singly or collectively, worn in neck, waist, etc alleviate āhiṇḍikā. Anointment may be done but too much observance of dietitic restriction is not necessary. [9-10]

अनामकचिकित्सा

अनामके घुर्घुरिकाबुक्कामरिचरोचनाः। नवनीतश्च सम्मिश्रच्य खादेत् तद्रोगनाशनम्॥ ११॥
तैलाक्तशिरस्तालुनि सप्तदलार्कस्नुहीभवं क्षीरम्। दत्त्वा रजनीचूर्णं दत्ते नश्येदनामकाभिख्यः॥ १२॥
लेहयेच्च शुना बालं नवनीतेन लेपितम्। स्फुटकपत्रजरसोद्वर्त्तनञ्च हि तद्धितम्॥ १३॥

In anāmaka, one should take front part of ghurghurikā, marica, and gorocana mixed with butter. It destroys the disease. [11]

The anterior fontanelle is anointed with oil and soaked with latex of saptaparṇa, arka and snuhī followed by dusting with haridrā powder. Thus anāmanka is alleviated. [12]

Butter is pasted on the body of the child which is exposed to be licked by a dog. Then the part is anointed with the juice of sphuṭaka. [13]

चतुरङ्गतैलम्

तैलस्य भागमेकं मूत्रस्य द्वौ च शिम्बीदलरसस्य। गव्यं पयश्चतुर्गुणमेवं दत्त्वा पचेत्तैलम्॥
तेनाभ्यङ्गः सततं रोगमनामकाख्यमपहरति॥ १४॥

Caturaṅga taila

Oil 1 part, cow's urine and juice of snuhī leaves each 2 parts and cow-milk four times– oil cooked thus and anointed regularly alleviates anāmaka. [14]

अनामकहरमञ्जनम्

आर्कं तूलकमाविकरोमाण्यादाय केशराजस्य। स्वरसेनाक्ते वस्त्रे कृत्वा वर्त्तिञ्च तैलाक्ताम्॥ १५॥
तज्जातकज्जलाञ्चितलोचनयुगलोऽप्यलङ्कृतो बालः। कष्टमनामकरोगं क्षपयति भूतादिकञ्चापि॥ १६॥

A wick is made of arka cotton and sheep hair wrapped with a piece of cloth soaked

with keśarāja juice and then with sufficient oil and burnt. The black soot is applied to the eyes of the child as collyrium. It destroys anāmaka and also averts invisible organisms. [15-16]

अनामके स्नानम्

चालनिकातलसंस्थितपोतं सम्प्लाव्य गव्यमूत्रेण। ओकोदशालिकायां रजकक्षारोदकस्नानम्॥ १७॥

In bath-room, the child should be bathed with cow's urine making him sit under a sieve and thereafter with washerman's alkaline water. [17]

अनामके वराटिकाधारणम्

दासक्रयणश्रामणवटिका रसेन्द्रपूरिता धृता कण्ठे। नलिनीदले च शयनं सुकष्टमनामकाख्यरोगघ्नम्॥ १८॥

Cowrie of the mendicant purchased from a slave and worn in neck after filling it with mercury and also sleeping on lotus leaves alleviates anāmaka, even if severe. [18]

बालानामौषधमात्रानियम:

भैषज्यं पूर्वमुद्दिष्टं नराणां यज्ज्वरादिषु। देयं तदेव बालानां मात्रा त्वस्य कनीयसी॥ १९॥
प्रथमे मासि जातस्य शिशोर्भेषजरक्तिका। अवलेह्या तु कर्त्तव्या मधुक्षीरसिताघृतैः॥ २०॥
एकैकां वर्द्धयेत्तावद् यावत् संवत्सरो भवेत्। तदूर्ध्वं माषवृद्धिःस्याद् यावदाषोडशाब्दकात्॥ २१॥

Dosage for children

The drugs, as prescribed before in fever etc., are applicable also to children with only difference that the dosage in the latter would be smaller. In the first month of the neonatal period the dose for the child should be 125 mg. and the drug should be given to lick with honey, milk, sugar and ghee. Thereafter it should be increased 125 mg every month till one year. Then every year it should be increased by one gm till the age of 16 years. [19-21]

हरिद्रादि:

हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः। शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित्॥ २२॥

Haridrādi

Haridrā, dāruharidrā, madhuyaṣṭī and indrayava– decoction of these is useful in diarrhoea with fever in children and impurities of breast-milk in wet-nurse. [22]

बालचातुर्भद्रिका

घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतम्। शिशोर्ज्वरातिसारघ्नं कासश्वासवमीहरम्॥ २३॥

Bālacāturbhadrikā

Mustaka, pippalī, ativiṣā and karkaṭaśṛṅgī– this powder mixed with honey alleviates fever, diarrhoea, cough, dyspnoea and vomiting in children. [23]

धातक्यादिलेहः

धातकीबिल्वधन्याकलोध्रेन्द्रयवबालकैः। लेहः क्षौद्रेण बालानां ज्वरातीसारवान्तिनुत्॥ २४॥

Dhātakyādi leha

Dhātakī, bilva, dhānyaka, lodhra, indrayava and bālaka– this linctus with honey controls fever, diarrhoea and vomiting in children. [24]

रजन्यादिलेहः

रजनीदारुसरलश्रेयसीबृहतीद्वयम्। पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा॥ २५॥
ग्रहणीदीपनं हन्ति मारुतार्तिं सकामलाम्। ज्वरातीसारपाण्डुघ्नं बालानां सर्वरोगनुत्॥ २६॥

Rajanyādi leha

Rajanī (haridrā), devadāru, sarala, gajapippalī, bṛhatī, kaṇṭakārī, pṛśniparṇī and śatapuṣpā– this formulation taken with honey and ghee stimulates grahaṇī and alleviates all diseases of children particularly vātika disorders, jaundice, fever, diarrhoea and anaemia. [25-26]

मिश्यादिलेहः

मिशिकृष्णाञ्जनं लाजाशृङ्गीमरिचमाक्षिकैः। लेहः शिशोर्विधातव्यश्छर्दिकासज्वरापहः॥ २७॥

Miśyādi leha

Miśi (madhurikā), pippalī, rasāñjana, lājā (parched paddy), karkaṭaśṛṅgī, marica and honey– this linctus should be used in vomiting, cough and fever in children. [27]

शृङ्ग्यादिलेहः

शृङ्गीं समुस्तातिविषां विचूर्ण्य लेहं विदध्यान्मधुना शिशूनाम्।
कासज्वरच्छर्दिभिरर्दितानां समाक्षिकाञ्चातिविषां तथैकाम्॥ २८॥

Śṛṅgyādi leha

Śṛṅgī (karkaṭaśṛṅgī), musta and ativiṣā– these should be powdered together and given to children with honey. It alleviates cough, fever, and vomiting. Even ativiṣā alone administered with honey acts similarly. [28]

पञ्चकोलावलेहः

पीतं पीतं वमेद् यस्तु स्तन्यं तं मधुसर्पिषा। द्विवार्त्ताकीफलरसं पञ्चकोलञ्च लेहयेत्॥ २९॥

One who vomits breast-milk frequently should be given to lick pañcakola and fruit-juice of bṛhatī and kaṇṭakārī mixed with honey and ghee. [29]

आम्रास्थ्यादिलेहः

आम्रास्थिलाजसिन्धूत्थैर्लेहः क्षौद्रेण छर्दिनुत्॥ ३०॥

Linctus of mango-kernel, parched paddy and rocksalt mixed with honey checks vomiting. [30]

पिप्पल्यादिलेह:

पिप्पलीमरिचानान्तु चूर्णं समधुशर्करम्। रसेन मातुलुङ्गस्य हिक्काच्छर्दिनिवारणम्॥ ३१॥

Pippalyādi leha

Powder of pippalī and marica mixed with honey and sugar and taken with mātuluṅga juice controls hiccough and vomiting. [31]

योगचतुष्टयम्

पेटीपाठामूलाजम्ब्वाः सहकारवल्कलात् कल्कः। इत्येकशश्च पिण्डो विधृतो हृन्नाभिमध्यताल्वादौ॥
छर्द्यतिसारजवेगं प्रबलं धत्ते तदेव नियमेन॥ ३२॥

Paste of the root of peṭī and pāṭhā and bark of jambū and āmra, singly or collectively, put on cardiac region, umbilicus and head etc checks the motions of vomiting and diarrhoea even if severe. [32]

बिल्वादिक्वाथावलेहौ

बिल्वश्च पुष्पाणि च धातकीनां जलं सलोध्रं गजपिप्पली च।
क्वाथावलेहौ मधुना विमिश्रौ बालेषु योज्यावतिसारितेषु॥ ३३॥

Bilvādi kvātha-avaleha

Bilva, dhātakī flowers, bālaka, lodhra and gajapippalī– this, as decoction or linctus, should be mixed with honey and used in children suffering from diarrhoea. [33]

समङ्गादिक्वाथ:

समङ्गाधातकीलोध्रशारिवाभिः शृतं जलम्। दुर्द्धरेऽपि शिशोर्देयमतीसारे समाक्षिकम्॥ ३४॥

Samaṅgādi kvātha

Samaṅgā (lajjālu), dhātakī, lodhra and sārivā– this decoction mixed with honey should be used in severe diarrhoea of children. [34]

नागरादिक्वाथ:

नागरातिविषामुस्तबालकेन्द्रयवैः शृतम्। कुमारं पाययेत् प्रातः सर्वातीसारनाशनम्॥ ३५॥

Nāgarādi kvātha

Nāgara (śuṇṭhī), ativiṣā, musta, bālaka and indrayava– decoction of these should be given to the child in morning. It destroys all types of diarrhoea. [35]

समङ्गादियवागू:

समङ्गा धातकी पद्मं वयःस्था कच्छुरा तथा। पिष्टैरेतैर्यवागूः स्यादतीसारविनाशिनी॥ ३६॥

Samaṅgādi yavāgū

Samaṅgā (lajjālu), dhātakī, lotus stamens, guḍūcī and kacchurā– gruel cooked with the paste of these checks diarrhoea. [36]

अपर: बिल्वादिक्वाथ:

बिल्वचूतकषायेण लाजाश्चैव सशर्करा:। आलोड्य पाययेद्बालं छर्द्यतीसारनाशिनी: ॥ ३७॥

Bilvādi kvātha II

Parched paddy mixed with sugar should be dissolved in decoction of bilva and āmra and administered to the child suffering from vomiting and diarrhoea. [37]

प्रियङ्ग्वादिलेह:

कल्क: प्रियङ्गुकोलास्थिमध्यमुस्तरसाञ्जनै:। क्षौद्रलीढ: कुमारस्य च्छर्दितृष्णातिसारनुत् ॥ ३८॥

Priyaṅgvādi leha

Paste of priyaṅgu, kernel of badara, musta and rasāñjana mixed with honey is given to the child. It controls vomiting, thirst and diarrhoea. [38]

मोचरसादियवागू:

मोचरस: समङ्गा च धातकी पद्मकेशरम्। पिष्टैरेतैर्यवागू: स्याद्रक्तातीसारनाशिनी ॥ ३९॥

In case of bloody diarrhoea, gruel prepared with the paste of mocarasa, lajjālu, dhātakī and padmakeśara should be given. [39]

तिलादिलेह:

लेहस्तैलसिताक्षौद्रतिलयष्ट्याह्वकल्कित:। बालस्य रुन्ध्यान्नियतं रक्तस्रावं प्रवाहिकाम् ॥ ४०॥

Tilādi leha

The linctus of tila and madhuyaṣṭī mixed with oil, sugar and honey checks bleeding and dysentery in children. [40]

प्रवाहिकाहरो योग:

लाजा सयष्टिमधुकं शर्करा क्षौद्रमेव च। तण्डुलोदकसंयुक्तं क्षिप्रं हन्ति प्रवाहिकाम् ॥ ४१॥

Lājādi cūrṇa

Lājā (parched paddy), yaṣṭīmadhu, sugar and honey– this formulation taken with rice-water alleviates dysentery. [41]

अङ्कोठ-वटमूलप्रयोगौ

अङ्कोठमूलमथवा तण्डुलसलिलेन वटजमूलं वा। पीतं हन्त्यतिसारं ग्रहणीरोगञ्च दुर्वारम् ॥ ४२॥

Aṅkoṭha root or hanging root of vaṭa taken with rice-water checks diarrhoea and grahaṇī-roga instantaneously. [42]

जीरकादिचूर्णम्

सितजीरकसर्जचूर्णं बिल्वदलोत्थाम्बुमिश्रितं पीतम्। हन्त्यामरक्तशूलं गुडसहित: श्वेतसर्जो वा ॥ ४३॥

Jīrakādi cūrṇa

Powder of jīraka and sarjarasa mixed with juice of bilva leaves and taken alleviates śūla (dysentery) with āma and blood or white sarjarasa may be taken with jaggery. [43]

द्विरुत्तरमरिचादिचूर्णम्

मरिचमहौषधकुटजं द्विगुणीकृतमुत्तरोत्तरं क्रमशः। गुडतक्रयुक्तमेतद् ग्रहणीरोगं निहन्त्याशु॥ ४४॥

Dviruttaramaricādi cūrṇa

Marica, śuṇṭhī and kuṭaja, successively double in quantity, taken with buttermilk sweetened with jaggery alleviates grahaṇīroga. [44]

बिल्वादिक्षीरम्

बिल्वशक्राम्बुमोचाब्दसिद्धमाजं पयः शिशोः। सामां सरक्तां ग्रहणीं पीतं हन्यात् त्रिरात्रतः॥ ४५॥
अजाक्षीरसमस्तद्वद् रसो जम्बूत्वगुद्भवः॥ ४६॥

Bilvādi kṣīra

Goat's milk processed with bilva, indrayava, mocarasa and musta cures grahaṇīroga associated with āma and blood of child in three days. [45]

Similarly acts the juice of jambū bark mixed with equal quantity of goat's milk. [46]

गुदपाके चिकित्सा

गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम्। रसाञ्जनं विशेषेण पानालेपनयोर्हितम्॥ ४७॥

In gudapāka (proctitis) of children, pitta-alleviating measures should be adopted. Particularly rasāñjana is useful as intake and paste. [47]

कणादिलेहः

कणोषणसिताक्षौद्रसूक्ष्मैलासैन्धवैः कृतः। मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः॥ ४८॥

Kaṇādi leha

Kaṇā (pippalī), marica, sugar, honey, elā and saindhava– linctus made of these is excellent remedy for retention of urine in children. [48]

सैन्धवादिचूर्णम्

घृतेन सिन्धुबिल्वैलाहिङ्गुभार्गीरजो लिहन्। आनाहं वातिकं शूलं जयेत्तोयेन वा शिशुः॥ ४९॥

Saindhavādi cūrṇa

Powder of saindhava (rocksalt), bilva, elā, hiṅgu and bhārgī taken with ghee or water relieves ānāha and vātika śūla in child. [49]

हरीतक्यादिकल्कः

हरीतकीवचाकुष्ठकल्कं माक्षिकसंयुतम्। पीत्वा कुमारः स्तन्येन मुच्यते तालुपातनात्॥ ५०॥

Harītakyādi kalka

Paste of harītakī, vacā and kuṣṭha mixed with honey and taken with breast-milk the child becomes free from tālupāta (depression of palate). [50]

आम्रसारादिलेप:

मुखपाके तु बालानां साम्रसारमयोरज:। गैरिकं क्षौद्रसंयुक्तं भेषजं सरसाञ्जनम्॥ ५१॥

In mukhapāka (stomatitis) of children mango-kernel, lohabhasma, gairika and rasāñjana mixed with honey is a good remedy. [51]

अश्वत्थत्वगादिदार्व्यादिप्रलेपौ

अश्वत्थत्वग्दलक्षौद्रैर्मुखपाके प्रलेपनम्। दार्वीयष्ट्यभयाजातीपत्रक्षौद्रैस्तथापरम्॥ ५२॥

Aśvatthatvagādi-dārvyādi

Paste of aśvattha (bark and leaf) mixed with honey should be applied in mukhapāka. The other such paste is of dārvī (dāruharidrā), yaṣṭīmadhu, harītakī, jātī leaves and honey. [52]

स्नुहीपत्रप्रयोग:

सह जम्बीररसेन स्नुग्दलरसघर्षणं सद्य:। कृतमुपहन्ति हि पाकं मुखजं बालस्य चाश्वेव॥ ५३॥

Rubbing with the juice of snuhī leaf mixed with jambīra juice cures mukhapāka in children immediately. [53]

लावादिचूर्णम्

लावतित्तिरवल्लूररज: पुष्परसान्वितम्। द्रुतं करोति बालानां दन्तकेशरवन्मुखम्॥ ५४॥

Lāvādi curna

Powdered meat of lāva (guail) and partridge mixed with honey makes the mouth of children full of teeth. [54]

दन्तोद्गमे कर्त्तव्यविधि:

दन्तोद्भेदोत्थरोगेषु न बालमतियन्त्रयेत्। स्वयमप्युपशाम्यन्ति जातदन्तस्य ते गदा:॥ ५५॥

In disorders caused during dentition, the child should not be restrained too much as these subside naturally after the teeth appear. [55]

पञ्चमूलीक्षीरम्

पञ्चमूलीकषायेण सघृतेन पय: शृतम्। सशृङ्गवेरं सगुडं शीतं हिक्कार्दित: पिबेत्॥ ५६॥

Pañcamūlīkṣīra

Milk processed with decoction of pañcamula (bṛhat) mixed with ghee and when cooled, added with śuṇṭhī powder and jaggery shouid be used in child suffering from hiccough. [56]

सुवर्णगैरिकप्रयोग:

सुवर्णगैरिकस्यापि चूर्णानि मधुना सह। लीढ्वा सुखमवाप्नोति क्षिप्रं हिक्कार्दितः शिशुः ।। ५७ ।।

The child suffering from hiccough gets relief by taking powder of svarṇagairika with honey. [57]

चित्रकादिचूर्णम्

चित्रकं शृङ्गवेरञ्च तथा दन्ती गवाक्ष्यपि। चूर्णं कृत्वा तु सर्वेषां सुखोष्णेनाम्बुना पिबेत् ।।
श्वासं कासमथो हिक्कां कुमाराणां प्रणाशयेत् ।। ५८ ।।

Citrakādi cūrṇa

Citraka, śuṇṭhī, dantī and indrayava– these are powdered together and taken with warm water. It alleviates dyspnoea, cough and hiccough in children. [58]

द्राक्षादिचूर्णम्

द्राक्षायासाभयाकृष्णाचूर्णं सक्षौद्रसर्पिषा। लीढं श्वासं निहन्त्याशु कासञ्च तमकन्तथा ।। ५९ ।।

Drākṣādi cūrṇa

Powder of drākṣā, yavāsa, harītakī and pippalī taken with honey and ghee cures dyspnoea, cough, hiccough and bronchial asthma in children. [59]

पुष्करादिचूर्णम्

पुष्करातिविषाशृङ्गीमागधीधन्वयासकम्। चूर्णितं मधुना लीढं शिशूनां पञ्चकासनुत् ।। ६० ।।

Puṣkarādi cūrṇa

Puṣkaramūla, ativiṣā, karkaṭaśṛṅgī, pippalī and dhanvayāsa– this powder taken with honey cures five types of cough in children. [60]

दाडिमादिचूर्णम्

दाडिमस्य च बीजानि जीरकं नागकेशरम्। चूर्णितं शर्कराक्षौद्रं लीढं तृष्णानिवारणम् ।। ६१ ।।

Dāḍimādi cūrṇa

Dāḍima seeds, jīraka and nāgakeśara– these powdered together and taken with sugar and honey relieves thirst. [61]

तृष्णायां योग:

मायूरपक्षभस्मव्युषितजलं तेन भावितं पेयम्। तृष्णाघ्नं वटकाष्ठजभस्मजलं शोषजिद् वक्त्रे ।। ६२ ।।

Water is decanted from the ash of peacock's feather and kept overnight; now with this ash of the wood of vaṭa is impregnated and the water decanted therefrom should be taken. It alleviates thirst as well as dryness of mouth. [62]

दार्व्यादिलेप:

पिष्टैश्छागेन पयसा दार्वीमुस्तकगैरिकैः। बहिरालेपनं शस्तं शिशोर्नेत्रामयापहम् ।। ६३ ।।

Dārvyādi lepa

External application of paste of dāruharidrā, mustaka and gairika pounded with goat's milk on eye alleviates eye diseases in children. [63]

मन:शिलादिवर्त्ति:

मन:शिला शङ्खनाभि: पिप्पल्योऽथ रसाञ्जनम् । वर्त्ति: क्षौद्रेण संयुक्ता बाले सर्वाक्षिरोगनुत् ।। ६४ ।।

Manaḥśilādi vartti

Manaḥśilā, śankhanābhi, pippalī and rasāñjana– these are mixed with honey and made into vartti. It destroys all eye diseases in children. [64]

अलक्तकस्वेद:

मातु: स्तन्यकटुस्नेहकाञ्जिकैर्भावितो जयेत् । स्वेदाद्दीपशिखोत्तप्तो नेत्रामयमलक्तक: ।। ६५ ।।

Alaktaka (cotton soaked with lac-juice) impregnated with breast-milk, mustard oil and sour gruel is heated on lamp-wick and used for fomentation in eye diseases. [65]

शुण्ठ्याद्याश्च्योतनम्

शुण्ठीभृङ्गनिशाकल्कपुटपाक: ससैन्धव: । कुकूणकेऽक्षिरोगेषु भद्रमाश्च्योतनं हितम् ।। ६६ ।।

Śuṇṭhyādyāścyotana

Eye-drop with paste of śuṇṭhī, bhṛṅgarāja, haridrā and saindhava heated closely is useful in eye diseases particularly kukūṇaka. [66]

क्रिमिघ्नादिचूर्णाञ्जनम्

क्रिमिघ्नालशिलादार्वीलाक्षाकाञ्चनगैरिकै: । चूर्णाञ्जनं कुकूणे स्याच्छिशूनां पोथकीषु च ।। ६७ ।।

Krimighnādi cūrṇāñjana

Powder of krimighna (viḍaṅga), orpiment, realgar, dāruharidrā, lākṣā and svarṇagairika should be used as collyrium in kukūṇaka and pothakī of children. [67]

सुदर्शनाप्रयोग:

सुदर्शनामूलचूर्णादञ्जनं स्यात् कुकूणके ।। ६८ ।।

Powder of sudarśanā root is useful, as collyrium, in kukūṇaka. [68]

गृहधूमादिलेप:

गृहधूमनिशाकुष्ठराजिकेन्द्रयवै: शिशो: । लेपस्तक्रेण हन्त्याशु सिध्मपामाविचर्चिका: ।। ६९ ।।

Gṛhadhūmādi lepa

Gṛhadhūma (soot), haridrā, kuṣṭha, rājikā and indrayava– this paste with buttermilk destroys sidhma, pāmā and vicarcikā. [69]

अश्वगन्धाघृतम्

पादकल्केऽश्वगन्धायाः क्षीरे दशगुणे पचेत्। घृतं पेयं कुमाराणां पुष्टिकृद्बलवर्द्धनम्॥ ७०॥

Aśvgandhāghṛta

Ghee cooked with 1/4 paste of aśvagandhā along with ten times milk promotes development and strength in children. [70]

बालचाङ्गेरीघृतम्

चाङ्गेरीस्वरसे सर्पिश्छागक्षीरसमे पचेत्। कपित्थव्योषसिन्धूत्थसमङ्गोत्पलबालकैः॥ ७१॥
सबिल्वधातकीमोचैः सिद्धं सर्वातिसारनुत्। ग्रहणीं दुस्तरां हन्ति बालानान्तु विशेषतः॥ ७२॥

Bālacāṅgerī-ghṛta

Ghee is cooked with cāṅgerī juice and goat's milk both in equal quantity alongwith (the paste of) kapittha, trikaṭu, saindhava, lajjālu, nīlotpala, bālaka, bilva, dhātakī and mocarasa. It is useful in all types of diarrhoea and severe grahaṇī roga in children. [71-72]

कुमारकल्याणकं घृतम्

शङ्खपुष्पी वचा ब्राह्मी कुष्ठं त्रिफलया सह। द्राक्षा सशर्करा शुण्ठी जीवन्ती जीवकं बला॥ ७३॥
शटी दुरालभा बिल्वं दाडिमं सुरसः स्थिरा। मुस्तं पुष्करमूलञ्च सूक्ष्मैला गजपिप्पली॥ ७४॥
एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्। कषाये कण्टकार्याश्च क्षीरे तस्मिंश्चतुर्गुणे॥ ७५॥
एतत् कुमारकल्याणं घृतरत्नं सुखप्रदम्। बलवर्णकरं धन्यमग्निपुष्टिविवर्द्धनम्॥ ७६॥
छायासर्वग्रहालक्ष्मीक्रिमिदन्तगदापहम्। सर्वबालामयहरं दन्तोत्थं च विशेषतः॥ ७७॥

Kumārakalyāṇaka ghṛta

Ghee 640 gm is cooked with (the paste of) śaṅkhapuṣpī, vacā, brāhmī, kuṣṭha, triphalā, drākṣā, śarkarā, śuṇṭhī, jīvantī, jīvaka, balā, śaṭī, durālabhā, bilva, dāḍima, tulasī, śālaparṇī, musta, puṣkaramūla, elā and gajapippalī each 10 gm along with decoction of kaṇṭakārī and milk four times.

This kumārakalyānaka ghṛta is excellent among ghṛtas and promotes health, strength, complexion, digestion and development and alleviates all grahas and diseases of children particularly krimidanta and problems of dentition. [73-77]

अष्टमङ्गलघृतम्

वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च। शारिवा सैन्धवश्चापि पिप्पली घृतमष्टमम्॥ ७८॥
मेध्यं घृतमिदं सिद्धं पातव्यञ्च दिने दिने। दृढस्मृतिः क्षिप्रमेधः कुमारो बुद्धिमान् भवेत्॥ ७९॥
न पिशाचा न रक्षांसि न भूता न च मातरः। प्रभवन्ति कुमाराणां पिबतामष्टमङ्गलम्॥ ८०॥

Aṣṭamaṅgala ghṛta

Vacā, kuṣṭha, brāhmī, yellow mustard, sārivā, saindhava, pippalī and the eighth, ghṛta— all are cooked together properly. It should be used regularly. It promotes intellect and averts attack of invisible organisms in children. [78-80]

लाक्षादितैलम्

लाक्षारससमं सिद्धं तैलं मस्तुचतुर्गुणम्। रास्नाचन्दनकृष्णाब्दवाजिगन्धानिशायुगैः ॥ ८१ ॥
शताह्वादारुयष्ट्याह्वमूर्वातिक्ताहरेणुभिः। बालानां ज्वररक्षोघ्नमभ्यङ्गाद्बलवर्णकृत् ॥ ८२ ॥

Lākṣādi taila

Oil cooked with equal lac-juice and four times curd-water with (the paste of) rāsnā, candana, pippalī, musta, aśvagandhā, haridrā, dāruharidrā, śatāhvā, devadāru, madhuyaṣṭī, mūrvā, kaṭukā and harenukā– by anointment it cures fever, repels invisible organisms and promotes strength and complexion in children. [81-82]

सहादिक्वाथस्नानम्

सहामुण्डितिकोदीच्यक्काथस्नानं ग्रहापहम्। सप्तच्छदनिशाकुष्ठचन्दनैश्चानुलेपनम् ॥ ८३ ॥

Sahādi kvātha

Bathing the child with decoction of sahā (māṣaparṇī), muṇḍī and hrībera and also pasting with saptaparṇa, haridrā, kuṣṭha and candana destroys all bālagrahas. [83]

सर्पत्वगादिधूपः

सर्पत्वग् लशुनं मूर्वा सर्षपारिष्टपल्लवाः। बैडालविडजालोम मेषशृङ्गी वचा मधु ॥
धूपः शिशोर्ज्वरघ्नोऽयमशेषग्रहनाशनः ॥ ८४ ॥

Sarpatvagādi dhūpa

Sarpatvak (snake-slough), garlic, mūrvā, mustard, nimba leaves, cat's faeces, goat's hair, meṣaśṛṅgī, vacā and honey– fumigation with these alleviates fever and all grahas in children. [84]

बालग्रहे दैवव्यपाश्रयकर्म

बलिशान्तीष्टकर्माणि कार्य्याणि ग्रहशान्तये। मन्त्रश्चायं प्रयोक्तव्यस्तत्रादौ सार्वकामिकः ॥ ८५ ॥
''ओं नमो भगवते गरुडाय त्र्यम्बकाय सद्यस्तव स्तुतः स्वाहा।
ओं कं पं टं शं वैनतेयाय नमः ओं ह्रीं हूं क्षः ॥ ८६ ॥

In order to pacify grahas oblation should be offered and propitiatory and desired rites should be performed incanting the following hymn, universally applicable, in the beginning–

"Oṃ namo bhagavate garuḍāya tryambakāya
sadyaḥstavastutaḥ svāhā. Oṃ kaṃ paṃ ṭaṃ śaṃ
vainateyāya namaḥ. Oṃ hrīṃ hūṃ kṣaḥ" [86]

बलिकर्म

बालदेहप्रमाणेन पुष्पमालान्तु सर्वतः। प्रगृह्य मुच्छिकाभक्तं बलिर्देयस्तु शान्तिकः ॥ ८७ ॥
'ओं कारी सुवर्णपक्षीश बालकं रक्ष रक्ष स्वाहा इति गरुडबलिः ॥ ८८ ॥

After spreading all around flower-garland of the size of the child body cooked rice in earthen saucer should be offered as propitiatory oblation (for garuḍu) rechanting the following hymn –

'Oṃ kārī suvarṇapakṣīśa, bālakaṃ rakṣa rakṣa svāhā.'

Thus oblation to garuḍa. [87-88]

अथ रावणकृतं कुमारतन्त्रम्

नन्दामातृका

लक्षणम्

ओं नारायणाय नमः। प्रथमे दिवसे मासे वर्षे वा गृह्णाति नन्दा नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, अशुभं शब्दं मुञ्चति, आत्कारञ्च करोति, स्तन्यं न गृह्णाति।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा शुक्लौदनं, शुक्लसप्तध्वजाः, सप्त प्रदीपाः, सप्त स्वस्तिकाः, सप्त वटकाः, सप्त शष्कुलिकाः, सप्त जम्बुडिकाः, सप्त मुस्तकाः, गन्धं, पुष्पं, ताम्बूलं, मत्स्यं, मांसं, सुराऽग्रभक्तञ्च पूर्वस्यां दिशि चतुष्पथे मध्याह्ने बलिर्दातव्यः। ततः अश्वत्थपत्रं जलकुम्भे निक्षिप्य शान्त्युदकेन स्नापयेत्; रसोनसिद्धार्थकमेषशृङ्गनिम्बपत्रशिवनिर्माल्यैर्बालकं धूपयेत्। 'ओं नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा' एवं दिनत्रयं बलिं दत्त्वा चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ८९॥

Now begins the Kumāratantra of Rāvaṇa

Nandā-mātṛkā

Oṃ Nārāyaṇāya namaḥ (salutation to Lord Nārāyaṇa)

Symptoms

On the first day, month or year mother known as Nandā seizes. Suddenly fever arises, the child makes unauspicious sounds, vomits and does not take breast-milk.

Treatment

The following oblation is prescribed by which happiness comes.

An idol is maḍe by taking earth from both shores of river and placed on a cross-road. Oblation is offered to it in noon, in eastern direction, consisting of white cooked rice, white flowers, seven white banners, seven earthen lamps, seven svastikas, seven vaṭakas (cakes of black gram), seven śaṣkulīs (breads fried in ghee), seven jambuḍikā (preparation of steamed black gram), seven mustaka, perfumes, flowers, betel-leaf, fish, meat, wine and former portion of cooked rice. Then the child should be bathed with propitiatory water by putting aśvattha leaf in a water-pitcher and fumigated with garlic, mustard, meṣaśṛṅga, nimba leaves and śivanirmālya (bilva leaves) followed by recitation

of the mantra "Oṃ namo Rāvaṇāya, amukasya vyādhiṃ hana hana muñca muñca hrīṃ phaṭ svāhā'. In this way oblation should be offered for three days and on the fourth day brāhmaṇas should be offered food. Thus auspiciousness arises. [89]

सुनन्दामातृका

लक्षणम्

द्वितीये दिवसे मासे वर्षे वा गृह्णाति सुनन्दा नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः चक्षुः उन्मीलयति, गात्रमुद्वेजयति, न शेते, क्रन्दति, स्तन्यं न गृह्णाति; आत्कारश्च भवति।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

तण्डुलं हस्तपृष्ठैकं गृहीत्वा दधिगुडघृतञ्च मिश्रितं शरावैकं, गन्धताम्बूलं, पीतपुष्पं, पीतसप्तध्वजाः, चत्वारः प्रदीपाः, दश स्वस्तिकाः, मत्स्यमांससुराऽग्रभक्ततिलचूर्णानि पश्चिमायां दिशि चतुष्पथे बलिर्दातव्यो दिनानि त्रीणि सन्ध्यायां, ततः शान्त्युदकेन स्नापयेत्; शिवनिर्माल्यसिद्धार्थमार्जाररोमोशीरबालकघृतैः धूपं दद्यात्। 'ओं नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा'। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९०॥

Sunandā mātṛkā

Symptoms

On the second day, month or year seizes the mother known as sunandā. Just after seizure, fever arises, the child opens eyes, throws limbs up, does not sleep, cries, does not take breast-milk and vomits.

Treatment

The following oblation is offered which leads to happiness.

A handful of rice mixed with curd, jaggery and ghee in an earthen saucer, perfume, betel leaves, yellow flowers, seven yellow banana fruits, four earthen lamps, ten svastikas, fish, meat, wine, former rice and seasmum powder– this oblation should be offered on cross road in western direction in evening for three days. Then bath should be given with propitiatory water and fumigated with bilva leaves, mustard, cat's hair, uśīra, bālaka, and ghee followed by recitation of the mantra– 'oṃ namo Rāvaṇāya, amukasya vyādhiṃ hana hana muñca muñca hrīṃ phaṭ svāhā'. On the fourth day brāhmaṇas should be fed. Thus auspiciousness arises. [90]

पूतनामातृका

लक्षणम्

तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, गात्रमुद्वेजयति, स्तन्यं न गृह्णाति, मुष्टिं बध्नाति, क्रन्दति, ऊर्ध्वं निरीक्षते।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा गन्धताम्बूलं, रक्तपुष्पं, रक्तचन्दनं, रक्तसप्तध्वजाः, सप्तप्रदीपाः, सप्त स्वस्तिकाः पक्षिमांससुराग्रभक्तश्च दक्षिणस्यां दिशि अपराह्ने चतुष्पथे बलिर्दातव्यः। शिवनिर्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत्। 'ओं नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रासय ह्रासय स्वाहा।' एवं दिनत्रयं कार्य्यम्। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९१॥

Pūtanā mātṛkā

Symptoms

On the third day, month or year the mother known as pūtanā seizes.

Suddently after seizure, fever appears, the child throws limbs up, does not take breast-milk, clinches fist, cries and gazes upwards.

Treatment

The following oblation is offered which gives happiness.

Idol is made of the earth collected from both shores of river and on cross-road, in southern direction and in afternoon oblation consisting of perfume, betel leaf, red flower; red sandal, seven red banners, seven earthen lamps, seven svastikas, birds' flesh, wine and fromer rice is offered. Fumigation is done for three days with bilva leaves, guggulu, mustard, nimba leaves and meṣaśṛṅga followed by recitation of the mantra 'Oṃ namo Rāvaṇāya amukasya vyādhiṃ hana hana muñca muñca hrāsaya hrāsaya svāhā.' This should be repeated for three days and on the fourth day brāhmaṇas should be fed. Thus auspiciousness comes. [91]

मुखमुण्डितिकामातृका

लक्षणम्

चतुर्थे दिवसे मासे वर्षे वा गृह्णाति मुखमुण्डितिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, ग्रीवां नामयति, चक्षुरुन्मीलयति, स्तन्यं न गृह्णाति, रोदिति, स्वपिति, मुष्टिं बध्नाति।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वां उत्पलपुष्पं, गन्धं, ताम्बूलं, दश ध्वजाः, दीपाश्चत्वारः, त्रयोदश स्वस्तिकाः, मत्स्यमांससुराग्रऽभक्तश्च उत्तरस्यां दिशि अपराह्ने बलिर्देयश्चतुष्पथे। 'ओं नमो रावणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा।' एवं दिनत्रयं कार्यम्। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्; ततः सम्पद्यते शुभम्॥ ९२॥

Mukhamuṇḍitikā mātṛkā

Symptoms

On the fourth day, month or year the mother known as mukhamuṇḍitikā seizes. Just thereafter fever arises, the child bends neck, opens eyes, does not take breast-milk, sleeps and clinches fist.

Treatment

The following oblation is offered by which happiness comes.

Idol is made of earth collected from both shores of river and oblation consisting of lily flower, perfume, betel leaf, ten banners, four earthen lamps, thirteen svastikas, fish, meat, wine and former rice on cross-road in northern direction and in afternoon, the following mantra is recited– 'Oṃ namo Rāvaṇāya amukasya vyādhiṃ haṇa haṇa muñca muñca svāhā.' Thus it should be repeated for three days. On the fourth day brāhmanas should be fed. Thus auspiciousness arises. [92]

कटपूतनामातृका

लक्षणम्

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति कटपूतना नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, गात्रमुद्वेजयति, स्तन्यं न गृह्णाति, मुष्टिं बध्नाति।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

कुम्भकारचक्रस्य मृत्तिकां गृहीत्वा पुत्तलिकां विधाय गन्धताम्बूलं, शुक्लपुष्पं, शुक्लौदनं, पञ्च ध्वजाः, पञ्च प्रदीपाः, पञ्च वटकाः ऐशान्यां दिशि बलिर्दातव्यः, शान्त्युदकेन स्नापयेत्। शिवनिर्माल्यसर्पनिर्मोकगुग्गुलुनिम्बपत्रबालकघृतैर्धूपं दद्यात्। 'ओं नमो रावणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा'। एवं दिनत्रयं कुर्यात्। चतुर्थदिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९३॥

Kaṭapūtanā mātṛkā

Symptoms

The mother known as katapūtanā seizes on the fifth day, month or year. By this suddenly fever arises. The child throws up limbs, does not take breast-milk and clinches fist.

Treatment

The following oblation is offered by which happiness arises.

The idol is made of the earth of potter's wheel aand oblation consisting of perfume, betel leaf, white flowers, white cooked rice, five banners, five earthen lamps, five cakes of black gram is offered in north-eastern direction. The child should be bathed with propitiatory water and fumigated with bilva leaves, snake's slough, guggulu, nimba leaves, bālaka and ghee followed by recitation of mantra 'Oṃ namo Rāvaṇāya, amukasya vyādhiṃ

cūrṇaya cūrṇaya hana hana svāhā' This should be repeated for three days, on the fourth day brāhmaṇas should be fed. Thus auspiciousness arises. [93]

शकुनिकामातृका

लक्षणम्

षष्ठे दिवसे मासे वर्षे वा गृह्णाति शकुनिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, गात्रभेदं दर्शयति, मुष्टिं बघ्नाति, दिवारात्रावुत्थानं भवति, ऊर्ध्वं निरीक्षते।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

पिष्टकेन पुत्तलिकां कृत्वा शुक्लौदनं, पीतपुष्पं रक्तपुष्पं, गन्धताम्बूलं, दश दीपाः, दश पीतध्वजाः दश स्वस्तिकाः, दश वटकाः, क्षीरजम्बुडिकाः मत्स्यमांससुराः आग्नेय्यां दिशि निष्क्रान्ते मध्याह्ने बलिर्दातव्यः, ततः शान्त्युदकेन स्नापयेत्, शिवनिर्माल्यरसोनगुग्गुलुसर्पनिर्मोकनिम्बपत्रघृतैर्धूपं दद्यात्। 'ओं नमो रावणाय अमुकस्य ब्याधिं चूर्णय चूर्णय हन हन स्वाहा। एवं दिनत्रयं कुर्यात्। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९४॥

Śakunikā Mātṛkā

Symptoms

On sixth day, month or year the mother known as śakunikā seizes. Just after seizure fever arises, there is pain in body, the child clinches fist, remains awake day and night and gazes upwards.

Treatment

The following oblation is offered by which auspiciousness arises.

Idol is made of rice-flour and oblation consisting of white cooked rice, white flowers, yellow flowers, red flowers, perfume, betel leaves, ten earthen lamps, ten yellow banners, ten svastika, ten cakes of black gram, kṣīra-jambuḍikā (jambuḍikā made with milk), fish, meat and wine is offered just after midday in south-eastern direction. Then the child should be bathed with propitiatory water and fumigated with bilva leaves, garlic, guggulu, snake-slough, nimba leaves and ghee followed by recitation of the mantra 'Oṃ namo Rāvaṇāya, amukasya vyādhiṃ cūrṇaya cūrṇaya hana hana svāhā'. This should be repeated for three days, on the fourth day brāhmaṇas should be fed. Thus auspiciousness arises. [94]

शुष्करेवतीमातृका

लक्षणम्

सप्तमे दिवसे मासे वर्षे वा यदा गृह्णाति शुष्करेवती नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, गात्रमुद्वेजयति, मुष्टिं बध्नाति, रोदिति।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

रक्तपुष्पं, शुक्लपुष्पं, गन्धताम्बूलं, रक्तौदनं, कृशराः, त्रयोदश स्वस्तिकाः, त्रयोदश शष्कुलिकाः, जम्बुडिकाः, मत्स्यमांससुराः, त्रयोदश ध्वजाः, पञ्च प्रदीपाः पश्चिमायां दिशि ग्रामनिष्काशेऽपराह्णे वृक्षमाश्रित्य बलिर्दातव्यः; ततः शान्त्युदकेन स्नापयेत्, गुग्गुलुमेषशृङ्गीसर्षपोशीरबालकघृतैर्धूपं दद्यात्। 'ओं नमो रावणाय दीप्ततेजसे अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा।' एवं दिनत्रयं कुर्यात्। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९५॥

Śuṣkarevatī mātṛkā

Symptoms

On seventh day, month or year the mother known as Śuṣkarevatī seizes (the child). At first, fever arises, the child throws up limbs, clinches fist and weeps.

Treatment

The following oblation is prescribed by which happiness comes.

Red flowers, white flowers, perfume, betel leaves, red cooked rice, kṛśarā, thirteen svastikas, thirteen śaṣkulikā, jambuḍikā, fish, meat and wine, thirteen banners and five earthen lamps should be offered as oblation in western direction, in periphery of the village and in afternoon under a tree. Thereafter bath should be given with propitiatory water and fumigation with guggulu, meṣaśṛṅgī, mustard, uśīra, bālaka and ghee; the following mantra should also be recited– 'Oṃ namo Rāvaṇāya dīptatejase, amukasys vyādhiṃ hana hana muñca muñca svāhā'. This should be repeated for three days followed by feast offered to brāhmaṇas on the fourth day. Thus auspiciousness comes. [95]

अर्यकामातृका

लक्षणम्

अष्टमे दिवसे मासे वर्षे वा यदि गृह्णाति अर्यका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, गृध्रगन्धः पूतिगन्धश्च जायते, आहारं न गृह्णाति, गात्रद्वेजयति।

बलिं तस्य प्रवक्ष्यामि यतः सम्पद्यते शुभम्।

चिकित्सा

रक्तपीतध्वजाः, चन्दनं, पीतपुष्पं, शष्कुल्यः, पर्पटिकाः, मत्स्यमांससुराः, जम्बुडिकाः प्रत्यूषे बलिं दद्यात् प्रान्तरे। 'ओं नमो रावणाय त्रैलोक्यविद्रावणाय चतुर्दिशमोक्षणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च दह दह ओ ह्रीं फट् स्वाहा।' एवं दिनत्रयं कुर्यात्। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९६॥

Aryakā mātṛkā

Symptoms

On the eighth day, month or year the mother known as Aryakā seizes. Just after seizure

fever arises, odour like that of vulture or foetid appears, the child does not take food and throws up limbs.

Treatment

The following oblation should be offered by which happiness comes– banners red-yellow, sandal, yellow flowers, śaṣkulī, parpaṭikā, fish, meat and wine and jumbuḍikā should be offered as oblation in early morning in periphery (of village) along with recitation of the mantra "Oṃ namo Rāvaṇāya trailokyavidrāvaṇāya caturdiśamokṣaṇāya, amukasya vyādhiṃ hana hana muñca muñca daha daha oṃ hrīṃ phaṭ svāhā". This should be repeated for three days. On the fourth day, brāhmaṇas should be fed. Thus auspiciousness comes. [96]

सूतिकामातृका

लक्षणम्

नवमे दिवसे मासे वर्षे वा गृह्णाति सूतिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, नित्यं छर्दयति, गात्रभेदं दर्शयति, मुष्टिं बध्नाति, निद्राऽतितरां स्यात्।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां निर्माय शुक्लवस्त्रेण वेष्टयेत्। शुक्लपुष्पं, शुक्लौदनं, गन्धताम्बूलं, शुक्लत्रयोदशध्वजाः त्रयोदश प्रदीपाः, त्र्योदश स्वस्तिकाः, त्रयोदश पुत्तलिकाः, मत्स्यमांससुराः, उत्तरदिग्विभागे ग्रामनिष्काशे बलिं दापयेत्, शान्त्युदकेन स्नापयेत्, गुग्गुलुनिम्बपत्रगोधूमगोशृङ्गश्वेतसर्षपघृतैर्धूपं दद्यात्। 'ओं नमो रावणाय चतुर्भुजाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा।' एवं दिनत्रयं कुर्यात्। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९७॥

Sūtikā mātṛkā

Symptoms

On ninth day, month or year the mother named Sūtikā seizes. Just thereafter fever arises, the child vomits frequently, shows pain in limbs, clinches fist and sleeps excessively.

Treatment

The following oblation is prescribed by which happiness comes– Idol is made of earth taken from both shores of river and is wrapped with white cloth. Oblation consisting of white flowers, white cooked rice, perfumes, betel leaves, thirteen white leaves, thirteen earthen lamps, thirteen svastikas, thirteen idols, fish, meat and wine should be offered in northern direction in the periphery of the village. The child should be bathed with propitiatory water and fumigated with guggulu, nimba leaves, wheat, cow's horn, white mustard and ghee along with recitation of the mantra "Oṃ namo Rāvaṇāya caturbhujāya,

amukasya vyādhiṃ hana hana muñca muñca svāhā''. This should be repeated for three days. On fourth day brāhmaṇas should be fed. Thus auspiciousness comes. [97]

निर्ऋतामातृका

लक्षणम्

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः, गात्रमुद्वेजयति, आत्कारं करोति, रोदिति, बध्नाति मूत्रं, पुरीषञ्च भवति।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

पारावारमृत्तिकां गृहोत्वा पुत्तलिकां निर्माय, गन्धताम्बूलं, रक्तपुष्पं, रक्तचन्दनं, पञ्च पञ्चवर्णध्वजाः, पञ्च प्रदीपाः, पञ्च स्वस्तिकाः, पञ्चपुत्तलिकाः, मत्स्यमांससुराः वायव्यां दिशि बलिं दद्यात्; शान्त्युदकेन स्नापयेत् काकविष्ठागोमांसगोशृङ्गरसोनमार्जाररोमनिम्बपत्रघृतैर्धूपयेत्। 'ओं नमो रावणाय चूर्णितहस्ताय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च स्वाहा'। एवं दिनत्रयं कुर्यात्। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्। ततः सम्पद्यते शुभम्॥ ९८॥

Nirṛtā mātṛkā

Symptoms

On tenth day, month or year the mother known as Nirṛtā seizes. Just afterwards fever arises, the child throws up limbs, vomits, weeps, suffers from retention of urine but stool passes.

Treatment

The following oblation is prescribed by which happiness comes

Idol is made of earth taken from sea (shores) and oblation consisting of perfume, betel leaves, red flowers, red sandal, five-coloured banners, five earthen lamps, five svastikas, five idols, fish, meat and wine should be offered in north-western direction. Bath should be performed with propitiatory water and fumigation with crow's faeces, ox's meat, cow horn, garlic, cat's hair, nimba leaves and ghee along with the mantra "Oṃ namo Rāvaṇāya cūrṇitahastāya amuksya vyādhiṃ hana hana muñca muñca svāhā".

This should be repeated for three days and on the fourth day brāhmaṇas should be fed. Thus auspiciousness comes. [98]

पिलिपिच्छिकामातृका

लक्षणम्

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलिपिच्छिका नाम मातृका; तया गृहीतमात्रेण प्रथमं भवति ज्वरः, आहारं न गृह्णाति, ऊर्ध्वदृष्टिर्भवति, गात्रभङ्ग आत्कारश्च भवति।

चिकित्सा

पिष्टकेन पुत्तलिकां कृत्वा रक्तचन्दनरक्तञ्च तस्या मुखं दुग्धेन सिञ्चेत्। पीतपुष्पं, गन्धताम्बूलं, सप्त पीतध्वजाः, सप्त प्रदीपाः, अष्टौ वटकाः, अष्टौ शष्कुलिकाः, अष्टौ पूपिकाः, मत्स्यमांससुराः पूर्वस्यां दिशि बलिर्दातव्यः, शान्त्युदकेन स्नापयेत्; शिवनिर्माल्यगुग्गुलुगोशृङ्गसर्पनिर्मोकघृतैर्धूपयेत्।

'ओं नमो रावणाय अमुकस्य व्याधिं मुञ्च मुञ्च स्वाहा'। एवं दिनत्रयं कुर्यात्। चतुर्थे दिवसे विप्रान् भोजयेत्। ततः सुस्थो भवति बालकः। तेन सम्पद्यते शुभम्॥ ९९॥

Pilipicchikā mātṛkā

Symptoms

On eleventh day, month or year the mother named as pilipicchikā seizes. Thereafter, at first, fever arises, the child does not take food, gazes upwards, suffers from pain in body and vomiting.

Treatment

The following oblation is prescribed by which happiness comes– Idol made of rice-flour with its face painted red with red sandal is sprinkled with milk, Oblation consisting of yellow flowers, perfume, betel leaves, seven yellow banners, seven earthen lamps, eight cakes of black gram, eight śaṣkulikā, eight pūpikā, fish, meat and wine should be offered in eastern direction. Bath should be performed with propitiatory water and fumigation with bilva leaves, guggulu, cow's horn, snake-slough and ghee along with recitation of the mantra "Oṃ namo Rāvaṇāya, amukasya vyādhiṃ muñca muñca svāhā". This should be repeated for three days. On the fourth day, brāhmaṇas should be fed. Thus auspiciousness comes. [99]

कामुकामातृका

लक्षणम्

द्वादशे दिवसे मासे वर्षे वा यदि गृह्णाति कामुका नाम मातृका; तया गृहीतमात्रेण प्रथमं भवति ज्वरः, विहस्य वादयति, तर्जयति, गृह्णाति, क्रामति, निश्वसिति, मुहुर्मुहुश्छर्दयति. आहारं न करोति।

बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।

चिकित्सा

क्षीरेण पुत्तलिकां कृत्वा शुक्लकुसुमं, गन्धताम्बूलं, सप्तशुक्लध्वजाः, सप्त शष्कुलिकाः, सप्त प्रदीपाः, करम्भकेण सर्वकर्मबलिं दद्यात्, शान्त्युदकेन स्नापयेत्। श्वेतसर्षपगुग्गुलुशिवनिर्माल्यघृतैर्धूपयेत्। 'ओं नमो रावणाय अमुकस्य व्याधिं मुञ्च मुञ्च हन हन स्वाहा'। एवं दिनत्रयं कुर्यात्। चतुर्थे दिवसे विप्रान् भोजयेत्। तेन सम्पद्यते शुभम्॥१००॥

Kāmukā mātṛkā

Symptoms

On twelfth day, month or year, the mother names Kāmukā seizes. Thereafter, at first, fever arises, the child blows while smiling, warns with finger, seizes, moves, breaths, vomits frequently and does not take food.

Treatment

The following oblation is prescribed by which happiness comes– Idol should be made with milk and universal oblation consisting of white flowers, perfumes, betel leaves, seven white banners, seven sāṣkulikā, seven earthen lamps with rice-curd is offered. Bath is performed with white mustard, guggulu, bilva leaves and ghee along with recitation of the mantra "Oṃ namo Rāvaṇāya amuksya vyādhiṃ muñca muñca hana hana svāhā."

This should be repeated for three days. On fourth day, brāhmaṇas should be fed. Thus auspiciousness comes. [100]

। इति रावणकृतं कुमारतन्त्रं समाप्तम् ।

।। इति बालरोग-चिकित्सा ।। ६४ ।।

Thus ends the kumāratantra of Rāvaṇa.

Thus ends treatment of bālaroga. [64]

६५. पञ्चषष्टितमोऽध्यायः

CHAPTER LXV

विष-चिकित्सा

Treatment of Viṣa (poisoning)

सर्पदंशस्य सामान्यचिकित्सा

अरिष्टाबन्धनं मन्त्रप्रयोगश्च विषापहः। दंशनं दंशकस्याहेः फलस्य मृदुनोऽपि वा॥ १॥

Tying with tourniquet and incantation destroy poison. Besides, bitting the biter snake or soft fruit is also useful. [1]

प्रत्यङ्गिरामूलप्रयोगः

मूलं तण्डुलवारिणा पिबति यः प्रत्यङ्गिरासंभवं निष्पिष्टं शुचिभद्रयोगदिवसे तस्याहिभीतिः कुतः। दर्पादेव फणी यदा दशति तं मोहान्वितो मूलपं स्थाने तत्र स एव याति नियतं वक्त्रं यमस्याचिरात्॥२॥

One who takes root of pratyaṅgirā (kaṇṭakī śirīṣa) pounded in the month of Āṣāḍha in auspicious time with rice-water how is fear of snakes to him ? In case, it bites the person after taking this root, it becomes unconscious and dies on the spot. [2]

मसूरादिप्रयोगः

मसूरं निम्बपत्राभ्यां खादेन्मेषगते रवौ। अब्दमेकं न भीतिः स्याद्विषात् तस्य न संशयः॥ ३॥

One who takes one lentil grain with two leaves of nimba in the month (of Vaiśākha) when the sun is in meṣa rāśi, does not suffer from poisoning for a year. [3]

श्वेतपुनर्नवाप्रयोगः

धवलपुनर्नवजटया तण्डुलजलपीतया च पुष्यर्क्षे। अपहरति विषधरविषोपद्रवमावत्सरं पुंसाम्॥ ४॥

Likewise, the root of white punarnavā taken with rice-water in puṣya constellation alleviates the chances of snake-poisoning for a year. [4]

गृहधूमादिः

गृहधूमो हरिद्रे द्वे समूलं तण्डुलीयकम्। अपि वासुकिना दष्टः पिबेद्दधिघृताप्लुतम्॥ ५॥

Gṛhadhūmādi

Gṛhadhūma (soot), haridrā, dāruharidrā, root of taṇḍulīyaka– these together mixed with curd and ghee should be taken even in severe snake-bite. [5]

कुलिकानस्यम्

कुलिकामूलनस्येन कालदष्टोऽपि जीवति॥ ६॥

By taking snuff of kulikā root, one even bitten by takṣaka survives. [6]

योगत्रयम्

श्लेष्मण: कर्णगूथस्य वामानामिकया कृत:। लेपो हन्याद्विषं घोरं नृमूत्रसेचनन्तथा ॥ ७ ॥

Local application of sputum (or saliva) or ear-wax performed with left ring-finger destroys even severe poisoning and so does sprinkling with human urine. [7]

श्वेतमरिचप्रयोग:

शिरीषपुष्पस्वरसे भावितं मरिचं सितम्। सप्ताहं सर्पदष्टानां नस्यपानाञ्जने हितम् ॥ ८ ॥

White marica impregnated with juice of śirīṣa flowers for a week is useful in snake-bite as snuff, intake and collyrium. [8]

नतादि:

द्विपलं नतकुष्ठाभ्यां घृतक्षौद्रं चतु:पलम्। अपि तक्षकदष्टानां पानमेतत् सुखावहम् ॥ ९ ॥

Natādi

Nata (tagara) and kuṣṭha 80 gms, ghee and honey 160 gms– all are mixed together and given to drink. It is beneficial even in severe snake-bite. [9]

वन्ध्याकर्कोटकनस्यम्

वन्ध्याकर्कोटजं मूलं छागमूत्रेण भावितम्। नस्यं काञ्जिकसंयुक्तं विषोपहतचेतस: ॥ १० ॥

One whose mind is disturbed by poison should use snuff of vandhyā-karkoṭa root impregnated with goat's urine along with sour gruel. [10]

महाऽगद:

त्रिवृद्विशल्या मधुकं हरिद्रे मञ्जिष्ठवर्गो लवणश्च सर्वम्।
कटुत्रिकश्चैव विचूर्णितानि शृङ्गे निदध्यान्मधुसंयुतानि ॥ ११ ॥
एषोऽगदो हन्त्युपयुज्यमान: पानाञ्जनाभ्यञ्जननस्ययोगै:।
अवार्य्यवीर्यो विषवेगहन्ता महाऽगदो नाम महाप्रभाव: ॥ १२ ॥

Mahāgada

Trivṛt, dantī, madhuka, haridrā, dāruharidrā, mañjisthā, five salts and trikaṭu– all pounded together are mixed with honey and kept in cow's horn. This agada (anti-poison drug) known as mahāgada has great potency and is unfailing. It destroys poisons by application as intake, collyrium, anointment and snuff. [11-12]

पीत-त्वक्स्थविषचिकित्सा

पीते विषे स्याद्वमनञ्च त्वक्स्थे प्रदेहसेकादि सुशीतलञ्च ॥ १३ ॥

In case of poison ingested emesis and in that situated in skin cold anointment, bath etc. are useful. [13]

कण्ठामाशयगतविषचिकित्सा

कपित्थमांसं ससिताक्षौद्रं कण्ठगते विषे। लिह्यादामाशयगते ताभ्यां चूर्णपलं नतात्॥ १४॥

If poison is located in throat, pulp of kapittha mixed with sugar and honey should be taken and in that of stomach tagara powder 40 gms mixed with sugar and honey is useful. [14]

पिप्पल्यादिः

विषे पक्वाशयगते पिप्पली रजनीद्वयम्। मञ्जिष्ठाञ्च समं पिष्ट्वा गोपित्तेन नरः पिबेत्॥ १५॥

Pippalyādi

If the poison is located in pakvāśaya (intestines), the paste of pippalī, haridrā, dāruharidrā and manjiṣṭhā, all in equal quantity, should be taken with ox-bile. [15]

रजन्यादिः

रजनीसैन्धवक्षौद्रसंयुक्तं घृतमुत्तमम्। पानं मूलविषार्त्तस्य दिग्धविद्धस्य चेष्यते॥ १६॥

Rajanyādi

Intake of cow's ghee mixed with haridrā powder, rock-salt and honey is efficacious in root-poisoning and infliction with poisoned arrow. [16]

संयोगजविषचिकित्सा

सितामधुयुतं चूर्णं ताम्रस्य कनकस्य वा। लेहः प्रशमयत्युग्रं सर्वं संयोगजं विषम्॥ १७॥

Intake of the bhasma of copper and gold mixed with sugar and honey pacifies all compound poisons. [17]

गरविषचिकित्सा

अङ्कोठमूलनिःक्वाथं फाणितं सघृतं लिहेत्। तैलाक्तः स्विन्नसर्वाङ्गो गरदोषविषापहः॥ १८॥

The linctus made of the decoction of aṅkoṭha root should be mixed with ghee and taken. Besides, after anointing with oil fomentation should be done all over the body. Thus artificial poison is destroyed. [18]

कटभ्यादिः

कटभ्यर्जुनशैरीयशेलुक्षीरिद्रुमत्वचः। कषायकल्कचूर्णाः स्युः कीटलूताव्रणापहाः॥ १९॥

Kaṭabhyādi

Bark of kaṭabhī, arjuna, saireyaka, śleṣmātaka and kṣīrī vṛkṣa used as decoction, paste and powder destroy poisoning by insects and spiders. [19]

आगारधूमादिलेपः

आगारधूममञ्जिष्ठारजनीलवणोत्तमैः। लेपो जयत्याखुविषं कर्णिकायाश्च पातनम्॥ २०॥

Āgaradhūmādi lepa

Āgāradhūma (soot), mañjiṣṭha, haridrā and rocksalt– this paste checks rat's poison and expels karṇikā (the residual portion). [20]

वृश्चिकविषे योगाः

यः कासमर्दपत्रं वदने प्रक्षिप्य कर्णफूत्कारम्। मनुजो ददाति शीघ्रं जयति विषं वृश्चिकानां सः ॥ २१ ॥
दंशे भ्रामणविधिना वृश्चिकविषहृत् कुठेरपादगुडिका। पुरधूपपूर्वमर्कच्छदमिव पिष्ट्वा कृतो लेपः ॥ २२ ॥

One who chewing the root of kāsamarda in mouth blows in the ear (of the patient) destroys the poison of scorpions. [21]

Touching the spot in circular motion with the lump made of kuṭheraka root destroys scorpion poisoning. Similarly acts the paste of arka bark preceded by fumigation with guggulu. [22]

जीरकादिलेपः

जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः। सुखोष्णो वृश्चिकार्तानां सुलेपो वेदनापहः ॥ २३ ॥

Application of the warm paste of jīraka mixed with ghee and rocksalt removes pain in scorpion-bite. [23]

कुङ्कमादिगुडिका

कुङ्कमकुनटीकर्कटपलहरितालैः कुसुम्भसम्मिलितैः। कृतगुडिका भ्रामणतो विदष्टगोधाशरटादिविषजित् ॥

Pill made of kuṅkuma, realgar, crab's flesh, orpiment and kusumbha (flowers) should be turned round the spot. It alleviates the poisoning caused by bite of iguana, chameleon etc. [24]

मीनादिविषचिकित्सा

अङ्कोटपत्रधूमो मीनविषं झटिति विघट्टयेच्छृङ्गी। गोधावरटीविषमिव लेपेन कुडकराणिजटा ॥ २५ ॥

Fish-poison is destroyed by fumigation with aṅkotha bark and application of horns. The paste of kūḍakarāṇi root removes the toxic effects of iguana and wasps. [25]

कुक्कुरविषहरौ योगौ

कनकोदुम्बरफलमिव तण्डुलजलपिष्टं पीतमपहरति। कनकदलद्रवघृतगुडदुग्धपलैकं शुनां गरलम् ॥ २६ ॥

Intake of fruits of dhattūra and udumbara pounded with rice-water destroys poison of dogs (rabies). Similarly acts the combination of the juice of dhattūra leaves mixed with ghee, jaggery and milk total 40 gms. [26]

मण्डूकविषे योगद्वयम्

लेप इव भेकगरलं शिरीषबीजैः स्नुहीपयःसिक्तैः। हरति गरलं त्र्यहमशिताऽङ्कोठजटा कुष्ठसम्मिलिता ॥ २७ ॥

Frog's poisoning is treated with paste of śirīṣa seeds impregnated with snuhī latex. Besides, aṅkotha root mixed with kuṣṭha is taken for three days. [27]

मरिचादि-पटोलमूलादिलेपौ

मरिचमहौषधबालकनागाह्वैर्मक्षिकाविषे लेपः। लालाविषमपनयतो मूले मिलिते पटोलनीलिकयोः।।

Maricādi-paṭolamūlādi lepa

The paste of marica, śuṇṭhī, bālaka and nāgakeśara is applied in the fly-poisoning. In poisoning by saliva,however, that of the roots of paṭola and nīlikā is efficacious. [28]

सोमवल्कादिलेपः

सोमवल्कोऽश्वकर्णश्च गोजिह्वा हंसपाद्यपि। रजन्यौ गैरिकं लेपो नखदन्तविषापहः ।। २९ ।।

Somavalkādi lepa

Somavalka, aśvakarṇa, gojihvā, haṃsapadī, haridrā, dāruharidrā and gairika– this paste destroys the poisoning by nails and teeth. [29]

दशाङ्गमगदम्

वचाहिङ्गुविडङ्गानि सैन्धवं गजपिप्पली। पाठा प्रतिविषा व्योषं काश्यपेन विनिर्मितम्।।
दशाङ्गमगदं पीत्वा सर्वकीटविषञ्जयेत्।। ३० ।।
कीटदष्टक्रियाः सर्वाः समानाः स्युर्जलौकसाम्।। ३१ ।।

Daśāṅgāgada

Vacā, hiṅgu, viḍaṅga, saindhava, gajapippalī, pāṭhā, prativiṣā and trikaṭu– this daśāṅga (having ten ingradients) agada, by intake, destroys poison of all insects. [30]

In poisoning by leeches, all measures prescribed for insect-bite should be adopted. [31]

मृतसञ्जीवनोऽगदः

स्पृक्काप्लवस्थौणेयकांक्षीशैलेयरोचनातगरम्। ध्यामककुङ्कममांसीसुरसाग्रचैलाऽऽलकुष्ठघ्नम्।। ३२ ।।
बृहतीशिरीपुष्पश्रीवेष्टकपद्मचारटीविशालाः। सुरदारुपद्मकेशरशाबरकमनःशिलाकौन्त्यः।। ३३ ।।
जात्यर्कपुष्पसर्षपरजनीद्वयहिङ्गुपिप्पलीलाक्षाः। जलमुद्गपर्णीमधुकमदनचन्दनसिन्धुवाराश्च ।। ३४ ।।
शम्पाकलोध्रमयूरकगन्धफलीनाकुलीविडङ्गाश्च। पुष्येणोद्धृत्य समं पिष्टा गुडिका विधेयाः स्युः ।। ३५ ।।
जन्तुविषघ्नो जयकृद् विषमृतसञ्जीवनीज्वरनिहन्ता। नस्यविलेपनधारणधूमग्रहणैर्गृहस्थश्च।। ३६ ।।
भूतविषजन्त्वलक्ष्मीकार्मणमन्त्राग्न्यशन्यरीन् हन्यात्। दुःस्वप्नस्त्रीदोषानकालमरणाम्बुचौरभयम्।। ३७ ।।
धनधान्यकार्य्यसिद्धिश्रीपुष्ट्यायुर्विवर्द्धनो धन्यः। मृतसञ्जीवन एष प्रागमृतात् ब्रह्मणाऽभिहितः ।। ३८ ।।

Mṛtasañjīvana agada

Spṛkkā, plava, sthauṇeya, kāṃkṣī, śaileya, rocanā, tagara, dhyāmaka, kuṅkuma, maṃsī, surasā, agryailā (sthūla elā), āla (orpiment), khadira, bṛhatī, śirīṣa flowers, śrīveṣṭaka, padmacāraṭī, viśālā, devadāru, padmakeśara, śābaraka, realgar, kauntī, jātī flowers, arka flowers, sarṣapa, haridrā, dāruharidrā, hiṅgu, pippalī, lac, bālaka, mudgaparṇī, madhuka, madana, candana, sindhuvāra, āragvadha, lodhra, mayūraka, gandhaphalī, nākulī and viḍaṅga– these should be collected in puṣya constellation and pounded together in equal quantity and made into pills.

This alleviates all poisons, gives victory, revives the apparently dead by poisoning and destroys fever. A house-holder, by using it as snuff, paste, amulet and smoking destroys evil spirits, poisons, organisms, unauspiciousness, evil incantation, charms, fire, thunderbolt, enemies, bad dreams, evils caused by women, fear of untimely death, floods and thieves. This anti-poison formulation named as mṛtasañjīvana is revealed by Brahmā before the appearance of nectar and gives success in wealth, agriculture and other efforts, promotes auspiciousness, corpulence and life-span and is commendable. [32-38]

॥ इति विषचिकित्सा ॥ ६५ ॥

Thus ends treatment of viṣa. [65]

६६. षट्षष्टितमोऽध्याय:

CHAPTER LXVI

रसायनाधिकार:

On Rasāyana (Promotive therapy)

रसायनस्य लक्षणं प्रयोगकालश्च

यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्। पूर्वे वयसि मध्ये वा शुद्धकाय: समाचरेत्॥ १॥

The therapy which prevents ageing and disorders is known as Rasāyana. It should be used in early or middle youthful age after purifying the body. [1]

संशोधनस्यावश्यकता

नाविशुद्धशरीरस्य युक्तो रासायनो विधि:। न भाति वाससि क्लिष्टे रङ्गयोग इवार्पित:॥ २॥

Rasāyana therapy, administered to one with unpurified body, does not effect properly like dyeing in a dirty cloth. [2]

हरीतकीरसायनम्

गुडेन मधुना शुण्ठ्या कृष्णया लवणेन वा। द्वे द्वे खादेत् सदा पथ्ये जीवेद्वर्षशतं सुखी॥ ३॥

Harītakī-rasāyana I

One should take harītakī fruits regularly with jaggery or honey or śuṇṭhī or pippalī or salt and thus lives happily for hundred years. [3]

ऋतुहरीतकीरसायनम्

सिन्धूत्थशर्कराशुण्ठीकणामधुगुडै: क्रमात्। वर्षादिष्वभया सेव्या रसायनगुणैषिणा॥ ४॥

Harītakī-rasāyana II

By one desirous of rasāyana effect harītakī should be taken regularly with saindhava, sugar, śuṇṭhī, pippalī, honey and jaggery in rainy season etc respectively. [4]

त्रिफलारसायनम्

त्रैफलेनायसीं पत्रीं कल्केनालेपयेन्नवाम्। तमहोरात्रिकं लेपं पिबेत् क्षौद्रोदकाप्लुतम्॥ ५॥
प्रभूतस्नेहमशनं जीर्णे तस्मिन् प्रयोजयेत्। अजरोऽरुक् समाऽभ्यासाज्जीवेच्चापि समा: शतम्॥ ६॥

Triphalā-rasāyana

Pounded triphalā-pulp should be pasted on a clean iron plate for day and night. Then the paste should be taken after dissolving in honey-water. After the drug is digested, diet having planty of ghee should be taken. If taken regularly for a year one lives for hundred years free from old age and diseases. [5-6]

पिप्पलीरसायनम्

पञ्चाष्टौ सप्त दश वा पिप्पलीः क्षौद्रसर्पिषा। रसायनगुणान्वेषी समामेकां प्रयोजयेत्॥ ७॥

Pippalī-rasāyana

One, desirous of rasāyana effect, should use five, eight, seven or ten pippalī fruits with honey and ghee for a year. [7]

त्रैकालिकपिप्पलीरसायनम्

तिस्रस्तिस्रस्तु पूर्वाह्ने भुक्त्वाऽग्रे भोजनस्य च। पिप्पल्यः किंशुकक्षारभाविता घृतभर्जिताः॥ ८॥
प्रयोज्या मधुसम्मिश्रा रसायनगुणैषिणा। जेतुं कासं क्षयं शोथं श्वासं हिक्कां गलामयम्॥ ९॥
अर्शांसि ग्रहणीदोषं पाण्डुतां विषमज्वरम्। वैस्वर्यं पीनसं शोथं गुल्मं वातबलासकम्॥ १०॥

Traikalika pippalī-rasāyana

One, desirous of rasāyana effect, should use three pippalī fruits impregnated with palāśa-kṣāra and fried with ghee in forenoon, before meal and after meal with honey. It is useful in cough, wasting, consumption, dyspnoea, hiccough, throat disorders, piles, grahaṇī disorder, anaemia, irrigular fever, disordered voice, pīnasa, oedema, gulma and vātabalāsaka. [8-10]

त्रैकालिकत्रिफलारसायनम्

जरणान्तेऽभयामेकां प्राग्भक्ताद् द्वे बिभीतके। भुक्त्वा तु मधुसर्पिर्भ्यां चत्वार्यामलकानि च॥ ११॥
प्रयोजयेत् समामेकां त्रिफलाया रसायनम्। जीवेद्वर्षशतं पूर्णमजरोऽव्याधिरेव च॥ १२॥

Traikalika triphalā-rasāyana

One should take one harītakī on empty stomach, two bibhītaka fruits before meal and four āmalaka fruits after meal with honey and ghee regularly for a year. By using this triphalā-rasāyana one lives for hundred years free from senility and disease. [11-12]

चत्वारि मेध्यरसायनानि

मण्डूकपर्ण्याः स्वरसः प्रयोज्यः क्षीरेण यष्टीमधुकस्य चूर्णम्।
रसो गुडूच्यास्तु समूलपुष्प्याः कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः॥ १३॥
आयुःप्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्द्धनानि।
मेध्यानि चैतानि रसायनानि मेध्या विशेषेण तु शङ्खपुष्पी॥ १४॥

Medhya rasāyana

One should use (1) juice of maṇḍūkaparṇī (2) powder of yaṣṭīmadhu with milk (3) juice of guḍūcī (whole plant) and (4) paste of śaṅkhapuṣpī. These promote life-span, strength, digestion, lustre and voice and destroy diseases. These are intellect-promoting and śaṅkhapuṣpī has specifically this property. [13-14]

अश्वगन्धारसायनम्

पीताऽश्वगन्धा पयसाऽर्द्धमासं घृतेन तैलेन सुखाम्बुना वा।
कृशस्य पुष्टिं वपुषो विधत्ते बालस्य सस्यस्य यथाम्बुवृष्टिः ॥ १५ ॥

Aśvagandhā-rasāyana

Aśvagandha taken for a fort-night, with milk, ghee, oil or warm water promotes development in emaciated body as rains do for younger crop. [15]

धात्र्यादिरसायनम्

धात्रीतिलान् भृङ्गरजोविमिश्रान् ये भक्षयेयुर्मनुजाः क्रमेण।
ते कृष्णकेशा विमलेन्द्रियाश्च निर्व्याधयो वर्षशतं भवेयुः ॥ १६ ॥

Dhātryādi rasāyana I

Those who take dhātrī (āmalaka) and (black) sesamum mixed with bhṛṅgarāja regularly attain black hairs, clear sense organs and live for hundred years free from disorders. [16]

वृद्धदारकरसायनम्

वृद्धदारकमूलानि श्लक्ष्णचूर्णानि कारयेत्। शतावर्य्या रसेनैव सप्तरात्राणि भावयेत्॥ १७॥
अक्षमात्रन्तु तच्चूर्णं सर्पिषा सह योजयेत्। मासमात्रोपयोगेन मतिमाञ्जायते नरः ॥
मेधावी स्मृतिमांश्चैव वलीपलितवर्जितः ॥ १८ ॥

Vṛddhadāraka-rasāyana

Vṛddhadāraka root is finely powdered and impregnated with śatāvarī juice for a week. This powder, in dose of 10 gm, should be taken with ghee for a month. By this the man becomes intellegent, endowed with memory and wisdom and free from wrinkles and greying of hairs. [17-18]

हस्तिकर्णरसायनम्

हस्तिकर्णरजः खादेत् प्रातरुत्थाय सर्पिषा। यथेष्टाहारचेष्टोऽपि सहस्रायुर्भवेन्नरः ॥ १९ ॥
मेधावी बलवान् कामी स्त्रीशतानि व्रजत्यसौ। मधुना त्वश्ववेगः स्याद् बलिष्ठः स्त्रीसहस्रगः ॥ २० ॥
मन्त्रश्चायं प्रयोक्तव्यो भिषजा चाभिमन्त्रणे।
'ओं नमो महाविनायकाय अमृतं रक्ष रक्ष मम फलसिद्धिं देहि रुद्रवचनेन स्वाहा' ॥ २१ ॥

Hastikarṇa-rasāyana

The powder of hastikarṇa (palāśa) should be taken with ghee in early morning without any restriction of diet. By this one attains longevity, intellect, physical strength and sexual potency. For sexual vigour it should be taken with honey. This drug should be taken while reciting the mantra– 'Oṃ namo mahavināyakāya amṛtaṃ rakṣa rakṣa mama phalasiddhiṃ dehi Rudravacanena svāhā. [19-21]

धात्र्यादिरसायनमपरम्

धात्रीचूर्णस्य कंसं स्वरसपरिगतं क्षौद्रसर्पिःसमांशं कृष्णामानीसिताष्टप्रसृतयुतमिदं स्थापितं भस्मराशौ। वर्षान्ते तत् समश्नन् भवति विपलितो रूपवर्णप्रभावैर्निर्व्याधिर्बुद्धिमेधास्मृतिबलवचनस्थैर्य्यसत्त्वैरुपेतः॥२२॥

Dhatryādi rasāyana II

Dhātrī (āmalaka) powder 2.56 kg. impregnated with its own juice (of one thousand fruits), honey and ghee each 2.56 kg., pippalī 320 gm. and sugar 640 gm.– all mixed together are kept in a heap of ash. By taking it after rains (in autumn) one is freed from disorders and greying of hairs and attains intellect, strength, voice, firmness and courage. [22]

गुडूच्यादिरसायनम्

गुडूच्यपामार्गविडङ्गशङ्खिनीवचाभयाकुष्ठशतावरी समा।
घृतेन लीढा प्रकरोति मानवं त्रिभिर्दिनैः श्लोकसहस्रधारिणम्॥ २३॥

Guḍūcyādi rasāyana

Guḍūcī, apāmārga, viḍaṅga, śaṅkhapuṣpī, vacā, harītakī, kuṣṭha and śatāvarī– all in equal quantity– this powder taken with ghee makes one capable of memorising one thousand stanzas only in three days. [23]

सारस्वतघृतम्

समूलपत्रामादाय ब्राह्मीं प्रक्षाल्य वारिणा। उदूखले क्षोदयित्वा रसं वस्त्रेण गालयेत्॥ २४॥
रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत्। औषधानि तु पेष्याणि तानीमानी प्रदापयेत्॥ २५॥
हरिद्रा मालती कुष्ठं त्रिवृता सहरीतकी। एतेषां पलिकान् भागाञ् शेषाणि कार्षिकाणि तु॥ २६॥
पिप्पल्योऽथ विडङ्गानि सैन्धवं शर्करा वचा। सर्वमेतत् समालोड्य शनैर्मृद्वग्निना पचेत्॥ २७॥
एतत् प्राशितमात्रेण वाग्विशुद्धिश्च जायते। सप्तरात्रप्रयोगेण किन्नरैः सह गायति॥ २८॥
अर्द्धमासप्रयोगेण सोमराजीवपुर्भवेत्। मासमात्रप्रयोगेण श्रुतमात्रन्तु धारयेत्॥ २९॥
हन्त्यष्टादश कुष्ठानि अर्शांसि विविधानि च। पञ्च गुल्मान् प्रमेहांश्च कासं पञ्चविधञ्जयेत्॥ ३०॥
वन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम्। घृतं सारस्वतं नाम बलवर्णाग्निवर्धनम्॥ ३१॥

Sārasvata ghṛta

Brāhmī (whole plant) is washed well with water and pounded in a mortar to express juice. With four times of this juice ghee 640 gm. is cooked along with the paste of haridrā, jātī, kuṣṭha, trivṛt and harītakī each 40 gm., pippalī, viḍaṅga, saindhava, śarkarā and vacā each 10 gm. It improves voice, memory and lustre and alleviates all types of kuṣṭha, piles, gulma, prameha, kāsa, female sterility and male impotency. This sārasvata ghṛta promotes strength, complexion and digestive power. [24-31]

उषसि जलपानम्

कासश्वासातिसारज्वरपिडककटीकुष्ठकोठप्रकारान् मूत्राघातोदरार्शःश्वयथुगलशिरःकर्णशूलाक्षिरोगान्। ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जन्तोस्तांस्तानभ्यासयोगादपनयति पयः पीतमन्ते निशायाः॥३२॥
व्यङ्गवलीपलितघ्नं पीनसवैस्वर्य्यकासशोथघ्नम्। रजनीक्षयेऽम्बुनस्यं रसायनं दृष्टिजननञ्च॥ ३३॥

Intake of water regularly in early morning alleviates all diseases caused by vāta, pitta, rakta and kapha particularly cough, dyspnoea, diarrhoea, fever, boils, lumbago, kuṣṭha, urticaria, retention of urine, udararoga, piles, oedema and diseases of throat, head, ear and eyes. [32]

Intake of water through nostrils in early morning acts as rasāyana, promotes vision and alleviates shades, wrinkles and greying, pīnasa, harshness of voice, cough and oedema. [33]

अमृतसारलौहम्

नागार्जुनो मुनीन्द्रः शशास यल्लौहशास्त्रमतिगहनम्। तस्यार्थस्य स्मृतये वयमेतद्विशदाक्षरैर्ब्रूमः॥ ३४॥
मेने मुनिः स्वतन्त्रे यः पाकं न पलपञ्चकादर्वाक्। सुबहुप्रयोगदोषादूर्ध्वञ्च पलत्रयोदशकात्॥ ३५॥
तत्रायसि पचनीये पञ्चपलादौ त्रयोदशपलकान्ते। लोहात् त्रिगुणा त्रिफला ग्राह्या षड्भिः पलैरधिका॥३६॥
मारणपुटनस्थालीपाकास्त्रिफलैकभागसम्पाद्याः। त्रिफलाभागद्वितयं ग्रहणीयं लौहपाकार्थम्॥ ३७॥

Amṛtasāra lauha

Now begins the preparation of amṛtasāra lauha–

Now we explain in detail the ideas of lauhaśāstra, too difficult topic, as propounded by Nāgārjuna, the Lord of sages. [34]

In his treatise, the sage expressed that lauha, for processing, should not be taken less than 200 gm. and more than 520 gm. the latter because of the excessive quantity. [35]

In processing of lauha from 200 to 520 gm. triphalā should be taken three times of lauha plus 240 gm. (for 200 gm. of lauha it comes to 840 gm.). [36]

(Out of this), one part should be used for māraṇa, puṭana and sthālīpāka while (the remaining) two parts should be used for lauhapāka. [37]

क्वाथार्थं जलमानम्

सर्वत्रायःपुटनाद्यर्थैकांशे शरावसंख्यातम्। प्रतिपलमेव त्रिगुणं पाथः क्वाथार्थमादेयम्॥ ३८॥
सप्तपलादौ भागे पञ्चदशान्तेऽम्भसां शरावैश्च। त्र्याद्यैकादशकान्तैरधिकं तद्वारि कर्तव्यम्॥ ३९॥
तत्राष्टमो विभागः शेषः क्वाथस्य यत्नतः स्थाप्यः। तेन हि मारणपुटनस्थालीपाका भविष्यन्ति॥ ४०॥

In one part (of triphalā) everywhere in puṭana etc. for decoction water should be given at the rate of three śarāvas (960 ml.) per 40 gm. of triphalā. Thus, in case of lauha from 280 to 600 gm. water should be given 960 ml. to 3.52 litre in excess. It should be decocted till reduced to one-eighth which is to be used for māraṇa, puṭana and sthālīpaka. [38-40]

निष्पत्तिपाकार्थं त्रिफलाक्वाथविधि:

पाकार्थे तु त्रिफलाभागद्वितये शरावसंख्यातम्। प्रतिपलमम्बु समं स्यादधिकं द्वाभ्यां शरावाभ्याम्॥ ४१॥
तत्र चतुर्थो भाग: शेषो निपुणै: प्रयत्नतो ग्राह्य:। अयस: पाकार्थत्वात् स च सर्वस्मात् प्रधानतम:॥ ४२॥

In the remaining two parts of triphalā, to be used for niṣpattipāka, water should be given at the rate of 320 ml. every 40 gm. plus 640 ml. in excess. It should be decocted till reduced to one-fourth. It is the most important fraction as used for final processing of iron. [41-42]

निष्पत्तिपाकार्थे दुग्धपरिमाणम्

पाकार्थमश्मसारे पञ्चपलादौ त्रयोदशपलान्ते। दुग्धशरावद्वितयं पादैरेकादिकैरधिकम्॥ ४३॥

For final processing of iron from 200 to 520 gm. milk should be given at the rate of 640 ml. plus 80 ml. in excess. [43]

पाकार्थं लौहपरिमाणम्

पञ्चपलादिर्मात्रा तदभावे तदनुसारतो ग्राह्यम्। चतुरादिकमेकान्तं शक्तावधिकं त्रयोदशकात्॥ ४४॥

If not possible to take 200 gm. lauha it may be taken less as well from 160 gm. to 40 gm. Likewise, it may be taken even more than 520 gm. In both cases, the quantity of water etc. for decoction would vary accordingly. [44]

प्रक्षेप्यद्रव्याणि

त्रिफलात्रिकटुकचित्रककान्तक्रामकविडङ्गचूर्णानि। जातीफलजातीकोषैलाकक्कोलकलवङ्गानाम्।
सितकृष्णजीरयोरपि चूर्णान्ययसा समानि स्यु:॥ ४५॥
त्रिफलात्रिकटुविडङ्गा नियतास्तेऽन्ये यथाप्रकृति बोध्या:। कालायसदोषहृतेर्जातीफलादेर्लवङ्गान्तस्य॥
क्षेप: प्राप्त्यनुरूप: सर्वस्योनस्य चैकाद्यै:। कान्तक्रामकमेकं नि:शेषं दोषमपहरत्ययस:॥ ४७॥

Triphalā, trikaṭu, citraka, kāntakrāmaka, viḍaṅga, jātīphala, jātīkośa, elā, kakkola, lavaṅga, jīraka and kṛṣṇajīraka– these powdered (total) should be added equal to lauha. Among them, triphalā, trikaṭu and viḍaṅga are essential as they remove the defects of iron while jātīphala etc. may be added according to availability. As regards kāntakrāmaka, it alone removes all defects of iron. [45-47]

लौहपाके घृतमानम्

द्विगुणत्रिगुणचतुर्गुणमाज्यं ग्राह्यं यथाप्रकृति॥ ४८॥

In lauhapāka, ghee should be added double, triple or fourfold according to constitution. [48]

औषधस्याधिकाल्पत्वे निर्देश:

यदि भेषजभूयस्त्वं स्तोकत्वं वा तथाऽपि चूर्णानाम्। अयसा साम्यं संख्या भूयोऽल्पत्वे न भूयोऽल्पा॥४९॥

In case of above drug powders, if all are available or a few, their quantity would vary so as to make them equal to that of iron which would not vary accordingly. [49]

प्रक्षेप्यद्रव्ये निर्देशः

एवं धात्वनुसारात् तत्तत् कथितौषधस्य बाधेन। सर्वत्रैव विधेयस्तत्तत् कथितस्यौषधस्योहः॥ ५०॥

Thus according to doṣa (of the patient) the mentioned drug may be eliminated and the other useful one may be added. [50]

। इति साध्यसाधनपरिमाणविधिः।

Thus the quantity of materials.

लौहमारणविधिः

कान्तादिलौहमारणविधानसर्वस्वमुच्यते तावत्॥ ५१॥

Now the method of māraṇa of the types of lauha, kānta etc., is described. [51]

दैवक्रिया

यस्य कृते तल्लौहं पक्तव्यं तस्य शुभदिवसे। समृदङ्गारकरालितनतभूभागे शिवं समभ्यर्च्य॥ ५२॥
वैदिकविधिना वह्निं निधाय हुत्वाऽऽहुतीस्तत्र। धर्मात् सिध्यति सर्वं श्रेयस्तद्धर्मसिद्धये किमपि॥
शक्त्यनुरूपं दद्याद् द्विजाय सन्तोषिणे गुणिने॥ ५३॥

On the auspicious day for the person for whom lauha is to be processed thr ground is pasted with earth and charcoal and in depressed portion Lord Śiva is worshipped. Then by Vedic rites fire is produced and offerings are made therein followed by gifts to qualified brāhmaṇas as condition allows because all good works succeed by religious performance. [52-53]

लौहस्य निर्मलीकरणम्

सन्तोष्य कर्मकारं प्रसादपूगादिदानसम्मानैः। आदौ तदश्मसारं निर्मलमेकान्ततः कुर्यात्॥ ५४॥

Having satisfied the technician with presents and respect, at first, one should purify the lauha. [54]

मारणद्रव्याणि

तदनु कुठारच्छिन्नात्रिफलागिरिकर्णिकाऽस्थिसंहारैः। करिकर्णच्छदमूलकशतावरीकेशराजाख्यैः॥ ५५॥
शालिञ्चमूलकाशीमूलप्रावृज्जभृङ्गराजैश्च। लिप्त्वा दग्धव्यं तद्दृष्टक्रियलौहकारेण॥ ५६॥

Therefore, the lauha should be pasted with kuṭhāracchinnā, triphalā, girikarṇikā, asthisaṃhāra, hastikarṇapalāśa (root), śatāvarī, keśarāja, śāliñca (root), kāśī (root), punarnavā and bhṛigarāja and heated by an experienced iron-smith. [55-56]

वह्निप्रदानक्रमः

चिरजलभावितनिर्मलशालाङ्गारेण परित आच्छाद्य। कुशलाध्मापितभस्त्राऽनवरतमुक्तेन पवनेन॥ ५७॥
वह्नेर्बाह्यज्वाला बोद्धव्या जातु नैव कुञ्चिकया। मृल्लवणसलिलभाजा किन्तु स्वच्छाम्बुसंप्लुतया॥ ५८॥
द्रव्यान्तरसंयोगात् स्वां शक्तिं भेषजानि मुञ्चन्ति। मलधूलीमत् सर्वं सर्वत्र विवर्जयेत् तस्मात्॥ ५९॥

सन्दंशेन गृहीत्त्वाऽन्तः प्रज्वालिताग्निमध्यमुपनीय। गलति यथायथमग्रे तथैव मृदु वर्द्धयेन्निपुणः ॥ ६० ॥

It should be covered all around with clean charcoal of śāla kept for long in water and fire is stimulated with air blown carefully and constantly from bellows. The piece of bamboo to distinguish the external flame should be wetted with clean water and not with that having earth and salt as the drugs lose their potency by contact with other substances. Hence, in all cases, the substances and appliances with dust and dirt should be avoided. [57-59]

By catching with forceps iron should be put in the middle of the flamed fire and as it liquifies it should be pushed forward. [60]

निर्वापणविधिः

तलनिहितोर्ध्वमुखाङ्कुशलग्नं त्रिफलाजले विनिक्षिप्य। निर्वापयेदशेषं शेषं त्रिफलाम्बु रक्षेच्च ॥ ६१ ॥

Thus the liquified iron collected in the upwards hook– like apparatus kept in the bottom should be entirely dipped into the decoction of triphalā, keeping, however, some decoction in reserve. [61]

पुनःपाकः

यल्लौहं न मृतं तत् पुनरपि पक्तव्यमुक्तमार्गेण। यन्न मृतं तथाऽपि तत् त्यक्तव्यमलौहमेव हि तत् ॥ ६२ ॥

The portion of iron not killed should again be subjected to the above processing and that which is still unkilled should be rejected. [62]

। इति लौहमारणविधिः ।

Thus the method of killing iron.

भानुपाकः

तदनु घनलौहपात्रे कालायसमुद्गरेण सञ्चूर्ण्य। दत्त्वा बहुशः सलिलं प्रक्षाल्याङ्गारमुद्धृत्य ॥ ६३ ॥
तदयः केवलमग्नौ शुष्कीकृत्याथवाऽऽतपे पश्चात्। लौहशिलायां पिंष्यादसितेऽश्मनि वा तदप्राप्तौ ॥ ६४ ॥

Bhānupāka

Thereafter it is powdered in an iron mortar with iron pestle, washed of the charcoal and by adding plenty of water (or triphalā decoction) should be dried on fire and then in the sun. Lastly it should be rubbed in iron mortar or, if not available, in black stony one. [63-64]

। इति भानुपाकविधिः ।

Thus the method of heating in the sun.

स्थालीपाकः

अथ कृत्वाऽयोभाण्डे दत्त्वा त्रिफलाऽम्बु शेषमन्यद्वा। प्रथमं स्थालीपाकं दद्यादातत्क्षयात् तदनु ॥ ६५ ॥
गजकर्णपत्रमूलकशतावरीभृङ्गकेशराजरसैः। प्राग्वत् स्थालीपाकं कुर्य्यात् प्रत्येकमेकं वा ॥ ६६ ॥

Sthālīpāka (vessel-heating)

Now the remaining fresh decoction of triphalā is put in an iron vessel and the above iron is dipped into that and cooked till dried. Then after this process is repeated with the juice of hastikarṇapalāśa (root), śatāvarī, bhṛṅgarāja and keśarāja– all or any one. [65-66]

। इति स्थालीपाकविधिः ।

Thus the method of Vessel-heating.

पुटपाकः

हस्तप्रमाणवदनं श्वभ्रं हस्तैकखातसममध्यम् । कृत्वा कटाहसदृशं तत्र करीषं तुषञ्च काष्ठञ्च ॥ ६७ ॥
अन्तर्घनतरमर्द्धं शुषिरं परिपूर्य्य दहनमायोज्यम् । पश्चादयसश्चूर्णं श्लक्ष्णं पङ्कोपमं कुर्यात् ॥ ६८ ॥
त्रिफलाऽम्बुभृङ्गकेशरशतावरीकन्दमाणसहजरसैः । भल्लातककरिकर्णच्छदमूलपुनर्नवास्वरसैः ॥ ६९ ॥
क्षित्वाऽथ लौहपात्रे मार्दे वा लौहमार्दपात्राभ्याम् । तुल्याभ्यां पृष्ठेनाच्छाद्यान्ते रन्ध्रमालिप्य ॥ ७० ॥
तत्पुटपात्रं तत्र श्वभ्रज्वलने निधाय भूयोभिः । काष्ठकरीषतुषैस्तत् सञ्छाद्याहर्निशं दहेत्प्राज्ञः ॥ ७१ ॥
एवं नवभिरमीभिर्भेषजराजैः पचेत्तु पुटपाकम् । प्रत्येकमेकमेभिर्मिलितैर्वा त्रिचतुरान् वारान् ॥ ७२ ॥
प्रतिपुटनं तत् पिंष्यात् स्थालीपाकं विधाय तथैव तत् ।
तादृशि दृषदि न पिंष्याद् विगलद्रजसा तु युज्यते यत्र ॥ ७३ ॥
तदयश्चूर्णं पिष्टं घृष्टं घनसूक्ष्मवाससि श्लक्ष्णम् । यदि रजसा सदृशं स्यात् केतक्यास्तर्हि तद्भद्रम् ॥ ७४ ॥
पुटने स्थालीपाकेऽधिकृतपुरुषे स्वभावरुगधिगमात् । कथितमपि हेयमौषधमुचितमुपादेयमन्यदपि ॥ ७५ ॥

Puṭapāka (closed heating)

A ditch is made in the ground, with opening of one cubit measurement (length and breadth) and depth of the same measurement. The bottom should be of the structure like boiling pan. Half of this is filled with cowdung, husk and wood and ignited. Then fine iron powder rubbed with decoction of triphalā and bhallātaka and juice of bhṛṅgarāja, keśarāja, śatāvarī, śūraṇa, māṇaka, hastikarṇa palāśa (root) and punarnavā is put within iron or earthen saucer, covered with another one with the joint tightly sealed. The closed container is put on fire in the ditch and covered fully with wood, cowdung and husk. It is heated day and night. Thus iron should be subjected to puṭapāka after rubbing it with nine great drugs, singly or collectively, three or four times. [67-72]

In every puṭa it should be rubbed and dried as in sthālīpāka but the mortar and pestle should be such as do not disintegrate themselves so as to mix their powder with iron. [73]

The iron powder should be taken as standard which, after grinding, if strained through a firm and fine cloth, appears like pollens of ketakī. [74]

In process of puṭa, the drugs for sthālīpāka should be selected according to constitution and disease of the patient. Thus the mentioned drugs may be left out or other unmentioned ones may be included according to condition. [75]

। इति पुटपाकविधिः ।

Thus the method of closed heating.

लौहपाकविधिः

अभ्यस्तकर्मविधिभिर्बालकुशाग्रीयबुद्धिभिरलक्ष्यम्। लौहस्य पाकमधुना नागार्जुनशिष्टमभिदध्मः ॥ ७६ ॥
लौहारकूटताम्रकटाहे दृढमृन्मये प्रणम्य शिवम्। तदयः पचेदचपलः काष्ठेन्धनेन वह्निना मृदुना ॥ ७७ ॥
निक्षिप्य त्रिफलाजलमुदितं यत् तद् घृतञ्च दुग्धञ्च। सञ्चाल्य लौहमय्या दर्व्या लग्नं समुत्पाटय ॥ ७८ ॥

Lauha(niṣpatti)pāka (Final processing)

Now the (niṣpatti) pāka of lauha, as propounded by Nāgārjuna, is described which is unintelligible even to experts and intelligent scholars. [76]

Bowing to Lord Śiva one should heat iron in pan of iron, brass or copper pasted firmly with earth on mild fire of wood. [77]

Now aforesaid triphalā decoction, ghee and milk are added to it and steamed constantly by an iron laddle. [78]

लौहपाकस्य त्रैविध्यम्

मृदुमध्यमखरभावैःपाकस्त्रिविधोऽत्र वक्ष्यते पुंसाम्। पित्तसमीरणश्लेष्मप्रकृतीनां मध्यमस्तु समः ॥ ७९ ॥
अभ्यक्तदर्वि लौहं सुखदुःखस्खलनयोगि मृदु मध्यम्। उज्झितदर्वि खरं परिभाषन्ते केचिदाचार्य्याः ॥ ८० ॥
अन्ये विहीनदर्वीप्रलेपमाखूत्कराकृति ब्रुवते। मृदु मध्यमर्द्धचूर्णं सिकतापुञ्जोपमन्तु खरम् ॥ ८१ ॥
त्रिविधोऽपि पाक ईदृक् सर्वेषां गुणकृदेव न तु विफलः। प्रकृतिविशेषे सूक्ष्मौ गुणदोषौ जनयतीत्यल्पम् ॥ ८२ ॥

Pāka is of three degrees-mild, medium and severe applicable in pitta, vāta and kapha respectively. The medium pāka is useful for all. [79]

The product sticking to laddle is mild, the same sometimes attached and sometimes disattached is medium and that which left the laddle is severe– thus define some scholars. [80]

Others, however, say that the mild pāka is that which does not stick to laddle and is like a mole-hill, the medium one is half-powder and the severe one as heap of sand. [81]

All the three types of pāka are useful in all cases and are not in vain. The only point is that they exhibit subtle merits and demerits according to human constitution. [82]

प्रक्षेपनियमः

विज्ञाय पाकमेवं द्रागवताय्यं क्षितौ क्षणान् कियतः। विश्राम्य तत्र लौहे त्रिफलादेः प्रक्षिपेच्चूर्णम् ॥ ८३ ॥
यदि कर्पूरप्राप्तिर्भवति ततो विगलिते तदुष्णत्वे। चूर्णीकृतमनुरूपं क्षिपेन्न वा न यदि तल्लाभः ॥ ८४ ॥

Thus knowing the processing complete it should be brought down and after some moments powder of triphalā etc, should be added to iron. When it is cooked camphor powder, if available, should be added in proper quantity. [83-84]

पक्वलौहस्थापनार्थं पात्रम्

पक्वं तदश्मसारं सुचिरघृतस्थित्यभाविरूक्षत्वे। गोदोहनादिभाण्डे लौहभाण्डाभावे सति स्थाप्यम् ॥ ८५ ॥

Lauha, thus cooked, should be kept in a vessel in which ghee is contained for long so as to remove roughness or in utensil in which cow is milched in case iron vessel is not available. [85]

विषमे निर्देश:

यदि तु परिप्लुतिहेतोर्घृतमीक्षेताधिकं ततोऽन्यस्मिन् । भाण्डे निधाय रक्षेद् भाव्युपयोगो ह्यनेन महान् ।। ८६ ।।
अयसि विरूक्षीभूते स्नेहस्त्रिफलाघृतेन सम्पाद्य: । एतत् ततो गुणोत्तरमित्यमुना स्नेहनीयं तत् ।। ८७ ।।
अत्यन्तकफप्रकृतेर्भक्षणमयसोऽमुनैव शंसन्ति । केवलमपीदमशितं जनयत्ययसो गुणान् कियत: ।। ८८ ।।

If, during processing, ghee is in excess and overflows, it should be transferred to another vessel and kept carefully as it is very useful for future. [86]

In case iron is roughened, it should be uncted with triphalāghṛta but for this the above ghee is more efficacious and as such should be used for unction. [87]

In persons of kapha prakṛti, lauha is taken with this ghee or even if this (ghee) is taken alone it produces some effects of lauhas. [88]

लौहाभ्रकनिष्पत्तिपाक:

अथवा वक्तव्यविधिसंस्कृतकृष्णाभ्रकचूर्णमादाय । लौहचतुर्थार्द्धसमद्वित्रिचतु:पञ्चगुणभागम् ।। ८९ ।।
प्रक्षिप्याय: प्राग्वत् पचेदुभाभ्यां भवेद्रजो यावत् । तावन्मानानुस्मृते: स्यात् त्रिफलादिद्रव्यपरिमाणम् ।। ९० ।।
इदमाप्यायकमिदमतिपित्तनुदिदमेव कान्तिबलजननम् । स्तभ्नाति तृट्क्षुधौ परमधिकाधिकमात्रया क्षिप्तम् ।।९१।।

Or powdered mica processed properly by the method described further should be added to iron in 1/4, 1/2, equal, double, triple, fourfold or fivefold quantity and both together should be cooked by this aforesaid method till it becomes like dust. Taking this total quantity of both as the quantity of lauha, the same of triphalā etc. should be decided. [89-90]

This preparation is quite saturating. It alleviates pitta and promotes strength and lustre. It also controls thirst and hunger if mica is mixed in maximum quantity. [91]

। इति लौहपाकविधि: ।

Thus final processing of lauha.

अभ्रकशोधनमारणविधि:

कृष्णाभ्रमभेकवपुर्वज्राख्यञ्चैकपत्रकं कृत्वा । काष्ठमयोदूखलके चूर्णं मुसलेन कुर्वीत ।। ९२ ।।
भूयो दृषदि च पिष्टं वास:सूक्ष्मावकाशतलगलितम् । मण्डूकपर्णिकाया: प्रचुररसे स्थापयेत् त्रिदिनम् ।। ९३ ।।
उद्धृत्य तद्रसादथ पिंष्याद्धैमन्तिकधान्यभक्तस्य । आक्षोदात्यन्ताम्लस्वच्छजलेन प्रयत्नेन ।।
मण्डूकपर्णिकाया: पूर्वरसेनैव मोदनं कुर्यात् ।। ९४ ।।
स्थालीपाकं पुटनञ्चाद्यैरपि भृङ्गराजाद्यै: ।। ९५ ।।
ताडादिपत्रमध्ये कृत्वा पिण्डं निधाय भस्त्राग्नौ । तावद्दहेन्न यावन्नीलोऽग्निर्दृश्यते सुचिरम् ।। ९६ ।।
निर्वापयेच्च दुग्धेन दुग्धं प्रक्षाल्य वारिणा तदनु । पिष्ट्वा घृष्ट्वा वस्त्रे चूर्णं निश्चन्द्रकं कुर्यात् ।। ९७ ।।

Purification and killing of mica

Selecting black mica of vajra type which has not the least frog's tinge and making it one-layered, it should be powdered in wooden mortar and pestle and further rubbed on stony slab. It is then strained through a fine cloth and kept in profuse juice of maṇḍūkaparṇī for three days. Thereafter, it should be rubbed with grain-less clean sour water of cooked winter rice. Finally it is mixed with the previous juice of maṇḍūkaparṇī and made into ball. [92-94]

Sthālīpāka and puṭapāka should be processed with bhṛṅgarāja etc. as said earlier. [95]

The rounded mass of mica is kept within leaves of palm etc. and put on bellow's fire and heated till blue flame appears. Then it is dipped in milk and thereafter washed with water and rubbed. Finally it is strained through cloth. Thus lustreless product is obtained. [96-97]

। इत्यभ्रकविधिः ।

Thus the processing of mica.

लौहभक्षणे मात्रानिर्देश:

नानाविधरुक्शान्त्यै पुष्ट्यै कान्त्यै शिवं समभ्यर्च्य। सुविशुद्धेऽहनि पुण्ये तदमृतमादाय लौहाख्यम् ।। ९८ ।।
दशकृष्णलपरिमाणं शक्तिवयोभेदमाकलय्य पुनः। इयदधिकं तदधिकतरमियदेव न मातृमोदकवत् ।। ९९ ।।

For alleviation of various disorders and promotive therapy, having worshipped Lord Śiva, one should take this amṛta-(sāra) lauha on auspicious and holy day in the dose of ten guñjā (1.25 gm) according to strength and age. It may always vary and cannot be fixed like mother's sweet-ball. [98-99]

भक्षणार्थं लौहस्य मर्दनम्

सममसृणामलपात्रे लौहे लौहेन मर्दयेन्न पुनः। दत्त्वा मध्वनुरूपं तदनु घृतं योजयेदधिकम् ।।१००।।
बन्धं गृह्णाति यथा मध्वपृथक्त्वेन पङ्कमविशिंषत्। इदमिह दृष्टोपकरणमेतददृष्टन्तु मन्त्रेण ।।१०१।।

मर्दने मन्त्रप्रयोग:

स्वाहाऽन्तेन विमर्दो भवति फडन्तेन लौहबलरक्षा। सनमस्कारेण बलिर्भक्षणमयसो हूमन्तेन ।।१०२।।

मर्दनमन्त्र:

'ओं अमृतोद्भवाय स्वाहा' ।।१०३।।

रक्षणमन्त्र:

'ओं अमृते हूँ फट्' ।।१०४।।

बलिमन्त्र:

'ओं नमश्चण्डवज्रपाणये महायज्ञसेनाधिपतये सुरगुरुविद्यामहाबलाय स्वाहा' ।।१०५।।

भक्षणमन्त्र:

'ओं अमृते हूँ' ॥१०६॥

It should be rubbed in a smooth iron mortar and pestle adding honey in proper quantity and ghee a little more when it becomes consistent and mud-like, it should be taken. The following mantras are recited during rubbing, for protection of potency, oblation and intake– 'Oṃ amṛtodbhavāya svāhā', 'Oṃ amṛte hūṃ phaṭ', 'Oṃ namaścaṇḍavajrapāṇaye mahāyakṣasenādhipataye suraguruvidyāmahābalāya svāhā', 'Oṃ amṛte hūṃ'. [100-106]

अनुपानादिनिर्देश:

जग्ध्वा तदमृतसारं नीरं वा क्षीरमेवानुपिबेत्। कान्तक्रामकममलं सञ्चर्व्य रसं पिबेद्दिने न तु तत् ॥
आचम्य च ताम्बूलं लाभे घनसारसहितमुपयोज्यम् ॥१०७॥

After taking amṛtasāra (lauha) (pure) water or milk should be taken. The juice of kāntakrāmaka after chewing it should be taken (but not in day). After washing mouth, betel with camphor, if available, should be chewed. [107]

आचारविधि:

नात्युपविष्टो नाप्यतिभाषी नातिस्थितस्तिष्ठेत्। अत्यन्तवातशीतातपयानस्नानवेगरोधादीन् ॥१०८॥
जह्याच्च दिवानिद्रामहितश्चाकालभुक्तश्च। वातकृत: पित्तकृत: सर्वान् कट्वम्लतिक्तकषायान् ॥
तत्क्षणविनाशहेतून् मैथुनकोपश्रमान् दूरे ॥१०९॥

After taking the drug one should not sit, speak and stand too much and should avoid wind, cold, sun, travel, bath, suppression of urges etc., day-sleep, unwholesome and untimely food, substances aggravating vāta and pitta, pungents, sour, bitter and astringent items, particularly sexual intercourse, anger and exertion which exert adverse effects immediately. [108-109]

भोजनकाल:

अशितं तदय: पश्चात् पततु न वा पाटवं तनौ प्रथताम्।
आर्त्तिर्भवतु न वाऽऽन्त्रे कूजति भोक्तव्यमव्याजम् ॥११०॥

Even if the ingested iron is excreted or not but feeling of well being is there and even if there is no hunger-pain but gurgling sound is there one should take meal unhesitatingly. [110]

भोजनविधि:

प्रथमं पीत्वा दुग्धं शाल्यन्नं विशदसिद्धमक्लिन्नम्। घृतसंप्लुतमश्नीयान्मांसैर्वैहङ्गमै: प्राय: ॥१११॥
उत्तममूषरभूचरविष्किरमांसं तथाऽऽजमैणादिम्। अन्यदपि जलचराणां पृथुरोमापेक्षया ज्याय: ॥११२॥
मांसालाभे मत्स्या अदोषला: स्थूलसद्गुणा ग्राह्या:। मद्गुररोहितशकुला दग्धास्तु पलान्मनाङ्न्यूना: ॥११३॥

शृङ्गाटफलकशेरुककदलीफलतालनारिकेलादि। अन्यदपि यच्च वृष्यं मधुरं पनसादिकं ज्याय: ॥११४॥
केबुकताडकरीरान् वार्ताकुपटोलफलदलशमठान्। मुद्गमसूरेक्षुरसान् शंसन्ति निरामिषेष्वेतान् ॥११५॥
शाकं प्रहेयमखिलं स्तोकं रुचये तु वास्तुकं दद्यात्। विहितनिषिद्धादन्यन्मध्यमकोटिस्थितं विद्यात् ॥११६॥

At first milk should be taken followed by cooked śāil rice, distinct and unmoistened, added with profuse ghee or meat of birds. Of meats, those of desert, terrestial and scattering animals, goats, sheep etc, and of aquatic animals are better than of those having big hairs. If meat is not available, fishes of big size having good qualities and devoid of defects should be taken. Madgura, rohita and śākala types of fishes, if fried, are a bit inferior to meat in qualities.

Among fruits śṛṅgāṭaka, kaśeruka, banana, palm, coconut, panasa etc. and others which are sweet and semen-promoting are wholesome.

Of vegetables, kebuka, tāḍaka, karīra, vārttāka, paṭola (fruits and leaves) and śamaṭha along with pulses of green gram and lentils and sugarcane juice are recommended.

All potherbs generally are to be abstained from except vāstūka which can be taken occasionally for change. Substances which are neither prescribed nor contra-indicated should be taken as of average wholesomeness. [111-116]

विबन्धेऽनुपानम्

तप्तदुग्धानुपानं प्राय: सारयति बद्धकोष्ठस्य। अनुपीतमम्बु यद्वा कोमलफलनारिकेलस्य ॥११७॥
यस्य च न तथा सरति सयवक्षारजलं पिबेत् कोष्णम्। कोष्णं त्रिफलाक्वाथं क्षारसनाथं ततोऽप्यधिकम् ॥

In case there is constipation, intake of hot milk or water of tender coconut fruit acts as laxative. If these fail, warm water added with yavakṣāra should be taken. Warm decoction of triphalā mixed with yavakṣāra is stronger than the above. [117-118]

मात्रायां वृद्धिह्रासक्रम:

त्रीणि दिनानि समं स्यादह्नि चतुर्थे तु वर्द्धयेत् क्रमश: । यावच्चाष्टममाषं न वर्द्धयेत् पुनरितोऽप्यधिकम् ॥११९॥
आदौ रक्तिद्वितयं द्वितीयवृद्धौ तु रक्तिकात्रितयम्। रक्तिपञ्चकं पञ्चकमत ऊर्ध्वं वर्द्धयेन्नियतम् ॥१२०॥
वात्सरिककल्पपक्षे दिनानि यावन्ति वर्द्धितं प्रथमम्। तावन्ति वर्षशेषं प्रतिलोमं ह्रासयेत् तदय: ॥१२१॥
तेष्वष्टमाषकेषु प्रातर्माषकत्रयमश्नीयात्। सायञ्च तावदह्नो मध्ये माषद्वयं शेषम् ॥१२२॥

Dosage

The intial dose should be continued for three days. From the fourth day it should be increased gradually upto eight grams which should not be exceeded further. Initially the increase should be two raktikā (250 mg), the next one three raktikā (375 mg) and from fifth onwards it should be five raktikā (625 mg) (till eight grams). If the course is of one year, first there will be gradual increase and, in the end, the gradual decrease would follow in the same number of days. Out of the dose of eight gms., three gms.

should be taken each morning and evening and the remaining two gms. in noon. [119-122]

। इति भक्षणविधि: ।

Thus the method of intake.

अमृतसारलौहस्य गुणा:

एवं तदमृतमश्नन् कान्तिं लभते चिरस्थिरं देहम्। सप्ताहत्रयमात्रात् सर्वरुजो हन्ति किं बहुना ॥१२३॥

Thus one taking this nectar (amṛtasāra lauha) attains lustre and body. stable for long only in the period of three weeks, let alone amelioration of all disorders. [123]

उपसंहार:

आर्याभिरिह नवत्या सप्तविधीनां यथावदाख्यातम्। अमतिविपर्य्ययसंशयशून्यमनुष्ठानमुन्नीतम् ॥१२४॥
मुनिरचितशास्त्रपारं गत्वा सारं ततः समुद्धृत्य। निवबन्ध बान्धवानामुपकृतये कोऽपि षट्कर्मा ॥१२५॥

Thus in ninety stanzas in Āryā meter the processing including seven methods as received traditionally has been described in terms free form ignorance, contrary knowledge and doubt. This was systematized by some Tantric scholar, for the benefit of his fellow men, after studying the scriptures authored by the sage (Nāgārjuna) and extracting the essence therefrom. [124-125]

॥ इत्यमृतसारं लौहं समाप्तम् ॥

Thus amṛtasāra lauha concluded.

नागार्जुनीयं लौहरसायनम्

यत्र तत्रोद्भवं लौहं निःशेषं मारितं यदि। त्रिफलाव्योषसंयुक्तं भक्षयेद् वलिनाशनम् ॥१२६॥

Nāgārjunīya lauharasāyana (deśarasāyana lauha)

If one takes regularly the iron obtained from any source and killed completely along with triphalā and trikaṭu, it destroys wrinkles. [126]

विविधलौहानां गुणा:

सामान्याद् द्विगुणश्चौड्रं कालिङ्गोऽष्टगुणस्ततः। तस्माच्छतगुणं भद्रं भद्राद्वज्रं सहस्रधा ॥१२७॥
वज्रात् षष्टिगुणः पाण्डिर्निरविर्दशभिर्गुणैः। ततः कोटिसहस्रं वा अयस्कान्तं महागुणम् ॥१२८॥

From ordinary iron auḍra is two times superior, therefrom kāliṅga is eight times, thence bhadra one hundred times, from bhadra vajra is one thousand times, from vajra pāṇḍi sixty times, thence niravi ten times and ayaskānta is superior crores of thousand times and has great properties. [127-128]

षडङ्गताम्रयोग: (ताम्ररसायनम्)

रसतस्ताम्रं द्विगुणं ताम्रात् कृष्णाभ्रकं द्विगुणम्। पृथगेवैषां शुद्धिस्ताम्री शुद्धिस्ततो द्विविधा ॥१२९॥

पत्रीकृतस्य गन्धकयोगाद्वा मारणन्तथा लवणैः। आक्ते ध्मापितताम्रे निर्गुण्डीकल्ककाञ्जिके मग्ने ॥१३०॥
यत् पतति गैरिकाभं तत्पिष्टमर्द्धगन्धकं तदनु। पुटपाकेन विशुद्धं शुद्धं स्यादभ्रकन्तु पुनः ॥१३१॥
हिलमोचिमूलपिण्डे क्षिप्तं तदनु मार्दसम्पुटे लिप्ते। तीक्ष्णं दग्धं पिष्टमम्लाम्भसा साधु चन्द्रिकाविरहितम् ॥१३२॥
रेचितताम्रेण रसः खल्वशिलायां प्रघृष्य पिण्डिका कार्या।
उत्स्वेद्यो गृहसलिलेन निर्गुण्डीकल्केनासकृच्छुद्धो ॥१३३॥
एतत् सिद्धं त्रितयं चूर्णितताम्रार्द्धिकैः पृथग् युक्तम्। पिप्पलीविडङ्गमरिचैः श्लक्ष्णं द्वित्रिमाषिकं भक्ष्यम् ॥
शूलाम्लपित्तश्वयथुग्रहणीयक्ष्मादिकुक्षिरोगेषु। रसायनं महदेतत् परिहारो नियमतो नात्र ॥१३५॥

Ṣaḍaṅga tāmrayoga (Tāmrarasāyana)

Copper is taken double of mercury and black mica double of copper and they are purified with respective methods. Copper is purified in two ways– thin leaves of copper are made and pasted with sulphur or salts. It is then heated and immersed in sour gruel mixed with nirguṇḍī paste. Thus the portion fallen like red ochre is collected and rubbed with one-half sulphur and heated in puṭapāka. Thus it becomes purified. As regard mica, it is kept within the pulp of hilamocikā root, put in closed earthen saucers (samputa) and heated intensely. Then it is rubbed with sour gruel till it becomes lustreless. Mercury is rubbed with killed copper in a stony mortar till it becomes homogenous mass. Then it is steam-heated in sour gruel mixed with nirguṇḍī pulp several times. All these three, thus purified, should be taken together mixed with fine powder of pippalī, viḍaṅga and marica each 1/2 of copper powder and administered in dose of 2-3 gms. It is a great rasāyana and is useful particularly in colic, acid gastritis, oedema, grahaṇīroga, consumption and other abdominal disorders. There is no much restriction (during the course). [129-135]

सप्ताङ्गताम्रप्रयोगः

तनुपत्रीकृतं ताम्रं नैपालं गन्धकं समम्। दत्वा चोर्ध्वमधो मध्ये स्थालिकामध्यसंस्थितम् ॥१३६॥
कृत्वा स्वल्पशरावेण स्थालीमध्ये पिधाय च। शर्कराभक्तलेपेन लिप्त्वा सन्धिं तदूर्ध्वतः ॥१३७॥
बालुकापूरितस्थाल्यां पिहितायां पुनस्तथा। सुलिप्तायाञ्च यामैकमधोज्वालां प्रदापयेत् ॥१३८॥
तत आकृष्टताम्रस्य मृतस्य त्विह योजना। अथ कर्षं गन्धकस्य वह्निस्थलौहपात्रगम् ॥१३९॥
शिलापुत्रेण सम्मर्द्य द्रुतं घृष्टं पुनः पुनः। कृत्वा देयं मृतं ताम्रं कर्षमानं ततः पुनः ॥१४०॥
रसोऽम्लमथितः शुद्धस्तावन्मात्रः प्रदीयते। ततस्तथैव सम्मर्द्य पुनराज्यं प्रदापयेत् ॥१४१॥
अष्टबिन्दुकमात्रञ्च मर्दयेन्मूर्च्छितन्तथा। सर्वं स्यात् तत आकृष्य शिलापुत्रादिसङ्गतम् ॥१४२॥
संहृत्यालम्बुषरसप्रसृतेन विलोडितम्। पुनस्तथैव वह्निस्थलौहपात्रे विमर्दयेत् ॥१४३॥
यावद् द्रवक्षयं पश्चादाकृष्य सम्प्रपेषितम्। अलम्बुषरसेनैव गुडकं सम्प्रकल्पयेत् ॥१४४॥
तत्पिण्डं वस्त्रविस्तीर्णे पिण्डे त्रिकटुजे पुनः। वसनान्तरिते दत्त्वा पोट्टलीं कारयेद् बुधः ॥१४५॥
ततस्तां पोट्टलीमाज्यमग्नां कृत्वा विधारिताम्। सूत्रेण दण्डसंलग्नां पाचयेत् कुशलो भिषक् ॥१४६॥

यदा निष्फेनता चाज्ये पुटिका च दृढा भवेत्। तदा पक्कं तमाकृष्य पञ्चगुञ्जातुलाधृतम्।।१४७।।
त्रिकटुत्रिफलाचूर्णं तुल्यं प्रातः प्रयोजयेत्। तक्रं स्यादनुपानन्तु अम्लपित्तोच्छ्रये पुनः।।१४८।।
त्रिफलैव समा देया कोष्णं वारि पिबेदनु। सप्तमे दिवसे रक्तिवृद्धिस्ताम्रात्तु माषकम्।।१४९।।
यावत् प्रयोगश्च तथैवापकर्षः पुनर्भवेत्। योगोऽयं ग्रहणीयक्ष्मपित्तशूलाम्लपित्तहा।।१५०।।
रसायनश्चैतदिष्टं गुदकीलादिनाशनम्। न चात्र परिहारोऽस्ति विहाराहारकर्मणि।।१५१।।

Saptāṅga tāmrayoga

Thin-leaved copper (obtained from Nepal) is put in an earthen vessel and equal sulphur is spread above, below and middle of it. It is then covered with a small saucer and sealed with the paste of sugar and cooked rice. This is put in another bigger vessel which is filled with sand covered well with mud-paste (and dried). Then it is heated below for three hours and thereafter the killed copper is collected. Now sulphur 10 gm is put in an iron pan kept on fire and rubbed constantly with stony pestle. When it is melted the (above) killed copper is mixed with it and also purified mercury rubbed with sour gruel in the same quantity. All are rubbed together and then eight drops of ghee are added and again rubbed. Now the entire material is taken out and put in a stony mortar and impregnated with alambuṣā juice 80 ml. This is again put in the iron vessel kept on fire and rubbed till dried completely. Then it is taken out, rubbed with alambuṣā juice and made into a rounded mass. This is put again in a piece of cloth on which paste of trikaṭu is spread and covered with another piece made into a pouch which is heated in ghee in dolā-yantra (swinging apparatus). When ghee becomes frothless and the pouch is hardened it is taken out. It is taken in the dose of five raktikā (625 mg.) in morning mixed with equal quantity of powdered trikaṭu and triphalā with post-intake drink of buttermilk. In case of aggravation of amlapitta, equal triphalā should be mixed and taken with tepid water. On every seventh day the dose should be increased by one raktikā (125 mg.) till one gm. The decrease also should be in the same order.

This is a rasāyana and is particularly indicated in grahaṇī, consumption, biliary colic, amlapitta, piles etc. There is also no restriction of diet and movements. [136-151]

। इति ताम्रयोगः ।

Thus the formulation of copper.

शिलाजतुस्वरूपम्

हेमाद्याः सूर्य्यसन्तप्ताः स्रवन्ति गिरिधातवः । जत्वाभं मृदु मृत्स्नाच्छं यन्मलं तच्छिलाजतु।।१५२।।
अनम्लश्चाकषायश्च कटुपाकि शिलाजतु। नात्युष्णशीतं धातुभ्यश्चतुर्भ्यस्तस्य सम्भवः।।
हेम्नोऽथ रजतात् ताम्राद्वरं कृष्णायसादपि।।१५३।।

Śilājatu

Gold etc. contained in mountains, when heated in the sun, exude a lac-like substance soft, smooth and clear. This is known as śilājatu. [152]

Śilājatu is slightly sour and astringent, kaṭuvipāka, moderately hot as well as cold. It is produced from four metals– gold, silver, copper and iron. [153]

स्वर्णशिलाजतुनः लक्षणम्

मधुरश्च सतिक्तश्च जपापुष्पनिभश्च यत्। विपाके कटु शीतश्च तत् सुवर्णस्य निःस्रवम्।।१५४।।

The exudation (śilājatu) of gold is sweet– bitter, like japā flower (chinese rose), kaṭu in vipaka and śīta (vīrya). [154]

रजतताम्रशिलाजतुनोःलक्षणम्

राजतं कटुकं श्वेतं शीतं स्वादु विपच्यते। ताम्राद्बर्हिणकण्ठाभं तीक्ष्णोष्णं पच्यते कटु।।१५५।।

लौहशिलाजतुनः लक्षणम्

यत्तु गुग्गुलुसङ्काशं तिक्तकं लवणान्वितम्। विपाके कटु शीतश्च सर्वश्रेष्ठं तदायसम्।।१५६।।

That obtained from silver is pungent, cold and madhura in vipāka while that of copper has the lustre of the neck of peacock, is bitter, hot and kaṭu-vipāka. That which is similar to guggulu, bitter and saline in taste, kaṭu in vipāka and śītavīrya is the one obtained from iron and is the best of all. [155-156]

प्रशस्तं शिलाजतु

गोमूत्रगन्धि सर्वेषां सर्वकर्मसु यौगिकम्। रसायनप्रयोगेषु पश्चिमन्तु विशिष्यते।।१५७।।
यथाक्रमं वातपित्ते श्लेष्मपित्ते कफे त्रिषु। विशेषेण प्रशस्यन्ते मला हेमादिधातुजाः।।१५८।।

Applicable for all purposes and for all is that having odour of cow's urine. In rasāyana uses the last one (derived from iron) excels. [157]

The above four types (of śilājatu) are particularly useful in vāta-pitta, kapha-pitta, kapha and tridoṣa respectively. [158]

शिलाजतुपरीक्षा

लौहकिट्टायते वह्नौ विधूमं दह्यतेऽम्भसि। तृणात्यग्रे कृतं श्रेष्ठमधो गलति तन्तुवत्।।१५९।।

Genuine Śilājatu

The genuine śilājatu put in fire burns smokeless and becomes like iron-slag. If dropped in water, at first, it spreads on the surface and thereafter goes down in threads. [159]

शिलाजतुनः शोधनम्

मलिनं यद्भवेत् तच्च क्षालयेत् केवलाम्भसा। लौहपात्रेषु विधिना ऊर्ध्वीभूतश्च संहरेत्।।१६०।।

Purification

The dirty sample (of śilājatu) should be washed with hot water in an iron utensil and the substance obtained as supernatent layer should be collected. [160]

भावनाविधिः

वातपित्तकफघ्नैस्तु निर्य्यूहैस्तत् सुभावितम्। वीर्य्योत्कर्षं परं याति सर्वैरेकैकशोऽपि वा ॥१६१॥
प्रक्षिप्योद्धृतमावानं पुनस्तत् प्रक्षिपेद्रसे। कोष्णे सप्ताहमेतेन विधिना तस्य भावना ॥१६२॥
तुल्यं गिरिजेन जले चतुर्गुणे भावनौषधं क्वाथ्यम्। ततः क्वाथे पादांशे पूतोष्णे प्रक्षिपेद्गिरिजम्॥
तत् समरसतां यातं संशुष्कं प्रक्षिपेद्रसे भूयः ॥१६४॥

This (śilājatu) impregnated well with decoction of drugs alleviating vāta, pitta and kapha, singly or collectively, gets more potentiated. The method of impregnation is as follows– the decoction is added, rubbed and dried in the sun. The juice next is added when it is warm. This is repeated for a week. [161-162]

The decoction for bhāvanā (impregnation) is prepared by taking the drug equal to śilājatu and boiling it in four times water reduced to one-fourth. It is strained and śilājatu is put therein while it is hot. It is made homogenous and dried. This is repeated. [163-164]

शिलाजतुरसायनम्

पूर्वोक्तेन विधानेन लौहैश्चूर्णीकृतैः सह। तत् पीतं पयसा दद्याद् दीर्घमायुः सुखान्वितम् ॥१६५॥
जराव्याधिप्रशमनं देहदार्ढ्यकरं परम्। मेधास्मृतिकरं धन्यं क्षीराशी तत् प्रयोजयेत् ॥१६६॥
प्रयोगः सप्त सप्ताहास्त्रयश्चैकश्च सप्तकः। निर्दिष्टस्त्रिविधस्तस्य परो मध्योऽवरस्तथा ॥१६७॥
मात्रा पलं त्वर्द्धपलं स्यात् कर्षन्तु कनीयसी ॥१६८॥

Śilājatu-rasāyana

In the aforesaid way, śilājatu taken with lauhabhasma followed by intake of milk promotes life-span, happiness, physical stability and mental power and prevents senility and disorders. One should take milk-diet during the period. [165-166]

The regimen of śilājatu is of three types– eg. extending upto seven, three and one week regarded as superior, medium and inferior respectively. [167]

The dosage also consists of 40, 20 and 10 gms the last being the best one. [168]

शिलाजतुप्रयोगे वर्जनीयानि

शिलाजतुप्रयोगेषु विदाहीनि गुरूणि च। वर्जयेत् सर्वकालञ्च कुलत्थान् परिवर्जयेत् ॥१६९॥

While using śilājatu, one should always abstain from vidāhī (burning) and heavy substances particularly horse gram. [169]

आलोडनीयद्रव्याणि

पयांसि शुक्तानि रसाः सयूषास्तोयं समूत्रं विविधाः कषायाः।
आलोडनार्थे गिरिजस्य शस्तास्ते ते प्रयोज्याः प्रसमीक्ष्य कार्य्यम् ॥१७०॥

Milk, vinegar, meat-soup, vegetarian soup, water, urine and various decoctions should be used as adjuvants according to condition. [170]

उपसंहार:

चरकोक्तशिलाजतुविधानं सोपस्कारमेतत् ।।१७१।।

This is the method of the use of śilājatu as described by Caraka. [171]

शिवागुडिका

काले तु रवितापाढ्ये कृष्णायसजं शिलाजतु प्रवरम्। त्रिफलारससंयुक्तं त्र्यहञ्च शुष्कं पुन: शुष्कम् ।।१७२।।
दशमूलस्य गुडूच्या रसे बलायास्तथा पटोलस्य। मधुकरसैर्गोमूत्रे त्र्यहं त्र्यहं भावयेत् क्रमश: ।।१७३।।
एकाहं क्षीरेण तु तत् पुनर्भावयेच्छुष्कम्। सप्ताहं भाव्यं स्यात् क्वाथेनैषां यथालाभम् ।।१७४।।
काकोल्यौ द्वे मेदे विदारियुग्मं शतावरी द्राक्षा। ऋद्धियुगर्षभवीरामुण्डितिका: जीरकेंऽशुमत्यौ च ।।१७५।।
रास्नापुष्करचित्रकदन्तीभकणाकलिङ्गचव्याब्दा:। कटुका शृङ्गी पाठैतानि पलांशिकानि कार्य्याणि ।।१७६।।
अब्द्रोणे साधितानां रसेन पादांशिकेन भाव्यानि। गिरिजस्यैवं भावित-शुद्धस्य पलानि दश षट् च ।।१७७।।
द्विपलञ्च विश्वमागधिकाकटुकर्कटाख्यमरिचानाम्। चूर्णं पलञ्च विदार्यास्तालीशपलानि चत्वारि ।।१७८।।
षोडश सितापलानि चत्वारि घृतस्य माक्षिकस्याष्टौ। तिलतैलस्य द्विपलं चूर्णार्द्धपलानि पञ्चानाम् ।।१७९।।
त्वक्क्षीरिपत्रत्वङ्नागैलानां मिश्रयित्वा तु। गिरिजस्य षोडशपलैर्गुडिका:कार्य्यास्ततोऽक्षसमा: ।।१८०।।
ता: शुष्का नवकुम्भे जातीपुष्पाधिवासिते स्थाप्या:। तासामेका काले भक्ष्या पेयाऽपि वा सततम् ।।१८१।।
क्षीररसदाडिमरसा: सुरासवं मधु च शिशिरतोयानि। आलोडनानि तासामनुपाने वा प्रशस्यन्ते ।।१८२।।
जीर्णे लघ्वन्नपयोजाङ्गलनिर्यूहयूषभोजी स्यात्। सप्ताहं यावदत: परं भवेत् सर्वसामान्यम् ।।१८३।।
भुक्त्वाऽपि भक्षितेयं यदृच्छया नावहेद्भयं किञ्चित्। निरुपद्रवा प्रयुक्ता सुकुमारकै: कामिभिश्चैव ।।१८४।।
संवत्सरप्रयुक्ता हन्त्येषा वातशोणितं प्रबलम्। बहुवार्षिकमपि गाढं यक्ष्माणञ्चाढ्यवातञ्च ।।१८५।।
ज्वरयोनिशुक्रदोषप्लीहार्श:पाण्डुहृद्ग्रहणीरोगान्। ब्रध्नवमिगुल्मपीनसहिक्काकासारुचिश्वासान् ।।१८६।।
जठरं श्वित्रं कुष्ठं षाण्ढ्यं क्लैब्यं मदं क्षयं शोषम्। उन्मादापस्मारौ वदनाक्षिशिरोगदान् सर्वान् ।।१८७।।
आनाहमतीसारं सासृग्दरं कामलां प्रमेहांश्च। यकृदर्बुदानि विद्रधिभगन्दरं रक्तपित्तञ्च ।।१८८।।
अतिकार्श्यमतिस्थौल्यं स्वेदमथ श्लीपदञ्च विनिहन्ति। दंष्ट्राविषं समौलं गराणि खलु बहुप्रकाराणि ।।१८९।।
मन्त्रौषधिप्रयोगान् विप्रयुक्तान् भीतिकांस्तथा भावान्। पापालक्ष्म्यौ चैयं शमयेद्गुडिका शिवा नाम्ना ।।१९०।।
बल्या वृष्या धन्या कान्तियश:श्रीप्रजाकरी चेयम्। दद्यान्नृपवल्लभतां जयं विवादे मुखस्था च ।।१९१।।
श्रीमान् प्रकृष्टमेध: स्मृतिबुद्धिबलान्वितोऽतुलशरीर:। पुष्ट्योजोविमलेन्द्रियतेजोबलवर्णसमुपेत: ।।१९२।।
वलिपलितरोगरहितो जीवेच्छरदां शतद्वयं पुरुष:। संवत्सरप्रयोगाद् द्वाभ्यां शतानि चत्वारि ।।
सर्वामयजित् कथितं मुनिगणभक्ष्यं रसायनरहस्यम् ।।१९३।।

Śivā guḍikā

At the time when the sun-heat is intense, the best śilājatu derived from black iron should be mixed with triphalā decoction and dried (in the sun). This is repeated for three days. Again, in the same way, it should be impregnated with decoctions of daśamūla and madhuka and juice of guḍucī, balā and paṭola and also in cow's urine successively each for three days. For one day it should be impregnated with milk and dried. Then for a week it should

be impregnated with the decoction of the following drugs as available – kākolī, kśirakākolī, medā, mahāmedā, vidārī, kṣiravidārī, śatāvarī, drākṣā, ṛddhi, vṛddhi, vīrā, muṇḍitikā, jīraka, kṛṣṇajīraka, śālaparṇī, pṛśniparṇī, rāsnā, puṣkaramūla, citraka, dantī, gajapippalī, indrayava, cavya, musta, kaṭukā, karkaṭaśṛṅgī and pāṭhā each 40 gm decocted in water 10.24 litre reduced to one-forth. Now śilājatu impregnated and purified in this way should be taken 640 gms and śuṇṭhī, pippalī, kaṭukā, karkaṭaśṛṅgī and marica each 80 gm, vidārīkanda 40 gms, tālīśapatra 160 gm. sugar 640 gm,. ghee 160 gms., honey 320 gms., sesamum oil 80 ml., powder of the five– vaṃśalocana, patra, tvak, nāgakeśara and elā each 20 gm., should be mixed thereto and made into pills 10 gm. each which should be dried and kept in a fresh container scented with jātī flowers. One of the pills should be taken at proper time followed by some anupāna. Milk, meatsoup, pomegranate juice, surā, āsava, honey and cold water are their useful dissolvents or adjuvants. After the drug is digested, one should take light diet consisting of milk, wild meat and vagetarian soup for a week. Thereafter, everything comes to usual. There is no fear even if it is taken at random after meals nor does it produce any complication if used by persons delicate and indulged in sex.

Used regularly for a year, it alleviates severe vātarakta, chronic consumption, āḍhyavāta, fever, disorders of female and male reproductive system, splenomegaly, piles, anaemia, heart diseases, grahaṇīroga, bradhna, vomiting, gulma, pīnasa, hicough, cough, anorexia, dyspnoea, udararoga, vitiligo, kuṣṭha, impotency, intoxication, wasting, insanity, epilepsy, diseases of mouth, eye and head, ānāha, diarrhoea, menorrhagia, jaundice, prameha, liver disorders, tumours, abscess, fistula-in-ano, raktapitta, extreme emaciation, obesity, perspiration and filaria. Moreover, it destroys various types of poisons– animal, vegetable and artificial, sorcery, effects of invisible organism and inauspiciousness. It promotes strength, sexual power, virility and lustre. If kept in mouth it makes one favourable to kings and gives victory in debates and disputes. If used regularly for a year it makes the person endowed with lustre, intellect, physical strength, immunity, corpulence, clarity of senses and energy and free from wrinkles and greying of hairs with maximum life-span. If taken for two years it further enhances life-span and alleviates all disorders. Thus it is secret of rasāyana and worth using by sages. [172-193]

शिलाजतुन: प्रागुत्पत्ति:

समुद्बभूवामृतमन्थनोत्थः स्वेदः शिलाभ्योऽमृतवद्गिरेः प्राक्।
यो मन्दरस्यात्मभुवा हिताय न्यस्तः स शैलेषु शिलाजरूपी॥१९४॥

Initially śilājatu originated as sweat (exudation) of the rocks of mandarācala during the churning of ocean which was placed by Brahmā in rocky mountains in form of śilājatu. [194]

शिवागुडिकानाम्नो हेतु:

शिवागुडिकेति रसायनमुक्तं गिरिशेन गणपतये। शिववदनविनिर्गता यस्मान्नाम्ना तस्माच्छिवागुडिका॥

This rasāyana known as śivā guḍikā was revealed by Lord Śiva to Gaṇeśa. As it came out of Lord Śiva's mouth it is known as Śivā guḍikā. [195]

। इति शैवसिद्धान्तोक्ता शिवागुडिकेयम् ।

। इति शिलाजतुविधानम् ।

Thus concludes Śivā guḍika as described in Śaivasiddhānta.

Thus ends method of śilājatu (rasāyana).

अमृतभल्लातकम्

सुपक्वभल्लातफलानि सम्यग् द्विधा विदार्य्याढकसम्मितानि ।
विपाच्य तोयेन चतुर्गुणेन चतुर्थशेषे व्यपनीय तानि ॥१९६॥
पुन: पचेत् क्षीरचतुर्गुणेन घृतांशयुक्तेन घनं यथा स्यात् ।
सितोपलाषोडशभि: पलैस्तु विमिश्रय संस्थाप्य दिनानि सप्त ॥१९७॥
तत: प्रयोज्याग्निबलेन मात्रां जयेद् गुदोत्थानखिलान् विकारान् ।
कचान् सुनीलान् घनकुञ्चिताग्रान् सुपर्णदृष्टिं सुकुमारताञ्च ॥१९८॥
जवं हयानाञ्च बलं द्विपानां स्वरं मयूरस्य हुताशदीप्तिम् ।
स्त्रीवल्लभत्वं लभते प्रजाञ्च नीरोगमब्दद्विशतानि चायु: ॥१९९॥
न चान्नपाने परिहार्य्यमस्ति न चातपे चाध्वनि मैथुने च ।
प्रयोगकाले सकलामयानां राजा ह्ययं सर्वरसायनानाम् ॥२००॥
भल्लातकस्य संशुद्धिं प्रागिष्टचूर्णगुण्डनात् । घृताच्चतुर्गुणं क्षीरं घृतस्य प्रस्थ इष्यते ॥२०१॥

Amṛtabhallātaka

Mature bhallātaka fruits 2.56 kg. are cut into two pieces and boiled in four times water reduced to one-forth. The fruits are then removed and the decoction is again cooked with four times milk and portion (640 gm.) of ghee till it is solidified. Now sugarcandy 640 gm is mixed thereto and kept for a week. Thereafter it is used in the proper dose according to digestive power.

It alleviates all diseases of rectum and provides dense black hairs, piercing eyes, delicacy, force, strength, voice, digestion, charm, virility, health and longevity. There is no restriction in diet, movements and sex during the use of this formulation which is the king of all rasāyanas.

Bhallātaka should be purified beforehand by keeping it in brick-powder. Ghee should be taken one-fourth of milk i.e., one prastha (640 gm). [196-201]

। इत्यमृतभल्लातकम् ।

Thus concludes amṛtabhallātaka.

॥ इति रसायनाधिकार: ॥ ६६ ॥

Thus ends the chapter on Rasāyana. [66]

६७. सप्तषष्टितमोऽध्यायः

CHAPTER LXVII

वृष्याधिकारः

On Vṛṣya (aphrodisiacs)

बस्ताण्डप्रयोगः

पिप्पलीलवणोपेतौ बस्ताण्डौ क्षीरसर्पिषा। साधितौ भक्षयेद् यस्तु स गच्छेत् प्रमदाशतम्॥ १॥

One who takes goat's testicles fried with ghee extracted from milk and mixed with pippalī powder and salt performs sex with hundred women.[1]

तिलप्रयोगः

बस्ताण्डसिद्धे पयसि भावितानसकृत् तिलान्। यः खादेत् स नरो गच्छेत् स्त्रीणां शतमपूर्ववत्॥ २॥

One who eats sesamum grains impregnated several times with milk processed with goat's testicles performs sex with hundred women always with new vigour. [2]

विदारीचूर्णप्रयोगः

चूर्णं विदार्य्याः सुकृतं स्वरसेनैव भावितम्। सर्पिःक्षौद्रयुतं लीढ्वा शतं गच्छेद्वराङ्गनाः॥ ३॥

One after taking vidārī powder impregnated with its own juice mixed with ghee and honey performs sex with hundred women. [3]

भावितामलकचूर्णम् (आमलकीरसायनम्)

एवमामलकं चूर्णं स्वरसेनैव भावितम्। शर्करामधुसर्पिर्भिर्युक्तं लीढ्वा पयः पिबेत्॥
एतेनाशीतिवर्षोऽपि युवेव परिहृष्यते॥ ४॥

Likewise, the powder of āmalaka impregnated with its own juice and mixed with sugar, honey and ghee should be taken followed by intake of milk. By this even a man eighty years old is stimulated like a young man. [4]

विदारीकल्कः

विदारीकन्दकल्कन्तु घृतेन पयसा नरः। उदुम्बरसमं खादन् वृद्धोऽपि तरुणायते॥ ५॥

Even the old behaves like a young by taking 10 gm. paste of vidārīkanda mixed with ghee and followed by intake of milk. [5]

स्वयंगुप्तादिचूर्णम्

स्वयंगुप्तेक्षुरकयोर्बीजचूर्णं सशर्करम्। धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत्॥ ६॥

Svayaṅguptādi Cūrṇa

Powder of the seeds od svayaṅguptā (kapikacchū) and ikṣuraka mixed with sugar should be taken with fresh warm milk. By this semen is not decreased. [6]

उच्चटाचूर्णं शतावर्यादिचूर्णञ्च

उच्चटाचूर्णमप्येवं क्षीरेणोत्तममुच्यते। शतावर्य्युच्चटाचूर्णं पेयमेवं सुखार्थिना॥ ७॥

Śatāvaryādi cūrṇa

Similarly uccaṭā powder with milk acts excellently. Powder of śatāvarī and uccaṭā combined may also be used for sexual pleasure. [7]

मधुकप्रयोग:

कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम्। पयोऽनुपानं यो लिह्यान्नित्यवेग: स ना भवेत्॥ ८॥

Madhuka powder 10 gm mixed with ghee and honey should be taken with milk. By this man attains constant urge for sex. [8]

गोक्षुरकादिचूर्णम्

गोक्षुरक: क्षुरक: शतमूलीवानरिनागबलाऽतिबला च। चूर्णमिदं पयसा निशि पेयं यस्य गृहे प्रमदाशतमस्ति॥

Gokṣurakādi cūrṇa

Gokṣuraka, ikṣuraka, śatāvarī, kapikacchū, nāgabalā and atibalā– this powder should be taken in night by one who has to deal with hundred women. [9]

माषपायस:

घृतभृष्टो दुग्धमाषपायसो वृष्य उत्तम:॥ १०॥

Pāyasa prepared of balckgram fried with ghee and cooked with milk is an excellent aphrodisiac. [10]

दधिसरप्रयोग:

दध्न: सरं शरच्चन्द्रसन्निभं दोषवर्जितम्। शर्कराक्षौद्रमरिचैस्तुगाक्षीर्य्या च बुद्धिमान्॥ ११॥
युक्त्या युक्तं ससूक्ष्मैलं नवे कुम्भे शुचौ पटे। मार्जिते प्रक्षिपेच्छीते घृताढ्यं षष्टिकौदनम्॥ १२॥
तदद्यादुपरिष्टाच्च रसालां मात्रया पिबेत्। वर्णस्वरबलोपेत: पुमांस्तेन वृषायते॥ १३॥

The pure white supernatant layer of curd is mixed with sugar, honey, marica, vaṃśalocana and elā and is strained though a clean cloth in a fresh utensil. When cooled, it is added with cooked ṣaṣṭika rice mixed with ghee and taken followed by intake of rasālā in proper quantity. By this man behaves like bull and is endowed with lustre, voice and strength. [11-13]

मत्स्यप्रयोग:

आर्द्राणि मत्स्यमांसानि शफरीश्चाज्यभर्जिताम्। तप्ते सर्पिषि य: खादेत् स गच्छेत् स्त्रीषु न क्षयम्॥ १४॥

One who takes fresh fish particularly śafarī fried in ghee does not lose strength in women. [14]

नारसिंहचूर्णम्

शतावरीरजःप्रस्थं प्रस्थं गोक्षुरकस्य च। वाराह्या विंशतिपलं गुडूच्याः पञ्चविंशतिः॥ १५॥
भल्लातकानां द्वात्रिंशच्चित्रकस्य दशैव तु। तिलानां शोधितानाञ्च प्रस्थं दद्यात् सुचूर्णितम्॥ १६॥
त्र्यूषणस्य पलान्यष्टौ शर्करायाश्च सप्ततिः। माक्षिकं शर्करार्द्धेन माक्षिकार्द्धेन वै घृतम्॥ १७॥
शतावरीसमं देयं विदारीकन्दजं रजः। एतदेकीकृतं चूर्णं स्निग्धे भाण्डे निधापयेत्॥ १८॥
पलार्द्धमुपयुञ्जीत यथेष्टञ्चापि भोजनम्। मासैकमुपयोगेन जरां हन्ति रुजामपि॥ १९॥
वलीपलितखालित्यमेहपाण्ड्वाढ्यपीनसान्। हन्त्यष्टादशकुष्ठानि तथाऽष्टावुदराणि च॥ २०॥
भगन्दरं मूत्रकृच्छ्रं गृध्रसीं सहलीमकम्। क्षयञ्चैव महाश्वासान् पञ्च कासान् सुदारुणान्॥ २१॥
अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान्। विंशतिं श्लैष्मिकांश्चैव संसृष्टान् सान्निपातिकान्॥
सर्वानर्शोगदान् हन्ति वृक्षमिन्द्राशनिर्यथा॥ २२॥
स काञ्चनाभो मृगराजविक्रमस्तुरङ्गमञ्चाप्यनुयाति वेगतः।
स्त्रीणां शतं गच्छति सोऽतिरेकं प्रकृष्टदृष्टिश्च यथा विहङ्गः॥ २३॥
पुत्रान् सञ्जनयेद्वीरान् नरसिंहनिभांस्तथा। नारसिंहमिदं चूर्णं सर्वरोगहरं नृणाम्॥ २४॥

Nārasiṃha cūrṇa

Powdered śatāvarī 640 gm, gokṣura 640 gm, vārāhīkanda 800 gm, guḍūcī 1 kg, bhallātaka 1.28 kg, citraka 400 gm, cleaned sesamum 640 gm, trikaṭu 320 gm, sugar 2.8 kg, honey 1.4 kg, ghee 700 gm, vidārīkanda 640 gm– all are mixed together and kept in an uncted container. It should be used in the dose of 20 gm, without restriction of diet. By one month's use it destroys senility and diseases such as wrinkles, greying of hairs, baldness, prameha, anaemia, āḍhyavāta, pīnasa, all types of kuṣṭha and udara, fistula-in-ano, dysuria, sciatica, halīmaka, wasting, five types of cough and dyspnoea, all disorders caused by vāta, pitta, kapha and sannipāta and all types of piles. By its use one becomes charming and attains physical strength, sexual vigour, good vision and virility. This nārasiṃha cūrṇa destroys all diseases of man. [15-24]

वाराहीकन्दस्य परिचयः

वाराहीकन्दसंज्ञस्तु चर्मकारालुको मतः। पश्चिमे गृष्टिशब्दाख्यो वराह इव लोमवान्॥ २५॥

Vārāhīkanda is commonly known as carmakārāluka (in east) and gṛṣṭi in west. It has hairs like those of boar. [25]

गोधूमाद्यं घृतम्

गोधूमाच्च पलशतं निःक्वाथ्य सलिलाढके। पादावशेषे पूते च द्रव्याणीमानि दापयेत्॥ २६॥
मुञ्जातफलगोधूमं माषद्राक्षापरूषकम्। काकोली क्षीरकाकोली जीवन्ती सशतावरी॥ २७॥
अश्वगन्धा सखर्जूरं मधुकं त्र्यूषणं सिता। भल्लातमात्मगुप्ता च समभागानि कारयेत्॥ २८॥
घृतप्रस्थं पचेदेवं क्षीरं दत्त्वा चतुर्गुणम्। मृद्वग्निना च संसिद्धे द्रव्याण्येतानि निक्षिपेत्॥ २९॥
त्वगेलापिप्पलीधान्यकर्पूरं नागकेशरम्। यथालाभं विनिक्षिप्य सिताक्षौद्रपलाष्टकम्॥ ३०॥

दग्धेक्षुदण्डेनालोड्य विधिवद्विनियोजयेत्। शाल्योदनेन भुञ्जीत पिबेन्मांसरसेन वा॥ ३१॥
केवलस्य पिबेदस्य पलमात्रां प्रमाणतः। न तस्य लिङ्गशैथिल्यं न च शुक्रक्षयो भवेत्॥ ३२॥
वातहरं परं बल्यं शुक्रसञ्जननं परम्। शमनं मूत्रकृच्छ्रस्य वृद्धानाञ्चापि शस्यते॥ ३३॥
पलद्वयं तदश्नीयाद्दशरात्रमतन्द्रितः। भजते स्त्रीशतञ्चापि पीत्वा चानुपिबेत् पयः॥ ३४॥
अश्विभ्यां निर्मितश्चैतद्गोधूमाद्यं रसायनम्। जलद्रोणे तु गोधूमक्काथे तच्छेषमाढकम्॥ ३५॥
मुञ्जातकस्य स्थाने तु तद्गुणं तालमस्तकम्। कल्कद्रव्यसमं मानं त्वगादेः साहचर्य्यतः॥ ३६॥

Godhūmādya ghṛta

Godhūma (wheat) 4 kg. is cooked in water 2.56 water litre reduced to one-fourth. With this decoction ghee 640 gm. is cooked along with the paste of muñjāta (fruit), wheat, māṣa, drākṣā, paruṣaka, kākolī, kṣīrakākolī, jīvantī, śatāvarī, aśvangadhā, kharjūra, madhuka, trikaṭu, śarkarā, bhallātaka and kapikacchū – each in equal quantity along with four times milk on mild fire. When cooked well, powders of tvak, elā, pippalī, dhānyaka, karpūra and nāgakeśara, as available, are added (when cooled) sugar and honey (combined) 320 gm. are mixed thereto with a piece of burnt sugarcane. It should be taken with cooked śāli or meatsoup or singly in the dose of 40 gm. By its use no looseness of male organ and loss of semen occur. It alleviates vāta, promotes strength and semen, cures dysuria even in old persons. For ten days regularly it should be taken in dose of 80 gm. with milk. It enables one to enjoy hundred women. This godhūmādya rasāyana is formulated by Aśvins.

In decoction of godhūma water 10.24 litre should be reduced to 2.56 litre. In place of muñjātaka, upper portion of palm tree, similar in property, is taken.

By association, the quantity of tvak etc. should be as that of the drugs for paste. [26-36]

शतावरीघृतम्

घृतं शतावरीगर्भं क्षीरे दशगुणे पचेत्। शर्करापिप्पलीक्षौद्रयुक्तं तद् वृष्यमुत्तमम्॥ ३७॥

Śatāvarighṛta

Ghee cooked with the paste of śatāvarī in ten times milk and added, in end, with sugar, pippalī powder and honey acts as good aphrodisiac. [37]

गुडकूष्माण्डकम्

कूष्माण्डकात् पलशतं सुस्विन्नं निष्कुलीकृतम्। प्रस्थं घृतस्य तैलस्य तस्मिंस्तप्ते प्रदापयेत्॥ ३८॥
त्वक्पत्रधान्यकव्योषजीरकैलाद्वयानलम्। ग्रन्थिकं चव्यमातङ्गपिप्पलीविश्वभेषजम्॥ ३९॥
शृङ्गाटकं कशेरुञ्च प्रलम्बं तालमस्तकम्। चूर्णीकृतं पलाशञ्च गुडस्य च तुलां पचेत्॥ ४०॥
शीतीभूते पलान्यष्टौ मधुनः सम्प्रदापयेत्। कफपित्तानिलहरं मन्दाग्नीनाञ्च शस्यते॥ ४१॥
कृशानां बृंहणं श्रेष्ठं वाजीकरणमुत्तमम्। प्रमदासु प्रसक्तानां ये च स्युः क्षीणरेतसः॥ ४२॥
क्षयेण च गृहीतानां परमेतद्भिषग्जितम्। कासं श्वासं ज्वरं हिक्कां हन्ति छर्दिमरोचकम्॥ ४३॥
गुडकूष्माण्डकं ख्यातमश्विभ्यां समुदाहृतम्। खण्डकूष्माण्डवत् पात्रं स्विन्नकूष्माण्डकद्रवः॥ ४४॥

Guḍakūsmāṇḍaka

Kuṣmāṇḍa 4 kg. well steamed and decorticated is fried in ghee and oil (mixed) 640 gm. and cooked (in its own juice) after adding jaggery 4 kg and powder of the following drugs each 40 gm– tvak, patra, dhānyaka, trikaṭu, jīraka, elā, bṛhadelā, citraka, pippalīmūla, cavya, gajapippalī, śuṇṭhī, śṛṅgāṭaka, kaśeru, pralamba (sprouts) and upper portion of palm. When cooled, honey 320 gm. is added.

It alleviates vāta, pitta and kapha and is recommended for those having poor digestion. it is an excellent weight-promoting for the emaciated and aphrodisiac for those indulged in sex and with decreased semen. It is a good remedy for wasting, cough, dyspnoea, fever, hiccough, comiting and anorexia. This guḍakūṣmāṇḍaka is formulated by Aśvins.

(For cooking) juice of steamed kūṣmāṇḍa is taken 2.56 litre as in case of khaṇḍakūṣmāṇḍa. [38-44]

अनुक्तवृष्याणि

यत्किञ्चिन्मधुरं स्निग्धं जीवनं बृंहणं गुरु। हर्षणं मनसश्चैव सर्वं तद् वृष्यमुच्यते ॥ ४५ ॥

Whatever is sweet, unctous, vitaliser, bulk-promoting, heavy and exhilarating for mind is vṛṣya (aphrodisiac). [45]

भल्लातकादितैलम्

भल्लातकबृहतीफलदाडिमफलवल्कसाधितं कुरुते। लिङ्गं मर्दनविधिना कटुतैलं वाजिलिङ्गाभम् ॥ ४६ ॥

Bhallatakādi taila

Mustard oil cooked with the paste of bhallātaka, bṛhatī (fruit) and dāḍima (fruit) and massaged makes the male organ like that of horse. [46]

धुस्तूरादितैलम्

कनकरसमसृणवर्त्तितहयगन्धामूलमत्र पर्य्युषितम्। माहिषमिह नवनीतं गतबीजे च तत्फलमध्ये ॥ ४७ ॥
गोमयगाढोद्वर्त्तितपूर्वं पश्चादनेन संलिप्तम्। भवति हयलिङ्गसदृशं लिङ्गं कठिनाङ्गनादयितम् ॥ ४८ ॥

Aśvagandhā root powdered finely with the juice of dhattūra (leaves) is mixed with buffalo's butter and kept overnight within the decorticated fruit (of dhattūra). It is pasted over the penis after it is anointed densely with cow-dung. By this the male organ becomes (hard and strong) like that of horse liked by difficult women. [47-48]

अश्वगन्धातैलम्

अश्वगन्धावरीकुष्ठं मांसीसिंहीफलान्वितम्। चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत् ॥
स्तनलिङ्गकर्णपालिवर्द्धनं म्रक्षणादिदम् ॥ ४९ ॥

Aśvagandhādi taila

Sesamum oil is cooked with (the paste of) aśvagandhā, śatāvarī, kuṣṭha, māṃsī and

bṛhatī (fruit) along with four times milk. By massage it increases breasts, penis and ear lobes. [49]

वराहवसाप्रयोग:

मेदसा क्षौद्रयुक्तेन वराहस्य प्रलेपितम्। सम्यक् स्निग्धं रतान्तेऽपि स्तब्धतां न विमुञ्चति॥ ५०॥

Penis anointed with boar's fat mixed with honey does not lose stiffness even after sexual intercourse. [50]

सूतगर्भकरञ्जबीजप्रयोग:

बीजं बृहत्करञ्जस्य कृतमन्त: सपारदम्। हेम्ना सुवेष्टितं न्यस्तं वदने बीजधृङ्मतम्॥ ५१॥

Seed of bṛhat karañja is filled with mercury and covered with gold. This kept in mouth retains semen. [51]

पादलेप:

आजन्तूष्ट्रीक्षीरं गव्यघृतं चरणयुगललेपेन। स्तम्भयति पुरुषबीजं योगोऽयं यामिनीं सकलाम्॥ ५२॥

Milk of goat and camel mixed with cow's ghee is applied as paste to the sole of feet. It retains semen for the whole night. [52]

भल्लातकादिलेप:

भल्लातकबृहतीफलनलिनीदलसिन्धुजन्मजलशूकै:। माहिषनवनीतेन तु करम्बितै: सप्तदिनमुषितै:॥
मूले हयगन्धाया महिषीमलमथितपूर्वमथ लिङ्गम्। लिप्तं भवति लघूकृतरासभलिङ्गं ध्रुवं पुंसाम्॥ ५४॥

Bhallātakādi lepa

Bhallātaka, bṛhatī fruit, lotus leaf, rocksalt and jalaśuka– all powdered together and mixed with buffalo's butter is kept within (cavity made into the) root of aśvagandhā for a week. It is pasted on penis after anointing buffalo's dung. It makes the small penis big as of ass. [53-54]

नीलोत्पलादिलेप:

नीलोत्पलसितपङ्कजकेशरमधुकशर्कराऽवलिप्तेन। सुरते सुचिरं रमते दृढलिङ्गो भवति नाभिविवरेण॥ ५५॥

Nīlotpalādi lepa

Stamens of nīlotpala and white lotus, madhuka and sugar– this formulation is pasted over the umbilicus. By this one attains firmness in penis and enjoys sexual intercourse for long. [55]

भूमिलतापक्वकुसुम्भतैलम्

सिद्धं कुसुम्भतैलं भूमिलताचूर्णमिश्रितं कुरुते। चरणाभ्यङ्गेन रते वीर्यस्तम्भाद् दृढं लिङ्गम्॥ ५६॥

Kusumbha oil mixed with powdered earthworm is pasted on (sole of) feet. It makes the penis firm and retains semen during sexual intercourse. [56]

करभवारुणीमूललेप:

सप्ताहं छागसलिलसंस्थं वै करभवारुणीमूलम्। गाढोद्वर्त्तनविधिना लिंगस्तम्भं रते कुरुते ॥ ५७ ॥

Thick pasting with the root of karabhavāruṇī kept in goat's urine for a week stiffens the penis during sexual intercourse. [57]

गोशृङ्गधूपनम्

गोरेकोन्नतशृङ्गत्वग्भवचूर्णेन धूपितं वस्त्रम्। परिधाय भजंल्ललनां नैकाण्डो भवति हर्षार्त्तः ॥ ५८ ॥

One who performs sex with woman after wearing cloth fumigated with the powder of cow's elevated horn-scale is exhilarated and does not fail (in sex). [58]

तिलगोक्षुरसिद्धं दुग्धम्

समतिलगोक्षुरचूर्णं छागीक्षीरेण साधितं समधु। भुक्तं क्षपयति षाण्ढ्यं यज्जनितं कुप्रयोगेण ॥ ५९ ॥

Intake of the edibles prepared with powdered tila and gokṣura in equal quantity along with goat's milk and lastly mixed with honey removes impotence produced by magical spell. [59]

षाण्ढ्यहरो योग:

योगजवराङ्गबद्धं मथितेन खालित्यं हरति। उन्मुखगोशृङ्गोद्भवलेपो योगो ध्वजभङ्गहर: ॥ ६० ॥

Impotence caused by sorcery is removed by washing (the organ) with buttermilk. Similarly acts the paste of elevated horn of cow. [60]

कुष्ठादिकवल:

कुष्ठैलवालुकैलामुस्तकधन्याकमधुकृत: कवल:। अपहरति पूतिगन्धं रसोनमदिरादिजं गन्धम् ॥ ६१ ॥

Kuṣṭhādi kavala

Kuṣṭha, elavāluka, elā, mustaka, dhānyaka and honey. This mouth gargle removes foul odour and also smell of garlic, wine etc. [61]

अधोवातहरो योग:

क्षौद्रेण बीजपूरत्वग्लीढाऽधोवातगन्धनुत् ॥ ६२ ॥

Intake of bījapūra bark with honey prevents the foul odour of flatus. [62]

॥ इति वृष्याधिकार: ॥ ६७ ॥

Thus ends the chapter on vṛṣya. [67]

६८. अष्टषष्टितमोऽध्यायः

CHAPTER LXVIII

स्नेहाधिकारः

On Sneha (unction)

चतुर्विधस्नेहेषु घृतस्य श्रेष्ठता

सर्पिस्तैलं वसा मज्जा स्नेहेषु प्रवरं मतम्। तत्रापि चोत्तमं सर्पिः संस्कारस्यानुवर्त्तनात्॥ १॥

Of all the snehas (uncting substances) ghee, oil, muscle-fat and marrow are the best ones. Among them too, ghee is the best one because of continuance (of the quality of) processing. [1]

घृतस्य प्रयोगविशेषः

केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम्। देयं बहुकफे चापि व्योषक्षारसमायुतम्॥
तथा धीस्मृतिमेधाग्निकाङ्क्षिणा शस्यते घृतम्॥ २॥

Ghee should be given alone in paittika diseases, mixed with salt in vātika ones and combined with trikaṭu and yavakṣāra in diseases having predominance of kapha. Moreover, ghee is useful for those who desire promotion of intelligence, memory, retention and digestive power. [2]

तैलप्रयोगार्हाः

ग्रन्थिनाडीक्रिमिश्लेष्ममेदोमारुतरोगिषु। तैलं लाघवदार्ढ्यार्थं क्रूरकोष्ठेषु देहिषु॥ ३॥

Oil is indicated for those suffering from cyst, sinus, worms and other disorders caused by kapha, medas and vāta and for those having hard bowels. It provides lightness and firmness. [3]

वसामज्जप्रयोगार्हाः

वातातपाध्वभारस्त्रीव्यायामक्षीणधातुषु। रूक्षक्लेशसहात्यग्निवातावृतपथेषु च॥ ४॥
शेषौ वसा तु सन्ध्यस्थिमर्मकोष्ठरुजासु च। तथा दग्धाहतभ्रष्टयोनिकर्णशिरोरुजि॥ ५॥

The remaining two (fat and marrow) are indicated for those who have suffered from loss of dhātus due to exposure to wind and sun, way-faring, load-carrying, sexual indulgence and physical exertion and are roughened and tolerant, have excessively increased digestive fire and the channels covered by vāta. Particularly fat is useful in diseases of joints, bone, vital organs and bowels, burns, injuries, prolapse of uterus and diseases of ear and head. [4-5]

ऋतुविशेषे स्नेहप्रयोगः

तैलं प्रावृषि वर्षान्ते सर्पिरन्त्यौ तु माधवे। साधारणे ऋतौ स्नेहं पिबेत् कार्य्यवशात्तु तम्॥ ६॥

Sneha should be taken in moderate seasons such as oil in early rains, ghee in autumn and the last two (fat and marrow) in the month of Vaiśākha. This arrangement is for specific purpose (evacuation). [6]

दोषविशेषे स्नेहप्रयोगकालः

वातपित्ताधिको रात्रावुष्णे चापि पिबेन्नरः। श्लेष्माधिको दिवा शीते पिबेच्चामलभास्करे॥ ७॥

One having prdominance of vāta and pitta and in summer season should take sneha in night while that having predominance of (vāta and) kapha and during winter season should take it in day when the sun is bright. [7]

स्नेह्या अस्नेह्याश्च

स्वेद्यसंशोध्यमद्यस्त्रीव्यायामासक्तचिन्तकाः। वृद्धबालाबलकृशा रूक्षाः क्षीणास्रेरेतसः॥ ८॥
वातार्त्तस्यन्दतिमिरदारुणप्रतिबोधिनः। स्नेह्याः; न त्वतिमन्दाग्नितीक्ष्णाग्निस्थूलदुर्बलाः॥
ऊरुस्तम्भातिसारामगलरोगगरोदरैः॥ ९-१०॥
मूर्च्छाच्छर्द्यरुचिश्लेष्मतृष्णामद्यैश्च पीडिताः। आमप्रसूता युक्ते च नस्ये वस्तौ विरेचने॥ ११॥

Those who are to be sudated and evacuated; indulged in drinking, sex and exercise; intellectuals, old, children, debilitated, emaciated, roughened, having deficiency of blood and semen and suffering from vātika disorders, conjunctivitis, defects of vision, dāruṇa and pratibodha are fit for unction. [8-9]

Unction should not be used in cases of excessively poor and intense digestive fire, obesity, debility, ūrustambha, diarrhoea, āmadoṣa, throat disorders, artificial poisons, udararoga, fainting, vomiting, anorexia, kapha, thirst, alcoholism, premature delivery and after administration of snuff, enema and purgative. [10-11]

अच्छस्नेहपानम्

स्नेहसात्म्यः क्लेशसहो दृढः काले च शीतले। अच्छमेव पिबेत् स्नेहमच्छपानं हि शोभनम्॥ १२॥

One who is suited to unction, tolerant and firm should take sneha singly in winter season. Single intake is always good. [12]

शमनशोधनार्थं स्नेहप्रयोगकालः

पिबेत् संशमनं स्नेहमन्नकाले प्रकाङ्क्षितः। शुद्ध्यर्थं पुनराहारे नैशे जीर्णे पिबेन्नरः॥ १३॥

Sneha, for pacification, should be taken in time of (taking) food when one is hungry while that for evacuation should be taken (in the morning) when the food taken in night is digested. [13]

उत्तमादिस्नेहमात्रा

अहोरात्रमहः कृत्स्नं दिनार्द्धञ्च प्रतीक्षते। उत्तमा मध्यमा ह्रस्वा स्नेहमात्रा जरां प्रति॥ १४॥
उत्तमस्य पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमे। जघन्यस्य पलार्धेन स्नेहक्वाथ्यौषधेषु च॥ १५॥

According to (time taken in) digestion, the doses of sneha are of three degrees– high, medium and small being digested in 24, 12 and 6 hours respectively. [14]

In weight, they are 40, 30 and 20 gm. respectively for sneha as well as decoctions. [15]

स्नेहेपानेऽनुपानानि

जलमुष्णं घृते पेयं यूषस्तैलेऽनुशस्यते। वसामज्ज्ञोस्तु मण्डः स्यात् सर्वेषूष्णमथाम्बु वा॥ १६॥
भल्लाते तौवरे स्नेहे शीतमेव जलं पिबेत्॥ १७॥

Hot water, vegetable soup and rice-scum should be taken after intake of ghee, oil and fat– marrow respectively, or in all cases hot water is prescribed. [16]

But in case of the oils of bhallātaka and tuvaraka only cold water should be taken. [17]

पीतस्नेहे तृष्णाचिकित्सा

स्नेहपीतस्तु तृष्णायां पिबेदुष्णोदकं नरः। एवञ्चानुपशाम्यन्त्यां स्नेहमुष्णाम्बुनोद्धरेत्॥ १८॥

If there is thirst after taking sneha, one should take hot water. In case it does not subside by this, the sneha should be vomited with hot water. [18]

स्नेहाजीर्णचिकित्सा

मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्य्यति। विष्टभ्य वापि जीर्य्येत्तं वारिणोष्णेन वामयेत्॥
ततः स्नेहं पुनर्दद्याल्लघुकोष्ठाय देहिने॥ १९॥

If sneha is not digested or digested with wind formation due to improper behaviour or excessive dose it should be vomited with hot water. Thereafter when bowels are light another dose of sneha is administered again. [19]

जीर्णाजीर्णशङ्कायामुष्णजलपानम्

जीर्णाजीर्णविशङ्कायां पिबेदुष्णोदकं नरः। तेनोद्गारो भवेच्छुद्धो रुचिश्चान्नं भवेत् प्रति॥ २०॥

When there is doubt in digestion one should take hot water which produces eructation, relish and appetite. [20]

स्नेहपाने पथ्यम्

भोज्यान्नं मात्रया पास्यन् श्वः पिबन् पीतवानपि। द्रवोष्णमनभिष्यन्दि नातिस्निग्धमसङ्करम्॥ २१॥

One who would take sneha tomorrow, is taking or has taken should be given diet, in proper quantity, consisting of liquid, hot, non-blocking, not too unctuous and compatible items. [21]

स्नेहप्रयोगावधिकाल:

त्र्यहावरं सप्तदिनं परन्तु स्निग्धो नर: स्वेदयितव्य इष्ट:।
नात: परं स्नेहनमादिशन्ति सात्म्यीभवेत्सप्तदिनात् परन्तु॥ २२॥
मृदुकोष्ठस्त्रिरात्रेण स्निह्यत्यच्छोपसेवया। स्निह्यति क्रूरकोष्ठस्तु सप्तरात्रेण मानव:॥ २३॥

Prior to sudation one is subjected to unction for three days minimum and seven days maximum. Unction is not prescribed beyond that as after a week the person gets adjusted to it. [22]

One with soft bowels is uncted withs single intake (of sneha) in three days while that with hard bowels is uncted in seven days. [23]

वमनविरेचनाङ्गस्नेहपानविधि:

स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्नेहमाचरन्। स्निग्धस्त्र्यहं स्थित: कुर्य्याद्विरेकं, वमनं पुन:॥
एकाहं दिनमन्यच्च कफमुत्क्लेश्य तत्करै:॥ २४-२५॥

During intake of sneha one should take diet consisting of unctuous, liquid and hot items and meat-soup of wild animals. After unction, he should wait for three days and then should take purgative. Then after one or two days having aggravated kapha with śleṣmala dravyas should administer emesis. [24-25]

सम्यक्स्निग्धातिस्निग्धरूक्षलक्षणम्

वातानुलोम्यं दीप्ताग्निर्वर्च: स्निग्धमसंहतम्। स्नेहोद्वेग: क्लम: सम्यक् स्निग्धे रूक्षे विपर्य्यय:॥ २६॥
अतिस्निग्धे तु पाण्डुत्वं घ्राणवक्त्रगुदस्रवा:॥ २७॥

Carmination of wind, stimulated digestion, unctuous and soft stool, aversion to fatty itmes and malaise– these are symptoms of proper unction. In roughened state, the symptoms are opposite. [26]

In excessive unction there are paleness and discharge from nose, mouth and anus. [27]

रूक्षातिस्निग्धचिकित्सा

रूक्षस्य स्नेहनं कार्य्यमतिस्निग्धस्य रूक्षणम्। श्यामाककोरदूषान्नतक्रपिण्याकशक्तुभि:॥ २८॥

In the roughened unction should be done while in the excessively uncted roughening should be effected with (admisnistration of) śyāmāka, koradūṣa, bitter-milk, oil-cake and parched grain floor. [28]

सद्य: स्नेह्या:

बालवृद्धादिषु स्नेहपरिहारासहिष्णुषु। योगानिमाननुद्वेगान् सद्य:स्नेहान् प्रयोजयेत्॥ २९॥

For children and old persons etc. who can not tolerate the formal restrictions of unction one should prescribe the following formulations which are aggreable and provide unction immediately. [29]

सद्यःस्नेहनानि

भृष्टा मांसरसे स्निग्धा यवागूः स्वल्पतण्डुला। सक्षौद्रा सेव्यमाना तु सद्यःस्नेहनमुच्यते॥ ३०॥

Intake of gruel having little grains fried, cooked in meat soup, unctous and added with honey provides unction instantaneously. [30]

पाञ्चप्रसृतिकी पेया

सर्पिस्तैलवसामज्जतण्डुलप्रसृतैः शृता। पाञ्चप्रसृतिकी पेया पेया स्नेहनमिच्छता॥ ३१॥

One desirous of unction should drink the pāñcaprasṛtika peyā (liquid gruel) made of ghee, oil, fat, marrow and rice each 80 gm. [31]

सद्यःस्नेहनी यवागूः

सर्पिष्मती बहुतिला तथैव स्वल्पतण्डुला। सुखोष्णा सेव्यमाना तु सद्यःस्नेहनमुच्यते॥ ३२॥

Intake of warm gruel containing profuse ghee and sesamum with less rice uncts instantaneously. [32]

सद्यःस्नेहनं क्षीरम्

शर्कराघृतसंसृष्टे दुह्याद्गां कलसेऽथवा। पाययेद्रूक्षमेतद्धि सद्यःस्नेहनमुच्यते॥ ३३॥

Cow is milched on a vessel containing sugar and ghee. This milk should be given to the roughened to drink. It uncts instantaneously. [33]

रोगविशेषे स्नेहविशेषस्य विधिनिषेधौ

ग्राम्यानूपौदकं मांसं गुडं दधि पयस्तिलान्। कुष्ठी शोथी प्रमेही च स्नेहने न प्रयोजयेत्॥ ३४॥
स्नेहैर्यथास्वं तान् सिद्धैः स्नेहयेदविकारिभिः। पिप्पलीभिर्हरीतक्या सिद्धैस्त्रिफलया सह॥ ३५॥

Persons suffering from kuṣṭha, śotha and prameha should not use, for unction, meat of domestic, marshy and aquatic animals, jaggery, curd, milk and sesamum. [34]

Those patients, however, should be uncted with snehas which are harmless such as processed with pippalī, harītakī and triphalā. [35]

संशोधने क्रियाक्रमः

स्नेहमग्रे प्रयुञ्जीत ततः स्वेदमनन्तरम्। स्नेहस्वेदोपपन्नस्य संशोधनमथान्तरम्॥ ३६॥

At first, unction should be administered and then sudation. Evacuation is given after unction and sudation are done. [36]

॥ इति स्नेहाधिकारः॥ ६८॥

Thus ends chapter on Sneha. [68]

६९. एकोनसप्ततितमोऽध्यायः

CHAPTER LXIX

स्वेदाधिकारः

On Sveda (sudation)

दोषविशेषे स्वेदविशेषः

वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते। स्निग्धरूक्षस्तथा स्निग्धो रूक्षश्चाप्युपकल्पितः ॥ १ ॥

Sudation is indicated in (disorders of) vāta and kapha singly or jointly and that should be unctuous, rough and unctuous-rough respectively. [1]

व्याधिदेहापेक्षया त्रिविधस्वेदविधानम्

व्याधौ शीते शरीरे च महान् स्वेदो महाबले। दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो मतः ॥ २ ॥

In diseases caused by cold and strong persons sudation should be applied of high degree. The same should be of low degree in debilitated ones and of medium degree in persons having average strength. [2]

आशयविशेषापेक्षया स्वेदः

आमाशयगते वाते कफे पक्वाशयाश्रये। रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च ॥ ३ ॥

In case of vāta being situated in āmāśaya and kapha situated in pakvāśaya sudation should be rough and unctuous, to begin with, respectively. [3]

अवयवविशेषे स्वेदनम्

वृषणौ हृदयं दृष्टी स्वेदयेन्मृदु वा न वा। मध्यमं वङ्क्षणौ शेषमङ्गावयवमिष्टतः ॥ ४ ॥

Testicles, heart, eyes– these parts should not be fomented or, if necessary should be fomented mildly. Moderate fomentation should be applied to inguinal region and in other parts it is applied as necessary. [4]

अस्वेद्या नराः

न स्वेदयेदतिस्थूलरूक्षदुर्बलमूर्च्छितान्। स्तम्भनीयक्षतक्षीणविषमद्यविकारिणः ॥ ५ ॥
तिमिरोदरवीसर्पकुष्ठशोषाढ्यरोगिणः। पीतदुग्धदधिस्नेहमधून् कृतविरेचनान् ॥ ६ ॥
भ्रष्टदग्धगुदग्लानिक्रोधशोकभयार्दितान्। क्षुत्तृष्णाकामलापाण्डुमेहिनः पित्तपीडितान् ॥
गर्भिणीं पुष्पितां सूतां मृदुर्वाऽऽत्ययिके गदे ॥ ७ ॥

In the following cases sudation should not be applied– excessively obese, rough, debilitated, fainting, conditions which require stambhana (application of cold), wasting due to chest-wound, poisoning, alcoholism, defects of vision, udararoga, erysipelas,

kuṣṭha, consumption, vātarakta, after intake of milk, curd, fatty substance and honey; after purgation, prolapse of rectum, after cauterization in anal region, malaise, anger, anxiety, fear, hunger, thirst, jaundice, anaemia, prameha, disorders of pitta, pregnancy, menstruation and after delivery. In emergent condition, if required, mild sudation may be applied. [5-7]

अनग्निस्वेद:

स्वेदो हितस्त्वनाग्नेयो वाते मेद:कफावृते ॥ ८ ॥
निर्वातं गृहमायासो गुरुप्रावरणं भयम् । उपनाहाहवक्रोधभूरिपानक्षुधाऽऽतपा: ॥
स्वेदयन्ति दशैतानि नरमग्निगुणादृते ॥ ९ ॥

In case of vāta covered with medas and kapha non-igneous sudation is wholesome. [8]

Wind-free place, exertion, heavy covering, fear, poultice, duel, anger, alcoholic drink in large quantity, hunger, exposure to the sun– these ten sudate a person without having igneous character. [9]

सम्यक्स्वेदनलक्षणम्

शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे । सञ्जाते मार्दवे स्वेदे स्वेदनाद्विरतिर्मता ॥ १० ॥

Sudation is stopped when cold and pain subside, stiffness and heaviness are controlled, softness and perspiration appear. [10]

अतिस्वेदनलक्षणं तच्चिकित्सा च

स्फोटोत्पत्ति: पित्तरक्तप्रकोपो मूर्च्छा भ्रान्तिर्दाहतृष्णे क्लमश्च ।
स्विन्नेऽत्यर्थं सन्धिपीडा विदाह: कृत्या: शीतास्तत्र कुर्य्याद्विधिज्ञ: ॥ ११ ॥

In excessive sudation there appear blisters, aggravation of pitta and rakta, fainting, giddiness, burning sensation, thirst, exhaustion, pain in joints and burning during digestion. In such conditions cold measures should be applied. [11]

स्वेदनस्थानकालौ

सर्वान् स्वेदान् निवाते तु जीर्णान्ने चावचारयेत् ॥ १२ ॥

All types of sudation should be applied in windless place and on empty stomach. [12]

पूर्वं स्वेदार्हा:

येषां नस्यं विधातव्यं वस्तिश्चापि हि देहिनाम् । शोधनीयास्तु ये केचित् पूर्वं स्वेद्यास्तु ते मता: ॥ १३ ॥

Those who are to be given snuff or enema or any from of evacuation should be sudated beforehand. [13]

पश्चात् स्वेद्या:

पश्चात् स्वेद्या हते शल्ये मूढगर्भाऽनुपद्रवा । सम्यक् प्रजाता काले च पश्चात् स्वेद्या विजानता ॥ १४ ॥

One should be sudated after extraction of foreign body, having mūḍhagarbha (confounded foetus) without any complication and after timely parturition. [14]

पूर्वं पश्चाच्च स्वेदार्हाः

स्वेद्याः पश्चाच्च पूर्वश्च भगन्दर्यर्शसस्तथा ॥ १५ ॥

In case of fistula-in-ano and piles sudation should be aapplied beforehand as well as afterwards. [15]

चतुर्विधः स्वेदः

तप्तैः सैकतपाणिकांस्यवसनैः स्वेदोऽथवाऽङ्गारकैर्लेपाद्वातहरैः सहाम्ललवणस्नेहैः सुखोष्णैर्भवेत् ।
एवं तप्तपयोऽम्बुवातशमनक्वाथादिसेकादिभिस्तप्तैस्तोयनिषेचनोद्भवबृहद्वाष्पैः शिलाद्यैः क्रमात् ॥
तापोपनाहद्रवबाष्पपूर्वाः स्वेदास्ततोऽन्त्यप्रथमौ कफे स्तः ।
वायौ द्वितीयः पवने कफे च पित्तोपसृष्टे विहितस्तृतीयः ॥ १६-१७ ॥

Sudation is of four types– (1) tāpasveda (heat-sudation) – in this sudation is done with heated sand, hand, metallic appliances, cloth-piece or charcoal. (2) lepa-sveda (paste-sudation) – this is done by applying warm paste of vāta-alleviating sour, salty and fatty substances. (3) drava-sveda (liquid-sudation) – in this sprinkling is done with hot, liquid such as milk, sour substances or vāta– alleviating decoctions. (4) vāṣpa-sveda (steam-sudation) – in this sudation is applied with vapour arising from (heated) stone-piece etc. after sprinkling water thereon.

Out of them, the first and the last are applicable in kapha, the second in vāta and the third in vāta and kapha associated with pitta. [16-17]

॥ इति स्वेदाधिकारः ॥ ६९ ॥

Thus ends chapter on sveda. [69]

७०. सप्ततितमोऽध्यायः

CHAPTER LXX

वमनाधिकारः

On Vamana (emesis)

वमनविधिः

स्निग्धस्विन्नं कफे सम्यक् संयोगे वा कफोल्वणे। श्वोवम्यमुत्क्लिष्टकफं मत्स्यमांसतिलादिभिः ॥ १ ॥
यथाविकारविहितां मधुसैन्धवसंयुताम्। कोष्ठं विभज्य भैषज्यमात्रां मन्त्राभिमन्त्रिताम् ॥ २ ॥
'ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः। ऋषयः सौषधिग्रामा भूतसङ्घास्तु पान्तु ते ॥ ३ ॥
रसायनमिवर्षीणां देवानाममृतं यथा। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते' ॥ ४ ॥
पूर्वाह्णे पाययेत् पीतो जानुतुल्यासने स्थितः। तन्मना जातहृल्लासप्रसेकश्छर्दयेत्ततः ॥
अङ्गुलीभ्यामनायस्तनालेन मृदुनाऽथवा ॥ ५ ॥

In (disorders of) kapha or predominance of the same in combination, the patient is uncted and sudated. Then in the previous night he is given diet consisting of fish, meat, sesamum etc. which increase (and irritate) kapha. Next day, in forenoon, the drug is administered in adequate dose, according to the condition of bowels. incanted with the following hymn–

"Brahmadakṣāśvirudrendra-bhūcandrārkānilānalāh.
Ṛṣayaḥ sauṣadhigrāmā bhūtasaṅghāstu pāntu te.
Rasāyanamivarṣīṇāṃ devānām amṛtaṃ yathā.
Sudhevottamanāgānāṃ bhaiṣajyamidamastu te."

("May Brahmā, Dakṣa, Aśvins, Rudra, Indra, Earth, Moon, Sun, Air, Fire, sages, plants and multitude of creatures protect you. May this drug prove for you as rasāyana for the sages, nectar for the gods and ambrosia for the best among serpents".)

After taking the drug he should sit on a knee-high seat with concentration and when nausea and salivation appear should vomit with the help of fingers or soft and straight stalk (of lily). [1-5]

कृष्णादिकल्कः

कृष्णेन्द्रयवसिन्धूत्थवचाकल्कयुतं पिबेत्। यष्टीकषायं सक्षौद्रं तेन साधु वमत्यलम् ॥ ६ ॥

Kṛṣṇādi kalka

One should take decoction of madhuyasti mixed with the paste of kṛṣṇā (pippalī), indrayava, rocksalt and vacā and also honey. By this he vomits well. [6]

वमने क्राथकल्पना

क्राथ्यद्रव्यस्य कुडवं श्रपयित्वा जलाढके। चतुर्भागावशिष्टन्तु वमनेष्ववचारयेत् ॥ ७ ॥

For emesis the decoction should be prepared by decoctive material 160 gm. boiled in water 2.56 litre reduced to one-fourth. [7]

प्रियङ्गुकल्कः

तण्डुलजलनिष्पिष्टं यः पीत्वा वमति पूर्वाह्णे। फलिनीवल्कलमुष्णं हरति गरं सकफपित्तरुजम् ॥ ८ ॥

One who vomits in forenoon after taking hot paste of priyangu bark processed with rice-water eliminates artificial poison as well as disorders of cough and pitta. [8]

ताम्रप्रयोगः

क्षौद्रलीढं ताम्ररजो वमनं गरदोषनुत् ॥ ९ ॥

Emesis induced by copper bhasma taken with honey removes disorders of artificial poison. [9]

पञ्चकषायः

आटरूषं वचा निम्बं पटोलं फलिनीत्वचम्। क्राथयित्वा पिबेत्तोयं वान्तिकृन्मदनान्वितम् ॥ १० ॥

Pañcakaṣāya

Vāsā, vacā, nimba, paṭola and priyaṅgu bark – this decoction mixed with madanaphala should be taken to induce emesis. [10]

प्रियङ्ग्वादिकल्कः

निम्बकषायोपेतं फलिनीगदमदनमधुकसिन्धूत्थम्। मधुयुतमेतद्वमनं खलु कफपूर्णाशये शस्तम् ॥ ११ ॥

Phalinyādi kalka

The paste of phalinī (priyaṅgu), kuṣṭha, madanaphala, madhuka and saindhava mixed with honey and dissolved in nimba decoction is prescribed for emesis when the system is full of kapha. [11]

वामकद्रव्याणि

फलजीतमूतकेक्ष्वाकुकुटजाः कृतवेधनः। धामार्गवश्च संयोज्याः सर्वथा वमनेष्वमी ॥ १२ ॥

In emetic formulations the following drugs are used– madanaphala, jīmūta, ikṣvāku, kuṭaja, kṛtavadhana and dhāmārgava. [12]

सम्यग्वमितस्य लक्षणम्

क्रमात् कफः पित्तमथानिलश्च यस्यैति सम्यग्वमितः स इष्टः।
हृत्पार्श्वमूर्द्धेन्द्रियमार्गशुद्धौ तनोर्लघुत्वेऽपि च लक्ष्यमाणे ॥ १३ ॥

(After administing the drug) if kapha, pitta and vāta are eliminated in order, the person

should be considered as well vomited and also when heart, sides, heads, sense organs and passages become clear and lightness appears in body. [13]

अयोगातियोगलक्षणम्

दुश्छर्दिते स्फोटककोठकण्डूहृत्खाविशुद्धिर्गुरुगात्रता च।

अतिवमितस्य लक्षणम्

तृण्मोहमूर्च्छाऽनिलकोपनिद्राबलादिहानिर्वमितेऽति विद्यात्॥ १४॥

By deficient vomiting boils, urticarial patches, itching, impurity of heart and passages and heaviness of body arise. In excessive vomiting thirst, confusion, fainting, aggravation of vāta and loss of sleep and strength etc. appear. [14]

वमनानन्तरं पथ्यम्

ततः सायं प्रभाते वा क्षुद्वान् पेयादिकं भजेत्॥ १५॥

पेयां विलेपीमकृतं कृतञ्च यूषं रसं त्रिर्द्विरथैकशश्च। क्रमेण सेवेत विशुद्धकायः प्रधानमध्यावरशुद्धिशुद्धः॥

Thereafter in evening or next morning one should take liquid gruel etc. when appetite appears. [15]

After evacuation the patient should take liquid gruel, rice-paste, processed and unprocessed vegetarian soup and meat-soup in three, two or one meal-time according to the evacuation being of superior, medium and inferior degrees respectively. [16]

प्रधानमध्यावरशुद्धिलक्षणम्

जघन्यमध्यप्रवरे तु वेगाश्चत्वार इष्टा वमने षडष्टौ। दशैव ते द्वित्रिगुणा विरेके प्रस्थस्तथा द्वित्रिचतुर्गुणश्च॥

आन्तिकी मानिकी च शुद्धिः

पित्तान्तमिष्टं वमनं विरेकादर्द्धं कफान्तञ्च विरेकमाहुः।
द्वित्रान् सविट्कानपनीय वेगान् मेयं विरेके वमने तु पीतम्॥ १८॥

In emesis, the result is assessed as inferior, medium, and superior if the number of urges is four, six and eight respectively. In purgation this number is ten, twenty and thirty and also the quantity of excrement as two, three and four prasthas respectively. [17]

Emesis should end with (expulsion of) pitta with quantity of the vomit half of that of excrement in purgative. Purgation should end with expulsion of kapha (mucus). The quantity in purgation should be taken into account after two or three motions with faeces while that in emesis after expulsion of the ingested drug. [18]

प्रस्थमानम्

वमने च विरेके च तथा शोणितमोक्षणे। सार्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः॥ १९॥

In case of emesis, purgation and blood-letting, prastha should be taken as of thirteen and a half palas (540 gms). [19]

वमनस्यायोगातियोग-चिकित्सा

अयोगे लङ्घनं कार्यं पुनर्वाऽपि विशोधनम्।। २०।।

अतिवान्तं घृताभ्यक्तमवगाह्य हिमे जले। उपाचरेत् सिताक्षौद्रमिश्रैर्लेहैश्चिकित्सकः।। २१।।

वमनेऽतिप्रवृत्ते तु हृद्यं कार्यं विरेचनम्।। २२।।

In case of deficient emesis the patient should observe fasting or should take the evacuative drug again. [20]

In case of excessive vomiting the patient should be bathed with cold water after anointing with ghee. Thereafter he should be given churned drink mixed with sugar and honey. [21]

If emesis is excessive palatable purgative drug should be administered. [22]

अवाम्याः नराः

न वामयेत्तैमिरिकं न गुल्मिनं न चापि पाण्डूदररोगपीडितम्।
स्थूलक्षतक्षीणकृशातिवृद्धानर्शोऽर्दिताक्षेपकपीडितांश्च।। २३।।
रूक्षे प्रमेहे तरुणे च गर्भे गच्छत्यथोर्ध्वं रुधिरे च तीव्रे।
दुष्टे च कोष्ठे क्रिमिभिर्मनुष्यं न वामयेद्वर्चसि चातिबद्धे।। २४।।

In following conditions emesis is contra-indicated– defects of vision, gulma, anaemia, udararoga, obesity, wasting due to chest-wound, emaciation, too old, piles, facial paralysis, convulsions, roughness, prameha, recent pregnancy, innate haemorrhage directed upwards, gastrointestinal worms and severe constipation. [23-24]

अवाम्यानामपि वामनीयता

एतेऽप्यजीर्णव्यथिता वाम्या ये च विषातुराः। अत्युल्बणकफा ये च ते च स्युर्मधुकाम्बुना।। २५।।

In the above cases too, if there is indigestion or in those who suffer from poisoning or have excessive aggravation of kapha should be vomited with decoction of madhuka. [25]

।। इति वमनाधिकारः।। ७०।।

Thus ends chapter on Vamana. [70]

७१. एकसप्ततितमोऽध्यायः

CHAPTER LXXI

विरेचनाधिकारः

On Virecana (purgation)

विरेचनविधिः

स्निग्धस्विन्नाय वान्ताय दातव्यन्तु विरेचनम्। अन्यथा योजितं ह्येतद् ग्रहणीगदकृन्मतम्॥ १॥

Purgation should be given after emesis in a patient prepared priorly with unction and sudation otherwise it causes disorders of grahaṇī. [1]

दोषभेदेन मृद्वादिकोष्ठनिर्देशः

पित्तेन मृदुकोष्ठः स्यात् क्रूरो वातकफाश्रयात्। मध्यमः समदोषत्वाद् योज्या मात्राऽनुरूपतः॥ २॥

Bowels are soft due to pitta and hard due to vāta and kapha while in equilibrium of doṣas it is medium. The dose of purgative drug should be fixed accordingly. [2]

त्रिवृदादिचूर्णम्

शर्कराक्षौद्रसंयुक्तं त्रिवृच्चूर्णावचूर्णितम्। रेचनं सुकुमाराणां त्वक्पत्रमरिचांशिकम्॥ ३॥

Trivṛdādi cūrṇa

Trivṛt powder mixed with one-fourth powder of tvak, patra and marica (total) and taken with sugar and honey is a good purgative for the delicate. [3]

त्रिवृत्प्रयोगौ

त्रिवृच्चूर्णं सितायुक्तं पिबेच्छ्रेष्ठं विरेचनम्॥ ४॥
छित्वा द्विधेक्षुं परिलिप्य कल्कैस्त्रिभण्डिजातैः परिवेष्ट्य रज्ज्वा।
पक्वन्तु सम्यक् पुटपाकयुक्त्या खादेत्तु तं पित्तगदी सुशीतम्॥ ५॥

Trivṛt powder alone mixed with sugar is an excellent purgative. [4]

Sugarcane is divided into two (longitudinally) and inner sides are covered with paste of trivṛt. Then they are re-joined, tied with rope and cooked well as puṭapāka, when cooked it should be taken by one suffering from paittika disorders. [5]

पिप्पल्यादिचूर्णम्

पिप्पलीनागरक्षारं श्यामा त्रिवृतया सह। लेहयेन्मधुना सार्द्धं कफव्याधौ विरेचनम्॥ ६॥

Pippalyādi cūrṇa

Pippalī, śuṇṭhī, yavakṣāra, śyāmā and trivṛt– this powder should be taken for purgation in disorders of kapha. [6]

हरीतक्यादिचूर्णम्

हरीतकी विडङ्गानि सैन्धवं नागरं त्रिवृत्। मरिचानि च तत् सर्वं गोमूत्रेण विरेचनम्॥ ७॥

Harītakyādi cūrṇa

Harītakī, viḍaṅga, saindhava, śuṇṭhī, trivṛt and marica– all are powdered together and taken with cow's urine. It acts as purgative. [7]

त्रिवृदादिचूर्णं गुडिका च

त्रिवृच्छाणत्रयसमा त्रिफला तत्समानि च। क्षारकृष्णाविडङ्गानि तच्चूर्णं मधुसर्पिषा॥ ८॥
लिह्याद् गुडेन गुडिकां कृत्वा वाऽप्युपयोजयेत्। कफवातकृतान् गुल्मान् प्लीहोदरभगन्दरान्।
हन्त्यन्यानपि चाप्येतन्निरपायं विरेचनम्॥ ९॥

Trivṛdādi cūrṇa-guḍikā

Trivṛt powder 3 śāṇa (7.5 gm), triphalā 7.5 gm. and yavakṣāra, pippalī and viḍaṅga (total 7.5 gm.) should be taken with honey and ghee or in the form of guḍikā after preparing it with jaggery. It destroys diseases caused by kapha and vāta such as gulma, splenomegaly, fistula-in-ano etc. It is a purgative free from complications. [8-9]

अभयाद्यो मोदकः

अभया पिप्पलीमूलं मरिचं नागरन्तथा। त्वक्पत्रपिप्पलीमुस्तविडङ्गामलकानि च॥ १०॥
कर्षः प्रत्येकमेषान्तु दन्त्याः कर्षत्रयन्तथा। षट्कर्षाश्च सितायास्तु द्विपलं त्रिवृतो भवेत्॥ ११॥
सर्वं सुचूर्णितं कृत्वा मधुना मोदकं कृतम्। खादेत् प्रतिदिनश्चैकं शीतञ्चानु पिबेज्जलम्॥ १२॥
तावद्विरिच्यते जन्तुर्यावदुष्णन्न सेवते। पाण्डुरोगं विषं कासं जङ्घापार्श्वरुजां तथा॥ १३॥
पृष्ठार्त्तिं मूत्रकृच्छ्रञ्च दुर्नाम सभगन्दरम्। अश्मरीमेहकुष्ठञ्च दाहशोषोदराणि च॥ १४॥
यक्ष्माणं चक्षुषो रोगं क्रमं वैद्येन जानता। योजितोऽयं निहन्त्याशु अभयाद्यो हि मोदकः॥ १५॥

Abhayādya modaka

Abhayā (harītakī), pippalīmūla, marica, śuṇṭhī, tvak, patra, pippalī, musta, viḍaṅga and āmalaka each 10 gm, dantī 30 gm, sugar 60 gm and trivṛt 80 gm– all powdered together are made into modaka with honey, one modaka should be taken daily with cold water. Purgation continues until hot water is taken.

This abhayādya modaka alleviates anaemia, poisoning, cough, pain in legs and sides, backache, dysuria, piles, fistula-in-ano, calculus, prameha, kuṣṭha, burning sensation, oedema, udararoga, consumption and eye diseases if used carefully. [10-15]

हरीतक्यादिमोदकः

हरीतक्यास्तु कर्षार्धं तदर्धं त्रिवृतस्तथा। सिताम्बुना समं पिष्ट्वा घृते तु भर्जयेन् मनाक्॥ १६॥
तद्द्रव्यं शीतलं कृत्वा सिताकर्षेण योजयेत्। तावद् विरिच्यते जन्तुर्यावदुष्णं न सेवते॥ १७॥

Harītakyādi modaka

Harītakī 5 gm and trivṛt 2.5 gm are pounded with sugared water and then fried slightly in ghee. When cooled sugar 10 gm is added. This causes purgation which continues until hot water is taken. [16-17]

एरण्डतैलप्रयोग:

एरण्डतैलं त्रिफलाक्काथेन द्विगुणेन च। युक्तं पीत्वा पयोभिर्वा न चिरेण विरिच्यते॥ १८॥

Castor oil mixed with double triphalā decoction or milk causes purgation quickly. [18]

सम्यग्विरिक्तस्य लक्षणम्

स्रोतोविशुद्धीन्द्रियसम्प्रसादौ लघुत्वमूर्जोऽग्निरनामयत्वम्।
प्राप्तिश्च विट्पित्तकफानिलानां सम्यग्विरिक्तस्य भवेत् क्रमेण॥ १९॥

In the person purged well, cleaning of channels, clarity of senses, lightness, energy, proper appetite and freedom from disorders are observed and also expulsion of faeces, pitta, kapha and vāta in this order. [19]

विरेचनायोगलक्षणम्

स्यात् श्लेष्मपित्तानिलसम्प्रकोपः सादस्तथाऽग्नेर्गुरुता प्रतिश्या।
तन्द्रा तथा छर्दिररोचकश्च वातानुलोम्यं न च दुर्विरिक्ते॥ २०॥

In case of ill-purging, there are vitiation of kapha, pitta and vāta; depression of digestive fire, heaviness, coryza, drowsiness, vomiting, anorexia and non-carmination of wind. [20]

विरेचनातियोगलक्षणम्

कफास्रपित्तक्षयजानिलोत्थाः सुप्त्यङ्गमर्दक्लमवेपनाद्याः।
निद्राबलाभावतमःप्रवेशाः सोन्मादहिक्काश्च विरेचितेऽति॥ २१॥

In case of excessive purgation, disorders of vāta caused by diminution of kapha, rakta and pitta such as numbness, bodyache, exhaustion, trembling etc., Insomnia, debility, unconsciousness, mental derangement and hiccough arise. [21]

विरेचनानन्तरं पथ्यम्

मन्दाग्निमक्षीणमसद्विरिक्तं न पाययेत् तद्दिवसे यवागूम्।
विपर्य्यये तद्दिवसे तु सायं पेयाक्रमो वान्तवदिष्यते तु॥ २२॥
यथाऽणुरग्निस्तृणगोमयाद्यैः सन्धुक्ष्यमाणो भवति क्रमेण।
महान् स्थिरः सर्वसहस्तथैव शुद्धस्य पेयादिभिरन्तरग्निः॥ २३॥

If evacuation is not properly done and the patient has poor appetite but is not emaciated, gruel should not be given on that day otherwise it should be given in the evening. After purgation the management with liquid gruel is the same as in post-emetic period. [22]

As little (external) fire kindled gradually with grasses, cowdung etc. becomes great, stable and all-consuming the internal fire of the evacuated one does like that with liquid gruel etc. [23]

दोषानुसारेण विरेचनव्यवस्था

कषायमधुरैः पित्ते विरेकः कटुकैः कफे। स्निग्धोष्णलवणैर्वायौ, अप्रवृत्ते च पाययेत्॥
उष्णाम्बु स्वेदयेच्चास्य पाणितापेन चोदरम्॥ २४-२५॥
उत्थानेऽल्पे दिने तस्मिन् भुक्त्वाऽन्येद्युः पुनः पिबेत्॥ २६॥

In (aggravation of) pitta, one should be purgated with astringent-sweet drugs, in kapha with pungent and in vāyu with unctuous, hot and salty drugs.

In case purgation is not effected, hot water should be given to drink and abdomen fomented with heated palms. [24-25]

If defaecation is slight, the patient should take food on that day and repeat the purgative the next day. [26]

अस्निग्धकोष्ठस्य पुनर्विरेचनम्

अदृढस्नेहकोष्ठस्तु पिबेदूर्ध्वं दशाहतः। भूयोऽप्युपस्कृततनुः स्नेहस्वेदैर्विरेचनम्॥
यौगिकं सम्यगालोच्य स्मरन् पूर्वमनुक्रमम्॥ २७॥

If one is not well uncted, he should repeat purgative properly after ten days having prepared his body well with unction and sudation keeping in mind the previous performance. [27]

दुर्बलादिषु विरेचनविधिः

दुर्बलः शोधितः पूर्वमल्पदोषः कृशो नरः। अपरिज्ञातकोष्ठस्तु पिबेन्मृद्वल्पमौषधम्॥ २८॥

One who is debilitated, evacuated previously, with little disorder, emaciated and whose condition of bowels is not known should take drug mild and in small dose. [28]

रूक्षादिकोष्ठे विरेचनम्

रूक्षवह्वनिलक्रूरकोष्ठव्यायामसेविनाम्। दीप्ताग्नीनाञ्च भैषज्यमविरिच्यैव जीर्य्यति।
तेभ्यो वस्तिं पुरा दद्यात् ततः स्निग्धं विरेचनम्॥ २९॥
अस्निग्धे रेचनं स्निग्धं रूक्षं स्निग्धेऽति शस्यते। विरूक्ष्य स्नेहसात्म्यन्तु भूयः स्निग्धं विरेचयेत्॥ ३०॥

In those who have rough and hard bowels full of wind, practise physical exercise and have good digestive power, the drug is digested without exerting purgative action. In such case, first enema should be given and then unctous purgative. [29]

In one who is not well uncted purgative should be unctous and the same rough in case of the excessively uncted. The person who is suited to sneha should be roughened first and then uncted and purgated. [30]

पद्मकादि:

पद्मकोशीरनागाह्वचन्दनानि प्रयोजयेत्। अतियोगे विरेकस्य पानालेपनसेचनैः ॥ ३१ ॥
सौवीरपिष्टाम्रवल्कनाभिलेपोऽतिसारहा ॥ ३२ ॥

Padmakādi

Padmaka, uśīra, nāgakeśara, and candana– this formulation is used in form of intake, paste and sprinkling in case of excessive purgation. [31]

The bark of mango powdered with sour gruel should be pasted on naval. It checks excessive purgation. [32]

अविरेच्याः नराः

अविरेच्या बालवृद्धश्रान्तभीतनवज्वराः। अल्पाग्न्यधोगपित्तास्रक्षतपाय्वतिसारिणः ॥ ३३ ॥
सशल्यास्थापितक्रूरकोष्ठातिस्निग्धशोषिणः। गर्भिणी नवसूता च तृष्णार्त्तोऽजीर्णवानपि ॥ ३४ ॥

In following cases purgation is contra-indicated-children, old people, fatigue, fear, acute fever, poor digestive fire, innate haemorrhage directed downwards, rectal wound, diarrhoea, foreign body, after non-unctous enema, hard bowels, after excessive unction, consumption, pregnancy, puerperium, thirst and indigestion. [33-34]

॥ इति विरेचनाधिकारः ॥ ७१ ॥

Thus ends chapter on Virecana. [71]

७२. द्विसप्ततितमोऽध्याय:

CHAPTER LXXII

अनुवासनाधिकार:

On Anuvāsana (unctuous enema)

अनुवासनविधि:

वातोल्वणेषु दोषेषु वाते वा वस्तिरिष्यते। यथोचितात् पादहीनं भोजयित्वाऽनुवासयेत्॥ १॥
न चाभुक्तवते स्नेह: प्रणिधेय: कथञ्चन। सूक्ष्मत्वाच्छून्यकोष्ठस्य क्षिप्रमूर्ध्वमथोत्पतेत्॥ २॥

In doṣas having predominance of vāta or in vāta alone enema is given. Unctuous enema should be given after providing food one-fourth less than the usual one. Sneha should never be administered on empty stomach as because of its readily absorbable property it quickly moves upwards. [1-2]

त्रिविधा मात्रा

षट्पली च भवेच्छ्रेष्ठा मध्यमा त्रिपली भवेत्। कनीयसी सार्द्धपला त्रिधा मात्राऽनुवासने॥ ३॥
प्राग्देयमाद्ये द्विपलं पलार्द्धवृद्धिर्द्वितीये पलमक्षवृद्धि:।
कर्षद्वयं वा वसुमाषवृद्धिर्वस्तौ तृतीये क्रम एष उक्त:॥ ४॥

In unctuous enema the dose of the content should be 240, 120 and 60 ml regarded as superior, medium and inferior respectively. [3]

In the first one 80 ml is administered in the beginning and then increased by 20 ml. in the second one the starting dose is 40 ml. increased by 10 ml and in the third one the initial dose is 20 ml increased by 8 ml. [4]

स्नेहदानविधि:

स तु सैन्धवचूर्णेन शताह्वेन च संयुत:। भवेत् सुखोष्णश्च तथा निरेति सहसा सुखम्॥ ५॥
विरिक्तश्चानुवास्यश्चेत् सप्तरात्रात् परन्तदा॥ ६॥

This enema is mixed with the powder of rocksalt and śatapuṣpā and should be warm. Thus it comes out soon. [5]

If it is to be administered after purgation it should be given after a week. [6]

वस्तिनेत्रनिर्माणार्थं द्रव्याणि

सुवर्णरूप्यत्रपुताम्ररीतिकांस्यायसास्थिद्रुमवेणुदन्तै:।
नलैर्विषाणैर्मणिभिश्च तैस्तै: कार्य्याणि नेत्राणि त्रिकर्णिकानि॥ ७॥

वयोभेदेन नेत्रप्रमाणादिकम्

षड्द्वादशाष्टाङ्गुलसम्मितानि षड्विंशतिद्वादशवर्षजानाम्।
स्युर्मुद्गकर्कन्धुसतीनवाहिच्छिद्राणि वर्त्त्या पिहितानि चापि॥ ८॥
यथावयोऽङ्गुष्ठकनिष्ठिकाभ्यां मूलाग्रयोः स्युः परिणाहवन्ति।
ऋजूनि गोपुच्छसमाकृतीनि श्लक्ष्णानि च स्युर्गुडिकामुखानि॥ ९॥
स्यात् कर्णिकैकाऽग्रचतुर्थभागे मूलाश्रिते वस्तिनिबन्धने द्वे।
जारद्गवो माहिषहारिणौ वा स्याच्छौकरो बस्तिरजस्य वाऽपि॥ १०॥
दृढस्तनुर्नष्टशिरो विगन्धः कषायरक्तः सुमृदुः सुशुद्धः।
नृणां वयो वीक्ष्य यथानुरूपं नेत्रेषु योज्यस्तु सुबद्धसूत्रः॥ ११॥

The nozzles with three ear-rings should be made of gold, silver, tin, copper, brass, bronze, iron, bone, plant, bamboo, teeth, reed, horns and gems. [7]

These should be of six, twelve and eight fingers length for the person of six, twenty and twelve years of age respectively. They should have orifice such as to allow the passage of (a grain of) green gram, jujube and pea respectively for the above categories of subjects and should be closed with a stylet. Their circumference at the base and tip should be of the measure of thumb and little finger according to age and they should be straight, tapering like cow's tail, smooth and rounded at mouth. One ear-ring should be at the one-fourth distance from the tip and the other two at the base for connecting the enema pouch.

The enema pouch should be made of the urinary bladder of old bull, buffalo, deer, boar or goat. It should be firm, thin, with veins degenerated, free from smell, of ochre-coloured or red, quite soft and clean. This should be used according to age of the patient after having been attached to the nozzle firmly with thread. [8-11]

निरूहानुवासनबस्तिमात्रा

निरूहमात्रा प्रथमे प्रकुञ्चो वत्सरे परम्। प्रकुञ्चवृद्धिः प्रत्यब्दं यावत् षट् प्रसृतास्ततः॥ १२॥
प्रसृतं वर्द्धयेदूर्ध्वं द्वादशाष्टादशस्य तु। आसप्ततेरिदं मानं दशैव प्रसृताः परम्॥ १३॥
यथायथं निरूहस्य पादो मात्रानुवासने॥ १४॥

In child of one year's age the dose of nirūha (non-unctuous enema) should be 40 ml. which is increased by 40 ml. every year till 480 ml. Thereafter 80 ml. is increased every year till the age of eighteen years which continues upto that of seventy years. The maximum dose is 800 ml. [12-13]

In the above regimen, the dose of unctuous enema is one-fourth (of the non-unctuous enema). [14]

वस्तिप्रणिधानविधि:

कृतचङ्क्रमणं मुक्तविण्मूत्रं शयने सुखे। नात्युच्छ्रिते न चोच्छीर्षे संविष्टं वामपार्श्वत: ।। १५ ।।
सङ्कोच्य दक्षिणं सक्थि प्रसार्य्य च ततोऽपरम्। वस्तिं सव्ये करे कृत्वा दक्षिणेनावपीडयेत् ।। १६ ।।
तथास्य नेत्रं प्रणयेत् स्निग्धे स्निग्धमुखं गुदे। उच्छ्वास्य वस्तेर्वदनं बद्ध्वा हस्तमकम्पयन् ।। १७ ।।
पृष्ठवंशं प्रति ततो नातिद्रुतविलम्बितम्। नातिवेगं न वा मन्दं सकृदेव प्रपीडयेत् ।। १८ ।।
सावशेषं प्रकुर्वीत वायु: शेषे हि तिष्ठति। निरूहदानेऽपि विधिरयमेव समीरित: ।। १९ ।।

Method of administration

The patient having taken walk and after passing urine and stool should lie down by left side in comfortable bed not two high particularly on head-side. He should flex the right leg and extend the other one. Now the physician should take the enema pouch by left hand pressing with the right one. The lubricated nozzle should be introduced in lubricated anus and the mouth of the enema-pouch after pressing should be tied and without moving the hand should at once press the contents out, not too fast or too slow and with not too great or too little force, towards the vertebral column keeping some residue which contains air. The same method is applied in case of non-unctuous enema. [15-19]

स्नेहवस्तिदानानन्तरं कर्म

तत: प्रणिहिते स्नेह उत्तानो वाक्शतं भवेत्। प्रसारितै: सर्वगात्रैस्तथा वीर्य्यं प्रसर्पति ।। २० ।।
आकुञ्चयेच्छनैस्त्रिस्त्रि: सक्थिबाहू तत: परम्। ताडयेत्तलयोरेनं त्रींस्त्रीन् वाराञ्शनै: शनै: ।। २१ ।।
स्फिचोश्चैनं तत: श्रोणिं शय्यां त्रिरुत्क्षिपेत्तत:। एवं प्रणिहिते वस्तौ मन्दायासोऽथ मन्दवाक् ।।२२।।
आस्तीर्णे शयने काममासीदाचारिके रत: । योज्य: शीघ्रं निवृत्तेऽन्य: स्नेहोऽतिष्ठन्न कार्यकृत् ।। २३ ।।

After the unctuous enema is administered, the patient should lie down on back (in supine position) with all limbs extended for one hundred seconds. Thus the active fraction (of drug) circulates. Then he should slowly flex his legs and arms each thrice. Thereafter the soles and buttocks should be stroked gently and pelvis elevated each thrice.

Thus after the enema is administered, the patient should exert and speak less and should stay on the bed well-covered observing the prescribed code of conduct. If the enema comes out quickly, another one should be administered as sneha without staying (for the period) does not work. [20-23]

सम्यगनुवासित-लक्षणम्

सानिलं सपुरीषश्च स्नेह: प्रत्येति यस्य वै। विना पीडां त्रियामस्थ: स सम्यगनुवासित: ।। २४ ।।

Unctuous enema should be taken as administered properly if it comes out after nine hours along with flatus and faeces without any discomfort. [24]

स्नेहपाकार्थं कर्त्तव्यम्

क्वाथार्द्धमात्रया प्रातर्धान्यशुण्ठीजलं पिबेत्। पित्तोत्तरे कदुष्णाम्भस्तावन्मात्रं पिबेदनु ।।

तेनास्य दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते ।। २५ ।।

In morning, water processed with dhānyaka and śuṇṭhī should be taken in the dose half of decoction. In case of predominance of pitta, however, warm water should be taken in the same quantity. By this digestive fire is stimulated and appetite appears. [25]

अनि:सृतस्नेहे निर्देश:

अहोरात्रादपि स्नेहः प्रत्यागच्छन् न दुष्यति । कुर्याद्वस्तिगुणांश्चापि जीर्णस्त्वल्पगुणो भवेत् ।। २६ ।।
यस्य नोपद्रवं कुर्यात् स्नेहवस्तिरनि:सृतः । सर्वोऽल्पो वाऽऽवृतो रौक्ष्यादुपेक्ष्यः स विजानता ।। २७ ।।
अनायान्तमहोरात्रात् स्नेहं सोपद्रवं हरेत् । स्नेहबस्तावनायाते नान्यः स्नेहो विधीयते ।। २८ ।।
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः । तदाऽङ्गसदनाध्मानशूलाः श्वासश्च जायते ।। २९ ।।
पक्वाशयगुरुत्वञ्च, तत्र दद्यान्निरूहणम् । तीक्ष्णं तीक्ष्णौषधैरेव सिद्धञ्चाप्यनुवासनम् ।। ३० ।।

Coming out even after twenty four hours the unctuous enema does not harm in any way and exerts its effect. It looses its property if digested. [26]

If the unctuous enema not coming out wholly or partially being covered by roughness does not show any untoward effect it should be ignored. [27]

One should evacuate sneha not coming out even after twenty four hours and creating complications. If unctuous enema does not come out, no other is given again. [28]

If in patient not priorly prepared with emesis and purgation the unctuous enema mixing with faeces does not come out, it causes lassitude, flatulence, abdominal pain, dyspnoea and heaviness in intestines. In such cases strong non-unctuouse enema or unctuous enema prepared with irritant drugs should be administered. [29-30]

अशोधिते स्नेहवस्तिनिषेध:

स्नेहबस्तिर्विधेयस्तु नाविशुद्धस्य देहिनः । स्नेहवीर्य्यं तथा दत्ते स्नेहे नानुविसर्पति ।। ३१ ।।
अशुद्धमपि वातेन केवलेनाभिपीडितम् । अहोरात्रस्य कालेषु सर्वेष्वेवानुवासयेत् ।। ३२ ।।

Unctuous enema should never be administered to persons not evacuated (with emesis and purgation) as in that case after administration of enema, tha active fraction (of drug) does not circulate. [31]

(In emergent condition) if the patient is afflicated with vāyu alone (without covering) unctuouse enema should be administered to him at any time of day and night even if he is not priorly evacuated. [32]

पुनरनुवासनप्रयोगकाल:

अन्वासयेत् तृतीयेऽह्नि पञ्चमे वा पुनश्च तम् । यथा वा स्नेहपक्तिः स्यादतोऽप्युल्वणमारुतान् ।।
व्यायामनित्यान् दीप्ताग्नीन् रूक्षांश्च प्रतिवासरम् ।। ३३ ।।
इति स्नेहैस्त्रिचतुरैः स्निग्धे स्रोतोविशुद्धये । निरूहं शोधनं युञ्ज्यादस्निग्धे स्नेहनन्तनोः ।। ३४ ।।

Unctuous enema should be repeated on third or fifth day or as digestive fire is able to assimilate the sneha. It may be administered daily to patient having aggravated vāta, roughness, strong digestive fire and doing physical exercise regularly. [33]

Thus after proper unction on aministration of unctuous enema thrice or four times non-unctuous enema should be administered in order to evacuate properly. In case there is no proper unction, unctuous enema should be given. [34]

अयोगातियोगलक्षणम्

विष्टब्धानिलविण्मूत्रः स्नेहो हीनेऽनुवासने। दाहज्वरपिपासाऽर्त्तिकरश्चात्यनुवासने ॥ ३५ ॥
स्नेहबस्तिं निरूहं वा नैकमेवातिशीलयेत्। उत्क्लेशाग्निवधौ स्नेहान्निरूहात् पवनाद्भयम् ॥ ३६ ॥

In deficient unctuous enema there is obstruction in wind, stool and urine while in its excessive use it causes burning sensation, fever, thirst and pain. [35]

Either unctuouse or non-unctuous enema alone should not be used excessively as the former causes nausea and loss of digestive fire and the latter produces condition for disorders of vāta. [36]

अनुवासनानर्हाः

अनास्थाप्या येऽभिधेया नानुवास्याश्च ते मताः। विशेषतस्त्वमी पाण्डुकामलामेहपीनसाः ॥ ३७ ॥
निरन्नप्लीहविड्भेदिगुरुकोष्ठकफोदराः। अभिष्यन्दभृशस्थूलक्रिमिकोष्ठाढ्यमारुताः ॥
पीते विषे गरेऽपच्यां श्लीपदी गलगण्डवान् ॥ ३८ ॥

Unctuous enema is contra-indicated in cases in which non-unctuous enema is contra-indicated particularly in the following cases– anaemia, jaundice, prameha, pīnasa, empty stomach, diarrhoea, heavy bowels, kaphaja udararoga, excessive secretion in channels, extreme obesity, intestinal worms, ūrustambha, poisoning, scrofula, filaria and goitre. [37-38]

अनास्थाप्याः

अनास्थाप्यास्त्वतिस्निग्धः क्षतोरस्को भृशं कृशः। आमातिसारी वमिमान् संशुद्धो दत्तनावनः ॥ ३९ ॥
श्वासकासप्रसेकार्शोहिक्काऽऽध्मानाल्पवर्चसः। शूनपायुः कृताहारो बद्धच्छिद्रदकोदरी ॥
कुष्ठी च मधुमेही च मासान् सप्त च गर्भिणी ॥ ४० ॥

Non-unctuous enema is contra-indicated in following conditions :– excessive unction, chest-wound, extreme emaciaation, diarrhoea associated with āma, vomiting, after evacuation and snuffing, dyspnoea, cough, prameha, piles, hiccough, flatulence, constipation, swelling in rectum, after meals, intestinal obstruction, perforated intestines, ascites, kuṣṭha, madhumeha and upto seven months of pregnancy. [39-40]

अवस्थाभेदेन विरुद्धक्रियाया विधेयत्वम्

न चैकान्तेन निर्दिष्टेऽप्यत्राभिनिविशेद् बुधः। भवेत् कदाचित् कार्य्याऽपि विरुद्धाऽभिमता क्रिया ॥ ४१ ॥

छर्दिहृद्रोगगुल्मार्त्ते वमनं स्वे चिकित्सिते। अवस्थां प्राप्य निर्दिष्टं कुष्ठिनां वस्तिकर्म च ॥ ४२ ॥

One should not insist fastly on the prescribed procedure as sometimes contrary measures have to be applied according to circumstances. For instance, emesis is prescribed in cases of vomiting, heart disease and gulma according to condition and so enema in kuṣṭha. [41-42]

॥ इत्यनुवासनाधिकारः ॥ ७२ ॥

Thus ends chapter on Anuvāsana. [72]

७३. त्रिसप्ततितमोऽध्यायः

CHAPTER LXXIII

निरूहाधिकारः

On Nirūha (non-unctuous enema)

निरूहस्य प्रयोगनियमः

**अनुवास्य स्निग्धतनुं तृतीयेऽह्नि निरूहयेत्। मध्याह्ने किञ्चिदावृत्ते प्रयुक्ते बलिमङ्गले।।
अभ्यक्तस्वेदितोत्सृष्टमलं नातिबुभुक्षितम्।। १ ।।**

After administering unctuous enema, one should give non-unctuous enema on the third day after anointment and sudation and after the patient has passed urine and stool and is not too hungry nearabout noon after offering oblation and performing auspicious rites. [1]

निरूहद्रव्याणां मात्रा

**मधुस्नेहनकल्काख्यकषायावापतः क्रमात्। त्रीणि षड् द्वे दश त्रीणि पलान्यनिलरोगिषु।। २ ।।
पित्ते चत्वारि चत्वारि द्वे द्विपञ्च चतुष्टयम्। षट् त्रीणि द्वे दश त्रीणि कफे चापि निरूहणम्।। ३ ।।**

The contents of the unctuous enema should be honey, fatty substance, paste, decoction and additive materials. They should be in quantity of three, six, two, ten and three palas respectively in vātika disorders; four, four, two, ten and four in paittika disorders and six, three, two, ten and three in disorders caused by kapha. [2-3]

निरूहनिर्माणविधिः

**दत्त्वाऽऽदौ सैन्धवस्याक्षं मधुनः प्रसृतद्वयम्। विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतद्वयम्।। ४ ।।
एकीभूते ततः स्नेहे कल्कस्य प्रसृतं क्षिपेत्। सम्मूर्च्छितं कषायं तं पञ्चप्रसृतसम्मितम्।। ५ ।।
वितरेत्तु यथाऽऽवापमन्ते द्विप्रसृतोन्मितम्। एवं प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत्।। ६ ।।**

At first, saindhava 10 gm and honey two prasṛtas (four palas) are rubbed together added with fatty material two prasṛtas. When the mixture becomes homogenous paste one prasṛta, decoction five prasṛta and, in the end, additive material two prasṛta should be added. Thus prepared the enema contains material weighing twelve prasṛta (total). [4-6]

सुयोजितनिरूहस्य लक्षणम्

न धावत्यौषधं पाणिं न तिष्ठत्यवलिप्य च। न करोति च सीमान्तं स निरूहः सुयोजितः ।। ७ ।।

The character of the well-prepared non-unctuous enema is that (due to excessive dilution) it does not wash the hand (dipped therein) nor does it stick to it (due to thickness) it also does not create any blot. [7]

प्रयोगविधि:

पूर्वोक्तेन विधानेन गुदे वस्तिं निधापयेत्। त्रिंशन्मात्रास्थितो वस्तिस्ततस्तूत्कटुको भवेत्॥ ८॥
जानुमण्डलमावेष्ट्य दत्तं दक्षिणपाणिना। कृष्टनेत्रश्छटाशब्दशतं तिष्ठेदवेगवान्॥ ९॥
द्वितीयं वा तृतीयं वा चतुर्थं वा यथार्थतः। सम्यङ्निरूहलिङ्गे तु प्राप्ते बस्तिं निवारयेत्॥ १०॥

The enema should be administered by the aforesaid method (as in case of unctuous enema). After thirty seconds, the patient should sit in squatting position. In case he does not feel any urge (due to hard bowels) he should sit catching the knees around for one hundred seconds pulling out the nozzle with the right hand. Second, third and fourth enema should also be given as required. It should be stopped when symptoms of proper enemation are observed. [8-10]

सम्यङ्निरूढलक्षणम्

प्रसृष्टविण्मूत्रसमीरणत्वं रुच्यग्निवृद्ध्याशयलाघवानि।
रोगोपशान्तिः प्रकृतिस्थता च बलञ्च तत् स्यात् सुनिरूढलिङ्गम्॥ ११॥

Proper elimination of faeces, urine and flatus; increase of relish and appetite, lightness in viscera, pacification of the disorders, recovery of normalcy and strength– these are the symptoms of well administered non-unctuous enema. [11]

निरूहातियोगायोगलक्षणम्

अयोगश्चातियोगश्च निरूहस्य विरिक्तवत्॥ १२॥

The symptoms of deficient and excessive administration of non-unctuous enema are the same as in case of purgation. [12]

प्रयोगसंख्यानियमः

स्निग्धोष्ण एकः पवने समांसो द्वौ स्वादुशीतौ पयसा च पित्ते।
त्रयः समूत्राः कटुकोष्णतीक्ष्णाः कफे निरूहा न परं विधेयाः॥ १३॥
एकोऽपकर्षत्यनिलं स्वमार्गात् पित्तं द्वितीयस्तु कफं तृतीयः॥ १४॥

In vātika disorders, the enema should be given once-unctuous, hot and with meat-soup; in pitta it should be given twice– sweet, cold and with milk while in case of kapha it should be given thrice with urine, pungent, hot and irritant drugs. Non-unctuous enema should not be given beyond that. [13]

First, second and third enema eliminates vāta, pitta and kapha respectively from the passage. [14]

अनिःसृतनिरूहे कर्त्तव्यविधिः

अनायान्तं मुहूर्त्तान्तं निरूहं शोधनैर्हरेत्। निरूहैरेव मतिमान् क्षारमूत्राम्लसंयुतैः॥ १५॥
विगुणानिलविष्टब्धं चिरं तिष्ठन्निरूहणम्। शूलारतिज्वराटोपान् मरणं वा प्रयच्छति॥ १६॥

If the non-unctuous enema does not come out within a muhūrta (48 minutes), it should be eliminated by non-unctuous enema itself prepared of evacuatives and added with alkali, urine and sours. [15]

Non-unctuous enema, if retained for long, causes aggravation of vāta, flatulence, colic, distress, fever, gurgling or even death. [16]

भोजनोत्तरं बस्तिनिषेधः

न तु भुक्तवते देयमास्थापनमिति स्थितिः। आमं तद्धि हरेद् भुक्तं छर्दिं दोषांश्च कोपयेत्॥ १७॥
आवस्थिकः क्रमश्चापि मत्वा कार्यो निरूहणे॥ १८॥

Non-unctuous enema should not be given to one having taken food as it carries down the undigested food, induces vomiting and aggravates doṣas. [17]

Necessary steps should be taken, according to condition, in management of the case. [18]

अतिप्रपीडितबस्तिदाने दोषास्तदुपचारश्च

अतिप्रपीडितो वस्तिरतिक्रम्याशयं ततः। वातेरितो नासिकाभ्यां मुखतो वा प्रपद्यते॥
छर्दिहृल्लासमूर्च्छादीन् प्रकुर्याद्दाहमेव च॥ १९॥
तत्र तूर्णं गलापीडं कुर्य्याच्चाप्यवधूननम्। शिरःकायविरेकौ च तीक्ष्णौ सेकांश्च शीतलान्॥ २०॥

By excessive pressing, the enema goes beyond the desired site and with impulse of vāta, sometimes reaches even nose or mouth producing vomiting, nausea, fainting etc. and also burning sensation. [19]

In that case, one should immediately press the neck tightly and shake him by pulling the hairs. Besides, strong (irritant) snuff and purgative and cold baths should be applied. [20]

सुनिरूढक्रमनिर्देशः

सुनिरूढमथोष्णाम्बुस्नातं भुक्तरसौदनम्। यथोक्तेन विधानेन योजयेत् स्नेहवस्तिना॥ २१॥
तदहस्तस्य पवनाद्भयं बलवदिष्यते। रसौदनस्तेन शस्तस्तदहश्चानुवासनम्॥ २२॥

After the non-unctuous enema is administered properly, the patient should take hot bath and eat rice with meat-soup. Thereafter unctuous enema should be administered according to prescribed method. [21]

There is great risk from vāta on that day and as such cooked rice with meat-soup is given followed by unctuous enema. [22]

अर्धमात्रिकवस्तिः

दशमूलीकषायेण शताह्वाक्षं प्रयोजयेत्। सैन्धवाक्षञ्च मधुनो द्विपलं द्विपलन्तथा॥ २३॥
तैलस्य फलमेकन्तु फलस्यैकत्र योजयेत्। अर्द्धमात्रिकसंज्ञोऽयं वस्तिर्देयो निरूहवत्॥ २४॥

न च स्नेहो न च स्वेदः परिहारविधिर्न च। आत्रेयानुमतो ह्येष सर्वरोगनिवारणः ॥ २५ ॥
यक्ष्मघ्नश्च शूलघ्नश्च क्रिमिघ्नश्च विशेषतः। शुक्रसञ्जननो ह्येष वातशोणितनाशनः ॥
बलवर्णकरो वृष्यो वस्तिः पुंसवनः परः ॥ २६ ॥

Ardhamātrika basti

Decoction of daśamūla, śatāhvā 10 gm, saindhava 10 gm, honey 2 pala, oil 2 pala and madanaphala one fruit– this enema known as 'ardhamātrika' should be administered like non-unctuous enema. There is not required either unction or sudation nor is there any restriction of diet etc. This is approved by Ātreya and alleviates all diseases. It promotes strength, lustre and semen; provides male progeny and alleviates consumption, colic, worms and vātarakta. [23-26]

निरूहेऽवश्यप्रक्षेप्याणि

स्नेहं गुडं मांसरसं पयश्चाप्यम्लानि मूत्रं मधुसैन्धवे च।
एतान्यनुक्तानि च दापयेच्च निरूहयोगे मदनात् फलञ्च ॥ २७ ॥

Fatty material, jaggery, meat-soup, milk, sours, urine, honey, rocksalt and madanaphala– these items, even if unmentioned, should be included in the formulation of nirūha. [27]

निरूहे प्रक्षेपस्य विशेषनियमः

लवणं कार्षिकं दद्यात् फलमेकन्तु मादनम्। वाते गुडः सिता पित्ते कफे सिद्धार्थकादयः ॥ २८ ॥

Salt should be given 10 gm and madanaphala one fruit. In vāta, pitta and kapha jaggery, sugar and mustard etc. are added respectively. [28]

क्षारवस्तिः

सैन्धवाक्षं समादाय शताह्वाक्षं तथैव च। गोमूत्रस्य पलान्यष्टावम्लिकायाः पलद्वयम् ॥ २९ ॥
गुडस्य द्वे पले चैव सममालोड्य यत्नतः। वस्त्रपूतं सुखोष्णञ्च वस्तिं दद्याद्विचक्षणः ॥ ३० ॥
शूलं विट्सङ्गमानाहं मूत्रकृच्छ्रञ्च दारुणम्। क्रिम्युदावर्तगुल्मादीन् सद्यो हन्यान्निषेवितः ॥ ३१ ॥

Kṣāravasti

Rock-salt and śatāhvā each 10 gm, cow's urine 8 pala, amlikā 2 pala and jaggery 2 pala– all mixed together are strained though a piece of cloth and administered warm as enema. By regular use it alleviates colic, constipation, hardness in bowels, severe dysuria, worms, udāvartta, gulma etc. in short time. [29-31]

वैतरणवस्तिः

पलशुक्तिकर्षकुडवैरम्लीगुडसिन्धुजन्मगोमूत्रैः। तैलयुतोऽयं वस्तिः शूलानाहामवातहरः ॥
वैतरणः क्षारवस्तिर्भुक्ते चापि प्रदीयते ॥ ३२ ॥

Vaitaraṇa vasti

Amlikā, jaggery, saindhava and cow's urine 40, 20, 10 gm and 160 ml respectively mixed with a little oil– this enema removes colic, hardness of bowels and āmavāta.

Vaitaraṇa and kṣāravasti may be administered even after meal. [32]

पिच्छिलवस्तिः

बदर्य्यैरावतीशेलुशाल्मलीधन्वनाङ्कुराः। क्षीरसिद्धाः सुसिद्धाः स्युः सास्राः पिच्छिलसंज्ञिताः ॥ ३३ ॥
वाराहमाहिषौरभ्रबिडालैणेयकौक्कुटम्। सद्यस्कमसृगाजं वा देयं पिच्छिलवस्तिषु ॥ ३४ ॥

Picchilavasti

Leaf buds of badarī, airāvatī (nāgabalā), śleṣmātaka, śālmali and dhanvana prepared with milk and added with blood– these make the enema known as 'picchila' (slimy). As regards blood, it should be of boar, buffalo, sheep, cat, deer, cock or goat. [33-34]

चरकोक्तवस्त्यनुक्तौ हेतुः

चरकादौ समुद्दिष्टा वस्तयो ये सहस्रशः। व्यवहारो न तैः प्रायो निबद्धा नात्र तेन ते॥ ३५ ॥

A number od enemas which are described in (the work of) Caraka etc. but are not in use now-a-days have not been mentioned here. [35]

वस्तिगुणाः

वस्तिर्वयःस्थापयिता सुखायुर्बलाग्निमेधास्वरवर्णकृच्च।
सर्वार्थकारी शिशुवृद्धयूनां निरत्ययः सर्वगदापहश्च॥ ३६ ॥

Enema sustains age, provides happy life, strength, digestive fire, intellect, voice and lustre, serves all purposes in children, old people and youth alike, is free from adverse side effects and alleviates all diseases. [36]

॥ इति निरूहाधिकारः ॥ ७३ ॥

Thus ends chapter on Nirūha. [73]

७४. चतुःसप्ततितमोऽध्यायः

CHAPTER LXXIV

नस्याधिकारः

On Nasya (Nasal evacuation or snuffing)

नस्यभेदा:

प्रतिमर्शोऽवपीडश्च नस्यं प्रधमनन्तथा। शिरोविरेचनश्चेति नस्त:कर्म च पञ्चधा॥ १॥

Nasya (nasal evacuation) is of five types– pratimarśa (smearing), avapīḍa (pressed juice), nasya (snuffing), pradhamana (blowing) and śirovirecana (head-evacuation). [1]

प्रतिमर्शलक्षणम्

ईषदुच्छिङ्घनात् स्नेहो यावान् वक्त्रं प्रपद्यते। नस्तो निषिक्तस्तं विद्यात् प्रतिमर्शं प्रमाणत: ॥ २ ॥
प्रतिमर्शस्तु नस्यार्थं करोति न च दोषवान्॥ ३॥
नस्त: स्नेहाङ्गुलिं दद्यात् प्रातर्निशि च सर्वदा। न चोच्छिङ्घेदरोगाणां प्रतिमर्श: स दाढर्यकृत्॥ ४॥

The quantity of smearing should be taken as proper in which the uncting material instilled in nostrils and slightly sucked upwards reaches mouth. [2]

Smearing serves the purpose of nasal evacuation and, at the same time, has no defect. [3]

Finger dipped in oil should be introduced in morning and night always and it should not be sucked. This smearing, in the healthy, produces firmness. [4]

प्रयोगकाल: मात्रा च

निशाऽहर्भुक्तवान्ताह:स्वप्नाध्वश्रमरेतसाम्। शिरोऽभ्यञ्जनगण्डूषप्रस्रावाञ्जनवर्च्चसाम्॥
दन्तकाष्ठस्य हास्यस्य योज्योऽन्तेऽसौ द्विबिन्दुक: ॥ ५ ॥

This smearing of two drops should be used at the end of night, day, meal, vomiting, day-sleep, way-faring, physical exercise, sexual intercourse, head-oiling, gargle, urination, collyrium, defaecation, tooth-cleaning and laughing. [5]

अवपीडस्य लक्षणं भेदाश्च

शोधन: स्तम्भनश्च स्यादवपीडो द्विधा मत:। अवपीडच्च दीयते यस्मादवपीडस्ततस्तु स: ॥ ६ ॥

Avapīḍa is of two type– evacuative and checking. It is known as avapīḍa because it is applied by pressing. [6]

(स्नैहिक)नस्यस्वरूपम्

स्नेहार्थं शून्यशिरसां ग्रीवास्कन्धोरसां तथा। बलार्थं दीयते स्नेहो नस्त:शब्दोऽत्र वर्त्तते ॥ ७ ॥

Sneha (uncting snuff) is applied to provide unction to vacant head and strength to neck, shoulder and chest. It is commonly known as 'nasya'. [7]

मात्राविचार:

नस्यस्य स्नैहिकस्याथ देयास्त्वष्टौ तु बिन्दव:। प्रत्येकशो नस्तकयोर्नृणामिति विनिश्चय: ॥
शुक्तिश्च पाणिशुक्तिश्च मात्रास्तिस्र: प्रकीर्त्तिता: ॥ ८ ॥
द्वात्रिंशद्बिन्दवश्चात्र शुक्तिरित्यभिधीयते। द्वे शुक्ती पाणिशुक्तिश्च देयाऽत्र कुशलैर्नरै: ॥ ९ ॥
तैलं कफे च वाते च केवले पवने वसाम्। दद्यान्नस्त: सदा पित्ते सर्पिर्मज्जा समारुते ॥ १० ॥

In uncting snuff, eight drops of sneha are given in each nostril. Taking śukti and pāṇiśukti as well the dose becomes of three degrees.

Śukti consists of thirty two drops while pāṇiśukti is the double the same. [8-9]

Oil is applicable as snuff in vāta and kapha, fat in vāta without covering, ghee in pitta and marrow in vāta-pitta. [10]

प्रधमनलक्षणं प्रयोगश्च

ध्मापनं रेचनश्चूर्णो युञ्ज्यात्तं मुखवायुना। षडङ्गुलद्विमुखया नाड्या भेषजगर्भया ॥
स हि भूरितरं दोषं चूर्णत्वादपकर्षति ॥ ११ ॥

Blowing snuff consists of evacuative powder which is blown into the nostrils by mouth-wind through a pipe six fingers long and with two openings. Because of being in the form of powder it eliminates large quantity of impurity. [11]

शिरोविरेचनं तद्गुणश्च

शिरोविरेचनद्रव्यै: स्नेहैर्वा तै: प्रसाधितै:। शिरोविरेचनं दद्याद् रोगेषु तेषु बुद्धिमान् ॥ १२ ॥
गौरवे शिरस: शूले जाड्ये स्यन्दे गलामये। शोथगण्डक्रिमिग्रन्थिकुष्ठापस्मारपीनसे ॥ १३ ॥

Head-evacuation is administered with śirovirecana (head-evacuative) drugs or fatty substances processed with them in appropriate disorders such as heaviness and pain in head, stiffness in neck etc., conjunctivitis, throat diseases, oedema, glands, worms, cyst, kuṣṭha, epilepsy and pīnasa. [12-13]

शिरोविरेचनस्य प्रयोगविधि:

स्निग्धस्विन्नोत्तमाङ्गस्य प्राक्कृतावश्यकस्य च। निवातशयनस्थस्य जत्रूर्ध्वं स्वेदयेत् पुन: ॥ १४ ॥
अथोत्तानोर्ध्वदेहस्य पाणिपादे प्रसारिते। किञ्चिदुन्नतपादस्य किञ्चिन्मूर्धनि नामिते ॥ १५ ॥
नासापुटं पिधायैकं पर्यायेण निषेचयेत्। उष्णाम्बुतप्तं भैषज्यं प्रणाड्या पिचुना तथा ॥ १६ ॥
दत्ते पादतलस्कन्धहस्तकर्णादि मर्दयेत्। शनैरुच्छिङ्घ्य निष्ठीवेत् पार्श्वयोरुभयोस्तत: ॥
आभेषजक्षयादेवं द्विस्त्रिर्वा नस्यमाचरेत् ॥ १७ ॥

The patient should, at first, finish his daily routine works (defaecation, brushing etc.) and get his head uncted and fomented. After he lies down in windless place, his supraclavicular region be fomented again. His upper part of the body should be in supine position with limbs extended, somewhat raised at the feet and lowered at the head side. Now the drug heated in hot water should be instilled in one nostril, the other being closed, through pipe or swab. Then it should be given in the other nostril in the same way. Thereafter sole of the feet, shoulder, head, ears etc., should be massaged. By sucking in slowly it should be expelled through both sides till the entire drug is excreted. In this way, snuffing is done twice or thrice. [14-17]

शिरोविरेचनस्य पश्चात्कर्म

स्नेहं विरेचनस्यान्ते दद्याद्दोषाद्यपेक्षया॥ १८॥

त्र्यहात् त्र्यहाच्च सप्ताहं स्नेहकर्म समाचरेत्। एकाहान्तरितं कुर्य्याद्रेचनं शिरसस्तथा॥ १९॥

After head-evacuation uncting snuff should be applied according to doṣa etc. [18]

Uncting snuff should be administered every three days in a week (with interval of one day in-between) while in head-evacuation there should be interval of one day. [19]

सम्यगसम्यक्स्निग्धयोर्लक्षणम्

सम्यक्स्निग्धे सुखोच्छ्वासस्वप्नबोधाक्षिपाटवम्॥ २०॥

रूक्षेऽक्षिस्तब्धता शोषो नासाऽऽस्ये मूर्द्धशून्यता। स्निग्धेऽतिकण्डूर्गुरुता प्रसेकारुचिपीनसाः॥ २१॥

Easy respiration, sleep and awakening and proper functioning of eyes– these are symptoms of proper unction. [20]

In roughness (deficient unction) there are stiffness in eyes, dryness in nose and mouth and vacantness in head. In excessive unction are itching, heaviness, salivation, anorexia and pīnasa. [21]

सुविरिक्तदुर्विरिक्तयोर्लक्षणम्

सुविरिक्तेऽक्षिलघुतावक्त्रस्वरविशुद्धयः। दुर्विरिक्ते गदोद्रेकः क्षामताऽतिविरेचिते॥ २२॥

In proper evacuation, there are lightness in eyes and clarity of mouth and voice. In deficient evacuation, disease is aggravated and in excessive evacuation emaciation appears. [22]

नस्यप्रयोगानर्हाः

तोयमद्यगरस्नेहपीतानां पातुमिच्छताम्। भुक्तभक्तशिरःस्नातस्नातुकामस्रुतासृजाम्॥ २३॥
नवपीनसरोगार्त्तसूतिकाश्वासकासिनाम्। शुद्धानां दत्तवस्तीनां तथाऽनार्त्तवदुर्दिने॥
अन्यत्रात्ययिके व्याधौ नैषां नस्यं प्रयोजयेत्॥ २४॥

Snuffing is contra-indicated in the following conditions– after or before intake of water, wine, poison and fatty substance; after taking meal, after taking bath from head, while

going to bath, after blood-letting, acute coryza, puerperium, dyspnoea, cough, afterevacuation and administration of enema, in cloudy weather in other than rainy season except case of emergency. [23-24]

नस्यादिप्रयोगानर्हं वयः

न नस्यमूनसप्ताब्दे नातीताशीतिवत्सरे। न चोनद्वादशे धूमः कवलो नोनपञ्चमे॥ २५॥
न शुद्धिरूनदशमे न चातिक्रान्तसप्ततौ। आजन्ममरणं शस्तः प्रतिमर्शस्तु बस्तिवत्॥ २६॥

Snuffing should not be used in patient below seven years and above eighty years of age. Smoking should not be used below twelve years of age and gargle below five years. Evacuation (emesis and purgation) should not be given below ten years and above seventy years of age. Smearing snuff, however, is useful, like enema, from birth to death. [25-26]

॥ इति नस्याधिकारः ॥ ७४ ॥

Thus ends chapter on Nasya. [74]

७५. पञ्चसप्ततितमोऽध्यायः

CHAPTER LXXV

धूमपानाधिकारः

On Dhūmapāna (Smoking)

धूमस्य भेदाः

प्रायोगिकः स्नैहिकश्च धूमो वैरेचनस्तथा। कासहरो वामनश्च धूमः पञ्चविधो मतः ॥ १ ॥

Smoking is of five types– prāyogika (routine), snaihika (unctuous), vairecana (evacuative), kāsahara (anti-cough) and vāmana (emetic). [1]

धूमनेत्रम्

ऋजु त्रिकोषाफलितं कोलास्थ्यग्रप्रमाणितम्। बस्तिनेत्रसमद्रव्यं धूमनेत्रं प्रशस्यते ॥ २ ॥
सार्द्धस्त्र्यंशयुतः पूर्णो हस्तः प्रायोगिकादिषु। नेत्रे कासहरे त्र्यंशहीनः शेषे दशाङ्गुलः ॥ ३ ॥

Smoking pipe should be straight, with three pouches, having nozzle of the measures of jujube stone and made of material similar to that for enema pipe. [2]

The measurement of the smoking pipe should be $1^1/_2$, $1^1/_3$ and 1 cubit in prāyogika, snaihika and vairecana types; in case of kāsahara it should sixteen fingers and in that of vāmana ten fingers. [3]

धूमवर्त्तिः धूमपानविधिश्च

औषधैर्वर्त्तिकां कृत्वा शरगर्भां विशोषिताम्। विगर्भामग्निसम्प्लुष्टां कृत्वा धूमं पिबेन्नरः ॥
वक्त्रेणैव वमेद्धूमं नस्तो वक्त्रेण वा पिबन् ॥ ४ ॥
उरःकण्ठगते दोषे वक्त्रेण धूममापिबेत् ॥ नासया तु पिबेद्दोषे शिरोघ्राणाक्षिसंश्रये ॥ ५ ॥

The drugs (for smoking) are pounded and made into small sticks. It is pasted around the śara-stalk and dried (in the sun). Then the śara-stalk is removed and by igniting it smoke is taken in. The smoke should be expelled only through mouth after taking from either mouth or nose. [4]

If the disorder is located in chest and throat smoke should be taken through mouth while in case of the same being located in head, nose and eyes one should take it through nostrils. [5]

धूमवर्त्ति-द्रव्याणि

गन्धैरकुष्ठतगरैर्वत्तिः प्रायोगिके मता। स्नैहिके तु मधूच्छिष्टस्नेहगुग्गुलुसर्जकैः ॥ ६ ॥
शिरोविरेचनद्रव्यैर्वर्त्तिर्वैरेचने मता। कासघ्नैरेव कासघ्नी वामनैर्वामनी मता ॥ ७ ॥

In prāyogikaa type, smoking stick prepared with aromatic drugs, except kuṣṭha and tagara, is useful.

In snaihika one it is prepared with bee-wax, fatty substance, guggulu and sarjarasa. In vairecana, kāsahra and vāmana types the stick is made of head-evacuative, anti-cough and emetic drugs respectively. [6-7]

धूमपानानर्हाः

योज्या न पित्तरक्तार्त्तिविरिक्तोदरमेहिषु। तिमिरोर्ध्वानिलाध्मानरोहिणीदत्तबस्तिषु ॥ ८ ॥
मत्स्यमद्यदधिक्षीरक्षौद्रस्नेहविषाशिषु। शिरस्यभिहते पाण्डुरोगे जागरिते निशि ॥ ९ ॥

Smoking is contra-indicated in the following conditions– innate haemorrhage, after purgation, udararoga, prameha, defects of vision, ūrdhvavāta, flatulence, rohiṇī, after enema, after ingestion of fish, alcoholic drink, curd, milk, honey, fatty substances and poison; head-injury, anaemia and after awaking in night. [8-9]

अकालातिपीतधूमस्य दोषाः तदुपक्रमश्च

रक्तपित्तान्ध्यबाधिर्य्यतृण्मूर्च्छामदमोहकृत्। धूमोऽकालेऽतिपीतो वा तत्र शीतो विधिर्हितः ॥ १० ॥
एतद् धूमविधानन्तु लेशतः सम्प्रकाशितम् ॥ ११ ॥

Smoking used untimely or excessively causes innate haemorrhage, blindness, deafness, thirst, fainting, narcosis and mental confusion. In such conditions, cold measures are wholesome. [10]

Thus the method of smoking is described in brief. [11]

॥ इति धूमपानाधिकारः ॥ ७५ ॥

Thus ends the chapter on Dhūmapāna. [75]

७६. षट्सप्ततितमोऽध्याय:

CHAPTER LXXVI

कवलगण्डूषाधिकार:

On Kavala and Gaṇḍūṣa (Gargles)

चतुर्विधकवला:

स्निग्धोष्णै: स्नैहिको वाते स्वादुशीतै: प्रसादन:। पित्ते कट्वम्ललवणै रूक्षै: संशोधन: कफे।।
कषायस्वादुतिक्तैश्च कवलो रोपणो व्रणे।। १।।

[Kavala is of four types– snaihika (unctuous), prasādana (pacifying), saṃśodhana (purifying) and ropaṇa (healing)] unctuous gargle is used with unctuous and hot drugs in (aggravation of) vāta, pacifying gargle with sweet and cold substances in paittika disorders, purifying one with pungent, sour, salty and rough materials in disorders of kapha and healing gargle is used with astringent, sweet and bitter drugs in wound. [1]

कवलगण्डूषयोर्भेद:

सुखं सञ्चार्य्यते या तु सा मात्रा कवले हिता। असञ्चार्य्या तु या मात्रा गण्डूषे सा प्रकीर्त्तिता।। २।।

The dose of gargle which is moved easily in mouth is known as kavaḷa while the one which can't be moved is called gaṇḍūṣa. [2]

धारणकाल:

तावच्च धारणीयोऽयं यावद्दोषप्रवर्त्तनम्। पुनश्चान्योऽपि दातव्यस्तथा क्षौद्रघृतादिभि:।। ३।।

This should be retained in mouth until impurity is exuded out. Thereafter another gargle should be given with honey, ghee etc. [3]

सम्यग्योगलक्षणम्

व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम्। इन्द्रियाणां प्रसादश्च कवले शुद्धिलक्षणम्।। ४।।

The symptoms of purification are as follows– decrease of disorders, contentment, non-sliminess and lightness in mouth and clarity of senses. [4]

मधुगण्डूषादिगुण:

दाहतृष्णाव्रणान् हन्ति मधुगण्डूषधारणम्।। ५।।
धान्याम्लमास्यवैरस्यमलदौर्गन्ध्यनाशनम्। तदीषल्लवणं पीतं मुखशोषहरं परम्।। ६।।
आशु क्षाराम्बुगण्डूषो भिनत्ति श्लेष्मणश्चयम्। सुस्थे हितं वातहरं तैलगण्डूषधारणम्।। ७।।

Gargle of honey removes burning sensation, thirst and wound. [5]

Sour gruel used as gargle alleviates abnormal taste, dirt and foul odour of mouth. Intake of the same mixed with a little salt removes dryness of mouth. [6]

Gargle with alkaline water disintergrates the accumulation of kapha. The same with oil is vāta-alleviating and wholesome for the healthy. [7]

॥ इति कवलगण्डूषाधिकारः ॥ ७६ ॥

Thus ends chapter on Kavala and Gaṇḍūṣa. [76]

७७. सप्तसप्ततितमोऽध्यायः

CHAPTER LXXVII

आश्च्योतनाञ्जनतर्पणपुटपाकाधिकारः

On Āścyotana (eye drops), Añjana (collyrium), Tarpaṇa (saturation) and Puṭapāka (juice extracted by closed heating)

आश्च्योतनगुणाः

सर्वेषामक्षिरोगाणामादावाश्च्योतनं हितम्। रुक्तोदकण्डूघर्षाश्रुदाहरागनिबर्हणम्॥ १॥
उष्णं वाते कफे चोष्णं तच्छीतं रक्तपित्तयोः॥ २॥

In all eye diseases, in the beginning, eye drop is useful as it removes pain, piercing pain, itching, rubbing, lachrymation, burning sensation and redness. [1]

It should be hot in cases of vāta and kapha and cold in rakta and pitta. [2]

प्रयोगविधिः

निवातस्थस्य वामेन पाणिनोन्मील्य लोचनम्। शुक्तौ प्रलम्बयाऽन्येन पिचुवर्त्त्या कनीनिके॥ ३॥
दश द्वादश वा बिन्दून् द्व्यङ्गुलादवसेचयेत्। ततः प्रमृज्य मृदुना चैलेन कफवातयोः॥
अन्येन कोष्णपानीयप्लुतेन स्वेदयेन्मृदु॥ ४॥

Of the patient sitting in windless place, one should open his eyes with left hand and with the other hand by wickshaped cotton– swab put in a snail-shell should instil, from distance of two fingers, ten or twelve drops in both eyes. Then after wiping it off with a piece of soft cloth, in case of kapha and vāta, it should be fomented again mildly with another cotton with warm water. [3-4]

अत्युष्णाद्याश्च्योतनस्य दोषाः

अत्युष्णतीक्ष्णं रुग्रागदृङ्नाशायाक्षिसेचनम्। अतिशीतन्तु कुरुते निस्तोदस्तम्भवेदनाः॥ ५॥
कषायवर्त्मतां घर्षं कृच्छ्रादुन्मेषणं बहु। विकारवृद्धिमत्यल्पं संरम्भमपरिस्रुतम्॥ ६॥

Eye drop, if too hot and irritant, causes pain, redness and even loss of sight. On the contrary, too cold eye– drop causes piercing pain, stiffness and distress. [5]

Excessive use of eye drop produces redness of lids, rubbing and difficulty in opening of eye. If too deficient, it aggravates the disorder and if not wiped off it creates congestion. [6]

अञ्जनप्रयोगः

अथाञ्जनं शुद्धतनोर्नेत्रमात्राश्रिते मले। पक्वलिङ्गेऽल्पशोथार्त्तिकण्डूपैच्छिल्यलक्षिते॥
मन्दघर्षाश्रुरागेऽक्षिणि प्रयोज्यं घनदूषिके॥ ७॥

Añjana (collyrium)

After purifying the body (with purgative and snuffing) when impurity is located in eye collyrium is applied in condition when disease is matured characterised by decrease in swelling, pain, itching, sliminess, rubbing, lachrymation and redness and thickness of eye-dirt. [7]

अञ्जनस्य भेदाः

लेखनं रोपणं दृष्टिप्रसादनमिति त्रिधा। अञ्जनं लेखनं तत्र कषायाम्लपटूषणैः।
रोपणं तिक्तकैर्द्रव्यैः स्वादुशीतैः प्रसादनम्॥ ८-९॥

Collyrium is of three types– scarifying, healing and vision-clearing. They are effected by astringent-sour-salt– pungent, bitter and sweet-cold drugs respectively. [8-9]

अञ्जनशलाकायाः प्रमाणम्

दशाङ्गुला तनुर्मध्ये शलाका मुकुलानना॥ १०॥

The collyrium rod should be ten fingers long, thin in the middle and with bud-shaped apex. [10]

अञ्जनभेदेन शलाकाभेदः

प्रशस्ता लेखने ताम्री रोपणे काललोहजा। अङ्गुली च सुवर्णोत्था रूप्यजा च प्रसादने॥ ११॥

For scarifying and healing collyrium rod made of copper and iron are used respectively. For vision-clearing, however, finger and rod made of gold and silver are used. [11]

अञ्जनस्य कल्पनात्रैविध्यम्

पिण्डो रसक्रिया चूर्णं त्रिधैवाञ्जनकल्पना। गुरौ मध्ये लघौ दोषे तां क्रमेण प्रयोजयेत्॥ १२॥

There are three pharmaceutical forms of collyrium– solid, semisolid, and powder which should be used in severe, medium and mild disorders respectively. [12]

अञ्जनान्तरं कर्त्तव्यम्

अथानुन्मीलयन् दृष्टी अन्तः सञ्चारयेच्छनैः। अञ्जिते वर्त्मनी किञ्चिच्चालयेच्चैवमञ्जनम्॥ १३॥
अपेतौषधसंरम्भं निर्वृतं नयनं यदा। व्याधिदोषर्त्तुयोग्याभिरद्भिः प्रक्षालयेत्तदा॥ १४॥
दक्षिणाङ्गुष्ठकेनाक्षि ततो वामं सवाससा। ऊर्ध्ववर्त्मनि संगृह्य शोध्यं वामेन चेतरत्॥ १५॥

After application of collyrium to the lids the eyes should not be opened but moved internally slowly so that the collyrium spreads all over. When the eyes are free from congestion of drugs and are clear they should be washed with water according to disease, doṣa and season. Then the left eye should be cleaned by a piece of cloth with right thumb catching the upper lid and the right eye with the left one. [13-15]

अञ्जनप्रयोगकाल:

निशि स्वप्नेन मध्याह्ने पानान्नोष्णगभस्तिभि:। अक्षिरोगाय दोषा: स्युर्वर्द्धितोत्पीडितद्रुता:।।
प्रात: सायञ्च तच्छान्त्यै व्यभ्रेऽर्केऽतोऽञ्जयेत् सदा।। १६।।

In night by sleep and in midday due to food and drinks and hot sun-rays doṣas are aggravated, pressed and circulated and as such cause eye-disease. Hence to pacify it, one should always use collyrium in morning and evening and when the sun is free from cloud. [16]

कण्ड्वादौ तीक्ष्णाञ्जनप्रयोग:

कण्डूजाड्येऽञ्जनं तीक्ष्णं धूमं वा योजयेत् पुन:। तीक्ष्णाञ्जनाभितप्ते तु तूर्णं प्रत्यञ्जनं हितम्।। १७।।

In case itching and stiffness persist, irritant collyrium or smoking should be used. If burning sensation arises due to irritant collyrium, the same with cold and unctuous drugs should be applied immediately to counteract it. [17]

अञ्जनानर्हा:

नाञ्जयेद्भीतवमितविरिक्ताशितवेगिते। क्रुद्धज्वरिततान्ताक्षशिरोरुक्शोषजागरे।। १८।।
अदृष्टेऽर्के शिर:स्नाते पीतयोर्धूममद्ययो:। अजीर्णेऽग्न्यर्कसन्तप्ते दिवास्वप्ने पिपासिते।। १९।।

Collyrium should not be used in following conditions– fear, after emesis, purgation and meals, while feeling natural urges, anger, fever, exhaustion of eye, headache, consumption, loss of sleep, when sun is not visible, after head-bath and intake of smoke and wine, indigestion, after exposure to fire and sun, day-sleep and thirst. [18-19]

तर्पणकालादिनिर्देश:

निर्वाते तर्पणं योज्यं शुद्धयोर्मूर्द्धकाययो:। काले साधारणे प्रात: सायं वोत्तानशायिन:।। २०।।

Tarpaṇa (saturation)

Tarpaṇa should be used in patient who is purified with head-evacuation and purgation and lying in supine position in windless place, during moderate season, in morning and evening. [20]

प्रयोगविधि:

यवमाषमयीं पालीं नेत्रकोषाद्बहि: समाम्। द्व्यङ्गुलोच्चां दृढां कृत्वा यथास्वं सिद्धमावपेत्।। २१।।
सर्पिर्निमीलिते नेत्रे तप्ताम्बुप्रविलायितम्। नक्तान्ध्यवाततिमिरकृच्छ्रबोधादिके वसाम्।। २२।।
आपक्ष्माग्रादथोन्मेषं शनकैस्तस्य कुर्वत:। मात्रां विगणयेत्तत्र वर्त्मसन्धिसितासिते।। २३।।
दृष्टौ च क्रमशो व्याधौ शतं त्रीणि च पञ्च च। शतानि सप्त चाष्टौ च दश मन्थेऽनिले दश।।
पित्ते षट् सुस्थवृत्ते च बलासे पञ्च धारयेत्।। २४।।
कृत्वाऽपाङ्गे ततो द्वारं स्नेहं पात्रे तु गालयेत्। पिबेच्च धूमं नेक्षेत व्योम रूपञ्च भास्वरम्।। २५।।
इत्थं प्रतिदिनं वाते पित्ते त्वेकान्तरं कफे। सुस्थे च द्व्यन्तरं दद्यादातृप्तेरिति योजयेत्।। २६।।

An even boundary is made of barley and black gram (paste) firm and two fingers high outside and around the eye ball. Now ghee processed with respective drugs and liquified on hot water should be filled upto the tip of eye balls therein while eye is closed. However, in cases of night-blindness, defects of vision due to vāta and vartmakṛchhra (difficulty in opening eye) muscle-fat is used. After some time, eye should be opened slowly. [21-22]

The drug should be retained in eye for the time as follows– diseases of lid, junction, white portion, black portion and pupil 100, 300, 500, 700 and 800 seconds respectively, adhimantha 1000 seconds, vāta, pitta and kapha 1000, 600 and 500 seconds respectively and normal health 500 seconds. [23-24]

Then by making a hole in side the saturating material should be drained in a container. The patient thereafter should not smoke nor should he see the sky or brilliant sight. [25]

Thus this therapy should continue daily in vāta, at one day interval in pitta and two days interval in kapha and the healthy till saturation is effected. [26]

तृप्तातृप्तातितृप्तनेत्रलक्षणम्

प्रकाशक्षमता स्वास्थ्यं विशदं लघु लोचनम्। तृप्ते विपर्य्ययोऽतृप्ते तृप्तेऽति श्लेष्मजा रुजः॥ २७॥

Tolerance to light, normalcy, non-sliminess and lightness in eyes– these are the symptoms of proper saturation. In deficient one opposite symptoms are found while in excessive saturation disorders caused by kapha arise. [27]

पुटपाकः

पुटपाकं प्रयुञ्जीत पूर्वोक्तेष्वेव लक्ष्मसु॥ २८॥

Puṭapāka

Puṭapāka is also useful in above conditions. [28]

त्रैविध्यम्

सवाते स्नेहनः श्लेष्मसहिते लेखनो मतः। दृग्दौर्बल्येऽनिले पित्ते रक्ते स्वस्थे प्रसादनः॥ २९॥

Puṭapāka is of three types– uncting, scarifying, and clarifying. Uncting one is used in vāta and scarfying one in vāta associated with kapha. The clarifying type is used in weakness of sight, vāta, pitta, rakta and in the healthy. [29]

पुटपाकसाधनम्

बिल्वमात्रं पृथक् पिण्डं मांसभेषजकल्कयोः। उरुबूकवटाम्भोजपत्रैः स्निग्धादिषु क्रमात्॥ ३०॥
वेष्टयित्वा मृदा लिप्तं धवधन्वनगोमयैः। पचेत् प्रदीप्तैरग्न्याभं पक्वं निष्पीड्य तद्रसम्॥
नेत्रे तर्पणवद्युञ्ज्यात्, शतं द्वे त्रीणि धारयेत्॥ ३१॥
लेखनस्नेहनान्त्येषु, कोष्णौ पूर्वौ हिमोऽपरः। धूमपोऽन्ते तयोरेव योगास्तत्र च तृप्तिवत्॥ ३२-३३॥

Pounded flesh and drug each 40 gm are together made into a rounded mass and wrapped in leaves of eraṇḍa, vaṭa and lotus in uncting etc. types. It is then pasted with earth, dried and cooked on fire of dhava, dhanvana and cow-dung (again in uncting etc types respectively) till it is red-hot and well cooked. Then on pressing it juice is expressed which is used in eyes like tarpaṇa.

It should be retained for 100, 200 and 300 seconds in scarifying, uncting and clarifying types. Out of them, the first two should be warm while the last one cold. One should smoke only in the former two. The symptoms of proper administration etc are as in case of tarpaṇa. [30-33]

तर्पणपुटपाकनिषेध:

तर्पणं पुटपाकञ्च नस्यानर्हे न योजयेत्। यावन्त्यहानि युञ्जीत द्विगुणो हितभाग्भवेत्॥ ३४॥

Tarpaṇa and puṭapāka should not be used in a patient unfit for snuffing. One should observe wholesome diet and conduct for the period double that of its use. [34]

॥ इत्याश्च्योतनाञ्जनतर्पणपुटपाकाधिकार: ॥ ७७ ॥

Thus ends chapter on Āścyotana, Añjana, Tarpaṇa and Puṭapāka. [77]

७८. अष्टसप्ततितमोऽध्याय:

CHAPTER LXXVIII

शिराव्यधाधिकार:

On Śirāvyadha (Venesection)

शिरोगतशिरोत्थापनविधि:

अथ स्निग्धतनु: स्निग्धरसान्नप्रतिभोजित:। प्रत्यादित्यमुखं स्विन्नो जानूच्चासनसंस्थित: ॥ १ ॥
मृदुपट्टात्तकेशान्तो जानुस्थापितकूर्पर:। अङ्गुष्ठगर्भमुष्टिभ्यां मन्ये गाढं निपीडयेत् ॥ २ ॥
दन्तप्रपीडनोत्कासगण्डाध्मानानि चाचरेत्। पृष्ठतो यन्त्रयेच्चैनं वस्त्रमावेष्टयेन्नर: ॥ ३ ॥
कन्धरायां परिक्षिप्य न्यस्यान्तर्वामतर्जनीम्। एवमुत्थाप्य विधिना शिरां विध्येच्छिरोगताम् ॥ ४ ॥

After unction, having taken unctuous food with meat-soup and sudation the patient should sit facing the sun on a knee-high seat. Piece of soft cloth should be wrapped on hairs and while placing elbows on knees he should press the carotid regions deeply with thumbs and fists, pressing teeth, coughing and blowing cheeks at the same time. One should also fix him on back and should wrap a cloth in neck putting left index finger therein. In this way, the vein of hand is raised and then punctured. [1-4].

हस्तशिरोत्थापनविधि:

विध्येद्धस्तशिरां बाहावनाकुञ्चितकूर्परे। बद्ध्वा सुखोपविष्टस्य मुष्टिमङ्गुष्ठगर्भिणीम् ॥
ऊर्ध्वं वेध्यप्रदेशाच्च पट्टिकां चतुरङ्गुले ॥ ५ ॥

The vein in hand should be punctured in arm without flexing the elbow and binding tourniquet four fingers above the spot to be punctured while patient sits comfortably clinching his fist putting thumb within. [5]

पादशिरोत्थापनविधि:

पादे तु सुस्थितेऽधस्ताज्जानुसन्धेर्निपीडिते। गाढं कराभ्यामागुल्फं चरणे तस्य चोपरि ॥ ६ ॥
द्वितीये कुञ्चिते किञ्चिदारूढे हस्तवत्तत:। बद्ध्वा विध्येच्छिरामित्थमनुक्तेष्वपि कल्पयेत् ॥
तेषु तेषु प्रदेशेषु तत्तद्यन्त्रमुपायवित् ॥ ७-८ ॥

After setting the foot well, the portion below the knee-joint upto the ankle is pressed deeply with both hands the other foot being flexed a little and placed on this. It should also be tied above the site as in hand and then the vein should be punctured. [6-7]

Similarly, for other sites too techniques may be applied according to necessity. [8]

शिरावेधविधि:

ततो व्रीहिमुखं व्यध्यप्रदेशे न्यस्य पीडयेत्। अङ्गुष्ठतर्जनीभ्यान्तु तलप्रच्छादितं भिषक् ॥ ९ ॥

वामहस्तेन विन्यस्य कुठारीमितरेण तु। ताडयेन्मध्यमाङ्गुल्याऽङ्गुष्ठविष्टब्धमुक्तया॥ १०॥
मांसले निक्षिपेद्देशे व्रीह्यास्यं व्रीहिमात्रकम्। यवार्द्धमस्थ्नामुपरि शिरां विध्यन् कुठारिकाम्॥ ११॥

Then vrīhimukha instrument should be put on the spot and pressed with thumb and index fingers while covering with palm. [9]

Kuṭhārikā instrument should be put by the left hand and given stroke with middle finger with help of thumb. [10]

In muscular parts vrīhimukha is inserted deep by the measurement of a paddy grain while kuṭhārikā for puncturing vein on bony parts should be inserted deep only by measurement of half barley grain. [11]

अयोगे चिकित्साक्रम:

असम्यगस्रे स्रवति बिल्वव्योषनिशानतैः। सागारधूमलवणतैलैर्दिह्याच्छिरामुखम्॥ १२॥

If blood does not come out properly the opening of vein should be anointed with oil mixed with viḍaṅga, trikaṭu, haridrā, tagara, soot and salt. [12]

सम्यग्योगे क्रम:

सम्यक् प्रवृत्ते कोष्णेन तैलेन लवणेन च॥ १३॥

After blood has come out properly the spot should be anointed with warm oil mixed with salt. [13]

अतिस्रुतौ दोषस्तच्चिकित्सा च

अशुद्धौ बलिनोऽप्यस्रं न प्रस्थात् स्रावयेत परम्। अतिस्रुतौ हि मृत्युः स्याद्दारुणा वाऽनिलामयाः॥ १४॥
तत्राभ्यङ्गरसक्षीररक्तपानानि भेषजम्॥ १५॥

In case of impurity, the blood should not be eliminated more than one prastha even in strong persons as by excessive haemorrhage there may occur vātika disorders or even death. [14]

In that case it should be treated with anointment and intake of meat-soup, milk and blood. [15]

पश्चात्कर्म

स्रुते रक्ते शनैर्यन्त्रमपनीय हिमाम्बुना। प्रक्षाल्य तैलप्रोतार्क्तं बन्धनीयं शिरामुखम्॥ १६॥

After blood-letting the needle should be removed slowly and after washing the spot with cold water and thereafter covering with oily swab, the opening of vein should be bandaged. [16]

असम्यक्शुद्धे पुनर्व्यधः

अशुद्धं स्रावयेद् भूयः सायमह्न्यपरेऽपि वा॥ १७॥

The remaining impure blood should be eliminated in the evening or midday again. [17]

अतिस्रावे चिकित्सा

रक्ते त्वतिष्ठति क्षिप्रं स्तम्भनीमाचरेत् क्रियाम्। लोध्रप्रियङ्गुपत्तङ्गमाषयष्ट्याह्वगैरिकैः॥ १८॥
मृत्कपालाञ्जनक्षौममसीक्षीरित्वगङ्कुरैः। विचूर्णयेद् व्रणमुखं पद्मकादिहिमं पिबेत्॥ १९॥
तामेव वा शिरां विध्येद्व्यधात्तस्मादनन्तरम्। शिरामुखं वा त्वरितं दहेत्तप्तशलाकया॥ २०॥

If haemorrhage does not stop the treatment to check it should be applied. For this, the opening of wound should be dusted with the powder of lodhra, priyangu, pattanga, māṣa, yaṣṭīmadhu, gairika, burnt earthen pieces, rasāñjana, ash of linen, bark and leaf-bud of ksīri vṛkṣas and should take internally the cold infusion of padmakādi drugs. [18-19]

Or the same vein should be punctured at another spot nearby or the opening of vein should be cauterized with heated rod. [20]

उपायान्तरेण शोधनम्

सशेषमप्यसृग्धार्यं न चातिस्रुतिमाचरेत्। हरेच्छृङ्गादिभिः शेषं प्रसादमथवा नयेत्॥
मर्महीने यथासन्नेदेशेऽन्यां व्यधयेच्छिराम्॥ २१॥

Some residual blood should be left and one should never be bleeded excessively. The residual blood, however, may be evacuated with horn etc or pacified with drugs. (If necessary), another vein in nearby part free from vital spot may be punctured. [21]

शिराव्यधेऽयोग्याः

न तूनषोडशातीतसप्तत्यब्दस्रुतासृजाम्। अस्निग्धास्वेदितात्यर्थस्वेदितानिलरोगिणाम्॥ २२॥
गर्भिणीसूतिकाजीर्णपित्तास्रश्वासकासिनाम्। अतिसारोदरच्छर्दिपाण्डुसर्वाङ्गशोफिनाम्॥
स्नेहपीते प्रयुक्तेषु तथा पञ्चसु कर्मसु॥ २३॥
नायन्त्रितां शिरां विध्येन्न तिर्य्यङ् नाप्यनुत्थिताम्। नातिशीतोष्णवाताभ्रेष्वन्यत्रात्ययिकाद्गदात्॥ २४॥

Blood-letting is contra-indicated in following conditions– below sixteen and above seventy years of age, after blood-letting, non-uncted, non-sudated or excessively sudated, vātika disorders, pregnant women, puerperium, indigestion, internal haemorrhage, dyspnoea, cough, diarrhoea, udararoga, vomiting, anaemia, general anasarca, after intake of sneha and use of pañcakarma. Venesection should not be performed without binding the vein and in that which is obliquely situated and not raised (prominent), in too cold or hot, stormy and cloud weather except in emergent cases. [22-24]

पथ्यम्

नात्युष्णशीतं लघु दीपनीयं रक्तेऽपनीते हितमन्नपानम्।
तदा शरीरं ह्यनवस्थितासृग् वह्निर्विशेषेण च रक्षणीयः॥ २५॥
नरो हिताहारविहारसेवी मासं भवेदाबललाभतो वा॥ २६॥

After blood-letting not too hot or cold, light and appetising food and drinks are wholesome. During that period, the body has unstable blood and as such digestive fire should be protected with great care. [25]

The patient should use wholesome diet and conduct for a month or till recovery of strength. [26]

विशुद्धरक्तपुरुषस्य लक्षणम्

प्रसन्नवर्णेन्द्रियमिन्द्रियार्थानिच्छन्तमव्याहतपक्तृवेगम्। सुखान्वितं पुष्टिबलोपपन्नं विशुद्धरक्तं पुरुषं वदन्ति ॥

A person should be taken as having pure blood if his lustre and sense organs are cheerful, there is normal inclination towards sense objects, digestion and natural urges are unobstructed, he is happy and endowed with contentment and strength. [27]

॥ इति शिराव्यधाधिकारः ॥ ७८ ॥

Thus ends chapter on Śirāvyadha. [78]

७९. एकोनाशीतितमोऽध्यायः

CHAPTER LXXIX

सुस्थाधिकारः

On Sustha (the Routine of the Healthy)

दिनचर्या

शय्यात्यागः शौचादिश्च

ब्राह्मे मुहूर्त्त उत्तिष्ठेत् सुस्थो रक्षाऽर्थमायुषः। शरीरचिन्तां निर्वर्त्त्य कृतशौचविधिस्ततः॥ १॥

Dinacaryā (daily routine)

The healthy person should get up in early morning for protection of his life and reviewing his physical condition should go to privy and take wash. [1]

दन्तधावनविधिः

अर्कन्यग्रोधखदिरकरञ्जककुभादिकम्। प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम्॥
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन्॥ २॥

In morning and after meals teeth should be cleaned with brush having soft end and astringent, pungent and bitter taste, taken from plants such as arka, nyagrodha, khadira, karañja, arjuna etc. without injuring the gums. [2]

दन्तधावनानर्हाः

नाद्यादजीर्णवमथुश्वासकासज्वरार्दिती। तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी च तत्॥ ३॥

Persons suffering from indigestion, vomiting, dyspnoea, cough, fever, facial paralysis, thirst, inflammation of mouth, diseases of heart, eye, head and ear should not brush. [3]

अञ्जनविधिः

सौवीरमञ्जनं नित्यं हितमक्ष्णोः प्रयोजयेत्। पञ्चरात्रेऽष्टरात्रे वा स्रावणार्थं रसाञ्जनम्॥ ४॥

One should apply wholesome sauvirāñjana (collyrium) to eyes daily and on every five or eight days rasāñjana for draining. [4]

नस्यादिः

ततो नावनगण्डूषधूमताम्बूलभाग् भवेत्॥ ५॥

Thereafter he should use snuff, gargle, smoking and betel. [5]

ताम्बूलभक्षणानर्हाः

ताम्बूलं क्षतपित्तास्ररूक्षोत्कुपितचक्षुषाम्। विषमूर्च्छामदार्त्तानामपथ्यञ्चापि शोषिणाम्॥ ६॥

Betel is unwholesome in chest-wound, innate haemorrhage, roughness, inflammation of eyes, poisoning, fainting, intoxication and consumption. [6]

अभ्यङ्गविधिः

अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा। शिरःश्रवणपादेषु तं विशेषेण शीलयेत्॥ ७॥

One should undergo regularly oily massage which removes senility, fatigue and (aggravation of) vāta. It should be done particularly in head, ears and feet. [7]

अभ्यङ्गानर्हाः

वर्ज्योऽभ्यङ्गः कफग्रस्तकृतसंशुद्ध्यजीर्णिभिः॥ ८॥

Oily massage should be avoided in aggravation of kapha, after evacuation and in indigestion. [8]

व्यायामविधिः

शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्द्धनी। देहव्यायामसंख्याता मात्रया तां समाचरेत्॥ ९॥

The desirable physical movement performed for firmness and increase of strength is known as physical exercise. This should be practised in proper degree. [9]

व्यायामानर्हाः

वातपित्तामयी बालो वृद्धोऽजीर्णी च तां त्यजेत्॥ १०॥

Physical exercise is contra-indicated in diseases caused by vāta and pitta, children, old people and in indigestion. [10]

उद्वर्त्तनस्नानविधिः

उद्वर्त्तनं ततः कार्य्यं ततः स्नानं समाचरेत्॥ ११॥

उष्णाम्बुनाऽधःकायस्य परिषेको बलावहः। तेनैव तूत्तमाङ्गस्य बलहृत् केशचक्षुषोः॥ १२॥

Thereafter bath should be taken after anointing the body. [11]

Bath with hot water of lower part of the body promotes strength but the same of head destroys strength of hairs and eyes. [12]

स्नानानर्हाः

स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु। आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्॥ १३॥

Bath is contra-indicated in facial paralysis, diseases of eye, mouth and ear, diarrhoea, flatulence, pīnasa, indigestion and after taking meal. [13]

क्षौरादिनिर्देशः

नीचरोमनखश्मश्रुनिर्मलाङ्घ्रिमलायनः। स्नानशीलः सुसुरभिः सुवेशो निर्मलाम्बरः॥
धारयेत् सततं रत्नं सिद्धमन्त्रमहौषधीः॥ १४॥

One should always keep hairs and nails cut and beard shaven, feet and excretory orifices clean, take bath regularly, use perfume, wear clean cloth and be well-dressed and should wear gems, amulets and great herbs. [14]

भ्रमणविधिः

सातपत्रपदत्राणो विचरेद्युगमात्रदृक्। निशि चात्ययिके कार्य्ये दण्डी मौली सहायवान्॥ १५॥

One should walk taking umbrella and putting on shoes looking four cubits ahead. In night he should move only if it is emergent and then too with stick, head-turban and body-guard. [15]

भोजनादिनिर्देशः

जीर्णे हितं मितञ्चाद्यान्न वेगानीरयेद्बलात्। न वेगितोऽन्यकार्य्यः स्यान्नाजित्वा साध्यमामयम्॥ १६॥

One should eat wholesome food in proper quantity after the previous meal is digested. He should not forcibly press forth the natural urges. He should not divert his attention to other works while feeling the natural urges and without overcoming the curable disease. [16]

सद्वृत्तम्

दशधा पापकर्माणि कायवाङ्मानसैस्त्यजेत्। काले हितं मितं ब्रूयादविसंवादि पेशलम्॥ १७॥
आत्मवत् सततं पश्येदपि कीटपिपीलिकम्। आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥ १८॥
नक्तन्दिनानि मे यान्ति कथम्भूतस्य सम्प्रति। दुःखभाङ्न भवत्येवं नित्यं सन्निहितस्मृतिः॥ १९॥

One should abstain from ten sinful acts relating to body, speech and mind and should speak wholesome, measured, timely, in uncontradictory and sweet words. [17]

One should always consider even the small insects as his own self and should never behave to others in the way which is adverse to himself. [18]

He should always examine his conduct as to how his days and nights are passing. Thus by being always vigilant he does not fall prey to unhappiness. [19]

ऋतुचर्या

षड् ऋतवः

मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षडृतवः स्मृताः। शिशिरश्च वसन्तश्च ग्रीष्मवर्षाशरद्धिमाः॥ २०॥

Ṛtucaryā (seasonal regimen)

There are six seasons– śiśira (late winter), vasanta (spring), grīṣma (summer), varṣā (rainy season), śarad (autumn) and hemanta (early winter)– each comprising of two months beginning with māgha etc. (māgha-phālguna = śiśira, caitra-vaiśākha = vasanta, jyeṣṭha-āṣāḍha = grīṣma, śrāvaṇa-bhādrapada = varṣā, āśvina-kārttika = śarad, mārgaśirṣa--pauṣa = hemanta). [20]

हेमन्तर्तुचर्या

बलिनः शीतसंरोधाद्धेमन्ते प्रबलोऽनलः। सेवेतातो हिमे स्निग्धस्वाद्वम्ललवणान् रसान्॥ २१॥
गोधूमपिष्टमाषेक्षुक्षीरोत्थविकृतीः सुराः। नवमन्नं वसां तैलं शौचकार्य्ये सुखोदकम्॥ २२॥
युक्त्याऽर्ककिरणान् स्वेदं पादत्राणञ्च सर्वदा। प्रावाराजिनकौषेयप्रवेणीकौचवास्तृतम्॥ २३॥

उष्णस्वभावैर्लघुभिः प्रावृतः शयनं भजेत्। अङ्गारतापसन्तप्तगर्भभूवेश्मनि प्रियाम्॥
पीवरोरुस्तनश्रोणीमालिङ्ग्यागुरुचर्चिताम्॥ २४॥

Hemanta-caryā

In hemanta strength is increased and, due to obstruction by cold, digestive fire is also stimulated and as such, during this season, one should use unctuous meat-soup and substances having sweet, sour and salty taste. Among edibles, products of wheat, rice-flour, black gram, sugarcane and milk, new cereals, alcoholic drinks and fat are wholesome. Oil should be used externally for massage and so warm water for washing etc. one should be exposed to sun-rays and also to sudation properly and should always keep his feet protected. Bedding should consists of warm blankets and one should sleep properly covered with warm and light quilt etc. The chamber should also be heated and one may relax embracing his beloved pasted with aguru. [21-24]

शिशिरर्तुचर्या

अयमेव विधिः कार्यः शिशिरेऽपि विशेषतः। तदा हि शीतमधिकं रौक्ष्यञ्चादानकालजम्॥ २५॥

Śiśira-caryā

The above regimen should also continue in śiśira with more emphasis as then cold is increased and roughness due to ādānakālā takes place. [25]

वसन्तर्तुचर्या

कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः। हत्वाऽग्निं कुरुते रोगांस्ततस्तत्र प्रयोजयेत्॥ २६॥
तीक्ष्णं वमननस्यादिकवलग्रहमञ्जनम्। व्यायामोद्वर्त्तनं धूमं शौचकार्य्ये सुखोदकम्॥ २७॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः। पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक्॥ २८॥
प्रपिबेदासवारिष्टसीधुमाध्वीकमाधवान्। वसन्तेऽनुभवेत् स्त्रीणां काननानाञ्च यौवनम्॥ २९॥

वर्ज्यानि

गुरूष्णस्निग्धमधुरं दिवास्वप्नञ्च वर्जयेत्॥ ३०॥

Vasanta-caryā

Kapha accumulated in śiśira gets aggravated in vasanta by the heat of sun-rays which depresses digestive fire and causes various disorders. Hence, during this season, one should use irritant emetics, snuff etc, gargles, collyrium, physical exercise, anointments and smoking. For washing tepid water should be used. After bath paste of camphor, sandal, aguru and saffron should be used. Diet should consists of old barley, wheat, honey, meat of wild animals and meat cooked on fire. Among drinks āsava, ariṣṭa and other alcoholic beverages are recommended. In vasanta, one should enjoy nature's beauty and sex.

During this season, one should abstain from heavy, sour, unctuous and sweet edibles and day-sleep. [26-30]

ग्रीष्मर्तुचर्या

मयूखैर्जगतः स्नेहं ग्रीष्मे पेपीयते रविः। स्वादु शीतं द्रवं स्निग्धमन्नपानं तदा हितम्॥ ३१॥
शीतं सशर्करं मन्थं जाङ्गलान् मृगपक्षिणः। घृतं पयः सशाल्यन्नं भजन् ग्रीष्मे न सीदति॥ ३२॥
मद्यमल्पं न वा पेयमथवा सुबहूदकम्। मध्याह्ने चन्दनार्द्राङ्गः स्वप्याद्धारागृहे निशि॥ ३३॥
निशाकरकराकीर्णे प्रवाते सौधमस्तके। निवृत्तकामो व्यजनैः पाणिस्पर्शैः सचन्दनैः॥
सेव्यमानो भजेतास्यां मुक्तामणिविभूषितः॥ ३४॥

ग्रीष्मे वर्ज्यानि

लवणाम्लकटूष्णानि व्यायामश्चात्र वर्जयेत्॥ ३५॥

Grīṣma-caryā

In summer, the sun, by intense rays, takes away the nourishing sap of the Nature and as such, during this season, sweet, cold, liquid and unctuous food and drinks are wholesome. One who takes regularly in summer cold and sweet churned drink, meat of wild animals and birds, ghee and śāli rice does not suffer. Alcoholic drinks should be used little or not at all or mixed with profuse water. In noon having sandal paste on body, one should sleep in fountain chamber and in night on airy and moon-lit roof. Wearing pearls and gems he should relax on a comfortable chair or bed with sufficient cooling arrangement by fans, touch of hand and sandal.

During summer, one should abstain from salty, sour, pungent and hot food and drinks and physical exercise. [31-35]

वर्षर्तुचर्या

भूबाष्पान्मेघनिष्यन्दात् पाकादम्लाज्जलस्य च। वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः॥ ३६॥
भजेत् साधारणं सर्वमूष्मणस्तेजनश्च यत्। आस्थापनं शुद्धतनुर्जीर्णधान्यं कृतान् रसान्॥ ३७॥
जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम्। दिव्यं कौपं शृतश्चाम्भो भोजनन्त्वतिदुर्दिने॥
व्यक्ताम्ललवणस्नेहं संशुष्कं क्षौद्रवल्लघु॥ ३८॥

वर्षासु वर्ज्यानि

नदीजलोदमन्थाहःस्वप्नायासातपांस्त्यजेत्॥ ३९॥

Varṣā-caryā

In rainy season, digestive fire is weakened due to earth-vapour, humidity of clouds and sour pāka of water and thereby vāta etc are aggravated. Hence one should adopt simple living and use those items which stimulate digestion. After undergoing evacuation with non-unctuous enema one should take old cereals, processed meat-soup, meat of wild animals, vegetable soups and old fermented beverages made of honey. Water for drinking should be rain (distilled) water, fresh water drawn from well or boiled one. Diet in extremely bad weather should be explicity sour, salty, unctuous, well-dried, light and mixed with honey. During rains, one should avoid river-water, watery drinks, day-sleep, exertion and exposure to the sun. [36-39]

शरदृतुचर्या

वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः। तप्तानामाचितं पित्तं प्रायः शरदि कुप्यति॥ ४०॥
तज्जयाय घृतं तिक्तं विरेको रक्तमोक्षणम्। तिक्तं स्वादु कषायञ्च क्षुधितोऽन्नं भजेल्लघु॥ ४१॥
इक्षवः शालयो मुद्गाः सरोऽम्भः क्वथितं पयः। शरद्येतानि पथ्यानि प्रदोषे चेन्दुरश्मयः॥
शारदानि च माल्यानि वासांसि विमलानि च॥ ४२॥

शरदृतौ वर्ज्यानि

तुषारक्षारसौहित्यदधितैलरसातपान्। तीक्ष्णमद्यदिवास्वप्नपुरोवातातपांस्त्यजेत्॥ ४३॥

Śarad-caryā

During autumn, the person adjusted to cool rainy days are suddenly exposed to the heat of sun-rays which leads to aggravation of pitta accumulated previously. To overcome this, one should take ghee processed with bitters, purgatives and blood-letting. When feeling good appetite, he should take bitter, sweet and astringent items particularly sugarcane (and its products), śāli rice and green gram with pond's water and boiled milk. In night he should enjoy moon-light, autumnal garlands and clean apparel.

One should avoid excessive dews, alkali, curd, oil, meat-soup, exposure to sun, concentrated wine, day-sleep and easternly wind. [40-43]

ऋतुषु रसोपयोगः

शीते वर्षासु चाद्यांस्त्रीन् वसन्तेऽन्त्यान् रसान् भजेत्। स्वादून् निदाघे शरदि स्वादुतिक्तकषायकान्॥ ४४॥
शरद्वसन्तयो रूक्षं शीतं घर्मघनान्तयोः। अन्नपानं समासेन विपरीतमतोऽन्यथा॥ ४५॥
नित्यं सर्वरसाभ्यासः स्वस्वाधिक्यमृतावृतौ॥ ४६॥

In winter and rainy seasons, the former three rasas (sweet, sour and salty) and in spring the latter three (pungent, bitter and astringent) should be used. Likewise, one should use sweet in summer and sweet, bitter and astringent in autumn. [44]

In brief, food and drink should be rough in autumn aand spring, cold in summer and autumn and in winter opposite to this (e.g. hot and unctuous). [45]

One should always use all the six rasas in diet. However, in different seasons the prescribed rasas should be in higher proportion. [46]

ऋतुसन्धौ चर्या

ऋतोराद्यन्तसप्ताहावृतुसन्धिरिति स्मृतः। तत्र पूर्वो विधिस्त्याज्यः सेवनीयोऽपरः क्रमात्॥ ४७॥

Between the two consecutive seasons there is ṛtusandhi (seasonal junction) comprising of the last week of the departing season and the first week of the coming one. During this juncture there should be gradual recession from the previous regimen and acceptance of the other one. [47]

ऋतुसात्म्यमोकसात्म्यञ्च

इत्युक्तमृतुसात्म्यं यच्चेष्टाहारव्यपाश्रयम्। उपशेते यदौचित्यादोकसात्म्यं तदुच्यते॥ ४८॥

Thus is said the seasonal suitability pertaining to behaviour and diet. Whatever is suitable to the person because of regular use in known as 'okasātmya (suitability due to practice). [48]

सात्म्यलक्षणम्

देशानामामयानाञ्च विपरीतगुणं गुणैः। सात्म्यमिच्छन्ति सात्म्यज्ञाश्चेष्टितञ्चाद्यमेव च॥ ४९॥

The knowers of suitability define behaviours and diet which are opposite to qualities of place and disorder as suitable. [49]

स्वस्थवृत्तानुसरणम्

तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्त्तते। अजातानां विकाराणामनुत्पत्तिकरञ्च यत्॥ ५०॥
नगरी नगरस्येव रथस्येव रथी यथा। स्वशरीरस्य मेधावी कृत्येष्ववहितो भवेत्॥ ५१॥

One should always take that which maintains health and prevents disorders in future. [50]

As a town officer is cautious in (performing) the duties of town and an owner of chariot in those relating to it. a wise person should be cautious in duties relating to his own body. [51]

॥ इति सुस्थाधिकारः॥ ७९॥

Thus ends chapter on Sustha. [79]

ग्रन्थकर्त्तुः परिचयः

गौडाधिनाथरसवत्यधिकारिपात्रनारायणस्य तनयः सुनयोऽन्तरङ्गात्।
भानोरनु प्रथितलोध्रबलीकुलीनः श्रीचक्रपाणिरिह कर्त्तृपदाधिकारी॥ १॥
यः सिद्धयोगलिखिताधिकसिद्धयोगानत्रैव निक्षिपति केवलमुद्धरेद्वा।
भट्टत्रयत्रिपथवेदविदा जनेन दत्तः पतेत् सपदि मूर्द्धनि तस्य शापः॥ २॥

Śrī Cakrapāṇi, the son of Nārāyaṇa, the kitchen-superintendent of the king of Gauḍa and the younger brother of Bhānu, the royal physician, belonging to the famous lodhrabalī family is the author of this work. [1]

One who puts the formulation recorded here in addition to those of (Vṛnda's) Siddhayoga there itself or merely deletes (from the text) would be victim of the curse of a great scholar (Cakrapāṇidatta) knower of the three great treatises.. [2]

॥ इति महामहोपाध्यायश्रीचक्रपाणिदत्तविरचितश्चिकित्सासङ्ग्रहापरपर्यायश्चक्रदत्तः समाप्तः॥

Thus ends the Cikitsāsaṅgraha (Collection of medical formulary)
composed by Mahāmahopadhyāya ŚrīCakrapāṇidatta.

APPENDIX I

Plants names with botanical identification

Aṃśumatī	
Syn.-Śālaparṇī	
Akṣa	
Sy.-Bibhītaba	
Agastya	Sesbania grandiflora Pers.
Aguru	Aquilaria agallocha Roxb.
Agryailā	Amomum subulatum Roxb.
Syn.-Hareṇu (ka)	
Agni	
Syn.-Citraka	
Agni	
Syn.-Bhallātaka and Lāṅgalī	
Agnimantha	Premna mucronata Roxb.
Aṅkoṭa (ṭha)	Alangium salvifolium (Linn.f.) Wang.
Ajagandhā	Thymus serpyllum Linn.
Ajamodā	Apium graveolens Linn.
Ajaśṛṅgī	Gymnema sylvestre R.Br.
Ajājī	
Syn.-Jīraka	
Añjana	
Syn.-Rasāñjana	
Atasī	Linum usitatissimum Linn.
Atichatrā	
Atibalā	Abutilon indicum (Linn.) Sw.
Atimuktaka	
Syn.- Mādhavī	
Atirasā	
Syn.- Śatāvarī	
Ativiṣā	Aconitum heterophylum Wall.
Anantā	
Syn.- Sārivā or Dūrvā	

Anala
  Syn.- Citraka
Apāmārga — Achyranthes aspera Linn.
Apetarākṣasī
  Syn.- Surasā
Abja
  Syn.- Padma
Abda
  Syn.- Musta
Abhaya
  Syn.- Uśīra
Abhayā
  Syn.- Harītakī
Abhīru
  Syn.- Śatāvarī
Amaṇḍa
  Syn.- Eraṇḍa
Amaradāru
  Syn.- Devadāru
Amarā
  Syn.- Guḍūcī
Amaladīpti
  Syn.- Karpūra
Amṛṇāla
  Syn.- Uśīra
Amṛtaphala
  Syn.- Āmalaka
Amṛtalatā
  Syn.- Guḍūcī
Amṛtavallī
  Syn.- Guḍūcī
Amṛtā
  Syn.- Guḍūcī

Ambaṣṭhakī	(Gall of) Quercus infectoria Oliv.
Ambu	
Syn.- Bālaka	
Ambuda	
Syn.- Musta	
Ambhoja	
Syn.- Padma	
Ambhoda	
Syn.- Musta	
Ambhoruha	
Syn.- Padma	
Amla	
Syn.- Amlavetasa	
Amlavetasa	Garcinia pedunculata Roxb.
Amli(lī)kā	Tamarindus indica Linn.
Amlī(ka)	
Syn.- Amlikā	
Amloṭa	Bauhinia malabarica Roxb.
Ayas	
Syn.- Aguru	
Aralu	Ailanthus excelsa Roxb.
Ariṣṭa(ka)	
Sy.- Nimba	
Aruṇataṇḍukīyaka	Amaranthus tristis Linn.
Syn.- Kālamāriṣa	
Aruṇā	
Sy.- Ativiṣā	
Aruṣkara	
Syn.- Bhallātaka	
Arka	Calotropis procera (Ait.) R.Br.
Arja	
Syn.- Arjaka	
Arjaka	Orthosiphon pallidus Royle.

Arjuna	Terminalia arjuna (Roxb.) W. & A.
Alambuṣa(ka)	
Syn.- Muṇḍitikā	
Alambuṣā	
Syn.- Muṇḍitikā	
Alavaṇā	
Sy.- Jyotiṣmatī	
Alābū	
Syn.- Tiktatumbī	
Avalguja	
Syn.- Vāgujī	
Avākpuṣpī	Trichodesma indicum R.Br.
Aśanamallikā	
Syn.- Āsphotā	
Aśoka	Saraca indica Linn.
Aśmantaka	Ficus rumphii Blume.
Aśmabhid	
Syn.- Pāṣāṇabheda	
Aśmabheda	
Syn.- Pāṣāṇabheda	
Aśvakarṇa	Dipterocarpus turbinatus Gaertn.f.
Aśvakarṇī	
Syn.- Aśvakarṇa	
Aśvagandhā	Withania somnifera (Linn.) Dunal.
Aśvattha	Ficus religiosa Linn.
Aśvamāra	
Syn.- Karavīra	
Aśvamūtrī	
Syn.- Śallakī	
Aśvāri	
Syn.- Karavīra	
Aśvāhvā	
Syn.- Aśvagandhā	

Asa(śa)na	Pterocarpus marsupium Roxb.
Asita tila	
Syn.- Tila	
Asita vetra	
Syn.- Kṛṣṇavetra	
Asthisaṃhāra	Cissus quadrangularis Linn.
Asthisaṃhṛt	
Syn.- Asthisaṃhāra	
Asra	
Syn.- Kuṅkuma	
Ahiṃsrā	Capparis zeylanica Linn.
Ahīndra	
Syn.- Sārivā (according to Śivadāsa)	
Ahipuṣpa	
Syn.- Nāgakeśara	
Ākhuparṇī	Merremia emarginata (Burm. f.) Hallier f. syn.- Ipomoea reniformis Choisy.
Āṭarūṣa(ka)	
Syn.- Vāsā	
Āḍhakī	Cajanus cajan(Linn.)Millsp.
Ātmaguptā	
Syn.- Kapikacchū	
Ādityavallī	
Ābhā	Acacia sp.
Āmaya	
Syn.- Kuṣṭha	
Āmala	
Syn.- Āmalaka	
Āmalaka	Emblica officinalis gaertn.
Āmalakī	
Syn.- Āmalaka	
Āmra	Mangifera indica Linn.
Āragvadha	Cassia fistula Linn.

Ārevata	
Syn.- Āragvadha	
Ārtagala	Xanthium strumarium Linn.
Ārdra	
Syn.- Ārdraka	
Ārdraka	(Fresh form of) Zingiber officinale Rosc.
Ārdrakaśṛṅgabera	
Syn.- Ārdraka	
Āsurī	
Syn.- Rājikā	
Āsphota(tā)	Vallaris solanacea O. kuntze
Ikṣu	Saccharum officinarum Linn.
Ikṣura(ka)	
Syn.- Kokilākṣa	
Ikṣurālikā	
Syn.- Ikṣvālikā	
Ikṣvāku	
Syn.- Tiktatumbī	
Ikṣvālikā	
(A variety of Ikṣu)	
Iṅguda(dī)	Balanites aegyptica (Linn.) Delile.
Itkaṭa	
Syn.- Utkara (utkaṭa?)	
Indīvara(ri)	
Syn.- Pattūra	
Indra	
Syn.- Kuṭaja	
Indrabīja	
Syn.- Indrayava	
Indrayava	(Seeds of) Holarrhena antidysenterica Wall.
Indravāruṇī	Citrullus colocynthis Schrad
Indrasurā	
Syn.- Indravāruṇī	

Indrāśana (Bhaṅgā)	Cannabis sativa Linn.
Ibha Syn.- Nāgakeśara	
Ibhakaṇā Syn.- Gajapippalī	
Ibhakeśara Syn.- Nāgakeśara	
Irima Syn.- Irimeda	
Irimeda	Acacia farnesiana Willd.
Ugragandhā Syn.- Vacā	
Ugrā Syn.- Vacā	
Uccatā	Cyperus Sp.
Utkata (Utkaṭa ?)	Hygrophila salicifolia Nees.
Utpala	Nymphaea stellata Willd.
Utpalasārivā Syn.- Sārivā	
Udīcya Syn.- Bālaka	
Udumbara	Ficus glomerata Roxb.
Udumbaraparṇī Syn.- Dantī	
Uddāla	Paspalum scrobiculatum Linn. Var. commersonii Stapf.
Unmatta Syn.- Dhustūra	
Upakuñcikā	Nigella sativa Linn.
Upakuñcī Syn.- Upakuñcikā	
Upakulyā Syn.- Pippalī	

Upodikā	Basella rubra Linn.
Umā	
Syn.- Atasī	
Urubūka	
Syn.- Eraṇḍa	
Uśīra	Vetiveria zizanioidis(Linn.)Nash.
Uṣṭrakaṇṭaka	Echinops echinatus Linn.
Ūṣaṇa	
Syn.- Marica	
Ṛddhi	Habenaria Sp.
Ṛddhiyuk	
(Ṛddhi, Vṛddhi)	
Ṛṣabha(ka)	Microstylis sp.
Ekaiṣikā	
Syn.- Ambaṣṭhā	
Eḍagaja	
Syn.- Cakramarda	
Erakā	Typha laxmannii Lepech.
Eraṇḍa	Ricinus communis Linn.
Ervāru(ka)	Cucumis utilissimus Roxb.
Elakākhya	
Syn.- Elavāluka	
Elavālu(ka)	Prunus cerasus Linn.
Elā	Elettaria cardamomum Maton.
Aindrī	Bacopa monnieri(Linn.) Pennell.
Syn.- Indravāruṇī	
(According to Cakrapāṇidatta)	
Airāvatī	
Syn.- Nāgabalā	
Aileya	
Syn.- Elavāluka	
Kakubha	
Syn.- Arjuna	

Kakkola(ka)	Piper cubeba Linn.f.
Kaṅgu	
Syn.- Priyaṅgu (cereal)	
Kaṅguṇikā	
Syn.- Priyaṅgu (cereal)	
Kaccoraka	Curcuma zedoaria Rosc.
Kacchurā	
Syn.- Dhanvayāsa	
Kañcaṭa	Jussiaea repens Linn.
Kaṭaṅkaṭa	
Syn.- Dāruharidrā	
Kaṭaṅkaṭerī	
Syn.- Dāruharidrā	
Kaṭabhī	Albizzia lucida Benth.
Kaṭambharā	
Syn.- Kaṭabhī	
Kaṭu	
Syn.- Kaṭuka	
Kaṭuka	Hibiscus abelmoschus Linn.
Kaṭukā rohini	
Syn.- Kaṭukā	
Kaṭukā	Picrorhiza kurroa Royle ex Benth.
Katukarohiṇī	
Syn.- Kaṭukā	
Katutumbī	
Syn.- Tiktatumbī	
Kaṭumbharā	
Syn.- Kaṭabhī	
Kaṭurohiṇī	
Syn.- Kaṭukā	
Kaṭphala	Myrica nagi Thunb.
Kaṭvaṅga	
Syn.- Aralu	

Kaṇā	
Syn.- Pippalī	
Kaṇāmula	
Syn.- Pippalīmūla	
Kaṇṭakārikā	
Syn.- Kaṇṭakārī	
Kaṇṭakārī	Solamum surattense Burm.f.
Kaṇṭākumbhāḍu	
Syn.- Ahiṃsrā	
Kataka	Strychnos potatorum Linn.
Kattṛṇa	Cymbopogon jwarancusa Schult.
Kadamba	Anthocephalus cadamba Miq.
Kadara	Acacia suma Buch.-Ham.
Kadalī	Musa paradisiaca Linn.
Kanaka	
Syn.- Dhustūra	
Kanda	
Syn.- Śūraṇa	
Kanyakā	Aloe Vera Tourn. ex Linn.
Kapikacchū	Mucuna prurita Hook.
Kapittha	Feronia limonia (Linn.) Swingle.
Kapotavaktra(ka) .	Dalbergia lanceolaria Linn.f.
Kamala	
Syn.- Padma	
Kampillaka	Mallotus philippinensis Muell-Arg.
Karañja	Pongamia pinnata Pierre.
Karabhavāruṇī	
Syn.- Uṣṭrakaṇṭaka	
Karamarda	Carissa carandas Linn.
Karavīra	Nerium indicum Mill.
Karikarṇa	
Syn.- Hastikarṇapalāśa	

Karikarṇacchada	
Syn.- Hastikarṇapalāśa	
Karipippalī	
Syn.- Gajapippalī	
Karīra	Capparis decidua Edgew.
Karkataśṛṅgī	(Gall of) Pistacia integerrima Stew ex Brandis
Karkaṭākhyā	
Syn.- Karkaṭaśṛṅgī	
Karkaṭī	
Syn.- Ervāru	
Karkandhu	Zizyphus nummularia W. & A.
Karkāru(ka)	Cucurbita pepo Linn.
Karkoṭaka	Momordica dioica Roxb. ex Willd.
Karnamoṭa	
Karṇākhya	
Syn.- Khaṇḍakarṇa	
Karpūra	Cinnamomum camphora Nees. & Eberm.
Kalambuka	Ipomoea reptans (Linn.) Poir.
Kalasi(śī)	
Syn.- Pṛśniparṇī	
Kalāya	Lathyrus sativus Linn.
Kalāyavidalī	
Kali	
Syn.- Bibhītaka	
Kaliṅga(ka)	
Syn.- Indrayava	
Kaliṅgayava	
Syn.- Indrayava	
Kalitaru	
Syn.- Bibhītaka	
Kaśikā	
Syn.- Kāśī	

Kaśe(se)ru(ka)	Scirpus glossus Linn.f.
Kāśmīra	
Syn.- Kuṅkuma	
Kākajaṅghā	Peristrophe bicalyculata Nees.
Kākajānuka	
Syn.- Kākajaṅghā	
Kākaṇantī	
Syn.- Guñjā	
Kākanāsā	Pentatropis spiralis Decne.
Kakamācī	Solanum nigrum Linn.
Kākādanī	Anamirta cocculus W. & A.
Kākodumbarikā	Ficus hispida Linn.f.
Kākolī	Lilium sp.
Kāñcana	
Syn.- Kañcanāra	
Kāñcanakṣīrī	
Syn.- Svarṇakṣīrī	
Kāñcanāra	Bauhinia variegata Linn.
Kāntakrāmaka	
Syn.- Musta	
Kāntā	
Syn.- Priyaṅgu	
Kāyasthā	
Syn.- Aindrī	
Kāravī	
Syn.- Kṛṣṇajīraka	
Kāravella	Momordica charantia Linn.
Ka(kā)rpāsa(sī)	Gossypium barbadens Linn.
Kālamāriṣa	Corchorus capsularis Linn.
Kālamuṣkaka	Elaeodendron glaucum Pers.
Kālā	
Syn.- Mañjistha	
Ahiṃsrā (According to Śivadāsa)	

Kālānusārivā	
Syn.- Pattaṅga	
Kālīya(ka)	
Kāleya	
Syn.- Kālīyaka	
Kāśa	Saccharum spontaneum Linn.
Kāśī	
Kāśmarī	Gmelina arborea Linn.
Kāśmarya	
Syn.- Kāsmarī	
Kaṣṭhodumbara	
Syn.- Kākodumbarikā	
Kāsamarda(ka)	Cassia occidentalis Linn.
Kiṃśuka	
Syn.- Palāśa	
Kiṇihī	Albizzia procera (Roxb.) Benth.
Kirāta	
Syn.- Kirātatikta	
Kirātatikta(ka)	Swertia chirayita (Roxb.ex Flem) Karst.
Kilima	
Syn.- Devadāru	
Kukkuramañcuka	Pavetta indica Linn.
Kuṅkuma	Crocus sativus Linn.
Kucandana	
Syn.- Pattaṅga	
Kuṭaja	Holarrhena antidysenterica(Linn.) Wall.
Kuṭajaphala	
Syn.- Indrayava	
Kuṭajabīja	
Syn.- Indrayava	
Kuṭannaṭa	
Syn.- Śyonāka	

Kuṭhāraka	Melothria heterothylla(Lour.) Cogn.
Kuṭhāracchinnā	
Syn.- Kuṭhāraka	
Kuṭhera(ka)	Ocimum sp.
Kuṇḍalī	
Syn.- Guḍūcī	
Kundu	
Syn.- Kunduru	
Kunduru(ka)	(Oleo-gum resin of) Boswellia serrata Roxb.
Kumuda	Nymphaea alba Linn.
Kumbhīka	Careya arborea Roxb.
Kuraṇṭaka	
Syn.- Sahacara	
Kuruṇṭa	
Syn.- Sahacara	
Kuruṇṭikā	
Syn.- Śitimāraka	
Kulaka	Trichosanthes sp.
Kulattha	Dolichos biflorus Linn.
Kulikā	
Syn.- Hiṃsrā	
Kuvalaya	
Syn.- Utpala	
Kuśa	Desmostachya bipinnata Stapf.
Kuṣṭha	Saussurea lappa C.B. Clarke.
Kuṣṭhaghna	
Syn.- Khadira	
Kusumbha	Carthamus tinctorius Linn.
Kustumburu	
Syn.- Dhānyaka	
Kūṭakarāṇi	
Syn.- Hiṃsrā	

Kūṣmāṇḍa	Benincasa cerifera Savi.
Kūṣmāṇḍī	
Syn.- Kūṣmāṇḍa	
Kṛtamāla	
Syn.- Āragvadha	
Kṛtavedhana	
Syn.- Kośātakī	
Kṛtāñjali	
Syn.- Lajjā(lu)	
Kṛmihara	
Syn.- Viḍaṅga	
Kṛṣṇagandhā	
Syn.- Śigru	
Kṛṣṇacitraka	Plumbago auriculata Lam.
Kṛṣṇajīraka	Carum carvi Linn.
Kṛṣṇavetra	Tiliacora racemosa Colebr.
Kṛṣṇaśaṇa	
Kṛṣṇasārivā	Cryptolepis buchanana Roem & Schult.
Kṛṣṇasairīyaka	
Syn.- Nīlakuraṇṭaka	
Kṛṣṇā	
Syn.- Pippalī	
Kṛṣṇāguru	
Syn.- Aguru	
Kṛṣṇājājī	
Syn.- Kṛṣṇajīraka	
Kekiśikhā	Actiniopteris dichotoma Bedd.
Ketaka(kī)	Pandanus odoratissimus Roxb.
Kebuka	Costus speciosus (Koeing)Sm.
Keśara	
Syn.- Nāgakeśara	
Keśarāja(ka)	Wedelia chinensis Merrill.

Keśinī	
Syn.- Māṃsī	
Keśī	
Syn.- Pūtanākeśī	
Kokilākṣa	Astercantha longifolia Nees.
Kodrava	Paspalum scrobiculatum Linn.
Koradūṣa	
Syn.- Kodrava	
Kola	
Syn.- Badara	
Kolā	
Syn.- Cavikā	
Kovidāra	Bauhinia purpurea Linn.
Kośā(ṣā)takī	Luffa acutangula (Linn.) Roxb.
Koṣa	
Syn.- Jātīkoṣa	
Kauntī	
Syn.- Agryailā	
Kauṣika	
Syn.- Guggulu	
Krimighna	
Syn.- Viḍaṅga	
Krimiripu	
Syn.- Viḍaṅga	
Krimiśatru	
Syn.- Viḍaṅga	
Kruṣṭikā	
Syn.- Rājikā	
Klītaka	
Kṣava(ka)	Centipeda minimum (Linn.) A.Br. & Aschers.
Kṣīrakākolī	Fritillaria sp.
Kṣīravidārī	Ipomoea digitata Linn.

Kṣīraśuklā	
Syn.- Kṣīrakākolī	
Kṣudrā	
Syn.- Kaṇṭakārī	
Kṣuraka	
Syn.- Kokilākṣa	
Khaṇḍakarṇa	
Khadira	Acacia catachu willd.
Khadirī	Acacia pinnata willd.
Kharamañjarī	
Syn.- Apāmārga	
Kharāśvā	
Syn.- Ajamodā	
Kharjūra	Phoenix sylvestris Roxb.
Khāḍaga (Khāgaḍa)	
(A variety of Ikṣu)	
Gaṅgāpalaṅka	Sonchus arvensis Linn.
Gajakarṇapatra	
Syn.- Hastikarṇapalāśa	
Gajakusuma	
Syn.- Nāgakeśara	
Gajakeśara	
Syn.- Nāgakeśara	
Gajacirbhiṭa	
Syn.- Indravāruṇī	
Gajapippalī	(Fruits of) Pipper chaba Hunter.
Gajabalā	
Syn.- Nāgabalā	
Gajāhvā	
Syn.- Nāgakeśara	
Gajopakulyā	
Syn.- Gajapippalī	

Gaṇikārikā	
Syn.- Agnimantha	
Gaṇḍīrikā	
Syn.- Snuhī	
Gada	
Syn.- Kuṣṭha	
Gandhatṛṇa	
Syn.- Kattṛṇa	
Gandhanākulī	Aristolochia indica Linn.
Gandhapatraka	
Syn.- Kaccoraka	
Gandhaphalī	
Syn.- Priyaṅgu	
Gandharasa	
Syn.- Bola	
Gandharva	
Syn.- Eraṇḍa	
Gambhārī	
Syn.- Kāśmarī	
Garala	
Syn.- Viṣa	
Gavākṣī	
Syn.- Indravāruṇī	
Gavedhu(ka)	Coix lachryma-jobi Linn.
Gāyatrī	
Syn.- Khadira	
Girikarṇikā	Clitoria ternatea Linn.
Girikarṇī	
Syn.- Girikarṇikā	
Girimallikā	
Syn.- Kuṭaja	
Guñjā	Abrus precatorius Linn.

Guggulu	Commiphora mukul (Hook. ex Stocks) Engl.
Guḍatvak	
Syn.- Tvak	
Guḍapuṣpa	
Syn.- Madhūka	
Guḍūcī	Tinospora cordifolia (Willd) Miers ex Hook. F. & Thoms.
Gundra	Typha elephantina Roxb.
Gulma(Ka)	
Syn.- Gundra	
Guhā	
Syn.- Pṛśniparṇī	
Gṛdhranakhī	
Syn.- Hiṃsrā	
Gṛṣti	
Syn.- Vārāhī	
Gokaṇṭa	
Syn.- Gokṣura	
Gokṣura	Tribulus terrestris Linn.
Gojihvā	Onosma bracteatum wall.
Gojī	
Syn.- Śākhoṭaka	
Goṇḍaka	Agaricus campestris Linn.
Godhāvatī	
Godhūma	Triticum aestivum Linn.
Gostanā	
Syn.- Drākṣā	
Gaurā	
Syn.- Dūrvā	
Granthi (Ka)	
Syn.- Pippalīmūla	
Granthiparṇa (Ka)	
Syn.- Sthauṇeyaka	

Ghana	
Syn.- Musta	
Ghanasāra	
Syn.- Karpūra	
Ghuṇapriyā	
Syn.- Ativiṣā	
Ghusṛṇa	
Syn.- Kuṅkuma	
Ghoṇṭāphala	Zizyphus xylopyra willd.
Ghoṣā	
Syn.- Dhāmārgava	
Cakramarda(ka)	Cassia tora Linn.
Cakrāhvaya	
Syn.- Cakramarda	
Caṇaka	Cicer arietinum Linn.
Caṇḍā	Angelica archangelica Linn.
Caturaṅgula	
Syn.- Āragvadha	
Candana	Santalum album Linn.
Candra	
Syn.- Karpūra	
Capalā	
Syn.- Pippalī	
Campaka	Michelia champaka Linn.
Carmakārāluka	Dioscorea esculenta Burkill.
Syn.- Vārāhi (according to Cakrapāṇi)	
Cala	
Syn.- Turuṣka	
Cavikā	Piper chaba Hunter.
Cavī	
Syn.- Cavikā	
Cavya	
(Root of Cavikā)	

Cāngerī	Oxalis conrniculata Linn.
Cāmpeya	
Syn.- Campaka	
Cārați	
Syn.- Bhārgī	
Ciñcā	
Syn.- Amlikā	
Citra	
Syn.- Citraka	
Citraka	Plumbago zeylanica Linn.
Citraphalā	
Syn.- Indravāruṇī	
Citrā	
Syn.- Dantī	
Cirabilva	Holoptelia integrifolia planch
Cukrikā	Rumex vesicarius Linn.
Cukrīkā	
Syn.- Cāṅgerī	
Cūta	
Syn.- Āmra	
Celakatvak	
Syn.- Tvak	
Coca	Cinnamomum cassia Blume.
Coraka	Angelica glauca Endgew.
Corapuṣpī	
Syn.- Caṇḍā	
Chatrā	
Chinnaruhā	
Syn.- Guḍūcī	
Chinnā	
Syn.- Guḍūcī	
Chinnodbhavā	
Syn.- Guḍūcī	

Jaṭilā	Selinum sp.
Jantughna	
Syn.- Viḍaṅga	
Japā	Hibiscus rosa-sinensis Linn.
Jambīra	Citrus limon (Linn) Burm.f.
Jambū	Syzygium cumini (Linn) Skeels.
Jayantī	Sasbania sesban Merrill.
Jayā	
Syn.- Jayantī	
Jaraṇa	
Syn.- Jīraka	
Jala	
Syn.- Bālaka	
Jalakaṇā	Lippia nodiflora Mich.
Jalakumbhīka (bhikā)	Pistia stratiotes Linn.
Jalada	
Syn.- Musta	
Jaladhara	
Syn.- Musta	
Javā	
Syn.- Japā	
Jātī	Jasminum officinale Linn.
also āmalakī (according to Śivadāsa)	forma, grandiflorum (Linn) Kubuske.
Tāmravallī	Ventilago maderaspatana Gaertn.
Tārkṣya(ja)	
Syn.- Rasāñjana	
Tārkṣyaśaila	
Syn.- Rasāñjana	
Tāla	Borassus flabellifer Linn.
Tālaparṇī	
Syn.- Tālamūlī	
Tālamūlī	Curculigo orchioides Gaertn.

Tālīśa	Abies webbiana Lindle.
Tiktakarohiṇī	
Syn.- Kaṭukā	
Tiktatumbī	Lagenaria siceraria (Mol.) Standl.
Tiktarohiṇī	
Syn.- Kaṭukā	
Tiktā	
Syn.- Kaṭukā	
Tiktālābū	
Syn.- Tiktatumbī	
Tiniśa	Ougeinia dalbergioides Benth
Tintiḍī	
Syn.- Amlikā	
Tinduka	Diospyros peregrina (Gaertn.) Gurke
Tirīṭa	
Syn.- Lodhra	
Tila	Sesamum indicum Linn.
Tilvaka	Viburnum nervosum D.Don.
Tugā	
Syn.- Vaṃśalocana	
Tugākṣīrī	
Syn.- Vaṃśalocana	
Tumbī	
Syn.- Tiktatumbī	
Tumburu	(Fruit of) Zanthozylum alatum Roxb.
Turagagandhā	
Syn.- Aśvagandhā	
Turaṅgagandhā	
Syn.- Aśvagandhā	
Turuṣka	Liquidamber orientalis Miller.
Tuvara	Hydnocarpus laurifolia (Dennst.)
Tṛṇaka	Xyris pauciflora willd.

Tejovatī	Zanthoxylum alatum Roxb.
Taila	
Syn.- Turuṣka	
Trapuṣa	Cucumis sativus Linn.
Trāyantikā	
Syn.- Trāyamāṇā	
Trāyantī	
Syn.- Trāyamāṇā	
Trāyamāṇā	Grentiana kurroo Royle.
Trikaṇṭaka	
Syn.- Gokṣura	
Tribhaṇḍī	
Syn.- Trivṛt	
Trivṛt	Operculina turpethum (Linn.) Silva Manso.
Truṭi	
Syn.- Elā	
Tvak	Cinnamomum zeylanicum Breyn.
Tvakṣīrī	
Syn.- Vaṃśalocana	
Tvakpatra	
Syn.- Tvak	
Tvakpatrī	
Syn.- Patra	
Thauṇeya	
Syn.- Sthauṇeya	
Daṇḍotpalā	Vernonia cineria Less.
Dadhittha	
Syn.- Kapittha	
Dadhināma	
Syn.- Kapittha	
Dantī	Baliospermum montanum Muell-Arg.
Dantotpalā	
Syn.- Daṇḍotpalā	

Damana	Artemisia vulgaris Linn.
Darbha	Imperata cylindrica Beauv.
Dala	
Syn.- Patra	
Dahana	
Syn.- Citraka	
Dāḍima	Punica granatum Linn.
Dāru	
Syn.- Devadāru	
Dāruniśā	
Syn.- Dāruharidrā	
Dāruharidrā	Berberis aristata DC.
Dārvī	
Syn.- Dāruharidrā	
Dīpyaka	
Syn.- Ajamodā	
Dīrghavṛnta	
Syn.- Śyonāka	
Dugdhī	Euphorbia thymifolia Linn.
Durālabhā	
Syn.- Dhanvayāsa	
Duḥsparśā	
Syn.- Dhanvayāsa	
Dūrvā	Cynodon dactylon pers.
Devakāṣṭha	
Syn.- Devadāru	
Devadāru	Cedrus deodara (Roxb) Loud.
Devadruma	
Syn.- Devadāru	
Devapuṣpī	
Syn.- Lavaṅga	
Devāhva	
Syn.- Devadāru	

Dravantī	Croton tiglium Linn.
Drākṣā	Vitis vinifera Linn.
Druma	
Syn.- Āragvadha	
Droṇapuṣpa(pī)	Leucus cephalotes Spreng
Dvika	
Syn.- Aguru	
Dvīpī	
Syn.- Citraka	
Dhanikā	
Syn.- Dhānyaka	
Dhanīyaka	
Syn.- Dhānyaka	
Dhanyāka	
Syn.- Dhānyaka	
Dhanvana	Grewia tiliaefolia Vahl.
Dhanvayavāsaka	
Syn.- Dhanvayāsa	
Dhanvayāsa	Fagonia cretica Linn.
Dhava	Anogeissus latifolia wall
Dhavalapunarnavā	
Syn.- Vṛścīra	
Dhātakī	Woodfordia fruticosa Kurz
Dhātrī	
Syn.- Āmalaka	
Dhānya	
Syn.- Dhānyaka	
Dhānyaka	Coriandrum sativum Linn.
Dhānyāka	
Syn.- Dhānyaka	
Dhāmārgava	Luffa cylindrica (Linn.) M.J. Roem.
Dhāvanī	
Syn.- Kaṇṭakārī	

Dhustūra	Datura metal Linn.
Dhyāma(ka)	
Syn.- Kattṛṇa	
Naktamāla	
Syn.- Karañja	
Naktāhva	
Syn.- Karañja	
Nata	
Syn.- Tagara	
Naravṛkṣa	Indigofera sp.
Narendradruma	
Syn.- Āragvadha	
Nala	Arundo donax Linn.
Nalada	
Syn.- Māṃsī	
Nalikā	
Nalina	
Syn.- Padma	
Nalinī	
Syn.- Padminī	
Nākulī	Rauwolfia serpentina Benth ex Kurz.
Nāga	
Syn.- Nāgakeśara	
Nāgakeśa(sa)ra	Mesua ferrea Linn.
Nāgadantī	Croton oblongifolius Roxb.
Nāgapuṣpa	
Syn.- Nāgakeśara	
Nāgabalā	Grewia hirsuta Vahl.
Nāgara(ka)	
Syn.- Śuṇṭhī	
Nāgaramustaka	Cyperus esculentus Linn.
Nāgāhva	
Syn.- Nāgakeśara	

Nāḍīca	Corchorus olitorius Linn.
Nārikela	Cocos nucifera Linn.
Nikumbha	
Syn.- Dantī	
Nicula	
Syn.- Hijjala	
Nidigdhikā	
Syn.- Kaṇṭakārī	
Nimba	Azadirachta indica A. Juss.
Nirguṇḍī	Vitex negundo Linn.
Nirdahanī	
Syn.- Mūrvā	
Niśā	
Syn.- Haridrā	
Niṣpāva	Dolichos lablab Linn.
Nīpa	Mitragyna parviflora Korth.
Nīlakahlara	
Syn.- Nīlotpala	
Nīlakuraṇṭaka	Barleria strigosa willd.
Nīlasahacara	
Syn.- Nīlakuraṇṭaka	
Nīlikā	
Syn.- Nilini	
Nīlinī	Indigofera tinctoria Linn.
Nīlī	
Syn.- Nīlinī	
Nīlotpala	
Syn.- Utpala	
Nīvāra	Hygroryza aristata Nees.
Nyagrodha	
Syn.- Vaṭa	
Pañcāṅgula	
Syn.- Eraṇḍa	

Paṭola	Trichosanthes dioica Roxb.
Paṭolī	
Syn.- Paṭola	
Pattaṅga	Caesalpinia sappan Linn.
Pattūra	Celosia argentea var, cristata voss.
Patra	Cinnamomum tamala Nees & Eberm.
Pathyā	
Syn.- Harītakī	
Padma	(flower of) Nelumbo nucifera Gaertn.
Padmaka	Prunus cerasoides D.Don.
Padmakāhvaya	
Syn.- Padmaka	
Padmacāraṭī	
Syn.- Cāraṭī	
Padmā	
Syn.- Bhārgī	
Padmāhva	
Syn.- Padmaka	
Padminī	
(Plant of Padma)	
Panasa	Artocarpus heterophyllus Lam.
Payasyā	
Payoda	
Syn.- Musta	
Paruṣaka	Grewia asiatica Linn.
Parṅāsa	
Syn.- Surasā	
Parpaṭa	Fumaria indica Pugsley
Parvatabheda	
Syn.- Pāṣānabheda	
Palaṅkaṣā	
Syn.- Māṃsī	
guggulu (according to Śivadāsa)	

Palāṇḍu	Allium cepa Linn.
Palāśa	Butea monosperma (Lam.) Kuntze
Pākala	
Syn.- Kuṣṭha	
Pāṭalā	Stereospermum suaveolens DC.
Pāṭali(lī)	
Syn.- Muṣkaka and Pāṭalā	
Pāṭhā	Cissampelos pareira Linn.
Pāmarā	
Syn.- Śaṭī	
Pārasīkayamānikā	Hoyscyamus niger Linn.
Pārijāta	Nyctanthes arbor-tristis Linn.
Pāribhadra	Erythrina indica Linn.
Pārtha	
Syn.- Arjuna	
Pāṣāṇa	
Syn.- Pāṣāṇabheda	
Pāṣāṇabhit	
Syn.- Pāṣāṇabheda	
Pāṣāṇabheda	Bergenia ligulata (Wall.) Engl.
Picumarda	
Syn.- Nimba	
Piṇḍāraka	Randia uliginosa DC.
Piṇḍītaka	
Syn.- Madanaphala	
Pippalī(li)kā	
Syn.- Pippalī	
Pippalī	Piper longum Linn.
Piyāla	Buchanania lanzan Spreng.
Pītadāru	
Syn.- Dāruharidrā	
Pītasahacara	
Syn.- Sahacara	

Pīlu	Salvadora persica Linn.
Puṇḍarīka	
Syn.- Padma	
Putrañjīva(ka)	Putranjiva roxburghii Wall.
Punnāga	Calophyllum inophyllum Linn
Punarnavā	Boerhaavia diffusa Linn.
Pura	
Syn.- Guggulu	
Puskara	
Syn.- Puṣkaramūla	
Puṣkarajaṭā	
Syn.- Puṣkaramūla	
Puṣkaramūla	Inula racemosa Hook.f.
Puṣkarākhya	
Syn.- Puṣkaramūla	
Puṣkarāhva(ya)	
Syn.- Puṣkaramūla	
Puṣpaphala	
Syn.- Kūṣmāṇḍa	
Pūga	Areca catechu Linn.
Pūlānākeśī	Selinum sp.
Pūtīka	
Syn.- Cirabilva	
Pūtīkakarañja	
Syn.- Cirabilva	
Pūraka	
Syn.- Bījapūraka	
Pṛkkā	
Syn.- Spṛkkā	
Pṛthakparṇī	
Syn.- Pṛśniparṇī	
Pṛthvīkā	
Syn.- Upakuñcikā	

Pṛśniparṇī	Uraria Picta Desv.
Peṭikā	Abutilon hirtum(Lam.) Sweet.
Peṭī	
Syn.- Peṭikā	
Potakī	
Syn.- Upodikā	
Pauṇḍraka	
(Variety of Ikṣu)	
Pauṣkara	
Syn.- Puṣkaramūla	
Pauṣkaramūla	
Syn.- Puṣkaramūla	
Prativiṣā	Aconitim palmatum D.Don.
Pratyakpuṣpī	
Syn.- Apāmārga	
Pratyaṅgirā	Acacia lenticularis Ham.
Prapunnāḍa	
Syn.- Cakramarda	
Prapauṇḍarīka	
Praśātikā	Hygroryza sp.
Prasāraṇī	Sida veronicaefolia Lam.
Prāvṛt	
Syn.- Varṣābhū	
Priyaṅgu	Callicarpa macrophylla Vahl.
Priyaṅgu(cereal)	Setaria italica (Linn.)Beauv.
Priyāla	
Syn.- Piyāla	
Plakṣa	Ficus lacor Buch-Ham.
Plava	Cyperus platystylis Br.
Phañjī	Inula Sp.
Phaṇijjhaka	
Phala	
Syn.- Jātīphala and Kaṭphala (According to Śivadāsa)	

Phalgu	Ficus carica Linn.
Phalinī Syn.- Priyaṅgu	
Bakula	Mimusops elengi Linn.
Badara	(Fruit of) Zizyphus mauritiana Lam.
Badarī	(Plant of) Zizyphus mauritiana Lam.
Babbūla	Acacia arabica Willd.
Babbola Variant of Babbūla	
Balā	Sida cordifolia Linn.
Barhiṣṭha Syn.- Bālaka	
Bastagandhā Syn.- Ajagandhā	
Bahuputrikā Syn.- Śatāvarī	
Bahuputrī Syn.- Śatāvarī	
Bahulā Syn.- Elā	
Bahuvāra Syn.- Śleṣmātaka	
Bāṇa Syn.- Nīlakuraṇṭaka	
Bālaka	Valeriana hardwickii Wall.
Bāhlīka Syn.- Kuṅkuma	
Bibhītaka(kī)	Terminalia bellerica Roxb.
Bimbī	Coccinia indica W. & A.
Bilva	Aegle marmelos Corr.
Bījapūra(ka)	Citrus medica Linn.
Bṛhatī	Solanum indicum Linn.
Bṛhatkarañja Syn.- Karañja	

Bṛhatpatra	
Syn.- Tilvaka	
Bola	Commiphora myrrha(Nees)Engle.
Brahmadaṇḍī	Tricholepis glaberrima DC.
Brāhmaṇayaṣṭī	
Syn.- Bhārgī	
Brāhmī	Centella asiatica (Linn.)Urban.
Bhadra	
Syn.- Musta	
Bhadrakāṣṭha	
Syn.- Devadāru	
Bhadraghana	
Syn.- Musta	
Bhadradāru	
Syn.- Devadāru	
Bhadramusta(ka)	
Syn.- Musta	
Bhadraśriya	
Syn.- Candana	
Bhadrāhva	
Syn.- Devadāru	
Bhallāta(ka)	Semecarpus anacardium Linn.
Bhallūka	
Syn.- Śyonāka	
Bhārgī	Clerodendrum serratum (Linn.) Moon.
Bhūtīka	
Syn.- Yavānī	
Bhūnimba	
Syn.- Kirātatikta	
Bhūmikadamba	
Syn.- Alambuṣā (According to Śivadāsa)	
Bhūmikūṣmāṇḍa	
Syn.- Vidārī	

Bhūmyāmalakī	
Syn.- Tāmalaki	
Bhūrja	Betula utilis D.Don.
Bhṛṅga(raja)	
Syn.- Bhṛṅgarāja	
Bhṛṅgarāja	Eclipta alba Hassk.
Makuṣṭha	Phaseolus aconitifolius Jacq.
Maghī	
Magadhajā	
Syn.- Pippalī	
Magadhodbhavā	
Syn.- Pippalī	
Mañjiṣṭhā	Rubia cordifolia Linn.
Maṇḍūkaparṇī	
Syn.- Brāhmī	
Madana	
Syn.- Madanaphala	
Madanakaphala	
Syn.- Madanaphala	
Madanakusumaja	
Syn.- Madanaphala	
Madanakodrava	
(Narcotic variety of Kodrava)	
see - Kodrava	
Madanaphala	Randia spinosa Poir.
Madaphala	
Syn.- Ambasthakī	
Madayantikā	
Syn.- Madayantī	
Madayantī	Lawsonia inermis Linn.
Madhuka	Glycyrrhiza glabra Linn.
Madhuparṇī	
Syn.- Guḍucī	

Madhuyaṣṭika(kā)	
Syn.- Madhuka	
Madhurī	
Syn.- Miśi	
Madhuśigru	Moringa concanensis Nimmo.
Madhūka	Madhuca indica J.F.Gmel.
Madhūlikā	Eleusine carocana Gaertn.
Mayūraka	
Syn.- Apāmārga	
Markaṭī	
Syn.- Kapikacchū	
Marica	Piper nigrum Linn.
Maruvaka	Majorana hortensis Moench.
Malaya	
Syn.- Candana	
Malayū	
Syn.- Kākodumbarikā	
Mallikā	Jasminum sambac Ait.
Masūra	Lens culinaris Medic.
Mahānimba	Melia azedarach Linn.
Mahāpicumarda	
Syn.- Mahānimba	
Mahāpuruṣadantā	
Syn.- Śatāvarī	
Mahāmedā	Polygonatum sp.
Mahārāṣṭri	Spilanthus oleracea Murr.
Mahāśyāmā	Euphorbia acaulis Roxb.
Mahiṣākṣa	
Syn.- Guggulu	
Mahauṣadha	
Syn.- Śuṇṭhī	
Māṃsī	Nardostachys jatamansi DC.
Māgadhika(kā)	
Syn.- Pippalī	

Māgadhī	
Syn.- Pippalī	
Māṇa	
Syn.- Māṇaka	
Māṇa(na)ka	Alocasia indica (Roxb.)Schott.
Mātaṅgapippalī	
Syn.- Gajapippalī	
Mātuluṅga	
Syn.- Bījapūra	
Mādhavī	Hiptage benghalensis Kurz.
Mārkava	
Syn.- Bhṛṅgarāja	
Mārga	
Syn.- Apāmārga	
Mālatī	
Syn.- Jātī	
Māṣa	Phaseolus mungo Linn.
Māṣaparṇī	Teramnus labialis Spreng.
Māṣeṇḍarī	
Syn.- Māṣa	
Miśi(si)	Foeniculum vulgare Mill.
Muñjāta	Orchis latifolia Linn.
Mucakunda	Pterospermum acerifolium Willd.
Muṇḍatikā	
Syn.- Muṇḍitikā	
Muṇḍitikā	Sphaeranthus indicus Linn.
Mudga	Phaseolus radiatus Linn.
Mudgaparṇī	Phaseolus trilobus Ait.
Muraṅgī	
Syn.- Madhuśigru	
Murā	Selinum tenuifolium Wall.
Muśalī	Asparagus adscendens Roxb.
Muṣkaka	Schrebera swietenioides Roxb.

Musta	Cyperus rotundus Linn.
Mustaka	
Syn.- Musta	
Musta	
Syn.- Musta	
Mustāhva	
Syn.- Musta	
Mūrvā	Marsdenia tenacissima W. & A.
Mūla	
Syn.- Mūlaka	
Mūlaka	Raphanus sativus Linn.
Mṛdvīkā	
Syn.- Drākṣā	
Medā	Polygonatum verticillatum All.
Meṣaśṛṅga	
see- Meṣaśṛṅgī	
Meṣaśṛṅgī	Dolichandrone falcata Seem.
Moca	
Syn.- Śālmalī	
Rasāñjana and Kadalī (according to Śivadāsa)	
Mocarasa	(Exudation of) Salmalia malabarica Schott & Endle.
Mocāhva	
Syn.- Mocarasa	
Moraṭa(tā)	Maerua arenaria Hook.f.& Th.
Yamānikā	
Syn.- Yavānī	
Yamānī	
Syn.- Yavānī	
Yava	Hordeum vulgare Linn.
Yavānī	Trachyspermum ammi (Linn.) Sprague.
Yavāsa(ka)	Alhagi camelorum Fisch.
Yaṣṭikā	
Syn.- Madhuka	

Yaṣṭikāhva Syn.- Madhuka	
Yaṣṭī Syn.- Madhuka	
Yaṣṭīmadhuka Syn.- Madhuka	
Yaṣṭyāhva Syn.- Madhuka	
Yāsa(ka) Syn.- Yavāsa	
Yūthikā	Jasminum auriculatum Vahl.
Yūthī Syn.- Yūthikā	
Raktakaravīra Syn.- Karavīra	
Raktacandana	Pterocarpus santalinus Linn.f.
Raktaśāli (A variety of śāli)	
Raktasāra Syn.- Raktacandana	
Raktikā Syn.- Guñjā	
Rakṣoghna Syn.- Sarṣapa	
Rajanī Syn.- Haridrā	
Rambhā Syn.- Kadalī	
Rasa Syn.- Bola	
Rasāñjana	(Solid extract prepared from) Berberis aristata DC.
Rasona	Allium sativum Linn.

Rājadruma	
Syn.- Āragvadha	
Rājapāṭhā	Cyclea arnotii Miers.
Rājavṛkṣa	
Syn.- Āragvadha	
Rājikā	Brassica juncea Czern. & Coss.
Rāṭha	
Syn.- Madanaphala	
Rāmaṭha	
Syn.- Hiṅgu	
Rāsnā	Pluchea lanceolata C.B.Clarke
Ruk	
Syn.- Kuṣṭha	
Rudrajaṭā	
Syn.- Pattūra	
Rudhira	
Syn.- Kuṅkuma	
Rūpikā	
Syn.- Arka	
Rubu(ka)	
Syn.- Eraṇḍa	
Reṇu	
Syn.- Agryailā	
Reṇukā	
Syn.- Hareṇukā	
Rohiṇī	Soymida febrifuga A.Juss.
Rohiṇīkaṭukā	
Syn.- Kaṭukā	
Rohiṣa	Cymbopogon martini (Roxb.)Wats.
Rohitaka	Tecoma undulata G.Don.
Lakṣmaṇā	Cynoglossum lanceolatum Forsk.
Laghu	
Syn.- Aguru	

Lajjā	Mimosa pudica Linn.
Latā	
Syn.- Priyaṅgu	
Latā	
Syn.- Kaṭuka	
(On the basis of indication)	
Latākstūrikā	
Syn.- Kaṭuka	
Lavaṅga	Syzygium aromaticum (Linn.) Merr. & Per.
Lavaṅgavallī	Lavanga scandens Ham.
Lavaṇā	
Syn.- Jotiṣmatī	
Lavalikā	
Syn.- Lavaṅgavallī	
Laśuna	
Syn.- Rasona	
Lāṅgalākhyā	
Syn.- Lāṅgalī	
Lāṅgalikī(kā)	
Syn.- Lāṅgalī	
Lāṅgalī	Gloriosa superba Linn.
Lāmajja(ka)	Vetiveria sp.
Lodhra	Symplocos racemosa Roxb.
Loha	
Syn.- Aguru	
Lohitayaṣṭikā	
Syn.- Mañjiṣṭhā	
Lohitaśāli	
Syn.- Rakataśali	
Lauha	
Syn.- Aguru	
Vaṃśa	Bambusa arundinacea Willd.
Vaṃśalocana	(A product of) Bambusa arundinacea Willd.

Vaktra	
Syn.- Tagara	
Vakra	
Syn.- Tagara	
Vaṅgasena	
Syn.- Agastya	
Vaca	
Syn.- Vacā	
Vacā	Acorus calamus Linn.
Vajravallī	
Syn.- Asthisaṃhāra	
Vaṭa	Ficus bengalensis Linn.
Vatsa(ka)	
Syn.- Kuṭaja	
Vatsakaphala	
Syn.- Indrayava	
Vatsakabīja	
Syn.- Indrayava	
Vatsādanī	Tinospora sinensis (Lour.) Merill.
Vatsāhva	
Syn.- Kuṭaja	
Vanakārpāsikā	Thespesia lampas Dalz. & Gibs.
Vanitā	
Syn.- Priyaṅgu	
Vandāka	Loranthus longiflorus Desr.
Vandhyākarkoṭa	
(Male plant of karkoṭaka)	
see- Karkoṭa	
Vanya	
Syn.- Plava	
Vayaḥsthā	
Syn.- Brāhmī	
Varāṅga	
Syn.- Tvak	

Varī	
Syn.- Śatāvarī	
Varuṇa	Crataeva nurvala Buch-Ham.
Vardhamāna	
Syn.- Eraṇḍa	
Varṣābhū	
Syn.- Punarnavā	
Varṣāhva	
Syn.- Punarnavā	
Valkala	
Syn.- Tvak	
Vaśira	Eleusine aegyptiaca Desr.
Vasuka	Osmanthus fragrans Lour.
Vahni	
Syn.- Citraka	
Vāṃśī	
Syn.- Vaṃśalocana	
Vāgujī	Psoralea corylifolia Linn.
Vājikarṇa	
Syn.- Aśvakarṇa	
Vājigandhā	
Syn.- Aśvagandhā	
Vāṭyāla(ka)	
Syn.- Balā	
Vānarī	
Syn.- Kapikacchū	
Vāpya	
Syn.- Kuṣṭha	
Vāyasajaṅghā	
Syn.- Kākajaṅghā	
Vāyasī	
Syn.- Kākamācī	
Vāraṇapippalī	
Syn.- Gajapippalī	

Vārāhī	Dioscorea bulbifera Linn.
Vārida	
Syn.- Musta	
Vārtākinī	
Syn.- Bṛhatī	
Vārttāku	Solamum melongena Linn.
Vāṣpikā	
Vāsaka	
Syn.- Vāsā	
Vāsā	Adhatoda vasica Nees.
Vāstu (stū)ka	Chenopodium album Linn.
Vikaṅkata	Flacourtia indica Merr.
Vikasā(ṣā)	
Syn.- Mañjiṣṭhā	
Vikrāntā	
Viḍaṅga	Embelia ribes Burm.f.
Vidārigandhā	
Syn.- Śālaparṇī	
Vidārī	Pueraria tuberosa DC.
Viśalyā	
Syn.- Dantī	
Viśālā	Trichosanthes bracteata (Linn.) Voigt.
Viśva	
Syn.- Śuṇṭhī	
Viśvābheṣaja	
Syn.- Śuṇṭhī	
Viśvāhva	
Syn.- Śuṇṭhī	
Viśvauṣadha(dhi)	
Syn.- Śuṇṭhī	
Viṣa	Aconitum ferox Wall ex Seringe.
Viṣā	
Syn.- Ativiṣā	

Vīraṇa	
(Plant of uśīra)	
Vīratara	Dichrostachys cinerea W. & A.
Vīrā	Habenaria sp.
Vṛkṣaka	
Syn.- Kuṭaja	
Vṛkṣādanī	
Syn.- Vandāka	
Vṛkṣāmla	Garcinia indica Chois.
Vṛddhadāraka	Lettsomia setosa Roxb. Ipomoea pes-caprae SW. (On the basis of indication)
Vṛddhi	Habenaria sp.
Vṛścikālī	Tragia involucrata Linn.
Vṛścīra	Boerhaavia verticillata Poir
Vṛṣa(ka)	
Syn.- Vāsā	
Veṇu	
Syn.- Vaṃśa	
Vetasa	Salix caprea Linn.
Vetasāmla	
Syn.- Amlavetasa	
Vetra	Calamus tenuis Roxb.
Vella	
Syn.- Viḍaṅga	
Vaidehī	
Syn.- Pippalī	
Vyāghra	
Syn.- Kaṇṭakārī	
Vyāghrī	
Syn.- Kaṇṭkārī Ahiṃṣra (according to Śivadāsa)	
Vyādhi	
Syn.- Kuṣṭha	

Vyādhighāta	
Syn.- Āragvadha	
Vrīhi	
(A variety of rice)	
Śakra (yava)	
Syn.- Indrayava	
Śaṅkhapuṣpikā	
Syn.- Śaṅkhapuṣpī	
Śaṅkhapuṣpī	Convolvulus pluricaulis Chois.
Śaṅkhinī	Euphorbia dracunculoides Lam.
Syn.- Śaṅkhapuṣpī	
(on the basis of indication)	
Śaṭī	Hedychium spicatum Buch-Ham.
Śaṇa	Crotalaria juncea Linn.
Śataparvā	
Syn.- Dūrvā	
Śatapuṣpā	Peucedanum graveolens Linn.
Śatapuṣpikā	
Syn.- Śatapuṣpā	
Śatamūlī	
Syn.- Śatāvarī	
Śatāvarī	Asparagus racemosus Willd.
Śatāhvā	
Syn.- Śatapuṣpā	
Śamī	Prosopis spicigera Linn.
Śa(sa)mpāka	
Syn.- Āragvadha	
Śara	Saccharum munja Roxb.
Śarapuṅkhā	Tephrosia purpurea pers.
Śarkarā	Themeda arundinacea(Roxb.)Ridley.
Śallakī	Boswellia serrata Roxb.
Śallakīrasa	
Syn.- Kunduru	

Śalyaka	
Syn.- Madanaphala	
Śaśāṅkalekhā	
Syn.- Vāgujī	
Śaśi	
Syn.- Karpūra	
Śaśirekhā	
Syn.- Vāgujī	
Śāka	Tectona grandis Linn.f.
Śākhoṭaka	Streblus asper Lour.
Śārada	
Syn.- Saptaparṇa	
Sāri	
Syn.- Sārivā	
Śā(sā)rivā	Hemidesmus indicus R.Br.
Śarṅgeṣṭā	Dregia volubilis Benth. ex. Hook.f.
Śābaraka	
Syn.- Tilvaka	
Śābarakalodhra	
Syn.- Tilvaka	
Śāla	Shorea robusta Gaertn.f.
Śālaniryāsa	(Gum resin of) shorea robusta Gaertn.f.
Śālaparṇī	Desmodium gangeticum DC.
Śāli (A variety of rice)	Oryza sativa Linn.
Śāliñca	Alternanthera sessilis (Linn.) R.Br.
Śāliparṇī	
Syn.- Śālaparṇī	
Śālūka	(Root of) Nelumbo nucifera Gaertn.
Śālmali	Salmalia malabarica Schott. & Endl.
Śiṃśapā	Dalbergia sissoo Roxb.
Śikharī	
Syn.- Apāmārga	

Śikhī	
Syn.- Citraka	
Śigru	Moringa oleifera Lam.
Śitimāraka	Celosia argentea Linn.
Śimbī	Dolichos lablab Linn.
Śirīṣa	Albizzia lebbeck Benth.
Śilābheda	
Syn.- Pāṣāṇabheda	
Śivā	
Syn.- Harītakī	
Śivātikā	
Syn.- Vṛścīra	
Śīta	
Syn.- Karpūra	
Śitalī (Śihali)	Limnanthemum cristatum Griseb
Sukataru	
Syn.- Śirīṣa	
Śukanāsā	Corallocarpus epigaeus Benth ex. Hook.f.
Śukanāsikā	
Syn.- Śukanāsā	
Śuṇṭhī	Zingiber officinale Roscoe.
Śubhā	
Syn.- Vaṃśalocana	
Śūkarī	
Syn.- Vārāhī	
Śūkaśimbī	
Syn.- Kapikacchū	
Śū(sū)raṇa	Amorphophallus companulatus Blume.
Śṛgālakaṇṭaka	Argemone mexicana Linn ?
Śṛgālakolī	Zizyphus oenophia Mill.
Śṛṅgabera	
Syn.- Śuṇṭhī	
Śṛṅgātaka	Trapa natans Linn. var. bispinosa (Roxb.) Makina.

Śṛṅgī	
Syn.- Karkaṭaśṛṅgī	
Śephālikā	
Syn.- Pārijāta	
Śephālī	
Syn.- Pārijāta	
Śelu	
Syn.- Śleṣmātaka	
Śairīya	
Syn.- Sahacara	
Śailaja	
Syn.- Śaileya	
Śaileya(ka)	Permelia perlata Ach.
Śaiva(vā)la	Ceratophyllum demersum Linn.
Śobhāñjana(ka)	
Syn.- Śigru	
Śyāmā	Ipomoea petaloidea Chois.
Also syn. Priyaṅgu	
Śyāmā	Ichnocarpus frutescens R.Br.
(Śyamālatā)	
Śyāmāka	Echinochloa frumentacea Linn.
Śrāvaṇī	
Syn.- Muṇḍitikā	
Śrī	
Syn.- Śrīvāsa	
Śrīcandana	
Syn.- Candana	
Śrīparṇī	
Syn.- Kāśmarī	
Śrīpuṣpa	A kind of lotus
See-Padma	(According to Śivadāsa)
Śrīphala	
Syn.- Bilva	

Śrivāsa	(Oleo-resin of) Pinus roxburghii Sargent.
Śrivāsa-khoṭi See.- Srīvāsa	
Śrīveṣṭaka Syn.- Śrīvāsa	
Śreyasī Syn.- Rāsnā	
Śryāhva Syn.- Śrīvāsa	
Ṣleṣmātaka	Cordia myxa Roxb.
Śvadaṃṣṭrā Syn.- Gokṣura	
Śvadaṃṣṭrikā Syn.- Gokṣura	
Śvetakaravīra (A variety of Karavīra) See- Karavīra	
Śvetagirikarṇikā (White-flower variety of Girikarṇikā) See-Girikarṇikā	
Śvetajayantī Syn.- Tarkārī	
Śvetabalā	Sida rhomboidea Roxb.
Śvetamarica	(Decorticated and dried fruits of) pipper nigrum Linn.
Śvetavarṣābhū Syn.- Vṛścīra	
Śvetavāṭyāla Syn.- Śvetabalā	
Śvetasarja Syn.- Sarja	
Śvetasarṣapa Syn.- Sarṣapa	

Śvetā	
Syn.- Śveta Gririkarṇikā	
Śvetonmatta	
(White-flower variety of Dhustūra)	
See.- Dhustūra	
Śyonāka	Oroxylum indicum vent.
Ṣaḍgranthā	
Syn.- Vacā	
Ṣaḍgranthi	
Syn.- Vacā	
Ṣaṣṭika	
Satīna	Pisum sativum Linn.
Saptacchada	
Syn.- Saptaparṇa	
Saptadala	
Syn.- Saptaparṇa	
Saptaparṇa	Alstonia scholaris R.Br.
Saptalā	Euphorbia pilosa Linn.
Samaṅgā	
Syn.- Lajjā	
Sa(śa)maṭha	Amaranthus blitum var. oleracea Duthie
Sa(śa)mpāka	
Syn.- Āragvadha	
Saraṇā	
Syn.- Trivṛt	
Saraṇī	
Syn.- Prasāraṇī	
Sarala	Pinus roxburghii Sargent.
Saralā	
Syn.- Trivṛt	
Sarja	Vateria indica Linn.
Sarjarasa	(Gum-resin of) Vateria indica Linn.
Sarṣapa	Brassica campestris Linn. Var. sarson Prain.

Sahakāra
Syn.- Āmra
Sahacara — Barleria prionitis Linn.
Sahadevā — Sida rhombifolia Linn. Mast.
Sahā
Syn.- Mudgaparṇī
Sā(śā)talā
Syn.- Saptalā
Siṃhapucchī — Uraria lagopoides DC
Siṃhāsya
Syn.- Vāsā
Siṃhī
Syn.- Kaṇṭakārī
Sikaṭī
Sitacandana
Syn.- Candana
Sitajīra(ka)
Syn.- Jīraka
Sitapañkaja
(White-flower variety of lotus)
Sitabalā
Syn.- Śvetabalā
Sitamarica
Syn.- Śvetamarica
Sitamāraka
Syn.- Śitimāraka
Sitā
(A variety of Dūrvā)
see.- Dūrvā
Siddhārtha(ka) — Yellow variety of Sarṣapa
Sindhuvāra — White-flower variety of Vitex negundo Linn.
Sindhuvārikā
Syn.- Sindhuvāra

Sudarśanā	Crinum latifolium Linn.
Sudhā	
Syn.- Snuhī	
Suniṣaṇṇaka	Marsilia minuta Linn.
Sundarī	
Syn.- Priyaṅgu	
Sumanā(ḥ)	
Syn.- Mālatī	
Suradāru	
Syn.- Devadāru	
Surabhi	
Syn.- Bakula	
(On the basis of indication)	
Surasa	
Syn.- Surasā	
Surasā	Ocimum sanctum Linn.
Surāhva(ya)	
Syn.- Devadāru	
Surāhvā	
Syn.- Indravāruṇī	
Suṣavī (Pānīyavallī)	Vitis latifolia Roxb.
also syn.- Kāravellaka	
Sūkṣmailā	
Syn.- Elā	
Suvarcalā	Cleome icosandra Linn.
Suvarcalā Śveta	Gynandropsis gynandra(Linn) Briquet.
(Jāmātṛ Sūryāvarta)	
Sūryāvarta	
Syn.- Suvarcalā	
Sevya	
Syn.- Uśīra	
Somarājī	
Syn.- Vāgujī	

Somavalka	
Syn.- Kadara	
Sthalapadma	
Syn.- Māṇaka	
(According to Śivadāsa)	
Sthauṇeye(ka)	Taxus baccata Linn.
Snuk	
Syn.- Snuhī	
Snuhā	
Syn.- Snuhī	
Snuhī	Euphorbia neriifolia Linn.
Spṛkkā	Delphinium zalil Aitch. & Hemsl.
Sphuṭaka	
Srāvinī	
Svaguptā	
Syn.- Kapikacchū	
Svayaṅguptā	
Syn.- Kapikacchū	
Svarṇakṣīrī	Euphorbia thomsoniana Boiss.
Svādukaṇṭaka	
Syn.- Vikaṅkata	
Haṃsapādī	Adiantum lunulatum Burm.
Haṃsāhvayā	
Syn.- Haṃsapādī	
Hayagandhā	
Syn.- Aśvagandhā	
Hayamāra(ka)	
Syn.- Karavīra	
Hayāri	
Syn.- Karavīra	
Haridrā	Curcuma longa Linn.
Harītakī	Terminalia chebula Retz.
Havu(pu)ṣā	Juniperus communis Linn.

Hareṇu(kā)	
Syn.- Agryailā	
Halī	
Syn.- Lāngalī	
Hastikarṇa	
Syn.- Hastikarṇapalāśa	
Hastikarṇapalāśa	Leea macrophylla Roxb. ex Hornem.
Hastipippalī	
Syn.- Gajapippalī	
Hiṃsrā	Capparis sepiaria Linn.
Hiṅgu	Ferula narthex Boiss.
Hiṅgupatrikā	Gardenia gummifera Linn.
Hijjala	Barringtonia acutangula Gaertn
Hilamocī(kā)	Enhydra fluctuans Lour.
Hutāśa	
Syn.- Citraka	
Hema (puṣpa)	
Syn.- Nāgakeśara	
Haimavatī	Iris ensata Thunb.
Hrībera	
Syn.- Bālaka	

APPENDIX - II

Units of weight with metric equivalents

1 Guñjā (Raktikā)		= 125 mg.
8 Guṅgā	=1 māṣa	= 1 gm.
5 Māṣa	=1 Kola	= 5 gm.
2 Kola	=1 Kaṛṣa(Tolā)	= 10 gm.
2 Kaṛṣa	=1 Śukti	= 20 gm.
2 Śukti	=1 Pala	= 40 gm.
2 Pala	=1 Prasṛta	= 80 gm.
2 Prasṛta	=1 Kuḍava	= 160 gm.
4 Kuḍava	=1 Prastha	= 640 gm.
4 Prastha	=1 Āḍhaka	= 2.56 kg.
4 Āḍhaka	=1 Droṇa	= 10.24 kg.
2 Droṇa	=1 Śūrpa	= 20.48 kg.
2 Śūrpa	=1 Droṇī	= 40.96 kg.
4 Droṇī	=1 Khārī	= 163.84 kg.
100 Pala	=1 Tulā	= 4 kg.

INDEX

I. Diseases

A

Abdominal enlargement 313
Abhinyāsa Jvara 28
Abhiṣyanda 492
Abdominal lump 266
Abscess 355
Abscess in throat 462
Acaraṇā 530
Acid gastritis 413
Adhidanta 455
Adhijihvikā 462
Adhimantha 383,489,492
Ādhmāna 188
Adhovāta 602
Adhruṣa 461
Advanced cataract 504
Āgantujvara 41
Agnimāndya 91
Āhiṇḍikā 547
Ahipūtanaka 438
Ajagallikā 435
Ajakā 496
Alajī 383
Alasaka 101,437
Alcoholism 167
Allergic manifestations 411
Alopecia 446
Āmaja śūla 243
Āmājīrṇa 98
Āmātisāra 47
Āmavāta 227
Amlādhyuṣita 492
Amlapitta 413
Anaemia 106
Ānāha 263
[illegible]piḍakā 514
Anāmaka 547
Anantavāta 522
Añjananāmikā 511
Annadrava śūla 258
Anorexia 153
Antrālajī 435
Anuśayī 435
Anyatovāta 491
Apacī 342
Apasmāra 179
Arbuda 342,384
Arddhāvabhedaka 521
Ardita 185
Arjuna 492,510
Arma 509
Arocaka 153
Arśa 73
Ārtava 532
Aruci 8
Aruṃṣikā 444
Aryakā mātṛkā 563
Aśmarī 293
Asṛgdara 525
Aṣṭhīlā 188,383
Atisāra 47
Avapāṭikā 439
Avraṇa śukra 493
Āvṛta vāta 192

B

Bādhirya 472
Bāhuśoṣa 186
Bālagraha 557
Bālaroga 546
Bhagandara 376
Bhagna 386
Bhedya rogas 514
Bhinnayoni 531
Bhūtajvara 41
Bisagranthi 511
Bleeding piles 84
Blepharospasm 511
Boil in palate 461
Bradhna 337
Burning sensation 170

C

Calculus 293
Caries 457
Carmakīla 440
Cervical adenitis 342
Cervical erosion 531
Chardi 156
Chedya rogas 514
Chicken pox 428
Chinnakarṇa-sandhānavidhi 477
Chronic coryza 478
Cippa 437
Colic 237
Colic during or after digestion 249
Consumption 124
Corn 437
Corneal opacity 494
Corneal ulcer 492
Coryza 480
Cough 135
Cyst 342

D

Dāha 170
Dandruff 444
Dantacāla 454
Dantaharṣa 457

Dantanāḍī 456
Dantamūla-roga 453
Dantapupputaka 454
Danta-roga 457
Danta-śarkarā 457
Dantavaidarbha 455
Dāruṇaka 444
Deafness 472
Discharge from ear 473
Defects of vision 497
Dental sinus 456
Diarrhoea 47
Diarrhoea associated with fever 43
Dīpta 480
Diphtheria 461
Diseases of children 546
Diseases of ear 470
Diseases of eye 483
Diseases of gums 453
Diseases of lips 452
Diseases of mouth 464
Diseases of nose 478
Diseases of palate 460
Diseases of teeth 457
Diseases of throat 461
Diseases of tongue 459
Disorders of female genital tract 529
Dysmenorrhoea 531
Dyspnoea 145
Dysuria 283

E

Ear-abscess 476
Ear-ache 470
Ear-wax 475
Effluvium seminis 530
Ekavṛnda 462
Elongated uvula 460
Enlarged tonsils 461
Epilepsy 179
Eruptions 421
Erysipelas 421
Extra tooth 455

F

Fainting 165
Fever 3
Filaria 351
Foetid discharge from ear 473
Foetid smell of nose 478
Fracture 386
Freckles 440
Frog's poisoning 571

G

Galagaṇḍa 342
Galarohiṇī 461
Galaśuṇḍī 460
Galavidradhi 462
Gaṇḍamālā 342
Garaviṣa 570
Gardabhī 435
Ginigivitis 455
Glaucoma 489
Godhāviṣa 571
Goitre 342
Grahaṇī 61
Granthi 342
Grathita 383
Greying of hairs 448
Gudabhraṃśa 438
Gudapāka 552
Guinea worm 427
Gulma 266
Gum-boil 454

H

Halīmaka 110
Head-disease 516
Heart-disease 278
Hemicrania 522
Hiccough 145
Hikkā 145
Hoarseness of voice 150
Hṛdagata vāta 186
Hṛdroga 278

I

Indralupta 446
Indravṛddhā 435
Inflammation 358
Inflammation in breast 544
Inflammation of palate 461
Innate haemorrhage 113
Insanity 172
Intense agni 92
Irivelli 435
Itching in ear 475

J

Jālagardabha 435,438
Jatumaṇi 440
Jaundice 109
Jhiñjhinīvāta 191
Jihvā-roga 459
Jihvājāḍya 459
Jīrṇajvara 30
Jvara 3
Jvarātisāra 43

K

Kacchapikā 435
Kāmukā mātṛkā 566
Kaṇṭha-roga 461

Kaṇṭhaśālūka 462
Kaphānāha 514
Karṇagūtha 475
Karṇakaṇḍū 475
Karṇakṣveḍa 472
Karṇamūlaśotha 29
Karṇanāda 472
Karṇapāka 474
Karṇapratīnāha 474
Karṇa-roga 470
Karṇasrāva 473
Karṇaśula 470
Karṇa-vidradhi 476
Karṇinī 531
Kāsa 135
Kaṭapūtanā mātṛkā 561
Khallī 191
Kikkiśa 541
Kodravadi-mada 169
Koṭha 411
Krimi 103
Krimidanta 457
Krimikarṇa 475
Kroṣṭuśirṣa 191
Kṣavathu 479
Kṣudraroga 435
Kubjaroga 187
Kukkuraviṣa 571
Kumbhakāmalā 110
Kumbhīkā 383
Kūrma 461
Kuṣṭha 390
Kusuma 494

L

Lekhya rogas 514
Leprosy and skin diseaseas 390
Lichen 437
Likhita 384
Liṇganaśa 504
Liver 322

M

Madātyaya 167
Maggots in ear 475
Maggots in nose 481
Makkalla 541
Mānasa jvara 41
Maṇḍūkaviṣa 571
Māṃsapāka 384
Manyāstambha 185
Maśaka 440
Masūrikā 428
Menorrhagia 525
Metrorrhagia 525
Migraine 522
Mīnaviṣa 571
Minor diseases 435
Mole 440
Mṛdita 384
Mūḍhā 384
Mukhamuṇḍitika mātṛkā 560
Mukhapāka 465
Mukha-roga 464
Mūrcchā 165
Mutrāghāta 289
Mutrakṛcchra 283

N

Nābhiśotha 546
Nāḍīvraṇa 372
Nagaṇa 511
Naktāndhya 506
Nandā mātṛkā 558
Nāsākrimi 481
Nasal polypus 482
Nāsānāha 480
Nāsāpāka 479
Nāsā-roga 478
Nāsārśa 482
Naṣṭārtava 532
Netrapāka 489
Netra-roga 483
Netrasrāva 511
Night blindness 506
Nīlikā 440
Nimeṣa 511
Nirṛtā mātṛkā 565
Niruddhaprakaśa 439
Nyaccha 440

O

Obesity 308
Oedema 328
Oṣṭha-roga 452
Otitis 474
Otorrhoea 473

P

Pādadāha 190
Pādadarī 436
Pādaharṣa 191
Padminīkaṇṭaka 438
Pain in breasts 544
Pakṣmoparodha 513
Palita 447
Panasikā 435
Pāṇḍuroga 106
Pannus 492
Paraphimosis 439
Paraplegia 224
Paridara 455
Pariṇāmaśūla 249
Pariplutā 530
Parivarttikā 439
Pāṣāṇagardabha 435
Phimosis 440

Pilipicchikā mātṛkā 565
Pilla 512
Pīnasa 478
Plīha 322
Poisoning 568
Poison of scorpion 571
Polydipsia 161
Pothakī 514
Prameha 300
Pratiśyāya 480
Pratitūnī 187
Pratyādhmāna 188
Pratyaṣṭhīlā 188
Proctitis 552
Prolapse of rectum 438
Pruritus ani 438
Psychic fever 41
Pterygium 509
Pūga-mada 169
Puṣkarī 384
Pūtanā mātṛkā 559
Pūtikarṇa 473,475
Pūtināsā 478
Pūtiyoni 530
Pyorrhoea 457

R

Rabies 571
Raktapitta 113
Rasaśeṣājīrṇa 99
Retention and supression of urine 289
Rhinitis 480

S

Śakunikā mātṛkā 562
Saṃyogaja viṣa 570
Ṣāṇḍhya 602
Saṅghāta 461
Śilāyu 462
Śaṅkhaka 522
Sannipātajvara 23
Śarkarā 440
Sarṣapī 383
Sarvasara 464
Śataponaka 384
Scrofula 342
Scrotal enlargement 337
Śirāharṣa 492(2)
Śiraḥkampa 523
Śirogata vāta 184
Śiroroga 516
Śirotpāta 492(2)
Śītapitta 411
Ślīpada 351
Snāyuka 427
Sneezing 479
Snehājīrṇa 605
Soft chancre 380
Śoṇitārbuda 384
Śotha 328
Sparśahāni 384
Specific vātika disorder 183
Spleen 322
Stanakīla 544
Stana-vidradhi 544
Staphyloma 496
Sthaulya 308
Stomatitis 465
Striroga 537
Stye 511
Subconjunctival haemorrhage 492
Śūkadoṣa 383
Śuktikā 510
Śūla 237
Sunandā mātṛka 559
Suppuration in eyes 489
Suppurative otitis 474
Suppurative rhinitis 479
Suptivāta 192
Sūryāvarta 521
Śuṣkarevātī mātṛkā 562
Sūtikā mātṛkā 564
Svarabheda 150
Śvāsa 145

T

Tālupāka 461
Tālupupputa 461
Tālu-roga 460
Tartar of teeth 457
Tear in prepuce 439
Tilakālaka 384,440
Timira 497
Tinnitus 472
Tonsillitis 462
Trembling of head 523
Trichiasis 513
Tṛṣṇā 161
Tuṇḍikerī 461
Tūnī 187
Tumour 342
Tvakpāka 384

U

Udara 313
Udarda 411
Udāvartta 259,531
Unmāda 172
Upadaṃśa 380
Upajihvā 460
Upakuśa 455
Upanāha 510
Upaplutā 530
Upward movement of vāyu 259
Uraḥkṣata 134

Uriticaria 411
Ūrustambha 224
Uttamā 384

V

Vāgdhamanīgata vāta 185
Vaginal tear 531
Vakṣastrikādigatavāta 185
Valmīka 436
Vāminī 530
Varāhadaṃṣṭrā 450
Varaṭīviṣa 571
Vātakaṇṭaka 191
Vātaparyaya 491
Vātarakta 215
Vātavyādhi 183
Vesicles on scalp 444
Vidagdhājīrṇa 98
Vidārikā 435
Vidradhi 355,384
Viṣa 568
Viṣamajvara 31
Visarpa 421
Visphoṭa 421
Viṣṭabdhājīrṇa 98
Visūcikā 100
Viśvācyādi 190
Vivṛtā 435
Vomiting 156
Vraṇaśotha 358
Vraṇaśukra 492
Vṛddhi 337
Vṛścikaviṣa 571
Vyāditāsya 185
Vyaṅga 440

W

Women's diseases 537
Worms 103

Y

Yakṣmā 124
Yakṛt 322
Yavaprakhyā 435
Yoniśūla 541
Yonivyāpad 529
Yuvānapiḍakā 440

INDEX

II. Drug Formulations

A

Akṣādi cūrṇa 249
Agastyaharītakī 143
Agnighṛta 96
Agnimantha-prayoga 411
Agnimukha cūrṇa 94
Agnimukha lauha 89
Aṅkoṭhamūla-prayoga 551
Aṅkoṭha-vaṭaka 54
Aṅgāraka taila 40,369
Ajāpañcaka ghṛta 132
Ajagandhādi pralepa 359
Ajagandhādi lepa 423
Ajamodādi cūrṇa 151
Ajamodādya vaṭaka 232
Ajājyādi 329
Atasīkusumādi yoga 115
Atibalā-kvātha 286
Aparājita dhūpa 34
Aparājita leha 135
Apāmārgakṣāra-taila 472
Apāmārgakṣārādi lepa 74
Apāmārganavanīta 521
Apāmārgasvarasa-prayoga 365
Apāmārgādi taila 520
Abhayā-prayoga 75,116
Abhayādi 100,328
Abhayādi kalka 146
Abhayādi cūrṇa 399
Abhayādi vartti 363
Abhayādya modaka 616
Abhayāleha 98
Abhayā-lauha 248
Abhāvita nimbataila 449
Abhijita taila 509
Amṛtabhallātaka 595
Amṛtāguggulu 221,226
Amṛtā-ghṛta 233
Amṛtādi 424
Amṛtādi cūrṇa 229
Amṛtādi kvātha 283,431, 542,543
Amṛtādi vaṭikāguggulu 368
Amṛtādya guggulu 309
Amṛtādya ghṛta 218
Amṛtādya taila 344
Amṛtāṣṭaka kvātha 20
Amlīkādi kavala 154
Ayastilādi modaka 107
Arkakṣīrādi lepa 73
Arkatvagādi 141
Arkapatra-svarasa 471
Arka-lavaṇa 318
Arjuna-ghṛta 282
Arjuna-cūrṇa 279
Arjuna-prayoga 280
Arjunādi kṣīrayoga 279
Alaktaka-sveda 555
Alambuṣādya cūrṇa 229
Alambuṣā-svarasa 344
Amṛtasāra lauha 378
Avalgujabīja cūrṇa 398
Avalgujabījādi lepa 400
Aśoka-kṣīra 525
Aśvagandhā-ghṛta 556
Aśvagandhā-cūrṇa 318
Aśvagandhā-taila 600
Aśvagandhā-rasāyana 576
Aśvagandhādi 125
Aśvagandhādi kṣīra 532
Aśvagandhādi taila 199
Aśvagandhādi leha 125
Aśvagandhādya ghṛta 194
Aśvatthatvagādi lepa 553
Aśvatthavalkalajala 159
Aśvatthādi pralepa 345
Aśvamāra-taila 345
Aṣṭakaṭvara taila 227
Aṣṭapala ghṛta 65
Aṣṭamaṅgala ghṛta 556
Aṣṭāṅga dhūpa 33
Aṣṭāṅga lavaṇa 168
Aṣṭādaśaśatika prasāraṇitaila 207
Aṣṭādaśāṅga nārikelakhaṇḍa 242
Aṣṭādaśāṅga māṣataila 200
Aṣṭāṅgāvalehikā 25
Asthisaṃhārādi cūrṇa 387

Ā

Āgāradhūmādi lepa 570
Āgāradhūmādi vartti 261
Āgāradhūmādya taila 382
Āṭarūṣakādi kvātha 115
Ādityapakva ghṛta 339
Ādityapāka guḍūcītaila 447
Ādityapāka-gugguluvaṭaka 191
Ādityapāka taila 409
Ābhā-guggulu 388
Āmalaka-cūrṇa 151
Āmalaka-prayoga 421
Āmalakādi lepa 517
Āmalakī-rasāyana 596
Āmalakyādi kaṣāya 16
Āmrādi kaṣāya 163
Āmrasārādi lepa 553

Āmrāsthyādi leha 549
Āragvadhaśiphā-prayoga 344
Āragvadhādi kaṣāya 22
Āragvadhādi lepa 423
Āragvadhādi vartti 372
Āragvadhādya taila 405,536
Āyāmakāñjika 69
Ārdraka-svarasa 138

I

Ikṣvākubījādi vartti 532
Ikṣvālikādi kṣīra 134
Indrayava-kvātha 52
Indrāśana-cūrṇa 399
Irimedādya taila 467

U

Ugrādi dhūpa 429
Uccaṭā-cūrṇa 597
Utpalādi cūrṇa 45,114
Utpalaṣaṭka peyā 43
Udakaṣaṭpala ghṛta 83
Upodikākṣāra-taila 436
Upodikā-prayoga 349
Uśīrādi kvātha 44

Ū

Ūṣakādi gaṇa 294

E

Ekaviṃśatika guggulu 402
Ekādaśaśatika prasāraṇītaila 207
Eḍagajādi lepa I 395
Eḍagajādi lepa II 395
Eraṇḍataila-prayoga 189,190, 227,241,267,338,617
Eraṇḍadvādaśaka 247
Eraṇḍaphalādi—pāyasadvaya 189
Eraṇḍamūla-kṣīra 38
Eraṇḍasaptaka kvātha 246
Eraṇḍādi 238
Ervārubījādi cūrṇa 284
Ervārubījādi kalka 289
Elādi kvātha 296
Elādi guḍikā 116
Elādi cūrṇa 159,287,290
Elādi taila 195
Elādi mantha 128
Elādi leha 287
Elādyudvarttana 412

Ai

Aindri-prayoga 344
Aindrīmūla-cūrṇa 339

KA

Kaṃsaharītakī 335
Kakubhādi modaka 125
Kaṅgunikāmūla-cūrṇa 373
Kañcaṭādi kvātha 51
Kaṭaṅkaṭeryādi 302
Kaṭabhyādi 570
Kaṭukādi 217
Kaṭukādi kvātha 16,463
Kaṭukā-prayoga 21
Kanaka taila 442
Kaṭphalādi 138
Kaṅādi rasakriyāñjana 503
Kaṇā-prayoga 506
Kaṇādi leha 552
Kaṇṭakarī-kvātha 139
Kaṇṭakāryādi kvātha 19
Kaṇṭakārī-ghṛta 142,151
Katakādyañjana 492
Kapitthādi kṣīra 537
Kapitthādi khaṇḍa 93
Kapitthāṣṭaka cūrṇa 65
Karañjādi kvātha 100
Karañjādya ghṛta 369,382
Karañjabījādi lepa 390
Karabhavāruṇīmūla lepa 602
Karavīrādya taila 379,482
Karavīra-taila 397
Karavīrarasāścyotana 484
Karkaṭa-ghṛta 459
Karkārukarasa-nasya 342
Karpūra-prayoga 290,365
Karpūrādi taila 536
Kalahaṃsa 155
Kalāyaguḍikā 257
Kaliṅgādi kvātha 13,44
Kaliṅgādi cūrṇa 53
Kaliṅgādi taila 479
Kaliṅgādya guḍikā 45
Kaliṅgādyavapīḍa 479
Kalitaruphalādi cūrṇa 151
Kalyāṇaguḍa 69
Kalyāṇaka-leha 185
Kaśervādi 487
Kaśervādi kṣīra 538
Kaśervādi cūrṇa 538
Kaśervādi pralepa 422
Kākajanghāmūla-prayoga 29
Kākajaṅghādi yoga 125
Kākamāci-dhūpa 512
Kākolyādi kṣīra 151,387
Kākolyādi ghṛta 505
Kāṅkāyana guḍikā 272
Kāṅkāyana modaka 77
Kāñcanāra-kvātha 344
Kāñjikaṣaṭpalaka ghṛta 234
Kāntakrāmaka-lepa 365
Kāmadeva ghṛta 119
Kāyasthādi vartī 180
Kāravyādi kvātha 28
Kāravyādi guḍikā 154
Kārpāsāsthyādi dhūpa 177
Kārpāsīphalarasa 473

Kālaka cūrṇa 463
Kālīyakādi pralepa 371
Kālīyakādi lepa 441
Kāleyādi lepa 15
Kāśīśādi rasakriyā 509
Kāśīśādi lepa 450
Kāśīśādya taila 545
Kāśmaryādi śīta 161
Kirātatiktādi kaṣāya 18
Kirātatiktādi cūrṇa 52
Kirātādi kvātha 11,46
Kuṅkuma-kalka 289
Kuṅkumādi guḍikā 571
Kuṅkumādi nasya 521
Kuṅkumādya taila 442
Kuṭaja-puṭapāka 57
Kuṭajaleha 54,58,84
Kuṭajarasakriyā 85
Kuṭajādi 302
Kuṭajādi kaṣāya 53
Kuṭajādi kvātha 52
Kuṭajādi rasakriyā 56
Kutajādya ghṛta 85
Kuṭajāṣṭaka 58
Kuṇḍalyadi kvātha 425
Kubjaprasāraṇī-taila 204
Kumārakalyāṇaka ghṛta 556
Kumārikā vartti 498
Kumbhīkādya taila 374
Kulatthaguḍa 148
Kulatthādi 146
Kulatthādi lepa 30
Kulatthādya ghṛta 297
Kulikā-nasya 568
Kuśamūla-prayoga 526
Kuśādi kṣīra 538
Kuśādya ghṛta 170,294
Kuśādya taila 170
Kuśāvaleha 306
Kuṣṭhādi 460
Kuṣṭhādi kavala 602
Kuṣṭhādi kvātha 16
Kuṣṭhādi cūrṇa 453
Kuṣṭhādi taila 100
Kuṣṭhādi prayoga 421
Kuṣṭhādi pralepa 377
Kuṣṭhādi lepa 394
Kuṣṭhādi leha 546
Kuṣṭhādi vartti 530
Kuṣṭhādya taila 225,476
Kuṣṭhādyudvarttana 392
Kūṣmāṇḍaguḍa-kalyāṇaka 70
Kūṣmāṇḍaka ghṛta 182
Kūṣmāṇḍasvarasa-prayoga 295
Kṛṣṇajīrakadi cūrṇa 465
Kṛṣṇatila-prayoga 75
Kṛṣṇādi kalka 611
Kṛṣṇādi cūrṇa 146,153
Kṛṣṇādi lepa 518
Kṛṣṇādi leha 125
Kṛṣṇādi lauha 250
Kṛṣṇādyañjana 176
Kṛṣṇādya taila 496
Kṛṣṇādya modaka 353
Ketakyādya taila 199
Kaiśoraguggulu 220
Kokilākṣādi 217
Kokilā vartti 500
Kolamajjādi cūrṇa 165
Kolamajjādi leha 159
Kolādi maṇḍūra 252
Kolādi lepa 193
Koṣātaki-gharṣa 73
Krimighnādi cūrṇāñjana 555
Kvāthapañcaka 301
Kṣāraguḍa 97
Kṣāraguḍikā 464
Kṣāraghṛta 277
Kṣārataila 472,536
Kṣārasūtra 87,373
Kṣārāñjana 495
Kṣārādi guḍikā 331,463
Kṣārādi cūrṇa 277
Kṣārodaka-yogas 289
Kṣārodaka-lehas 289
Kṣīrakalyāṇaka ghṛta 175
Kṣīrapippalī 323
Kṣīramaṇḍūra 253
Kṣīraṣaṭpalaka ghṛta 36,274
Kṣīrigaṇḍūsa 454
Kṣīridrumādya ghṛta 59
Kṣudrādi kvātha 22
Kṣudhāvatī guḍikā 418
Kṣaudrādyutsādana 225

KHA

Khaṇḍakādya lauha 121
Khaṇḍakūṣmāṇḍaka 120
Khaṇḍāmalaka 257
Khadira-kvātha 403
Khadiranirdāha rasa 399
Khadirādi kvātha 380,425
Khadirādi pānīya 432
Khadirāṣṭaka 425,431
Kharjūrādi 301
Kharjūrādi leha 137
Khuḍḍākapadmaka-taila 219

GA

Gaṇḍīrāriṣṭa 225
Gaṇḍīrikādya taila 409
Gaṇḍūpadādyañjana 502
Gandhaka-cūrṇa 396

Gandhataila 388
Gambhārī-prayoga 412
Gāyatryādi jala 432
Gavākṣyādi kalka 318
Gāyatryādi lepa 423
Girikarṇikā-prayoga 344
Guggulādi dhūpa 33
Guggulu-Eraṇḍataila-prayoga 355
Guggulu-prayoga 330,356
Guñjādya taila 346,445
Guñjānavanīta yoga 476
Guñjāmūlādi cūrṇāñjana 503
Guḍakūṣmāṇḍaka 599
Guḍaghṛta-prayoga 217
Guḍataila-prayoga 147
Guḍatriphalā-yoga 31
Guḍamarica-yoga 481
Guḍapippalī ghṛta 252
Guḍapuṣpādi guḍikāñjana 100
Guḍabilva-prayoga 55
Guḍabhallātaka 82
Guḍaśuṇṭhyādi yogacatuṣṭaya 93
Guḍaharidrā-prayoga 352
Guḍādi cūrṇa 330
Guḍādi modaka 416
Guḍābhayā-prayoga 74
Guḍāmalaka-prayoga 284
Guḍārdraka 329
Guḍūcīkvātha 30
Guḍūcīghṛta 218
Guḍūcī-taila 218
Guḍūcī-prayoga 216
Guḍūcisvarasa-prayoga 353
Guḍūcī-hima 158
Guḍūcyādi kvātha 12,19,31, 44,157,429,432
Guḍūcyādi-rasāyana 577
Guhādyañjana 512
Gṛhadhūmādi 568
Gṛhadhūmadi taila 482
Gṛhadhūmādi lepa 395,555
Gairikādi guḍikāñjana 485
Gairikādi biḍālaka 484
Gairikādi lepa 30,380
Gokṣurakādi cūrṇa 597
Goṇḍakarasa-prayoga 474
Godhāvatīmūla kvātha 290
Godhāyakṛdañjana 506
Godhūma-cūrṇa 387
Godhūmacūrṇādi lepa 216
Godhūmādya ghṛta 598
Godhūmādyutkārikā 280
Gomaya-taila 508
Gośṛṅgadhūpana 602
Gaurādya ghṛta 368
Gaurādya taila 368
Ghanādi kvātha 45
Ghṛta-prayoga 35
Ghṛtabhṛṣṭāmalaka-prayoga 117
Ghoṇṭāphalādi vartti 372
Ghoṣāphala-vartti 73

CA

Cakṣuṣya varga 497
Cakramardabijādi pralepa 393
Candana-prayoga 291
Candanāmalaka yoga 156
Candanādi cūrṇa 156
Candanādi cūrṇāñjana 494
Candanādi lepa 337,425,517
Candanādi vartti 493
Candanādya taila 133, 346,447
Candanādya yamaka 370
Candanādya vartti 499
Candraprabhā vartti 500
Candrodayā vartti 498
Cavikādi maṇḍūra 253
Cavyādi cūrṇa 168,225
Cavyādya ghṛta 82
Cavyādya cūrṇa 150
Catuḥsama 244,426
Catuḥsneha 203
Caturaṅga taila 547
Caturaṅgulādi pralepa 391
Caturdaśāṅga kvātha 26,28
Caturbhadrāvalehikā 17
Cāṅgerī ghṛta 66,439
Cāturbhadraka 19
Cāturbhadraka-pañcamūla 25
Ciñcāyūṣa 481
Citraka-ghṛta 66,320,325
Citrakaguḍa 98
Citraka-taila 482
Citrakatakra-prayoga 74
Citraka-harītakī 482
Citrakādi 244
Citrakādi cūrṇa 554
Citrakādya guḍikā 62
Citrakādya ghṛta 291,333
Citrakādya taila 408,445
Cirabilvādi 361
Culukimastakāsthyañjana 512
Caitasa ghṛta 175
Cyavanaprāśa 129

CHA

Chāgalādya ghṛta 131,132,195
Chinnādi kvātha 415
Chinnāsvarasa 398
Chinnodbhavādi ṣaḍaṅga kvātha 415

Chucchundarī taila 345

JA

Jambvādi 474
Jambvādi kvātha 159
Jambvādi svarasa 56
Jambvādya taila 474
Jayāpatraputapāka 481
Jalakumbhīkṣāra-prayoga 342
Jatīkapittharasa 159
Jātītaila 475
Jātīpatrādi gaṇḍūṣa 432,465
Jātyādi kvātha 456
Jātyādi vartti 373
Jātyādya ghṛta 368
Jātyādya taila 368
Jīrakādi cūrṇa 551
Jīrakādi lepa 571
Jīrakādya ghṛta 364,419
Jīvakādya taila 519
Jīvanīya gaṇa 143
Jīvanīya ghṛta 161
Jīvanīyādya taila 477
Jīvantī-kalka 240
Jīvantyādya ghṛta 130
Jyotsnikākalka-lepa 73

TA

Takrāriṣṭa 68
Tagara-prayoga 190
Taṇḍula-pralepa 395
Taṇḍulāmbu-seka 431
Taṇḍulodaka 63
Tāpyādi lauha 127
Tāmra-prayoga 612
Tārāmaṇḍūraguḍa 253
Tāmrayoga 71
Tāmrarasāyana 588
Tālīśa-cūrṇa 115
Tālīśādya cūrṇa 127
Tālīśādya modaka 127
Tiktaka ghṛta 403
Tiktaṣaṭpalaka ghṛta 403
Tiktādi kvātha 13
Tiktādya ghṛta 369
Tirītādi 487
Tila-kvātha 277
Tilaguḍikā 240
Tila-prayoga 596
Tilabhallātakādi yoga 75
Tilaśarkarā-prayoga 56
Tilādi gaṇḍūṣa 466
Tilādi guḍikā 250
Tilādi cūrṇa 398
Tilādi pralepa 269,363,377
Tilādi lepa 362,364,372
Tilādi leha 551
Tilādyupanāha 360
Tilāruṣkara-prayoga 75
Tilāṣṭaka 361
Tutthakādyañjana 513
Tumbītaila 343
Tumbībījādi gudī 74
Tumburvādi cūrṇa 238
Tṛṇaka-taila 406
Tṛṇapañcamūla 283
Tejovatyādya ghṛta 148
Tailadhānyāmla-prayoga 352
Trayodaśāṅga 125
Trayodaśāṅga guggulu 192
Trayodaśāṅga nārikelakhaṇḍa 239,257
Trāyamaṇādi kvātha 14
Trāyamāṇādya ghṛta 273
Trikaṭukādi kvātha 518
Trikaṭukādi vartti 264
Trikaṭvādi pratisāraṇa 452
Trikaṭvādi vartti 501
Trikatvādya taila 478
Trikaṇṭakabīja-cūrṇa 297
Trikaṇṭakādi 286
Trikaṇṭakādi kṣīra 38
Trikaṇṭakādya ghṛta 287,303
Trikaṇṭakādya taila 303
Trikārṣika 215
Triphalā-kalka 416
Triphalā-kvātha 339, 421,425,466
Triphalākvāthādi 411
Triphalā-guggulu 367
Triphalāguḍārdraka yoga 166
Triphalāghṛta 104,506
Triphalānimbādi 241
Triphalā-prayoga 497
Triphalāmaṇḍūra 247,250
Triphalāmajjādi 495
Triphalāmasī-prayoga 381
Triphalā-rasāyana 574
Triphalā-lepa 453
Triphalā-lauha 247,250,255
Triphalādi 241,300,302
Triphalādi kaṣāya 18
Triphalādi kvātha 17,362, 466,544
Triphalādi cūrṇa272,224,258
Triphalādi rasakriyā 511
Triphalādi lepa 423
Triphalādya taila 311,445
Triphalādyā vartti 498
Trivṛtā-modaka 113
Trivṛtādi kvātha 29
Trivṛtprayoga 106,615
Trivṛdādi 328,423
Trivṛdādi cūrṇa 615,616
Trivṛdādi guḍikā 260,616

Trivṛdādi vaṭikā 263
Trivṛdādyutsādana 376
Triśatī prasāraṇītaila 204,205
Traikālika triphalā-rasāyana 575
Traikālika pippalī-rasāyana 575
Traiphala-ghṛta 507
Tryūṣaṇādi guḍikā 305
Tryūṣaṇādi cūrṇa 50,154
Tryūṣaṇādya ghṛta 273
Tryūṣaṇādya maṇḍūra 110
Tryūṣaṇādya varttī 173
Tryūṣaṇādyā vartti 499
Tvakpatrādi taila 101
Tvakpatrādi nāvana 517
Tvakpatrādyudvartana 101
Tvagādi yogapañcaka 154
Tvagromādimasī-prayoga 371

DA

Dadhimaṇḍādya ghṛta 321
Dadhisara-prayoga 597
Dantavartti 494
Dantī-lepa 348
Dantīharītakī 275
Dantyariṣṭa 76
Dantyādi kalka 317
Daśapākabalā-taila 219
Daśamūla 26
Daśamūla-kaṣāya 172
Daśamūla-kvātha 22,543
Daśamūla-ghṛta 141
Daśamūla-prayoga 328
Daṣamūla-ṣaṭpalaka ghṛta 37,142,320
Daśamūlaharītakī-leha 334
Daśamūlādi 125
Daśamūlādi kvātha 280,318
Daṣamūlī-kvātha 46,138,146
Daśamūlīkvātha-pariṣeka 356
Daśamūlī-taila 473
Daśamūlyādi 186,188
Daśamūlyādya ghṛta 141,194
Daśamūlyādyaṣṭādaśāṅga kvātha 26
Daśamūlīkvātha nasya 521
Daśāṅga māṣataila 201
Daśāṅga lepa 426
Daśāṅgāgada 572
Dāḍīma-svarasa 154
Dāḍimādi kvātha 55
Dāḍimādi cūrṇa 554
Dāḍimāṣṭaka 65
Dādhika ghṛta 248
Dārvādi kalka 331
Dārvādi kvātha 23
Dārvādi lepa 101
Dārvyādi kvātha 463,525
Dārvyādi cūrṇa 109
Dārvyādi gudikāñjana 177
Dārvyādi dhūmavartti 480
Dārvyādi rasakriyā 488
Dārvyādi lepa 553,554
Dārvīrasāñjana yoga 484
Dīpikā taila 471
Dīrghapatrakamūla-prayoga 31
Durālabhādi kvātha 13,425,430
Dūrvādi 300
Dūrvādya ghṛta 370
Dūrvādya taila 370,409
Dūrvādi pralepa 358
Dūrvādi lepa 393,411,504
Dūrvādya ghṛta 117
Devadārvādi lepa 315,518
Devadrumādi cūrṇa 318
Deśarasāyana lauha 588
Drākṣā-ghṛta 112
Drākṣādi 423,461
Drākṣādi kvātha 12,14,430
Drākṣādi kṣīra 486
Drākṣādi cūrṇa 554
Drākṣādi pānaka 169
Drākṣādi pānīya 161
Drākṣādi leha 137
Drākṣādya ghṛta 274,419
Dvipañcamūlādi kvātha 429
Dviruttaramaricādi cūrṇa 552
Dviruttara hiṅgvādi cūrṇa 260,263

DHA

Dhatakyādi cūrṇa 109,363
Dhātakyādi leha 549
Dhātrīcūrṇa 242
Dhātrīphalādi pānaka 159
Dhātrīlauha 244,256
Dhātrīrasādyudvarttana 394
Dhātrīṣaṭpalaka ghṛta 274
Dhātryariṣṭa 111
Dhātryādi 217
Dhātryādi kvātha 400,424
Dhatryādi rasakriyāñjana 503
Dhātryādi rasāyana 576,577
Dhātryādi seka 493
Dhānyakādi kvātha 62,99
Dhānyacatuṣka 49
Dhānyapañcaka 49
Dhānyapaṭola-kvātha 21
Dhānyādi kvātha 51
Dhānyodicya-jala 48
Dhānvantara ghṛta 304
Dhustūra-taila 395,474

Dhustūramūla-pāyasa 172
Dhustūrādi taila 600
Dhustūrādi pralepa 351
NA
Natādi 569
Natādi taila 529
Natādi lepa 519
Nadījādi guḍikāñjana 506
Nayanasukhā vartti 499
Nalamūlādi 290
Naraśiraḥkapāla-lepa 363
Nalinādi guḍikāñjana 505
Navaka guggulu 310
Navakaṣāya 398
Navakaṣāya guggulu 424
Navakārṣika 218
Navakārṣika guggulu 377
Navāṅga kaṣāya 18
Navāṅga yūṣa 138,237
Navāyasa cūrṇa 107
Nāgabalā-ghṛta 132
Nāgabalā-taila 220
Nāgabalā-prayoga 280
Nāgabalādi yoga 125
Nāgara-kvātha 278
Nāgarakṣīra 518
Nāgara-ghṛta 66,233
Nāgaracūrṇa 228
Nāgarādi kaṣāya 43
Nāgaradi kvātha 51,45, 62,296,550
Nāgarādi gaṇḍūṣa 453
Nāgarādi cūrṇa 146
Nāgarādi modaka 76
Nāgarādi yoga 266
Nāgarādya cūrṇa 63
Nāgarādyutkārikā 249
Nāgaśalākāñjana 502
Nāgārjuna yoga 79
Nāgārjunīya lauharasāyana 588
Nādeyyādi pānīya kṣāra 271
Nārasiṃha cūrṇa 598
Nārāca ghṛta 321
Nārāca cūrṇa 260
Nārāyaṇa cūrṇa 317
Nārāyaṇa taila 197
Nārikelalavaṇa 251
Nidigdhikādi kaṣāya 18
Nidigdhikādi kvātha 30
Nimbapatra-prayoga 412
Nimbapatrādi dhūpa 177
Nimbapatrādi lepa 361,362
Numbapatrādi vartti 362
Nimbādi 380
Nimbādi kvātha 16,430
Nimbādi guḍikā 488
Nimbādi cūrṇa 399
Nirguṇḍī-ghṛta 133
Nirguṇḍī-taila 345,375
Nirāmiṣa mahāmāṣa taila 202
Niśā-taila 409
Niśādi 491
Niśādi taila 546
Niśādya taila 379
Niśādvayādi lepa 434
Niśādyudvarttana 397
Niṣpāvādi lepa 349
Nistuṣayavādi kvātha 413
Nīlotpala-ghṛta 535
Nīlotpalādi lepa 601
Nīlotpalādi vartti 501
Nṛpavallabha ghṛta 508
Nṛpavallabha taila 508
Nyagrodhādi kvātha 361
Nyagrodhādi pralepa 358
Nyagrodhādi lepa 422
Nyagrodhādya cūrṇa 303
PA
Pakvāmrarasa 323
Pakvodumbarādi lehas 116
Pañcakaṣāya 390,612
Pañcakola-kvātha 22
Pañcakola-kṣīra 137
Pañcakola-cūrṇa 229
Pañcakolādya ghṛta 332
Pañcakolāvaleha 549
Pañcajīraka guḍa 542
Pañcatikta kvātha 20
Pañcatikta ghṛta 403
Pañcatiktaghṛta-guggulu 405
Pañcatiktaka ghṛta 426
Pañcatṛṇādi kṣīra 136
Pañcanimba 401
Pañcanimbādi cūrṇa 416
Pañcapañcamūla-pānīya 161
Pañcapalaka ghṛta 273
Pañcapallava 465
Pañcapallavādi ghṛta 532
Pañcabhadra kaṣāya 18
Pañcamūla-kvātha 30
Pañcamūlī-kvātha 135
Pañcamūlī-kṣīra 38,553
Pañcamūlīkṣīrādi 478
Pañcamūlyādi 51
Pañcamūlyādi kvātha 44
Pañcamūlyādi kśīra 193
Pañcavalkala 422
Pañcavalkala-kvātha 466
Pañcavalkalādi cūrṇa 363
Pañcāṅgakuṅkumādya taila 443

Pañcāmlaka lepa 164
Paṭolaghṛta 419
Paṭolatriphalādi kvātha 424
Paṭoladhanyākādi kvātha 415
Paṭolamūlādi kvātha 431
Paṭolamūlādi caturaṅga kvātha 431
Paṭolamūlādi lepa 572
Paṭolaviśvādi kvātha 414
Paṭolaśuṇṭhī ghṛta 419
Paṭolādi 216,245
Paṭolādi kaṣāya 20,53
Paṭolādi kvātha 13,19,20,361, 380,399,114,421,430,466
Paṭolādi pañcāṅga kvātha 415
Paṭolādi lepa 437,458
Paṭolādya ghṛta 450,495
Paṭolādya cūrṇa 316
Paṭolāmṛtādi kvātha 424
Paṭolyādi lepa 362
Pattaṅgādi 461
Patrādi vartti 501
Pathyā-cūrṇa 396
Pathyātrika 99
Pathyā-prayoga 216
Pathyādi 490
Pathyādi kalka 339
Pathyādi cūrṇa 230,414
Pathyādi prayogatraya 217
Pathyādi lepa 74
Pathyādi lauha 251
Pathyādi vartti 510
Padmakādi 422,619
Padmakādya ghṛta 160
Padmabīja-cūrṇa 137
Payasyādi lepa 504
Parṇāsapañcaka 146
Parpaṭa-kvātha 157
Parpaṭādi kaṣāya 14
Palaṅkaṣādya taila 182
Palāśabīja-prayoga 103
Pāṭalā-kṣāra 289
Pāṭalī-taila 370
Pāṭhādi 51,302
Pāṭhādi kaṣāya 43
Pāṭhādi cūrṇa 280,301,455
Pāṭhādi taila 478
Pāṭhādya cūrṇa 64
Pāṭhā-prayoga 357
Pāṭhāsaptaka 19
Pāṣāṇabhedādya ghṛta 293,297
Pāṣāṇabhedādya cūrṇa 297
Pānīyakalyāṇaka ghṛta 174
Pānīya kṣāra 87
Pānīyabhakta guḍikā 94
Pānīyabhakta-prayoga 164
Pārasīkayavānikā yoga 103
Pārāśara ghṛta 131
Pārijātavalkalādyañjana 487
Pippalīghṛta 131,252,325,419
Pippalī-cūrṇa 165
Pippalī-prayoga 189,322
Pippalī-citraka ghṛta 325
Pippalīmūlādi ghṛta 64
Pippalīmūlādi cūrṇa 50,63
Pippalī-rasāyana 575
Pippalī-varddhamāna 225, 324,316
Pippalyādi 150,224,533,570
Pippalyādi kavala 455
Pippalyādi kvātha 12,16,157
Pippalyādi guḍikāñjana 509
Pippalyādi cūrṇa 271,278, 324,615
Pippalyādi taila 83
Pippalyādi leha 139,550
Pippalyādi vartti 530
Pippalyādya ghṛta 35
Pippalyādyavapīḍa 481
Pippalyādyā vartti 500
Piṇḍa-taila 220
Pītaka cūrṇa 463
Putrañjīvaka-rasa 352
Puṇḍarīka-prayoga 493
Punarnavādi kalka 329
Punarnavāguggulu 222,226
Punarnavādi 319,331
Punarnavādi kvātha 329
Punarnavādi cūrṇa 320
Punarnavādi pralepa 359
Punarnavādya ghṛta 168,332
Punarnavādyavaleha 334
Punarnavāmaṇḍūra 111
Punarnavāṣṭaka kvātha 319,329
Purāṇa ghṛta 172
Puṣkaramūla-cūrṇa 279
Puṣkarādi cūrṇa 554
Puṣyānuga cūrṇa 527
Pūgādi lepa 381
Pūtīkarañjapatrarasa-prayoga 352
Pūtīka-kṣāra 322
Pūtīkādi lavaṇa 270
Pūtīkādi lepa 400
Pūpikā-yoga 103
Pṛthvīkā-cūrṇa 117
Pṛthvīsāra taila 409
Pṛśniparṇyādi 328
Pauṣkarādi 138
Pauṣkarādi kalka 146

Pratisāraṇīya kṣāra 86,87
Pratyaṅgirāmūla-prayoga 568
Prapunnāḍabījā-dyudvarttana 393
Prapauṇḍarīkādi 380,486
Prapauṇḍarīkādi pralepa 422
Prapauṇḍarīkādi lepa 519
Prapauṇḍarikādya ghṛta 369
Prapauṇḍarīkādya taila 370,445,524
Pramathyātraya 49
Pravāla-prayoga 285
Pravālādyañjana 510
Prasāraṇīsandhāna 234
Prāṇadā guḍika 76
Priyaṅgu-kalka 612
Priyaṅgvādi cūrṇa 53,114
Priyaṅgvādi taila 357
Priyaṅgvādi pratisāraṇa 453
Priyaṅgvādi lepa 453
Priyaṅgvādi leha 551

PHA

Phaṇiñjjhakādi 486
Phalaghṛta 534
Phalatrikādi kvātha 107,302,414
Phalatrikādi ghṛta 508
Phāṇita-yoga 60
Phalinyādi kalka 612
Phalinyādi pralepa 171

BA

Bakulādya taila 468
Baḍavāmukha cūrṇa 96
Badaracūrṇa-leha 432
Badarīpatrādi leha 151
Balāgarbha ghṛta 132
Balātaila 196
Balādi 136,237
Balādi cūrṇa 134
Balādya ghṛta 133,134,282
Balābīja 166
Balāmūlādi-nasyacatuṣṭaya 186
Barhiṣṭhādi 486
Bastāṇḍa-prayoga 596
Bastamūtra-prayoga 471
Bālacāṅgerī-ghṛta 556
Bālabilvādi khaḍa 59
Bālabilvādi leha 59
Biḍālaśakṛd dhūpa 34
Bindughṛta 320
Bibhītaka-prayoga 147
Bibhītaka yoga 139
Bimbīghṛta 104
Bimbī-taila 345
Bimbyādi kvātha 434
Bilvagarbha ghṛta 66
Bilva-taila 473
Bilvapatra-rasa 330
Bilvamūlādi 243
Bilvamūlādi guḍikā 239
Bilvamūlādi cūrṇa 340
Bilvarasa-pūraṇa 488
Bilvādi 243
Bilvādi-avaleha 550
Bilvādi kaṣāya 52
Bilvādi kalka 55,56
Bilvādi kvātha 12,162,550,551
Bilvādi kṣīra 552
Bilvādi ghṛta 66
Bilvādyāścyotana 485
Bilvoṣaṇādi leha 60
Bījapūrakamūla yoga 239
Bṛhaccukra 68
Bṛhacchatāvarī-ghṛta 118,528,535
Bṛhacchatāvarī-maṇḍūra 254
Bṛhacchāliparṇyādi 48
Bṛhacchūraṇa-modaka 78
Bṛhajjīvakādya taila 519
Bṛhat kaṇṭakārī-ghṛta 142
Bṛhat khadiravaṭikā 468
Bṛhad guḍūcitaila 223
Bṛhat pañcagavya ghṛta 181
Bṛhat pañcamūla 26
Bṛhat maricādya taila 407
Bṛhad vāsādi 490
Bṛhad viśvādi 245
Bṛhat siṃhanāda guggulu 231
Bṛhat saindhavādya taila 232,340
Bṛhadagnighṛta 96
Bṛhadagnimukha cūrṇa 94
Bṛhanmayūrādya ghṛta 524
Bṛhallokanātha rasa 327
Bṛhatyādi 241,285
Bṛhatyādi gaṇa 27
Bṛhatyādi gaṇḍūṣa 457
Bṛhatyādi vartti 485
Brāhmīghṛta 182

BHA

Bhallātakādi kṣāra 64
Bhallātaka-ghṛta 275,277
Bhallātaka-taila 402
Bhallātaka-lauha 89
Bhallātakavardhamāna 402
Bhallātakādi (kvātha) 224
Bhallātakādi taila 600
Bhallātakādya taila 374
Bhallātakādi modaka 323
Bhallātakādi lepa 397,6[illegible]

Bhāgottara alambuṣādya cūrṇa 229
Bhāgottara dhātryādi lepa 392
Bhāgottara hiṅgvādi cūrṇa 271
Bhāgottara hiṅgvādya cūrṇa 230
Bhārgīguḍa 148
Bhārgīmūla-pralepa 345
Bhārgīṣaṭpalaka ghṛta 274
Bhārgyādi kvātha 28,544
Bhārgyādi cūrṇa 136,146
Bhāvita nimbataila 449
Bhāvitāmalaka cūrṇa 596
Bhāskaralavaṇa 95
Bhīmavaṭaka maṇḍūra 252
Bhūnimbakalka-prayoga 116
Bhūnimbādi 329
Bhūnimbādi kalka 331
Bhūnimbādi kvātha 425
Bhūnimbādyaṣṭādaśāṅga kvātha 27
Bhūnimbādya ghṛta 381
Bhūnimbādya cūrṇa 63
Bhūmilatāpakva kusumbha-taila 601
Bhūmyāmalakyādi biḍālaka 484
Bhṛṅgarāja-ghṛta 450
Bhṛṅgarājādya ghṛta 151
Bhṛṅgarājādya taila 445,508
Bhṛṣṭatilakalka-pralepa 217
Bhṛṣṭamudgakaṣāya 156
Bhṛṣṭaharītakī-prayoga 352

MA

Majjasneha 203
Mañjiṣṭhādya ghṛta 370
Mañjiṣṭhādi cūrṇāñjana 513
Mañjiṣṭhādi pralepa 352
Mañjiṣṭhādi lepa 386
Mañjiṣṭhādi vartti 513
Mañjiṣṭhādya taila 442
Maṇḍūra-prayoga 107,253
Maṇḍūra-vajravaṭaka 111
Matsya-prayoga 597
Madana-kalka 240
Madanaphalādi 532
Madanādi kvātha 423
Madanādi phalavartti 261
Madhuka-taila 449
Madhuka-prayoga 597
Madhukādi 139,433
Madhukādi kṣīra 184,537,538
Madhukādi ghṛta 491
Madhukādi nasyatraya 145
Madhukādi lepa 477
Madhukādi śītakaṣāya 19
Madhupippalī-prayoga 17
Madhuśukta 472
Madhūkasārādi nasya 24
Madhūkādi cūrṇa 52
Madhūkādi pralepa 347
Madhūdaka-prayoga 164
Manaḥśilā-taila 409
Manaḥśilādi 140,141
Manaḥśilādi lepa 371,390
Manaḥśilādi vartti 555
Manaḥśilādyaṣṭāṅga lepa 391
Manohvādyañjana 179
Mayūrapicchādi leha 147
Mayūrādya ghṛta 523
Maricādi 141
Maricādi cūrṇa 64
Maricādi lepa 572
Maricādya ghṛta 67
Maricādya cūrṇa 140
Maricāñjana 177
Mastuṣaṭpalaka ghṛta 96
Masūrādi-prayoga 568
Mahākalyāṇaka ghṛta 175
Mahākhadira-ghṛta 404
Mahāgada 569
Mahācaitasa ghṛta 181
Mahātiktaka ghṛta 404
Mahātṛṇaka taila 406
Mahātriphalādya ghṛta 507
Mahādāḍimādya ghṛta 304
Mahānārāyaṇa taila 198
Mahānīla-taila 449
Mahāpadmaka ghṛta 427
Mahāpiṇḍa-taila 220
Mahāpaiśācika ghṛta 175
Mahābalātaila 196
Mahāmāṣa taila 201
Mahārājaprasāraṇī-taila 209
Mahārohītaka-ghṛta 326
Mahāṣaṭpalaka ghṛta 67
Mahāsahacara taila 467
Mahāsindūrādya taila 408
Mahāsugandhi taila 214
Mahauṣadhādi kvātha 32,165
Māṃsacūrṇa-prayoga 125
Māṃsyādi gaṇa 397
Mākṣika-prayoga 305
Mākṣikādi 454
Māṇakaghṛta 333
Māṇaka-pāyasa 320
Māṇādya guḍikā 324
Māṇibhadra modaka 76
Mātuluṅgakeśara-prayoga 431
Mātuluṅga-prayoga 145
Mātuluṅgarasa 243
Mātuluṅgarasādi yoga 266

Mātuluṅgādi 539
Mātuluṅgādi kvātha 28
Mātuluṅgādi nasya 24
Mātuluṅgādi lepa 358
Mālatyādya taila 446
Māṣapāyasa 597
Māṣabalādi 186
Māṣādi 186
Māhiṣamūtra-pāna 317
Miśyādi leha 549
Muṇḍitikā-prayoga 215
Mudgādya ghṛta 527
Muśalīkanda-prayoga 477
Muṣakādi taila 531
Muṣikataila 530
Mūṣikādi-ghṛtacatuṣṭaya 523
Mūṣikādya taila 439
Muṣṭiyogas 428
Mustakādi kvātha 45
Mustā-kṣīra 51
Mustādi kalka 243
Mustādi kaṣāya 17
Mustādi kvātha 21,22, 31,103,424
Mustādi taila 458
Mustādyaṣṭādaśāṅga kvātha 27
Mūrvādya ghṛta 112
Mūlakabījādi lepa 394
Mūlakādya taila 199
Mṛgaśṛṅgabhasma-prayoga 247,281
Mṛṇālādi lepa 517
Mṛtasañjīvana agada 572
Mṛdvīkādi kvātha 14
Meṣaśṛṅgādi vartti 505
Mocarasādi yavāgū 551

YA

Yamānikādi cūrṇa 322
Yamānīṣāḍava 154
Yamānyādi cūrṇa 238,270
Yavakṣāra-prayoga 323
Yavacūrṇādi taila 40
Yavacūrṇādi lepa 101
Yavādi kvātha 414
Yavādi dhūpa 363
Yavādi pralepa 355
Yaṣṭyādi kalka 160
Yaṣṭyādi nasya 179
Yaṣṭyādyañjana 179
Yaṣṭyādya ghṛta 523
Yaṣṭīmadhuka-ghṛta 365
Yaṣṭīmadhukādya taila 447
Yaṣṭyāhvādi ghṛta 517
Yaṣṭyāhvayādi cūrṇa 279
Yaṣṭyāhvādi lepa 356
Yogarāja 107
Yogarājaguggulu 230
Yogasārāmṛta 222
Yonidārḍhyakara yogas 533

RA

Rajanyādi 570
Rajanyādi leha 549
Rasaguḍikā 90
Rasaparpaṭikā 71
Rasamaṇḍūra 255
Rasāñjana-pralepa 381
Rasāñjana-yoga 526
Rasāñjanādi cūrṇa 54,465
Rasāñjanādi lepa 376
Rasāñjanādi vartti 505
Rasāñjanādyañjana 512
Rasendraguḍikā 128
Rasendra-prayoga 104
Rasonakṣīra 267
Rasona-taila 199
Rasona-prayoga 245,260
Rasonapiṇḍa 234
Rasonasurā 234
Rasonādi kalka 387
Rasonādya ghṛta 275
Rāthādi vartti 264
Rāmamaṇḍūra 254
Rāsnāguggulu 189
Rāsnādaśamūlaka 227
Rāsnādi 338
Rāsnādi kvātha 11
Rāsnādya ghṛta 143
Rāsnāpañcaka 228
Rāsnāsaptaka 228
Rucakādi 246
Rudrajaṭā-prayoga 339
Rubutailabhṛṣṭa-harītakī 338
Rūpikā-pralepa 339
Rūpikāmūla-pralepa 351
Rohiṇyādi ghṛta 268
Rohitakaghṛta 326
Rohitakādi cūrṇa 318,324

LA

Lakṣmīvilāsa taila 214
Laghupañcamūla 26
Lavaṅgādijala-prayoga 101
Lavaṅgādya cūrṇa 126
Lavaṇatrayādi cūrṇa 243
Lavaṇārdraka-prayoga 93
Lavaṇottamādya cūrṇa 79
Laśunādi yoga 323
Laśunādya ghṛta 176
Lākṣāguggulu 387
Lākṣādi cūrṇa 387
Lākṣādi taila 40,557

Lākṣādya taila 467
Lājādi cūrṇa 551
Lājādi lehatraya 160
Lājodaka 162
Lāvādi cūrṇa 553
Lodhradi 454
Lodhrādi kvātha 13
Lodhrādi taila 456
Lodhrādi biḍālaka 484
Lodhrādi lepa 455
Lodhrādyāścyotana 487
Lodhrāścyotana 486
Lauhaguḍikā 255
Lauhacūrṇādi pralepa 371
Lauha-prayoga 253,287
Lauhamalādyudvarttana 448
Lauharasāyana 310
Lauhāmṛta 256

VA

Vaṃśatvagādi kvātha 366
Vacācūrṇa 180
Vacādi kavala 460
Vacādi kvātha 279
Vacādi cūrṇa 187,243, 263,270,529
Vacādi lepa 531
Vacādya cūrṇa 271
Vajraka ghṛta 405
Vajraka taila 406
Vajrakāñjika 542
Vaṭapatrādi lepa 376
Vaṭamūla-prayoga 551
Vaṭaśuṅgādi guḍikā 164
Vaṭaśuṅgādi cūrṇa 163
Vaṭikāguggulu 367
Vatsakādi kvātha 44,55
Vatsādanī-kvātha 215
'andākaśiphā-pāna 351
Vandhyākarkoṭakanasya 569
Varātikā-cūrṇa 387
Varāhavasā-prayoga 601
Varuṇaka ghṛta 443
Varuṇa-kvātha 295,344
Varuṇaghṛta 298
Varuṇādi 293,296
Varuṇādi kvātha 357
Varuṇādi gaṇa 295
Varuṇādi taila 475
Varuṇādya ghṛta 295
Varuṇādya taila 298
Varṣābhvādi kalka 331
Vallabha ghṛta 281
Vāgujīcūrṇa 398
Vājigandhādi gaṇa 193
Vātavināśana yūṣa 193
Vāyasyādi lepa 400
Vārtāku-guḍikā 65
Vārttāku-prayoga 189
Vārtākuphala-prayoga 75
Vāsakādi 489
Vāsākhaṇḍa 121
Vāsākhaṇḍakūṣmāṇḍaka 121
Vāsāguggulu 415
Vāsādi 215
Vāsādi kvātha 32
Vāsādya ghṛta 37,119
Vāsāpatra-svarasa 114
Vikaṅkatādi pralepa 347
Vijaya-cūrṇa 80
Viḍaṅga-cūrṇa 247
Viḍaṅgaghṛta 104
Viḍaṅgataila 105
Viḍaṅgaleha 103
Viḍaṅgādi kalka 104
Viḍaṅgādi kvātha 46,55
Viḍaṅgādi kṣāra 322
Viḍaṅgādi cūrṇa 399
Viḍaṅgādi cūrṇadvaya 158
Viḍaṅgādi modaka 249
Viḍaṅgādi lepa 392
Viḍaṅgādi leha 93
Viḍaṅgādi vaṭikāguggulu 367
Viḍaṅgādya cūrṇa 308
Viḍaṅgādya taila 354
Viḍaṅgādya lauha 110,308
Viḍaṅgaiḍagajādi lepa 392
Vidārīkalka 596
Vidārī-cūrṇa 596
Vidāryādi taila 458
Vidāryādi lepa 15
Vidāryādi-svarasa 247
Vindhyavāsiyoga 127
Viparītamallataila 369
Viśālādi cūrṇa 108
Viśvādi 238
Viśvādi kaṣāya 14
Viśvādi kvātha 92
Viśvadi cūrṇa 135
Viśvairaṇḍādi 238
Viṣagarbha taila 476
Viṣataila 408
Viṣādi lepa 397
Viṣṇutaila 196
Viṣyandana taila 378
Vīratarādi gaṇa 293
Vīratarādya taila 298
Vṛksādanyādi ghṛta 492
Vṛddhadāraka-cūrṇa 352
Vṛddhadāraka-rasāyana 576
Vṛścirādi kṣīra 38
Vṛścīrādyariṣṭa 276
Vṛṣādya ghṛta 426
Veśavāra pralepa 194
Vaidehyādyañjana 510

Vairecanika lavaṇa 263
Vaiśvānara cūrṇa 229
Vyāghrī-taila 478
Vyāghrīharītakī 144
Vyoṣādi 460
Vyoṣādi kalka 546
Vyoṣādi kvātha 29
Vyoṣādi guḍikāñjana 100
Vyoṣādya ghṛta 83,112
Vyoṣādi cūrṇa 460,478
Vyoṣādi taila 460
Vyoṣādi nasya 520
Vyoṣādya cūrṇa 46,79
Vyoṣādya taila 346
Vyoṣādya vartti 499
Vyoṣādya śaktu 309
Vyoṣāntikā guḍikā 140

ŚA

Śaṅkhādi cūrṇa 247
Śaṅkhādi cūrṇāñjana 494
Śaṅkhādi vartti 501
Śaktu-prayoga 250
Śaṭyādi 137
Śaṭyādi kalka 227
Śaṭyādi (kvātha) 227
Śaṭyādi kvātha 27
Śatapuṣpādya ghṛta 341
Śatapuṣpādya cūrṇa 230
Śatāvarī kalka 56
Śatāvarīghṛta 56,118, 218,420,599
Śatāvarīmaṇḍūra 253
Śatāvarīsvarasa-prayoga 241
Śatāvaryadi 13,241,284
Śatāvaryādi kṣīra 166
Śatāvaryādi ghṛta 287
Śatāvaryādi cūrṇa 597
Śatāvaryādi taila 476
Śatāvaryādi lepa 522
Śatāhvādi kalka 276
Śatāhvādya taila 519
Śambūkabhasma-prayoga 249
Śambūkādi guḍikā 250
Śambūkādya taila 474
Śarapuṅkhā-kalka 323
Śarkarādi ghṛta 517
Śarādipañcamūlyādi ghṛta 298
Śallakyādi taila 530
Śaśaka-ghṛta 496
Śaśakādya ghṛta 496
Śaśāṅkalekhādi leha 398
Śākhotaka-taila 345
Śākhoṭakatvak-kalka 358
Śārivā-lepa 362
Śārivādi lepa 522
Śārṅgaṣṭhā-kvātha 323
Śārdūlakāñjika 93
Śālasārādi leha 305
Śālvaṇasveda 194
Śālādi cūrṇa 303
Śālitaṇḍula-cūrṇa 543
Śālipiṣṭa-lepa 386
Śikharimūla-prayoga 484
Śigrukvātha 243,295,318
Śigrupallava-dhūpa 488
Śigrurasa-prayoga 356
Śiṇḍākī 235
Śitimāraka-prayoga 285
Śirīṣamūlādi kavala 426
Śirīṣādi 426
Śivādi cūrṇa 464
Śirīṣādi pralepa 430
Śirīṣādyañjana 25
Śilājatu 590
Śilājatu-prayoga 305
Śivā guḍika 593
Śītakalyāṇaka ghṛta 527
Śukatarvādi lepa 425
Śuktīkṣāra 323
Śuṇṭhīkṣīra 145,537
Śuṇṭhīghṛta 66,233
Śuṣkamūlakādya taila 334
Śuṇṭhyādi 228,293
Śuṇṭhyādi kvātha 61
Śuṇṭhyādi kṣīra 537
Śuṇṭhyādi ghṛta 479
Śuṇṭhyādi taila 479
Śuṇṭhyādi piṇḍa 486
Śuṇṭhyabhayāyoga 99
Śuṇṭhyādyāścyotana 555
Śuṣkamūlakādya ghṛta 264
Śūraṇapuṭapāka 75
Śūraṇapiṇḍī 79
Śṛṅgaberādi kvātha 413
Śṛṅgaverādi nasya 503
Śṛṅgyarjunādya cūrṇa 127
Śṛṅgyādi cūrṇa 146,147
Śṛṅgyādi leha 549
Śephālikā-kvātha 188
Śelutaila 450
Śaileyādya taila 334
Śaileyādya pralepa 334
Śobhāñjana-kvātha 323,356
Śobhāñjanādi lepa 345,427
Śyonāka-puṭapāka 57
Śyāmādi kalka 238
Śyāmādi gaṇa 259
Śyāmādi yamaka 545
Śrināgārjuna-vartti 500
Śriparṇyādi kvātha 278
Śrīparnī-taila 544
Śrīphalādi kalka 62
Śribhāhuśāla guḍa 81
Śrīvāsādi dhūpa 364

Śrīveṣṭakādi pratisāraṇa 452
Śvadaṃṣṭrādi 285
Śvadaṃṣṭrādi kvātha 44
Śvadaṃṣṭrādi (kvātha) 296
Śvadaṃṣṭrādi kalka 296
Śvadaṃṣṭrādya ghṛta 281
Śveta karavīrādya taila 408
Śveta jayantīmūla-kalka 401
Śvetapunarnavā-prayoga 568
Śvetabalā-prayoga 533
Śvetamarica-prayoga 569
Śveta varṣābhvādi kvātha 356
Śvetādi taila 462

ṢA

Ṣaṭkaṭvara taila 40
Ṣaḍaṅga guggulu 489
Ṣaḍaṅga ghṛta 59
Ṣaḍanga ghṛta-guggulu 489
Ṣaḍaṅga tāmrayoga 588
Ṣaḍaṅga pānīya 5
Ṣaḍaṅga yūṣa 124
Ṣaḍbindu taila 520
Ṣaḍ lehayogas 145
Ṣaḍūṣaṇa 92
Ṣaḍdharaṇa yoga 183

SA

Saguḍayamānī-prayoga 411
Saptacchadādi kvātha 466
Saptatriṃśāṅga kuṅkumādya taila 443
Saptaprastha ghṛta 120
Saptaprastha mahāmāṣa-taila 203
Saptaviṃśatika guggulu 378
Saptaśatika prasāranī-taila 206
Saptasama yoga 399
Saptāṅga guggulu 374
Saptāṅga tāmrayoga 589
Saptāṅga māṣataila 200
Saptāmṛta lauha 251
Samaṅgādi kalka 84
Samaṅgādi kvātha 53,550
Samaṅgādi yavāgū 550
Samavṛddhadāraka cūrṇa 353
Samaśarkara cūrṇa 79,140
Samudraphenādi vartti 493
Saralādi dhūpa 433
Saralādi pradeha 339
Sarjataila-pradeha 40
Sarjarasādi lepa 396,453
Sarjādi pralepa 393
Sarjikādi yoga 267
Sarpakañcukamasīprayoga 539
Sarpanirmoka-lepa 360
Sarpirguḍa 129
Sarṣapakalka-prayoga 395
Sarṣapādi pralepa 342,345
Sahakāra-guḍikā 468
Sahacarādi kvātha 542
Sahasrapippalī-yoga 316
Sahādi kvātha 557
Sarpatvagādi dhūpa 557
Sāmudrādya cūrṇa 251,314
Sārasvata ghṛta 577
Siṃhanāda guggulu 231
Siṃhyamṛta ghṛta 83
Siṃhāsyadalādi lepa 396
Siṃhāsyādi 331
Siṃhāsyādi kvātha 416
Sitopalādi leha 126
Sidhmalā 235
Siddhārthakādi 173
Siddhārthādyudvarttana 411
Sindūrādi lepa 397
Sindhūtthādi guḍaka 92
Sindhūtthādi cūrṇa 92
Sindhūtthādi vartti 514
Sukumārakumāraka ghṛta 287
Sukhāvati vartti 498
Sudarsanā-prayoga 555
Suniṣaṇṇaka-cāṅgerī ghṛta 85
Surasādi gaṇa 104
Surā-prayoga 289
Suvarṇagairika prayoga 554
Suṣavyādi lepa 363
Sūkṣmailā-prayoga 285
Sūryāvarttādyupanāha 343
Saindhava-cūrṇāñjana 503
Saindhava-vartti 373
Saindhavādi 496
Saindhavādi gharṣaṇa 29
Saindhavādi cūrṇa 552
Saindhavādi nasya 24
Saindhavādi biḍālaka 484
Saindhavādi vartti 494
Saindhavādyañjana 33, 489,491
Saindhavādya taila 200,226
Sairīyataila 196
Somarājītaila 410
Somarājyādi cūrṇa 398
Somavalkādi lepa 572
Saugata añjana 499
Saureśvara ghṛta 354
Sauvarcaladi guḍikā 239
Sauvarcalādi cūrṇa 50,525
Sthalapadma-ghṛta 333
Sthalapadma-prayoga 330
Sthirādya ghṛta 264
Snuk-kṣirādi pralepa 73
Snuhīdugdhādi vartti 377
Snuhīpatra-prayoga 553
Snuhyādya taila 447
Snehalavaṇa 183

Srotojādi vartti 505
Svaguptādi leha 291
Svayaṅguptādi cūrṇa 596
Svarjikākṣāra taila 472
Svarjikādi pralepa 348
Svarjikādya taila 374
Svarṇabhasmādi yoga 533
Svalpa khadira-vaṭikā 468
Svalpacukra 68
Svalpapañcagavya ghṛta 181
Svalpapunarnavādya ghṛta 332
Svalpamaricādya taila 407
Svalpamāṣa taila 200
Svalparasonapiṇḍa 187
Svalpaśāliparṇyādi 48
Svalpasindūrādya taila 408
Svalpasūraṇa-modaka 78

HA

Haṃsapādi-taila 375
Haritaki-cūrṇa 347
Harītakī-prayoga 92,98, 106,228,338,415
Harītakī-rasāyana 574
Harītakī-leha 157
Harītakyādi 186,284
Harītakyādi kalka 552
Harītakyādi kvātha 319
Harītakyādi guḍikā 139
Harītakyādi cūrṇa 260,616
Harītakyādi modaka 140,616
Harītakyādi vartti 498
Haritāla-prayoga 311
Haridrā-kalka 396
Haridrā-ghṛta 112
Haridrādi 548
Haridrādi lepa 350
Harīdrādi vartti 501,513
Haridrādi leha 147
Haridrādya taila 441
Harīdrādyañjana 485
Haridrādvayādya taila 444
Hareṇvādi lepa 422
Havuṣādya ghṛta 272
Hastikarṇa-rasāyana 576
Hiṃsrādi lepa 347
Hiṃsrādya ghṛta 147
Hiṅgutrikaṭukādi cūrṇa 246
Hiṅgupuṣkaramūlādi cūrṇa 271
Hiṅgusauvarcalādi cūrṇa 246
Hiṅgvādi 539
Hiṅgvādi guḍikā 239
Hiṅgvādi cūrṇa 237,244,280
Hiṅgvādi taila 471
Hiṅgvādi puṭapāka 416
Hiṅgvādi lepa 99
Hiṅgvādi vartti 260
Hiṅgvādya guḍikā 270
Hiṅgvādya ghṛta 176
Hiṅgvādya cūrṇa 270
Hiṅgvamlādi cūrṇa 239
Hiṅgvaṣṭaka cūrṇa 91
Hriberādi 171
Hriberādi kaṣaya 43
Hriberādi kvātha 541
Hriberādi pānīyatraya 47
Hriberādi peyā 54

INDEX

III. General

A

Abhrakaśodhana-
māraṇavidhi 584
Abhrakaśuddhi 417
Abhyaṅga 649
Acchasneha 604
Ajīrṇauṣadhalakṣaṇa 10
Anagnisveda 609
Aṇgulyañjana 502
Añjana 483,639
Añjanaśalākā 640
Annamaṇḍa 91
Anuvāsana 620
Aparāpātana 540
Aphrodisiacs 596
Ardhamātrika basti 628
Āścyotana 639
Auṣadhapākalakṣaña 10
Avapīḍa 631

B

Bālukāsveda 21
Bastirāja 621
Bath 649
Bhānupāka 581
Bhramaṇa 650
Blood-letting 359
Blowing 631

C

Caturvidha sneha 610
Cauterization 190
Character of aguru 213
Character of camphor 212
Character of candana 213
Character of elā 213
Character of ghana
(mustaka) 213
Character of jātīphala 213
Character of khaṭṭāśī
(śālija) 213
Character of kuṅkuma 213
Character of kuṣṭha 213
Character of māṃsī 213
Character of murā 213
Character of nakha 213
Character of priyaṅgu 213
Character of pure musk 212
Character of reṇukā 213
Closed heating 582
Collyrium 483,639
Collyrium rod 640

D

Daily routine 648
Dantadhāvana 648
Dārvīrasakriyā 466
Dentition 553
Depilatory agent 536
Dhūmanetra 635
Dhūmapāna 635
Dhūmavartti 635
Dinacaryā 648
Dosage for children 548
Drava-sveda 610
Dṛṣṭiprasādana 640

E

Emesis 611
Enema pouch 621
Eye drops 639

F

Fasting 3

G

Gatactogogue 543
Gaṇḍūṣa 637
Gandhakaśuddhi 418
Garbhacyāvana mantra 539
Garbhaprada 532
Gargle 454,637
Godly treatment 34
Grīṣmartucaryā 652
Guḍapākalakṣaṇa 81

H

Head-evacuation 631
Head-pouch 516
Heating in the sun 581
Heat-sudation 610
Hemantartucaryā 650

J

Jalaukā-prayoga 452

K

Kāmbalika 50
Kavala 637
Khaḍyūsa 50
Kṣārabasti 629
Kṣaurādi 649
Kvāthakalpanā 11

L

Laṅghana 3
Lauhamāraṅavidhi 580
Lauhapāka 579
Lauhaśuddhi 417
Lekhana 640
Lepa-sveda 610
Liquid-sudation 610
Lomaśātana 535

M

Maṅḍūraśuddhi 417
Māraṅa dravya 580
Mātrānirdhāraṇa 10
Medhya rasāyana 575
Mouth-wash 465
Mukhadhāvana 465
Mūladhāraṇa 34

N

Nasal evacuation 631
Nasya 631
Nirūha 626
Non-unctuous enema 626
Nozzles 621

O

Oily massage 649
Okasātmya 653

P

Pācana 8
Pādalepa 601
Pañcamuṣṭika yuṣa 25
Pañcaprasṛtikī peyā 607
Paste-sudation 610
Pathya 7
Patividveṣa 545
Physical exercise 227,649
Picchilavasti 630
Pradhamana 631
Pratimarśa 631
Preparation of śukta (vinegar) 210
Pressed juice 631
Promotive therapy 574
Puṃsavana karma 533
Purgation 615
Purification of aromatic drugs 211
Purification of haridrā 211
Purification of Khaṭṭāśī 212
Purification of mustaka 211
Purification of nakha 211
Purification of śaileya 212
Purification of silhaka etc 212
Purification of vacā 211
Puṭapāka 582,639

R

Rasaśuddhi 418
Rasāyana 574
Romaśātana 535
Ropaṇa 640
Routine of the Healthy 648
Ṛtucaryā 650
Ṛtusandhi 653
Ṛtusātmya 653

S

Sadvṛtta 650
Sadyaḥsnehanas 607
Sadhyaḥsnehana Kṣīra 607
Sadyaḥsnehanī yavāgū 607
Śaradṛtucaryā 653
Sātmyalakṣaṇa 654
Saturation 7,639,641
Śirāvyadha 644
Śirobasti 516
Śirovirecana 631
Śiśirartucaryā 651
Smearing 631
Smoking 635
Smoking pipe 635
Snāna 649
Sneha 603
Snuffing 631
Stanakaṭhinīkaraṇa 544
Stanasthirakara 545
Stanyaśodhana 543
Steam-sudation 610
Sthālīpāka 581
Sudation 608,610
Surgical intereference 190
Surgical operation 299,504
Sustha 648
Sūtagarbhakarañjabīja-prayoga 601
Svasthavṛtta 654
Sveda 608

T

Takra-prayoga 74,269,313
Tāpasveda 610
Tarpaṇa 7,639,641

U

Ubhayapañcadaśaka yantra 540
Ubhayatriṃśaka yantra 540
Udvarttana 649
Ulva 546
Unction 603
Unctuous enema 620

V

Vaitaraṇa basti 629
Vamana 4,611
Vandākaśiphā-dhāraṇa 351
Varṣartucaryā 652
Vasantartucaryā 651
Vāṣpa-sveda 610
Venesection 190,324,343,351,523,644
Vessel-heating 582
Virecana 615
Vṛṣya 596
Vyāyāma 649

W

Warm water 5
Water processed with pippalī 22
Wholesome diet 8

Y

Yavāgū 5,242
Yavāgvādikalpanā 6
Yavapeyā-prayoga 240